मानसी सेवाके रूपमें. पुष्टिप्रवाहमर्यादामें इस भूतलपर भगवत्सेवा और भगवत्कथा दोनों अथवा सेवा या कथा में से किसी एकके भी निभ पानेपर भगवद्भक्तको होती भगवत्स्वरूपानुभूति अथवा भगवद्गुणानुभूति ही पुष्टिमार्गीय फल होता है, यह कहा गया है. सिद्धान्तरहस्यमें सामिभुक्तके समर्पण अथवा असमर्पितके उपभोगकी असावधानीसे रहित सर्वसमर्पणरूपा भगवत्सेवाके भलीभांति निभ पानेपर सर्वत्र सर्ववस्तुओंमें तिरोहिततया अवस्थित ब्रह्मात्मकताका प्रादुर्भाव हो जाता है, यह दिखलाया गया है. नवरत्नमें—लौकिक तथा वैदिक कर्तव्योंको तो भक्त स्वस्थताके साथ निभा नहीं पाता परन्तु भगवदाज्ञा या गुर्वाज्ञा में से जिसके भी अनुसार चित्तकी भगवत्सेवापरता निभे उसे निभाते हुवे सुखसे जीवनयापन करना चाहिये. अतएव जीवनके दरमियान आनेवाली ऐसी सभी अस्वस्थताको साक्षिभावके साथ निभाते हुवे तथा चित्तमें होते सभी उद्वेगोंको भी भगवल्लीलाके रूपमें निहार पानेवाला जीवन्मुक्त ही होता है, यह दिखलाया गया है. अतएव अन्तःकरणप्रबोधमें जीवन्मुक्तिका यही स्वरूप इस तरह दिखलाया गया है कि इहलोकमें अपने अलौकिक कर्तव्योंको निभानेसे भी बढ़ कर भगवदाज्ञाका अनुसरण ही उत्कृष्ट होता है. विवेकधैर्याश्रयमें चतुर्विध विवेक, चतुर्विध धैर्य तथा चतुर्विध आश्रय को निभाना जीवन्मुक्तिके रूपमें बिरदाया गया है. कृष्णाश्रयमें इतरसर्वमें आश्रयभावसे रहित हो कर केवल श्रीकृष्णका अनन्याश्रय निभानेवाला जीवन्मुक्त होता है यह दिखलाया गया है. चतुश्लोकीमें श्रीकृष्णके सर्वात्मना स्मरण तथा भजन को निरन्तर आजीवन निभा पानेवाला जीवन्मुक्त ही होता है कह कर स्पष्ट किया गया है. भक्तिवर्धिनीमें इसे भगवद्व्यसनोत्तरभाविनी कृतार्थताके रूपमें निरूपित किया गया है. संन्यासनिर्णयमें इसे भगवद्विरहानुभूतिजन्य विकलतावश निरन्तर भगवद्-गुणैकनिष्ठामें जीवनयापनके रूपमें वर्णित किया गया है. निरोधलक्षणमें भगवत्सेवाके अनवसरमें व्रजभक्तोंके से दुःखकी तथा भगवत्सेवाके अवसरमें उनके से सुखकी तरह दुःखी तथा सुखी हो पानेके रूपमें मान्य किया गया है. अन्तमें सेवाफलमें भी अलौकिकसामर्थ्य अर्थात् भगवत्सेवा और भगवत्कथा में भगवत्सानुभावका आनन्द ले पानेवाला जीवन्मुक्त अर्थात् निर्दोष भगवदानन्दके भोक्ताके रूपमें स्वीकारा गया है. अन्तर्गृहगता गोपीजनोंकी तरह भगवत्स्वरूपमें सायुज्य पा लेनेवाले अथवा सर्वात्मभाववाले अन्यान्य व्रजभक्तोंकी तरह दिव्यलोकोंमें भगवान्की नित्यलीलामें

नित्यभजनोपयोगी देह पा लेनेवाले भागवतके एकादशस्कन्ध या द्वादशस्कन्ध में प्रतिपाद्य मुक्तिलीला या आश्रयभावापत्ति लीला के विषय बनते हैं. यह भी वहीं सेवाफलमें "सेवा करनेवालेकी फलानुभूतिके तीन प्रकार होते हैं: अलौकिकसामर्थ्य सायुज्य अथवा वैकुण्ठादि दिव्यलोकोंमें भगवत्सेवोपयोगी देहकी प्राप्ति. सायुज्य हो या सेवोपयोगी देह हो कालनियत फल नहीं होते परन्तु भगवदिच्छानियत हो कर ही हमें फलतया मिलते हैं." ऐसे निरूपणद्वारा समझाया गया है. ग्रन्थोपसंहारमें महाप्रभु हमें आश्वस्त करते हैं कि "इयं सदा अवश्या भाव्या अन्यत् सर्वम् मनोभ्रमः. तदीयैरपि तत् कार्यं पुष्टौ नैव विलम्बयेत्!".

## :: तामसफलप्रकरणके सात अध्यायोंमें वर्णित भगवान्‌के छह गुणधर्मों और सातवें स्वयं धर्मिरूप भगवत्स्वरूप की मीमांसा ::

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञान-वैराग्ययोश्चैव षण्णां 'भग' इतीरणा॥

अपने आद्यतम ग्रन्थ तत्त्वार्थदीपनिबन्धमें महाप्रभुने यह स्पष्टीकरण दिया है कि वेदान्तमें जिस परम तत्त्वको ब्रह्मत्वेन परिभाषित किया गया है, भगवद्गीतामें परमात्मत्वेन तथा भागवतमें भगवत्त्वेन, उसी परिभाषाशैलीका अनुसरण करते हुवे प्रस्तुत निबन्धके भी प्रथम शास्त्रार्थ द्वितीय सर्वनिर्णय एवं तृतीय भागवतार्थ रूपी तीन प्रकरणोंमें उस परम तत्त्वके ब्रह्म परमात्मा और भगवान् होनेके पक्षोंकी विवेचना उन्हें अभिप्रेत है. तद्नुसार श्रीमद्भागवत षड्गुणयुक्त भगवान्‌की लीलाओंके निरूपणसे अनुप्रेरित भक्तिरसप्रतिपादक एक विलक्षण भगवच्छास्त्र है. अतः यहां वर्णित प्रत्येक लीलामें मूलतः मीमांस्य ऐश्वर्य वीर्य यश श्री ज्ञान वैराग्य रूप भगवान्‌के छह गुणधर्म और सातवां स्वयं भगवान्‌का धर्मिरूप ही होता है. स्वयं भगवान्, उनके गुणधर्म; और लीलाओं से अतिरिक्त जो व्यक्तिवर्णना या उपकथा भागवतमें मिलती हैं, उनका भी परमाशय भगवत्स्वरूप भगवल्लीला या भगवद्गुणों के निरूपणमें ही है. अतः भगवदितर किसी भी व्यक्ति या चरित्र को प्रमुखतया यहां वर्णनीय माना नहीं जा सकता. तत्तद्व्यक्तिसापेक्ष या तत्तत्कथासापेक्ष अनुयोगीभूत भगवत्स्वरूप भगवच्चरित्र अथवा भगवद्गुणों



के प्रतियोगितया अपेक्षित होनेके कारण ही उनकी कुछ वर्णनोपयोगिता होनेसे उनकी कथा भी कही गयी है.

तद्नुसार फलप्रकरणगत सात अध्यायोंमें निरूपित भगवद्गुणोंकी मीमांसाके लिये अब क्रमशः प्रवृत्त होना चाहिये.

साधनप्रकरणोक्त साधनोंके कारण भक्तिका विकास व्यसनदशामें हो जानेसे छह गुणोंवाले भगवान्‌की फलरूपतया अनुभूति जिस तरह व्रजभक्तोंको हुयी उसका वर्णन इन सात अध्यायोंमें किया जाता होनेसे इन्हें 'फलप्रकरण' कहा जाता है.

ये सात अध्याय ऐश्वर्यादि छह गुणधर्म और सातवें धर्मिस्वरूप स्वयं भगवान् मेंसे एक-एकको प्रधान वर्ण्यविषय मान कर भगवान्‌की फलात्मिका लीलाओंका निरूपण करते हैं.

भगवान्‌का प्राकट्य लोकमें रूप और नाम के द्वैविध्यसे होता होनेसे भक्तोंके साथ रमणमें भी ऐसा द्वैविध्य वर्णित हुवा है. आत्मा अन्तःकरण इन्द्रिय प्राण और शरीर के पञ्चविध भेदोंके कारण रूपरमण भी पांच अध्यायोंमें पञ्चधा वर्णित हुवा है. प्रवृत्ति और निवृत्ति के शब्दद्वैविध्यवश नामरमणका निरूपण दो अध्यायोंद्वारा द्विधा किया गया है.

[१]एतदन्तर्गत प्रथम अध्यायमें भगवान्‌के ऐश्वर्यगुणका निरूपण करना अभीष्ट है. 'ऐश्वर्य' पदका अर्थ होता है: "कर्तुम् अकर्तुम् अन्यथाकर्तुं सामर्थ्य". अव्यक्त वेणुनादद्वारा भी अपने भक्तोंको अपने निकट बुलानेकी लीला भगवान्‌के 'कर्तुं-सामर्थ्य' रूप ऐश्वर्यको दिखलाती है. वृन्दावनसे लौट कर पुनः व्रज जानेकी आज्ञा व्यक्तवाणीद्वारा मिलनेपर भी व्रजगोपिकाओंका लौट कर न जाना भगवान्‌के 'अकर्तुं-सामर्थ्य' रूप ऐश्वर्यका द्योतन है. इस तरह अपने द्विविध सामर्थ्यद्वारा समाहूत गोपिकाओंके बीचमें भगवान्‌का तिरोहित भी हो पाना भगवान्‌की 'अन्यथाकर्तुं-सामर्थ्य' रूप ऐश्वर्यका निरूपण

है. यों छब्बीसवें अध्यायमें प्रकृतलीलोपयोगी ऐश्वर्यरूप गुणधर्म वर्णित हुवा है.

[२]भगवान्‌को अभीष्ट रासलीलामें अपनी घनिष्ठ अपेक्षाके बोधके कारण पनपे गर्वरूप दोषके कारण गोपिकाओंकी बाह्यानुभूतिमें भगवान्‌के तिरोहित होनेपर भी, अर्थात् कायिकरमणके अभावमें भी उन गोपिकाओंमें अन्तःप्रविष्ट भगवान्‌द्वारा वाचिक और मानसिक रमण भगवान्‌के प्रकृतलीलोपयोगी असाधारण वीर्यरूप गुणधर्मका द्योतन सत्ताईसवें अध्यायमें किया जाना अभिप्रेत है.

[३]भगवान्‌के तिरोहित हो जानेपर गोपिकाओंद्वारा गाया गया गीत, अर्थात् गोपीगीत भगवान्‌के यशका ही गान होनेसे इस अठ्ठाईसवें अध्यायमें भगवान्‌के यशोरूप गुणधर्मका निरूपण हुवा है.

[४]गोपीगीतमें भगवद्‌गुणगानकी प्रक्रियाद्वारा गोपिकाओंके गर्वरूप दोषका प्रक्षालन हो जानेपर श्लाघ्यतम दिव्यतम एवं मधुरतम स्वरूपश्रीके साथ भगवान्‌का पुनः गोपिकाओंके बीच प्रकट हो जाना भगवान्‌के श्रीरूप गुणधर्मको इंगित करता है. सो उनत्तीसवां अध्याय भगवान्‌के श्रीरूप गुणधर्मके निरूपणार्थ है.

[५]भक्तोंमें प्रकट होनेवाला भगवज्ज्ञानरूप गुणधर्म भगवत्स्वरूप भगवद्‌गुण एवं भगवल्लीला के स्वतःसिद्ध ज्ञानके रूपमें ही प्रकृतलीलोपयोगी हो सकता है. परमज्ञेयरूप भगवान् स्वयं ज्ञानरूप भी न हों तो भगवान्‌का स्वरूप स्वयंप्रकाश है ऐसा सिद्ध नहीं हो पाता. अतः ज्ञेयतया भक्तके समक्ष भगवान् जैसे अपना लीलाविहार प्रकट करते हैं वैसे ही भक्तके भीतर ज्ञानतया भी अपने लीलाविहारको प्रकट करने भगवान् समर्थ होते हैं. अन्तिम वैराग्यरूप गुणधर्म भक्तोंमें तो भगवदितर विषयोंमें वैराग्यके रूपमें तथा भगवान्‌में भक्तेतरोंमें वैराग्यरूप होना चाहिये. सो ये दोनों ही गुणधर्म धर्मिरूपेण प्रकट हो जानेवाले भगवान्‌की संनिधि या संयोग में उनकी स्वरूपश्रीके साथ लीलासौष्ठव प्रकट न करते होनेसे इनका



आगामी अध्यायों कि जहां अप्रधान संनिधि अथवा असंनिधि या संयोगान्तरायरूप वियोग का वर्णन किया जाना है वहीं होगा. यहां तो प्रकट धर्मीरूप भगवान्‌की भक्तजनोंके साथ की गयी रासक्रीड़ा ही निरूपित की गयी है. अतः इस मध्यपाती तीसवें अध्यायमें क्रमोपात्त ज्ञान या वैराग्य गुणधर्मोंको प्रधानतया वर्ण्यविषय बनानेके बजाय स्वयं धर्मिरूपेण की गयी लीलाका ही निरूपण किया गया है.

[६]फलतया अनुभूत होते भगवत्स्वरूपमें अपने चित्तको प्रवण रखनेके बजाय कौतुकवश भी अन्यान्य कर्मोंमें परायण होना भक्तोंके लिये भगवदितरमें वैराग्यवृत्ति और भगवद्रतिकी फलानुभूतिमें विघ्नकारी बन जाता है. अतः ऐसे कर्मोंमें अपना औदासीन्यरूप वैराग्य गुण भगवान् प्रकट करते हैं. ऐसे कर्मोंके अनुष्ठानमें बहक जानेवाले भक्तोंकी फलानुभूतिमें तन्मयताकी क्षतिको दूर कर पुनः फलानुभूतिमें ही उन्हें तत्पर बनाये रखनेमें भगवान्‌के भक्तैकरतिरूप वैराग्य गुणधर्मकी कथा इकत्तीसवें अध्यायमें कही गयी है.

[७]संयोगान्तरायरूप वियोगमें भक्तोंके बाह्येन्द्रियोंसे ज्ञेय न बननेपर भी लीलाविशिष्ट भगवान् भक्तोंके भीतर ज्ञानतया निरन्तर समाहित रहते होनेसे भगवान्‌के ज्ञानरूप गुणधर्मका चमत्कारी अनुभव बत्तीसवें अध्यायमें अर्थात् युगलगीतका प्रमुख प्रतिपाद्यविषय बना है.

इस तरह रासलीलाकी औपनिषदिक मीमांसाको भलीभांति बुद्धिगत करनेपर इस भगवल्लीलाका अवगाहन श्रीकृष्णके परब्रह्म परमात्मा होनेके सुनिश्चित माहात्म्यज्ञानसे हमारी बुद्धिको शुद्ध बना पाता है. इसी तरह इस रासलीलाकी भागवती मीमांसाको भी भलीभांति हृद्‌गत कर लेनेपर उस परब्रह्म-परमात्माकी आत्मरतिका ही व्याकरण करनेवाली यह रासलीला भगवान् श्रीकृष्णके लिये हमारे हृदयको सुदृढ़-सर्वतोधिक-स्नेहसे परिपूर्ण बना पाती है. यही ''रासलीलैकतात्पर्यः कृपयैतत्कथाप्रदः'' महाप्रभु श्रीवल्लभाचार्यचरणके निबन्ध सुबोधिनी तथा प्रकरणग्रन्थों की परस्पर एकवाक्यताके आधारपर परम-चरम तात्पर्यविषयीभूत सारभूत उपदेश है.

तथास्मास्वनुगृह्णीथाः येन त्वच्चरणाब्जयोः।
स्मृतिर्यथा न विरमेद् अपि संसरतामिह॥
कृष्णाय वासुदेवाय हरये परमात्मने।
प्रणतक्लेशनाशाय गोविन्दाय नमोनमः॥
जयति श्रीवल्लभार्यो जयति च विठ्ठलेश्वरः प्रभुः श्रीमान्।
पुरुषोत्तमश्च तैश्च निर्दिष्टा पुष्टिपद्धतिर्जयति॥
श्रीवल्लभमताभ्यासे कृपया येन दीक्षितः।
दीक्षितं तमहं नौमि श्रीतातचरणं सदा॥

सकलान्तरात्मा श्रीहरिः प्रसन्नोऽस्तु

**श्रीमहाप्रभूत्सव : ५२१**
**विक्रमसंवत् : २०५४**

**गोस्वामी श्याममनोहर**
**(पार्ला - किशनगढ़)**



॥ श्रीकृष्णाय नमः ॥

## ॥ दशमपूर्वार्धतामसफलप्रकरणनिबन्धः ॥

**अतः परं सप्तभिर्वै फलं कृष्णो निरूप्यते।**
**षड्गुणैः सहितः पूर्वम् ऐश्वर्यं त्रिविधं मतम्॥१॥**
**ध्वनिनाहूय वाक्येन प्रेषयत्येव निश्चितम्॥**
**फले वाक्यं न कर्तव्यं दोषश्चेद् वारयिष्यति॥२॥**
**इति तासामगमनं गर्वेऽन्तर्भाव ईर्यते॥**
**[1]द्रुतमेव हरेर्मार्गः सर्वोत्कृष्टो हि बुध्यताम्॥३॥**
**सम्बन्धमात्रे सञ्जाते बहिर्वान्तरथापि वा॥**
**कायेन मनसा वापि वचसा वापि सर्वथा॥४॥**
**रमयत्येव हि निजान् सर्वथा नैव मुञ्चति॥**
**अन्तर्धानकथा प्रोक्ता वाक्यं चापि निरूपितम्॥५॥**
**अध्यायद्वितयेनैव सकृद्भोगं निवारयन्॥**
**आविर्भावं करोत्येष तथा वाक्यानि तुष्टये॥६॥**

---

### श्रीपुरुषोत्तमानां निबन्धयोजना

अतः परं सार्धसप्तदशभिः फलप्रकरणं विचारयन्ति **अतः परम्** इत्यादि—

प्रकरणसमाख्याबीजम् आहुः **फलम्** इत्यादि. तथाच पूर्वोक्त-साधनपञ्चक-करणरूपासक्त्युद्रेकानन्तर-प्राप्य-षड्गुणयुत-पूर्णभगवद्रूप-फल - निरूपणाद् अस्य 'फलप्रकरणा'ख्या इति अर्थः. अत्र ऐश्वर्यादीनां पूर्वोक्तः क्रमो नेति प्रकारोऽपि विलक्षणः इति बोधयितुं प्रथमतः प्रथमाध्यायार्थम् आहुः **पूर्वम्** इत्यादि॥१॥

त्रैविध्यं स्पष्टयन्ति **ध्वनिना** इत्यादि. ऐश्वर्यंहि स्वातन्त्र्यम्. तत्र कर्तुम् अकर्तुं च सामर्थ्यम् अर्धेन उक्तं ततः पादोनेन अन्यथाकर्तुं सामर्थ्यम्. तुरीयपादेन **द्रुतमेव** इति अग्रिमसहितेन समुदितं तत्त्रयं; क्रमेणैव त्रयं वा.

द्वितीयतृतीययोः अर्थम् आहुः **हरेर्** इत्यादि **बुध्यताम्** इत्यन्तो अध्यायद्वयार्थः. तत्र हेतुम् आहुः **सम्बन्ध...** इत्यादिसार्धेन, तथाच इति बोधयितुम् अध्यायद्वयमेव निरूपितम् इति अर्थः.

चतुर्थार्थम् आहुः **सकृद्** इत्यादि. **तुष्टये** इति वदति इति शेषः.

---

१. **अयमेव** इति पाठः प्राचीनपुस्तके दृष्टः, सएव साधुः, तथापि मूले श्रीपुरुषोत्तमानां पाठो रक्षितः.

रमते च रमातोऽपि विशेषेण रतिप्रदः।
परोक्षेऽपि रतिं चक्रे तेन वीर्यमुदीरितम्॥७॥
यशस्तु वचनैः स्पष्टं श्रीश्चाविर्भावतः स्फुटा।
चतुष्टयं निरूप्याग्रे धर्मी कृष्णो निरूपितः॥८॥
भोगे मध्ये महत्सौख्यं तस्मादेवं निरूपितम्।
स्वरूपेण रतिः प्रोक्ता न धर्मे रसरूपतः॥९॥
ततो वैराग्यभावेन फलदाता निरूप्यते।
कौतुकेनापि पूर्वेषां करणं न सुखायहि॥१०॥
अतः कौतुकरीत्यापि गताः सर्वे हरान्तिके।
कालेनाग्रस्तमूर्धानः कृष्णेनैव विमोचिताः॥११॥
अतस्तत्कर्म हरिसात्कृत्वा व्रजमुपाययुः।
तमसि त्रितयं प्रोक्तं हरिस्तत्राधिदैविकः॥१२॥
सतु तूष्णीं भवत्यत्र कालस्त्वाध्यात्मिको मतः।
हरभृत्यास्तु भूतानि स्त्रीणां हर्ता ततो निशि॥१३॥
'शंखचूड' इति प्रोक्तस्तं च हत्वा विमोचिताः।
सुदर्शनो यथा जीवस्तथा सत्त्ववरो मणिः॥१४॥
कर्म स्वस्मिन् प्रतिष्ठाप्य रामे रत्नं न्यरूपयत्।
एवं कालादिसम्बन्धात् तामसात् स्वान् न्यवारयत्॥१५॥

---

### योजना

पञ्चमार्थम् आहुः **रमते** इति अर्धेन. प्रयोजकविभागं स्पष्टयन्ति **परोक्षे** इत्यादि.

क्रमं भिन्दन्तः पञ्चमार्थम् आहुः **चतुष्टयम्** इत्यादिसार्धेन. **एवम्** इति॥२-९॥

क्रमं भित्वा षष्ठार्थम् आहुः सार्धैः षड्भिः **ततः** इत्यादिभिः. वैराग्येण फलदातृत्वं व्युत्पादयन्ति **कौतुकेन** इत्यादिसार्धेन. **पूर्वेषाम्** इति अवैष्णवकर्मणाम्. 'मूर्ध'पदं मुख्यबोधकम्. विमोचनेन सिद्धं फलान्तरम् आहुः **अतस्तत्कर्म** इति अर्धेन. एतेन कदाचित् दैवगत्या मौर्ख्यादिना कृतम् अन्यदैवतं कर्म ''यत्करोषि यदश्नासि'' इति आज्ञां हृदि अनुसन्धाय भगवदर्पणं कर्तव्यम् इति उक्तम्.

द्वितीयफलदानस्यापि वैराग्यहेतुकत्वं व्युत्पादयन्ति **तमसि** इत्यादिद्वाभ्याम्. **काल...** इति शिवरात्रिरूपः. **सत्त्ववरः** इति सत्त्ववृत्तिषु श्रेष्ठः. वैराग्यस्वरूपं



पूर्वसिद्धपरित्यागो वैराग्यं कालदोषतः।
ज्ञानं तु गुणगानं हि परोक्षे तत् प्रतिष्ठितम्॥१६॥
प्रत्यक्षे भजनं श्रेष्ठम् एवं चेद् रोधनं स्थिरम्॥
पुरुषाणां तथा स्त्रीणां रात्रौ च दिवसे तथा॥१७॥
ज्ञानं भक्तिश्च सततं चक्रवत् परिवर्तते॥

॥ इति दशम-पूर्वार्ध-तामस-फलनिबन्धः॥

---

### योजना

सहेतुकम् आहुः **पूर्व...** इत्यादि. **पूर्वसिद्धपरित्यागः** इति भगवत्परत्वपरित्यागः. एतस्य ''यावदन्याश्रयस्तावद्'' इति न्यायेन भगवदुपेक्षाहेतुत्वाद् वैराग्यत्वम् इति अर्थः.

सप्तमार्थम् आहुः **ज्ञानम्** इति पादेन.

प्रकरणे यत् सिद्धं तद् आहुः **परोक्षे** इत्यादि. तामसप्रकरणीयम् उद्धारप्रकारम् आहुः **ज्ञानं भक्तिश्च** इत्यादि॥१०-१७॥

॥ इति श्रीपुरुषोत्तमानां तामसफलनिबन्धयोजना॥

### ॥ गोष्ठीशालरामचन्द्रभट्टात्मज-घनश्यामभट्टकृता सूचिका॥

अतः परं साधने कृते भक्त्युद्रेकानन्तरं प्राप्यषड्गुणयुत-पूर्णभगवद्रूप-फलनिरूपणाद् अस्य फलप्रकरणत्वम्. अत्रापि सप्तभिः अध्यायैः निरूपणम्. क्रमस्तु ऐश्वर्यादीनां न विवक्षितः, पुष्टिफलत्वात्, क्रमातिक्रमो न दोषाय किन्तु मध्ये भोगे सुखविशेषोऽपि, अत्र रमणरूपं फलं देयमिति. रमणस्य रूपनामविभेदेन द्विरूपत्वाद्—रूपेण रमणे पञ्च अध्यायाः, आत्म-मन-इन्द्रिय-प्राण-शरीरात्मकत्वाद् रूपस्य. नाम्ना रमणे अध्यायद्वयं, शब्दस्य प्रकृतिविकृतिभेदेन द्विरूपत्वात्.

तत्र प्रथमे अध्याये ऐश्वर्यनिरूपणम्. ऐश्वर्यं नाम स्वातन्त्र्यं—कर्तुम्-अकर्तुम्-अन्यथाकर्तुं सामर्थ्यम् इति यावत्. तत्र नादद्वारा आह्वानं कृत्वा वाक्यद्वारा गृहगमनाय प्रेरणं कर्तुं सामर्थ्यरूपम् ऐश्वर्यम्. भगवद्वाक्येन गृहगमनं न कृतम्

इत्यपि भगवतो अकर्तुं सामर्थ्यरूपम् ऐश्वर्यम्. तदनन्तरं गर्वे अन्तर्धानम् इति अन्यथाकर्तुं सामर्थ्यरूपम् ऐश्वर्यम्. एवं प्रथमे त्रिविधम् ऐश्वर्यं स्फुटम्.

द्वितीये 'परोक्षेऽपि रतिं चक्रे'इति वीर्यम्.

तृतीये स्तुतिवचनैः यशः स्फुटमेव.

चतुर्थे प्रादुर्भावनिरूपणेन श्रीः स्पष्टैव.

तदनन्तरं धर्मिनिरूपणं पञ्चमे.

अत्र प्रादुर्भावरूपश्रीनिरूपणानन्तरं रमणस्य आवश्यकत्वाद् वैराग्यज्ञानयोस्तु रमणप्रतिबन्धकत्वात् पूर्वम् अनिरूपणम्. पुष्टिमार्गीयवैराग्यस्य भगवदितरत्यागरूपत्वाद् भगवत्स्वरूपफलप्राप्त्यनन्तरमेव भगवत्युत्तमत्वज्ञानेन भगवदितरत्यागसम्भवात्. पुष्टिमार्गीयज्ञानस्यापि गुणगानरूपत्वात् प्रादुर्भावदशायां तस्य असम्भवाद् विरहदशायामेव सम्भवात् पूर्वम् अनिरूपणम्.

षष्ठे वैराग्यादिनिरूपणं स्पष्टमेव अन्याश्रयनिवृत्तिरूपम्.

ततो ज्ञाननिरूपणं सप्तमे स्पष्टमेव विरहदशायाम्.

एवं सप्तभिः अध्यायैः फलप्रकरणनिरूपणम्.

॥ इति दशमपूर्वार्धतामसफलप्रकरणविभागसूचिका ॥

## ॥ श्रीगोकुलरायकृत-दशमपूर्वार्धतामसफलप्रकरणाध्यायार्थः ॥

तामसप्रकरणान्तर्गतफलप्रकरणे ध्वनिना आह्वानं कर्तुं समर्थत्वाद्, गमनबोधकवाक्यैः गमनम् अकर्तुं समर्थत्वात्, प्रभुवाक्योल्लङ्घनदोषं गुणं कर्तुं



समर्थत्वाद् गर्वे अन्तर्धानेनापि अन्यथाकर्तुं समर्थत्वाद् ऐश्वर्यनिरूपणं षड्विंशे अध्याये.

तामसप्रकरणान्तर्गतफलप्रकरणे बाह्याभ्यन्तरभेदेन भगवत्सम्बद्धानां भक्तानां दोषेऽपि भगवता परित्यागाभावस्य सर्वोत्कृष्टस्य भगवन्मार्गस्य ज्ञापनार्थं कायेन रमणाभावे मनसा वाचा वापि रमयेद् इति ज्ञापनार्थं परोक्षेणापि रतिकरणाद् वीर्यनिरूपणं सप्तविंशे अध्याये.

तामसप्रकरणान्तर्गतफलप्रकरणे वचसा रमणज्ञापकगोपिकावचनैः यशोनिरूपणम् अष्टाविंशे अध्याये.

तामसप्रकरणान्तर्गतफलप्रकरणे सकृद्भोगनिवारणार्थम् आविर्भावकरणाद् भक्तान्तःकरणसन्तोषार्थं वाक्यकथनात् च ततएव मरणरूपापत्तिनिवारणात् श्रीनिरूपणम् ऊनत्रिंशे अध्याये.

तामसप्रकरणान्तर्गतफलप्रकरणे षड्गुणरूपाभिः स्वामिनीभी रसरूपेण स्वरूपेण रमणाद् धर्मिनिरूपणं त्रिंशे अध्याये.

तामसप्रकरणान्तर्गतफलप्रकरणे कौतुकेनापि कृतानाम् अवैष्णवकर्मणां दुःखहेतुत्वेन तत्र भगवतः औदासीन्यबोधनात्, तत्रापि भक्तवत्सलेन भगवतैव भोचने भक्तैः तत्कर्मपरित्यागाद्, मर्यादारमणेऽपि शङ्खचूडसम्बन्धकथनेन भगवतः औदासीन्यभावबोधनाद् वैराग्यनिरूपणम् एकत्रिंशे अध्याये.

तामसप्रकरणान्तर्गतफलप्रकरणे विरहे गुणगानस्य ज्ञानरूपत्वाद् ज्ञाननिरूपणं द्वात्रिंशे अध्याये.

॥ इति श्रीगोकुलरायकृत-दशमपूर्वार्धतामसफलप्रकरणाध्यायार्थः ॥

## ॥ श्रीमद्भागवतदशमस्कन्धार्थानुक्रमणिका ॥

**पञ्चाध्याय्यां निशि क्रीडा सर्पाद् नन्दस्य मोक्षणम्।**
**शङ्खचूडवधः पश्चाद् गोपीगीतं ............ ॥१॥**

### श्रीद्वारिकेशानां टीका

अध्यायपञ्चकम् अनुक्रामन्ति —

### पञ्चाध्याय्यां निशाक्रीडा

**पञ्चाध्यायाम्** इति, पञ्चानाम् अध्यायानां समाहारः पञ्चाध्यायी, तस्यां **निशाक्रीडा** निशायां निशायाः निशायाः निशायै निशया निशां निशा वा क्रीडा. आक्रीडा वा. "'क्रीड़' विहारे" विहारः इति यावत्. हरणं प्रापणं स्तेयं नाशनं स्वीकारः. तत्र प्रथमे प्रापणम्. द्वितीये स्तेयम्. तृतीये नाशनम्. चतुर्थे स्वीकारः. पञ्चमे विहारः. तथाहि प्रथमं भगवानपि व्रजसीमन्तिन्यो मद्दत्तं फलं प्राप्नुवन्तु इति इच्छया वेणुनादं चक्रे. ततः व्रजरमण्यो अन्योन्यम् अलक्षितोद्यमाः भगवन्तम् आजग्मुः प्रापुः. 'या प्रापणे', ययुः अभिययुः. "ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या...,". "चैद्यः सिद्धिं यथा गतः" प्राप्तः. "यान्ति तन्मयतां हि ते...". "तां दृष्ट्वान्तिकमायाताः...". "तद् यात..." प्रतियात. "चिन्तामापुर्दुरत्ययाम्...". संत्यज्य सर्वविषयांस्तवपादमूलं...प्राप्ताः". "ध्यानेन याम पदयोः पदवीम्...". "लब्ध्वापि वक्षसि पदम्...". "तन्नः प्रसीद वृजिनार्दन तेङ्घ्रिमूलम्..." प्राप्ताः. "ताभिः समेताभिः"."एवं भगवतः कृष्णात् लब्धकामाः". "तत्रैवान्तरधीयत" अन्तर्द्धानं प्राप्तः. एवं च "भगवानपि..." इति त्रिभिः भगवत्कृतः स्वप्राप्त्युद्यमः. "निशम्य गीतं तद्..." इति त्रयोदशभिः कुमारिकादीनां भगवत्प्राप्तिः. "तां दृष्ट्वान्तिक..." इति एकादशभिः प्राप्तानां व्रजस्त्रीणां परीक्षार्थं भगवद्वचांसि. "इति विप्रियमाकर्ण्य..." इति त्रिभिः व्रजयोषितां चिन्ताप्राप्तिः. "मैवं विभोर्हति भवान् गदितुम्" इति एकादशभिः भगवत्प्राप्त्युदर्काणि व्रजाबलावचनानि. "इति विक्लवितम्..." इति सप्तभिः भगवतः दया-लीलामानान्तर्द्धानानि. प्राप्तिरात्मनः इति आत्मना प्रथमा लीला षट्चत्वारिंशत् संस्काराः आत्मनः प्रथमस्कन्धीय-द्वादशाध्यायस्थाः "एष ह्यस्मिन्..." इति पद्यसुबोधिन्यां स्फुटः इति ततो अवगन्तव्याः (४८.अष्टचत्वारिंशच्छ्लोकाः. इति षड्विंशाध्यायसंग्रहः) ॥२६॥



द्वितीये स्तेयं मनसः. स्तेनस्य भावः कर्म वा. चौरो यथा अलक्षितः स्थित्वा अतिगूढं वस्तु चोरयित्वा ततः गच्छति तथा अन्तर्हितः भगवान् व्रजयोषाणाम् अतिगूढं मनः हृत्वा गतः. ततः हृतवस्तुभिः स्तेनस्य विचयनादिकं क्रियते एव. तदुक्तं..."मनोरमालापविलासविभ्रमैः आक्षिप्तचित्ता प्रमादाः...". "...नो मनः. नन्दसुनूर्गतो हृत्वा...". "कृष्णोऽहं पश्यत् गतिं ललितामिति तन्मनाः". "चेरुर्गोप्यो विचेतसः...". "...नय मां यत्र ते मनः...". "तन्मनस्काः...". एवं च "अन्तर्हिते भगवति..." इति सपादत्रिभिः तापलीला-भगवद्गुणगानानि उद्देशतः उक्तानि. "विचिक्युरुन्मत्तकवद्..." इति पादोनदशभिः तापस्य लक्षणम्. "इत्युन्मत्तवचोगोप्यः..." इति अर्द्धेन तापस्य फलम्. "लीला भगवतः..." इति सार्द्धनवभिः लीलायाः लक्षणम्. "एवं कृष्णं पृच्छमाना..." इति एकेन लीलायाः फलम्. "पदानि व्यक्तमेतानि..." इति दशभिः भगवतः लक्षणम्. "इत्येवं दर्शयन्त्यस्ताः..." इति अर्द्धेन भगवत्फलम्. "...यां गोपीमनयत्..." इति सार्द्धनवभिः गुणातीतायाः मानान्तर्द्धानतापाः. गानस्यतु लक्षणं तृतीये. फलं चतुर्थे (एवं ४४. चतुश्चत्वारिंशच्छ्लोकाः इति सप्तविंशध्यायसंग्रहः) ॥२७॥

एषाम् अदर्शने. अष्टाविंशे दर्शनाभावो गोपीनां. तेन वाक्प्राणव्यापाराः."..-दयितदृश्यताम्..." "...सरसिजोदरश्रीमुषादृशा" "जलरुहाननं चारु दर्शय...". ..."घनरजस्वलं दर्शयन्मुहुः". "प्रियप्रेमवीक्षणम्". "त्रुटिर्युगायते त्वामपश्यताम्". "जडउदीक्षतां पक्ष्मकृद्दृशाम्". ..."प्रहसिताननं प्रेमवीक्षणं", "बृहदुरः श्रियो वीक्ष्य धाम ते...". वाक्प्राणैस्तु तृतीया स्यात्. गोप्यः ऊचुः "त्वयि धृतासवः". "मधुरया गिरा वल्गुवाक्यया...". "तव कथामृतम्...". "...रहसि संविदो या हृदि स्पर्शः...". "रहसि संविदं हृच्छयोदम्...". तथा च "जयति..." इत्यादि चतुर्षु पद्येषु राजसी-तामसी-सात्त्विकी-निर्गुणा क्रमेण अनन्यपूर्वाः. "विरचिताभयम्..." इति चतुर्षु गुणातीता-सात्त्विकी-तामसी-राजसी इति क्रमेण अन्यपूर्वाः. "तव कथामृतम्..."इति त्रिभिः सात्त्विकी-तामसी-राजसी इति क्रमेण अनन्यपूर्वाः "दिनपरिक्षये..."इति त्रिभिः तामसी-राजसी-सात्त्विकी इति क्रमेण अनन्यपूर्वाः. "वृजसनौकसाम्..."इति द्वाभ्यां राजसीसात्त्विकी इति क्रमेण अन्यपूर्वे (१९.एवम् एकोनविंशतिश्लोकाः. इति अष्टाविंशध्यायसंग्रहः) ॥२८॥

चतुर्थे स्वीकारो गोपीनाम्. ततः इन्द्रियैः लीला. "ताः समादाय कालिंद्या

निर्विश्य पुलिनं विभुः…". "काचित् कराम्बुजं शौरेर्जगृहे…" इत्यादि. तथाच "इति गोप्यः…" इत्यादि त्रिभिः प्रादुर्भावः. "काचित् कराम्बुजं शौरेः…" इत्यादि पञ्चभिः इन्द्रियैः कार्यम्. "सर्वास्ताः…" इति द्वाभ्यां तापपरित्यागः. "ताः समादाय…" इति चतुर्भिः पुलिनप्रवेशः. "सभाजयित्वा…" इति एकेन वाक्यप्रस्तावना. "भजतोऽनुभजन्ति…" इत्यनेन प्रश्नः. "मिथो भजन्ति…" इति षड्भिः प्रत्युत्तरः (एवं २२.द्वाविंशति श्लोकाः इति एकोनत्रिंशाध्यायसंग्रहः) ॥२९॥

पञ्चमे विहारः. शारीरी लीला. "…तदङ्गोपचिताशिषः", तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः", "गृहीतकंठ्यस्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे", "रेमे रमेशो व्रजसुन्दरीभिः…", "कृष्ण विक्रीडितं वीक्ष्य…". "…रेमे स भगवांस्ताभिः". "तासामतिविहारेण…", "रेमे स्वयं स्वरतिरत्र गजेन्द्रलील…". "विक्रीडितं व्रजवधूभिः…", "जहुर्विरहजं तापं तदङ्गोपचिताशिषः". "…अन्योन्याबद्धबाहुभिः". "…गृहितानां कण्ठे स्वनिकटं स्त्रियः", "पादान्यासैर्भुजविदुतिभिः…", "गोप्य समं भगवता ननृतुः…", "…तत्कररुहस्पर्शप्रमोदाः", "…अङ्गसङ्गधृष्टस्रजः…", "…आत्मन्यवरुद्धसौरतः…", "…तस्येच्छयात्तवपुषः…", "…एष क्रीडनेनेह देहभाक्". तथाच "इत्थं भगवतो गोप्य…" इति एकेन तापत्यागः "तत्रारभत…" इति सप्तभिः रासः. "उच्चैर्जगुर्नृत्यमाना…" इति सप्तभिः गानपूर्विका षड्धर्मलीला. "कर्णोत्पलालकः…" इति पद्येन गाढनृत्यम्. "एवं परिष्वङ्गकराभिमर्शैः…"इति चतुर्भिः निधुननम्. "तासामतिविहारेण…" इति श्रमापनोदनम्. "गोप्यः स्फुरत्पुरटकुण्डल…" इति मानगाने. "ताभिर्युतः श्रममपोहितुम्…" इति द्वाभ्यां जलक्रीडा. "ततश्च कृष्णोपवने…" इति द्वाभ्यां विचरणोपसंहारौ. "संस्थापनाय.." इति त्रिभिः प्रश्नः. "धर्मव्यतिक्रमो दृष्टः…" इति अष्टभिः प्रश्नस्य उत्तरः. "नासूयन् खलु कृष्णाय…" इति व्रजवृत्तान्तः. "ब्रह्मरात्र…" इति गोपीनां प्रत्यापत्तिः. अन्तिमेन फलम् (एवञ्च ३९.एकोनचत्वारिंशच्छ्लोकाः. इति त्रिंशाध्यायसंग्रहः) - ॥३०॥एकत्रिंशाध्यायम् अनुक्रमन्ति-

## सर्पान्नन्दस्य मोक्षणं शंखचूडवधः

**'सर्पाद्'** इति. 'भीत्रार्थानां भयहेतुः' इति अपादानाम्. मथुरातः पश्चिमदेशे अर्बुदाचलाद् योजनचतुष्टये स्थिते तीर्थविशेषे अम्बिकालये कोटीश्वराधिष्ठिते



सरस्वतीतीरे सुप्तस्य **नन्दस्य** सर्वविद्याधररूपात् **सर्पाद् विमोक्षणं** श्रीकृष्णेन कृतं विंशत्या पद्यैः. अत्र अर्द्धं पद्यं पतितम्. अर्द्धस्यैव वा पूर्णत्वेन गणना. तदुक्तम् "एकदा देवयात्रायाम्…" इत्यादि. तत्र एकेन अम्बिकावनगमनम्. "तत्र…" इति त्रिभिः तीर्थकृत्यम्. "कश्चिन्महानहिस्तस्मिन्…" इति सार्द्धैस्त्रिभिः सर्पेण नन्दग्रासः. "तमस्पृशत्पदा…" इति सार्द्धेन कृष्णेन नन्दमोचनम्. "तमपृच्छद्…" इति एकेन प्रश्नोद्यमः. "को भवान्…" इति प्रश्नः. "अहं विद्याधरम्…" इति सार्द्धैः षड्भिः सप्तभिः वा प्रत्युत्तरः. "इत्यनुज्ञाप्य…" इति द्वाभ्यां प्रत्यापत्तिः सर्पनन्दयोः. "कदाचिद्…" इति त्रयोदशभिः शंखचूडवधः . तत्र सार्द्धेन रासोद्यमः. "अलंकृतः…" इत्यत्र सार्द्धैः त्रिभिः षड्गुणवर्णनम् "एवं विक्रीडितोः स्वैरं …" इति अष्टभिः शंखचूडनाम्नः नारदसंप्रेषितस्य धनदानुचरस्य वधः. नतु मोक्षः. अतः मुष्टिनामारणम्. तत्सत्ता अग्रहणं च. तदुक्तम्- "अग्रजायाददात्प्रीत्या पश्यन्तिनां च योषिताम्." (एवं ३३.त्रयस्त्रिंशच्छ्लोकाः. एकत्रिंशाध्यायसंङ्ग्रहः) ॥३१॥

द्वात्रिंशाध्यायम् अनुक्रामयन्ति-

## पश्चाद् गोपीगीतम्

**'पश्चाद्'** इति पारोक्ष्ये. यद्वा भगवति वने गते "तमनुद्रुतचेतसः". **पश्चाद्** पदं फलप्रकरण-समाप्ति-सूचकम्. गोपिभिः गीतं **गोपीगीतम्**. वृषस्य **अर्दनं** हिंसनम्. "'अर्दु' हिंसने" चुरादिः. गोपीगीतं च वृषार्दनं च एतयोः समाहारः. 'गोपीः' इति समासः तमःप्रधाने गोकुले अध्यायत्रयेण राजसप्रकरणीय-लीलाकरणसूचकः. द्वादशभिः युगलैः गोपीगीतम्. तत्र अयं क्रमः "देवस्त्रियस्तथा गावः सरितः पादपाः लताः. पक्षिणश्च तथा मेघाः ब्रह्माद्या गोपिकास्तथा. हरिण्यो देवगन्धर्वः द्विधा च भगवान् हरिः." उपक्रमोपसंहाराभ्यां च एकं युगलम् अधिकमासलीलाबोधकम् (एवं २६.षड्विंशति श्लोकाः. इति द्वात्रिंशाध्यायसंङ्ग्रहः)॥३२॥

## ॥ पुरुषोत्तमनामसहस्रे एतत्प्रकरणगतानि नामानि ॥

**वेणुवादस्मरक्षोभ-मत्तगोपीविमुक्तिदः ।**<br>
**सर्वभावप्राप्तगोपी-सुखसंवर्धनक्षमः ॥१॥**

गोपीगर्वप्रणाशार्थ-तिरोधानसुखप्रदः।
कृष्णभावव्याप्तविश्व-गोपीभावितवेशधृक्॥२॥
राधाविशेषसंभोग-प्राप्तदोषनिवारकः।
परमप्रीतिसंगीत-सर्वाद्भुतमहागुणः॥३॥
मानापनोदनाक्रान्त-गोपीदृष्टिमहोत्सवः।
गोपिकाव्याप्तसर्वाङ्गः स्त्रीसंभाषाविशारदः॥४॥
रासोत्सवमहासौख्य-गोपीसंभोगसागरः।
जलस्थलरतिव्याप्त-गोपीदृष्ट्यभिपूजितः॥५॥
शास्त्रानपेक्षकामैक-मुक्तिद्वारविवर्धनः।
सुदर्शनमहासर्पग्रस्त-नन्दविमोचकः॥६॥
गीतमोहितगोपीधृक् शङ्खचूडविनाशकः।
गुणसंगीतसंतुष्टिर् गोपीसंसारविस्मृतिः॥७॥

## ॥ त्रिविधनामावल्याम् एतत्प्रकरणगतानि नामानि ॥

[१]कन्दर्पकोटिलावण्याय नमः [२]सर्वोपनिषत्तात्पर्यगोचराय नमः [३]गोपिकारमणाय नमः [४]सकलयोगाधिपतये नमः [५]अलौकिकपूर्णकामजनकाय नमः [६]आशापूरक-सत्यात्म-कामदीपकाय नमः [७]शृङ्गारविभावादियुक्ताय नमः [८]सत्यवाचे नमः [९]कामोन्मत्तगोपाङ्गना-मुक्तिदात्रे नमः [१०]मुक्त्यधिकफल-गोपीमनोमोहकाय नमः [११]लोकवेदसर्वधर्मपरित्यक्त-गोपीसेवित-चरणारविन्दाय नमः [१२]भक्तिप्रतिबन्धनिवारकाय नमः [१३]अलब्धरासगोपी-सद्योमुक्तिप्रदायकाय नमः [१४]परीक्षितगोपवधूसेवित-चरणाय नमः [१५]निजजनस्मयध्वंसनस्मिताय नमः [१६]कायिकतिरोभावितगोपीपुञ्जाय नमः [१७]राधासहचराय नमः [१८]विरहव्याकुलगोपाङ्गनान्वेषितमार्गाय नमः [१९]ज्ञानतुल्यभक्तभ्रान्तिजनकाय नमः [२०]निकटस्थितिबोधकाय नमः [२१]गोपीवर्णितनिखिलगुणाय नमः [२२]भक्तशुद्धिविलम्बनाय नमः [२३]दीनकृपाप्रकटितरूपाय नमः [२४]सर्वमनोनयनाह्लादकाय नमः [२५]गोपीवाक्यविचारकाय नमः [२६]सर्वधर्मनिर्धारकाय नमः [२७]सर्वरसाभिज्ञाय नमः [२८]रासमण्डलानेकरूपाय नमः [२९]उद्दीप्तकामरसपूरकाय नमः [३०]अतिक्रान्तमर्यादाय नमः [३१]भक्तदैन्यनिवारकाय नमः [३२]यमुनाकीर्तिजनकाय नमः [३३]सुदर्शनमोचकाय नमः [३४]बलदेवाभीष्टदात्रे नमः [३५]शङ्खचूडघातकाय नमः [३६]गोपीक्लेशनाशकगुणार्णवाय नमः [३७]स्वसमानगुणाय नमः [३८]सर्ववशीकरणद्वादशविधचरित्राय नमः.



## श्रीमद्भागवतदशमस्कन्धान्तर्गत–तामसफलप्रकरण–विषयानुक्रमणिका


| | *विषयाः* | *पृष्ठानि* |
|---|---|---|
| *(१)* | *तामसफलप्रकरणम्* | *१–४७५* |
| १. | **भगवदैश्वर्यधर्मनिरूपकः प्रथमोऽध्यायः (आदितः षड्विंशः)** | **१ – १३८** |
| | वेणुना आह्वानेन गोपीनां वने आकारणम् | १-५८ |
| | ताभिः सह संवादः, | ५९-११८ |
| | रासारम्भः, | ११९-१३४ |
| | तासां गर्वापनोदाय भगवतोऽन्तर्धानं च | १३५-१३८ |
| | *ध्वनिना आह्वानं कर्तुं समर्थत्वाद् गमनबोधकवाक्यैः गमनम् अकर्तुं समर्थत्वात्, प्रभुवाक्योल्लङ्घनदोषं गुणं कर्तुं समर्थत्वाद्, गर्वेऽन्तर्धानेनापि अन्यथाकर्तुं समर्थत्वाद् ऐश्वर्यनिरूपणम्* | |
| २. | **भगवद्वीर्यधर्मनिरूपको द्वितीयोऽध्यायः (आदितः सप्तविंशः)** | **१३९ – १९७** |
| | गोपीद्वारा भगवतोऽनुसन्धानं, तदाचरितानुकरणं, यमुनापुलिने तदागमनप्रतीक्षणं च | |
| | *बाह्याभ्यन्तरभेदेन भगवत्सम्बद्धानां भक्तानां दोषेऽपि भगवता परित्यागाभावस्य सर्वोत्कृष्टस्य भगवन्मार्गस्य ज्ञापनार्थं कायेन रमणाभावे मनसा वाचा वापि रमयेदिति ज्ञापनार्थं परोक्षेणापि रतिकरणात् वीर्य-निरूपणम्* | |
| ३. | **भगवद्यशोधर्मनिरूपकः तृतीयोऽध्यायः (आदितः अष्टाविंशः)** | **१९८ – २४१** |
| | गोपीगीतम् – विरहार्तगोपीनां भगवदुपस्थानाय प्रार्थनम् | |
| | *वचसा रमणज्ञापक-गोपिकावचनैः यशोनिरूपणम्* | |

४. भगवच्छ्रीधर्मनिरूपकः चतुर्थोऽध्यायः २४२ – ३२०
(आदितः ऊनत्रिंशः)
भगवतः प्रादुर्भावः, गोपीनामाश्वासनं च
*सकृद्भोगनिवारणार्थम् आविर्भावकरणाद् भक्तान्तःकरणसन्तोषार्थं वाक्यकथनाच्च तत एव मरणरूपापत्तिनिवारणात् श्रीनिरूपणम्*

५. धर्मिरूपभगवन्निरूपकः पञ्चमोऽध्यायः ३२१ – ४०७
(आदितः त्रिंशः)
महारासवर्णनं, ३२१-३९१
परीक्षित्कृतशङ्कायाः शुकद्वारा समाधानं च ३९२-४०७
*षड्गुणरूपाभिः स्वामिनीभी रसरूपेण स्वरूपेण रमणाद् धर्मिनिरूपणम्*

६. भगवद्वैराग्यधर्मनिरूपकः षष्ठोऽध्यायः ४०८ – ४३२
(आदितः एकत्रिंशः)
अजगरमुखात् नन्दस्य मोचनम्, ४०८-४२०
शङ्खचूडवधः ४२१-४३२
*कौतुकेनापि कृतानाम् अवैष्णवकर्मणां दुःखहेतुत्वेन तत्र भगवत औदासीन्यभावबोधनात्, तत्रापि भक्तवत्सलेन भगवतैव मोचने भक्तैस्तत्कर्मपरित्यागात्, मर्यादारमणेऽपि शङ्खचूडसम्बन्धकथनेन भगवत औदासीन्यभावबोधनात् वैराग्यनिरूपणम्*

७. भगवज्ज्ञानधर्मनिरूपकः सप्तमोऽध्यायः ४३३–४७५
(आदितः द्वात्रिंशः)
युगलगीतम्– गोचारणाय वनं गतस्य भगवतो गोपीजनकृतं गुणगानम्
*विरहे गुणगानस्य ज्ञानरूपत्वाद् ज्ञाननिरूपणम्*

(२) **परिशिष्टानि** ४७७–५८३
१. प्रथमं परिशिष्टम्
(१) तामसफलप्रकरण-स्वतन्त्रलेखाः ४७७ – ५४४
(२) सुबोधिनी-योजनायाः पार्श्वटिप्पणी ५४५ – ५५२
(३) श्रीवेणुगीत-श्रीगोपीगीतयोः श्रीसुबोधिन्यनुसारि सर्वव्रजलीलार्थनिरूपणम् ५५३ – ५५७
(४) गोपीगीतवक्त्रीस्वभावभेददीपिका ५५८
(५) श्रीटिप्पण्यनुसारी गोपीगीतप्रारूपः ५५९
२. द्वितीयं परिशिष्टम्— ५६० – ५७३
आद्यसम्पादकानां प्रस्तावनाः
३. तृतीयं परिशिष्टम्— ५७४ – ५८१
एतत्प्रकरणीय - कारिका - श्लोक - उपन्यस्तवाक्य-सूचिपत्रम्
४. चतुर्थं परिशिष्टम्— ५८२ – ५८३
तामसप्रमाणप्रकरणसुबोधिनीशोधपत्रम्

॥ श्रीकृष्णाय नमः ॥

॥ श्रीगोपीजनवल्लभाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

# श्रीमद्भागवतदशमस्कन्धसुबोधिन्यां

# द्वितीये तामसप्रकरणेऽवान्तरफलप्रकरणे प्रथमः

# स्कन्धादितः षड्विंशोऽध्यायः

ब्रह्मानन्दात्समुद्धृत्य भजनानन्दयोजने ।
लीला या युज्यते सम्यक् सा तुर्ये विनिरूप्यते ॥(१)॥

## श्रीमत्प्रभुचरणकृतटिप्पणी

षड्विंशाध्याये प्रकरणार्थोक्तौ, **ब्रह्मानन्दात् समुद्धृत्ये**ति. ननु सर्वसमर्थत्वेन ब्रह्मानन्दवत् स्वगृहस्थिताभ्य एव स्वामिनीभ्यो भजनानन्दं कुतो नादात्, लोकवेदत्याजनपूर्वकं विवक्षितरीत्या कुतो दत्तवानित्यत आहु**र्ब्रह्मानन्दा**दिति. तथैवैतद्दाने एतस्यापि ब्रह्मानन्दमध्यपातित्वेन तत उद्धृतेर्वैयर्थ्यं स्यात्, भजनानन्दस्वरूपं चैतादृशमेवेत्येवंरूपानन्ददाने[1] तददत्तमेव च स्यादिति भावः (१).

## श्रीपुरुषोत्तमकृतप्रकाशः

व्रजजनचरणसरोरुहपरागरागेण पीतवसनस्य[2] ।
श्रीगोपीपतिपदयोर्दास्यविलासा भवन्त्वनिशम्[3] ॥

षड्विंशाध्यायं विवरिषवः पूर्वाध्यायप्रकरणयोः सङ्गतिं वदिष्यन्तः प्रथमं प्रकरणयोः साधनफलभावरूपां वदन्तीत्याशयेन टिप्पण्यामाहुः **ननु सर्वसमर्थे**त्यादि. अत्राभासव्याख्यानयोरयमाशयः. तथा हि. अस्य फलप्रकरणत्वादत्र सर्वेषां फलं वक्तव्यम्. तत्रापि रसात्मकस्य फलस्य प्रमेयप्रकरणेपि[4]

## श्रीनिर्भयरामभट्टकृतकारिकार्थः

षड्विंशाध्याये **ब्रह्मानन्दात् समुद्धृत्ये**त्यादि. "ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता" इति प्रकारेण **ब्रह्मानन्दात् समुद्धृत्य भजनानन्दयोजने** कर्तव्ये सति **या लीला युज्यते** योग्या भवति **सा** लीला **तुर्ये** फलप्रकरणे **निरूप्यते** (१).

१. आनन्ददान इति पाठः. २. ग्रन्थकर्तृपीताम्बरस्य. ३. अहर्निशम्. ४. वेणुगीते.

**प्रकाशः**

दर्शितत्वादस्य फलप्रकरणत्वायात्र ततः कश्चिद्विशेषोपि वक्तव्यः. स च क्रम[१]-स्वारस्याद् ब्रह्मानन्दादाधिक्यज्ञापनरूप एव सेत्स्यति. अन्यथा पूर्व[२]प्रकरण-समाप्तौ शुको वैकुण्ठनयनं तत उद्धरणं च न वदेत्. फलप्रकरणोत्तरं [३]तत्र नयनमात्रमेव च वदेत्. अत उक्तएव विशेषो निश्चेयः. सोपि [४]फलयोर्व्यधिकरणत्वे मुख्यावान्तरभावाभावादसिध्यन् [५]सामानाधिकरण्यमाक्षिप्यैतासु पूर्वं ब्रह्मानन्दं गोपेषु पश्चाद्भजनानन्दं च व्यवस्थापयतीत्याशयेनैव "तद्द्वारा पुरुषाणां च भविष्यती"ति वक्ष्यन्ति. तेन तत्सामान्यादेतासु ब्रह्मानन्दोपि निराबाधएव. न चैतासां [६]तदाकांक्षाभावात् स कथं वक्तुं शक्य इति वाच्यं, भक्तिस्वभावादेव तत्सिद्धेः, "हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो गतिमण्वीं प्रयुङ्क्त" इति वाक्यात्, "स्वर्गकामो यजेते"त्यादौ यजमानमात्रस्य तत्कामनायामपि "सगृहः सपशुः सुवर्गं लोकमेती"ति श्रुत्या परिकरस्यापि तत्फल-श्रावणेनात्रापि तथा वक्तुं शक्यत्वाच्च. किञ्च. भगवत्कार्यस्वरूपविचारेऽपि तेषु भजनानन्दस्येवैतासु ब्रह्मानन्दस्यापि सुवचत्वम्, भगवताप्याकांक्षितमेव दीयते इति नियमाभावात्, विप्रयोगज्ञानोपदेशादिना[७] तथा निश्चयात्. एवञ्च "एकं भगवतः कार्यमि"ति न्यायाद्गोपानां सूक्ष्मगत्याकांक्षोदयरूपं भगवत्कार्यमेतासु ब्रह्मानन्दानुभवं साधयतीत्यपि ज्ञेयम्. वस्तुतस्त्वेतेन ग्रन्थेन परप्राप्तिबोधकर्गुक्तप्रकारकः प्रत्यापत्तिप्रकारो बोध्यत इति वैयधिकरण्येऽप्यदोषः. वक्ष्यन्ति च पञ्चमाध्याये "यथार्भक" इत्यस्याभासे "ब्रह्मभावाभावादि"ति. न च भ्रमरगीतादिकथाविरोधः, इदानीन्तनफलस्य निरोधशेषत्वात्. प्रत्यापत्तौ तु निरोधस्य फलशेषत्वमिति सर्वं समञ्जसमिति दिक् (१).

**श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः**

श्रीकृष्णाय नमः. षड्विंशे **ब्रह्मानन्दादिति**. **समुद्धृत्य** सर्वान् गोकुलस्थानिति शेषः. **भजनानन्दे**ति. मुख्या गोव्रजयोषितश्चेत्युभयविधानामपि गोपिकानामिति शेषः. देवयात्राप्रसङ्गस्तु सामान्यतः सर्वेषामन्यभावान्निवृत्तिबोधकः, प्रकृते गोव्रजयोषितां तथात्वबोधनायोक्तः. अतएव तदध्यायकारिकाया"मेकत्रिंशे सर्वभावान्निवृत्तानां तु पूर्ववत् गानेन रमणं चक्रे" इत्यनेन गोव्रजयोषितामेव

१. ब्रह्मानन्दानन्तरं भजनानन्दकथनम्. २. साधन—. ३. वैकुण्ठे. ४. गोपीगोपनिष्ठफलयोः. ५. फलस्य. ६. ब्रह्मानन्दस्य. ७. उद्धवद्वारा ज्ञानोपदेशस्तु भक्तानां नाकांक्षितम्.



लौकिकस्त्रीषु संसिद्धस्तद्द्वारा पुरुषे भवेत् ।

**टिप्पणी**

ननु स्त्रीभ्यएवैतद्दाने को हेतुः, तत्रापि पूर्वमन्यविवाहितासु? कुमारीष्वतथात्वेपि भगवता समं विवाहाभावात्तन्न्यायएव, अतएव वरदानानन्तरमपि 'लब्धकामाः कुमारिका' इत्येवोक्तमित्याशङ्क्य तत्र हेतुमाहुः **लौकिकस्त्रीष्विति**. भजनानन्दो हि स्वरूपात्मकः. तच्च "रसो वै स" इत्यादिश्रुतिभी रसरूपम्. स च यादृक् स्वशास्त्रसिद्धस्तादृगेव. तत्र च स्वाविवाहितायामेव मुख्यो रस इति निरूपितम्. अतो लोकसम्बन्धिन्यो **लौकिक्यो** भगवदतिरिक्तलोके विवाहलक्षणसम्बन्धवत्य इति यावत्, एतादृशीषु **सम्यक् सिद्धो** भवति. तत एतत्कथाश्रवणेन तद्भावोदये **पुरुषे**पि स रसो **भवेत्**, नान्यथेति स्त्रीष्वेव तद्दानमित्यर्थः. **सिद्ध** इतिपदेनैतद्रसस्वरूपसिद्धिश्चेत्पूर्वं भूलोके स्यात्तदान्यत्रापि तत्प्राप्तिः स्यात्. सा चैतास्वेव सम्भवतीति तथेति ज्ञाप्यते ($१\frac{१}{२}$).

**प्रकाशः**

**लौकिकस्त्रीष्वि**त्यत्र टिप्पण्यां **पूर्वं स्यादि**ति, इह भूलोके

**लेखः**

रमणमध्यायार्थ उक्तः. अतो गोपिकानामेव भजनानन्ददानमत्र प्रकरणार्थो, न तु गोपानामिति भावः. क्त्वाप्रत्यये समानकर्तृकत्ववत् समानकर्मकत्वनियमाभावाद् ब्रह्मानन्दयोजनं सर्वेषामेव भजनानन्दयोजनं गोपीनामेवेत्यतः कथं संगतिरिति पूर्वपक्षस्य नावसरः. **ब्रह्मानन्दात्** सर्वा**नुद्धृत्य** गोपीनां **भजनानन्दयोजने** भगवता कर्तव्ये सति **या लीला युज्यते सा निरूप्यते** इत्यन्वयः(१).

तासामेव तद्दाने को हेतुरिति शङ्कानिरासायाग्रिमकारिकेति टिप्पण्यामुक्तम्. एतादृशयोग्यता गोपेष्वपि संपन्नेत्यरुच्या टिप्पण्यां द्वितीयपक्ष

**कारिकार्थः**

**लौकिकस्त्रीष्वि**ति. रसात्मको भजनानन्दो हि रसशास्त्ररीत्या **लौकिकस्त्रीषु** परकीयासु **संसिद्धः**. कुमारीणामपि भगवता सह विवाहाभावात् तन्न्याय एव. **तद्द्वारा** तत्कथाश्रवणेन तद्भावोदये **पुरुषेपि** स रसो **भवेत्** नान्यथेत्यर्थः. ब्रह्मानन्दानुभवोक्तेः मुख्यप्रयोजनं ब्रह्मानन्दभजनानन्दयोः

स्वानन्दानुभवार्थं हि योग्यतापि निरूपिता ॥(२)॥

**टिप्पणी**

किञ्च. लक्ष्मीतुल्यतायां हि भगवद्रमणमिति मर्यादा. सा च ब्रह्मानन्दरूपा. तथा च पूर्वाध्याये ब्रह्मभावोक्त्या तद्रूपत्वमुक्तं जातमित्युक्तमर्यादापि संपन्नेतीतोप्यत्र रमणमित्याहुः **स्वानन्दानुभवार्थमि**ति. यद्यपि स्वामिनीष्वेतावता न कोपि विशेषः, तथा"प्यधिकं तत्रानुप्रविष्टं [१]न तु तद्धानिरि"ति न्यायोत्राऽ**पि**शब्देन ज्ञाप्यते. तथा च **स्व**पदस्य स्वामिनीवाचक**स्यानुभव**पदेन समं सम्बन्धो ज्ञेयः. **आनन्द**पदं भजनानन्दपरम्. यद्वा. बलदेवे स्वधर्मान्निरूपयता भगवता "गोप्योन्तरेण भुजयोरपि यत्स्पृहा श्रीरि"तिवाक्ये श्रियोपि स्पृहानिरूपणेन तस्या अपि दुर्लभो यो रसस्तं प्राप्य गोप्यो धन्या इति व्रजस्त्रीष्वेव स्वानन्दानुभवयोग्यता निरूपिता, नान्येष्वन्यासु वेत्यर्थः. तथा च तत्रैवैतदधिकारवत्त्वात्तथेतिभावः. यद्वा. "हेमन्ते प्रथमे मासी"त्यत्र "तेषां प्रसादरूपा शक्तिः स्त्री भवती"त्यत्र या शक्तिरुक्ता तत्प्रवेशो यत्र तत्र प्रभुसम्बन्धयोग्यता, स चैतास्वेव सम्पन्न इति पूर्वं निरूपितमित्यर्थः (२).

**प्रकाशः**

पूर्वं स्यादित्यर्थः. **स्वपदस्ये**त्यादि, [२]स्वासामानन्दानुभव इत्येवं समास इत्याशयः. ब्रह्मभावोक्तेरेतल्लीलाधिक्यमात्रज्ञापनार्थत्वेन योग्यतायां तात्पर्याभावान्नैतदर्थ-सङ्गतिरित्यरुच्या पक्षान्तरमाहुः **यद्वा बलदेवे**त्यादि. अत्र योग्यतोक्तावपि योग्यताबीजस्याकथनात्तद्बोधनाय पक्षान्तरमाहुः **यद्वा हेमन्ते**त्यादि. तेनानुग्रहैकलभ्यत्वं योग्यताया दृढीकृतम् (२).

**लेखः**

उक्तो **यद्वे**ति. तर्हि "स्त्रियो वा पुरुषो वापी"त्यत्रोक्ता पुरुषेऽपि सा गति-र्योग्यताभावान्न स्यादित्यरुच्या तत्रैव तृतीयः पक्ष उक्तो **यद्वे**ति. फलितमनुवदन्ति

**कारिकार्थः**

तारतम्यज्ञापनं पूर्वाध्यायसमाप्तिकारिकायाम् उक्तम्, गौणप्रयोजनमाहुः **स्वानन्दानुभवार्थमि**ति. पुरुषोत्तमानन्दानुभवार्थं लक्ष्मीतुल्यतारूपा **योग्यतापि** स्वामिनीषु **निरूपिते**त्यर्थः. लक्ष्मीतुल्यतायां हि भगवद्रमणमिति मर्यादा.

१. 'न तु तद्धानिः' इति मूले नास्ति. २. स्वासु इति मांडवी पाठः.



ततो हि भजनानन्दः स्त्रीषु सम्यग् विधार्यते ।
तद्द्वारा पुरुषाणां च भविष्यति न चान्यथा ॥(३)॥

**टिप्पणी**

एवं सत्येतत्प्रवेशो यत्र पुरुषेपि भविष्यति, तत्रैवंभावो भविष्यतीत्या-शयेनाहुः **तद्द्वारे**ति. तासामनुग्रहद्वारेति **वा**र्थः. यत्रापि तत्प्रवेशोऽनुग्रहो वा

**प्रकाशः**

सुबोधिन्यां **ततो ही**ति. स्त्रीष्वेव संसिद्धत्वात् स्त्रीणामेव योग्यत्वाच्चेत्यर्थः. टिप्पण्यां योग्यतादृढीकारेण सिद्धमग्रिमाभासमुखेनाहुः **एवं सती**त्यादि. **अनुग्रहद्वारे**ति, अयमर्थः "स्मयमानमुखाम्बुज" इत्यस्य टिप्पण्यामग्रे सेत्स्यतीति बोध्यम्. तथा चास्य फलस्य तामसप्रकरणीयत्वात्तत्प्रकरणपठिताधिकारि-मात्रस्येदं वक्तव्यमित्यतो **द्वार**माचार्यैरुक्तम्. तथा **च**कारेण हीनाधिकारिणो गवादयश्च "केवलेन हि भावेने"त्यत्रोक्ताः संगृहीताः. तेन साधनप्रकरणोक्ता योग्यता एतद्विषयिणीत्याशयः. सापि योग्यता स्वरूपयोग्यतासापेक्षतयैव फलसाधिकेत्याशयेन वदन्तीत्याहुः **यत्रापी**त्यादि. ननु ब्रह्मानन्दस्य नित्यत्वं

**लेखः**

**ततो ही**ति कारिकया. **तद्द्वारे**ति. एतन्निष्ठभगवद्भोग्यस्त्रीत्वलक्षणशक्ति-प्रवेशेनैतदनुग्रहेण वा भवतीत्यर्थः. नित्यलीलास्थभक्तविशिष्टप्रभुदर्शने तासामनुग्रहेण तादृशो भावः श्रुतीनां जातः. [१]अतएव "यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिका" इति श्रुतिभिरुक्तम्. तथाच[२] गोपेष्वेतदभावाद्योग्यता-

**कारिकार्थः**

सा च ब्रह्मानन्दरूपा. तथा च पूर्वाध्याये ब्रह्मभावोक्त्या लक्ष्मीरूपत्वमुक्तं जातमित्युक्तमर्यादापि सम्पन्नेति भावः. अथवा द्वादशाध्याये "गोप्योन्तरेण भुजयोरपि यत्स्पृहाश्रीः" इतिवाक्ये व्रजस्त्रीष्वेव स्वानन्दानुभवार्थं योग्यता निरूपितेत्यर्थः. तथा च तत्रैव एतदधिकारवत्त्वात् तत्रैव भजनानन्ददानमिति भावः. यद्वा "हेमन्ते प्रथमे मासि" इत्यत्र कात्यायनीप्रवेशरूपा प्रभुसम्बन्ध-योग्यता निरूपितेत्यर्थः. एवं टिप्पण्यनुसारेण त्रिधा व्याख्यानम् (२).

**तद्द्वारा पुरुषाणां चे**ति, कात्यायनीप्रवेशद्वारा तासामनुग्रहद्वारेति वार्थः (३).

१. जोधपुरपाठमनुसृत्य. मुद्रिते नोपलभ्यते. २. जो. पाठः. तथा इति मुद्रितः पाठः.

स्त्रिय एव हि तं पातुं शक्तास्तासु ततः पुमान् ।
अतो हि भगवान् कृष्णः स्त्रीषु रेमे ह्यहर्निशम् ॥(४)॥
बाह्याभ्यन्तरभेदेन आन्तरं तु [1]परं फलम् ।

---

### टिप्पणी

तत्रापि स्त्रीत्वमृते नैतद्रसप्राप्तिरित्याहुः **स्त्रिय एव हीति**. **तं** पुरुषरूपं भगवन्तमित्यर्थः. **ततः** स्त्रीकर्तृकपानानन्तरं **पुमान्** भगवां**स्तासु** प्राक्पीतरसाधिकरणभूतासु **तमेव** रसं **पातुं शक्त** इत्यर्थः. रसाधिक्ये पुंभावात्तथेति भावः. यतस्ता एव रसयोग्यास्तत्पाने शक्ताश्चातो न कदाचिद्रमणे व्यवधानं करोतीत्याहुः **अतो हि भगवानि**ति (३-४).

### प्रकाशः

"न स पुनरावर्तते"—"अनावृत्तिः शब्दादि"ति श्रुतिन्यायसिद्धम्. तदपेक्षयात्राधिक्येऽस्य नित्यत्वमवश्यं वक्तव्यम्. तच्च लीलानां तदनुभवितॄणां च नानात्वाद् भिन्नभिन्नकालिकत्वाच्च बाधितमित्याशङ्क्य लीलानां स्वरूपतः प्रवाहतश्च नित्यत्वमधिकारिनिरूपणमुखेन वदन्तीत्याशयेनाहुः **यत** इत्यादि. तथा च रमणरूपेण लीलानां स्वरूपनित्यता, बाह्याभ्यन्तररूपेण च प्रवाहनित्यतेत्यर्थः. अयमर्थः. रसात्मा भगवान् बाह्यरमणे धर्मसहितः, आन्तरे तु नाट्य इव केवल इति तस्य तथात्वसम्पादिकास्ता नित्याः परिच्छिन्नाश्चेति तदाविर्भावस्य कालचक्रवद्गमागमरूपतया प्रवाहरूपतायामपि स्वरूपनित्यत्वं निराबाधत्वान्न [2]बाधित-

### लेखः

भावान्न तद्दानमिति भावः. अत्रोभयत्रापि **पुरुष**पदेन "स्त्रियो वापी"ति वाक्योक्ता ज्ञेयाः, न तु गोपाः (२-४).

**शब्दात्मिके**ति, शब्देनात्मा स्वरूपं यस्येति विग्रहः. शब्दस्य लीलेति

### कारिकार्थः

**स्त्रिय एव हि तं पातुं शक्ता** इति, **तं** पुरुषरूपं भगवन्तमित्यर्थः. **ततः** स्त्रीकर्तृकपानानन्तरं **पुमान्** भगवान् **तासु तं** रसं **पातुं** शक्त इत्यर्थः, रसाधिक्ये पुम्भावादिति भावः. यतस्ता एव रसयोग्याः तत्पाने शक्ताश्च अतो न कदाचित् रमणे व्यवधानं करोतीत्याहुः **अतो हि भगवानि**ति (४).

---

१. महाफलमिति पाठः. २. नित्यत्वं निराबाधमित्यर्थः इति मांड-मुंबईविद्यापीठपाठः.



ततः शब्दात्मिका लीला निर्दुष्टा सा निरूप्यते ॥(५)॥

---

### टिप्पणी

**आन्तरं त्वि**ति. सखीवृन्दे मिथो गुणानुवादे लीलासहितप्रियतमप्राकट्येनान्तर्ये भावविशेषा उत्पद्यन्ते, न ते संगमेपीत्यस्य **पर**त्वम्. "नामरूपे व्याकरवाणी"ति श्रुतेः प्रपञ्चस्य द्विरूपत्वेन लीलाप्रपञ्चस्यापि तथात्वाद् गुणगानलक्षणनामात्मक-भगवत्स्वरूपस्य परमानन्दरूपभावात्मकरमणलक्षणा लीला प्रिये दोषारोपादिदोषरहिताग्रे निरूप्यत इत्याहुः **ततः शब्दात्मिके**ति. सप्तमाध्यायव्यवस्थैषा. शब्दात्मिकाया अपि लीलायाः प्रवृत्तिनिवृत्तिभेदेन द्विरूपत्वेनोत्तरा सप्तमाध्याये निरूपिता. पूर्वस्याः सदोषत्वादत्रापि तत्पूर्वाध्याये वेदात्मकशेषरूपत्वेन बलदेवस्य तत्साहित्येन कृतलीलायां शङ्खचूडोक्त्या सदोषत्वं तद्वधोक्त्यात्र सापि निर्दुष्टेति ज्ञाप्यत इत्यर्थः. अत एवाध्यायद्वयेन निरूपणमिति भावः (५).

### प्रकाशः

मित्यर्थः. नन्वान्तरस्यापेक्षावैशिष्ट्यादपूर्णत्वाद्भगवद्रूपत्वाभावे कथं परमफलत्वमित्याकांक्षायां तस्य तथात्वं विवृण्वन्ति **आन्तरं त्विति. सखीवृन्दे**त्यादि, तथा चापेक्षापूर्त्या उक्तविशेषैस्तथेत्यर्थः. अत्र गमकं वदन्तीत्याशयेनाहुः **नामरूपे**त्यादि. तथा च दोषाभावएव परत्वगमक इत्यर्थः. कारिकास्थ**सेत्य**स्य पदस्य तात्पर्यमाहुः **पूर्वस्या** इत्यादि. **सापीत्यपि**शब्देनैतत्साम्यात्पश्चाध्यायीस्थलीलाग्रहणम्. तेन यथात्र शङ्खचूडवधाद्दोषनिवृत्तिः तथा पश्चाध्याय्यां "नाहं तु सख्य" इत्यादिवाक्यैर्भक्तान्तःकरणस्थदोषनिवृत्तिरिति द्विविधापि निर्दुष्टा. एतावान् परं विशेषो यत्पूर्वस्या भगवत्प्रयत्नेन दोषराहित्यमुत्तरस्यां तु स्वत इति. अतएव च परत्वम्. ब्रह्मानन्दाधिक्यं तूभयोरनुग्रहविशेषनियतत्वादिति फलप्रकरण तात्पर्यम्. एतदेव **लीला या युज्यते सम्यगि**ति **सम्य**क्पदेन पूर्वं ज्ञापितं बोध्यम् (३-५).

### कारिकार्थः

**आन्तरन्त्वि**ति, सखीवृन्दे मिथो गुणानुवादे लीलासहितप्रियतमप्राकट्येन अन्तर्ये भावविशेषाः उत्पद्यन्ते न ते संगमेपीत्यस्य परत्वम्. **ततः शब्दात्मिका लीले**ति, युगलगीताध्यायोक्त-गुणगानलक्षणशब्दात्मिकेत्यर्थः. **निर्दुष्टे**ति, रूपलीलायां मानादिजनितेन प्रभौ दोषारोपेण सदोषत्वं, नामलीलायां तु

ततो रूपप्रपञ्चस्य पञ्चधा रमणं मतम् ।
आत्मना प्रथमा लीला मनसा[1] तु ततः परा ॥(६)॥

**टिप्पणी**

यतो रूपं पञ्चात्मकमतस्तद्दानं पञ्चधातस्तन्निरूपणमपि तावद्भिरध्यायैः कृतमित्याहुः **तत** इति. पञ्चात्मके रूपे येनांशेन या लीला कृता तां तां लीलां क्रमेणाहुः **आत्मने**ति सार्धेन.

**प्रकाशः**

एवं प्रकरणार्थमुक्त्वा तदवान्तरयोः पूर्वस्मिन्नध्यायान् विभजन्त इत्याशयेनाहुः **यतो रूपमि**त्यादि. सुबोधिनीकारिकास्थ-**रूपप्रपञ्च**पदस्य रूपविस्तारोऽर्थो[2] बोध्यः. ननु भगवति सजातीयविजातीयस्वगतद्वैता-

**लेखः**

टिप्पणीस्वारस्येनार्थः. **रूपप्रपञ्चस्ये**ति, **रूपस्य प्रपञ्चो** विस्तारस्तत्प्रकारक**रमणं** तदानन्दस्थापनमित्यर्थः. सम्बन्धमात्रविवक्षया षष्ठी. टिप्पण्यां **बलं हि**

**श्रीलालूभट्टकृतयोजना**

फलप्रकरणार्थोक्तौ **ब्रह्मानन्दात्समुद्धृत्ये**त्यादि. **ब्रह्मानन्दादि**त्यादि-सार्धपञ्चकारिकाणामर्थष्टिप्पण्यां स्फुटः. एतावता यद् ब्रह्मानन्दानुभवरूपं मर्यादाभक्तौ फलं तदत्र पुष्टिभक्तानां भजनानन्दाख्यफलप्राप्तौ साधनमिति मर्यादाभक्तितः पुष्टिभक्तेः परमोत्कर्षः सिद्ध इति बोद्धव्यम्. इह पञ्चाध्यायीसुबोधिन्या अर्थः स्फुटतया विस्तारेण च टिप्पण्यां निरूपित इति मया योजनायां ताः फक्किका न विव्रियन्ते, किन्तु टिप्पण्यां या फक्किका न विवृताः ता एव योज्यन्त इत्याकलनीयम् (१-५ $\frac{1}{2}$).

**कारिकार्थः**

प्रभौ दोषारोपात्मकदोषाभावेन निर्दुष्टत्वमित्यर्थः. शब्दात्मिकापि लीला प्रवृत्तिनिवृत्तिभेदेन द्विरूपा. तत्र पूर्वा षष्ठाध्याये उत्तरा सप्तमाध्याये. तत्र पूर्वस्याः सदोषत्वाद् अत्रापि पूर्वाध्याये वेदात्मकशेषरूपत्वेन बलदेवस्य तत्साहित्येन कृतायां लीलायां शंखचूडोक्त्या सदोषत्वं, तद्वधोक्त्या अत्र सापि निर्दुष्टेति ज्ञाप्यत इत्यर्थः (५).

रूपस्य पंचात्मकत्वात् तन्निरूपणं तावद्भिरध्यायैः कृतमित्याहुः **ततो**

१. मानसीत्यपि पाठः. २. इत्यर्थो इति मांड़- मुं. वि. पाठः.



वाक्प्राणैस्तु तृतीया स्यादिन्द्रियैस्तु ततः परा ।
शारीरी पञ्चमी वाच्या ततो रूपं प्रतिष्ठितम् ॥(७)॥

**टिप्पणी**

यथेन्द्रियादिरूपत्वं शुद्धस्य ब्रह्मणस्तथा।
आत्मत्वादिस्वरूपत्वं मन्तव्यं श्रुतिवाक्यतः॥
यथेन्द्रियादिसङ्घात आत्मनो मुख्यता तथा।
प्रकृते स्वामिनीभावप्राधान्यं तत आदिमे॥
स एवोक्तः प्रभुर्यस्माद्रसरूपः श्रुतेर्मतः।
आत्माधीनं यथा कार्यं सर्वमेवमिहापि हि॥

**प्रकाशः**

भावा**दात्मने**त्यादिसार्धकारिका कथं सङ्गच्छत इत्यत आहुः **यथे**त्यादि. "चक्षुषश्चक्षुः, श्रोत्रस्य श्रोत्रं, मनसो मन" इति "प्राणन्नेव प्राणो भवती"त्यादिश्रुत्या यथा तत्तत्कार्यकर्तृत्वेनेन्द्रियादिरूपत्वं वैदिकैर्मन्यते, तथा "यस्मात्मा शरीरं, य आत्मानमन्तरो यमयती"तिश्रुतिवाक्यादात्मादि-भोक्तृत्वेनात्मत्वादिस्वरूपमपि मन्तव्यम्. तथा च तत्तत्कार्यकरणात्तत्तद्रूपः स्वयमेवेति न कथमपि द्वैतापत्तिरित्यर्थः. एवमनुपपत्तिं परिहृत्यात्मरूपं निश्चिन्वन्ति **यथे**त्यादि. ननु भावस्य मनोविकारात्मकत्वात् कथं ब्रह्मरूपत्व-मित्याकांक्षायामाहुः **प्रभुरि**त्यादि. तथा च रसस्य स्थायिभावात्मकत्वेन "स मानसीन आत्मा जनानामि"ति श्रुत्या तत्र प्रकटस्य भावरूपतया विकारात्मकत्वाभावाद् ब्रह्मरूपत्वं निर्बाधमिति वेणुगीतएव व्युत्पादितमित्यर्थः. नन्वस्त्वात्मादिरूपत्वं तथापि लीला तु प्रकटरूपेणैव क्रियत इति तेन कथं लीलेत्याकांक्षायामाहुः **आत्माधीनमि**त्यादि. इदं च "आत्मारामोप्यरीर-

**कारिकार्थः**

**रूपप्रपंचस्ये**त्यादि. पंचात्मके रूपे येनांशेन या लीला कृता तां तां लीलां क्रमेणाहुः **आत्मने**त्यादि सार्धेन. अत्र पंचस्वध्यायेषु एकैकस्मिन्नध्याये एकैका लीला. अथवा प्रत्यध्यायोक्तलीलायामपि पंचविधत्वं ज्ञेयम्. अत्र सैन्धवघनवत् एकरसे भगवद्रूपे कथं पंचविधत्वमित्याशंक्य टिप्पण्यां "यथेन्द्रियादि-रूपत्वमि"त्यादि सार्धपंचकारिकाभिः उपपादितम्. **रूपं प्रतिष्ठितमि**ति हरिप्रियासु इति शेषः; पूर्णः स्वरूपानन्दो दत्त इत्यर्थः (६-७).

## टिप्पणी

भावाधीनमतः प्रोक्त**मात्मने**त्यादि सुष्ठु हि ।
अन्याप्राधान्यतः पूर्वं केवलेनेति तत्तथा ॥
तत्तत्प्राधान्यतस्तत्तल्लीलेत्यग्रे तथोदितम् ।
मनःप्रभृतिसर्वस्वं[१] तासु नास्ति हरेः परम् ॥
इति ज्ञापितमेतेन विप्रयोगदशासु वै ॥

यद्वा. **आत्मना प्रथमे**त्यादिनोक्तं पञ्चविधत्वं प्रत्यध्यायोक्तलीलायामपि ज्ञेयम्. तथाहि. प्रियाभ्यः फलं दातुं तथा रूपप्राकट्यं कृत्वा स्थित इति **भगवत्पदेनात्मना** लीलोक्ता. "मनश्चक्रे" "कृष्णगृहीतमानसा" इत्यादिनाऽन्योन्यं चित्तव्यतिषङ्गो निरूपित इति **मनसा**. ततः "स्वागतं व" इत्यादिकथनाद्**वचसा**[२]. तादृग्ववचनश्रवणेपि प्राणानां स्थितिस्तु, प्राणरूपेण भगवानेव वाग्द्वारा प्रविष्ट इति, **प्राणैः** सा. अतएव मूले "प्रतिभाषमाणमि"त्युक्तम्.

## प्रकाशः

मदि"त्यत्र स्फुटीभविष्यति. एवं चात्मादीनां कर्तृत्वमेव, न करणत्वमित्याशयेनाहुः **अन्ये**त्यादि. एतन्निरूपणप्रयोजनमाहुः **मन** इत्यादि. तथा चान्तरफलसिद्ध्यर्थमेवं कृतवानित्यर्थः. अत्र लीलाक्रमे बीजं तु— प्रथम आत्मना लीलेति आत्मा चाधारभूतं लिङ्गमुपजीवतीति, द्वितीये मनसा, ततः प्राणबन्धनत्वेन मनसः प्राणाधीनतया तदुपजीव्यत्वाद्वाचश्च प्राणविकारतया तदन्तर्गतत्वेन तृतीये वाक्प्राणैः, तत इन्द्रियाणां प्राणव्रतत्वेन प्राणोपजीवकत्त्वात्तुरीये तैः, ततः शरीरस्य तत्सर्वोपजीवकत्वात्तेनेति— श्रौतवासनारूपं बोध्यम्. एतेन सङ्गतिरप्युक्तप्रायैवेति न पृथक्तदुक्तिः. अस्मिन् पक्षे भक्तस्वरूपन्यग्भावेन रसात्मकस्य भगवतो लीलेति (उक्तं!) भवति, न तु रसवतः. भगवांस्तु रसवानपीति तत्त्वेनापि सा वाच्यैव, अन्यथा मूलस्थ[३] वाक्यासङ्गतेरित्यभिसन्धाय आत्मादीनां करणत्वस्याप्यविरुद्धत्वात्तद्घटितं पक्षान्तरमाहुः **यद्वे**त्यादि. **प्रतिभाषमाणमि**ति. **भाषमाण**पदेनैव चारितार्थ्येऽपि **प्रति**शब्दोपादानात् स्वप्रवेशप्रतिकूलतया भाषमाणमित्यर्थः. सुबोधिन्यां **व.क्प्राणैरि**त्येकपद्यादग्रिमाध्यायलीलासु वाक्प्राणैक्येनैव लीलाया विवरिष्य-

१. सव स्वं भू. पा. २. वाचा सेति मूले पाठः.
३. मूलस्य इति मुद्रितपाठः मुं. वि.-मांडपाठमनुसृत्य संशोधितः.



## टिप्पणी

बलं हि प्राणानां धर्मः, एते चालौकिका इति भगवद्वशीकरणलक्षणं बलं संपन्नमिति स्वामिनीवाग्रूपत्वं प्राणरूपत्वं चेति तथा. तत इन्द्रियशरीरयोः सेति स्पष्टम्. तिरोधानमपि कायिकमिति तथेति प्रथमाध्यायस्थितिः. तिरोधानदशायामेतासामात्मा भगवत्येव प्रविष्ट इति स एवात्मत्वेनैतासु स्थितः कार्यं कृतवानि**त्यात्मना** सा. एवमेव मनःप्रभृतीन्द्रियान्तं ज्ञेयम्. "नात्मागाराणि सस्मरुरि"ति वाक्याद्देहस्मृतिरहितानां पुनः पुलिनागमनं स्वतो न सम्भवतीति **शारीरी** सा. तृतीयेऽध्याये व्रजोत्कर्षहेतुत्वं दर्शनाभावेन वधहेतुत्वं रक्षकत्वमलौकिकत्वे सति ब्रह्मप्रार्थनया प्राकट्यं च स्वरूप-

## लेखः

**प्राणानां धर्म** इति, "अन्नेन प्राणाः प्राणैर्बलमि"ति श्रुतेर्बलस्य प्राणजन्यत्वादिति

## योजना

**आत्मना प्रथमा लीले**ति. अत्र पक्षद्वयं टिप्पण्याम्. तत्र प्रथमपक्षे आत्मना प्रथमाध्याये लीला, मनसा द्वितीये, वाक्प्राणैस्तृतीये, इन्द्रियैः चतुर्थे, शरीरेण पञ्चमे— एवं पञ्चस्वध्यायेषु एकैकेव[१] लीला एकैकस्याध्यायस्यार्थः. द्वितीयपक्षे तु आत्मादिभिः पञ्चापि लीलाः पञ्चस्वध्यायेषु सर्वत्रोच्यन्त इति. तत्र यद्यपि पुरुषोत्तमस्य "स यथा सैन्धवघन" इतिश्रुतेः सैन्धवघनवदानन्दैकरूपत्वेनैकरसत्वात् करचरणादीनामानन्दमयत्वेन साकारस्य प्रतीयमानस्यैवात्मरूपत्वं, नतु प्रतीयमाने पुरुषोत्तमदेहे जीववदात्मस्थितिः, तथापि "पश्यन् चक्षुर्वदन् वाक्" इति श्रुतेस्तत्तदिन्द्रियकार्यं कुर्वन् भगवानेवेन्द्रियरूपः, तथा आत्मकार्यं कुर्वन् **आत्म**शब्दव्यवहार्यो भवतीति भावः. अतएव श्रीमत्प्रभुचरणैष्टिप्पण्यां "यथेन्द्रियादिरूपत्वं शुद्धस्य ब्रह्मणस्तथा आत्मत्वादिस्वरूपत्वं मन्तव्यं श्रुतिवाक्यत" इत्यनेनात्मरूपता ब्रह्मणो निरूपिता. आत्मकार्यं तु पुरञ्जनोपाख्याने स्पष्टम्. तत्र हि केवलस्यात्मनो लिङ्गशरीरसंबन्धकरणं स्थूलदेहवासकरणं च वर्ण्यते. अतः प्रथमतः सर्ववस्तुसंपादनं आत्मकार्यम्. एवमत्रापि "रन्तुं मनश्चक्र" इत्यादिषु वाक्येषु नूतनाया मनआदिसर्वसामग्र्याः करणं निरूपितम्. अत आत्मकार्यमस्मिन्नध्याये वर्णितं बोद्धव्यम्. अग्रे कारिकाणामर्थष्टिप्पण्यां स्फुटः (६-९).

१. एकैकेन इति मुद्रितपाठः. जय. पाठः गृहीतः.

## टिप्पणी

मात्रस्यैवे**त्यात्मना** या लीला सा चतुर्भिरुक्ता. ततोग्रे [१]निकटागमन-द्विविधरमण-मुख्यरसदानानि प्रार्थितानि, तानि चोद्दीप्तभावपूर्वकाणि, भावाश्च मनोनिष्ठा इति तल्लीला चतुर्भिरुक्ता. तत एकेन प्राणस्थितिहेतुत्वेन कथास्वरूपं निरूपितम्. तत्र वाक्प्राणरूपत्वं स्पष्टम्. ततोग्रे प्रहसितेक्षणादिकं चेन्द्रियकार्यमिति तल्लीलोक्ता. ज्ञानकर्मभेदेनेन्द्रियं द्विविधमिति द्वाभ्यामेवोक्ता. ततो दिनान्ते स्वयमागत्याननं प्रदर्शयतीति **शारीरी** सा. एतदग्रे शारीरीत्वं स्पष्टम्. अधरामृतदानस्य रतान्तःपातित्वेन तदपि तथा. अटव्यटनं स्पष्टम्. दर्शनेऽन्तरायस्य दुःखदत्वे हेतुः स्वरूपमेवेति सापि तथा. अग्रे त्यागोपि दैहिक एवेति तथा. अग्रे चाननोरसोर्देहमध्यपातित्वेन सापि लीला तथा. ततोग्रे स्वरूपाभिव्यक्तिप्रार्थनमिति तथा. अग्रे चरणाम्बुजरुहं[२] देह इति स्पष्टम्. स्वामिनीनां हि बहिःप्राकट्यमेव भगवतोऽभीष्टम्, तदैवेश्वरवादोऽन्यदा शून्यवाद इति ज्ञापनायैश्वर्यसमानसंख्याकैः श्लोकैः दैहिकी सा निरूपिता. तुरीयेऽध्याये प्रियप्राकट्येन पूर्वदशाखिलापि विस्मृतेति ज्ञापनायोक्तक्रमातिक्रम उच्यते. दैन्यभावबहिःप्रकटनरूपाभ्यां[३] साधनफलरूपाभ्या**मात्मना** सा. ततः सर्वासामुत्थानं भगव**न्मनसै**वेति सा तथा. तत **इन्द्रियैरि**ति स्पष्टम्. ततोऽग्रिमलीलायोग्यस्थले गतिः, तत्रासन उपवेशनादिकं **शारीरम्.** ततो **वाग्रू**पत्वं भगवता चातिरोधानकथनाद्वाचः **प्राण**रूपत्वं चेति. पञ्चमेऽध्याये प्रतिबन्धक-निवर्तनेन स्वाङ्गैः पोषणेन च पूर्ववद् भावसंपन्नाः प्रियाः कृता **इत्यात्मना** सा. क्रीडाया मानसरसोद्गमहेतुत्वेन तदारम्भस्तथा. शोभोभयोरपि क्रीडा-

## प्रकाशः

माणत्वाच्चात्र भेदेन तल्लीलाकथनं (कथं!) युज्यत इत्याशयेनाहुः **बलं** **ही**त्यादि. तृतीयाध्यायलीलाविमर्षे **इति तथे**ति, **इति** हेतोः स्वरूपाभिव्यक्तिः शारीरी लीलेत्यर्थः. **ऐश्वर्ये**त्यादि, अणिमादिभेदेन तस्याष्टविधत्वात्तत्तुल्यसंख्यै-रित्यर्थः. [४]एवमध्यायपञ्चके आलम्बनरूपीय-पञ्चलीलाविवरणेन तल्लीलायामपि क्रमः समर्थितः. तत्र सकृदपि पञ्चलीलाकरणेन रूपप्रतिष्ठाभिरध्यायान्तरलीला-

१. °गमनाद्विविधेति तु टिप्पणस्थोऽशुद्धः पाठो मूले नास्ति. २. चरणाम्बुरुहम् मू. पा.
३. प्रकटरूपाभ्यां मू. पा. ४. इदं शोधपत्रं **एवमित्या**रभ्य **हरिप्रिये**त्यादीत्यन्तं मूलश्रीहस्ताक्षरपुस्तके नास्तीत्यतो रामकृष्णभट्टपुस्तकतो निवेशितम्.



## टिप्पणी

सामयिकीति सापि मानस्येव. ततोग्रे भगवत्साम्येन गानं **वाक्प्राणैः** सा. ततः स्कन्धग्रहणाघ्राण-रसास्वादनादि-हस्ताब्जधारणा**न्तेन्द्रियैः** सा. ततोग्रे **शारीरी.** अथवा. "शास्त्राणां विषयस्तावद्यावन्मन्दरसा[१] नराः रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रम" इतिवाक्यादत्रोभयोरुद्भटभाववत्त्वेन सर्वत्र सर्वा लीलात्रोच्यत नायं क्रमो विवक्षितः. एतच्च यथातथा स्वयमेव भावनीयम्.

**रूपं प्रतिष्ठितमि**ति हरिप्रियास्विति शेषः; [२]पूर्णस्वरूपानन्दो दत्तोऽभवदित्यर्थः (६-७).

आद्येऽध्याये प्रभुरुक्तरूपात्मना लीलां कृतवानिति भक्तानामप्यात्मन्येव

## प्रकाशः

वैयर्थ्यं क्वचित्क्रमभङ्गो यदुक्तस्तत्राप्यालम्बनीयतारूपेण बीजाभावश्चेत्याशङ्कां हृदि कृत्वा पक्षान्तरमाहुः **अथवे**त्यादि. **शास्त्राणामि**ति. इदं श्लोकरूपं वात्स्यायनसूत्रम्. तथा च रसशास्त्रमर्यादायास्तथात्वान्न क्रमस्य विवक्षितत्व-मित्यर्थः. अत्रेदं बोध्यं– भगवतो रसरूपत्वस्य तदालम्बनत्वस्य[३] च स्वाभाविकत्वाद्भक्तानां सर्वात्मभावस्य तद्रसात्मकतया तथात्वात् क्रमस्याविवक्षितत्वेपि "अन्यो ह्यन्यस्मिन्प्रतिष्ठित" इति तत्प्रकरणीयश्रुतेर्भेदस्य सत्त्वात्सकृल्लीलाकृतौ तदनिवृत्त्या लयासम्भवात्तदर्थमसकृत्तत्करणं विवक्षितम्, सधर्मत्वस्य स्वाभाविकत्वाच्चेति नेतराध्यायलीलावैयर्थ्यम्. तथा सति प्रथम-पञ्चविधया आत्मनि, ततस्तादृश्या मनसीत्येवं पञ्चसु पञ्चविधधर्मसहित-स्यालम्बनस्य प्रतिष्ठायां भक्तस्वरूपस्य सम्यक्तया लय इति न सुबोधिनीविरोधगन्धः, शास्त्रीयहेतोरुक्तत्वाच्च न पूर्वत्र क्रमत्यागदोषश्चेति. तदेतद्धृदि कृत्वा **रूपं प्रतिष्ठितमि**ति विवृण्वन्ति **हरिप्रिये**त्यादि (६-७).

एवं प्रथमप्रकरणीयाध्यायविभागमुक्त्वा निर्वाहकत्वं कार्यकारणभावो वावान्तरयोः सङ्गतिरिति बोधयित्वा पञ्चविंशषड्विंशयोरपि साधनफलरूपैव सङ्गतिः परं विशेषरूपेणेति बोधयितुमध्यायार्थं वदन्तीत्याशयेनाहुः **आद्य** इत्यादि. **उक्तरूपात्मने**ति स्वामिनीभावरूपात्मना. **आत्मन्येवे**ति, जीवात्मलिङ्ग-रूपे मनसि भावरूपेण प्राकट्याल्लिङ्गान्तःस्थस्य जीवस्यैव नैकट्यात्तत्रेत्यर्थः.

१. °न्मान्दरसा मू. पा. २. पूर्णः स्वरूपानन्दो मू. पा.
३. तदालम्बनस्य इति मुद्रितपाठः मांड- मुं. वि.-जूनागढ पाठान् अनुसृत्य संशोधितः.

षड्विंशे तु हरिः पूर्वं जीवानानन्दयत्स्वयम् ।

## टिप्पणी

स्वानन्दं पूरितवानित्याहुः **जीवानानन्दयदि**ति. आत्मन इत्यर्थः. अतएव प्रभुणा तादृग्रसभावः पूर्णोऽत्र कृतो येन प्रभुवचनेभ्योपि निरपेक्षा जाताः. ततः क्रमेणातिशयितभावस्तथा कृतो येन स्वरूपादपि निरपेक्षा जाताः, यतो मानोभूत्. तथा च भगवद्भावस्य नित्यत्वादयं भावः स्थायिभाववत्सदा स्वामिनीष्वस्तीति ज्ञेयम्. यतोस्मिन् रसे नायिकाप्राधान्यमेव[1] निर्वहति. अग्रे यदात्यदिः कथनं तदेतस्यैव भावस्यावस्थाविशेषसम्बन्धि-व्यभिचारिभावानामेव. अतएवाग्रे "ईषत्कुपिता" इति वक्ष्यते. द्वितीयतृतीयादिलीलाकरणभूतमनोवाक्प्राणादिषु रसपूरणं च तथैव भवेदिति तथेति भावः. "यमेवैष वृणुत" इति श्रुतेरेतावत्स्वतो भगवता कृतम्, न तु साधनबलेनैतास्वित्याहुः **स्वयमि**ति. तर्हि नादेनाकारणं गमनबोधनादिकं चानुपपन्नमित्याशङ्क्य,

## प्रकाशः

आनन्दपूरणे गमकमाहुः **अतएवे**त्यादि. **अतएवे**ति एतस्य भावस्यात्मरूपत्वादेवेत्यर्थः. एतस्य **निरपेक्षा** इत्यादिना सम्बन्धः. एतस्य प्रयोजनमाहुः **यत** इत्यादि. तस्यापि प्रयोजनमाहुः **द्वितीये**त्यादि. एवं प्रकारकमत्रत्यं सर्वं भगवतो गजजलपानन्यायेन स्वस्वरूपानुभवार्थमित्यात्मारामत्वस्यैव निर्वाहकमित्यतिगूढाशयं प्रकटयितुं वदन्तीत्याशयेनाहुः **यमेवे**त्यादि. सर्वात्मभावस्य

## लेखः

भावः. **अयं भाव** इति स्वामिनीविषयकभावकृतस्तत्प्राधान्यात्मा[2] भावः,

## कारिकार्थः

**जीवानानन्दयत् स्वयमि**ति, एतावत् स्वतो भगवता कृतं न तु साधनबलेनेत्यर्थः. तर्हि नादेनाकारणं "प्रतियात व्रज नेह स्थेयमि"त्यादिना गमनबोधनादिकं चानुपपन्नमित्याशंक्य तत्रोपपत्तिं वदन्तो भगवान् लीलां कुर्वन् शास्त्रमर्यादामपि प्रदर्शयतीत्याशयेनाहुः **ते चेत् समर्पितात्मान** इति सार्धेन. सर्वात्मभाववन्तश्चेद् भक्ता भवन्ति तदैवायं रसः प्राप्यो नान्यथेत्यर्थः. सर्वात्मभावोपि भगवत्कृत एव भवति नान्यथेति ज्ञापनाय तदुपायरूपरिरंसा-चन्द्रोदय-गान-निषेधवचनान्युक्तानीत्याहुः **तत्रोपायश्च रूप्यत** इति. **तत्र**

१. प्राधान्यमेवमेव मू. पा. २. जो. पाठः. तत्प्राधान्यात्मभावः इति मुद्रितः पाठः.



ते चेत् समर्पितात्मानस्तत्रोपायश्च रूप्यते ॥(८)॥
आत्मा यावत् प्रपन्नोऽभूत्तावद्वै रमते हरिः ।

## टिप्पणी

तत्रोपपत्तिं वदन्तो भगवान् लीलां कुर्वन् शास्त्रमर्यादामपि प्रदर्शयतीत्याशयेनाहुः **ते चेत्समर्पितात्मान** इति सार्धेन. सर्वात्मभाववन्तश्चेद् भक्ता भवन्ति तदैवायं रसः प्राप्यो नान्यथेत्यर्थः. एतेनैतास्वेवैवं रमणं कुतो नान्यास्विति शङ्कापास्ता. सोपि भगवत्कृत एव भवति नान्यथेति ज्ञापनाय तदुपायरूपरिरंसा-चन्द्रोदय-गान-निषेधवचनान्युक्तानीत्याहुः **तत्रोपायश्च रूप्यत** इति. **तत्र** समर्पितात्मत्व इत्यर्थः. अन्तर्गृहगतकथयैतद्भावरहितानां नैतत्प्राप्तिरित्यत्र निदर्शनमप्युक्तमिति **च**कारार्थः. मानतिरोधानाभ्यामन्यापि सा मर्यादा ज्ञाप्यत इत्याहुः **आत्मे**ति. लडर्थे लुङ् छान्दसः. रसमर्यादामग्रे स्वयमेव वदिष्यन्त्यन्त्यश्लोकद्वये. अन्तः-

## प्रकाशः

निष्कृष्टं स्वरूपं वदन्तीत्याशयेनाहुः **सोपी**त्यादि. **सोपी**ति सर्वात्मभावोपीत्यर्थः. एतेन भगवदनुग्रहविशेषैकलभ्यः "स एवाधस्तादि"त्यादिश्रुत्युक्तभावासाधारणकारणभूतो यः स्थायीभावः सः सर्वात्मभाव इति तत्स्वरूपादिलक्षणं बोध्यम्. यथा जीवानां चिदात्मकत्वं तथा स्थायित्वं लौकिकेपीति तद्वारणाय 'लभ्य' इत्यन्तम्. शेषं कार्यलक्षणं फलोपधानाय श्रौतत्वाय चेति लिङ्गभूयस्त्वाधिकरणादवगन्तव्यम्. भगवद्विषयक[1]रत्याख्यस्थायित्वमपि न तल्लक्षणमिति ज्ञापनायाहुः **अन्तरि**त्यादि. एतस्य भावस्य लौकिकालौकिकविलक्षणत्वज्ञापनाय वदन्तीत्याशयेनाहुः **माने**त्यादि. **से**ति सर्वात्मभावसम्बन्धिनी. एवमेकेन

## कारिकार्थः

समर्पितात्मत्वे इत्यर्थः (८).

मानतिरोधानाभ्यामन्यापि मर्यादा ज्ञाप्यत इत्याहुः **आत्मा यावत्प्रपन्नोऽभूदि**ति. 'भवती'ति वक्तव्ये **अभूदि**ति प्रयोगे लडर्थे लुङ् छान्दसः. **आत्मा यावत्**पर्यन्तं **प्रपन्नो** भवति **तावदे**व हरिः **रमते** बहिः प्रकटो भवति, अन्यदा तु बाह्यत**स्तिरोधत्ते.** कुतः इत्याकांक्षायामाहुः **सोन्तःकरणसम्बन्धी**ति, **सः** हरिः अन्तःकरणसम्बन्धी अतोऽन्तःप्रपत्त्यभावे बाह्यतस्तिरोधानं युक्तमिति भावः. एतच्च टिप्पण्यां चतुर्धा व्याख्यातम् (९).

१. विषय° इति मुद्रितपाठः मुं. वि.पाठमनुसृत्य संशोधितः.

सोऽन्तःकरणसम्बन्धी तिरोधत्ते हरिश्च सः ॥(९)॥

**टिप्पणी**

प्रपत्त्यभावे बाह्यतस्तिरोधत्ते. तत्र हेतु**रन्तःकरणसम्बन्धीति**— यथा पतिपुत्रादिः शरीरसम्बन्धी तथा हरिः सर्वभावप्रपत्त्येकलभ्य इति सा चान्तःकरणधर्म इति तथा. तथा च हेत्वभावे कार्याभावो युक्त इति भावः. तिरोधानमपि मानजदुःखहरणार्थमेवेत्याहुः **हरिश्च स** इति. अत्र **हरि**पदस्यायं भावः. "एवं गजेन्द्रमुपवर्णितनिर्विशेषं, ब्रह्मादयो विविधलिङ्गभिदाभिमानाः, नैते यदोपससृपुर्निखिलात्मकत्वात्, तत्राखिलामरमयो हरिराविरासीदि"ति वाक्याद्यथान्यैररक्षणे जाते स्वयमाविर्भूय रक्षितवान्, एवमन्वेषणादिसाधनानामसाधकत्वेऽतिदैन्ये[1] सति तन्निवारणाय स्वयमाविर्भूय सर्वं कृतवानिति. अथवा. अन्तःकरणसम्बन्धी सन् तत्र स्थितः सन् बाह्यतस्तिरोधत्त इत्यर्थः. यद्वा. मानस्यायं हि सहजो धर्मो यन्नायकतिरस्कारोऽवचनानीक्षणादिभिः, प्रकृते च तत्कार्यं स्वयमेव प्रभुः कृतवान्. न केवलमधुनैवं किन्तु सार्वदिकीयं व्यवस्थेत्याहुः **सोऽन्तःकरणे**ति. **सः** पूर्वोक्तरसभावात्मकएव प्रभुः **स** मानात्मकः स**न्नन्तःकरणसम्बन्धी** चेत्तदा बहिस्तथेत्यर्थः. यद्वा. कायिकचेष्टया

**प्रकाशः**

प्रकारेण वैलक्षण्यं व्याख्यानादुर्लभत्वमस्य (त्वं चास्य!) फलस्य प्रदर्शितम्. एवमपि कुर्वन्नानुगृहीतांस्त्यजतीति बोधनाय प्रकारान्तरेणोत्तरार्धं व्याकुर्वन्ति **अथवान्तःकरणे**त्यादि. अन्तःप्रपत्त्यभावे सर्वभावप्रपत्तिजननार्थं तत्र स्थितः सन् बाह्यतस्तिरोधत्ते, नत्वन्तरत इति द्वितीया मर्यादेति भावः. तृतीयामाहुः **यद्वा मानस्ये**त्यादि. एतां व्यवस्थापयितुं प्रकारान्तरेण व्याकुर्वन्ति **यद्वा कायिके**त्यादि. सर्वमेतत् श्रीमदाचार्यै"स्तासां तदि"ति श्लोके विवेचनीयमतो न क्वापि कोपि विरोधलेशः (८-९).

**लेखः**

स्वामिनीप्राधान्यमिति यावत्. **संबन्धी तथा हरिरि**ति, एतस्याग्रिमेण **तथे**त्यनेनान्वयः. पत्यादिवद्ध**रिस्तथा** अन्तःकरणसम्बन्धीत्यर्थः. तद्व्युत्पादितं **संर्वे**त्यार**भ्येतीत्य**न्तेन. **गीतगोविन्दादिष्वि**ति. अत्र तु कायिकानन्ददाने मानो न जात इति तथाऽकरणम् (बहिरेव मानापनोदाकरणं) इति भावः (५-९).

१. °मसाधनत्वेनातिदैन्ये मू. पा.



प्रथमं भजनानन्दं निरूपयितुं स्त्रीषु स्वानन्दः स्थापनीय इति तासु रत्यर्थमिच्छां कृतवानित्याह **भगवानपी**ति.

**॥ श्रीशुक उवाच ॥**

**भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ।**
**वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः[1] ॥१॥**

"मयेमा रंस्यथ क्षपा" इति या रात्रयो वरत्वेन दत्ताः, स्त्रीणां रमणार्थाः, ता रात्रीर्भगवान् परिगृह्य, सर्वास्वेव रात्रिषु ता आधिदैविकीरारोप्य,

**टिप्पणी**

मानापनोदनं कुतो न कृतवानित्याशङ्क्य तत्र हेतुमाहुः **स** इति. अन्तर्ज्ञानादिकार्यकरणं येने**त्यन्तःकरण** आत्मा त**त्सम्बन्धी** यतोऽतस्तथेत्यर्थः. आद्येऽध्याय आत्मनैवैतदात्मनि स्वानन्दं पूरितवानित्यन्तरेव च सोस्तीत्यन्तरेव प्रविश्य [2]तद्धर्मापनोदनं कृतवानित्युच्यते. यदा कायिकमानन्ददानं करिष्यति तदा बहिरेव तथा करिष्यतीति भावः. अतएव गीतगोविन्दादिषु तथैव गीयते. **हरिरि**ति पूर्ववत् (८-९).

आद्यश्लोके **सर्वास्वेव रात्रिष्वि**त्यादि. ननु तासां रात्रीणां नित्यत्वाद् दिवापि सत्त्वेन तेष्वप्येतद्रात्रिप्राकट्यं कृत्वा रमते उत लौकिकीषु रात्रिष्वेव

**लेखः**

सुबोधिन्यां **भगवानपी**त्यस्याभासे **प्रथममि**ति पञ्चप्रकारकमध्ये आत्मनेत्यर्थः. **स्त्रीष्वि**ति प्रसादयुक्तेष्वात्मस्वित्यर्थः. **स्वानन्द** इति आत्मानन्द इत्यर्थः. **तास्वि**ति, तत्सम्बन्धिरात्रिदर्शनस्य हेतुत्वोक्त्येति भावः. मनःस्वरूपस्य करणासम्भवात्तद्धर्मस्यैव करणमित्याशयेनाहुः **इच्छामि**ति, काममित्यर्थः. उद्गतेच्छाया एव कामत्वोक्तेरिति भावः.

व्याख्याने **परिगृह्ये**ति, ईक्षणे नायकभावरूपविशेषस्य हेतू रात्रिपरिग्रह इत्यर्थः. परिग्रहं विवृण्वन्ति **सर्वास्विति आरोप्ये**त्यन्तेन. वीक्षणहेतवो विशेषाः

**योजना**

**भगवानपी**त्यस्याभासे **स्त्रीषु स्वानन्दः स्थापनीय इती**ति. प्राकृते लोके हि भोगादिना आनन्दलेश उत्पाद्यते, सोऽपि न चिरस्थायी. इह तु स्वरूपात्मक आनन्दो रमणेन व्रजसुन्दरीषु स्थाप्यते. स तु स्वरूपात्मकत्वान्न

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्. २. तद्धर्मापनोदं मू. पा.

पूर्णत्वात्तासां पूर्णिमारूपाः कृत्वा, ऋतुमपि शरदमेव कृत्वा, तस्यापि कार्यं पुष्पाण्येव कृत्वा, रसोद्दीपकत्वेन सर्वां सामग्रीं विधाय, पश्चाद्रमणार्थं

**टिप्पणी**

तथा कृत्वा तथेति शङ्कानिरासायाहुः **सर्वास्वेवे**त्यादि. यावतीषु ता आरोपितवांस्तावतीषु **सर्वासु रात्रिष्वेव** लौकिकीष्वित्यर्थः. अन्यथा "एवं शशाङ्कांशुविराजिता" इति श्लोकेन लौकिकीनां तासामतिदेशो न सङ्गच्छेत. दिवापि तथोक्तौ दोहनपयोधिश्रयण-संयावसिद्ध्यादिकं गोपानां दिवा गोचारणादिपराणामेतासु स्वपार्श्वस्थत्वेन माननं च न सङ्गच्छत इति भावः. **पूर्णत्वादि**ति, रसशास्त्रीयाभिः सर्वाभिः कलाभिः पूर्णत्वादित्यर्थः. सकल-कलापूर्णभगवन्मनःसम्बन्धिचन्द्रस्यापि सदा तथात्वात्तासु तत्प्राकट्यकरणेन तथात्वकरणमित्याशयेनाहुः **पूर्णिमे**त्यादि. अन्यदा सदोषस्य जलादेर्दोषनिवर्तकत्वं कमलादिलक्षणगुणाधायकत्वं च शरदो लोके दृश्यत इति तस्यामसाधारणो धर्मोऽस्तीति ज्ञायते. इहापि रसानुपयोगिवस्तुनिरासपूर्वकं भगवद्भाव-पोषिकाऽलौकिकी शरद्भविष्यतीति तामेव कृतवानित्याहुः **ऋतुमपी**ति. पुंसां सदोषभावस्त्रीणामप्यत्र न प्रवेश इत्यपि ज्ञापयितुं वसन्तादीनां प्रावृषश्चा-करणमिति हृदयम्. ननु रात्रीणां नित्यत्वेन तद्धर्माणामपि नित्यत्वात् तासां कालात्मकत्वेनर्त्ववश्यंभावाच्च तत्करणोक्तिर्विवरणे कथमुपपद्यते? न च [1]मनस इवेति वाच्यम्, तथात्राश्रुतेरिति चेद्, इत्थम्. अत्र हि वीक्षणस्य तथामनःकरणे हेतुत्वमुच्यते. तथा च सर्वविषयकापरोक्षनित्यज्ञानवतो नित्यरात्रिदर्शनस्यापि तथात्वेन तत्कार्यस्यापि तथात्वापत्तौ तत्समाधानाय वीक्षणे पूर्वस्माद्विशेषो वाच्यः. स चात्र विषयरूप एव वक्तुं युक्तः. स च विशेषणांश एव. पूर्वं तस्यानाविर्भावनादधुनैव तथाकरणाद्रसोद्दीपिकां सामग्रीं प्रभुरेव [2]कृतवानिति सुष्ठूक्तमाचार्यैः **कृत्वे**ति. यद्यपि विशेषणस्यापि नित्यत्वेनोक्तदूषणानुद्धारस्तथापि भक्तानामपि दर्शनयोग्यता तत्र सम्पादितेति तथा. नायकभावेनेक्षणमेव विशेष इति ज्ञेयम्. अत एवोपसर्गो **वी**ति.

**प्रकाश**

**भगवानपी**त्यत्र **इति तथे**ति, अनेन हेतुना दूषणोद्धार इत्यर्थः. नन्वयमेव मूलेऽर्थो विवक्षित इत्यत्र किं गमकमत आहुः **नायके**त्यादि. तथा

१. मनसैवेति टिप्पणपाठोऽशुद्धः. २. प्रकटितवानिति पाठो मूले नास्ति.



स्वानन्दप्रकाशकं कामपितामहं मन उत्पादितवान्. तत्र सर्वासु संकल्पः स्व-

**टिप्पणी**

वस्तुतस्तु तत्तत्क्षणसम्बन्धिनी लीला नित्यैवोच्यत इति नानुपपत्तिः काचित्.

**प्रकाशः**

च मूले **रन्तुं** मनःकृतिकथनेन नायकभावो बोध्यते, ततश्च **व्युपसर्गेण** तद्भाव-पूर्व**केक्षण**मेवायातीति सएव विशेषः. स च भगवदीयत्वान्न निरर्थक इति स्वकार्यं सम्पादयितुं रतिविषयेष्वपि स्वोपयुक्तां सामग्रीं दर्शनगोचरां कारयतीत्येतावत्पर्यन्त एवावसीयते, तेन **वि**पदमेव गमकमित्यर्थः. नन्वेवमपि वीक्षणस्येदानीन्तनत्वेन नित्यत्वं तु न सिध्यतीति न दूषणोद्धार इत्यत आहुः **वस्तुत** इत्यादि. तथा च लीलानां नित्या[1]परिच्छिन्नत्वेन क्षणानां वा तथात्वेन चक्रवद्गमागमान्न काचिदनुपपत्तिरिति भावः. इदं चात्र दिङ्मात्रमुक्तम्, विशेषस्य निबन्धविद्वन्मण्डनादौ सत्कार्यवादस्थापने प्रपञ्चनादिति. सुबोधिन्यां **सामग्रीं विधाये**ति, सामग्रीविधाने रोदस्योरपि विद्वन्मण्डनोक्तदिशा दहराकाश-भगवन्मनःस्थाधिदैविकभूरूपत्वमवगन्तव्यम्, "यामैरयन् चन्द्रमसी"तिवत्. **तत्रे**ति सामग्रीसम्पादने. **तत्रे**ति तासु सङ्कल्पोद्बोधने. अत्र मनसः करणत्वेन

**लेखः**

**परिगृह्ये**त्यारभ्य **विधाये**त्यन्तेनोक्ताः. **कामपितामह**मिति. **रन्तुं मनश्चक्रे** इत्युक्ते रमणस्य कामसाध्यत्वात् कामस्य संकल्पजत्वान्मनसः कामपितामहत्वं सम्पादितवानिति सम्पन्नम्. तथा चाग्रे कामवर्णनात् सङ्कल्पं ततः कामं च कृतवानित्यर्थः. **तत्र सर्वास्वि**ति. देवसाहित्येन (भगवन्मनोरूप-चन्द्रसाहित्येनेत्यर्थः) कामजनने सति **स्वस्मिन्** स्थितो**ऽपि सङ्कल्पः सर्वासु बोधनीयः** गानेनेति शेषः. स्वसङ्कल्पबोधनेन तासामपि सङ्कल्पोदयो जातः. स च (वामदृशां) **मनोहर**मितिपदेनोक्तः. गानं मनो हरति स्वाधार-

**योजना**

ध्वंसप्रतियोगीत्यप्राकृतत्वमेव स्फुटीभवति. **तत्र सर्वासु संकल्प** इत्यादि, **स्वस्मिन्** वर्तमानो यो व्रजस्त्रीरमणसंकल्पः स **सर्वास्वपि** व्रजस्त्रीषु **बोधनीय** इत्यर्थः. सर्वासु व्रजस्त्रीषु कथं बोधनीय इत्याकांक्षायां वेणुना बोधनीय इत्याहुः **तत्र वेणुरपि सहायतां प्राप्स्यती**ति ॥१॥

१. नित्यपरिच्छिन्न इति मुद्रितपाठः मुं. वि. पाठमनुसृत्य संशोधितः.

स्मिन्नपि बोधनीयः. तत्र वेणुरपि सहायतां प्राप्स्यति. ततः कामवर्णनम्. अतः प्रथमं तादृशं मनः कृतवान्. यद्यपि एतत्प्रणालिकाव्यतिरेकेणापि स्वानन्दं तत्र स्थापयितुं शक्तः तथापि मर्यादा तिष्ठत्विति **भगवानपि मनश्चक्रे**. नन्वेवं सति स्वानन्दः स्थानत्यागाद् अन्यथा भवेत्, ततः स्वरूपादपि प्रच्युतः स्यादित्याशंक्याह **योगमायामुपाश्रित** इति. योगमाया हि यथास्थितमेवान्यत्र स्थापयति, यथा सङ्कर्षणम्. लीलार्थं सापि पूर्वं परिगृहीतेति नापूर्वं किञ्चित्. यथा प्रमाणे रक्षायां च बलभद्रोपयोगः एवं कार्ये योगमायायाः. तत्राप्यन्तरङ्गा योगमाया, अन्यत्र स्थितं प्रमाणमन्यत्रापि योजयति, अन्यत्र स्थितं

## टिप्पणी

**यद्यपी**त्यादिनाऽ**पि**शब्दार्थ उक्तः. **तथापि मर्या**देति रसमयदित्यर्थः. **एवं कार्ये योगमायाया** इति, भजनानन्ददानलक्षणे कार्य इत्यर्थः. **अन्यत्र स्थितं प्रमाणं** वेदात्मानं सङ्कर्षणं देवक्यां स्थितं रोहिण्यां योजितवती, स्वयमाविर्भूय मथुरायां स्थित**मानन्द**रूपं प्रभुं गोकुले, तथात्रापि पूर्वं गोपानां गृहेषु स्थिता ऋचोऽधुना भगवति योजयति, भगवति स्थितमानन्दं च तास्वित्यर्थः.

अत्र कश्चिदाह— आनन्दस्य सुखरूपत्वादमूर्तस्यान्यत्र गमनासम्भवात्प्रिय-

## लेखः

विषयकसङ्कल्पयुक्तं करोतीत्यर्थः. **तत्रे**ति. बोधने गानं करणं, वेणुः सहायः. केवलगानेन तावद्दूरं शब्दो न गच्छेदिति भावः. **कामवर्णनमि**ति. **अनङ्गवर्धनमि**तिपदेन तत्स्थित[१] (गीतस्थित) कामवर्णनमित्यर्थः. **एवं सती**ति रमणेन स्वानन्दस्थापने कृते सतीत्यर्थः. **स्वानन्द** इति आत्मानन्दो, न तु धर्मरूप इत्यर्थः. **स्थानत्यागादि**ति, स्वरूपस्य स्वाधारत्वात्तदानन्दस्य स्थानं स्वरूपमेव, हस्तपादादेर्देह इवेत्यर्थः. **अन्यथा भवेदि**ति, जीवधर्मत्वं प्राप्नुयादित्यर्थः. **स्वरूपादपी**ति, अन्यत्र गतौ तस्य पुरुषोत्तमानन्दत्वं न स्यादित्यर्थः. *(**प्रमाणे** इति निमित्तसप्तमी. प्रमाणसम्बन्धिनि कार्ये तद्विरोधपरिहारार्थं बलभद्रोपयोगः. तदुक्तं वत्सासुरप्रसङ्गे **दर्शयन् बलदेवाये**त्यत्र ''वत्सवधस्यानुचितत्वमाशङ्क्य वेदरूपबलदेवाय तत्सम्मत्यर्थं प्रदर्शनमि''ति. **रक्षायामि**ति, प्रतिबन्धकानागमनेन रसरक्षार्थमित्यर्थः. **तत्राप्यन्तरङ्गे**ति स्वरूपानन्दविरोधनिवर्तिकेत्यर्थः. विरोधपरिहारमाहुः **योजयती**ति, युक्तं भवति तथा स्थापयतीत्यर्थः. एतदा-

१. तत्स्थेन इति जो. पाठः. * शोधपत्रम्.



## टिप्पणी

सङ्गनिमित्तकः स्वामिनीषु सुखविशेष उत्पन्न इत्येव वक्तुं युक्तम्, अतो योगमायाश्रयणनिमित्तकथनमनुपपन्नमिति. स वक्तव्यः— ''आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त'' इत्यादिश्रुतिभ्य ''आनन्दमयोऽभ्यासादि''त्यादिन्यायेभ्यश्च धर्मिग्राहकप्रमाणभूतेभ्य आनन्दमयत्वं भगवत्स्वरूपे मन्तव्यम्, अनिच्छतापि त्वया. तथैव चिद्रूपस्य धर्मरूप'भग'शब्दार्थज्ञानरूपत्ववत् ''प्रकाशाश्रयवद्वा तेजस्त्वादि''ति न्यायाद्धर्मरूपतापि. तथा च ''तदेजती''ति श्रुतेस्तस्य गतिरूपत्वमप्यङ्गीकार्यम्. अतएव व्यापकत्वेऽपि गतिलीलोपपद्यते, दामोदरलीलेव. वस्तुतस्तु स्वरूपमर्यादामप्यतिक्रम्य भक्तार्थे लीलां करोतीति नानुपपत्तिः काचित्. अतएव ''रसं ह्येवायं लब्ध्वानन्दी भवती''ति श्रुतिः. सर्वात्मभावलक्षणः स्थायिभावो रसस्तमेव लब्ध्वानन्दवान् भवति. तादृशे प्रभुः स्वरूपानन्दं ददातीति तथा लाभकथनेन भगवद्दत्तएव प्राप्यते नान्यथेति

## प्रकाशः

नादस्य व्यापारत्वाद्वेणोः सहकारितया सहायत्वं बोध्यम्. ननु मायाकार्यं स्थितस्यावरणम् अन्यत्र स्थितस्यान्यत्र प्रत्यायनरूपो विक्षेपश्चेति द्वितीयस्कन्धे ''ऋतेर्थं यदि''त्यत्र सिद्धम्, इयं चान्तरङ्गेति तद्विलक्षणमत्र किं करिष्यतीत्याकांक्षायां तत्कार्यं यदाचार्यैरुक्तं तद्विवृण्वन्ति **वेदे**त्यादि. तथा च यथा बहिरङ्गा मनोवृत्तीरन्यत्र नयति, तथेयमन्तरङ्गैतत्करोति तदपि करोति, तच्च ''मन्यमानानि''त्यनेन वक्ष्यते. एवं चात्र यथास्थितनयनमेव ततो वैलक्षण्यमिति भावः. ''मन्मायामोहितधियः पुरुषाः पुरुषर्षभ श्रेयो वदन्त्यनैकान्त्याद्यथाधर्म यथारुची''त्यत्र प्रमाणस्यान्यत्र योजनं तत्कार्यं दृष्टम्, नत्वानन्दस्येत्याशयेन कश्चिदाशङ्कते, तदाहुः **अत्रे**त्यादि. समादधते **स** इत्यादि. **तस्ये**ति भगवतः. **अतएवे**ति विरुद्धधर्माश्रयत्वादेव. तथा च धर्मरूपताया गतिरूपताया विरुद्धधर्माश्रयत्वस्य च प्रामाणिकत्वेन आनन्दस्यामूर्तत्वाभावेन[१] च धर्मधर्मिविचारेऽन्यत्र गतिः सुघटा, सामर्थ्यस्यापि धर्मरूपत्वान्न तदाश्रयणेऽपि दोष इत्यर्थः. नन्वत्र पुष्टिलीला भगवत उच्यते, अतो मर्यादया समाधिर्न युक्त इत्यरुच्या तद्रीत्या समादधते **वस्तुत** इत्यादि. तथा चामूर्तत्वेऽपि गत्युपपत्तिरित्यर्थः. अत्र स्वरूपमर्यादातिक्रमे मानमाहुः **अतएव रसमि**त्यादि.

१. मूर्तत्वाभावेन इति मुं. वि. पाठः.

चानन्दमन्यत्र. अतः प्रमाणातिरिक्तमार्गो भक्तिमार्गश्चाग्रे विततौ भविष्यतः.

**टिप्पणी**

सूच्यते. 'एव'कारः सर्वत्रानुषज्यते. तथाहि. रसमेव लब्ध्वा तथा. तं लब्ध्वा तथा भवत्येव. तथा भूत्वा आनन्द्येव भवति, न तु लौकिकदुःख्यपीति च. **अतः प्रमाणातिरिक्तमार्ग** इति, प्रमाणमार्गातिरिक्तो मार्ग इत्यर्थः. यतोऽ**न्यत्र स्थितं प्रमाणमन्यत्रापि योजयत्य**तोऽन्यभजनरहितं विवाहितपतिभजनं विदधच्छास्त्रं तत्त्यागपूर्वकं भगवत्सेवामेव विधत्त इत्यर्थस्तु स्वामिनीनां तथा भजनेन तेन च फलसिद्ध्या "या माभजन्नि"तिवाक्येन भगवता प्रत्युपकृतित्वेन कथनात्फलरूपेण चाधुना ज्ञाप्यते. तस्य मार्गत्वं च. अन्यथोन्मार्गत्वमेव भवेत्. "अस्त्वेवमेतदि"त्यादिना प्रतिपादितं च ताभिः. ईश्वरवाक्यस्याखिलप्रमाणाधिकबलवत्त्वेऽपि स्वामिनीवाक्यैर्दुर्बलत्वमपि प्रमाणातिरिक्तो मार्ग इति ज्ञेयम्. यद्वा. प्रभुप्राप्त्यर्थं गुरूपसत्तिस्तदुक्तकरणं च भक्तानां प्रमाणमार्गः. प्रकृते च स्वामिनीप्राप्त्यर्थं योगमायाश्रयणादिकं प्रभुः करोति करिष्यत्यपीति प्रमाणातिरिक्तो मार्गः, यतोऽ**न्यत्र प्रतिष्ठितमानन्दमन्यत्र योजयत्य**त एतद्भावेन भजनरूपोऽत्युत्कटस्नेहजविरहभावेन सर्वत्यागपूर्वकं स्वदेहादिविस्मृतिपूर्वकं भगवदन्वेषणपरत्वलक्षणश्च **भक्तिमार्ग** इत्यर्थः. इदं च द्वितीयतृतीयाध्यायादिषु स्पष्टम्. एवं सत्यस्मिन्मार्गे स्वामिन्यएव गुरव इति ज्ञापितं भवति. स्वामिनीनां विप्रयोगभावे सौभाग्यमदादिर्हेतुः. तत्र च भगवद्धर्मप्रवेश[1] एव हेतुः. अन्यथा पादरजःप्रपन्नानामेतासां मदो मानश्च न स्याताममिति भाव. ननु "एवं शशांकांशुविराजिता निशा" इतिवाक्याल्लौकिकीष्वपि रात्रिषु रमणमिति ज्ञायते. एवं सत्यलौकिकीतत्परिग्रहे गौरवं विशेषाभावश्चेत्याशङ्क्य लौकिकीनामपि तासां स्वरूपमाहुः **याश्च रात्रय** इति. **निर्मिता** इतिपदात्सर्गादा-

**प्रकाशः**

**अनुषज्यत** इति संयोगपृथक्त्वेनानुषज्यते. मार्गयोर्विततत्वं व्याकुर्वन्तो व्युत्पादयन्ति **यतोऽन्यत्रे**त्यादिना. **फलरूपेणे**ति भजनस्य विशेषणम्. **प्रतिपादितमि**ति मार्गत्वमिति शेषः. मार्गद्वयवितानप्रयोजनमाहुः **एवं सती**त्यादि. नन्वन्वेषणादिलक्षणमार्गस्य सौभाग्यमदादिदोष-प्रयुक्तत्वमेतद्गुरुषु तदारोपयतीति शङ्कायां समादधते **स्वामिनीनामि**त्यादि. तथा च प्रपत्ति-

१. भवद्धर्मप्रवेश मू. पा.



याश्च रात्रयो रमणार्थमेव निर्मिताः, **ता** एव परिगृहीताः, अन्यथा साधारणी-

**टिप्पणी**

वेवैतदर्थमेव भगवता सृष्टाः काश्चन रात्रयो भगवत्येव स्थिता एतावत्पर्यन्तं, लीलासमये लौकिकीष्वेव रात्रिषु स्थापयित्वा तां कृतवानिति ज्ञाप्यते. लौकिकेन्दुप्रकाश्यत्वेन गीतगोविन्दाद्युक्तप्रकारेण लौकिकरीत्यैव रमणेन चैतासां लौकिकीत्वमुच्यते. [1]तासु विवक्षितेन्दुप्रकाश्यत्वेन नायकमानोक्त्या नायकाप्रणिपातोक्त्यैतन्मान-नायकान्तर्धान-नायिकादैन्योक्त्यैतद्धेतुकतदाविर्भावे तदधीनत्वोक्त्या प्रश्नोत्तरे परोक्षभजनोक्तौ पूर्वमननुभवेऽपि प्रत्यक्षबाधेऽपि तदनुभवतद्वाग्विश्वासोक्त्या भगवद्विचारितानुपूर्वीकस्वरजात्युन्नयनादिभिश्चालौकिकरीत्यैवालौकिकरसदानमिति ज्ञाप्यते. उक्तार्थेषु लौकिकवैलक्षण्यं स्पष्टम्. एवं सति स्वरूपतएव वालौकिकत्वमिति विवेकः. एवं कथन उपपत्तिमाहुः **अन्यथे**ति— साधारणीनां रात्रीणां तल्लीलाश्रयत्वे तासां सर्वत्रैव तुल्यत्वात् सर्वेषु देशेषु सर्वेषामेतदानन्दप्राकट्यं स्यादित्यर्थः. **अन्यथे**त्यस्यैव विवरणं **साधारणी**त्यादि. भूम्येकत्वेऽपि लीलाश्रयभूम्यधिष्ठान-

**प्रकाशः**

मदमानानि वदतो मूलादेव समाधिर्बोध्य[2] इति भावः. **प्राकट्यं स्यादि**ति, यथा साधारणेऽपि काले सूर्यचन्द्रमःसम्बन्धे सर्वत्रालोकाल्हादादि, तथा साधारणीषु रात्रिषु लीलासम्बन्धे तथा स्यादित्यर्थः ॥१॥

**लेखः**

शयेनैव टिप्पण्यां "रसं लब्ध्वानन्दी भवती"ति श्रुतिस्थ'रस'पदस्यार्थः सर्वात्मभावलक्षणस्थायिभाव उक्तः. अत्रायं भावः. छान्दोग्ये "भूमा कस्मिन् प्रतिष्ठित" इति प्रश्ने "स्वे महिम्नी"त्युत्तरम्. स्वरूपभूते सर्वात्मभावलक्षणे महिम्नि प्रतिष्ठित इति तदर्थः. योगमाया सर्वात्मभावमुद्बोधयति, तदा तस्मिन् प्रतिष्ठितौ तस्य स्वरूपभूतत्वान्न स्थानत्यागशङ्केति. 'स्वे-महिम्नी'ति पदद्वयकथनेन तस्य स्वरूपत्वं धर्मत्वं चोक्तम्. तेन स्वरूपत्वमादाय भूमप्रतिष्ठाधर्मत्वमादाय तस्य भक्तेषु स्थितिश्चाविरुद्धा. अतस्तस्य स्वरूपभूतत्वे तस्याप्यन्यत्र स्थितिः कथमिति शङ्काया नावसरः). **साधारणीपरिग्रहे** इति. यासु रात्रिषु बाललीला अन्याश्च (रमणव्यतिरिक्ताः) तादृश्यो लीला जायन्ते

१. तासामिति पाठः परं मूले नास्ति. २. बोध्यते इति जू. पाठः.

परिग्रहे सर्वत्रैवानन्दः स्यात्. **शरदि** ऋतावु**त्फुल्ला मल्लिका** यासु. **ता** दृष्ट्वा रमणार्थं **मनः** कृतवान्. **योगमायां** च समीप एवाश्रित्य स्थितः ॥१॥

**टिप्पणी**

त्वेनास्या नानुपपत्तिरिति भावः. ननु सर्वज्ञस्य रात्रिदर्शनमपि सार्वदिकमित्यधुना को विशेष इति चेत्तत्राहुः **शरदि ऋतावि**त्यादि. विशिष्टदर्शनं विशेष इत्यर्थः. ननु विशेषणस्यापि नित्यत्वान्न तथेति चेत्, सत्यम्. यादृशी लीलोच्यते तादृश्याएव नित्यत्वादधुनैवोक्तविशेषणवैशिष्ट्यमित्युक्तेपि न दोषः. एतद्यथा तथा विद्वन्मण्डने निरूपितमस्माभिः. [1]ईश्वरस्यान्याश्रयणं हि लौकिकी रीतिः, तदुक्तत्वात्र[2] तद्रीत्यापि रमणं सूच्यते. एवं सति मध्यस्थत्वेन तदा तस्या विशेषत उपयोग इति तदाश्रयणमुक्तमिति ज्ञेयम्. किञ्च. स्वाशक्ये ह्यर्थेऽन्याश्रयणं क्रियते. तथा च सर्वसमर्थस्यापि स्वानन्ददानसमये ईश्वरत्वादिधर्माज्ञानं सम्पादयितुं रसपरवशत्वेन न कर्तुं शक्यं, गोपानां चैतल्लीलाविषयकाज्ञानं तथा, आगमनसमये निषेधोक्त्या तज्ज्ञानस्य कथनात्.

**लेखः**

[3]तासामेवैतल्लीलायामपि परिग्रहे इत्यर्थः. **सर्वत्रैवे**ति गोगोपादिष्वपीत्यर्थः. "न चैवं विस्मय" इत्यस्य द्वितीयव्याख्याने "इयं च लीला स्वरूपानन्दरूपा तादृश्येवे"ति वक्ष्यते. स्वरूपमेव य आनन्दस्तन्निरूपिकेयं लीलेति तदर्थः. तथा च स्वरूपस्यापरिच्छिन्नत्वात्तदानन्दः स्वाधाराधेयेषु सर्वेष्वेव प्रकटः स्यादिति भावः. **शरदे**ति तृतीयाया अर्थमाहुः **शरदि ऋतावि**ति. तादृगृतौ सत्येवं जातमतो हेतौ तृतीयेत्यर्थः. **योगमायां चे**ति, रमणार्थं मनःकरणं योगमायाश्रयणं चेति **च**कारः. तथा च मूले **रन्तुमि**त्यस्योभयत्राप्यन्वयः. टिप्पण्यां **शरदि ऋतावि**त्यस्याभासे, **ननु सर्वज्ञस्ये**ति. **सार्वदिकमि**ति, लौकिकरात्रिषु रमणकालेऽपि विद्यमान(रात्रिदर्शन)मित्यर्थः. तथा चैतद्रात्रिदर्शनस्यैवालौकिकरमणेच्छायां हेतुत्वोक्तेस्तस्य च लौकिकरात्रिरमणेऽपि विद्यमानत्वेन तास्वप्यलौकिक[4]रमणं स्यात्. तदा च तासामपि रात्रीणामलौकिकीत्वमेव स्यादिति भावः. एतद्रात्रिदर्शनेऽलौकिकरमणे नियमोऽपि नास्तीत्याशयेनाहुः **ईश्वरस्येति** ॥१॥

१. अत्र '**योगमायां च समीप एवाश्रित्य** इति' इति प्रतीकं ऊह्यम् –सम्पा.
२. तदुक्त्यात्र मू. पा. ३. लौकिकरात्रीणाम्. ४. अलौकिकम् इति जो. पाठः.



नूतने तस्मिन् मनसि देवता नास्तीति, अनधिष्ठितं च कार्यं न साधयिष्यतीति, तदधिष्ठातृ[1]देवं चन्द्रं च ससृज इत्याह **तदोडुराज** इति.

**टिप्पणी**

[2]अत एतदादिकार्यसिद्ध्यर्थं योगमायाश्रयणमलौकिकरीत्या रमणेऽपीति ज्ञेयम्. अतएव "मोहितास्तस्य मायया" "मन्यमानाः स्वपार्श्वस्थानि"ति वक्ष्यति. अतएव रसोपयोगि यद्यत्कार्यं तत्तदा[3] तदा सम्पादयितुं शक्तेयमिति स्वनिकटएव मूर्तिमत्यास्तस्याः स्थापनमिति ज्ञापना**योपे**त्युपसर्गः. एतदेवोक्तं **समीप एवाश्रित्ये**त्यनेन ॥१॥

**तदोडुराज** इत्यस्याभासो **नूतने तस्मिन्नि**त्यारभ्य **ससृज** इत्यन्तः. अत्रेदं प्रतिभाति. आश्रितत्वोक्त्यात्रेश्वरत्वमर्यादामुल्लंघ्य भगवानधुना प्रवृत्त इति ज्ञायते. अन्यथा रसमर्यादोच्छिद्येत. एवं सति यदवधि सर्वविकारराहित्येन नैवंविधं मनः प्रकटितमिति सपद्येतादृशस्य तस्य नूतनत्वम्. लौकिकीं रीतिमनुसृतवतस्तद्देवतापेक्षापि घटते, लोके देवताधिष्ठितस्यैव कार्यक्षमत्वात्. अन्यथा नियामकाभावेन सामर्थ्याभावेन चाल्पेनैव यथापूर्वमेव भवेत्, न तु रसैकपरवशं सदा. अत एव "आत्तगजेन्द्रलील" इति वक्ष्यति. करिणीस्पर्शमात्रेण परवशत्वं तत्र प्रसिद्धम्. युक्तं चैतद् यद् विभावादिकं विना न रसपोष इति, "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरि"ति वात्स्यायनसूत्रात्. वस्तुतस्तु "रसो वै स" इत्यादिश्रुतिभ्यो रसरूपत्वात्प्रभोः स यादृशस्तच्छास्त्रसिद्धोऽस्ति तादृशो निरूप्यत इति नानुपपत्तिः काचित्. अतएव एवंभूतस्यैव नित्यत्वमपि. एतद्विद्वन्मण्डने द्रष्टव्यम्. तस्मात्सुष्ठूक्त**मनधिष्ठितं चे**त्यादि. ननु चन्द्रस्योदयकर्तृत्वं मूले प्रतीयत इति भगवतः सृष्टिकर्तृत्वो-

**प्रकाशः**

**तदोडुराज** इत्यस्य टिप्पण्याम्. भगवन्मनस आधिदैविकत्वात्तत्र देवतानपेक्षणादाभासे **देवता नास्ती**त्यादिकथनं कथमुपपद्यत इत्याशङ्क्य तत्तात्पर्यमाहुः **अत्रेदं प्रतिभाती**त्यादिना. नन्वेवं प्रणाड्या रसोद्बोधकथने रसस्य जन्यत्वापत्त्या भगवद्रूपता हीयेतेत्याशङ्कायां प्रणाडीतात्पर्यमाहुः **वस्तुत** इत्यादि. तथा च श्रुत्या रसस्य भगवद्रूपत्वे निश्चिते यथा यज्ञात्मकस्यास्मच्चेष्टाव्यङ्ग्यत्वम् एवं रसात्मक एतत्प्रणाड्या लोके व्यज्यत इति

१. दैवमिति पाठः. २. तदन्त इति पाठोऽवाच्यः. ३. तत्तत्तदा मू. पा.

**तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिम्पन्नरुणेन शन्तमैः ।**
**स चर्षणीनामुदगाच्छुचो हरन् प्रियः प्रियाया इव दीर्घदर्शनः ॥२॥**

यदैव मनः कृतवान् **तदैव** तस्याधिदैवत**मुडुराज उदगात्** उदितो जातः. यद्यप्येकदा रात्रयो दृष्टाः तथापि क्रमेणैव तासां स्थितिः. भगवन्मनश्चन्द्रस्याधिदैविकत्वात् पूर्णएव सः, निष्कलङ्कश्च. मनस्येवाविर्भूते तस्याविर्भावः, क्रीडायामुपरतायामुपरतिः, मध्याकाशपर्यन्तमेव गमनं, नास्तमयः कदाचिदपि.

## टिप्पणी

क्तिरत्र विरुद्धेति चेत्, न, अनवबोधात्. यदा **मनश्चक्रे तदैव** य **उडुराजो**ऽर्थादुत्पादितः **स उदगादि**ति मूलार्थस्य विवक्षितत्वात्. अन्यथा **तदे**ति न वदेत्, 'सोऽप्युदगादि'त्येव वदेत्. किञ्चाग्रिमश्लोकोक्तचन्द्रदर्शनान्यथानुपपत्त्यैव चन्द्रोदयप्राप्तेरेतच्छ्लोकवैयर्थ्यापातः. एवं सति चिकीर्षितलीलाया वेदलोकयोरप्रतीतत्वेनापूर्वत्वात्तत्सामग्र्यप्यपूर्वैव सर्वा सम्पादितेति ज्ञापनाय **तदे**त्युक्तिपूर्वकं तदुदयवर्णनमिति ज्ञायते. अतएव **भगवन्मनश्चन्द्रस्ये**त्यारभ्य **कदाचिदपी**त्यन्तो ग्रन्थो युज्यते. अन्यथा मूले पूर्णत्वादिधर्माः कण्ठोक्ता नेत्याचार्या अपि न वदेयुः. अतएव पूर्वश्लोके मनसोऽपि करणमुक्तं **चक्रे** इति पदेन, क्रीडायां मनसएव मुख्यत्वात्तस्य नूतनतया करणोक्त्यैव सर्वस्या अपि सामग्र्यास्तथात्वं ज्ञातं भविष्यतीत्यभिप्रायेण. एवं सति तादृशं **चन्द्रं च** प्रभुः **ससृज इति** हेतोरग्रे तदुदय**माह** शुक इत्याभासार्थो ज्ञेयः. **तथापि क्रमेणैवे**ति. अन्यथा "रजन्येषे"ति प्रभुर्न वदेदिति भावः. नन्वस्या रात्र्या नित्यत्वेनैकयैव चारितार्थ्ये बह्वीनां तासां परिग्रहः किमर्थ इति चेद्, अत्र वदामः. नायिकाविशेषेषु प्रतिपदादितिथि-नियतकर्तव्यताक-बन्धादिविशेषैरेव रसः प्रादुर्भवतीति वात्स्यायननयसिद्धत्वात्तदर्थमेवोक्तरूपाणां तासां परिग्रह इति. रात्रीणामलौकिकत्वेन प्राकृतनक्षत्रारक्षकत्वेऽप्येतद्रात्रिप्रकाश्योडूनां

## प्रकाशः

न तद्धानिरिति भावः. सुबोधिन्यां नन्वेकदा दृष्टासु बह्वीषु रात्रिष्वेकचन्द्रस्थितिः कथं युज्यत इत्यत आहुः **यद्यपी**त्यादि ॥२॥

## लेखः

सुबोधिन्यां **तदोडुराज** इत्यस्याभासे **चन्द्रं चे**ति. **मनश्चक्रे चन्द्रं च ससृजे** इत्यन्वाचयः. व्याख्याने **पूर्णएव स** इति. आधिदैविकस्य भगवत्त्वात्



सोऽपि चन्द्रः, स्त्रीणां मनांसि उडुस्थानानीति, तेषामपि रक्षकः, इदम्प्रथमतया जात इति पूर्वस्यामेव दिशि तस्योदय उच्यते, सा दिग्देवानामिति[1]. तस्या दिश इन्द्रो देवता अधिपतिश्च. इदानीं भगवानेवेन्द्र इति तस्य रेतोरूपः तस्यामुद्गतः. अतः **प्राच्याः ककुभः मुखं** मध्यभागं स्व**करैः** स्वकिरणैः **विलिम्पन् उदगात्**. तस्या मुखे न रागः स्थितः, प्रतिस्पर्धिन्यां सूर्यसम्बन्धेन

## टिप्पणी

चाप्रसिद्धत्वेऽपि यदुडुपदोपादानं तत्त्वेतद्रात्रिष्वेव प्रकाशमानत्वेन [2]स्वामिनीनां मनांस्येवात्रोडुत्वेनाभिमतानीत्याहुः **सोऽपि चन्द्र** इत्यादिना. इन्दोर्नक्षत्रसजातीयत्वं "नक्षत्राणामहं शशी"तिवाक्यात्सिद्धम्. एतन्मनस्सु तत्त्वोक्त्यैतच्चन्द्रसजातीयत्वं सूच्यते. तच्च भगवन्मनःसम्बन्धित्वम्. तत्त्वं चात्र भगवन्मनोंऽशत्वं स्वमनःप्रवृत्तिनिवृत्तितोषादि-कार्यार्थमाविर्भावितत्वं च. **प्राच्याः ककुभ** इत्यत्र **प्रतिस्पर्धिन्यामि**ति प्रतीच्यां दिशीत्यर्थः. उत्तरसन्ध्यायामखिलद्विजोपास्यत्वेनेयमेव दिङ् मुख्येति मर्यादामार्गीयत्वं लक्ष्यते. रविश्च तथा. अतस्तेन तत्र रागसम्भवः. यत्रोक्तरूपेन्दुप्राकट्यं सा दिक्पुष्टिमार्गीयेति तस्या एतत्प्रतिस्पर्धिनीत्वम्. एतेन मर्यादामार्गे तापएव, पुष्टिमार्गप्रवेशे तन्निवृत्तिरिति सूचितम्. प्रातः प्राच्या अपि तथाभूताया एवाधुनैवंभूतात्वकथनाद् अधुना प्रभोरेवेन्द्रत्वेन तद्देवताकात्वेनाप्यस्यास्तस्याः सकाशादुत्कर्षः.

## लेखः

षड्धर्मा आधिभौतिकविलक्षणा उक्ताः. (**उडूस्थानानी**ति!) **उडूनामिव स्थानं** स्थितिर्येषां– यथोडवो रात्रिष्वेव प्रकाशमानाः तथैतान्यप्येतद्रात्रिष्वेव प्रकाशमानानीत्यर्थः. **तेषामपी**ति, भगवन्मनसो देवत्वाद्रक्षकस्तन्मनसां च रक्षक **इत्यपि**शब्दः. **इदम्प्रथमतये**ति, एतल्लीलार्थमेव जातत्वाल्लीलास्थलस्य वृन्दावनस्य सचर्षणीस्थानान्नन्दग्रामात्प्राच्यां दिशि सत्त्वेन तस्यामेव दिश्युदय इत्यर्थः. **सा दिगि**ति, **देवानां** लीलोपयोगिपदार्थानां तत्रैव स्थितत्वादित्यर्थः. वृन्दावने रमणनिश्चयादेतासां मनस्तद्दिश्येव स्थितमिति तादृशोडूनां राजापि तत्रैवोदित इति भावः. आर्थं समाजमाहुः[3] **तस्या दिश** इति. **मध्यभागमि**ति वृन्दावनमित्यर्थः. अतएव वनस्य तत्कोमलगोऽभिरञ्जितत्वं वक्ष्यते. **प्रतिस्पर्धिन्यामि**ति. सायंकालेन हेतुना भगवतो वृन्दावनात् प्रतीच्यामागतत्वेन

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्. २. स्वामिनीमनांस्ये° मू. पा.
३. अर्थसमाजम् इति जो. पाठः.

रागसंभवाद्, अतः अस्या अपि मुखं कुङ्कुमसदृशैः करैरारक्तं क्रियते. यदि चन्द्रः स्वदिशो मुखं न रञ्जयेत् तदा भगवन्मनोऽपि स्त्रीणां हृदयं न रञ्जयेत्. कराः **शन्तमाः** शीतलत्वात् तापहारकाः. किञ्च **अरुणेन** गुणेन कृत्वा अत्यन्तं कल्याणरूपाः. अरुणो हि रागप्रधानः. पुरुषोऽपि यद्यनुरागेण स्पृशति तदा सुखं भवति. ननु अस्य चन्द्रस्य यदि अधिष्ठातृत्वमात्रं तदा मनस्येव उदयो भवेत्, यद्यन्धकारनिवृत्तिः प्रयोजनं तदा भगवतैव अन्धकारो निवर्तेत, यदि वा उद्दीपकत्वं तदापि भगवतैव तत्संभवः, अतोऽस्यासाधारणं कार्यं वक्तव्यमिति चेद्, अत आह **स चर्षणीनां शुचो हरन्निति**. चर्षण्यः सर्वत्र

## टिप्पणी

पुष्टिमार्गोत्कर्षमेव प्रभुः करोति, नान्यत्रास्मादुत्कर्षं सहत इत्येतत्सर्वं हृदि कृत्वा **तस्या मुखे न राग** इत्याद्युक्तं **प्रतिस्पर्धिनी**त्वमप्युक्तमिति ज्ञेयम्. **स चर्षणीनाम**मित्यत्र इदं ज्ञेयम्. चृष्[1] प्रजननैश्ययोरि(?)ति पाठादयं धातुराविर्भावन ईशधात्वर्थे गमने(?) च शक्तः. अथवेशस्य भाव ऐश्यं तत्र तथा. प्रकृते तु[2] सर्वात्मभावैकलभ्यरसाधिकारिमात्रसृष्टावेव याः शक्तयोऽधिकृतास्ता भगवदाविर्भावं ज्ञात्वा तादृशीराविर्भाव्य फलसिद्धिं [3]प्रतीक्ष्यन्त्यस्तत्पर्यन्तमन्यभावेभ्यस्ता रक्षन्तीति **चर्षणी**शब्देनोच्यन्ते. यद्यपि शाब्दिकैरैश्यशब्दस्य गत्यर्थकत्वमेवोक्तं तथापि 'गत्योरि'त्यनुक्त्वा यद् 'ऐश्ययोरि'त्युक्तं तत्

## लेखः

तत्र शयनारात्रिकसामयिकवेणुनादादिना रागसम्भवादित्यर्थः. इदं टिप्पण्या**मित्येतत् सर्वं हृदिकृत्वे**त्यत्र **सर्व**शब्देन सूचितम्. तत्रापि ता लीलाः करोति वृन्दावनेऽपि गतवानिति **अस्या अपि** इत्य**पि**शब्दः. अयमेव चन्द्रो नानाप्रकारैः सर्वत्र सर्वं सम्पादयतीति पञ्चमाध्याये टिप्पण्यां वक्ष्यते. **स्वदिश** इति, एवंप्रकारकचन्द्रोदयोऽत्रैवेति स्वस्येयमेव दिगिति भावः. चन्द्रस्य दिक्पतित्ववद्भगवन्मनसः स्वामिनीमनःपतित्वम्. तथा च स्वदेवे स्वकीयरञ्जनरूपधर्माभावे भगवन्मनसि स धर्मो न भवेदित्यर्थः. **किञ्चे**ति. शन्तमत्वमात्रेण तापहरणं प्राप्तं; शन्तमत्वस्यारुणगुणजत्वकथनेन सुखजनकत्वं च प्राप्तमित्यर्थः. **चर्षण्य** इति. **सर्वत्र** भक्तेषु **परिभ्रमण**युक्ताः प्रसादनिरूपकशक्त्यंशभूताः **शक्तयः** भगवन्मनस इति शेषः. ता यथायोग्यं सर्वत्र भक्तेषु

१. चृष् मू. पा. २. 'तु' इति नास्ति मूले. ३. प्रतीक्ष्यमाणा इति पाठोऽवाच्यः.



[1]परिभ्रमणशक्तयः. ताः सर्वत्र परिभ्रान्ता अपि न क्वापि परमानन्दसम्बन्धिन्यो जाताः. यदि वा कश्चिन् मुच्येत तथापि ता न प्रवेशं लभन्ते; ततः पूर्वमेव ता निवृत्ता भवन्ति, अतस्तासां शोकस्तिष्ठत्येव. चर्षणीसहितानां जीवानां

## टिप्पणी

सोऽप्यर्थोत्र ज्ञेय इति ज्ञापनायेत्यस्माभिस्तथोक्तम्. गमनार्थत्वे तु यत्र ता आविर्भावितास्तत्र गत्वा तत्फलसिद्ध्यनुकूलप्रयत्नवत्यो भवन्तीति तथा. तथा च स्वस्वामिनीषु भगवद्भोगयोग्यास्वपि तद्विलम्बं दृष्ट्वैतदार्तिं च चर्षणीनां परमस्नेहवशाच्छोकोऽजनि. एवं सत्ययमिन्दुः प्रियसंगाभावजदुःखं स्वामिनीनामपनयन्न केवलानां तदपनयति किन्तु चर्षणीसहितानामिति मूलार्थः सम्पद्यते. स्वामिनीदुःखनिमित्तकस्तासां शोक इत्येतद्दुःखनिवारणेनैव तासामपि स निवर्तत इत्यमुख्यत्वात्सहभावस्तासामुक्तः. एतदिन्दुस्वाभाव्यादेतदुदये संगमनिश्चयेन च तन्निवृत्तिः. इदमेवोक्तं **चर्षणीसहितानां जीवानां वे**त्यादिना. आद्यपक्षे तु यत्सम्बन्धिनामेव परमानन्दानुभवस्ताः शक्तयः स्वयं तदर्थिन्यो भगवद्भक्तेष्वेतदतिरिक्तेष्वेतावत्कालपर्यन्तं परिभ्रान्ता**श्चर्षणी**शब्देनोच्यन्ते. मुक्तौ तदभावं ज्ञात्वा तादृशेभ्यः स्वयमेव निवृत्ता भवन्ति. भगवतैव तादृश्यएव ताः सृष्टा इति तेषु न प्रवेश इति ज्ञापनाय न लभन्त इत्युक्तम्. अतएवाग्रे स्वतएव **निवृत्ता भवन्ती**त्युक्तं, न तु 'निवर्तिता' इति.

## लेखः

परिभ्रमन्ति कुब्जादिष्वपि. तथापि नैतदानन्दसम्बन्धः किन्तु मुक्तिरेवेति भावः. अन्यत्राधिकाराभावान्न दानमिति ज्ञात्वा स्वामिनीष्वधिकारं निश्चित्य तदाशया स्थिताः. अत्रापि विलम्बात्तासां शोकः. विद्यमाने तत्प्रसादे मुक्तिं न दद्यादेवेति सूचनाय मुक्तेः पूर्वं तन्निवृत्तिरुक्ता. समुदितस्त्रीत्वलक्षणा शक्तिः कात्यायनी, तदंशभूतास्तासु तासु स्थिता एता इति भावः. टिप्पण्यां यौगिकार्थकथनं द्वितीयपक्षस्थम्. तस्मिन् पक्षे योगमायांशभूता एतासु सर्वात्मभावजनिकाः शक्तयश्चर्षण्यः. योगमाया हि भगवतो यत्र यथा लीला चिकीर्षिता तत्र तदनुरूपभावं सम्पादयति. यत्र पितृत्वादिचिकीर्षा तत्र तथैव. अत्र सर्वात्मभावलीला चिकीर्षितेति योगमायांशभूतास्तासु तासु स्थिताः सगुणनिर्गुणाद्यनेकप्रकारैस्तत्तद्भावं सम्पादयन्ति. पक्षद्वये चर्षणीस्वरूपभेदस्तु टिप्पण्या**माद्यपक्षे त्वि**ति **तु**शब्देन पक्षान्तरनिरासकेन स्फुटमेवोक्तः.

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्.

वा; तासां शोकः इदानीमेव निवृत्तः, शक्तिसहितानामेव परमानन्दानुभवस्य वक्तव्यत्वात्. प्रायेण तदानीन्तना जीवाः तादृशशक्तियुक्ताः. तस्मिन्नुदिते परमानन्दानुभवोऽवश्यंभावीति. तथा सति प्रयोजनत्रयं– दिग्देवताया मुखसम्मार्जनं, चर्षणीनां शोकदूरीकरणम्, अन्धकारनिवृत्त्यादिश्च. कण्ठोक्तं द्वयमपि तदेकसाध्यमिति वक्तुं दृष्टान्तमाह **प्रियः प्रियाया** इति. **दीर्घ**काले **दर्शनं** यस्य. महता कालेनागतो भर्ता **प्रियः प्रियायाः** पतिव्रतायाः शोकं दूरीकृत्य मुखसम्मार्जनं च करोति. न चैतत्कार्यमन्यथा सिध्यति ॥२॥

## टिप्पणी

चैतदुदये तच्छोकनिवृत्तिर्जातेति तथा. अस्मिन्पक्षे पुनश्चन्द्रपरामर्शस्य प्रयोजनाभावादेकस्मिन्वाक्ये वारद्वयं तत्कथनासम्भवात्पूर्वमप्रसिद्धत्वेनास्येन्दोः प्रसिद्धचर्थकत्वमपि 'तच्'छब्दस्य न वक्तुं शक्यमित्यरुच्याग्रिमः पक्ष उक्त इति ज्ञेयम् ॥२॥

## लेखः

लीलासमयेऽपि तत्तदनुरूपभावजननार्थं शक्तीनां तत्र स्थितिरिति **शक्तिसहितानामि**त्युक्तम्. अतएव भगवद्विचारितानुपूर्विकस्वरजात्युन्नयनमिति भावः. **तदानीन्तना** इति अवतारसामयिका इत्यर्थः. उदासीनेषु तदभावात् **प्रायेणे**त्युक्तम्. **तादृशे**ति, तत्तल्लीलाचिकीर्षानुरूप-तत्तद्भावसम्पादक-योगमायांशभूत-**शक्तियुक्ता** जीवा इत्यर्थः. शोकनिवृत्तौ हेतुमाहुः **तस्मिन्नि**ति. **अवश्यमि**ति अधुनैवेति शेषः. **तदेकसाध्यमि**ति, मुखसम्मार्जनस्यापि तदेकसाध्यत्वेऽप्यनतिप्रयोजनत्वान्नोदयहेतुत्वं किन्तु प्रासङ्गिकत्वमित्याभासे तथोक्तम्. चन्द्रस्य मनोऽधिष्ठातृत्वाच्चर्षणीनां च मनःशक्तित्वाच्चन्द्रस्य चर्षणीभर्तृत्वम्. दिग्देवताभर्तृत्वं तु स्पष्टमेव. **मुखसम्मार्जनं चे**ति, प्रयोजनद्वये

## योजना

**स चर्षणीनामुदगा**दित्यत्र **शक्तिसहितानामेव परमानन्दानुभवस्य वक्तव्यत्वा**दिति. मर्यादाभक्तिमार्गे हि मुक्तितः पूर्वमेव चर्षणीशक्तीनां निवर्तनम्, मुक्तस्य परिभ्रमणाभावेन चर्षणीनामनुपयोगात्. प्रकृते तु चर्षणीशक्तीनां परिभ्रमणहेतुभूतानां रासक्रीडायां नृत्यादौ भ्रमणे उपयोगान्न शक्तीनां निवृत्तिः, किन्तु परिभ्रमण**शक्तिसहितानां** व्रजवधूनां रासे परमानन्दानुभवो भावीति ज्ञानेन तासां शोकहानिः. तदेतदुक्तं **शक्ति-सहितानामेव परमानन्दानुभवस्य वक्तव्यत्वा**दिति ॥२॥



एवं मनस उत्पत्तिमुक्त्वा तद्देवतायाश्च ततः सङ्कल्पोत्पत्त्यर्थं [1]तच्छब्दयोनित्वं निरूपयन् तद्दर्शनेन वेणुनाद उत्पन्न इत्याह **दृष्ट्वे**ति.

**दृष्ट्वा कुमुद्वन्तमखण्डमण्डलं रमाननाभं नवकुङ्कुमारुणम् ।**
**वनं च तत्कोमलगोऽभिरञ्जितं जगौ कलं वामदृशां मनोहरम् ॥३॥**

**कुमुद्वांश्चन्द्रः**, पृथिव्यां सर्वत्रैव मुदं कृतवानिति. तथाकरणे सामर्थ्यं **अखण्डमण्डलमि**ति, न खण्डं मण्डलं यस्य. एतस्य रसोत्पादने

## टिप्पणी

**दृष्ट्वा कुमुद्वन्तमि**त्यस्याभासे, **तस्य शब्दयोनित्वं निरूपयन्नि**ति. वाचः पूर्वरूपं हि मनस्तच्च समानाधिकरणायाएव तस्यास्तथा. प्रकृते च गान एतच्चन्द्रदर्शनस्य हेतुत्वोक्त्यापि गानसमानाधिकरणमनोधिष्ठातृत्वं तत्र ज्ञाप्यत इति भावः. न चैवं वनेऽपि तत्त्वापत्तिरिति वाच्यम्, विशेषणस्यैव

## लेखः

एव दृष्टान्तोक्तेरिति भावः. मुखसम्मार्जनं प्रासङ्गिकमिति तत्र **च**कार उक्तः. अतः **स चर्षणीनामि**त्यस्याभासेन न विरोधः ॥२॥

**सङ्कल्पोत्पत्त्यर्थमि**ति स्वामिनीष्विति शेषः. इदं मूले **वामदृशां मनोहरमि**ति क्रियाविशेषणेन सूचितम्. गानं मनो हरति स्वाधारविषयक-सङ्कल्पयुक्तं करोतीत्यर्थः. **नाद उत्पन्न** इति, यथा भावोद्रेके स्वतएव गानं जायते तथेत्यर्थः. भगवांस्तद्भाववशः सन् गानं कृतवानिति सूचनाय नादस्य स्वातन्त्र्यमुक्तम्. मूले **दृष्ट्वा जगावि**त्युक्तेर्भावोद्रेकस्य गाने हेतुत्वमायाति. भावोद्रेके तु रसिकस्यास्वातन्त्र्यं भवत्येवेति निगूढाशयः. **दृष्ट्वे**त्यत्र **पृथिव्या-मि**ति, "कासुचिद्भूमिषु निजानन्दसुधां ववर्षे"ति विद्वन्मण्डनसम्मत्या स्वामिनीरूपभूमावित्यर्थः. तथा च पूर्वोक्तस्य चर्षणीशोकहर्तृत्वस्यानुवादोऽय-मिति भावः. **अखण्डे**ति सर्वविषयकः पूर्णो भावो, न तु क्वचिदपि खण्डित

## योजना

**दृष्ट्वा कुमुद्वन्तमि**त्यत्र. **कुमुद्वांश्चन्द्र** इति. **कुमुद्व**त्पदनिरुक्तिमाहु **पृथिव्यां सर्वत्रैव मुदं कृतवानि**ति. अर्थप्रदर्शनमेतत्. तथा च **कौ** पृथिव्यां **मुत् कुमुत्** कुमुद्विद्यते कार्यत्वेन यस्य स **कुमुद्वानि**ति शब्दसिद्धिः. तत्फलितार्थ उक्तः **पृथिव्यां सर्वत्रैव मुदं कृतवानि**ति ॥३॥

१. तस्य.

[1]विभावत्वमप्यस्तीति ज्ञापयितुं **रमाननाभमि**त्युक्तम्. लक्ष्म्या अयं भ्राता भवतीति, **रमाया आननवद् आभा** यस्य, तथोक्तः. किञ्च **नवकुङ्कुमवदरुण**-वर्णमपि. तेन विवाहसमये यथा लक्ष्मीमुखं तथायं वर्तते. अतो नूतनकामजनकः. किञ्च **वनम**पि रसपोषकं, **तस्य कोमलगोभि**रल्पकिरणैः **अभितो रञ्जित**-**मा**रक्तयुक्तम्. [2](किरणानां रसदोग्धृत्वं वनएव पाल्यमानत्वं च ज्ञापयितुं **गो**पदम्. **रमाननाभ**त्वेन पूर्वं निरूपणाद्यथा तन्नूतनकटाक्षा भावोदयहेतवः तथैतेऽपीति ज्ञापनाय च. **गो**पदमिन्द्रियस्यापि वाचकमिति तथा. अधुना भावोत्पत्तिरेव, तत्पोषस्तु स्वामिन्यागमनादिनाग्रे भावीति ज्ञापयितुं **को**-**मल**पदम्. यत्र तेन वनमपि रज्यते तत्र यदर्थमागतः तद्रागं कथं न कुर्यात्!)

## टिप्पणी

तत्र प्रयोजन[3]कत्वेनोक्तेः. **रमाननाभमि**त्यत्र **लक्ष्म्या अयं भ्राते**त्यादि. भगवान् रमणेच्छायां तद्रसपूरणार्थं ब्रह्मानन्दं लक्ष्म्यात्मकनायिकारूपमाविर्भावितवान्. तस्यैव रमणस्थानत्वात् चन्द्रोऽपि तथैवायमाविर्भावित इत्यस्य तद्भ्रातृत्वमतएव समानाकारत्वमिति भावः. **नवकुङ्कुमारुणमि**त्यत्र **नव**पदस्य तात्पर्यमाहुः **विवाहसमय** इत्यादि. कलत्वे गानस्य हेतुमाहुः **यदि**

## प्रकाशः

**रमाननाभमि**त्यस्य टिप्पण्याम्. एतन्मन्वन्तरे चन्द्रस्यात्रिपुत्रत्वेन लक्ष्मीभ्रातृत्वाभावात्पूर्वमन्वन्तरीयस्य तथात्वेऽपि तस्य पुराणान्तरे खण्डरूपेण शिवमौलिमण्डनत्वोक्तेरत्र चाखण्डमण्डलतया रमाननाभत्वकथनात्पूर्वं नूतनतया व्यवस्थापनाच्च लक्ष्मीभ्रातृत्वं नोपपद्यत इत्यतस्तदाशयमाहुः **भगवानि**त्यादि. तथा चानेन भावेनात्र भ्रातृत्वकथनं न लोकसिद्धाभिप्रायेणेत्यतो नानुपपत्तिरिति, न वा लक्षणा; तथा तद्विवाहलीलापीति नात्र लौकिकलेशोऽपीति हृदयम् ॥३॥

## लेखः

इत्यर्थः. **विभावत्वमपी**ति– मनोधिष्ठातृत्वादनुभावत्वमुक्तं, रमाननाभत्वाद्वि-**भावत्वमप्यस्ती**त्यर्थः. **किञ्चे**ति, अतोऽपि विभावत्वमित्यर्थः. पूर्वेणालम्बन-सादृश्यमुक्तम्, अनेनोद्दीपनविभावत्वमुच्यते इति विभेदः. एवं कुमुद्वद्दर्शनेन नादोत्पत्तिरुक्ता. वनदर्शनेनापि नादोत्पत्तिरित्याहुः **किञ्चे**ति. **यदर्थमागत**

१. विभावकत्वमिति शोधितपाठः. २. ( ) चिह्नान्तर्गतं प्रभूणाम्. ३. प्रयोजकत्वे° मू. पा.



ततः सङ्कल्पद्वारा कामजनने सर्वं कार्यं भविष्यतीति **कलं** यथा भवति तथा **जगौ** गानं कृतवान्. तच्च गानं **वामदृशां** सुन्दरदृष्टीनां स्त्रीणां **मनोहरमि**ति, "तस्माद्गायन्तं स्त्रियः कामयन्त" इति श्रुतेः. अर्थाद्गीतेन सर्वाः समाहूता इति. यदि व्यक्तमधुरं गीतं कुर्यात्, तदा गीतमेव शृण्वन्त्यः तत्रैव स्थिता भवेयुः. यासां पुनर्दृष्टिर्नोत्तमा तास्तु नाकारिता एव ॥३॥

ततः सर्वाः स्त्रियः समागता इत्याह **निशम्ये**ति.

**निशम्य गीतं तदनङ्गवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः ।**
**आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कान्तो जवलोलकुण्डलाः ॥४॥**

यद्यपि भगवता कुमारिकाएवाहूताः तथापि आह्वानं सदृशमिति

## टिप्पणी

**व्यक्तमि**त्यादि. यद्यपि स्वरूपदिदृक्षा न तच्छ्रवणनिवर्त्या तथापि गीतस्यार्थः स्वरूपमेवेति तच्चार्थसंयुक्तमेवेति गीतस्य व्यक्तत्वेऽर्थस्यापि तथात्वं स्यात्. तथा च 'तदनङ्गवर्धनमि'तिवाक्यात्स्वरूपरसानुभवेच्छाया एवोद्भूतत्वेन तदनुभवेनैवागमनप्रतिबन्धः स्यादिति भावः. **वामदृशामि**त्यत्र **यासां पुनर्दृष्टिरि**-त्यादि. पुष्टिमार्गानुसारिभजनपरत्वमेवोत्तमत्वं दृष्टेः. अन्यथा 'चार्वा'दि-पदान्यपहाय **वाम**पदं न वदेदिति भावः ॥३॥

**निशम्य गीतमि**त्यत्र **यद्यपी**ति. उपक्रम एतत्सम्बन्धिरात्रिदर्शनस्यैव रिरंसाहेतुत्वेनोक्तेरिति भावः. **तथापी**ति. **तदनङ्गवर्धनमि**तिवचनाद् भगवदीयोऽनङ्गो यत्रास्ति तं तत्र वर्धयत्येवेत्येतास्वपि स्थितः स तेन तथा कृत इत्येता अप्यागता इत्यर्थः. अतएव वर्धकत्वमुक्तं, न तु जनकत्वमिति भावः.

## लेखः

इति चर्षण्यर्थमागत इत्यर्थः. **तत** इति रागानन्तरमित्यर्थः. **अर्थाद्गीतेने**ति, तथा च स्वविषयकसङ्कल्पजनन'माह्वान'पदार्थ इति भावः. **यदि व्यक्त**-**मधुरमि**ति. तथा च "बर्हापीडे"ति श्लोकोक्तवत् स्वरूपगुणलीलानु-भावनेनाभिरमणसम्पादकं तत्रैव स्थितानां नेत्यर्थः. **यासां पुनरि**ति, पूर्वं तथोत्तमत्त्वेऽपि पश्चात् पर्वादि(?)बुद्धिर्यासामित्यर्थः ॥३॥

**निशम्ये**त्यत्र. **आहूता** इति, भगवदाह्वानविषयाः स्वविषयक-सङ्कल्पजननरूपे आह्वाने ईप्सिततमा इत्यर्थः. **आह्वानमि**ति– आहूयतेऽनेनेति **आह्वानं** गानमित्यर्थः, उभयश्रुतमपि गानं सदृशमेवेत्यर्थः. सादृश्ये हेतुमाहुः

निरोधोऽपि कर्तव्य इति सर्वाएव समागताः. किञ्च यद्भगवता **गीतं तदनङ्गमेव वर्धयति,** अङ्गं तु नाशयत्येव. अतो नूतन उत्पन्नः कामः ता आनीतवान्. किञ्च **व्रजस्य स्त्रियः** पूर्वमपि भगवदीयाः, अतः **कृष्णेनैव गृहीतं मनो** यासाम्. अतः शीघ्रमेव **यत्र कान्तस्**तत्रागताः. अनेन आकारिताएव

**टिप्पणी**

एतदेवोक्त**माह्वानं सदृशमि**त्यनेन. पूर्वापेक्षयाधुनात्युत्कटो जात इत्याशयेन **नूतन उत्पन्नः काम** इत्युक्तम् ॥४॥

**प्रकाशः**

**निशम्येत्यत्र** सुबोधिन्याम् **अङ्गं तु नाशयतीति**, स्वरूपविस्मारकतया कामाङ्गभूतं धैर्यादिकं नाशयतीत्यर्थः. ननु देशान्तरीयो व्यवहारो न

**लेखः**

**निरोधोऽपीति**, निरोधार्थकत्वेन सादृश्यमित्यर्थः. स्वरूपानन्दोऽपि देय इत्य**पि**शब्दः. हेत्वन्तरमाहुः **किञ्चेति**, अनङ्गवर्धकत्वेनापि सादृश्यमित्यर्थः. टिप्पण्यां पूर्वस्य स्पष्टत्वादयमेव हेतुः पूर्वत्र मेलयित्वा व्याख्यातः. पुनर्हेत्वन्तरमाहुः द्वितीय**किञ्चेति**, कृष्णमानसविषयकत्वेन सादृश्यम्. अन्यपूर्वानन्यपूर्वयोः कृष्णगृहीतमानसत्वेन सादृश्याद्विषयसादृश्यकृतमुभयश्रुतगानसादृश्यमित्यर्थः. पूर्वत्र निरोध्यत्वेनानङ्गवत्त्वेन च विषययोः सादृश्यं ज्ञेयम्. **अनङ्गमेवेति**, प्राकृताङ्गरहितं स्वरूपात्मकं काममित्यर्थः. **अङ्गं त्विति**, अर्श आद्यच्, प्राकृतविभावाद्यङ्गयुक्तमित्यर्थः. **तासां वेति** वक्ष्यमाणपक्षमभिप्रेत्यैवं

**योजना**

**निशम्यं गीतं तदनंगवर्धनमि**त्यस्य विवृतौ **अङ्गं तु नाशयत्येवेति**. भक्तानां प्रपञ्चाभावो निरोध इति द्वितीयस्कन्धसुबोधिन्यामुक्तत्वाद् दशमसुबोधिन्यां "एवं सर्वगतो विष्णुः प्रकटश्चेन्न तद्विशेत् तावन्न लीयते सर्वमिति कृष्णसमुद्यम" इत्यत्रापि प्रपञ्चलयस्योक्तत्वात् "लौकिकेषु तु भावेषु यत्रैव हरिवेशनं निवर्तते तदेवात्र वह्नेर्दारुमयं यथे"त्यत्रापि प्रपञ्चलयस्योक्तत्वाद्भक्तानां पूर्वदेहादिप्रपञ्चलयः फलात्मको निरोध इति मया पूर्वं निरोधपदार्थविचारे उपपादितम्. तथा च देहादिलयकर्ता वेणुनाद इत्युक्तम् **अङ्गं तु नाशयती**त्यनेन. एवं सत्यलौकिकदेहादिप्रपञ्चसम्पादनं वेणुनादकार्यमिति फलितम् ॥४॥



प्रथममागता इत्युक्तं, तासां मुख्यः **कान्त** इति. अतए**वान्योन्यमलक्षित उद्यमो** यासाम्. ता हि प्रत्येकमेव भगवन्तं पतित्वेन स्वीकृतवत्यः. **स** पूर्वमुपात्तो यः कान्तः. तासां शरीरविचारेऽपि दृष्टिर्न जातेति वक्तुं **जवेन लोले कुण्डले** यासामिति कर्णपीडाननुसन्धानं प्रदर्शितम्. ताः स्त्रियो गौडदेशस्थाः, ततएव कुमारिकाः समागता इति. पूर्वं मथुरादेशस्थितानामपि अनागरीणां कुण्डले एव. ताटङ्कयोरेव वा कुण्डलत्वम् ॥४॥

प्रसङ्गादन्यासामप्यागमनमाह **दुहन्त्य** इति, तासां वा क्रियापराणाम्.

**दुहन्त्योऽभिययुः काश्चित् दोहं हित्वा समुत्सुकाः ।**
**पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ॥५॥**

तत्र काश्चन षोडशसहस्रव्यतिरिक्ताः नवविधाः समागताः, दशविधा वा; गुणानां त्रैविध्यान्नवविधत्वं निर्गुणाश्चैकविधाः. जातिकुललोकधर्मपराः

**टिप्पणी**

**दुहन्त्यः** इत्यस्याभासः **प्रसङ्गादि**त्यादि. अत्र पक्षद्वयं सम्भाव्यते—कुमारीणामेवाह्वानं मुख्यमित्येकः अविशेषेण तथेत्यपरः. तत्राद्ये **प्रसङ्गादि**त्यादि द्वितीये **तासामि**त्यादि. एवमग्रेऽपि. **गुण**शब्दोऽत्र सर्वत्र भावपरो ज्ञेयः. भाववैलक्षण्यज्ञापनाय तथोक्तिः. **जाती**त्यादि. **धर्म**पदं त्रिष्वप्यनुषज्यते ॥५॥

**प्रकाशः**

देशान्तरीयोत्तमव्यवहारे सति सम्भवतीति कथमेतासां तथात्वमित्यत आहुः **पूर्वमि**त्यादि. सति चातुर्ये अनागरीत्वमव्यवहारप्रयोजकमिति पक्षान्तरमाहुः **ताटङ्के**त्यादि, "कुण्डलं कर्णभूषणमि"ति कोशेन तस्य पदस्य सामान्ये शक्तत्वादित्यर्थः ॥४॥

**लेखः**

व्याख्यायते. **प्रसङ्गादि**ति पक्षे तु यथाश्रुतमेव ज्ञेयम्. तं पक्षमाहुः **अनेनेति**, **कान्त**पदेनेत्यर्थः. **प्रथममिति**, अस्मिन् श्लोके इत्यर्थः. तत्र हेतुः **तासामिति**, "पतिं मे कुर्वि"ति तासामेव प्रार्थनादिति भावः. **अत एवेति**, प्रत्येकप्रार्थनादित्यर्थः. विशदयन्ति **ता हीति** ॥४॥

**दुहन्त्य** इत्यत्र **नवविधा** इति. निर्गुणत्वं षोडशसहस्रेष्वस्तीति तद्व्यतिरिक्ता याः समागतास्तद्धर्मो नवान्यतमविधत्वमेवेति. अभावस्य प्रतियोगिप्रसिद्धिसापेक्षत्वान्निर्गुणत्वमपि षोडशसहस्रेषु नास्तीत्याशयेन

तिस्रस्तिस्र उदीरिताः. तत्र गोपजातीयाः दुग्धपराः. तत्र दुग्धस्योत्पत्तिस्थिति-प्रलयान् कुर्वन्ति तास्तिस्रः प्रथममुदीरिताः. एवंविधा अपि गणश इति वक्तुं सर्वत्र बहुवचनम्. **काश्चिद्दुहन्त्यएव दोहं** दोहनलक्षणं कर्म मध्ये त्यक्त्वा भगवद**भिमुख्येन ययुः.** गौर्वत्सश्च बद्धौ दोहनपात्रं च अर्धदुग्धं, यः समयः सर्वथा त्यक्तुमशक्यः, तस्मिन् समये समागताः. तथा समागमने हेतुः **समुत्सुका** इति, सम्यगुत्सुकाः, को वेद क्षणान्तरे भगवान् क्व गमिष्यतीति. अन्याः पुनः **पयः अधिश्रित्य** तथैव **ययुः**. भोजनार्थं पयसि पच्यमानाः गोधूमकणाः **संयाव**शब्देनोच्यन्ते, तेषां दाहे सर्वनाश इति, पक्वदशैव **संयाव**शब्देनोच्यते, अतस्तदप्य**नुद्वास्य** काश्चन अभिययुः. **अपरा** इति सर्वत्र गुणैर्भिन्नस्वभावत्वम्. एवं तिस्रो राजस्यः ॥५॥

सात्त्विकीराह **परिवेषयन्त्य** इति.

**परिवेषयन्त्यस्तद्धित्वा पाययन्त्यः शिशूनथ[1] ।**
**शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योऽपास्य भोजनम् ॥६॥**

---

### प्रकाशः

**दुहन्त्य** इत्यत्र सुबोधिन्यां **सम्यगुत्सुका** इति, विवेकविलम्बाद्य-सहिष्णुश्चित्तोल्लास औत्सुक्यं, तस्य सम्यक्त्वमत्युत्कटत्वं बोध्यम् ॥५॥

### लेखः

पक्षान्तरमाहुः **दशविधा** **वेति**. आद्यपक्षे "अञ्जन्त्य"इत्यनेन षोडश-सहस्राण्युक्तानीति ज्ञेयम्. शतुर्वर्तमानार्थत्वं विवृण्वन्ति **गौर्वत्सश्चे**ति ॥५॥

### योजना

**दुहन्त्योऽभिययुरि**त्यत्र **दुग्धस्योत्पत्ती**त्यारभ्य **प्रथममुदीरिता** इत्यन्तम्. राजसीत्रिके **दुहन्त्यो** दुग्धोत्पत्तिं कुर्वन्त्यो राजस्यो राजसराजस्य इत्यर्थः. **पयोऽधिश्रित्य**नेनोक्ताः स्थितिं कुर्वन्त्यः सात्विक्यः सात्विकराजस्य इत्यर्थः. **संयावमनुद्वास्ये**ति निरूपिताः दुग्धस्य प्रलयकर्त्र्यस्तामस्यः तामसराजस्य इत्यर्थः ॥५॥

**परिवेषयन्त्य** इत्यस्याभासे **सात्त्विकीराहे**ति सात्त्विकीनां त्रिकमाहे-त्यर्थः. तत्र परिवेषणकर्त्र्यः सात्त्विकीषु राजस्यः राजससात्त्विक्य इत्यर्थः.

---

१. शिशून्पयः इत्यपि पाठः.



भर्तुरपत्यस्यापि सेवा स्त्रीधर्मः. तत्र भर्तुर्भोजने शयने च सेवा स्वधर्मः, अतिबालकानां पुत्राणां स्तनदानं च. परिवेषणं च सृष्टिरिव, रेतस उत्पादकत्वात्. स्तनदानं पालनं, शिष्टमन्यत्. सर्वत्र तत्तद्धित्वेति ज्ञेयम्, अन्या इत्यपि. तामसीराह **अश्नन्त्योऽपास्य भोजनमि**त्यादि ॥६॥

**लिम्पन्त्यः प्रमृजन्त्योऽन्या अञ्जन्त्यः काश्च लोचने ।**
**व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णान्तिकं ययुः ॥७॥**

**लिम्पन्त्यः** शरीरानुलेपनं कुर्वन्त्यः, **प्रमृजन्त्य** उद्वर्तनादिकं कुर्वन्त्यः, गृहं वा लिम्पन्त्यः, प्रमृजन्त्यः आभरणानि, भाण्डानि वा प्रमृजन्त्यः. अत्रापि पूर्ववदेव क्रमः– शरीरसेवातः गोसेवा मुख्या ततः पतिसेवेति. **अञ्जन्त्यः**

---

### प्रकाशः

**अश्नन्त्य** इत्यत्र **क्रम** इति उत्पत्तिस्थितिप्रलयक्रमः. प्रमार्जनस्य मालिन्यप्रलायकत्वात् प्रलयकर्तृत्वम् ॥६॥

एतासां तामसीत्वादौ हेतुमाहुः **शरीरे**त्यादि. शरीरसेवादिरेव चात्र लोकधर्मो बोध्यः. यद्यप्यत्र य एवोक्तास्तथापि तत्तदादीनां धर्माणां

### योजना

तासां राजसीत्वं व्युत्पादयन्ति **परिवेषणं च सृष्टिरेव रेतस उत्पादकत्वादि**ति. परिवेषणं भोजने कारणं, भोजनेन रेतस उत्पत्तिः, एवं परिवेषणस्योत्पत्ति-साधकत्वात्तत्कर्त्र्यो राजससात्त्विक्यः. **पाययन्त्यः शिशून्पय** इत्यनेनोक्ताः सात्त्विक्यः सात्विकसात्विक्य इत्यर्थः. तासां सात्त्विकीत्वमुपपादयन्ति **स्तनदानं पालनमि**ति. **शुश्रूषन्त्यः पतीनि**त्यत्रोक्तास्तामस्यः तामससात्त्विक्य इत्यर्थः. तासां तामसीत्वमुपपादयन्ति **शिष्टमन्यदि**ति, **शिष्टं** तामसीत्वं **अन्यत्,** पतिशुश्रूषणं तामसमित्यर्थः, पतिशुश्रूषणस्य भोगप्राधान्येन पारमार्थिक-बुद्धिनाशकत्वात् नाशस्य तमोगुणकार्यत्वात्. एवं राजसतामससात्त्विकत्रिक-मुक्त्वा राजसत्वं तामसत्वं सात्त्विकत्वं च कथमित्याकांक्षायामुपपादयन्ति **शरीरसेवातः गोसेवा मुख्या, ततः पतिसेवेती**ति. एवं सति शरीरसेवा तामसधर्मः **अश्नन्त्योऽपास्य भोजनमि**त्यनेनोक्ते त्रिकेऽस्तीति बोध्यम्. गोसेवा हि शरीरसेवातः उत्तमाः, तथा च गोसेवा राजसधर्मः, सा **दुहन्त्यो-ऽभिययुरि**त्यनेनोक्ते त्रिके वर्तते. गोसेवातः पतिसेवा उत्तमा, सा पतिसेवा हि **परिवेषयन्त्य** इत्युक्ते त्रिकेऽस्ति. सा सात्त्विकीति बोध्यम् ॥६-७॥

**काश्च लोचन** इति गुणातीताः, अतः **काश्च लोचने** इति दुर्लभाधिकारः सूचितः. ज्ञानमार्गशोधिका इति निर्गुणत्वम्. तासामागमने दैहिकविचारोऽपि न जातः किम्पुनस्तद्धर्माणामिति वक्तुं वस्त्राभरणयोर्व्यत्यासमाह **व्यत्यस्तेति**. **व्यत्यस्तानि** विपरीतानि **वस्त्राण्याभरणानि** च यासाम्. एवमुद्यमः सर्वासामेव साधारणो निरूपितः. "**व्यत्यासो** मार्गगतावि"ति केचित्. तन्मध्येऽपि **काश्चित्कृष्णान्तिकं ययुः**, काश्चिन्न. याः पुनः शब्दपरा जाताः ता उद्युक्ता अपि नागताः, याः पुनः शब्दापेक्षां त्यक्तवत्यः ताः सर्वतो निरपेक्षाः विपरीतावश्यकदेहधर्माः भगवदन्तिकमागताः ॥७॥

सर्वासामनागमने हेतुमाह **ता वार्यमाणा** इति.

**ता वार्यमाणाः पतिभिः पितृभिः पुत्रबन्धुभिः ।**
**गोविन्दापहृतात्मानो न न्यवर्तन्त मोहिताः ॥८॥**

## टिप्पणी

[1]दोहनाद्यपेक्षयाञ्जनस्यान्तरङ्गत्वाद् अन्यस्मिन् मण्डने सत्यप्येतद्विना तेषां सौन्दर्याजनकत्वादसम्पूर्णस्याशोभाजनकत्वाच्च मुख्यत्वमिति तत्त्यागोऽशक्य इति तत्करणाद्**दुर्लभाधिकार** इत्युक्तम्. **ज्ञानमार्गशोधिका** इति तु शास्त्ररीत्या बुभुत्सूनां बोधायोक्तम्. **काश्चित्कृष्णान्तिकमि**त्यत्र **तन्मध्येऽपी**ति. अन्यथा पूर्ववाक्ये **काश्चिदि**त्युक्तत्वाद्वस्त्रादिव्यत्यासस्य जवकृतस्य सर्वसाधारणत्वादग्रे **काश्चिदि**तिपदमसम्बद्धं स्यादिति भावः ॥७॥

## प्रकाशः

प्रायपाठात् तादृशत्वं बोध्यम्. **काश्चित्कृष्णान्तिकमि**त्यत्र **शब्दपरा** इति निवारकवाक्यपरा इत्यर्थः ॥७॥

## लेखः

**व्यत्यस्ते**त्यस्याभासे **तद्धर्माणामि**ति त्रपादीनामित्यर्थः. अत्र व्यत्यासेऽपि इष्टरूपे तु योगमाया सर्वं सम्पादयिष्यत्येवेति भावः. **शब्दपरा** इति, पत्यादिकृतनिवारणशब्दं श्रुत्वा पुनस्तद्विचारपरा इत्यर्थः ॥७॥

**हेतुमाहे**ति, वारणं हेतुरित्यर्थः. एतादृशीनां निवृत्त्यभावस्य स्वतः प्राप्तत्वाद्वारणं वाक्यार्थः. तथा च वारणाद्धेतोः शब्दपराणामनागमनमि[2]त्यर्थः.

१. अत्र 'अञ्जन्त्यः काश्चेत्यत्र' इति प्रतीकं ऊह्यम् – सम्पा.
२. अगमनम् इति जो. पाठः.



"रक्षेत्कन्यां पिता विन्नां पतिः पुत्रस्तु वार्धके अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित्स्त्रिया" इति चत्वारो रक्षकाः. अतो यथायथं **पतिभिर्वार्यमाणा** जाताः, काश्चन **पितृभिः,** तथैव **पुत्रैर्बन्धुभिश्च**. ते हि निरुद्धा अपि फलरसानभिज्ञाः साधनप्रवणाः; स्वद्वारैव स्त्रीणां भजनं भजनं मन्यन्ते न तु स्वातन्त्र्येण. तथापि **गोविन्देनापहृतः आत्मा** अन्तःकरणं यासाम्. निवारणं[1] हि श्रोत्रं प्रवर्तकश्च भगवान् अन्तःकरणारूढाश्च पुरुषाः. न हि नौका प्रवाहवेगाद्गच्छन्ती "तिष्ठ तिष्ठे"त्युक्ता तिष्ठति. भयं स्वधर्मो वा तासां नास्तीत्याह **मोहिता** इति. यदि ताः कृष्णान्तिकं न गच्छेयुः तदा मूर्च्छिता इव प्राणाँस्त्यजेयुः. [2](सर्वात्मभावज्ञापनायैवाधुना व्रजस्थानामेतदागमनज्ञानं

## लेखः

**ता वार्यमाणा** इत्यत्र. **प्रवर्तकश्चे**ति अन्तःकरणस्येति शेषः. **अन्तःकरणारूढा** इति तद्वशा इत्यर्थः. नौकादृष्टान्तसामञ्जस्याय**आरूढ**पदम्. **पुरुषा** इति, "काममयः पुरुष" इत्यत्रेव "पुरि शेते" इति व्युत्पत्त्या स्त्रीपुंससाधारण्येन जीवा इत्यर्थः. तथा चैता अन्तःकरणवशाः, अन्तःकरणं तु भगवान् स्वस्मिन् प्रवर्तयति अतस्तत्रैव गता इत्यर्थः. प्रवर्तकत्वसाम्येन प्रवाहस्थानीयो भगवानिति ज्ञेयम्. एतेन शब्दपराणामन्तःकरणं भगवान्न प्रवर्तितवान् अतस्तासां तद्विचारपरत्वमिति सूचितम्. तथा च मूले **वार्यमाणाः** सर्वा जाताः, तासु मध्ये या **गोविन्दापहृतात्मानः ता न न्यवर्तन्ते**त्यन्वयः. **भयमि**ति पत्यादीनामिति शेषः. **स्वधर्म** इति मर्यादामार्गीय इति शेषः. **प्राणांस्त्यजेयुरि**ति, अन्तःकरणस्य तत्र गतत्वेन तद्राहित्यादित्यर्थः. तथा च प्राणत्यागोपस्थितौ भयस्वधर्मविचाराभावः शास्त्रोक्त एवेति भावः, बुद्धिरूपान्तःकरणसम्बन्धानन्तरमेव प्राणेन्द्रियसम्बन्धस्य पुरञ्जनप्रसङ्गे निरूपितत्वात्. अत्रापि "लोकवत्तु लीलाकैवल्यमि"तिन्यायेन तथेति भावः. अतएव **मोहिता** इति, "मुह वैचित्त्ये", चित्तरहिता इत्यर्थः. मूर्छायामपि तादृशो मोहोऽस्तीति तद्दृष्टान्तः.

## कारिकार्थः

**ता वार्यमाणा पतिभिरि**त्यत्र. एकवाक्यत्वबोधनाय याज्ञवल्क्यस्मृतिमाहुः **रक्षेत् कन्यामि**ति. अस्यार्थः– **कन्याम्** अविवाहितां **पिता रक्षेत्, विन्नां** विवाहितां **पतिः, वार्द्धके पुत्रः. तेषां** पुत्रादीनाम**भावे ज्ञातयो** रक्षेयुः ॥८॥

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे. २. ( ) चिह्नान्तर्गतं प्रभूणामिति.

कारितवानिति ज्ञेयम्. अन्यथाग्रे "मन्यमानाः स्वपार्श्वस्थानि"ति वाक्याद्यथा वनस्थित्यज्ञानं सम्पादितवान्, एवं पूर्वमेवागमनाज्ञानमेव कथं न सम्पादयेत्? "प्रक्षालनाद्धि पङ्कस्ये"ति न्यायेन तज्ज्ञानं सम्पाद्य तत्सम्भावितदोषाभावसम्पादनात्तदसम्पादनस्यैव वरीयस्त्वादिति ) ॥८॥

एवं दशविधानां भगवत्समीपगतिमुक्त्वा यासां कालः प्रतिबन्धकः पूर्वमेव भक्तियुक्ताः ता भजनानन्दमननुभूयैव प्रतिबद्धा एव भगवत्सायुज्यं प्राप्तवत्य इत्याह **अन्तर्गृहगता** इति त्रिभिः.

**अन्तर्गृहगताः काश्चिद् गोप्योऽलब्धविनिर्गमाः ।**
**कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥९॥**

दैवगत्या **काश्चिद्**गृहमध्ये स्थिताः गोपभार्याः चातुर्यानभिज्ञाः अप्रौढाः पतिसहिताः पतिभिरेव संरक्षिताः **अलब्धविनिर्गमा** जाताः. ततः प्रतिबन्धनिवृत्त्यर्थं कृष्णमेव ध्यातवत्यः, परं **तद्भावनायुक्ताः** भगवान् जारः स्वयमभिसारिका इति. अन्यथा प्रतिबन्धो न स्यात्. तादृश्योऽपि **मीलितलोचनाः** सत्यो भगवन्तं **दध्युः** ध्यातवत्यः, ततो मुक्ता जाताः ॥९॥

ननु तत्र ज्ञानाभावात् विहितभक्त्यभावात् भगवतोऽपि सान्निध्याभावात्

## टिप्पणी

**अन्तर्गृहगता** इत्यस्याभासे, **यासां**[१] **काल** इत्यादि. नन्वासां भक्तत्वात्कालस्तथा कर्तुं न शक्नोतीति चेद्, अत्रेदमाकूतम्. "उक्तं पुरस्तादि"त्यस्य [२]द्वितीयव्याख्यानानन्तरं "यासां साक्षादि"त्यादिनोक्तप्रयोजनार्थं प्रतिबन्धोऽवश्यं कार्यः. भगवांस्तु भक्तानां स्वप्राप्तिप्रतिबन्धं न साक्षात्करोतीति वस्तुस्थितिः. अतोऽधिकारी कालः प्रभुकार्यं कृतवानिति नानुपपत्तिः काचित् ॥९॥

## लेखः

परं तत्र बुद्धेः सूक्ष्मतया स्थितत्वान्न प्राणत्यागः, अत्र तु सर्वथा गमनात्तथेति भावः ॥८॥

**अन्तर्गृहे**त्यस्याभासे **कालः प्रतिबन्धक** इति. तृतीयस्कन्धे दशमाध्याये अभगवदीयानां कालमात्रात्वं निरूपितम्. तथा च पतयो भजनप्रतिबन्धकत्वात् कालमात्रारूपा इति भावः. **पूर्वमेवे**ति साधनदशायामेव **भक्तिः**, फलदशायां तु जारत्वबुद्धिरित्यर्थः. **सान्निध्याभावा**दिति बहिःप्राकट्याभावादित्यर्थः. कामादीनां हेतुत्वस्य वक्ष्यमाणत्वेऽप्यवान्तरव्यापारत्वं कर्मक्षयस्येति ज्ञेयम् ॥९-१०॥

१. येषां मू. पा.　२. प्रक्षेपे.



कथं मुक्ता इत्याशंक्य कर्मक्षयात् मुक्ता इति वक्तुं कर्मक्षयप्रकारमाह **दुःसहे**ति.

**दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ।**
**ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः ॥१०॥**

**दुःसहो** यः **प्रेष्ठविरहः** सएव महानग्निः, तस्य य**स्तीव्रस्तापः**, तेन **धुतानि** निर्धूतानि [१]ज्वालितानि भस्मसात्कृतानि **अशुभानि** यासाम्. फलभोगे [२]कर्म क्षीयत इत्यविवादम्. कोटिब्रह्मकल्पेषु कुम्भीपाकादिनरकेषु यावद् दुःखं भवेत् तावद् दुःखं भगवद्विरहे क्षणमात्रेण जातम्. ततः सर्वपापफलभोगः समाप्तः. पुण्यक्षयप्रकारमाह **ध्यानप्राप्ते**ति. सर्वपापक्षये भगवान् ध्याने प्राप्तः. **अच्युतः** परमात्मा, न तु समागतोऽपि जारत्वेन, अन्यथा ततोऽपि कर्मशेषः स्यात्. तस्य योऽय**माश्लेषः** तेन या **निर्वृतिः** तया **क्षीणं मङ्गलं** पुण्यं यासाम्. कोटिब्रह्मकल्पेषु स्वर्गादिलोकेषु यावत्सुखमनुभूयते, तावद् भगवदाश्लेषे क्षणमात्रेणैवानुभूतम्. अतः पुण्यक्षयोऽपि जातः ॥१०॥

ततो मुक्ता जाता इत्याह **तमेव परमात्मानमि**ति.

**तमेव परमात्मानं जारबुद्ध्यापि सङ्गताः ।**
**जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥११॥**

सुखभोगार्थमेव भगवान् पूर्वमाश्लिष्टः, भोगे जातेऽपि वियोजकपापाभावात् न वियुक्ताः, अतः संगता एव स्थिताः. शरीरं तु प्रारब्धकर्मनिर्वाणमपतत्. यद्याश्लिष्टो भगवान् न भवेत् तदा तत्र प्रविष्टाः तद्गतं धर्माधर्मफलं बुभुजुः, भगवति प्रविष्टत्वात् मुक्ताएव जाताः. तदाह **तमेव परमात्मानमि**ति. पूर्वं सम्बन्धसमये यद्यपि **जारबुद्ध्यापि संगता**एव, ततः कर्म**बन्धस्य**

## लेखः

**तमेवे**त्यत्र. **प्रविष्टा** इति शरीरान्तरे प्रविष्टा इत्यर्थः. **तदाहे**ति प्रवेशाश्रयस्य परमात्मत्वमाहेत्यर्थः. प्रक्षीणबन्धनत्वं विवेचयन्ति **तदे**त्यारभ्य

## योजना

**ध्यानप्राप्ताच्युते**त्यस्य विवरणे **नतु समागतोऽपि जारत्वेने**ति. यद्यप्येतासां जारबुद्धिमत्त्वेन जारत्वेनैव भगवान् ध्यातः, तथापि ध्याने आविर्भूतो भगवान् **जारत्वेन न समागतः** किन्त्वच्युतत्वेन, **ध्यानप्राप्ताच्युताश्लेषे**त्यत्रा**च्युत**पदात्. **समागत**इतिपदेन **ध्यानप्राप्ते**ति **प्राप्त**पदस्यार्थ उक्तः ॥१०॥

१. क्षालितानीति पाठः.　२. कर्मक्षय इति पाठः.

**प्रक्षीणत्वाद् गुणमयं देहं जहुः.** तदा अज्ञानमन्यथाज्ञानं वा त्रिक्षणावस्थायीति न तयोः प्रतिबन्धकत्वं, वियोजकाभावात् शरीरान्तरोत्पादकाभावाच्च. अविद्या परं तिष्ठति. सा भगवच्छक्तिः भगवत्संगतं न व्यामोहयतीति सापि निवृत्ता. ततः मुक्ता जाता इत्यर्थः ॥११॥

अत्र राजा श्रुतिविरोधमाशङ्कते **कृष्णमि**ति.

---

**प्रकाशः**

**तमेव परमात्मानमि**त्यत्र. ननु भगवति प्रविष्टत्वेऽपि स्वाप्यय-वद[1]ज्ञानादिवासनायुक्तानामेव प्रवेशात् कथं न मुक्तिप्रतिबन्ध इत्यत आहुः **तदा अज्ञाने**त्यादि. ज्ञानस्य चिरस्थायित्वपक्षेऽपि [2]प्राग्जन्मीनार्थस्मरणेन, "प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम न ह्येष व्यवधात्काल एष सर्वनिराकृतिरि"ति प्रथमस्कन्धे कालस्य स्मृतिनाशकत्वबोधनेन च कालस्य [3]तथात्वात्तदा तासां प्रतिबन्धके काले यदज्ञानं भगवत्स्वरूपविषयकं, यच्च जाररूपतया अन्यथाज्ञानं, तत् त्रिक्षणावस्थायि विनश्यदवस्थमिति न तयोः स्वरूपतस्तथात्वमि[4]त्यर्थः. ननु तथापि वासनान्तरसत्त्वे कथं न तत्स्थितिरित्यत आहुः **वियोजके**त्यादि. सांसारिक्या विरुद्धवासनायाः कर्मणश्च क्षीणत्वेन तत्स्थापकाभावाच्च न तथात्वमित्यर्थः ॥११॥

**लेखः**

**निवृत्ते**त्यन्तेन. **अज्ञान**पदेनाद्यं पर्वोक्तम्, **अन्यथाज्ञान**पदेन पर्वान्तराण्युक्तानि, **अविद्या**पदेन शक्तिरुक्तेति विभेदः. **तदे**ति भगवत्सङ्गे सतीत्यर्थः. आद्यक्षणे सङ्गो, द्वितीयक्षणे सङ्गस्थितिः, तृतीयक्षणे तयोर्नाशः— एवं त्रिक्षणावस्थायित्वं ज्ञेयम्. उभयोस्तथात्वे क्रमेण हेतू आहुः **वियोजके**ति **शरीरे**ति. भगवद्वियोगे स्वरूपाज्ञानं स्थिरं भवेत्, शरीरान्तरे सति पर्वान्तराण्यन्यथाज्ञानरूपाणि स्थिराणि स्युः, तदुभयाभावात्तयोस्त्रिक्षणावस्थायित्वमित्यर्थः. गुणातीत-तत्प्राप्त्यभिप्रायेण **मुक्ता जाता** इत्युक्तम्. एतासां देहादिसङ्घाते अमङ्गलतानिवृत्तयेऽक्रूरस्येव व्यवहारसिद्ध्यर्थं जीवमन्यं भगवान् स्थापितवानिति ज्ञेयम् ॥११॥

---

१. प्रतपवत्(?) कूपजलपोत्रवत्. २. जारबुद्ध्यापि सङ्गताः.
३. स्मृतिनाशकत्वात्. ४. न मुक्तिप्रतिबन्धकत्वम्.



**॥ राजोवाच ॥**

**कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने ।**
**गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥१२॥**

"तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाये"ति श्रुतौ ज्ञानमेव साधनत्वेनोक्तम्. तत्रैव पुनः "भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित् सएव मुक्तिदाता च भक्तिस्तत्रैव कारणम्." उभयोश्च निर्णयः— "ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः द्वयोरप्येक एवार्थो भगवच्छब्दलक्षण" इति. "भक्त्या मामभिजानाती"त्यपि भगवतोक्तम्. ततो मर्यादायां ज्ञानेनैव मुक्तिः, पुष्टौ भक्त्या ज्ञानेन वा. एतासां तु न द्वयं— भक्तिरपि सगुणा ज्ञानमपि सगुणम् उभयं च तामसम्— अतः कथं मुक्तिरिति. तदाह ताः **कृष्णं कान्तं परं विदुः. कान्तः** पतिर्जारो वा, न तु ब्रह्मतया विदुः. **मुन** इति सम्बोधनमत्र निर्णयपरिज्ञानार्थम्. विरोधस्तु स्पष्टः— तासां भगवति स्वस्मिंश्च गुणबुद्धिरेव. गुणबुद्धिश्च गुणप्रवाहस्य मूलम्, अन्यथा गुणबुद्धिनिवारकाणि सर्वाण्येव शास्त्राणि व्यर्थानि भवेयुः.

---

**लेखः**

**कृष्णमि**त्यत्र. **तत्रैवे**ति मुक्तिसाधनविचारे एवेत्यर्थः. **भक्तिरपि सगुणा ज्ञानमपि सगुणमि**ति, **गुण**शब्देनोपाधिस्तत्सहितमित्यर्थः. **उभयं चे**ति, जारत्वमुपाधिः, नतु भर्तृत्वादिकं धर्मरक्षकत्वादिकं वा. अतो भक्ति-र्ज्ञानमुभयमपि **तामसमि**त्यर्थः. ननु ब्रह्मणः सर्वरूपत्वात्तथा बुद्धावप्यज्ञानान्यथा-ज्ञानाभावपूर्वकं ब्रह्मज्ञानं सिद्धमेव, अतएव "सर्वेषामात्मजो ह्यात्मे"त्यादि-वाक्यानीत्याशङ्क्य, साङ्ख्योक्तस्यात्मानात्मविवेकस्यैवाभावे "एतस्मादात्मन आकाशः सम्भूत" इत्यारभ्य "स य एवं विदि"त्यन्तेन विवृतम्. सर्वात्मत्वेन ब्रह्मवित्त्वं तु सम्भावयितुमेव न शक्यमित्याशयेन राज्ञा साङ्ख्यपक्षः पृष्ट इत्याशयेनाहुः **वैदिके**ति. ब्रह्मवित्त्वे परप्राप्तिपक्ष इत्यर्थः ॥१२॥

**योजना**

**गुणप्रवाहोपरम** इत्यस्य विवृतौ. ननु कृष्णं ब्रह्मत्वेन न विदुरेतावता किं बाधकं, बहवोऽपि श्रीकृष्णं ब्रह्मत्वेन न जानन्ति अथापि येषां वेदान्त-श्रवणादिना ब्रह्मज्ञानमस्ति ते मुच्यन्तएव, तथैता अपि मुक्तिं प्राप्स्यन्तीत्या-शङ्क्याहुः **वैदिकः पक्षस्त्वसंभावित एव,** "ब्रह्म वेद ब्रह्मैव भवती"त्या-

वैदिकपक्षस्त्वसंभावितएव. अतो **गुणधियां** गुणबुद्धियुक्तानां **गुणप्रवाहोपरमः कथम्?** ॥१२॥

तत्रोत्तरमाह **उक्तमिति** चतुर्भिः.

**॥ श्रीशुक उवाच ॥**

**उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः ।**
**द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥१३॥**

**एतत्**सप्तमस्कन्ध **एवोक्तं** शिशुपालमुक्तौ. यथा शास्त्रद्वयं भक्तिज्ञान-प्रतिपादकं साधनं, तथा भगवत्स्वरूपमपि. भगवान् हि मुक्तिदानार्थ-मेवावतीर्णः सच्चिदानन्दरूपेण प्रकटः. अतो यः कश्चन येनकेनाप्युपायेन भगवति सम्बन्धं प्राप्नोति, सएव मुच्यते. ज्ञानभक्त्योस्तु आविर्भावार्थमुपयोगः. आविर्भावश्चेदन्यथा सिद्धः तदा न ज्ञानभक्त्योरुपयोगः. अत्र तु भगवान् स्वतएवाविर्भूतः, मुक्तिदानार्थं सर्वसाधारण्येन, ईश्वरेच्छाया अनियम्यत्वात्. अत आविर्भावः स्वेच्छया, भक्त्या ज्ञानेन वा. भगवदवताराातिरिक्तकाले

### टिप्पणी

**उक्तं पुरस्ता**दित्यत्र, उक्तं निर्गलितार्थमाहुर्**यथा शास्त्र**मित्यादिना[1]. अन्यथा चैद्यस्यापि पक्षसमत्वेन नेदमुत्तरं स्यादिति भावः. एतेनाद्यश्लोकार्थ उक्तः, **भगवा**नित्यादिनाग्रिमाणाम्. किञ्च. पूर्वं ज्ञानभक्त्योरपि हेतुत्व-मङ्गीकृत्योक्तम्, अधुना त्वाविर्भावेनैव ते अन्यथासिद्धे इति स्वरूपेणैव सर्वेषां मुक्तिरित्याहुः **ज्ञानभक्त्योरि**त्यादिना ॥१३॥

### प्रकाशः

**उक्तं पुरस्ता**दित्यत्र. **भगवानि**त्यादिना द्वितीयस्यार्थ[2] उच्यते. तेन मुक्तिदानार्थमवतीर्णस्यैव साधनता न तूदासीनस्येति बोध्यते. **अत** इत्यादिना तृतीयस्योच्यते. तेन तादृशस्यापि सम्बन्धस्यैव साधनत्वं न त्वसम्बद्धस्य, सम्बन्धश्चाविच्छिद्यमानएव व्यापारः न तु विच्छिद्यमान इति निर्णीयते. **ज्ञान-भक्त्योस्त्वि**त्यादिना तुरीयस्योच्यते. तेन राजोक्तो विरोधः कालभेदेन श्रुतेः सावकाशतया परिह्रियते तत्रोपपत्तिश्चेश्वरेच्छारूपा बोध्यते. तथा फलबलादयं निर्णयो न व्यभिचारशङ्कयापनेतुं शक्य इति च बोध्यते इति ज्ञेयम् ॥१३॥

१. **यथाशास्त्रद्वयमित्यादिना** मू. पा.
२. प्रकृतश्लोकचतुष्टये द्वितीयश्लोकात्मकस्य "नृणाम्" इत्यादेः अर्थः (सम्पा.).



द्वयमेव हेतुः. अवतारदशायां तु न तयोः प्रयोजकत्वम्. वर्षाकाले जलं सर्वत्र सुलभमिति न कूपनदीनामनुपयोगः शङ्कनीयः. तदाह **पुरस्तात्** सप्तमस्कन्धे **यथा चैद्यः** शिशुपालः **सिद्धिं** भगवत्सायुज्यं **गतः. द्विषन्नपि** द्वेषं कुर्वन्नपि. यद्यपि द्वेषकृतो दोषः प्रतिबन्धको भवति, तथापि स्मरणेन तदघं हृत्वा तत्र सायुज्यं प्राप्तः. किञ्च नापि तस्य दोषोऽस्ति कश्चन, द्वेषादयोऽपि भगवतैवोत्पादिताः. तदाह **हृषीकेश**मिति, इन्द्रियप्रेरकोऽयं यथासुखं भावानुत्पादयति. यत्र द्वेषस्यापि मोक्षसाधकत्वं तत्र **अधोक्षजप्रियाः किमु** वक्तव्या– "मुक्तिं गच्छन्ती"ति ॥१३॥

अत्र मुख्यामुपपत्तिमाह **नृणां निःश्रेयसार्थाये**ति.

**नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ।**
**अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥१४॥**

प्राणिमात्रस्य मोक्षदानार्थमेव भगवान् अभिव्यक्तः, अतः इयमभिव्यक्तिः निःश्रेयसार्थैव. अन्यथा न भवेद्, असाधारणप्रयोजनाभावात्. भूभारहरणादिकं च अन्यथापि भवति. अतो **निःश्रेयसार्थ**मेव **भगवतो**ऽभि-**व्यक्तिः** प्राकट्यम्. **नृपे**ति सम्बोधनं कदाचिद्राजा कथञ्चिद्गच्छति तद्वदिति ज्ञापयितुम्. प्रकारान्तरेण तादृशस्य नाभिव्यक्तिः सम्भवतीति वक्तुं भगवन्तं

### प्रकाशः

**नृणां निःश्रेयसार्थाये**त्यत्र. **अन्यथापी**ति "यदा यदा ही"ति वाक्यादंशा-वतारेणापीत्यर्थः. अन्यार्थमागमनं कुतो न सङ्गच्छत इत्यतस्तदुपपादयन्ति

### लेखः

**नृणामि**त्यस्याभासे. **अत्रे**ति स्वरूपस्य मुक्तिदातृत्वे इत्यर्थः. व्याख्याने मोक्षदानं वासुदेवकार्यमित्याशङ्क्याहुः **प्राणिमात्रस्ये**ति, साधनरहित-

### योजना

द्युपनिषन्निरूपितो ब्रह्मभावस्त्वसंभावितएव, वेदान्तश्रवणमननाद्यभावादि-त्यर्थः ॥१२॥

**नृणां निःश्रेयसार्थाये**त्यत्र. **नृपेति सम्बोधनं कदाचिद्राजा कथञ्चिद्गच्छती**-त्यादि. अयमर्थः. राजा ह्यन्यैरेव सर्वं कार्यं कारयति, स्वयं तु कदाचिदेव क्रीडाविशेषार्थं गच्छति. तद्वद्भगवानपि भूभारहरणादिरूपं व्यूहैः कारयति, **निःश्रेयस**शब्दवाच्यमुद्धाररूपकार्यं स्वयमेव करोतीति भावः ॥१४॥

विशिनष्टि. आदौ भगवान् सर्वैश्वर्यसम्पन्नः अपराधीनः कालकर्मस्वभावानां नियामकः सर्वनिरपेक्षः किमर्थमागच्छेत्? किञ्च स्वार्थं गमनाभावेऽपि परार्थं वा स्यात्, तदपि नास्तीत्याह **अव्ययस्ये**त्यादिचतुर्भिः पदैः. अन्येषां कृतिसाध्यं ज्ञानसाध्यं वा यद्भवति तदुपयुज्यते, भगवाँस्तु **अव्यय**त्वाद् अविकृतत्वात् न कृतिसाध्यः. **अप्रमेय**त्वात् ज्ञानसाध्योऽपि न. देहादिभजनद्वारा भजनीयो भविष्यतीत्यपि न, यतो **निर्गुणः** निर्गता गुणा यस्मात्. गुणेषु विद्यमानेष्वेवान्यस्य प्रतिपत्तिस्तत्र भवति, यथा क्षुधि सत्यामन्नदानं, कामे सति स्त्र्युपयोगः, इन्द्रियेषु सत्सु तद्विषयाणाम्. अतो भगवतः सेवकपूरणीयांशः कोऽपि नास्तीति भजनीयोऽपि न भवति. किञ्च लीलार्थं यद्यपेक्षेतापि [१]तथापि सर्वं

## टिप्पणी

**भगवतो नृपे**त्यत्र, **सर्वैश्वर्यसम्पन्न** इत्यारभ्य **निरपेक्ष** इत्यन्तेन ग्रन्थेन **भग**शब्दार्थवत्त्वं विवृतं प्रकृतोपयोगित्वेनेति ज्ञेयम् ॥१४॥

## प्रकाशः

**अन्येषामि**त्यादि. एतत्प्राकट्यस्य "योगास्त्रयो मये"त्यादिभगवदुक्तसाधनवतां फलदानार्थत्वं वक्तव्यं, तन्न युक्तं, तत्र स्वोक्तत्वनिर्बन्धेन[२] प्राकट्यात् प्रकृते तदभावाद्, भूभारहृत्यादेरंशद्वारापि संभवादतोऽधुना यत्प्राकट्यं तत्केवलं साधनरहितानां निःश्रेयसायैव. तदेव "नायमात्मे"ति श्रुत्या साधनान्तरनिषेधपूर्वकं वरणैकलभ्यत्वस्वात्मविवरकत्वे श्रावयन्त्योक्तम्. एवं सति इदानीं यत्प्रकटस्तत्प्राकट्यं न ज्ञानकृत्योः साध्यमित्यर्थः. "अथ भक्त्यैवे"ति श्रुत्या साम्प्रतं भक्तिसाध्यता शङ्क्येत, तदपि नेत्याहुः **देहादी**-त्यादिना. एवं च सेवकानुपयोगे तत्कृतसेवादिना प्रसादोऽपि दूरापेत इति साधनप्रकारेण साध्यत्वाभावादन्यस्य न भगवदुपयोग इति न तदर्थमपीदं

## लेखः

स्यापीत्यर्थः. **परार्थमि**ति परस्य साधनसम्पादनार्थम्. स्वदेया मुक्तिस्तु साधननिरपेक्षेति वक्ष्यते. **अन्येषामि**ति, कृतिविषयो ज्ञानविषयो वा पदार्थः अन्येषामुपयुज्यत इत्यर्थः. **अविकृतत्वादि**ति, विकाराणामेव कृतिविषयत्वादिति भावः. **कृती**ति कृतिविषय इत्यर्थः. **ज्ञाने**ति ज्ञानविषय इत्यर्थः ॥१४॥

१. न तथापीति पाठः. २. स्वोक्तत्वाद् निर्बन्धेन प्राकट्याद् इति मांड. पाठः.



तस्यैव, यतः सर्व**गुणानां स एवात्मा**. अतः साधनप्रकारेण नान्यस्याप्युपयोगः. अतः स्वपरप्रयोजनाभावाद् यदि साधननिरपेक्षां मुक्तिं न प्रयच्छेत् तदा व्यक्तिः प्रयोजनरहितैव स्यात् ॥१४॥

एवं सति येन केनाप्युपायेन यएव सम्बध्यते तस्यैव मुक्तिर्भवतीत्याह **काममि**ति.

**कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा ।**
**नित्यं हरौ विदधते यान्ति तन्मयतां हि ते ॥१५॥**

कामादयः षट् साधनानि भगवत्सम्बन्धे. तत्र **कामः** स्त्रीणामेव, **क्रोधः** शत्रूणामेव, **भयं** वध्यानामेव, **स्नेहः** सम्बन्धिनामेव, **ऐक्यं** ज्ञानिनामेव. **सौहृदं** भक्तानामेव, सख्यं तेष्वेव[१] सिध्यतीति. पूर्वसिद्धज्ञानभक्त्योः नात्रोपयोगः, तेषां मर्यादया स्वतन्त्राविर्भावस्य नियतत्वात्. एकस्य तूभयत्वे

## टिप्पणी

**कामं क्रोधमि**त्यत्र. नन्ववतारसमये पूर्वोक्तभक्तनिमित्तं पृथगाविर्भावो-पेक्षितोऽथवा तेनैव तत्फलसाधनमिति सन्देहे निर्णयमाहुः **एकस्ये**ति. उक्तस्थले तेनैव तत्फलसाधनं न पृथक्तदपेक्षेत्येकस्यैवाविर्भावस्योभयरूपत्वं भवति. एकत्र विनियुक्तस्यान्यत्र विनियोगो न न्यायसिद्ध इत्याशङ्कानिरासाय

## प्रकाशः

प्राकट्यमित्यर्थः. तेन सिद्धमाहुः **अतः स्वे**त्यादि. अतो निःसाधनानां फलायैवेति निश्चय इत्यर्थः ॥१४॥

नन्वेवं सति कुतो न सर्वे तदैव मुच्यन्त इत्याकांक्षायां तत्र पूर्वोक्ता-दतिरिक्तं व्यापारद्वयं सम्बन्धनैरन्तर्यरूपमपेक्षितमिति वदतीत्याशयेन **कामं क्रोधमि**त्याभासमाहुः **एवं सती**त्यादि. **सौहृद**पदेनाविहितभक्तिरुच्यत इत्याशयेनाहुः **सख्यमि**त्यादि. नन्वस्त्वेवं, तथाप्यवतारदशायां मर्यादा-मार्गीयाणामपि सत्त्वात्तेषां कथं सिद्धिरित्यपेक्षायां निर्णयं वक्तुं टिप्पण्यामाहुः **नन्वि**त्यादि. **पूर्वोक्ता** मर्यादामार्गीयाः.

## लेखः

**कामं क्रोधमि**त्यत्र. **स्त्रीणामेवे**त्यादिकं "गोप्यः कामादि"ति श्लोकसम्मत्योक्तमिति ज्ञेयम्. **अन्यथे**ति, उपायस्य सार्वदिकत्वाभावे

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्.

'संयोगपृथक्त्व'न्यायेन निर्णयः. **वेत्यनादरे**— अन्यो वा कश्चनोपायो भवेत्,

### टिप्पणी

[1]निर्णायिकन्यायमाहुः **संयोगे**त्यादि. यथा होमएव नियुक्ता जुहूः पर्णमयीत्वगुणयोगात्पापश्लोकश्रवणाभावमपि साधयति, न त्वेतदर्थं पृथक्सा तन्मयी क्रियते, "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोती"ति श्रुत्या होमार्थाया एव तन्मय्यास्तस्या एतत्फलसाधकत्वोक्तेः. तथा प्रकृतेऽपि भूम्यादिक्लेशव्ययनिमित्तकाविर्भावस्यैव तत्तद्भक्तयोगे तत्तत्फलसाधकत्वमिति

### प्रकाशः

**यस्य पर्णमयी**त्यादि. अत्र केचित्— नेदं संयोगपृथक्त्वन्यायोदाहरणं सम्भवति, फलश्रुतेरर्थवादवाक्यनिष्ठत्वेनार्थवादस्य च प्राशस्त्यपरतया विधेयस्तावकत्वेन फलविध्यन्तराभावात् विहितस्य च फलान्तराभावात् स्तुतेरसत्समारोपणरूपत्वाच्च. किन्तु "खादिरे बध्नाति, खादिरं वीर्यकामस्य यूपं कुर्यात्, दध्ना जुहोति, दध्नेन्द्रियकामस्य जुहुयादि"त्याद्युदाहर्तव्यम्— इति वदन्ति. तत्र तेषां वेदविरोध एव सम्पद्यते. तथा हि— परमाप्तः परमाप्तवाक्यं वा वेदः. स चेदतथाभूतं वस्तु तथात्वेन स्तुत्यर्थं वदेत्, तदा मिथ्यावादित्वेन सर्वोऽप्यनाप्त एव स्यात्. न ह्येकत्र ज्ञातमिथ्याभाषित्वस्यान्यत्र विश्वासो भवतीति विधिवाक्योक्तफलेऽपि तथा कल्पनायाः कर्तुं शक्यत्वात्. अतो विधिवाक्यप्रामाण्यरक्षणायैवार्थवादादिकमपि फलं विध्यभिप्रेततया स्वीकर्तव्यम्. यथा "अक्ताः शर्करा उपदधाति" "तेजो वै घृतमि"त्यत्र घृतस्य विध्यनभिप्रेतत्वे अर्थवादो न तत्स्तुतिं कुर्यादिति स्वीक्रियते, तथान्यत्रापि फलस्यानभिप्रेतत्वेऽपि न सो ब्रूयादित्यपि स्वीकार्यम्, एकवाक्यत्वानुपपत्तेरुभयत्रापि तुल्यत्वात्. न च प्राशस्त्यपरतयैवैकवाक्यत्वमभिप्रेतं न तु फलसमर्पकत्वेनापीति वाच्यम्, वाक्योक्तफलसमर्पकत्वातिरिक्तस्य प्राशस्त्यस्यात्रादर्शनेनान्यस्य कल्पयितुमशक्यत्वात्, यथाकथञ्चित्कल्पने तु रात्रिसत्राधिकरणन्यायेन क्लृप्तेन कल्प्यमानबाधस्य वक्तुं शक्यत्वात्. न चात्र 'काम'शब्दाभावान्न विधेरपीदं फलमभिप्रेतमिति वाच्यम्, रात्रिसत्राधिकरणे प्रतिष्ठाया अपि तथात्वापातात् "प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ती"त्यत्रापि 'काम'-शब्दाभावात्. न च तत्रागत्या तथा स्वीक्रियते अत्र तु होमनिष्पादकत्वे-

१. निर्णायिकं न्याय° मू. पा.



परं सर्वदा कर्तव्यः, अन्यथा "अन्ते या मतिः सा गतिरि"ति अन्यशेषतामापद्येत. कर्मवशाच्च नान्ते भगवतः स्मरणम्, अन्यस्यैव, प्रपञ्चविरोधित्वाद्भगवतः. अतो **नित्यं** ये **विदधते ते तन्मयतामेव** प्राप्नुवन्ति. ननु कामादिषु क्रियमाणेषु दुःखान्तराभिभवे कथं नित्यं करणं सम्भवति तत्राह **हरावि**ति.

### टिप्पणी

न पृथक्तदपेक्षेत्यर्थः. अत्रेदमपि ज्ञेयम्. पुष्टिमर्यादाभेदेन द्विविधानामपि भक्तानां फलसाधनं सर्वशक्तिप्राकट्यपूर्वकमवतीर्णेन पूर्णेनैकेनैव स्वरूपेणैव[1] कर्तुं शक्यम्. तत्रापि केवलमर्यादामार्गस्थापनायाविर्भूतेन पुष्टिमार्गीयभक्तेष्टपूरणं न क्रियते. एवं केवलपुष्टिमार्गीयेणाप्याविर्भावेन. अतएव दण्डकारण्यस्थर्षीणामिष्टपूर्तिर्न कोसलेन्द्रेण कृता श्रीमद्गोकुलचन्द्रेण च यज्ञपत्नीनां, पुष्टिलीलानधिकारात्. अग्रे मथुरादिषु प्रद्युम्नादिरूपेण लीलाकरणात्तत्तदनुरूपं फलदानमिति. **नित्यं हरावि**त्यत्र, **स हि सर्वदुःखहर्ते**ति.

### प्रकाशः

नापि फलवत्त्वसम्भवान्नार्थवादिकफलग्रहणे किञ्चिद्बीजमिति वाच्यम्, यया कयापि तया होमनिष्पत्तेः सम्भवेन पर्णमयीत्वस्य तथापि फलं न किञ्चित्पश्यामः. अतो विधिवाक्याभिप्रेतमेव फलमर्थवादो वक्तीति स्तुतिलक्षणं चोत्कर्षाधायकगुणवर्णनमिति सर्वसामञ्जस्यायाभ्युपेयम्, अतो नानुपपन्नं किञ्चित्.

प्रकृतमनुसरामः. एवं यद्यप्येकेन प्राकट्येन द्विविधयोरपि फलं न्यायसिद्धम्, तथापि नेदमत्र श्रीमदाचार्याभिप्रेतं, **पूर्वसिद्धे**ति फक्किकया तत्र स्वतन्त्राविर्भावनियमोपन्यासात्. न्यायोदाहरणं तु स्वतन्त्रेच्छत्वेन कदाचित्तथात्वस्यापि सम्भवज्ञापनाय. अतएव मूलेऽपि तथानभिप्रेतम्. तदेतद्धृदि कृत्वाहुः **अत्रेदमि**त्यादि.

### लेखः

तद्भावनापि तदुपाधित्वान्न सर्वदा भवेत्. तदान्ते देवान्तरस्मरणेऽ**न्यशेषतां** तत्सायुज्य**मापद्येत** पुरुषो, न तु भगवद्भावनया तदात्मकत्वस्फुरणेन कर्मक्षयाद्भगवदात्मकतारूपां तन्मयतामित्यर्थः. पुत्रादिस्मरणे "प्रजामनुप्रजायन्त" इति रीत्या तदादिमयत्वं तत्सम्बन्धिजन्म भवेदिति ज्ञेयम्. ननु यथा तद्विषयककामाद्यभावेऽप्यदृष्टवशादेव तत्स्मरणं तथा भगवतोऽपि भवेदित्याशङ्क्याहुः

१. स्वरूपेण मू. पा.

स हि सर्वदुःखहर्ता, नित्यं तद्भावनायां जगदेव तदात्मकं स्फुरति. दृष्टिः कामेनानुरक्तेति किम्पुनः स्वात्मा. अतस्तदात्मका एव भवन्ति. सर्वत्र भगवदावेशात्.

जीवेऽन्तःकरणे चैव प्राणेष्विन्द्रियदेहयोः ।
विषयेषु गृहेऽर्थे च पुत्रादिषु हरिर्यतः ॥(१०)॥

**टिप्पणी**

भावनाविषयस्वभावादेव न दुःखभानमित्यर्थः. **नित्यमि**त्यादिना तन्मयत्वं विवृतम्. तथा स्फुरण उपपत्तिमाहुः **सर्वत्र भगवदावेशा**दिति. अतिविगाढ-भगवद्भावनायां देहेन्द्रियप्राणान्तःकरणजीवेष्वपि तदावेशात्तेषु तथा स्फूर्तौ तत्सम्बन्धिष्वपि तथैव भानमित्यर्थः. एतदेव **जीव** इत्यादिना विवृतम्. ननु

**लेखः**

**कर्मे**ति. कामादेर्हेतुत्वेऽपि सप्तमस्कन्धे कीटपेशस्कृद्दृष्टान्तेनोक्तमत्र **हिशब्दे**-नोक्तं नित्यं तद्भावनं ततस्तदात्मकत्वस्फुरणं चाप्यवान्तरमस्तीत्याशयेनाहुः **नित्यं तद्भावनाया**मिति. पूर्वं 'तद्भा[illegible]मुक्ता' इतिपदेन तद्भावनमुक्तम्. ध्यानकथनेन तदात्मकत्वस्फुरणमुक्तम्. ततः कर्मक्षय उक्तः. तत्सम्मत्यात्रापि तथा स्फुरणानन्तरं कर्मक्षयोऽप्यवान्तरो ज्ञेयः ॥१५॥

**योजना**

**नित्यं हरौ विदधत** इत्यस्य विवृतौ **दृष्टिः कामेनानुरक्तेति किं पुनः स्वात्मे**ति. कामादिभिः षड्भिरपि यत्र भगवत्प्राप्तिः, तत्र गोपवधूनां **दृष्टिः कामेन अनुरक्ता इति** हेतोः **जगदेव** तदा **तदात्मकं स्फुरति, किं पुनः स्वस्य** जीवस्य संघाते यः **आत्मा** प्रविष्टः सः भगवत्त्वेन स्फुरेदिति **तदात्मका एव भवन्ति सर्वत्र भगवदावेशा**दिति **सर्वत्रे**त्यस्यार्थं स्वयमेव निरूपयन्ति[1] **जीवेऽन्तःकरणे चैवे**त्यादि. **पुत्रादिषु हरिर्यत** इति, **पुत्रादिषु यतो** हेतोः **हरिः** आविष्ट इति शेषः. तथा च **यतो हरिरा**विष्टः अतः सः **कामक्रोधादि-भिस्तादृशीं भावनां कुर्या**दित्युत्तरेण श्लोकेनान्वयः. **तादृशीम्** "आसीनः संविशंस्तिष्ठन् भुञ्जानः पर्यटन्महीमि"त्यत्रोक्तां कंसकृतभावनासदृशीमित्यर्थः.

**कारिकार्थः**

**कामं क्रोधं भयं स्नेहमि**त्यत्र **जीवे**त्यादि. एतेन **तन्मयतां यान्ती**त्यत्र उपपत्तिरुक्ता, यतो भावनातो जीवादिषु हरिराविष्टो भवेत्. **यथा ज्ञाने** सति **पूर्वप्रपंचलयो** भवति **तथा यतो** भावनातोऽपीत्यर्थः (१०-११).

१. जय. पाठानुसारेण. स्फुरति इति मुद्रितपाठः.



तादृशीं भावनां कुर्यात् कामक्रोधादिभिर्यथा ।
पूर्वप्रपञ्चविलयो यथा ज्ञाने तथा यतः ॥(११)॥१५॥

किञ्च आदावेव गोप्यो मुक्ताः, किमाश्चर्यं बहव एवाग्रे मुक्ता भविष्यन्तीति. तदाह **न चैवमि**ति.

**न चैवं विस्मयः कार्यो भवता भगवत्यजे ।**
**योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥१६॥**

**एवम्** असंभावनारूपो **विस्मयो न कार्यः**, असंभावितबुद्धीनाम् अन्यथास्फुरणनियमात्. यतो भगवान्, यत्किञ्चिन्मोक्षे ज्ञानादिकमुपयुज्यते एतत्सर्वं भगवत्येवास्ति. यदि ज्ञानव्यतिरेकेण मोक्षो न भवेदिति ज्ञास्यति, तदा सिद्धत्वात् ज्ञानस्य तदपि दास्यति. किञ्च अन्यः सन्देहं कुर्यादपि, भगवतो माहात्म्यं न दृष्टमिति, **भवता तु न कार्यः,** गर्भएव माहात्म्यदर्शनात्. किञ्च निर्दुष्टे सर्वं संभवति. तत्र दोषाणां मूलं जन्म, तदभावे दोषाभाव इति. तेन **अज**त्वात् निर्दुष्टः. अन्ये सर्वे हि जायन्ते, न तैस्तेषां मुक्तिः सम्भवति, तुल्यत्वात्. किञ्च यो हि साधनपरः स मुच्यते. तत्र साधनं मनः सर्वतो निवृत्तं, तथा योगेन भवति, तस्य योगस्य च नियामको भगवानेव. यद्यन्यस्यापि मोक्षो भवेत् भगवदिच्छयैव भवेत्, योगादिसाधनानां तन्नि-यम्यत्वात्. किञ्च सदानन्दो भगवान् फलात्मा. यः कश्चिन्मुच्यते स एतमेव प्राप्स्यति. अतः साधनैरप्ययमेव प्राप्यः. सोऽत्र स्वयमेव सम्बध्यत इति न

**टिप्पणी**

प्रश्नोत्तरं त्वाद्याभ्यामेव सम्पन्नम्, अनेनापि श्लोकेन स एवार्थः पर्यवस्यतीत्येतत्कथनं व्यर्थमित्याशंक्य तत्तात्पर्यमाहुः **तादृशीमि**ति. एवं बोधनार्थमित्यर्थः ॥१५॥

**लेखः**

**न चैवमि**त्यत्र. निषेधस्यानिष्टसाधनताबोधकत्वनियमात् तदनिष्टं विवृण्वन्ति **असम्भाविते**ति, कर्तरि क्तः ॥१६॥

**योजना**

**कामक्रोधादिभिरि**ति, कामक्रोधादयस्तादृशभावनायां हेतव इत्यर्थः. भावनायां सत्यां किं स्यादित्याकाङ्क्षायामाहुः **पूर्वप्रपञ्चे**त्यादि, **यथा ज्ञाने प्रपञ्चलयः तथा कामक्रोधादिभिर**पि भवेदित्यर्थः (१०-११).

किञ्चिदनुपपन्नम्. किञ्च **एतत्** परिदृश्यमानं सर्वमेव जगत् **यतो** विमुक्तिं यास्यति. भावनया गोकुले स्थित आह, ज्ञानदृष्ट्या वा, साक्षात्परम्परया वा सर्वानेव मोचयिष्यतीति. तदग्रे वक्ष्यति "स्वमूर्त्ये"ति श्लोकद्वयेन ॥१६॥

[1](यद्वा अत्र राजानुपपत्तिं शङ्कते **कृष्णमिति**. एताः **कृष्णं कान्तं परं विदुः, न तु ब्रह्मतया,** अतो **गुणप्रवाहोपरमः कथं** संगच्छत इति. अत्रायं भावः. ब्रह्मत्वेन विज्ञानं हि शास्त्रीयं, तच्च सात्त्विकं भवितुमर्हति, "सत्त्वात्सञ्जायते ज्ञानमि"ति वाक्यात्. एतास्तु गुणातीतस्यानन्दमात्रकरपादमुखोदरादेःप्रकटस्यानन्तगुणपूर्णस्य सौन्दर्यादिगुणेषु परिनिष्ठितधियः. अतो निर्गुणत्वाद्गुणप्रवाहोपरमः कथं संगच्छते, उपरमस्याभावरूपत्वेन प्रतियोगिसापेक्षत्वादत्र च प्रतियोगिन एवाभावादिति. **मुन** इति सम्बोधनं शुद्धसत्त्वाविर्भावे ज्ञानोदयस्यानुभवसिद्धत्वेन सम्वादार्थम् ॥१२॥

अत्रोत्तरमाह **उक्तमिति**. **पुरस्तात्** सप्तमस्कन्धे "गोप्यः कामादि"त्यादिना. अत्रायमर्थः. यथा भगवति गुणातीतएव परिनिष्ठितबुद्धित्वेऽपि द्वेषस्य तत्र प्रयोजकत्वात् चैद्यादीनां तामसत्वं, तथैतासामपि निर्गुणएव परिनिष्ठितबुद्धित्वेऽपि जारत्वबुद्धेस्तत्र प्रयोजकत्वात् सगुणत्वमेवेति लक्ष्यते. अयं च रसः सर्वभावप्रपत्त्येकलभ्यः. न हि जारत्वबुद्धौ सर्वभावप्रपत्तिः, कामपूरकत्वेनैव तत्संभवनियमात्. अत्र च सगुणत्वस्य प्रतिबन्धकत्वाद्यथा चैद्यादीनां स्वाधिकारानुसारेण तादृशशरीरनाशे तत्पदप्राप्तिः स्वाधिकारानुसारेण, तथैतासामपि स्वाधिकारानुसारेण तथात्वे सगुणत्वोपरमेण सर्वभावप्रपत्त्यैव ततो निजपतिभजनमिति सर्वमवदातम्. अन्यथा "ये यथा मां प्रपद्यन्त" इति मर्यादा भज्येत. एतदेव मनसि कृत्वाह **उक्तं पुरस्तादेतत्त** इति. ननु तथापि तादृशप्रपत्तेरेव मूलत्वात्कथं सर्वभावप्रपत्तिसाध्यं फलं भविष्यतीत्यत आह **द्विषन्नपीति**. अयमर्थः. मोक्षसुखानभीप्सुस्तद्विरुद्धद्वेषकर्ता च चैद्यः. तस्मै यथा ज्ञानिनामपि दुर्लभां मुक्तिं दत्तवान्, एवं तादृक्प्रपत्तिमूलानामप्येतासां तादृशं फलं दत्तवानिति. एतेन यथा द्वेषमुक्त्योस्तारतम्यं तथान्यशेषभजनैतद्रसयोरपीति सूचितम्. ननु गोकुलस्य भगवत्क्रीडोपयोगित्वेन सर्वथाङ्गीकृतस्य सर्वस्यैव निर्गुणत्वे कथमेतासां सगुणत्वमुच्यते? किञ्च अग्रेऽपि यदि सर्वभाव-

१. ( ) चिह्नान्तर्गतः प्रभूणां स्वतन्त्रः.



प्रपत्तिलभ्यमेव फलं दित्सितं भगवतः तदा पूर्वमेव सएव भावः किमिति नोत्पादित इति चेद्, अत्र वदामः. यासां साक्षाद्भगवत्सम्बन्धस्तासां सर्वासामेव रासमण्डलमण्डनानां शरीरमपि गुणातीतमेवेति ज्ञापयितुं भगवानेव कतिपयगोपीः सगुणदेहाः स्थापयित्वा, पूर्वोक्तानां भावोऽपि निर्गुण इति ज्ञापयितुमासां सगुणं भावमुत्पाद्य, एतन्निवर्तकोऽपि स्वयमेव नान्य इत्यपि ज्ञापयितुं तन्निवृत्तिं विधाय, अग्रे भाविस्वविरहजदुःख—स्वसंङ्गमजसुखयोः कर्माजन्यत्वमपि ज्ञापयितुं कर्मक्षयप्रकारेण स्वप्राप्तिं विधाय, मत्स्वाम्येव सर्वमिदं कृतवानिति निगर्वः. अत्र पुष्टिमार्गाङ्गीकारान्मर्यादामार्गीयानुपपत्तयोऽनवसरपराहता इति सर्वमनवद्यम्. अतएव श्रीशुकोऽपि "जहुर्गुणमयं देहमि"ति सगुणदेहत्यागमेवोक्तवान्, अग्रे गुणातीततत्त्राप्त्यभिप्रायेण, गोप्यत्वात्स्पष्टं नोक्तवान्. अन्यथा 'गुणमय'पदवैयर्थ्यं स्यात् ॥१३॥

ननु पूर्वोक्तज्ञापनायैवेदं कृतवानिति कथं ज्ञेयम्, उपपत्त्यभावादित्याशंक्योपपत्तिमाह **नृणामिति**. अयमाशयः. लीलायां तत्स्थितभक्तेषु च, सुतरां रासस्थासु, या साधारणत्वबुद्धिः सा सदोषत्वारोपापरपर्याया,

## लेखः

द्वितीयव्याख्याने **नृणामि**त्यस्याभासे **ननु पूर्वोक्ते**ति. 'गुणमय'पदोक्तं सगुणत्वं रासस्थानां सर्वासां निर्गुणत्व**ज्ञापनायैव कृतवान्** सम्पादितवान् ननु तासामपि सर्वदा सगुणत्वस्थापनायेति "जहुर्गुणमयं देहमि"त्यनेन शुकेन सूचितं, तदेवमे**वेति कथं ज्ञेयं** लीलायां देहस्यावश्यकत्वात् सगुणएव देहस्तिष्ठतु, निर्गुणसम्पादनपर्यन्तं धावनं किमर्थमिति शङ्कया सगुणनिवृत्तिरूपोपपत्तेः सिद्ध्यभावादित्याशङ्क्य तत्र ता**मुपपत्तिमाह** अर्थापत्त्या साधयतीत्यर्थः. लीलाश्रवणे तदनुभावेनैव तत्स्वरूपयाथार्थ्यं भासत एवेति सगुणत्वं स्थितं चेद्भासेत एवेत्याशयेनाहुः **अयमाशय** इत्यादि. अधुना तत्सम्पादनाभावे रासलीला सगुणास्वपि जायते इति ज्ञानेनैतल्लीलाश्रवणे सर्वासु रासस्थासु तत्सम्बन्धात् स्वरूपे लीलायां च सगुणत्वबुद्धिः स्यात्, तथा चैतल्लीलायास्तादृशदोषजनकत्वेन मुक्तिप्रतिबन्धकत्वं स्यादित्यर्थः. तादृशबुद्धेर्दोषत्वं व्युत्पादयन्ति **लीलायामिति**. **साधारणत्वे**ति, प्रपञ्चसाधारणत्वबुद्धिः सगुणत्वबुद्धिरिति यावत्. **तासामिति**, रासस्थानामित्यर्थः. **तस्ये**ति सगुण-

तासामगुणत्वात्तस्य दोषरूपत्वाद्भगवत्स्वरूपे लीलायां च सगुणत्वप्रसञ्जकत्वाच्च. एवं सत्येतल्लीलाया मुक्तिप्रतिबन्धकत्वमेव स्यात्, न तु तद्धेतुत्वम्. तथा सत्यवतारप्रयोजनं विरुध्येतेत्यन्यथानुपपत्त्यैव तथोच्यत इति. ज्ञापनप्रयोजनमपीदमेवेति ज्ञेयम्. व्याख्यानं पूर्ववत् ॥१४॥

नन्वियदवधि सगुणास्वेतासु कृताया लीलायाः पूर्वोक्तदोषप्रसञ्जकत्वं दुर्वारमित्याशंक्य पूर्वलीलाकृतितात्पर्यमाह **काममिति**. इदं हि साधारण्येनोच्यते य एवं **नित्यं विदधते ते तन्मयतां यान्तीति**, नत्वेतद्गोपभार्याविषयकमेव. अतएव क्रोधाद्युक्तिरपि, अन्यथाऽप्रस्तावेनात्र तन्निरूपणमयुक्तं स्यात्. तथा च सगुणेनापि भावेन भजते भगवान् स्वानुरूपमेव फलं ददातीति ज्ञापनाय

## लेखः

त्वस्येत्यर्थः. **सगुणत्वेति**, तादृशबुद्धिप्रसञ्जकत्वादित्यर्थः. **एवं सतीति** तादृशबुद्धिप्रसञ्जकत्वे सतीत्यर्थः. **इदमेवेति**, लीलाया मुक्तिसाधकत्वमेवेत्यर्थः. यथा सगुणत्वज्ञानं मुक्तिप्रतिबन्धकं तथा निर्गुणत्वज्ञानं तद्धेतुरिति भावः ॥१४॥

**पूर्वोक्तेति**, तादृशबुद्धिप्रसञ्जकत्वं पूर्वलीलानां तु दुर्वारमित्यर्थः. **तात्पर्यमिति**, वक्ष्यमाणज्ञापनार्थं[1] कृतमित्यर्थः. दोषसमाधानं तु— रासलीलायां हि स्वरूपभूतानन्दस्थापनं, तेन लीलायाः स्वरूपस्य च विषयात्मकत्वसम्पादनं, न तु तत्र विषयविषयिभावः. अतएव गुणरूपत्वं तासां वक्ष्यते. अतस्तत्स्थानां सगुणत्वे स्वरूपलीलयोरपि तथा बुद्धिः स्यात्. लीलान्तरे तु धर्मभूतानन्दस्थापनेन विषयविषयिभावात् स्वरूपतो न तथात्वं किन्तु विषयसाजात्यनियमे तथात्वं स्यात्, तत्त्वग्रे समाधेयमेव. तथा च पूर्वलीलानां तादृशबुद्धिजनकत्वं विषयमात्रे, नतु तया स्वरूपलीलयोस्तथा बुद्धिः, अतो

## योजना

**कामं क्रोधमित्यस्य** द्वितीये व्याख्याने **सगुणेनापि भावेन भजते भगवान् स्वानुरूपमेवेत्यादि**. **स्वानुरूपं** मुक्तिरूपं **फलमित्यर्थः**. सगुणभावेन भजतो "यस्त आशिष आशास्ते न स भृत्यः स वै वणिक्" इतिवाक्येन भक्त्यभावाल्लौकिकं फलमेव तत्र दातुमुचितं यद्यपि, तथापि स्वस्वरूपं विचार्य मुक्तिमेव ददातीत्यर्थः ॥१५॥

१. जो. पांठानुसारेण. 'ज्ञापनार्थकृतम्' इति मुद्रितपाठः.



पूर्वलीलेत्यर्थः. अन्यथा मुख्याधिकारिणामेव भगवत्प्राप्तिरिति ज्ञानेऽन्येषामप्रवृत्त्या मुक्त्युच्छेदः स्यात्. एवं शास्त्रमप्रयोजनकं च स्यात्, मुख्याधिकारिणां स्वतएव प्रवृत्तेः. स्वरूपलीलयोस्तु न कदाचित्सगुणत्वं, लीलाविषयाणां सगुणानामपि निर्गुणत्वापादकत्वात्. न हि दोषनिवर्तकमौषधं रोगिसम्बद्धं सत् तद्वद्भवति, तथा सति तदनिवर्तकत्वापत्तेः. लीलाया विषयसाजात्यनियमे सगुणनिर्गुणभक्तयोरेकया वेणुवादनादिलीलया निरोधो नोपपद्येत. क्रोधादिवत्कामोपाधिकभावस्यापि जघन्यत्वज्ञापनायापि क्रोधादिनिरूपणं ज्ञेयम्. **तन्मयतां** निर्गुणतामित्यर्थः ॥१५॥

ननु साक्षादङ्गसङ्गित्वेऽपि सगुणत्वस्थितिं वस्तुशक्तिः कथं सहते वह्निसम्बन्ध इव तूलस्थितिमित्येको विस्मयः. लौकिकरीत्या कामभाववतीष्वलौकिकस्य रमणं द्वितीयः. क्रोधादिभाववतां तत्फलमननुभूयैव भगवत्प्राप्तिश्चापरः. स्नेहवत् समानफलत्वं च. यशोदानन्दने हि ता भाववत्यः, तस्य च वनस्थितस्यैतद्ध्यानप्राप्तिश्चान्यः. एतासां तदैव निर्गुणदेहप्राप्तिर्विनैव तत्साधनमिति चेतरः. सर्वात्मभाववत्स्वेव करिष्यमाणलीलाया अनुभवः. अन्यस्यास्तु तद्रहितानामपीत्यनेकविस्मयाविष्टं राजानं ज्ञात्वा तन्निवारकं क्रमेण वदन् पूर्वश्लोकोक्तभाववतां भगवत्प्राप्तौ हेतूनप्याह **न चैवमिति**. आद्यविस्मयाभावार्थमाह **भवतेति**. अत्रायं भावः. पूर्वमनिवर्त्यब्रह्मास्त्रतोऽपि गर्भेऽपि रक्षितवान् भवन्तं, प्रयोजनमस्तीति. अधुना तु तदभावाद् बालवाक्यादपि न रक्षतीति भवतैवानुभूयते. न हि एतावता वस्तुशक्तौ काचिन्न्यूनता, इच्छाशक्त्यधीनत्वात्सर्वासां शक्तीनां, तस्याः सर्वतोऽधिकत्वात्. न हि मन्त्रप्रतिबन्धदशायामग्नेरदाहकत्वमिति तच्छक्त्यपगम एवेति वक्तुं युक्तम्. प्रकृतेऽपि यासां "साक्षादि"त्यादिनोक्तप्रयोजनार्थं भगवता तथा कृतमिति ज्ञात्वा **भवता तु विस्मयो न कार्यः** अनुभावाननुभवेनान्यः कुर्यादपीति. द्वितीयतृतीयादिकं परिहरति **भगवतीति**. तत्रेश्वरो हि सर्वरसभोक्ता भवति, "सर्वरस"इति श्रुतेः. कामरसो हि तादृशभाववतीषु

## लेखः

न मुक्तिप्रतिबन्धकत्वमिति ज्ञेयम्. **स्वानुरूपमेवेति**, पूर्वलीलाभिः सगुणत्वं शिथिलीकृत्य ध्यानप्राप्तस्वसङ्गमनेन सर्वथा निवर्त्य वक्ष्यमाणरसानुभवयोग्यदेहसम्पत्तिरूपां तन्मयतामित्यर्थः ॥१५॥

विशिष्टोऽनुभूतो भवति, कामशास्त्रे तथैव निरूपणात्. तथा चैश्वर्यवत्ययं विस्मयो न कार्यः. तथा भगवद्वीर्यस्येतरसाधनासाध्यसाधकत्वेनात्युग्रत्वात् क्रोधादिदोषमन्यानिवर्त्यमपि स्ववीर्येण हरिर्निवारयितुं समर्थ इति तादृशे स विस्मयो न कार्यः. यशो ह्यसाधारणम्, असाधारणे कर्मणि सति भवति. यदि स्नेहवत्स्वेव मुक्तिं दद्यात्, न द्विट्सु, तदान्यसाधारण्येनासाधारणं यशो न स्यात्. भयद्वेषादिमत्स्वपि स्नेहादिमत्समानफलदाने ह्यसाधारणत्वेनासाधारणं यशः स्यात्. तथा च तादृशयशसः सहजत्वेन तज्ज्ञापकधर्मा अपि हरौ सहजा एवेति नायं विस्मयः कार्यः. श्रीर्लक्ष्मीः सा चैतादृशस्नेहवती यद्वक्षसि स्थितिं प्राप्यापि चरणरजः कामयते, प्रत्यवतारं चावतरति. सदा तद्वत्त्वेन हरिः स्नेहरसाभिज्ञ इति तद्वत्सु स्वरूपदानं युक्तम्. ऐक्यं हि ज्ञानमार्गे, हरेश्च ज्ञानवत्त्वेन तेषु तथा युक्तम्. सौहार्दं हि सख्ये सति भवति, तच्च समानशीलव्यसनेष्वेव. "नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना, श्रियं चात्यन्तिकीं ब्रह्मन् येषां गतिरहं परा, साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्, मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि" इत्यादिवाक्यैर्यथा भगवतो भक्तातिरिक्ते रागाभावो भक्तेष्वेव च राग इति वैराग्यवत्त्वम्, तथा भक्तानामपि भगवतीति सौहार्दयोग्येषु सौहार्दं ददातीति पूर्वोक्तवैराग्यवत्त्वात् तेषु तथा करणं युक्तमिति भावः. 'यशोदानन्दन' इत्यादिनोक्तविस्मयाभावार्थमाह **अज** इति. यदि भगवतो जीववत् कुत्रापि जन्म स्यात् तदान्यत्र बहिःस्थितोऽत्रान्तर्हृदि कथमागतः, तत्र सन्नेवेति शङ्का स्यात्. तदभावात् स्वेच्छया यथा मायाजवनिकां दूरीकृत्य यशोदागृहे प्रकटः, तथा वने, तथैवान्तर्हृद्यपीत्यजे नायं विस्मयः कार्यः. अग्रिमोक्ततदभावार्थमाह **योगेश्वरे**ति. योगिनो हि योगबलेन भोगार्थमनेकानि शरीराणि युगपत्क्षणमात्रेण सृजन्ति. तेषां च योग आगन्तुको धर्मः. भगवाँश्च तादृग्धर्मसम्पादकः फलदाता चेति तेषामपीश्वर इति सहजानन्तशक्तिमानिति तास्वलौकिकदेहसम्पादनमात्रं न विस्मयहेतुर्भवितुमर्हति. अग्रिमतदभावायाह **कृष्ण** इति. "कृषिर्भूवाचक"इति वाक्यात् सदानन्दस्वरूपो भगवान्, निर्दोषपूर्णगुण इति यावत्. तेन कृष्णातिरिक्तस्य वस्तुमात्रस्यैव सदोषत्वात्तत्रापि स्वास्थ्यहेतुत्वं जानतः सदोषत्वमेवेति निश्चयः. इयं च लीला स्वरूपानन्दरूपा तादृश्येवेति



सर्वात्मभावरहितेष्वेतदनुभवायोग्यत्वान्नायं विस्मयः कार्य इत्यर्थः. किञ्च एतासां तु स्नेहः पूर्वोक्तः साधनत्वेनासीत्. गोकुलं "त्वद्व्यापृतं निशि शयानमि"ति वाक्यात् सर्वसाधनविमुखं सदपि प्रतिक्षणं स्वरूपे लीयते, अग्रिमाग्रिमलीलारसानुभवार्थं, भगवान् परं पुनः पुनः पृथक्कृत्य तामनुभावयतीत्यचिन्त्यानन्तशक्तिमति न किञ्चिदाश्चर्यमित्याशयेनाह **यत एतद**िति. शुकस्त्वधुना लीलेतराननुसंधानाद्भावनया तत्रैव स्थित **इत्येतद**ित्युक्तवान्, वर्तमानप्रयोगं च कृतवान्, तामेव लीलामनुभवतीति सर्वमनवद्यम् ॥१६॥

नन्वेतद्वैपरीत्यमपि सुवचम्. तथाहि. एता अपि पूर्वोक्तमध्यपातिन्य एव. अतएव पूर्वश्लोके तासामनिवृत्तिमुक्त्वा तादृशी सा लोकेऽत्यसम्भावितेति सा कथमुपपद्यत इत्याशङ्कानिरासायाह **अन्तर्गृहे**त्यादि. अत्रायं भावः. पूर्वं हि वचनेन निवर्तनम्. तथा सति निवृत्तिर्हि विपरीतस्वक्रियया भवति. सा चातिदूरे, यतस्तत्सजातीयाः काश्चिद्भर्त्रादिकृते क्रियया प्रतिबन्धे तत्प्रतिबध्यं

---

**प्रकाशः**

सुबोधिन्यां स्वतन्त्रे वैपरीत्यशङ्कायां, **सा चातिदूर** इत्यादिना अन्यासामनिवृत्तौ हेतुकथनस्याप्यसङ्गतत्वं बोध्यं, तदानीं प्रतिबद्धदेहत्यागज्ञान[१]-हेतोरशक्यनिरूपणत्वात्, "काश्चित् कृष्णान्तिकं ययुरि"त्यत्र 'काश्चित्'पदाद्वचनेन निवृत्तेरपि सूचनाच्च. एवं 'तद्भावनायुक्ता' इत्यत्र 'तच्'छब्दस्य पूर्वपरामर्शित्वमपि तथा, यतोऽत्र 'तच्'छब्दस्य विषयतया पूर्वपरामर्शितायाः प्रकृतानुपयोगित्वेन वक्तुमशक्यतया सम्बन्धित्वेन साङ्गीकृता, तत्र च सम्बन्धापेक्षया गौरवेण पूर्वानुभूतार्थविषयतायाएव प्रत्यासन्नतया लाघवेनौचित्यात्. अतो भावे भेदान्न पूर्वोक्तास्वेतन्निष्ठाशेषधर्मसिद्धिरित्यप्यरुचिबीजं बोध्यम् ॥१६॥

**लेखः**

**न चैवमि**त्यत्र **कृष्ण**पदार्थविवृतौ **तत्रापी**ति, कृष्णातिरिक्ते वस्तुन्यपीत्यर्थः. तादृशे वस्तुनि यस्य स्वास्थ्यहेतुत्वज्ञानं, कृष्णातिरिक्तवस्तुना यस्य स्वास्थ्यं भवतीति यावत्, तस्य सदोषत्वमित्यर्थः. तथा च सर्वात्मभावरहितानां कृष्णातिरिक्तवस्तुना स्वास्थ्यसम्भवेन सदोषत्वात् कृष्णात्मकलीलानुभवायोग्यत्वमिति भावः ॥१६॥

---

१. ज्ञाने हेतोः इति मुद्रितः पाठः जू.पाठमनुसृत्य संशोधितः.

देहमपि त्यक्त्वा भगवत्सङ्गता जाताः. तथा चैतादृश्यः पूर्वोक्ताः सर्वा इति युक्तैवानिवृत्तिः. किञ्च 'तद्भावनायुक्ता' इति पदे तच्छब्दस्य पूर्वपरामर्शित्वेन पूर्वं च पूर्वोक्तानामेव भावस्योक्तत्वादेतद्भावसजातीयभाववत्त्वं पूर्वोक्तानामपीति गम्यते. तेनैतन्निष्ठाशेषधर्मवत्त्वं तत्रापि सिध्यति. एतासां मुक्तिर्दत्तेति तन्निवृत्तिं विना न सेति तथोक्तं, तासां न तथेति न तथोक्तमिति चेद्, अहो शङ्काढ्यमानिनो मौढ्यदार्ढ्यं तव. यस्मादालोचनलोचनराहित्येन बाहिर्मौख्यासत्सङ्गाख्य-गिरिगर्ताघातपात-विवशाशयः परोक्तमपि नानुसंधत्से. तथा हि यच्छङ्कानिरासायैतत्कथावतारिता तद्भावश्च त्वया वर्णितः, तत्र त्वां पृच्छामः तदर्थमियं कथा कल्पिता उत सिद्धैवानूदिता? अन्त्यएव संमतश्चेत्, तत्रापि त्वां पृच्छामः एतासां प्रतिबन्धे को हेतुरिति. स्वप्रियास्वपि सगुणत्वं ख्यापयितुमेतासां प्रतिबन्धो हरिणैव कृत इति चेद् ब्रवीषि, हन्त एवं विचारकस्य तव शतधा हृदयं नास्फुटत् कुतस्तन्न जानीमः. यतो मर्यादाभक्तिमार्गीयसेवाविषयकश्रद्धाया अपि निर्गुणत्वं तत्र साक्षादङ्गसङ्गिनीषु सगुणत्वं ब्रवीषि. किञ्च "ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिका" इत्यादिना प्रभुणैव, "एताः परं तनुभृत" इत्यादिनोद्धवेन "नोद्धवोऽण्वपि मन्न्यून" इत्यादिना भगवता स्तुतेनापि चरणरेणुप्रार्थनापूर्वकं स्तुता इति क्व तद्गन्धशङ्कापि. ननु कामोपाधिस्नेहवत्त्वेन तथोच्यत इति चेत्, न, तथा स्नेहे भगवतोऽपि विषयान्तरतुल्यत्वेन "संत्यज्य सर्वविषयानि"ति कथनानुपपत्तेः, विषयार्थमेवागमनात्. न च भगवतो विषयत्वेऽपि तदतिरिक्तविषयाणां त्यागोऽनूद्यत इति वाच्यम्, "तव पादमूलं प्राप्ता" इत्युक्तिविरोधात्. न हि कामिन्य एवं वदन्ति किन्तु भक्ताएव. किञ्च [1]अतितोके पूतनासुपयःपानानन्तरं रक्षाकरणे श्रीशुकेन हेतुरुक्त "इति प्रणयबद्धाभिर्गोपीभिरि"ति. न हि तादृशे कामोपाधिकः स संभवति. न वा तादृशीनामअनादित्यागः संभवति, प्रत्युत तदादिसर्वं प्रसाध्यागमनं, कुब्जावत्. तदनन्तरं यद्रमणं तत्तु "रसो वै स" इति श्रुतेः स्वरूपस्य रसात्मकत्वाद्रसरीत्या स्वरूपानन्ददानमेव. "सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसं, तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयमि"ति भगवद्वाक्यात् भगवत्सम्बन्धिसुखस्यापि गुणातीतत्वमेव).

१. अतितोकेनेति पाठः.



एवं प्रासङ्गिकं परिहृत्य प्रस्तुतमाह **ता दृष्ट्वेति.**

**ता दृष्ट्वान्तिकमायाता भगवान् व्रजयोषितः।**
**अवदद्वदतां श्रेष्ठो वाचःपेशैर्विमोहयन् ॥१७॥**

यास्तु समाहूताः समागताः, ता न निवार्यन्ते. याः पुनः सगुणाः

---

### टिप्पणी

**ता दृष्ट्वेत्यत्र, यास्त्वित्यादि.** अन्तर्गृहगता अनाकारिताएव नादं श्रुत्वोद्युक्ता इति प्रतिबन्धोऽभूदिति शंकानिरासायाहुः **याः** पूर्वोक्तास्ता अप्याहूताः. तत्रोपपत्तिमाहुः **समागता** इति, अन्यथा तथा न स्यादिति भावः. गेहस्य देहसम्बन्धित्वात्तस्य नष्टत्वेनैतासां गृहाभावात्तत्र गमनं बाधितमिति **न निवार्यन्ते.** दोषनिवारणार्थं प्रतिबन्ध इत्युक्तम्. यावद्भिर्गुणैर्भगवद्रमणं

### प्रकाशः

**ता दृष्ट्वेत्यत्र** टिप्पण्याम् **अन्तर्गृहेत्यादि.** ननु "निशम्य गीतमि"त्यत्र मुख्यमाकारणं वरदत्तरात्रिकाणामेवेति तदनिवारणस्यैव सुबोधिन्यां प्राञ्जलप्रतीतेरन्तर्गृहगतानां कः प्रसङ्ग इति चेद्? उच्यते. मूले **ताइत्यस्य** गीताकर्णयितृसाधारण्येऽपि "दुहन्त्य" इत्यादिना अन्यपूर्वाणामेव प्रस्तुतत्वात्तास्वेव कासाञ्चित्प्रतिबन्धकथनोत्तरं मुक्त्या शङ्कामात्रनिवारणेऽपि प्रतिबन्धहेतुप्रश्नाभावेन तदुत्तराभावादेतदनाकारितत्वशङ्कासत्त्वे तादृशनादश्रवणवैयर्थ्यापरिहारेण लीलायां दोषप्रसक्तेः **ताइत्यस्य** वृत्तिसङ्कोचेन तत्परिहारएवेति बुध्यस्व. तर्हि प्रतिबन्धलीलायाः किं प्रयोजनमत आहुः **दोषेत्यादि.** एतासां च स्वरूपं तृतीयसुबोधिन्यां निरूपितं– "ब्रह्मणा कामेन शप्ता वाक् गोपिका" इति. तथा च शुक्रेण भयात् शप्तानां कंसादीनां यथा भयादेव प्राप्तिः तथात्र कामादिति तं दोषं निवारयितुं तथेत्यतो न कोऽपि शङ्कालेशः.

### लेखः

**ता दृष्ट्वेत्यत्र यास्तु समाहूता** इति, कुमारिका अन्तर्गृहगताश्चेत्यर्थः. अन्यपूर्वाव्यावर्तनाय **तुशब्दः**. कुमारिकाणामाह्वानं पूर्वं स्पष्टमेवोक्तम्. अन्तर्गृहगतानामेवाह्वाने संशय इति तदेव तथाशङ्क्य टिप्पण्यां व्युत्पादितम्. आहूतत्वाभावे कालप्रतिबद्धानामागमनं न भवेद्, अन्यपूर्वाणां तु कालप्रतिबन्धाभावादागमनं नानुपपन्नमिति भावः. कुमारिकाः पत्याद्यभावादेतद्वाक्यविषया न, तथान्तर्गृहगता अपीत्याहुष्टिप्पण्यां **गेहस्येति.** सुबोधिन्याम्

समागताः अन्यसम्बन्धिन्यः, ताः शब्दश्रवणात् समागता इति शब्देन निवारणीयाः, अन्यशेषतया भजनमयुक्तमिति, करिष्यमाणलीला तु सर्वभावप्रपत्तिसाध्या. अतो निवारणार्थं यत्नमाह **ता** "दुहन्त्य" इत्याद्याः. **अन्तिकमायाता दृष्ट्वा** स्वार्थमेवागता इति निश्चित्य, **भगवान्** सर्वज्ञः सर्वसमर्थोऽपि, ता अपि **व्रजयोषितः** [1]अपावृताः स्वकीयाश्च. अतः सर्वानुपपत्तिरहिता अपि दृष्ट्वा **अवदद्** [2]धर्मप्रबोधनार्थं वक्ष्यमाणमुक्तवान्.

---

## टिप्पणी

भवति तावद्गुणसम्पन्ना, अन्यत्र विवाहतो रसशास्त्रोक्त-रसविशेषोपयोगि-गुणवत्यश्च याः समागतास्ता अपि यद्यपि न निवारयितुं योग्यास्तथापि स्था-तुमशक्ताः सत्यः स्वतो नागताः किन्तु शब्दश्रवणे सति. तथा च तावानंशो निवारणीय इति शब्देनैव निवारणं कृतं, न तु हृदा. तदनङ्गीकारेण शब्दो-पाधिकमागमनं चेत् स्यान्निवृत्तिरपि स्यादिति तदभावो ज्ञाप्यत इत्याहु**र्याः पुनरि**त्यादिना. एवं करणे हेतुमाहु**रन्यशेषतये**ति. एतेन भक्तिमार्गमर्यादा ज्ञापितेति भावः. **अपावृता** इति, अन्तर्बहिर्विसंवादो नागरीणां कदाचिद् भवेदपि, न त्वेतासां, व्रजसम्बन्धेनान्तरधर्मावरणासम्भवात्. तथा चागमनं सर्वांशेनैव, नत्वन्यत्रापि केनाप्यंशेन हृदयं स्थापयित्वेति भावः. एतासां निवर्तने यावत्स्वसामर्थ्यमुपयुज्यते तावत्पूर्णमत्र प्रकटीकृतवान्प्रभुरिति ज्ञापनाय **भगवानि**त्यादीनि प्रभुविशेषणानीति ज्ञेयम्. तेन स्वामिनीभावस्य महाबलवत्त्वं ध्वन्यते. तेन भक्तिमार्गोत्कर्षएव सिध्यति. भावस्य भगवद्रूपत्वात्तदुत्कर्षएव

## प्रकाशः

**तदनङ्गीकारेणे**ति, इदं **तदभावो ज्ञाप्यत** इत्यनेन सम्बध्यते ॥१७॥

## लेखः

**अन्यशेषतये**ति. शब्दश्रवणेन भजने गीतस्यानङ्गवर्धनत्वकथनात्तज्जन्य-कामपूरणाय भजनं भवेत्, तथाच कामार्थत्वात् कामशेषतयेत्यर्थः. आह्वानेन समागमनं तु भगवदर्थकमेव भवतीति न तत्र कामार्थत्वशङ्केति भावः. **दृष्ट्वे**त्यस्य ज्ञानपरत्वमभिप्रेत्याहुः **निश्चित्ये**ति. **समर्थोऽपी**ति, पत्यादिभयरहित इत्यर्थः. एवं सत्यपि तथा कथने हेतुमाहुः **धर्मे**ति, अन्यशेषतया भजनम-

---

१. निरावरणाः. २. वस्तुतः सर्वात्मभावलक्षणो धर्मः.



ननु ताः पूर्वं निवार्यमाणाः समागताः कथमेतद्वाक्येन निवृत्ता भविष्यन्ति? अतो व्यर्थो वाक्प्रयास इति चेत्, तत्राह **वदतां श्रेष्ठ** इति. ये केचिद्वदन्ति तेषां मध्ये श्रेष्ठो, अतो हृदयगाम्यस्य वचनं भवति. अतो यावद्वचनेन निवृत्ता भवन्ति तावन्न कृतौ योजनीयाः. किञ्च अलौकिकमप्यस्य निवर्तने सामर्थ्यमस्ति, तदाह **वाचःपेशैर्विमोहयन्नि**ति. **वाचःपेशाः** वाक्सौन्दर्ययुक्ताः शब्दाः, तै**र्विशेषे**ण **मोहयन्.** अथवा ता दृढीकर्तुमेव सम्यक् मोहनार्थं निषेधवाक्यान्युक्तवान्, अन्यथा गच्छेयुरेव. अतः अर्थतो निवारयन् अपि पर्यवसानतो न निवारयति ॥१७॥

भगवद्वाक्यान्याह **स्वागतमि**त्यादिदशभिः दशविधानां निवारकाणि.

---

## टिप्पणी

एवमपि पर्यवस्यतीति हृदयमाचार्याणाम्. नन्वत्र मोहने विशेष उक्तोऽन्यथा "मोहिता" इत्युक्तत्वेन पौनरुक्त्यं स्यात्. तथा च पूर्वस्मादाधिक्यस्य 'विशेष'पदार्थत्वात्पूर्वस्य च भगवद्विषयकस्यैव तस्योक्तत्वात्तद्गतएव विशेषो वक्तुं युक्तो नतु गृहादिविषयकस्य पूर्वमसत्त्वादित्यरुच्या पक्षान्तरमाहुः **अथवे**ति, स्थूणानिखननन्यायेनेति भावः. न च भगवद्विषयकमोहाद्विशेषो वक्तुं शक्य, असम्भवात्, तथा सति गच्छेयुश्चेत्याहुः **अन्यथे**ति. ननु 'तच्'-छब्देन सर्वत्याग-सर्वात्मभावाद्युक्तधर्मपरामर्शात्तस्य स्वतएव दृढत्वात्तथा सत्युभयविशेषणकथन-प्रयोजनाभावाच्च नैतत्साधीय इति चेत्, सत्यम्. उक्तानुपपत्त्या प्रभुणा स्ववाक्यानां गमनार्थकत्वाबोधनाच्चाद्यएव पक्षे तात्पर्यमस्तीति यद्यपि ज्ञायते तथापि स्वरूपस्य रसरूपत्वेन भावात्मकत्वं यदुच्यते तत्तु तद्विरोधिवचनाविर्भावेनानुपपन्नमिति शङ्कानिरासाय तद-विरोध्यर्थकत्वमप्युच्यते वाक्यानां तात्पर्यविषयत्वेन. एतदेवाहु**रतोऽर्थत** इत्यादिना. यतः स्थितावेव भगवत्तात्पर्य**मतो** हेतोरापाततः प्रतीयमा**नार्थ-**प्रत्यायना**न्निवारयन्नपि** फलतः स्थित्यर्थकानीत्यप्युच्यन्त इत्यर्थः ॥१७॥

भगवद्वाक्यसंख्यातात्पर्यमाहुः **दशविधानामि**ति. सगुणनिर्गुणभेदेन

## लेखः

युक्तमिति भक्तिमार्गीयधर्मज्ञापनार्थमित्यर्थः. **पेश**शब्दस्य अर्शआद्य-जन्तत्वमभिप्रेत्याहुः **सौन्दर्ययुक्ताः शब्दा** इति ॥१७॥

तमोरजःसत्त्वभेदाः स्वान्तपर्यवसानतः ।
निरूप्यन्ते स्त्रियस्तासु वाक्यान्यपि यथायथम् ॥(१२)॥

**टिप्पणी**

दशविधानां तथा, नत्वेतासामिति भावः. एतासां वस्तुतो निर्गुणत्वेऽपि लीलारूपत्वेन प्रसक्त्यभावेन तदभावोपि न वक्तुं शक्य इति तथा. तर्हि निषेधस्य क्वोपयोगः ? क्षुब्धदध्नो नवनीतस्येव क्षोभकवाक्यैस्तथाभूताभ्यो हार्दप्रकटने प्रभुशुश्रूषापूर्तौ वाचनिक्या अपि प्रपत्तेः सिद्धौ लोके सर्वात्मभावमार्गप्राकट्ये चोत्कटभावोद्दीपने रसपोषादिषु चेति बुध्यस्व. एतासु नायिकाभेदेन भावभेदो बोधनीयः, ते च क्वचिदेकरूपाः, क्वचित्कदाचिन्मिश्राः, क्वचित्कदाचिदुत्तरेणोपमर्दिताः, केचित् चिच्चिरं स्थिराः, केचित्कश्चित्कालं, केचिदाशु नाशिन इत्येवंरूपत्वं सत्त्वादिगुणेष्वस्तीति तद्दृष्टान्तेन बोधयितुं तावद्भिः श्लोकैरेता निवार्यन्त इत्याशयेनाहुः **तमो रज** इत्यादि. तथा सत्युपचारेण भावा एव **तम**आदिशब्दैरुच्यन्ते. तथा च तेषां **भेदा** यत्रैतादृश्यस्ता **निरूप्यन्त** इति सम्बन्धः. वस्तुतस्तु लीलामध्यस्थाः

**प्रकाशः**

**स्वागतमि**त्यादिसङ्ख्यातात्पर्यं टिप्पण्याम्. एतासां कुतो न निवारकाणीत्याशङ्कायां गुणप्रसक्त्यभावो न निवारणायोग्यत्वादित्याशयेनाहुः **एतासामि**त्यादि. **क्वे**ति. यदि तादृश्यः स्युः, गच्छेयुः अतो न. तथा सति स्थापनार्थो निषेधः तदा पिष्टपेषः, यदि गमनार्थः तदा रसरूपत्वहा-निर्वाक्यवैयर्थ्यं चेति न क्वाप्युपयोग इति प्रश्नबीजम्. **उपचारेणे**ति, सारूप्यनिबन्धनया गौण्या. तथा च यथा भगवान् "अप्राणो ह्यमनाः" इति श्रुत्या प्राणादिरहितोऽपि "आनीदवातं स्वधया तदेकं" "प्राणन्नेव प्राणो

**कारिकार्थः**

**स्वागतं वो महाभागा** इत्यत्र **तमोरज**इत्यादि. **तमोरजःसत्त्वानां भेदा** यत्र तादृश्यः **स्त्रियो निरूप्यन्ते. स्वान्तपर्यवसानत** इति, तमसः फलं लयः, रजसः फलं भावविशेषोत्पादनं, सत्त्वस्य फलं तस्य भावस्य पालनम्. तथा च **स्वस्य** तमआदे**रन्तः** फलं तत्र गुणानां **पर्यवसानात्** तथा **निरूप्यन्त** इत्यर्थः. **तासु** सगुणनिर्गुणभेदेन दशविधासु स्त्रीषु मध्ये भगवद्**वाक्यान्यपि** "स्वागतं वो महाभागा" इत्यादीनि **यथायथं** यथोचितानीत्यर्थः (१२).



प्रथमतस्तामससात्त्विक्यो निवार्यन्ते, ततस्तामसराजस्यः, ततस्ताम-सतामस्यः, एवमग्रेऽपि विभाज्याः. प्रथमं समागतानां लौकिकन्यायेनाह.

**॥ श्रीभगवानुवाच ॥**

**स्वागतं वो महाभागाः प्रियं किं करवाणि वः ।**
**व्रजस्यानामयं कच्चित् ब्रूतागमनकारणम् ॥१८॥**

**स्वागतमि**ति. कुशलप्रश्नोऽयं– **वो** युष्माकमागमनं **स्वागतं किमि**ति? स्तुतिमाह **महाभागा** इति, भवतीनां महद्भाग्यम्, अतः स्वागमनमेव, तथापि पृच्छय(च्छ्य!)त इति लोकोक्तिः. वस्तुतस्तु निष्प्रत्यूहं भगवत्सामीप्यमागता इति. समागतानामुपचारमाह **प्रियं किं करवाणि व** इति. किञ्चित्प्रार्थयितुमागता इति लक्ष्यन्ते, तथा सति तद्वक्तव्यम्. अर्थाद्

**टिप्पणी**

सत्त्वादयः प्राकृतेभ्यस्तेभ्यो भिन्ना एतासु सन्ति. यतः प्रभुसंगमविलम्बहेतोर्लयं कर्तुं प्रिये स्वसंगविलम्बासहिष्णुत्व-हेतुभूतभावमुत्पादयितुमेतस्यैव पालनेन स्थैर्यं कर्तुं च समर्थाः. अतएवादौ **तम** एवोक्तं, ततो रजस्ततः सत्त्वम्. एतदेवाहुः **स्वान्ते**ति, **स्वस्य** तमआदे**रन्तः** फलं लयादि. उक्तरीत्यैतद्गुणानां तत्र पर्यवसानात्तथा निरूप्यन्त इत्यर्थः (१२). **प्रियं किमि**त्यत्र, **अर्थादितासामि**ति, स्वातिरिक्तस्य प्रश्नविषयीकरणादिति भावः. किञ्च.

**प्रकाशः**

भवति वदन्वागि"त्यादिश्रुत्या तत्कारी श्राव्यते, तथा "रसो वै स" इति रसतया श्रावितो मानसीनो भावान् स्वात्मकानेवैवं तत्र तत्र विभजन् स्वं रूपं स्वदासेष्वाविष्करोतीति भावः. एवं यद्यपि श्रौतप्रक्रियया सर्वसिद्धिः तथापि श्रीभागवतस्य पुराणत्वेनात्र तत्प्रक्रियैव ज्यायसीत्याशयेनाहुः **वस्तुत** इत्यादि. जन्मप्रकरणे "तमद्भुतमि"त्यत्र "आत्मा कार्यं च भूतानी"ति कारिकायां ये गुणा भगवदात्मका उक्ताः त एत एतत्कार्यका इत्याशयः. एवं विवरणे**नान्त**पदवैयर्थ्यं परिहृतम्. तामससात्त्विकीत्यादिविभागश्चोप-पादितः. एवञ्च भेदस्मृतिप्रतिपन्ना मायिकाः सदंशा वा, अभेदश्रुतिप्रतिपन्नाः सदंशाश्चिदंशा वा, एते त्वानन्दांशा इति बोध्यम् ॥१८-१९॥

**लेखः**

**स्वागतमि**त्यत्र. **भगवत्सामीप्यमि**ति अर्श आद्यच्, सामीप्ययुक्तं

एतासां नाहं स्वभावतः प्रियः किन्तु कामतः प्रिय इति ज्ञापितम्. तत्प्रयोजनं त्रिविधं भवति– इष्टरूपमनिष्टनिवृत्तिरूपं देशकालव्यवहितं कामितं च. तत्रापि त्रैविध्यमस्तीति वाक्यत्रयं वा. यद्भवत्यो धावन्त्यः समागताः तत्र किं व्रजे कश्चन उपद्रवो जातः, यद् ज्ञापयितुं तेषां समागमनम्? पूर्वपूर्वानङ्गीकारे उत्तरोत्तरवाक्यम्. यदि प्रियमपि न किञ्चित्कर्तव्यं, व्रजे च न काप्यनुपपत्तिः, तदा **आगमनकारणं ब्रूत** ॥१८॥

तत्राप्यनुत्तरे स्वयमेव पक्षान्तरं कल्पयति. यथा भवन्तः समागताः तथा वयमपीत्याशङ्क्याह **रजनी**ति.

**रजन्येषा घोररूपा घोरसत्त्वनिषेविता ।**
**प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥१९॥**

एषा रजनी न तु दिनं, दिवस एव ह्यरण्ये कार्यार्थं गम्यते. अयं

## टिप्पणी

प्रियस्यानेकविधत्वे हि तेषां मध्ये **किं करवाणी**ति प्रश्नः संगच्छते. तेन तदनेकविधत्वं विवृण्वन्ति **तत्प्रयोजनमि**त्यादिना. देशादिव्यवहितत्वमेवेष्टात् कामिते विशेषः. **व** इत्येकेनैव चारितार्थ्ये द्वितीयप(पा!)देऽपि तदुक्तेर्भिन्न-विषयकत्वं तस्यावगम्यत इत्याशयेन पक्षान्तरमाहु**स्तत्रापी**ति. स्वामिनीष्व-प्युक्तरूपसत्त्वादिभिस्तथात्वमस्तीत्येकैकविधाः प्रत्येकैकचरण[1] इत्यर्थः ॥१८॥

## लेखः

देशमागता इत्यर्थः. **तत्रापि त्रैविध्यमि**ति. एतास्तामससात्त्विक्यः. तत्र तमो न्यूनं सत्त्वमधिकं, सत्त्वं न्यूनं तमोऽधिकम्, उभयोः साम्यं चेत्यर्थः ॥१८॥

## योजना

**व्रजस्यानामयमि**त्यत्र **यज्ज्ञापयितुं तेषां समागमनमि**ति, **तेषां** भवत्पित्रादीनामित्यर्थः. भगवन्निकटे समागता व्रजसुन्दरीः प्रतीयं भगवत उक्तिः. तथा च व्रजोपद्रवसूचनाय भवत्पित्रादीनां पुरुषाणामागमनं सम्भावितं, तत्तेषामनागमनं भवतीनामागमनं महान्तमुपद्रवं सूचयति, स वक्तव्य इति भावः ॥१८॥

**रजन्येषे**त्यस्य विवृतौ **एषा रजनी नतु दिनमि**ति. अयमर्थः. एतासां

१. प्रत्येकैकश्चरणः मू. पा.



तु चन्द्रः न तु सूर्य इति भावः. नन्वस्तु रजनी, तथापि प्रकाशस्य विद्यमानत्वाद् आगन्तव्यमेवेति चेत्, तत्राह **घोररूपे**ति, प्रकाशयुक्ताप्येषा वस्तुतो **घोररूपा** भयजनिका, प्रकाशयुक्तायामपि रात्रौ गच्छन् पुरुषो बिभेतीति. किञ्च **घोरसत्त्वनिषेविता** घोराण्येव सत्त्वानि रात्रिं निषेवन्ते, नत्वघोराणि. अतो रात्रौ अघोरो निर्गतो घोरैरुपहन्यते. अतः स्वभाव-धर्म-संसर्गिणां स्वरूपं ज्ञात्वा **व्रजं प्रतियात.** नन्वेवं सति तवैव स्थाने स्थास्यामः, परिचितो भवानिति चेत्, तत्राह **नेह स्थेयं स्त्रीभिरि**ति. वयं हि पुरुषाः रात्रिश्चेयम्, अतोऽत्र स्त्रीभिर्न स्थातव्यम्, तथा सत्युभयोरपि विक्रिया स्यात्. किञ्च भवत्यो यदि वृद्धा बाला वा भवेयुः तदा स्थीयेतापि, भवत्यस्तु **सुमध्यमाः** रसात्मिकाः. अतो देहाध्यासे विद्यमाने सर्वथैव गन्तव्यम्. स्थितिपक्षे नञ्प्रश्लेषो **घोर**पदयोर्ज्ञेयः, **न प्रतियाते**ति च ॥१९॥

## लेखः

**रजन्येषे**त्यत्र. रजनीत्वस्यानुक्तसिद्धत्वेऽपि तथोक्तौ हेतुमाहुः **अयं त्वि**ति. भवतीनां तापजनकत्वेन तथा प्रतीतावपि नायं सूर्य इत्यर्थः. तथा चैवं कथनेन तासां तापो भगवता ज्ञायते इति बोधितम्. **अतः स्वभावे**ति, **स्वभावतो** रजनी, घोरत्वं **धर्मः, संसर्गिणो**ऽपि घोरा इति पदत्रयार्थः ॥१९॥

## योजना

रात्रीणामलौकिकत्वाद्दिवापि सत्त्वेन हेमन्तर्तौ प्रातःसमये "मयेमा रंस्यथ क्षपा" इत्युक्त्वा रात्रयः प्रदर्शिताः; परन्तु साधनप्रकरणत्वाद्दिवा प्रदर्शनम्. तेन रमणं नाभूत्, यतो लौकिकरात्रावेवालौकिकरात्र्यारोपे रमणं भवति. तदत्र लौकिकरात्रावेवालौकिकरात्रीणां सत्त्वाद्रमणं भविष्यत्यतोऽत्रैव स्थातव्यं, गृहे न गन्तव्यम्– एवं स्थितिपक्षः पोषितः. तदेतदुक्तं **एषा रजनी, नतु दिनमि**ति. **एषाधिकरणरूपा** लौकिकी **रजनी,** एतस्यामलौकिक्या आरोपः. अत एव **घोरसत्त्वनिषेविते**ति विशेषणम्. वस्त्रहरणप्रसंगे तु अधिकरणभूतं दिनं स्थितमिति अलौकिकरात्रीणां विद्यमानत्वेऽपि रमणं नाभूत्, साम्प्रतं तु रात्रावेवालौकिकरात्रीणां विद्यमानत्वाद्रमणं भविष्यतीति भगवदाशयः. **अयं चन्द्रः न तु सूर्य इती**ति, भवतीनां मत्संगमार्तिवशात्संतापकत्वेन दिवाकरवत्प्रतीयमानोऽपि चन्द्र एवेति भावः ॥१९॥

अथ वयमभिसारिका एव त्वामुद्दिश्य समागताः, किमिति प्रेष्यन्त इत्याशङ्क्याह **मातर** इति.

**मातरः पितरः पुत्रा भ्रातरः पतयश्च वः।**
**विचिन्वन्ति ह्यपश्यन्तो मा कृढ्वं बन्धुसाध्वसम् ॥२०॥**

भवतीनां **मातरो** नियामिकाः, तास्तु नागताः, अतो भवतीनामन्वेषणमपि करिष्यन्ति. अतस्तासां **साध्वसं** भयं **मा कृढ्वं** मा कुरुत. न च वक्तव्यं "ता अपि तथा स्त्रीत्वाद्वा नागमिष्यन्ती"ति, तत्राह **पितर** इति. तेषां कुले कलङ्कशङ्कया ते समागमिष्यन्त्येव. तर्हि तैः सह गन्तव्यमिति चेत्, तत्राह **विचिन्वन्ति ह्यपश्यन्त** इति. गोकुलान्निर्गतानां कृष्णस्थानागमने मध्ये बहवो मार्गाः स्फुटिताः सन्ति. तत्र भगवन्माया तिष्ठति, यथा न कोऽपि भगवत्समीपं गच्छति. अतो मार्गान्तरेणैव गताः **अपश्यन्तः** सन्तः **विचिन्वन्त्येव**. अनेन स्थितौ शङ्काभावोऽप्युक्तः. **बन्धुभ्यः साध्वसमि**ति च. तस्मात् सर्वा नागता इति नागन्तव्यम्. कुले च कलङ्को भविष्यतीति च. न च तेऽपि स्त्रीस्वभावं जानन्तीति नागमिष्यन्तीति चेद्, भगवदर्थं वा समागता इति, तत्राह **पुत्रा** इति. पुत्राणां सर्वथा रक्षकत्वं महती लज्जेति तेषु दयया भयाभावार्थं गन्तव्यम्. ननु ते बालका इति चेत्, तत्राह **भ्रातर**

**प्रकाशः**

सुबोधिन्यां **मातर** इत्यत्र. **सर्वा नागता इति नागन्तव्यमि**त्यनेन "काश्चित्कृष्णान्तिकमि"त्यत्र यथा शब्दपराणामदृढो भावः तथा युष्माकमपीत्यापादितं बोध्यम् ॥२०॥

**लेखः**

**मातर** इत्यत्र. **विचिन्वन्ति ह्यपश्यन्त** इति. हिशब्दस्यार्थमाहुः **गोकुलान्निर्गतानामि**ति. अतो युक्तमेवादर्शनं तेषामिति भावः ॥२०॥

**योजना**

**मातरः पितरः पुत्रा** इत्यस्य विवरणे **न च वक्तव्यं ता अपि तथे**ति, **ताः** अस्मन्मातरो**ऽपि तथा** मुरलीनादमोहिताः, आगता अपि चेत् न किञ्चिद्बाधकमित्यर्थः. **स्त्रीत्वाद्वा नागमिष्यन्तीती**ति, मातरस्तु स्त्रीत्वान्नागमिष्यन्त्यतो वा न किञ्चिद् बाधकमित्यर्थः ॥२०॥



इति. ते हि समर्था अन्वेषणे लज्जावन्तश्च, अतो लज्जया अदृष्ट्वा कदाचित् शरीरमपि त्यजेयुः. अतो भ्रातृस्नेहाद्गन्तव्यम्. ननु ते अपकीर्तिभयादन्वेषणे न गमिष्यन्ति, तरुणास्ते, तरुण्यो वयमिति चेत्, तत्राह **वः पत**य इति. तेषां भोगापेक्षाप्यस्ति, तेषामेव चायं रसः, अतः परस्वं नान्यस्मै देयम्. भोगस्य ततोऽपि सिद्धिः. सर्व **एवापश्यन्तः** गृहे अदृष्ट्वा अवश्यं **विचिन्वन्ति.** ततो बहुकालमदृष्ट्वा नाशशङ्कया अपहारशङ्कया च भयं प्राप्स्यन्ति. न च वक्तव्यं "किमस्माकं तैः?", तत्राह **बन्धुसाध्वसमि**ति, ते हि बान्धवाः, तैः सहैव स्थातव्यम्. अतो बलवद्बाधकस्य विद्यमानत्वात् व्याघुट्य गन्तव्यमिति ॥२०॥

एवमुक्ते परितो विलोकयन्तीराह **दृष्टं वनमि**ति.

**दृष्टं वनं कुसुमितं राकेशकररञ्जितम्।**
**यमुनानिललीलैजत्तरुपल्लवमण्डितम् ॥२१॥**

एषा हि राजसराजसी, अग्रिमा राजसतामसी. यदि वनदर्शनार्थमागतं तदा **दृष्टमेव वनम्** अतः "प्रतियाते"ति. अर्थात् सर्वदा **दृष्टमे**वैतद्**वनं,** नात्र भयमिति ज्ञापितं; गृहे च न गन्तव्यमिति. यदि गृहगमनापेक्षा, तदैव गन्तव्यमिति वचनात्. तच्च वनं **कुसुमितमि**ति वर्णयति, यथा

**टिप्पणी**

**भ्रातर** इत्यत्र. **अदृष्ट्वे**त्यादिना प्रासंगिको लोकस्थित्या प्राप्तोऽर्थ उक्तः ॥२०॥

**दृष्टं वनमि**त्यत्राप्युक्ता गुणाः पूर्वोक्ता ज्ञेयाः. स्थितिपक्षे **गृहे न गन्तव्यमि**ति यदुक्तं तत्र हेतुमाहु**र्यदि गृहगमने**त्यादि. सर्वं त्यक्त्वा वनं प्रविष्टस्य तदपेक्षायामेव प्रायश्चित्तं कृत्वा तत्र गमनं स्मृतिवचनेन बोध्यते यत इत्यर्थः. प्रकृते तदभावान्न गन्तव्यमेवेति भावः ॥२१॥

**प्रकाशः**

**दृष्टं वनमि**त्यत्र. **परितो विलोकयन्तीरि**त्यनेन भावादार्ढ्यनिर्णायकमापादितं बोध्यम्. **अग्रिमे**त्यादिना शिष्टभेदस्य राजससात्त्विकत्वं बोधितम्. **वनं तामसमि**त्यादिना राजसराजसेष्ववान्तरभेदः सूचितः. तेन तुरीयपादे

**लेखः**

**दृष्टं वनमि**त्यत्र. **एषा हीति,** राजसराजस्या युक्ता वनदिदृक्षेति

तासामन्यासक्तिर्भवति. इदानीं पुष्पाण्येव जातानि, न फलानीति वा. कुसुमिते वने रतिः कर्तव्येति भावः. सर्वत्र मोहः प्रेषणं चानुस्यूतम्. किञ्च **राकेशस्य** चन्द्रमसः **करैः रञ्जितम्.** उद्दीपका एते— वनं तामसं, पुष्पाणि राजसानि, चन्द्रकिरणाः सात्त्विका इति. अयं **राकेश** इति पूर्णचन्द्रः, अतः पूर्णत्वे स्थातव्यं पर्वादिबुद्धौ तु गन्तव्यमिति. वायुमपि तत्रत्यं वर्णयति **यमुनेति. यमुना**सम्बन्धि**नानिलेन लीलया** ये **एजन्तः** कम्पमाना**स्तरुपल्लवा-स्तैर्मण्डितमि**ति, जलसम्बन्धात् – लीलया चलनात् – तरूणां सुगन्धानां

**प्रकाशः**

यमुनासम्बन्धाद्गुणातीतत्वमपि बोध्यम्. यद्यपि "वनं तु सात्त्विको वास" इत्येकादशे भगवता सात्त्विकत्वमुक्तं तथापि तन्मर्यादायां विषयसम्बन्धाभावेन वैराग्यपोषकत्वात् पुष्टौ तु रतिस्थानतया मोहकत्वाद्व**नं तामसमि**त्युक्तम्. अतएव यत्र न रतिस्थानत्वं तत्र न प्रविष्टं भक्तैरिति स्फुटमग्रिमाध्याये. **पर्वादिबुद्धावि**ति. ननु मर्यादामार्गेऽपि "नामावस्यायां च पौर्णमास्यां च स्त्रियमुपेयात्, यदुपेयान्निरिन्द्रियः स्यादि"ति श्रुतेः "पर्वाण्याद्याश्चतस्रश्च वर्जयेदि"त्यादिस्मृतेश्च पुरुषमधिकृत्यैव प्रवृत्तिदर्शनात्पुंसएव दोष इति ताः प्रत्येवं कथनमसम्भवीति चेत्, न, शास्त्रस्य पुरुषाधिकारकत्वेपि ज्योतिष्टोमादि-फलं यथोभयोः कर्मणि सहभावात्, "सहोभौ चरतां धर्ममि"त्यादिस्मृतेश्च, तथा प्रायश्चित्तादिस्मृत्यनुरोधान्निषिद्धफलस्यापि समानत्वादिति बुध्यस्व.

**योजना**

**दृष्टं वनं कुसुमितमि**त्यस्य विवृतौ **इदानीं पुष्पाण्येव जातानी**त्यादि, इदानीमुद्दीपनसामग्री जाता [१]रमणं न जातमिति रमणपूर्वसम्पत्तिः सर्वापि सिद्धेति **पुष्पाणि जातानि,** फलं तु रमणे सति भविष्यतीति रमणात्मकफलाप्तये अत्रैव स्थेयमिति भावः. **वनं तामसमि**ति, यद्यपि वृन्दावनं गुणातीतं, "मुनयश्चापि पक्षिण" इति वेणुगीताध्यायसुबोधिन्यां गुणातीतत्वमुक्तं, तथापि अधुना भोगैकोपयोगितया तामसत्वमेव. एवं सति ये कृतार्थीभवितुमुद्युक्ता भक्तास्तान्प्रति गुणातीतत्वम्, भगवदेकपरतासाधकत्वाद्, ये पुनः कृतार्था लीलासृष्टिस्था भगवता सह रन्तुकामास्तान्प्रति तादृग्भावजनकत्वेन तामसत्वमेवेति व्यवस्थयोभयमपि ॥२१॥

१. मद्दर्शनम् इति मुद्रितपाठः. मुं. वि. पाठः गृहीतः.



सम्बन्धात्, त्रिगुणो वायुरुक्तः. वर्णनायां रसोद्बोधके चोपयुज्यते ॥२१॥

एवं वनं वर्णयित्वा अन्यासक्तिमुत्पाद्य ततो गन्तव्यमित्याह **तद्यातेति**.

**तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन् सतीः।**
**क्रन्दन्ति वत्सा बालाश्च तान्पाययत दुह्यत ॥२२॥**

**तत्** तस्माद्वनं दृष्टमिति कार्यस्य सिद्धत्वाद् **यात.** एतादृशं वनमिति **मा याते**त्यपि ध्वनिः. **चिरं मा** विलम्बो न कर्तव्यः. **चिरं मा याते**ति च, न हि कश्चिद्भगवन्तं विहाय **गोष्ठं** गच्छति. किञ्च. **गोष्ठं यात** तत्र गवां शुश्रूषणमपि भवति. किञ्च तत्र गतानां धर्मः सिध्यतीत्याह **शुश्रूषध्वमि**ति. पतिसेवा स्त्रीणां धर्मः, तत्रापि भवत्यः **सतीः** सत्यः. पतिविशेषणं वा— पूर्वजन्मनि ताः पतिव्रताः स्त्रियः स्थिताः, पुरुषभावनया पुरुषा जाताः भवन्तश्च पुरुषाः विपरीता जाता इति. अग्रेऽपि वैपरीत्यं भविष्यतीति विचार्य गन्तव्यमिति भावः. धर्मस्तत्र, रसस्त्वत्रैवेति. **पतीनि**ति बहुवचनात् धर्माभावश्च. या भवतीनां मध्ये पतिव्रताः ता वा गच्छन्त्विति.

**टिप्पणी**

**पतीन् सतीरि**त्यत्र, द्वितीयाबहुवचनान्यथानुपपत्त्याहुः **पतिविशेषणं वे**ति. तथा च तेषामुपहासवचनमिदं भवति यतो लोकव्यवस्थैतादृशीति तामुक्तवन्तः **पूर्वजन्मनी**त्यादिना. **भवन्तश्चे**ति जायमाना इत्यर्थः ॥२२॥

**प्रकाशः**

**वर्णनायामि**ति, एतन्निरूपणस्य वर्णनाङ्गत्वात्तथेति भावः. **रसोद्बोधक** इति भावप्रधानः. प्रमदादाविति वा, श्रमादिनिवारकत्वादिति ॥२१॥

**तद्यात मे**त्यत्र. **भवन्तश्च पुरुषा** इत्यनेन एतासां श्रुतिरूपाभ्योऽपि भेदो बोधित इति प्रतिभाति ॥२२॥

**लेखः**

**हि**शब्दः. अग्रे **रसोद्बोधके** इति, **रसोद्बोधके** गन्धे तदानेतृत्वेन वायु**रुपयुज्यत** इत्यर्थः ॥२१॥

**तद्यातेत्यत्र. किञ्चे**ति. वनस्य दृष्टत्वा**द्याते**ति पूर्वाः प्रतिवाक्येऽन्वयः. एतस्यैवाग्रेऽप्यन्वय इत्याशयेन शुश्रूषार्थं धर्मार्थं च यातेति प्रयोजनसमुच्चयः. **वैपरीत्यमि**ति, भवतीनां गमने स्त्रीभावनया ते स्त्रियो भविष्यन्तीत्यर्थः. **धर्मस्तत्रे**ति, **शुश्रूषध्वमि**त्यस्यार्थोऽयम् ॥२२॥

सर्वासामेवातथात्वे न गन्तव्यमेवेति. न हि पतिव्रताः समायान्ति लौकिकधर्मपरायणाः. अतो भगवद्वाक्यं रसालत्वात् तदभावमेव सूचयति. किञ्च **वत्सास्तथैव** बद्धाः **बालाश्च** क्षुधिताः, ते **क्रन्दन्ति.** अतस्तेषां रोदननिवृत्त्यर्थं **तान् पाययत** स्तनं **दुह्यत च** गाः. परार्थं च भवतीनां जीवनं, न स्वार्थम्. अतो दुःखितानां स्थाने सुखाकाङ्क्षिभिर्न गन्तव्यमिति ॥२२॥

एवमुक्ते याः स्निग्धदृष्टयो जाताः ताः प्रत्याह **अथवेति.**

**अथवा मदभिस्नेहाद्भवत्यो यन्त्रिताशयाः ।**
**आगता ह्युपपन्नं तत् प्रीयन्ते मम जन्तवः ॥२३॥**

मया वृथैवैते पक्षाः कल्पिताः, वस्तुतस्तु मां द्रष्टुमेवागताः स्नेहात्, सिद्धान्तोऽयं पूर्वपक्षार्थमनूद्यते. [१]निरुक्तो भावो गुणात्मको दोषात्मको वा न फलं प्रयच्छति, लौकिको भवति, अतः अनूद्यते. **मयि** योऽयम**भितः स्नेहः** सर्वभावेन तेन कृत्वा **यन्त्रितः आशयो** यासां, तादृश्यश्चे**द्भवत्यः** इहागताः,

### प्रकाशः

**अथ वे**त्यत्र. ननु सिद्धान्तस्य दूषणानर्हत्वात्कथं पूर्वपक्षार्थमनुवाद इत्यत आहुः **निरुक्त** इत्यादि, स्नेहात्सर्वत्यागपूर्वकागमनरूपः **भावः** भगवत्त्वेन कामपूरकतां गाहमानो **गुणात्मकः** जारत्वसङ्कीर्णतया तां गाहमानो **दोषात्मक** इति **फलं** भगवदात्मकं **न प्रयच्छति,** तत्र हेतु**र्लौकिको भवति.** अतस्तदुभयरूपतां तत्रापाद्य पूर्वपक्षीक्रियत इत्यतोऽनुवाद इत्यर्थः.

### लेखः

**अथवे**त्यत्र. **स्नेहादि**ति, **स्नेहाद्** हेतो**रयं सिद्धान्त**एव भवति तथापि **पूर्वपक्षत्वार्थम**नुवादः क्रियत इत्यर्थः. **निरुक्त** इति, सर्वोऽपि भावो मुखत उक्तः फलासाधको, यतो **लौकिको** लोके प्रकटो **भवति.** इदं साधारण्ये- नेत्याहु**र्गुणे**ति **दोषे**ति. रसस्य शब्दवाच्यत्वे रसत्वहानिः, "धर्मः क्षरति कीर्तनात्". दोषेऽपि "स्वदोषमुच्चैः कथयन् परिभ्रमेदि"त्यादिप्रायश्चित्तम्. अतः सर्वोऽपि निरुक्तः सन् लौकिकत्वात् फलासाधको भवति. अतो गृहगमनाज्ञापनेन तासामिवैतस्यापि स्थूणाखननन्यायेन दाढर्यार्थं लौकिकत्वमनुवादेन सम्पाद्यते पूर्वपक्षे इत्यर्थः. एतस्य स्वयमेव फलत्वात् फलाजनकत्वमभिमतमेवेति भावः ॥२३॥

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्.



**तदुपपन्नमे**व. तर्हि को विलम्ब इति चेत्, तत्राह **प्रीयन्ते मम जन्तव** इति, **मम** सम्बन्धिनः सर्व एव **जन्तवः** स्वयमेव प्रीता भवन्ति, न तु मया किञ्चित्कर्तव्यम्. स्नेह एव मयि, न तु कृतिरिति. ततः साधारणमिममर्थं ज्ञात्वा प्रतियात. स्थितिपक्षे तु स्पष्ट एवार्थः. "तद्यात मे"ति फलिष्यति. न हि **स्नेहादा**गतः प्रेर्यमाणोऽपि गच्छति. **यन्त्रितो** वशीकृतः, अन्तःकरणे अन्याधीने जाते न किञ्चिदवशिष्यते. निष्कपटा च प्रीतिः कर्तव्येत्युभयत्र भावः ॥२३॥

एवं राजसीः निरूप्य सात्त्विकीर्निरूपयति. सत्त्वयुक्ताः निरूप्यन्ते. ततो रजोयुक्ताः. स्त्रीणां मुख्यो धर्मः भर्तृशुश्रूणमित्याह **भर्तुरिति.**

### प्रकाशः

**तर्ही**ति, यद्येवं भावेनागमनं युक्तं तर्हि "ये यथा मामि"ति प्रतिज्ञा पालनीयेत्यर्थः. नन्वेवं सति प्रतिज्ञायाः कथं सिद्धिरित्यत आहुः **स्नेह एवे**त्यादि, ये मां निरुपधिस्नेहेन भजन्ते तेष्वहं तथैव स्निह्यामीत्येतावतैव प्रतिज्ञासिद्धिः, कृतिस्त्वशक्या, नमनादीनां जीवधर्मत्वादित्यर्थः. **साधारणमि**ति सर्वत्रैवम्, न तु भवतीष्वेवेत्यर्थः. स्थितिपक्ष उपपन्नत्वं व्युत्पादयन्ति **न ही**त्यादि. फलितमर्थमुपदेशार्थमाहुः **निःकपटे**त्यादि. **उभयत्रे**ति पक्षद्वयेऽपीत्यर्थः ॥२३॥

### लेखः

**भर्तुरि**त्यत्र. **सात्त्विकीर्निरूपयती**ति, त्रिभिः श्लोकैरिति शेषः. तत्रावान्तरभेदमाहुः **सत्त्वयुक्ता** इति. अवशेषात्तृतीयेन तमोयुक्ता इति ज्ञेयम्. **निरूप्य निरूप्यन्ते निरूपयती**त्यत्र वाक्यानीति शेषः, कथनार्थकधातूनां

### योजना

**अथवा मदभिस्नेहादि**त्यत्र **निरुक्तो भावो गुणात्मको दोषात्मको वा न फलं प्रयच्छती**ति. **गुणात्मक** इति दानादिरूपो धर्मः स्वमुखेन कथितश्चेत् फलदानसमर्थो न भवति. अतएव भगवतोद्धवं प्रत्युक्तं "कृतस्यापरिकीर्तनमि"ति. "धर्मः क्षरति कीर्तनादि"तिवाक्यात् फलदत्वं तस्य नश्यति. एवं दुष्कर्मापि कृतं पुनः कथ्यते तदा क्षीणं भवति. पूर्वोक्ताः पक्षा भवतीनामागमने मया कल्पिताः, वस्तुतस्तु मद्दर्शनार्थमेवागतं भवतीभिः, परन्तु क्षरणभयाद्भवतीभिर्न कथ्यत इति भावः ॥२३॥

**भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया ।**
**तद्बन्धूनां च कल्याण्यः प्रजानां चानुपोषणम् ॥२४॥**

स्वभावतो जीवानां भगवानेव भर्ता, तत्रापि **स्त्रीणां** स्त्रीशरीरं प्राप्तानां व्यभिचाराभावाय भगवानेव सेव्यः. लौकिके तु परिग्रहात् भर्तृत्वेनाभिमतः सेव्यः. सएव **परो धर्मः.** तत्राप्य**मायया** कापट्ये तु न सेवायां फलम्. अन्ये सर्वे धर्मा अवराः. **तद्बन्धूनां** श्वशुरादीनाम्. **कल्याण्य** इति सम्बोधनाद् भवतीनां सर्वेऽपि सन्तीति ज्ञापितम्. **प्रजानां च** पुत्रादीना**मनुपोषणम्** अन्नादिदानेन स्तनादिदानेन च. पित्रादिभिः पोष्यमाणानां स्वतोऽपि पोषणं वा ॥२४॥

तथापि स पतिः समीचीनो न भवतीति चेत्, तत्राह **दुःशील** इति.

**दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा ।**
**पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥२५॥**

दुष्टं शीलं यस्य, द्यूतादिदुर्व्यसनवान्. **दुर्भगो** दरिद्रः. **वृद्धः** इन्द्रियविकलः. **जडो** मूर्खः. **रोगी** महारोगग्रस्तः. **अधनो वा,** अधनोऽपि भाग्यवाँश्चेत् तदा संभावनया स्त्रीभिर्न त्यज्यते. एवं षड्दोषयुक्तोऽपि **स्त्रीभि**रनन्यगतिकाभिः **पतिर्न हातव्यः.** स्पष्टएव विरोधः— षड्गुणो

## टिप्पणी

**भर्तुरि**त्यत्र. **स्त्रीणामि**ति बहुवचनेन **भर्तुरि**त्येकवचनेन च सर्वासां य एको भर्ता तत्सेवाविधानाद् भगवतएव तथात्वाद् [१]भजनमेव विहितं क्रियत इत्याशयेन स्थितिपक्षार्थमाहुः **स्वभावतो जीवानामि**त्यादिना. अत्र **बन्धु-प्रजाशब्दाभ्यां** तत्सखीभावपरम्परे उच्येते ॥२४॥

**दुःशील** इत्यादिना क्रमेण यशऐश्वर्यवीर्यज्ञानवैराग्यश्रीविरुद्धा धर्मा

## प्रकाशः

**दुःशील** इत्यत्र. **अधनो**ऽपीत्यादिना मूलस्थो**ऽपि**शब्दो व्याख्यातो ज्ञेयः ॥२५॥

## लेखः

द्विकर्मकत्वादिति ज्ञेयम्. तथा च सात्त्विकीः प्रति वाक्यानि निरूपयति ॥२४॥

१. तद्भजनमेव मू. पा.



भगवान्, षड्दोषः स इति. पातकी तु हातव्य एव, "भजेदपतितं पतिमि"ति वाक्यात्. किञ्च तत्रापि **लोकेप्सुभिः** येषामिहलोके परलोके च कीर्त्याद्यपेक्षा तैर्न **हातव्य**एव, अन्यथा अपकीर्तिर्भवेत् ॥२५॥

ननु कामरसे निविष्टमनसां न धर्मो बाधकः, परस्मिन्नेव रसोत्पत्तिरिति, तत्राह **अस्वर्ग्यमि**ति.

**अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहम् ।**
**जुगुप्सितं च सर्वत्र ह्यौपपत्यं कुलस्त्रियः ॥२६॥**

हे **कुलस्त्रियः, औपपत्यं** जारसम्बन्धः तद्रसालमपि बहुदोषग्रस्तम्. तत्रत्यान् षड्दोषानाह. **अस्वर्ग्यं** परलोकनाशकं, पूर्वं धर्मेण सिद्धोऽपि स्वर्गः तस्मिन् अपगच्छति. किञ्च इहलोकेऽपि यशो दूरीकरोति. **च**कारात् नरकोऽपि. नापि तत्र रसभोगो महानित्याह **फल्गि**वति, अल्पमेव तत्सुखं क्षणमात्रसाध्यं, स्वरूपतो महदपि कालतः परिच्छिन्नमपि. **कृच्छ्रमि**ति कष्टसाध्यम्, नाल्पेन प्रयासेन सिध्यति. अतो बलवदनिष्टानुबन्धि. किञ्च अनुभवकालेऽपि न रसमुत्पादयति, यतो भयजनकम्. शृङ्गारविरोधी भयानकरसः. अतएव 'व्यभिचार'शब्दवाच्यः. मुख्यतया भयानकरसमुत्पादयेत् विशेषतः प्रथमतः. किञ्च **सर्वत्रैव जुगुप्सितं** सर्वदेशेषु सर्वकालेषु तत्कृत्वा यदि सत्कर्मापि कुर्यात्, ततोऽपि जुगुप्सितो भवेत्. धर्मबुद्धिस्तत्र विचिकित्सैव भवति. अतो बहुदोषग्रस्तत्वात् उत्तमाया नैतद्युक्तम् ॥२६॥

## टिप्पणी

उक्ता इत्याशयेनाहुः **षड्दोषः स इती**ति. स्थितिपक्षे स्वतोऽपि धर्मी दुष्ट इति पातकसम्बन्धोक्त्या ज्ञाप्यते. कदाचित्त्याज्यत्वेन नित्यमभजनीय इत्यपि तथा ॥२५॥

**अस्वर्ग्यमि**त्यत्र, उपपतिसम्बन्धे दोषोक्त्या प्रभोश्च सहजपतित्वेन स्पष्टः स्थितिपक्षः. कुलसम्बन्धाभिमानवतीनामुक्त्या तत्र[१] तदभावादपि तथा ॥२६॥

## लेखः

**अस्वर्ग्यमि**त्यत्र. **धर्मबुद्धिरि**ति, धर्मवत्त्वेन ज्ञानं संशयात्मकं भवतीत्यर्थः ॥२६॥

१. मुक्त्यात्र मू. पा.

एवं सगुणाः प्रबोध्य गुणातीताः प्रबोधयति **श्रवणादिति**.

**श्रवणाद्दर्शनाद्ध्यानान्मयि भावोऽनुकीर्तनात् ।**
**न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥२७॥**

ननु लौकिकदृष्टावेते दोषाः, न तु भक्तिमार्गे परमार्थदृष्टौ वा, भवांस्तु पुरुषोत्तम इति चेत्, तत्राह **श्रवणादिति**. न हि भक्तिमार्गे सम्बन्ध एव कर्तव्य इति शास्त्रमस्ति. भक्तिर्हि नवविधा श्रवणादिरूपा प्रेमरूपा च. स्वतन्त्रपक्षे तु सुतरामेव नापेक्षा. स्नेहस्तु भगवद्विषयकोः अलौकिकः. स एव सर्वाधिको भवति, लौकिकस्तु कामशेषतां प्राप्तः हीनएव भवति. तस्यालौकिकस्य कारणानि त्रीणि– श्रवणं दर्शनं ध्यानमिति. आदौ **श्रवणं** भगवद्वाचकानां पदवाक्यानां भगवति शक्तितात्पर्यावधारणम्. तथा सति [1]विषयो व्यावर्तितो भवति, अन्यथा अन्यत्रापि स्नेहः स्यात्. तदनु **दर्शनं** तदर्थस्यानुभवः कृपया भगवत्साक्षात्कारो वा भगवत्कामार्थः नारदादेरिव. ततो **ध्यानं** योगेन चिन्तनम्. एतैरेव **मयि भावो** भवति. स चोत्पन्नो भावः **अनुकीर्तनात्** स्थिरो भवति. यथायमुपायः शास्त्रीयः साधीयान्, **न तथा** निरन्तरसान्निध्येन जातो लौकिकः. स हि कामशेष इत्यवोचाम. अतो **गृहान् प्रतियात**. अतः परमार्थविचारेऽपि न स्थातव्यमिति. **तथे**त्यत्र प्रकारएव

### प्रकाशः

**श्रवणा**दित्यत्र. **भक्तिर्ही**त्यादि. तथा चैवं दशविधायामपि न [2]सम्बन्धापेक्षेत्यर्थः. **सुतरामि**ति, तत्रैव फलत्वस्य परिसमाप्तेस्तथेत्यर्थः. तदेव स्पष्टयन्ति **स्नेह** इत्यादिना. **तदर्थस्यानुभव** इति मानसः परोक्षानुभवः निदिध्यासनं वा. एतयो'र्दर्शन'शब्दानभिधेयत्वात् पक्षान्तरमाहुः **कृपये**त्यादि. स्थितिपक्षं स्पष्टयन्ति **तथे**त्यादिना. तथा च स प्रकारान्तरापन्नः, अयं तु

### योजना

**श्रवणाद्दर्शनादि**त्यत्र **भगवत्साक्षात्कारो वा भगवत्कामार्थ** इति, भगवद्विषयककामोत्पादनार्थं भगवद्दत्तः साक्षात्कारो **दर्शन**शब्दवाच्य इत्यर्थः. तत्र दृष्टान्तः **नारदादेरिवे**ति– नारदस्य भगवता स्वदर्शनं सम्पादितं स्वविषयककामोत्पत्त्यर्थम्, "सकृद्यद्दर्शितं रूपमेतत्कामाय तेऽनघे"ति-वाक्यात्तद्वदित्यर्थः ॥२७॥

१. संसारः. २. सख्यादिषु वन्दनादिषु एतादृशसम्बन्धापेक्षाऽथवा श्रवणादिशक्तिसङ्कोचः.



निषिद्धः, न स्वरूपतो महत्त्वं निषिद्धम्. गृहस्थितानां च विहितं भवतीति गृहेगमनमाज्ञापितम् ॥२७॥

एवं तासां गृहगमने बोधिते तत्परित्यागानन्तरं पुनर्ग्रहणं वांताशनमिव मन्यमानाः, भगवद्वाक्यं चानुल्लंघ्यमिति विचार्य, अतिविरोधे उभयानुरोधि-शरीरपरित्यागः कर्तव्य इति निश्चित्य, तत्रापि भगवत्सम्बन्धानन्दा-भावादितिकर्तव्यतामूढा जाता इत्याह **इति विप्रियमिति**.

**॥ श्रीशुक उवाच ॥**

**इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम् ।**
**विषण्णा भग्नसङ्कल्पाश्चिन्तामापुर्दुरत्ययाम् ॥२८॥**

**विगतं प्रियं** यस्मादिति, उभयथापि प्रियाभावः– किं परीक्षार्थमाह आहोस्विदभिप्रेत एवायमर्थ इति. **आ**समन्तात् श्रुत्वा वाक्यतात्पर्यं निर्धार्य, सत्यं गमनमेव वदतीति निश्चित्य, अनभिप्रेतत्वेऽपि तत्प्रसवहेतुमलभमानाः **गोप्यो** नैपुण्यरहिताः **गोविन्दस्य** स्वामिनः देव**भाषित**त्वेन अनृतशङ्कारहितमीश्वरवाक्याच्च निर्धाररहित**माकर्ण्य विषण्णा** जाताः मनसि परमं विषादं प्राप्ताः. तत्र हेतु**र्भग्नसङ्कल्पा** इति. तदा परां **चिन्तां प्रापुः** कथमस्मद्विचारितं भगवद्वाक्यं चैकमुखं भवतीति. सा चिन्ता त्रैलोक्यं व्याप्य चेदं जन्मजन्मान्तराणि च निर्द्धारमलभमाना **दुरत्यया** पर्यवसानरहिता जाता ॥२८॥

ततः चिन्तया यज्जातं तदाह **कृत्वे**ति.

### प्रकाशः

तद्विलक्षण इत्यर्थः. तर्हि तौल्ये कतरस्य ज्यायस्त्वमित्यत आहुः **गृहे**त्यादि. तथा च तेषां विहितं भवति न तु स्वतन्त्रमित्ययमेव ज्यायानित्यर्थः ॥२७॥

**इती**त्यस्याभासे **तत्रापी**ति शरीरपरित्यागेऽपीत्यर्थः ॥२८॥

### लेखः

**श्रवणा**दित्यत्र. **गृहस्थितानां चे**ति **चः** समुच्चये, **विहितं** पूर्वोक्तं श्रवणादिकं **गृहस्थितानाम**पि **भवति** सम्भवतीत्यर्थः ॥२७॥

**इति विप्रियमि**त्यत्र. **विगतं प्रियमि**ति सामान्यविवक्षया नपुंसकत्वमेकवचनं च, यस्मिन् भाषिते शब्दा अर्थाश्चाप्रिया इत्यर्थः. **उभयथापी**ति शब्दतोऽर्थतश्चेत्यर्थः ॥२८॥

**कृत्वा मुखान्यवशुचः श्वसनेन शुष्यद्-**
**बिम्बाधराणि चरणेन भुवं लिखन्त्यः ।**
**अस्रैरुपात्तमषिभिः कुचकुङ्कुमानि**
**तस्थुर्मृजन्त्य उरुदुःखभराः स्म तूष्णीम् ॥२९॥**

चिन्तया प्रथमं मूर्छिता जाताः. ततः **मुखान्यव** अवाङ्मुखानि **कृत्वा,** कमपि स्वमुखं न प्रदर्शयिष्याम इति अवाङ्मुखानि कृतवत्यः. **अवगताः शुचः** याभिस्ताः, शोकसम्बन्धिन्यो वा जाताः. **शुचः श्वसनेन** शोकसम्बन्धिना श्वासवायुना **शुष्यन्ति बिम्बवदधराणि** येषाम्. तादृशानि मुखानि कृत्वा **चरणेन** च **भुवं लिखन्त्यः,** तथैवावस्था भवतीति भूमिविवरमिव प्रार्थयन्त्यः. **उपात्तमषिभिः अस्रैः कुचकुङ्कुमानि मृजन्त्यः तूष्णीं तस्थुः.** मुखस्य अवाक्त्वेन भक्तितिरोभावः. श्वसनेन प्राणपीडा, शोकेनान्तःकरणस्य, बिम्बाधरशोषेण कामरसस्य, पदा भूमिलेखनेन शरीरस्य, अस्रैरिन्द्रियाणां, कुङ्कुमाभावेन कान्तेः, दुःखभरेण आनन्दस्य, तूष्णीं स्थित्या चैतन्यस्य तिरोभावो निरूपितः. केवलं स्थाणुवत् स्थिताः ॥२९॥

एवमपि स्थितौ तूष्णीं स्थितं भगवन्तमालक्ष्य किञ्चिद्विज्ञापयामासुरित्याह **प्रेष्ठमिति.**

**प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणं**
**कृष्णं तदर्थविनिवर्तितसर्वकामाः ।**
**नेत्रे विमृज्य रुदितोपहते स्म किञ्चित्**
**संरम्भगद्गदगिरोऽब्रुवतानुरक्ताः ॥३०॥**

---

**लेखः**

**कृत्वेत्यत्र.** एवमवस्थायाश्चिन्तायां स्वतएव जायमानत्वेन पूर्ववाक्ये सम्बन्धेन "एवंभूताश्चिन्तामापुरे"वं वक्तुमुचितत्वेऽपि क्रियाभेदेन द्वितीयवाक्ये, तत्रापि **कृत्वेति** कथनपूर्वकं तत्कथनादाहुः **चिन्तया प्रथममिति.** तेन पूर्वं मूर्छायां स्वतएव तथा जातं, ततः किञ्चित् स्वास्थ्ये वक्ष्यमाणाशयेन तथा कृतवत्य इति सूचितमित्यर्थः. **अवेत्यस्यावृत्तिमभिप्रेत्याहुः अवगता** इति. **शुच** इत्यस्याप्यावृत्तिमभिप्रेत्याहुः **शुचः श्वसनेनेति.** तथा **चावशुचस्ताः शुचः श्वसनेन** तादृशानि **मुखानि अवकृत्वेत्यन्वयः. अवशुच** इति विशेषणं षष्ठ्यन्तं वा. **तादृशानि मुखानि कृत्वेति,** अवाङ्मुखानीति शेषः ॥२९॥



भाषणं पूर्वोक्तमेव. अथवा तस्यामप्यवस्थायां "किमिति रोदनं क्रियते, स्वस्था भवत, गृहे गच्छते"त्येव वदति, परं हसन्मुखः. तदा तासां हृदये वाक्यामृतानि प्रविष्टानि सजातीयानि वाक्यान्युत्पादितवन्ति. तदा भगवदुद्बोधिताएव ताः भगवद्वाक्यानि पूर्वपक्षयितुमारेभिर इत्याह **प्रेष्ठमिति.** प्रेष्ठो भवत्येव, स्वसामग्र्या तथा सम्पादितत्वात्, परं वदत्यन्यथा, तथा"प्यप्रियमिव प्रतिभाषमाणमि"ति नोक्तम्. न हि कदाचिदपि भगवानप्रियवद्भवति किन्तु **प्रियो** भवति [1]**इतरो**ऽपि भवति, सर्वभवन-सामर्थ्यात्. इतरत्वे न प्रियत्वं बाध्यते, यथा जगज्जगदतिरिक्तरूपश्च. तदाह **प्रियेतरमिव प्रतिभाषमाणमिति.** यः प्रियोंऽशः तं न तिरोधार(प!)यति किन्तु वाक्यं न तेन[2] रूपेण वदति किन्तु रूपान्तरेण, तदा तेन सह वादः कर्तुं शक्यइति. न हि फलं क्वचित्साधनं भवति "मां वृणुते"ति वा वदति,

---

**टिप्पणी**

**प्रेष्ठं प्रियेतरमिवेत्यत्र.** शानजर्थानुपपत्त्या पक्षान्तरमाहुः **अथवा तस्यामित्यादि.** भाषणेनैव सर्वतिरोधानमुक्तमिति पुनरपि तथैव चेद् भाषणं स्यान्न स्यादेव विशेषाभावादतः पूर्वविलक्षणमेतद्वाच्यम्. ततो[3] जीवन-मुक्तिसामर्थ्यं चात्र जातम्, अन्यथैतन्न स्यादिति वैलक्षण्यमेव निरूपितं **तस्यामप्यवस्थायामित्यादिना.** अतएव **प्रतिभाषणमुक्तं** मूले औदासीन्यपूर्वक-पूर्वभाषणविरोधि-सहासभाषणाभिप्रायेण. **तदर्थविनिवर्तितेत्यत्र, यदि**

**प्रकाशः**

**प्रेष्ठमित्यत्र.** टिप्पण्यां **न स्यादेवेति,** वक्ष्यमाणं कार्यं न स्यादेवेत्यर्थः. सुबोधिन्यां **कर्तुं शक्य** इति नीतौ वाग्वादस्यातिप्रिये एव निषिद्धत्वेनोदासीने दोषाभावात्तथेति पूर्वपक्षीकरणे हेतुरुक्तः. नन्वत्र रूपान्तरस्यादर्शनाद् रूपान्तरेण वदतीत्यनिश्चयेन कथं पूर्वपक्षीकरणमित्याकांक्षायामाहुः **न ही-**

**लेखः**

**प्रेष्ठमित्यत्र. तदेति** भगवति हसन्मुखे सतीत्यर्थः. **सजातीयानीति,** यद्भगवतोक्तं तदेव पूर्वपक्षीकृत्य समाहितमित्येकविषयकानीत्यर्थः. **स्वसामग्र्येति,** स्वासां श्रुतीनां भजनसामग्री स्तुतिरूपा, तया प्रेष्ठत्वेन सम्पादितो भगवानित्यर्थः. "चिरं स्तुत्या ततस्तुष्टः परोक्षं प्राह तान् गिरे"ति

---

१. मर्यादामार्गीयोऽपि. २. प्रियरूपेण. ३. यतो मू. पा.

परं बलादपि प्रतिबन्धनिराकरणं कृत्वा स ग्राह्यएव. तदाह **कृष्णं** सदानन्दमिति. ननु कोऽयं निर्बन्धः सएव काम्य इति, महाँश्चेन्न मन्यते तदा अल्पतरा अपि काम्या इति, तत्राह **तदर्थविनिवर्तितसर्वकामा** इति. **तदर्थं** भगवदर्थं विशेषेण **निवर्तिताः सर्वे कामा** याभिः. अयमेव काम्य इति निश्चित्य पूर्वमेव सर्वे कामास्त्यक्ताः. काममयश्चायं पुरुषः, यदि त्यक्तोऽपि गृह्येत तदा भगवदुक्तमेव गृहं कथं न गृह्येत? तस्मादयमेव कामो अवशिष्यते. स चेन्न भवेत्, स्वरूपहानिरेवेति निश्चित्य, फले मानमकृत्वा दृढीभूय, **रुदितोपहते नेत्रे विमृज्य** यथास्थानं सर्वं प्रापयित्वा **किञ्चित्संरम्भेण**, वादार्थमुद्यमः **संरम्भः**. भगवान् हि वाक्येन निराकरोति न तु स्वरूपतः. वाक्यं तु निराकार्यमिति तदर्थं संरम्भः. सर्वोऽप्यन्तं गत्वा परावर्तते, परं **संरम्भेण**

### टिप्पणी

**त्यक्तोऽपी**ति. भगवदर्थं सर्वत्यागो भगवतोक्तः, पूर्वं त्यक्तार्थपरिग्रहोऽपि, यतः शुकादयोऽपि तथा चरन्ति. अधुना गृहपरिग्रहं वदति. एवं सति भगवदुक्तमिति, गृहं चेद् ग्राह्यं, तदा तदविशेषात्सर्वत्यागपूर्वकं भगवानेव कुतो न ग्राह्यो, गृहस्यैव ग्रहणे विनिगमकाभावादित्यर्थः ॥३०॥

### प्रकाशः

त्यादि. तथा च "प्रियं किं करवाणि व" इत्यनेनोपक्रमे स्वस्य साधनत्वकथनाच्छेषैः प्रतिबन्धकरणाच्च रूपान्तरावगमः, पूर्वोक्तहासाच्च फलरूपस्यैवं तूष्णीकत्वावगम इति कार्यबलेन रूपान्तरावगतौ युक्तं [1]पूर्वपक्षीकरणमित्यर्थः. **स** इति फलात्मा. **तदाहे**ति तस्मात् फलात्मकत्वं शुक आहेत्यर्थः. **सर्व** इति मुक्तिपर्यन्ताः. नन्वेवं सत्ययं कुतो न त्यज्यते तत्राहुः **काममय** इत्यादि— "काममय एवायं पुरुष" इति श्रुत्यर्थोऽयं; श्रुतिस्तु शारीरब्राह्मणस्था बृहदारण्यके. तेन स्वरूपधर्ममपि त्यक्त्वा भगवान् गृहीत इत्युक्तम्. **यदी**ति भगवता स्वानङ्गीकारे. **तस्मादि**ति सर्वकामानां भगवदर्थं त्यागात्. संरम्भप्रयोजनमाहुः **सर्वोऽपी**त्यादि. तथा च वाक्यतात्पर्यं निर्णीय ततो

### लेखः

कथानुसन्धेया. **अन्तं गत्वे**ति, उपायस्यान्तं यावच्छक्यमुपायं कृत्वेत्यर्थः ॥३०॥

१. पूर्वपक्षाकरणम् इति मुं. वि. पाठः.



**गद्गदा गीर्**यासां, वर्णानां न स्फुटनिर्गमनम्, ईश्वरवाक्यनिराकरणे यतो वाणी बिभेति. एतासां तु न भयं, यतः **अनुरक्ताः**. रागो हि भयप्रतिपक्षः, यत्र रागः स्वल्पोऽपि, न तत्र भयम्. अतः **अब्रुवत** उक्तवत्यः ॥३०॥

वाक्यानां बाधवाक्यानि तावन्ति प्रार्थनाधिकम् ।
एकादशविधास्तेन तासां वाचो जयन्ति हि ॥(१३)॥

यद्भगवता प्रथममुक्तं "स्वागतं वो महाभागा" इति. यद्यपि भगवता वयं स्तुताः तथापि प्रेषणाभिप्रायेण न तु स्वस्मिन्नागता इति, तथा सति नेयं स्तुतिः किन्त्वतिक्रूरं वचनम्, अनिष्टपर्यवसानात्. नन्वशक्ये किं कर्तव्यं, तत्राह **मैवं विभो** इति.

**॥ श्रीगोप्य ऊचुः ॥**

**मैवं विभोऽर्हति भवान् गदितुं नृशंसं**
**संत्यज्य सर्वविषयांस्तव पादमूलम् ।**
**प्राप्ता भजस्व दुरवग्रह मा त्यजास्मान्**
**देवो यथादिपुरुषो भजते मुमुक्षून् ॥३१॥**

**भवान्** सर्वमेव कर्तुं समर्थः. समर्थश्चेदन्यथा वदेत् **नृशंसमे**व भवति,

### प्रकाशः

यत्सेत्स्यति तद्विधास्याम इत्येतदर्थं संरम्भ इत्यर्थः ॥३०॥

**मैवमित्यत्र**[1] **नन्वशक्य** इत्यादि. भगवानेको भक्ताश्चानेका इत्यशक्ये स्थापने तदर्था स्तुतिः कथं कर्तव्येत्यर्थः. **दयायामि**त्यादि, तथा च यः पूर्वं

### लेखः

**जयन्ति ही**ति, भगवतो रसात्मकत्वाद्विवादे एतद्वाक्यानां जयो युक्त इति **हि**शब्दः (१३).

**मैवमित्यत्र**. पुरुषे दयाराहित्यमिव वाक्ये दयाऽसमानाधिकरणत्वमेव

### कारिकार्थः

**मैवं विभोर्हती**त्यस्याभासे **वाक्यानामि**त्यादि. **वाक्यानां** भगवद्वाक्यानां **बाधवाक्यानि** तासां वाक्यानि **तावन्ति** भगवद्वाक्यसमसंख्याकानि दश, "व्यक्तं भवान्" इति प्रार्थनावाक्यं च **अधिकम्. तेन एकादशविधास्तासां वाचो जयन्ती**त्यर्थः (१३).

१. इत्यस्याभासे इति मांड. पाठः.

दयायां विद्यमानायां न वदेदिति. यच्च भगवतोक्तं "व्रजस्यानामयमि"ति तदस्माकं नोद्देश्यं, यतः **सर्वविषयानेव संत्यज्य तव पादमूलं प्राप्ताः**. अनेन त्यक्तार्थपरिग्रहो अनुचितो नापि जारत्वेन समागतमिति निरूपितम्. एकादशेन्द्रियाणामपि विषयास्त्यक्ताः सवासनाः. तत्र विनिगमकं **तव पादमूलं प्राप्ता** इति, अन्यथा पादमूलप्राप्तिरेव न स्यात्. यदुक्तं "ब्रूतागमनकारणमि"ति तत्राहुः **भजस्वे**ति. अन्यत् कर्तव्यमिति चेत्, तत्राहुः **हे दुरवग्रहे**ति. दुष्टोऽय**मवग्रहः** आग्रहः यद्भजनं न कर्तव्यम् अन्यत्कर्तव्यमिति; यथा जीवानाम्. ते हि सर्वं कर्तुं वाञ्छन्ति, न भगवद्भजनम्. यथायमाग्रहो जीवानां दुष्टः तथात्रापि भवितुमर्हति, "ये यथा मां प्रपद्यन्ते" इति तु नास्ति. यदि तदभिप्रायेणैव तथा, तदा **मा त्यजास्मान्** अस्माभिर्न त्यज्यत इति. एतच्च भजनं न विषयवत्[१] किन्तु प्रकारान्तरेणेति विशेषतो

---

**प्रकाशः**

विषजलाशयादिभ्योऽवनेन स्वसामर्थ्यं प्रकटितवांस्तस्य भवत एवं कथनं नासामर्थ्य(स्य!)सूचकम् अपि तु दयाभावस्येत्यर्थः. **अनुचित**पद**मिति निरूपित**मित्यनेनान्वेति. **जारत्वेने**ति, जारत्वमनुसन्धायेत्यर्थः. एतेन "प्रियं किमि"त्यत्र सूचितं कामस्य प्रियमपि निराकृतम्. अभजनाग्रहस्य दुष्टत्वमुद्घाटयन्ति **ये यथे**त्यादि. तथा च प्रतिज्ञाभञ्जकत्वाद्दुष्ट इत्यर्थः. ननु प्रतिज्ञायां 'यथा-तथे'तिपदाभ्यां प्रकारसाम्यमुक्तमिति "यथा भवत्य आगताः, तथा मयाप्यागन्तव्यमि"ति तत्पूरणार्थमेव साम्प्रतमभजनमिति चेत्तत्राहुः **यदी**त्यादि. नन्वस्त्वेवम्, तथापि भजनप्रार्थना किमर्थेत्यत आहुः **एतच्चे**त्यादि. विवक्षितं

**लेखः**

क्रूरत्वमित्याशयेनाहुः **दयाया**मिति. **नापि जारत्वेने**ति, "प्रियं किमि"त्यत्र भगवता स्वातिरिक्तप्रियकर्तृत्वेन स्वस्मिन् सोपाधिस्नेहसूचनेन जारत्वं शङ्कितं तदपि नेति विषयत्यागकथनेन निरूपितम्. विषयमात्रत्यागान्न प्रियकर्तृत्वं किन्तु प्रियत्वमेवेति भावः. **सवासना** इति **सर्व**पदस्यार्थः. **पादमूल**मिति, यत्र पादौ तिष्ठतस्तत्स्थानं तयोर्मूलम्. तथा च **पादमूलं** वृन्दावनमित्यर्थः. ननु विषयमात्रत्यागे भजनप्रकाराभावात् कथं भजनमित्याशङ्क्याहुः **एतच्चे**ति. **विषयवदि**ति भावप्रधानात् मतुबन्तम्. प्रार्थ्यमानं प्रति**भजनं** **च**कारादस्मत्कृतं भजनं च विषयत्वप्रकारकं **न** विषयत्वेन

---

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्.



वक्तुमशक्ताः दृष्टान्तेनाहुः **देवो यथे**ति. **देवो** हि सर्वानेव भजते, अन्यथा शास्त्रं व्यर्थं स्यात्. तत्रा**प्यादिपुरुषो देवः**. पूर्वकाण्डेऽपि भजनं सार्थकं, सुतराम् उत्तरकाण्डे. आदिपुरुषस्तु सेव्यएव भवति, देवश्च. न हि देवभजनं

---

**प्रकाशः**

भजनं विवेचयितुमुपपादयन्ति **देवो ही**त्यादि. भजनमत्र फलदानाद् बोध्यं, देवताविग्रहवादस्य व्यासाभिप्रेतत्वेन कर्मण्यपि देवतायाएव द्वारत्वात्. **शास्त्रं** त्यागमन्त्रलिङ्गादिरूपम्. अस्त्वेवमन्येषां, तावता भगवतः कथं तथात्वमित्यत आहुः **तत्रापी**त्यादि, "यो देवानां नामधा एक एव", "एकं सद्विप्रा बहुधा वदन्ती"त्यादिश्रुते**स्तत्रापि** तेषु देवेष्वपि सएवेति तस्यैव तथात्वमित्यर्थः. तदेवाहुः **पूर्वे**त्यादि. **भजनं** भगवत्कर्तृकम्. ज्ञानभक्त्योरपि फलदानात् **सुतरा**मिति. नन्विदं सोपधौ, तच्च "प्रियं किं करवाणी"त्यनेनोरीकृतमेवेति प्रकृते को विशेष इत्यपेक्षायां निरुपधिप्रपत्तिव्यवस्थामाहुः **आदी**त्यादि. "अकामः सर्वकामो वे"त्यादिस्मृतिभिर्भजनविधानात्तस्य परमपुरुषत्वेन निष्कामसेव्यत्वमुक्तम्. तथा "सोऽश्नुते सर्वान्कामान्सह ब्रह्मणे"त्यादिश्रुतौ रन्तृत्वबोधनाद् देवत्वमुक्तम्. तावता निरुपधिप्रपत्तावपि भजनं सेवाकारणरूपं सिद्धमेवेत्यर्थः. तथा च प्रतिज्ञावाक्ये यथा प्रकारवाचके पदे स्तः, तथा प्रपत्तिभजनवाचके अपि स्तः, तेन यत्प्रकारिका प्रपत्तिः तत्प्रकारकं भजनमित्यर्थो भवति. तथा सति निरुपधिप्रपत्तौ सेवाकारणरूपं सोपधौ तत्फलदानरूपं भजनं करोमीति फलति, तस्मात्प्रार्थ्यत इति भावः. तेन लोकन्यायोऽपि न विरुध्यत इत्याहुः **नही**त्यादि, **न-ही**ति पदद्वयं **पुरुषान्तरे-**

**लेखः**

भोगरूपं न **किन्तु** सर्वात्मभावप्रकारकम्. तस्य तु विशेषतो निर्वचनमशक्यमिति भूमस्वरूपनिरूपणे व्यवस्थापितम्, अतस्तं **विशेषतो वक्तुमशक्ता** इत्यर्थः. **सार्थक**मिति देवकृतप्रतिभजनसहितमित्यर्थः. उत्तरकाण्डे त्वात्मत्वप्रतिपादनात् प्रतिभजनमावश्यकमेवेत्याहुः **सुतरा**मिति. स्वस्य सर्वत्यागपूर्वक-भगवद्भजनेऽप्युपपत्तिमाहुः **आदी**ति. तस्य तु सेवैव कर्तव्या, न ततो विषयाभिलाष इत्यर्थः. **तु**शब्देन क्षुद्रकामदानां देवानां व्यावृत्तिः. **देवश्च सेव्य एव भवती**ति पूर्वेणान्वयः. देवत्वं विवृण्वन्ति **नही**ति. अतो न तत्र विषयसम्बन्ध इत्यर्थः. एतेन भगवानेव भर्तेति पक्षमाश्रित्योक्तम्. प्रौढ्या पक्षान्तरेऽपि भगवद्भजनमेव

व्यभिचारजनकं भवति, पुरुषान्तरभजनेऽपि प्रथमभर्ता विवाहितो अभजनीयो भवति. अनङ्गीकारस्तूचितो नत्वभजनम्. एतेन स यथा स्वातिरिक्तभजनं

---

### टिप्पणी

**देवो यथे**त्यत्र, **अनङ्गीकार** इति. अन्यत्र रागोत्पत्त्या विवाहिते रागाभाव उचित इत्यर्थः. यद्वा. द्वितीय**स्यानङ्गीकार उचितः, न तु** भर्तुर**भजनमि**त्यर्थः. अनेन दृष्टान्तेन स्वस्य सर्वत्यागपूर्वकं भगवद्भजनेऽप्युपपत्तिरुक्तेति ज्ञापनायैवमुक्तमाचार्यैः. अन्यथा मूले प्रभुकर्तृकभजने दृष्टान्तोक्त्या

### प्रकाशः

त्यादावपि सम्बध्यते. **नही**त्यादिना यत्सिद्धं तदाहुः **अनङ्गीकार** इत्यादि. इदं लोकन्यायाविरोधादिचिन्तनं प्रकृतानुपयोगीत्याशङ्कायां टिप्पण्यां तत्तात्पर्यमाहुः **अनेने**त्यादि. सुबोधिन्याम्. **एतेनेति देवो यथादिपुरुषो भजत** इति

### लेखः

कर्तव्यमायातीत्याहुः **पुरुषान्तरे**ति. एतस्मिन्नपि पक्षे आदिपुरुषत्वात् **प्रथमभर्ता** भवानेवेति शेषः. अतो **विवाहित** एवाधुनिकत्वाद**भजनीयो भवती**त्यर्थः. मूले **आदिपुरुष**पदाद्विवाहितस्य द्वितीयभर्तृत्वं सूचितमस्मिन्पक्षे

### योजना

**देवो यथादिपुरुष** इत्यत्र. **पुरुषान्तरभजनेऽपि प्रथमभर्ता विवाहितो अभजनीयो भवती**ति **नही**ति पूर्वोक्तेनान्वयः. परपुरुषभजनेऽपि विवाहितस्य पत्युर्भजनं कर्तव्यमेव. तथाच परपुरुषस्थानीयाः गोपाः, तेषां भजनेपि विवाहितपतिस्थानीयो भगवांस्तस्य भजनं तु कर्तव्यमेवेति फलति. एतच्च मूले **आदिपुरुष**पदेनोक्तम्; **आदिपुरुषः** प्रथमभर्तेत्यर्थः. **अनंगीकारस्तूचित** इति. जारस्त्वङ्गीकृतः सन् पतिसादृश्यं लभते नतु विधिवशात्. एवं चाङ्गीकारस्य स्वकृतत्वात्तस्य जारस्य **अनङ्गीकारो**ऽपि स्वकृतो भवेच्चे**दुचित** एवेत्यर्थः. पतिस्तु विधिवशात्स्वामित्वं प्राप्तः, अतो वेदकृतत्वान्न दूरीकर्तुं शक्यः. अतस्तस्य कदाचिदप्यभजनं न कर्तव्यम्. तदेतदाहुः **न त्वभजनमि**ति, विवाहितपतेरभजनं नोचितमित्यर्थः. प्रकृते भगवतो विवाहितपतिस्थानीयत्वं, सार्वदिकपतित्वादादिपुरुषत्वेन. गोपानां देहसम्बन्धित्वेन नित्यपतित्वाभावात्तेषामनङ्गीकारस्योचितत्वेऽपि भगवतो नित्यपतेरभजनं न युक्तमिति हार्दम् ॥३१॥



न सहते, तन्निवृत्तिपूर्वकमेव स्वभजनं संपाद्य स्वयं भजते, तथा त्वयापि कार्यम्. अतस्तत्र प्रेषणं तवाप्यनुचितमिति ज्ञाप्यते. किञ्च **यथा मुमुक्षून् भजते** भगवान्– आत्मीयत्वेन परिगृह्णाति, आत्मतया स्फुरति, स्वानन्दं तेभ्यः प्रयच्छति "एष ह्येवानन्दयाती"ति श्रुतेः. "स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं ही"ति न्यायेन भगवान् तदर्थमात्मानं प्रकटीकरोतीति

---

### टिप्पणी

विरोधः स्यादिति ज्ञेयम्. **स्वाप्यये**ति (अत्र!) **आविष्कृतमि**ति भावार्थक'क्ता'न्तं, तथा च सुषुप्तिमपेक्ष्य तत्साक्षिरूपस्य भगवतः[1] सम्पत्तिर्ब्रह्मसम्पत्तिर्मोक्ष इति

### प्रकाशः

दृष्टान्तदानेनेत्यर्थः. विवक्षितविज्ञापनस्यैतावतैव सिद्धे**र्मुमुक्षु**पदमनतिप्रयोजनमित्याशङ्क्य तत्तात्पर्यं विवृण्वन्ति **किञ्चे**त्यादि. अत्र **स्फुरती**त्यन्तं "यमेवैष वृणुत" इति श्रुत्यर्थः, शेषस्तु लिखितायाः. ननु भजधातुः सेवावचन इत्यात्मीयत्वेन परिग्रहादेः कथं भजनत्वम्? "एष ह्येवे"ति श्रुतेश्च "को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यादि"ति जीवनरूपं कार्यं प्रक्रम्य पाठात् कथं मुमुक्षुविषयत्वमित्याशङ्क्य न्यायेन तां निवारयितुमाहुः **स्वाप्यये**त्यादि. अयं न्यायश्चतुर्थस्य चतुर्थपादेऽस्ति. तत्र हि –"न तदश्नोति कश्चन, न तदश्नोति कश्चने"ति "सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिते"ति विकरणव्यत्ययेन भोजनवच'नाश'धातुघटिततया भोगनिषेधक-तद्बोधकयोर्माध्यन्दिनतैत्तिरीयश्रुत्योरितरेतरविरोधे तत्सामञ्जस्याय मुक्तौ निर्गुणसगुणविभाग

### लेखः

इति ज्ञेयम्. स्वकर्तृकभजनोपपादनमुपसंहरन्ति **अनङ्गीकार** इति, दोषवशाद्रागाभावो भवेदपि, **न त्वभजनमि**ति टिप्पण्युक्ते प्रथमपक्षे. द्वितीयपक्षे आधुनिकत्वात्त**दनङ्गीकारस्तूचित**एव, **न तु** प्रथमभर्तुर्भवतो**ऽभजनमि**त्यर्थः. आभासोक्तप्रकारान्तरसूचनमाहुः **एतेने**ति, देवदृष्टान्तेनेत्यर्थः. मुमुक्षुभजनकर्तृत्वकथने आदिपुरुषदेवत्वं प्राप्तमेवेति पदद्वयमिदं व्यर्थं स्यादतो **यथे**ति पदमावर्त्य दृष्टान्तद्वयेन योजनीयमित्याशयेनाहुः **किञ्चे**ति. देवो यथा सर्वान् भजते तथेत्येको दृष्टान्तः. मुमुक्षूंश्च यथा भगवान् भजते तथेति द्वितीयः. **आत्मीयत्वेने**ति त्रयेण प्रथमाध्याय-द्वितीयतृतीयाध्याय-चतुर्थपञ्चमा-

---

१. भगवतः. मू. पा.

## प्रकाशः

आदरणीय इति प्राप्ते "स्वाप्यय"सूत्रं पठित्वा "तद्यथापि हिरण्यनिधिं निहितमक्षेत्रा उपर्युपरि सञ्चरन्तो न विन्देयुः, एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्यः एतं ब्रह्मलोकं न विन्दन्ती"ति छान्दोग्यश्रुत्या सुषुप्तौ ब्रह्मज्ञानाभावेनाप्राप्तिश्रावणात् "ब्रह्मविदाप्नोति परमि"तिश्रुत्या मुक्तौ ज्ञानेन परप्राप्तिश्रावणा**दाविष्कृतं** भोगनिषेधक-तद्बोधकश्रुत्युक्तं **स्वाप्ययसम्पत्त्योरन्यतरापेक्षं** "स्वमपीतो भवती"ति श्रुतेः **स्वाप्ययः** सुषुप्तिः **सम्पत्तिः** ब्रह्मसम्पत्तिः पुष्टिमार्गीयो मोक्षः, तयोरन्यतरापेक्षम्. तथा च निषेधिका स्वाप्ययविषया, बोधिका तु मुक्तिविषया. युक्तं चैतत्, "लोकवत्तु लीलाकैवल्यमि"तिसूत्रेण पूर्वलीलाया[१] मुक्तित्वेन व्यवस्थापनादिति **हि**शब्दार्थ – इति व्याख्यातम्. तच्च प्रकृतानुपयोगीत्यस्य न्यायस्योपन्यासो न युक्त इत्याशङ्क्य टिप्पण्यां तस्यार्थमाहुः **स्वाप्ययेत्**यादि. अत्रेदं प्रतिभाति. तृतीयस्य द्वितीये "तदभावो नाडीषु तच्छ्रुतेरात्मनि चे"त्यत्र सुषुप्ते-र्द्वैविध्यमङ्गीकृतम्. तत्र नाडीषु सुषुप्तावानन्दाभावः. आत्मनि सुषुप्तौ तु स्वपितिनाम, "सता सोम्य तदा सम्पन्नौ भवती"तिछन्दोगश्रुतौ सुषुप्तिसाक्षि-सान्निध्यस्य कथनाद्, अथ "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तद्वास्यैतदात्मकाममाप्तकाममकामं रूपं तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं वेद नान्तरम् एवमेवायं शारीर आत्मा प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं वेद नान्तरमि"ति ज्योतिर्ब्राह्मणे संपरिष्वङ्गकथनाच्च. तत्रापि सामग्रीसान्निध्ये सिद्धे भोगस्य निराबाधत्वान्निषेधिकायाः श्रुतेः सुषुप्तिविषयत्वमसङ्गतमिति शङ्का स्यादिति तां वारयितुं तत्र प्राज्ञरूपस्यैव सान्निध्यं परिष्वङ्गश्च, न तु परब्रह्मणः. तथा "नाहं खल्वयं भगव एवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति, नो एवेमानि भूतानि विनाशमेवापीतो भवति, नाहमत्र भोग्यं पश्यामी"ति छन्दोगश्रुतौ भोग्यकथनाद्भोगसुखादि-साक्षात्कारात्मनः अभावान्निर्विषयज्ञानस्य सत्त्वेऽपि तस्य भोगरूपत्वाभावात्तत्र न भोगोऽपीति निषेधिकाया श्रुतेः सुषुप्तिविषयत्वं युक्तमेव. एवं च सति प्रकृते **देवो यथा भजत** इत्युक्तौ सुषुप्तिसमभजनप्राप्तिः, **आदिपुरुषो यथे**-त्युक्तौ "तदनुप्रविश्य सच्च त्यच्चाभवदि"ति श्रुतिबोधितरीत्या प्रविष्टस्यैव

१. पूर्वं लीलाया इति मुद्रितः पाठः मुं. वि.पाठमनुसृत्य संशोधितः.



## टिप्पणी

यावत्, तद्दानार्थं वा भगवतः स्वाविष्करणमित्यर्थः. केचित्तु– स्वयंप्रकाश-ब्रह्मस्वरूप-ज्ञानातिरिक्त-ज्ञानाभावकथनं, श्रुतौ तु तयोरन्यतरापेक्षम्, तत्र विनिगमकमा**हाविष्कृतं ही**ति; **हि** यस्माद्धेतोस्तत्तत्प्रकरणएव तदुक्तमित्यर्थ– इति वदन्ति. एवमपि सति ब्रह्मस्वरूपाविर्भावस्यैवोक्तज्ञानाभावे निमित्त-त्वान्न पूर्वस्माद्विशेषः. प्रथमवचनश्रवणानन्तरं चित्तवैयग्र्यमभूदित्यग्रिम-वाक्यानां व्युत्क्रमेणोत्तरदानमिति ज्ञेयम् ॥३१॥

## प्रकाशः

जीवान्तर्यामिभावेन तद्रीतिक-भजनप्राप्तिः, **देवो यथादिपुरुष** इति पदद्वयोक्त्या पर्यङ्कविद्योक्तरीत्या मुक्त्यनन्तरं भजनप्राप्तिः नत्विदानीमिति तत्त्रयमपि व्यावर्तयितुमत्र **मुमुक्षु**पदम्. तेन तैत्तिरीयोक्तरीतिकं भजनं विवक्षितम्, एतदेव **विशेषतो वक्तुमशक्ता** इत्यनेन बोधितम्. एवं भजनं तदर्थप्राकट्येन भवति नेतरथेति तद्बोधनाय न्यायोपन्यासोऽत्यन्तं युक्ततर इति.

ननु मतान्तरेऽत्र भिन्न एवार्थः. तथा हि – "तत्केन कं विजानीयादि"त्यादौ विशेषविज्ञानवारणश्रवणं सुषुप्तिसम्पत्तिसापेक्षं, सम्पत्तिः ब्रह्मसम्पत्तिः परममुक्तिः, न तु सगुणविद्याविपाकभूत-सगुणमुक्तिपरमिति मायावादिनः. "एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यती"ति विशेष-विज्ञानवारणश्रवणं सुषुप्तिमरणसापेक्षम्. सम्पत्तिर्मरणम्, "तस्यैतस्य प्रयतो वाङ्मनसि संपद्यत" इति श्रुतेः; न तु परममुक्तिपरं[१], यत "एतेभ्यो भूतेभ्यः समुत्थाये"ति शरीरे प्रियविषयनिबन्धनं विज्ञानं "न प्रेत्ये"ति प्रतिषिध्यते, न तु मुक्तस्य, तदवस्थाया अत्रानुक्तेः. तथा "सर्वं पश्यः पश्यति सर्वमाप्नोति सर्वश" इति श्रुतेश्चेति भट्टभास्कर-रामानुजाचार्यमते. "तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवती"ति तीर्णशोकत्वश्रुतिः सुषुप्तिमुक्ति-परेति मध्वभाष्ये. तत्कथमत्र विवक्षितार्थनिश्चय इत्याकांक्षायामेकहेलया तेषामविरोधं वक्तुं मायावादि[२]मतमुपक्षिपन्ति **केचित्त्व**ति. अविरोधं व्युत्पादयन्ति **एवमि**त्यादि. सुषुप्तिब्रह्मसम्पत्त्योर्ब्रह्माविर्भावस्य सर्वमत-साधारण्यान्मरणेऽपि मोहदशायां "मुग्धेऽर्धसम्पत्तिः परिशेषादि"ति सूत्रेणार्धाविर्भावाङ्गीकाराच्च सर्वमतेऽपि ब्रह्माविर्भावस्यैव ज्ञानाभावेऽपि

१. नतु परममुक्तिः इति मुं. वि. पाठः. २. मायावादादिमतम् इति मांड॰-मुं. वि. पाठः.

**मुमुक्षून् भजत** इत्युक्तम्. अन्यथा मुमुक्षवएव भगवन्तं भजन्ते, न तु भगवान्. अतः फलद्वारा भजनम्. यथा तेषां पुनः पूर्वावस्थां न सम्पादयसि, सततं स्वस्मिन्नेव स्थापयसि, तथा अस्मदर्थमाविर्भूय स्वानन्देन वयं योजनीया इति एतत्कर्तव्यमित्यर्थः. [१]( एतेन प्रार्थनया सकृदङ्गीकृत्य तूष्णींभावपक्षो निरस्तः. अग्रे गृहगमनाज्ञापन-गृहस्थितिसम्पादनादिकं तु रसपोषायैव, न तु गृहार्थमिति ज्ञेयम् ) ॥३१॥

**यत् पत्यपत्यसुहृदामनुवृत्तिरङ्ग**
**स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ।**
**अस्त्वेवमेतदुपदेशपदे त्वयीशे**
**प्रेष्ठो भवाँस्तनुभृतां किल बन्धुरात्मा ॥३२॥**

यदपि भगवतोक्तं "स्त्रीणां स्वधर्मपरित्यागोऽनुचित" इति, अतः "एषा रजनी घोररूपा, नेह स्त्रीभिः स्थेयमि"ति, तत्राप्याहुः **यत्पत्यपत्ये**ति. **पतिरपत्यानि सुहृदश्च**, एषाम**नुवृत्तिः स्त्रीणां स्वधर्म इति धर्मविदा त्वया उक्तम्.** बहिर्मुखा हि धर्मशास्त्रज्ञाः— शारीरमेव धर्मं स्वधर्ममाहुः नत्वात्म-

**प्रकाशः**

हेतुत्वमिति पूर्वोक्तव्याख्यानं सर्वाविरुद्धम्. अतः सुखेन निश्चय इत्यर्थः.

प्रकृतमनुसरामि. एवञ्च "को ह्येवान्यादि"तिश्रुतिर्मुमुक्षुविषयेति प्रकरणादेवावसीयत इति तज्जीवनपरैवेति न कोऽपि शङ्कालेश इति दिक्. एतत्सर्वं हृदि कृत्याहु**र्यथे**त्यादि. **एतेनेति मुमुक्षु**पददानेनेत्यर्थः. विज्ञापनविरुद्ध-मग्रिममिति शङ्कानिरासायाहुः **अग्र** इत्यादि ॥३१॥

**यत्पत्यपत्ये**त्यत्र **धर्मवित्**पदतात्पर्यमाहुः **बहिरि**त्यादि **त्वयोक्तमि**त्यन्तम्. नारदादिभिर्भगवद्धर्मस्य याज्ञवल्क्यादिभिरात्मधर्मस्यापि स्वस्वशास्त्रे कथनात् ज्ञायते — यदा तैर्देहविशिष्टस्य कर्तृत्वमनुसन्धीयते तदैव शारीरधर्मस्य स्वधर्मत्वमुच्यते नत्वन्यदा. अन्यथा "अयं हि परमो धर्मो यद्योगेनात्म-दर्शनमि"त्यादौ तस्य परमं न वदेयुः. तथा च शारीरधर्मबोधनं तत्र यथा[२]

**लेखः**

ध्यायानामर्था उक्ताः. **तथा अस्मदर्थमि**ति, गृहे अप्रेषयित्वा सततं स्वस्मिन्नेव स्थापयित्वा अग्रिमं कर्तव्यमित्यर्थः ॥३१॥

१. () चिह्नान्तर्गतः प्रभूणाम्. २. तथेति मुद्रितपाठः मांड.मुं.वि.जू. पाठाननुसृत्य संशोधितः.



धर्मं भगवद्धर्मं वा. यतस्ते अनात्मविदः. तथा **धर्मविदैव त्वया** नत्वस्मान् विचार्य आत्मानं वा **त्वयोक्तम्.** तस्याप्यस्माभिर्विषयनिर्धारः क्रियते, न तु दूष्यते. तदाहुः **अस्त्वेवमेतदि**ति, "स्त्रीभिः स्वधर्मः कर्तव्य" इति यदुक्तं तदेवमेवास्तु. नहि पत्यादयः धर्मस्वरूपं नाप्याधारः किन्तु निमित्तम्. स च धर्मः अनुष्ठीयमानः प्रमीयमाणश्च भवति. अनुष्ठीयमाने पुत्रादयो निमित्तं, प्रमीयमाणे गुरुः. अतः सा अनुवृत्तिः प्रथमतो गुरावस्तु, अन्यथा स्वधर्मो ज्ञातएव न स्यात्. न च भगवद्वाक्यमनुवादकं, पूर्वमस्माकं धर्मज्ञानाभावाद्, अन्यथा तदेव क्रियेत. नापि सेवाव्यतिरेकेणायं धर्मः स्फुरति, अन्यथा वचनमात्रेणैव गतं स्यात्. अत उपदिष्टस्य सिद्ध्यर्थं सेवां कारय. **उपदेशस्य पदमा**श्रयः कर्तैव भवति. **अङ्गे**ति कोमलसम्बोधनात् नास्माभिः प्रतिकूलतया निरूप्यते. किञ्च स्वधर्मा अनेकविधाः— स्वापेक्षयोत्कृष्टविषयाः समानविषयाः हीनविषयाश्च. तत्र पूर्वपूर्वधर्मप्राबल्यम्. यथा स्त्रीणां पतिपुत्रादीनां स्वसमानानां सेवा धर्मः एवं स्वनियामकस्येश्वर-

**प्रकाशः**

जघन्याधिकारविषयं तथात्रापीत्यर्थः. अथाध्ययनविधिवदिदं प्रथमाधिकार-मनुसृत्योक्तं ननु बाहिर्मुख्येनेति चेद्विभाव्यते, तत्राहुः **तस्यापी**त्यादि. अदूषणं व्याकुर्वन्ति **स्त्रीभिरि**त्यादि. विषयनिर्धारमुपपादयन्ति **नही**त्यादि. **से**ति स्त्रीधर्मत्वेनोपदिश्यमाना. ननु नाहं गुरुः किन्तु भवतीभिः क्रियमाण-मनुवदामीत्यत आहुः **न चे**त्यादि. तथा च पूर्वकालीना तत्कृतिर्लोकानुसृता, न शास्त्रानुसृता, विध्यज्ञानाद्, अत इदं प्रमाणवाक्यं नानुवादकमित्यर्थः. ननु इदानीं ज्ञात इति गन्तव्यमित्यत्राहुः **नापी**त्यादि. यदि सकृच्छ्रवणमात्रेण धर्मः स्फुरेत्, गुरुसेवाविधायकं शास्त्रं व्यर्थं स्याद्, अतोऽवश्यकर्तव्यत्वेन स्फूर्त्यर्थं तथेत्यर्थः. एवं स्वस्य प्रथमाधिकारमङ्गीकृत्य धर्मावस्थाविचारेण विषयनिर्धार उक्तः. अतः परं वाक्यतात्पर्यविचारेण तमाहुः **किञ्चे**त्यादि. **अतो वाक्ये**ति

**लेखः**

**यत्पत्यपत्ये**त्यत्र. **नत्वस्मानि**ति. एताः स्वरूपसम्बन्धिन्यो, न धर्मसम्बन्धिन्य इत्यस्मत्स्वरूपं विचार्य, पुरुषोत्तमप्राकट्यं भजनसम्पादनार्थ-मेवेत्यात्मस्वरूपं वा विचार्य नोक्तमित्यर्थः. **स्वनियामकस्येति** अन्तर्यामिण

स्यापि अनुवृत्तिर्मुख्यो धर्मः, अन्यथा तत्प्रेरणाभावे पतिसेवादौ न प्रवर्तेत. अतः प्रकृतेऽपि **भवानीश्वरः** अन्तर्यामी. तादृशोऽपि भूत्वा पतिपुत्राद्यर्थं न प्रवर्तयसे किन्तु स्वसेवार्थमेव प्रेरयसि, अतो वाक्योक्तधर्मसिद्ध्यर्थमपि भवानादौ सेव्यः. किञ्च धर्मो धर्मिमूलः, तदविरोधेन कर्तव्यः, फलार्थं च कर्तव्यः. अन्यथा चेद्, अनिष्टेऽपि पुरुषं प्रवर्तयन् अनाप्तः स्यात्. अतएव धर्मशास्त्रे प्रियत्वात् शरीरस्य तदनुरोध उक्तः. "द्रव्यसंस्कारविरोधे द्रव्यं बलीय" इति न्यायाच्च. तत्कस्यचित् प्रियो देहः, कस्यचिदात्मा, कस्यचित् परमात्मा, कस्यचिन्निर्वाहको. भवाँस्तु सर्वरूपो भवति, यतो अत्यन्तं **प्रेष्ठः**

**प्रकाशः**

अनुभवप्रामाण्येन तथा निश्चयात्. तथा च यथा वेदे परोक्षवादेन कर्ममोक्षाय कर्मविधानम् एवमत्रापि तद्विधानम्, तद् यथा त्वत्सेवायां पर्यवस्यति तथेदमपीति विधितात्पर्यविचारेण विषयनिर्धार उक्तः. अतः परं विध्यर्थानुष्ठानाधिकारविचारेणापि विषयं निर्धारयन्ति **किञ्च धर्मे**त्यादि. **धर्म्य**त्र देही. **अनाप्त** इति विधिरिति शेषः. संमतिं चात्राहुः **अतएवे**ति, धर्म्यविरोधेन कर्तव्यत्वादेवेत्यर्थः. ननु सर्वस्वारादावनिष्टेपि प्रवर्तनस्य दर्शनान्नायं नियम इत्यत आहुः **द्रव्ये**त्यादि. तत्र मरणस्यैवेष्टत्वेन फलवत्त्वेन देहप्रतिपत्त्यन्तराभावेन च तथात्वेऽपि यत्र तस्य नेष्टत्वं, देहस्य प्रतिपत्त्यन्तरं

**लेखः**

इत्यर्थः. **प्रकृतेऽपी**ति, बहिःप्राकट्येऽपि **भवानीशो**न्तर्याम्येवेत्यर्थः. **अत** इति, यतो न प्रेरयसि अतो ज्ञायते सेवया प्रसन्नः प्रेरयिष्यसीति. तदा वाक्योक्तधर्मसिद्धिर्भविष्यतीत्यर्थः. धर्ममूलत्वादपि त्वदनुवृत्तिः कर्तव्येत्याहुः **किञ्चे**ति. **धर्मिमूल** इति, धर्मकर्ता धर्मी तन्मूल इत्यर्थः. **तदविरोधेने**ति, कर्तुः स्वरूपाविरोधेनेत्यर्थः. **फलार्थं चे**ति, कर्त्रा स्वस्मिन् फलसम्पादनार्थमित्यर्थः. अविरोधः फलसम्पादनं च कर्तुरेवेति **चकारः**. **अनिष्टे** इति, अफले इत्यर्थः. तथा धर्मबोधको वेदो नाप्तः स्यादित्यर्थः. **अतएवे**ति, धर्म्यविरोधेन कर्तव्यत्वादित्यर्थः. शरीरस्यानात्मत्वात्तदनुरोधः कुत उक्त इत्यत आहुः **प्रियत्वादि**ति, प्रीत्या तत्रात्मत्वमेव स्वीकृतमित्यर्थः. तथा च प्रियस्य धर्मित्वं सिद्धमिति भावः. धर्मस्य धर्मिमूलत्वे न्यायमप्याहुः **द्रव्ये**ति. **संस्कारो** धर्मो, **द्रव्यं** धर्मि, तद् बलिष्ठमित्यर्थः. **तदि**ति, शरीरानुरोधकथनेन प्रियाविरोधपूर्वकं



परमप्रेमास्पदमानन्दः **बन्धु**र्देहनिर्वाहकश्च. किञ्च न केवलमस्माकं किन्तु **तनुभृतां** सर्वेषामेव देहधारिणाम्. [१]("भवाय नाशाये"त्यत्र त्वया दत्तमेव शरीरं त्वद्विचारितप्रयोजनार्थं जीवो गृहीत्वा तिष्ठतीति निरूपितम्. अतः स देहः भगवदीयः भगवतैव स्थापितः तस्मै निवेद्य, तदनुपयोगे जाते पश्चादन्यस्मै देयः. चेतनो हि प्रेर्यः. अतो यावद्भगवदुपयोगं ज्ञास्यति तावन्नान्यस्मै

**प्रकाशः**

फलान्तरं वा, तत्र तथात्वं न शक्यवचनं, न्यायवैयर्थ्यप्रसङ्गात्, इतोऽन्यत्र तु नियम एवेत्यर्थः. यद्येवं तर्हि देहोऽनुरोद्धव्यः, किमिति **मदर्थं** क्लिश्यत इत्यत्राहुः **तदि**त्यादि. सर्वरूपत्वे गमकमाहुः **यत** इत्यादि. अतिशायने 'इष्ठन्.' स क इत्यपेक्षाया**मात्म**पदोक्तं देहादित्रयं **बन्धु**श्च. तथा च शास्त्रे देहानुरोधो न स्वदेहत्वोपाधिको अपि तु प्रियत्वोपाधिको, भवांश्च सर्वैः प्रकारैः प्रिय इति भवानेवानुरोद्धव्यो न तु देह इत्यनुष्ठानाधिकारविचारेणापि भवानेव सेव्य इत्यर्थः. नन्वस्त्वेवं सेव्यत्वं, तथापि देहस्य सेव्यमात्रसाधारणत्वात्तस्य मदेकविनियोगाय किमित्याग्रह इत्यत आहुः **किञ्चे**त्यादि. **भवाय नाशाये**तिवाक्यं तु पञ्चमस्कन्धप्रथमेऽध्याये प्रियव्रतं प्रति ब्रह्मणोक्तम्— "भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदाऽभयाय, सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनताङ्ग धत्त" इति. **अत** इति, अस्मिन्वाक्ये 'अव्यक्तदिष्ट'पदेन भगवद्दत्तत्वं बोध्यम्. **चेतन** इत्यादि. तथा च प्रियव्रतदेहस्य राज्याद्यर्थत्वाज्ञाने यथा ब्रह्मणा स बोधितः, एवमज्ञानेनान्यस्मै दाने ततो

**लेखः**

प्रिये फलसम्पादनार्थं च कर्तव्यतायां सिद्धायामित्यर्थः. देह आत्मा परमात्मा निर्वाहकश्चेति चतुष्टयमुक्तम्. एतच्चतुष्टयरूपत्वं भगवत आहुः **परमे**ति. आद्येन देहरूपत्वमुक्तम्. **आनन्द**पदेनात्मत्वमुक्तम्, आनन्दस्यैव बीजत्वेन सर्वात्मत्वादिति भावः. **बन्धु**पदेन परमात्मोक्तो, अन्तर्यामिणो जीवसखत्वादिति भावः. चतुर्थस्तु स्पष्टएव. **प्रेष्ठ**पदेनैतावद्रूपत्वकथनेन धर्मित्वं [२]सम्पादितम्. तथा च धर्ममूलत्वादपि त्वदनुवृत्तिः कर्तव्येत्यर्थः. **तनुभृतामि**त्यनेन स्वमात्रसम्बन्ध्यपेक्षया सर्वसम्बन्धिनो मुख्यत्वादपि त्वमेव सेव्य इति **किञ्चे**त्यनेनोक्तम्. **किल**पदसूचितां युक्तिमाहुः **चेतनो हीति**. प्रेरणं चेतनस्यैव सम्भवतीति

१. ( ) चिह्नान्तर्गतं प्रभूणां स्यादिति. २. साधितमिति पाठः.

दास्यति, बोधितोऽपि.) यत**स्तनुभृतां** त्वमेव **प्रेष्ठः**. प्रेष्ठाय च देयं प्रियं वस्तु. अत्रार्थे **किले**ति प्रसिद्धिरेव प्रमाणम्. किञ्च न केवलं देहदाता किन्तु **बन्धुर**पि, येन प्रयत्नेन शरीरं बिभर्ति स बन्धुः, **आत्मा** धारकश्च. अतो अन्तरङ्गबहिरङ्गन्यायेन नित्यानित्यन्यायेन वा भवत्सेवैव मुख्या. यदा पुनस्त्वदनुपयोगः, तत्रापि चेत्तथा प्रेरणं, तदान्यस्मै दास्यामो नान्यथेति, धर्मिविचारो धर्मादप्यधिकः. एतच्च त्वदनङ्गीकृतं सर्वमेव विरुद्धं भवतीति प्रार्थ्यते **अस्त्व**ति. सर्वरूपत्वात् त्वमेव सेव्य इति वा. अन्यत्र एकदा सर्वसेवा प्राप्ता अंशतो बाधिता स्यात्, विनिगमना[1]भावाच्च. अनेन स धर्मोऽपि न भवति

---

## टिप्पणी

**अस्त्वेवमेतदि**त्यत्र. **एवमि**त्यस्य विवृतिः **सर्वरूपे**ति, पत्यादिसर्वसेवारूपेत्यर्थः. एवमुक्तौ हेतुमाहुः **अन्यत्रे**त्यादिना. पत्यादिसेवाविधेर्भगवत्सेवाविधायकत्वोक्त्या त्वमेव सेव्य इति पक्षेऽप्युपपत्तिरुक्तेति ज्ञेयम् ॥३२॥

## प्रकाशः

निवार्य स्वसेवार्थं प्रेरणीयाः, नतु विपरीत इति बोधितम्. नन्वस्त्वेवं, तथापि मयेदानीं तथा प्रेर्यत इति तथा प्रियव्रतवत्कर्तव्यमित्यत आहुः **अत** इत्यादि **वस्त्वि**त्यन्तम्. तथा च स हि देहे निरभिमान इति तथा कृतवान्. तदुक्तं तत्रैव "अनवबुध्यमान इव महामना बुभुजे" इति, हृदि तत्त्वं बुद्ध्वा बहि'रनवबुध्यमान इव' देहाभिमानीवेत्यर्थात्. अस्माकं तु देहः प्रियः भवांस्तु प्रियतम इति तथेत्यर्थः. ईदृशेऽधिकारे एतदेव कर्तव्यमित्यत्र प्रमाणमाहुः **अत्रे**त्यादि. प्रेष्ठत्वं विवेक्तुं पदान्तरं **किञ्चे**त्यादि. **येने**ति हेतुनेत्यर्थः ॥३२॥

## लेखः

**हि**शब्दः. चेतनस्तु प्रियं वस्तु प्रेष्ठायैव दास्यतीति भावः. **अत्रार्थे** इति, **चेतनो ही**त्यारभ्योक्तेऽर्थे इत्यर्थः. **येन प्रयत्नेने**ति, **येन** पुरुषेण हेतुना, यदर्थमित्यर्थः. **प्रयत्नेन** करणेनेत्यर्थः. तादृशो **बन्धुः आत्मा धारकश्च** त्वमेवेति शेषः. अत्र न्यायमाहुः **अन्तरङ्गे**ति. शरीरभरणहेतुभूतः शरीरधारकश्चान्तरङ्गो नित्यश्च, शरीरसम्बन्धिनो बहिरङ्गा अनित्याश्चेति बहिरङ्गादन्तरङ्गस्यानित्यान्नित्यस्य वा बलवत्त्वाद्भगवत्सेवैव मुख्येत्यर्थः. **सर्वरूपत्वादि**ति त्वत्सेवाया इति शेषः.

---

१. विनिगमकाभावादिति पाठः.



यः कालादिना बाध्यते अशक्यश्च भवति. न हि प्रमाणं विरुद्धं विधत्ते. अतः पत्यादिसेवाविधायकं च शास्त्रं त्वत्सेवामेव विधत्ते. अतो अनुवादपक्षे स्वतन्त्रविधानपक्षे वा भवत्सेवैवोचितेति भावः ॥३२॥

एवं राजसीनां निरूप्य सात्त्विकीनां निरूपयति **कुर्वन्ति ही**ति.

**कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन्**
**नित्यप्रिये पतिसुतादिभिरार्तिदैः किम् ।**
**तन्नः प्रसीद वरदेश्वर मा स्म छिन्द्या**
**आशां धृतां त्वयि चिरादरविन्दनेत्र ॥३३॥**

यद्यप्युक्तं "मातरः पितर" इति, "मा कृढ्वं बन्धुसाध्वसमि"ति, तत्किमिदं प्रथमतयास्माभिरेव क्रियते आहोस्विदन्येऽपि कुर्वन्ति? तत्रापि किमधमाः मात्राद्यनुवृत्तिं कुर्वन्ति आहोस्विदुत्तमाः? उत्तमा अपि त्वत्सेवायामशक्ताः आहोस्वित् शक्ता इति विचारणीयम्. अस्मिन्नर्थे निर्णायकं महतां चरित्रमाहुः ये **त्वात्मनि कुशलाः** आत्महितार्थिनो, न तु

---

## प्रकाशः

**कुर्वन्ती**त्यत्र. **इदमि**ति निषिध्यमानं बन्धुसाध्वसम्. **तत्रापी**ति साध्वसाकर्तृष्वपि. अत्रापि भगवदुक्तधर्माधिकारिनिर्धारद्वारा विषयनिर्धारएव फलिष्यतीति बोध्यम्. ननु भगवदनुवृत्तेरात्महितत्वसाधनाय भगवत्सेवा आत्महिता, अविगीतमहदाचारविषयत्वात्, शीलादिवदिति वक्तव्यम्; अत्र रतेस्तथात्वसाधने नार्थान्तरमित्यत आहुः **स्नेहेने**त्यादि. अर्थस्तु टिप्पण्यां

## लेखः

प्रथमपक्षे न्यायद्वयेन भगवत्सेवायाः प्रबलत्वमुक्तम्, अत्र तद्रूपत्वमुच्यत इति विशेषः. प्रेष्ठत्वबन्धुत्वात्मत्वकथने पतिसुहृदपत्यरूपत्वं क्रमेणोक्तम्. **अतः पत्यादी**ति. **च**काराद्भगवत्सेवाविधायकमपि. तथा च सर्वं त्वत्सेवामेव विधत्ते, अन्यसेवां तु रागतः प्राप्तामनुवदतीत्यर्थः. **अत** इति. उभयसेवाविधानेऽपि पत्यादिसेवाया अंशतोबाधितत्वाद्रागतः प्राप्ता सानूद्यते, भगवत्सेवैव विधीयते इति पक्षे विहितत्वात्त्वं सेव्यः. स्वतन्त्रतया पतिसेवापि विधीयत इति पूर्वव्याख्यानपक्षे धर्मप्रमादिप्रयोजनार्थं त्वं सेव्य इत्यर्थः ॥३२॥

**राजसीनामि**ति, वाक्यमुभयत्रापि शेषः. **कुर्वन्ति ही**त्यत्र. **आत्मनि कुशला** इति कथनात् स्वार्थं पूजां कुर्वाणाः पूजामार्गीया अत्रोच्यन्ते. तेषां

देहेन्द्रियाणां, ते **त्वय्येव रतिं कुर्वन्ति,** स्नेहेन हि क्रिया भवति, भगवत्कृतमेव जीवगामि भवतीति. तदुपपादितं "तच्चात्मने प्रतिमुखस्ये"त्यत्र. प्रीत्या च सेवा भवति. यदि पुत्रादिसेवापि धर्मः स्यात् तदा पुरुषार्थत्वेनात्मपर्यवसायिनी स्यात्. **कुशला** इत्यनेन तेषां कौशलमेतत्. प्रवृत्त्यपेक्षया निवृत्तिरुत्तमा,

## टिप्पणी

**कुर्वन्ति हीत्यत्र, स्नेहेन हीत्यादि.** क्रियायाः स्नेहसमानविषयकत्वस्यौत्सर्गिकत्वादात्मनएव निरुपधिस्नेहविषयत्वाद् भगवति कृतस्यैव च तद्गामित्वात् त्वय्येव रतिं कुर्वन्तीत्यर्थः. अत्रौपाधिकस्नेहकथनस्यायं हेतुः— भगवता हि स्वातिरिक्ते स्वात्मौपाधिकी प्रीतिर्जीवस्येति पक्षमाश्रित्योक्तम्. स्वामिन्यस्तु वादिरीत्या प्रतिवादिमतमङ्गीकृत्य[१] प्रौढ्या तत्पक्षं निराकुर्वन्तीति

## प्रकाशः

प्रभुचरणैरेव विवृतः. तथा च रतेस्तथात्वसाधनेनैव सेवायास्तथात्वसिद्धिरित्येवं साधनं न दोषायेत्यर्थः. नन्वत्रात्महितार्थिनस्त्वयि रतिं कुर्वन्तीति कथनेन "न वा अरे देवानां कामाय देवाः प्रिया भवन्ति, आत्मनस्तु कामाय देवाः प्रिया भवन्ती"तिश्रुत्युक्तन्यायेनौपाधिकप्रीतिप्राप्तौ सर्वात्मभाववत्त्वभङ्गप्रसङ्ग इत्यतष्टिप्पण्यामाहुः **अत्रौप(पा!)धीत्यादि.** ननु मास्तु पुत्रादौ प्रीतिः तथापि धर्मत्वेन नित्यकर्मवदिदमपि कर्तव्यमित्यतः सुबोधिन्यामाहुः **यदीत्यादि.** भगवति रतिकरणेन कथमात्मकुशलत्वमित्यपेक्षायां तदुपपादयन्ति **तेषामि-**

## लेखः

रतिकरणे हेतुमाहुः **स्नेहेन हीति.** आत्महितार्थं भगवद्विषयिणी क्रिया आवश्यकी, सा तु रतिं विना न सम्भवतीति रतिं कुर्वन्तीत्यर्थः. तर्हि स्नेहक्रिययोः समानविषयकत्वनियमाद्भगवद्विषयकएव स्नेहः सिध्येत् नात्मविषयक इत्याशङ्क्य औत्सर्गिकत्वं टिप्पण्यां विवृतम्. भगवत्यौपाधिको, मुख्यस्त्वात्मन्येव स्नेह इति भावः. ननु भगवत्सेवाया इव पुत्रादिसेवाया अपि प्रमाणबोधितत्वादात्महितार्थं सापि भवेदित्यत आहुः **प्रीत्या चेति.** पुत्रादिषु सेवामात्रं विहितं, न तु प्रीतिः. तया विना च सा न भवतीत्यर्थः. तर्हि प्रीतिराक्षेपलभ्या स्यादित्याशङ्क्य तस्य धर्मत्वमपि नास्तीत्याहुः **यदीति.** अतस्तत्र न चोदना किन्तु रागतः प्राप्ताया अनुवाद इति भावः. **अन्यगामीति,**

१. 'मप्यङ्गीकृत्य मू. पा.



इन्द्रिय(यं!)दमनसामर्थ्याभावएव अन्यगामि कर्तव्यं, "यतो यतो निवर्तेते"त्यत्र निरूपितम्. निरुद्धानीन्द्रियाण्यात्मगामीनि भवन्ति. तत्राप्यात्मगामीनि तदैव भवन्ति यदि त्वदर्थमुपयुक्तानि भवन्ति. अतः केवलनिग्रहकर्त्रपेक्षया ये **त्वयि रतिं कुर्वन्ति** ते **कुशला** इति हिशब्दार्थः. **त्वयी**त्येकवचनेन च पूर्ववदेकत्र सर्वसंभवो निरूपितः. किञ्च भवान् **स्वात्मा** स्वरूपभूतः, नत्वध्यासन्यायेन तथा जातः. किञ्च प्रियस्य हि सेवा कर्तव्या, स चेत् प्रियः कालपरिच्छेद्यो न भवति. स भवानेव. अन्यथा जारसेवापि धर्मः स्याद्, जन्मवत् दिनस्यापि

## प्रकाशः

त्यादि. **अन्यगामी**ति इन्द्रियमिति शेषः. अत्र प्रमाणमाहुः **यत** इत्यादि. इदं वाक्यमेकादशस्थम्— "यतो यतो निवर्तेत विमुच्येत ततस्ततः, एष धर्मो नृणां क्षेमः शोकमोहभयापह" इति. अत्र हि "यतो यतो निवर्तेते"ति कथनात् निवर्तनसामर्थ्याभावेऽन्यगामिकर्तव्यतायाः प्राप्तिः, निवृत्तौ विमुक्तिकथनान्निरुद्धानामात्मगामिताप्राप्तिर्बोध्या. निवृत्तेरुत्तमत्वेऽपि न तन्मात्रकृतावेव कौशलपर्यवसानम् अपि तु साधनविशेषेण तथा कृतावित्याशयेनाहुः **तत्रापी**त्यादि. इदं च द्वितीयस्कन्धे "यदंघ्र्यनुध्याने"त्यादौ स्फुटं भवति. **पूर्ववदि**ति पूर्वश्लोक इवेत्यर्थः. एवमिदं वादमुद्रया औपाधिकप्रीतिपक्षमङ्गीकृत्य हीनाधिकारविचारेऽपि तेषां कौशलनिरूपणेन विषयो निर्धारितः— अकुशलैरेव बन्धुसाध्वसं न कार्यं मात्राद्यनुवृत्तिश्च कार्येति. अतः परं सिद्धान्तरीत्या कौशलं तदर्थं निश्चिन्वते **किञ्च भवानि**त्यादि. तथा च "परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष" इत्यादिश्रुतिभिः "स एव सर्वं परमार्थभूत" इत्यादिस्मृतिभिश्च तथात्वात् त्वद्रतिकर्तृत्व एव ज्ञानकौशलं नान्यथेति एतदज्ञातॄणामेव तदकरणादिकमित्यर्थः. अतः परं सेव्यविचारेणापि कौशलं समर्थयन्ति **किञ्च प्रियस्ये**त्यादि. तथा च "नाल्पे सुखमस्ति, भूमैव सुखमि"त्यादिश्रुतिभिस्तथेत्यर्थः. ननु भूमप्राप्तेः पूर्वमनिषिद्धे सुखसाधनेऽपि प्रवृत्तिदर्शनात् कुतोऽयं नित्यप्रियसेवानिर्बन्ध इत्यत आहुः **अन्यथे**त्यादि. तथा च यद्ययं निर्बन्धो न शास्त्राभिप्रेतः स्यात् तर्हि तथा

## लेखः

इन्द्रियं पत्यादिगामि कर्तव्यमित्यर्थः. **अध्यासन्यायेने**ति, देहेन्द्रियादीनामात्मत्वन्यायेनेत्यर्थः. **स्व आत्मन्नि**त्यस्यावृत्तिः ॥३३॥

परिच्छेदकत्वात्. किञ्च **पतिसुतादयश्च न** धर्महितवो भवितुमर्हन्ति, यतः

## टिप्पणी

न कश्चिद्दोषः. **नित्यप्रिय** इत्यत्र, **अन्यथा जारसेवापी**त्यादि. ननु धर्मत्वे विहितत्वस्य प्रयोजकत्वादत्र तदभावान्न तथेति चेद्, उच्यते. प्राग्जन्मनि विवाहिते पुंसि जीवति पुरुषान्तरेण विवाहे दोषाकथनात्तत्र जन्मावच्छेदकमिति वाच्यम्. एवं सत्येतत्समानयोगक्षेमत्वाद्दिनस्यापि तथात्वं सुवचम्. न च तत्र पतित्वाभावान्न तथेति वाच्यं, "स वै पतिः स्यादकुतोभयः स्वयं" "जीवच्छवं भजति कान्तमतिर्विमूढा या ते पदाब्जमकरन्दमजिघ्रती स्त्री"त्यादिवाक्यैः कालभयवति पतित्वाभावेनोभयोस्तुल्यत्वात्. एवं सति पतिभजनं विदधच्छास्त्रं हरिसेवामेव विधत्ते. प्रभोर्दुरापत्वेन व्यवहारनियमार्थं परं तथा स्मृत्यादिषु कथनमिति भावः. अतएव वाग्दत्तापि कन्या ततः श्रोत्रिय उपपन्ने तस्मै दीयते न पूर्वस्मै. **वरदेश्वरे**ति सम्बोधनेन व्यञ्जितमर्थमाहु**रतो वयं क्लिष्टा** इत्यादिना ॥३३॥

## प्रकाशः

स्याद्, यदि तथा स्यात् तदा तदभ्यनुज्ञापि स्यादित्यर्थः. तदेतट्टिप्पण्यामुद्भाव्य साधयन्ति **नन्वि**त्यादिना. **एतत्समानयोगक्षेमत्वाद**िति, नित्ये परिच्छिन्ने समागमस्यैव जन्मत्वात् स यथा जन्मान्तरे तथा प्रत्यहमपि, सुषुप्तौ भगवति लीनस्यैव जीवस्य प्रत्यहं पुनरागमनस्य "सर्व एवात्मानो व्युच्चरन्ती"त्यादि-श्रुतिसिद्धत्वान्नित्यप्रलयसिद्ध्या देहस्याप्यवस्थाभेदेन भेदाल्लिङ्गशरीरस्य चामुक्त्येकत्वेनाप्रयोजकत्वात्तथेति भावः. यद्येवं तर्हि स्मृतिः कथं लौकिकपति-भजनं विधत्त इत्यत आहुः **प्रभोरि**त्यादि. तथा च पत्यौ विष्णुबुद्ध्या सेवनस्य विधानदर्शनाद्गौणपक्षमाश्रित्य व्रीह्यभावे नीवारवत् तदंशसत्तया तत्र तथा विधानमित्यर्थः. अत्र गमकमन्यदाहुः **अतएवे**त्यादि, यतो गुणाधिक्यएव पतित्वमतएवेत्यर्थः. तथा च जारे विधिबोधितगुणाभावेन दोषाधिक्येन च न गौणमपि तदिति न तत्सेवायां गौणधर्मत्वमपीति भावः. एवमत्र धर्मविचारकाणां ज्ञातॄणाम् आनन्दविचारकाणां च चरित्रस्य निर्णायकत्वकथनेन भगवदुक्त-वाक्यतात्पर्यं निर्धारितम्. अतः परं तद्दाढ्यार्थं पुरस्फूर्तिकेऽर्थे

## योजना

**कुर्वन्ति** हीत्यत्र. **जन्मवद्दिनस्यापी**ति. एतदर्थष्टिप्पण्यां स्फुटः ॥३३॥



**आर्तिदाः**. न हि धर्मनिमित्तानि कदाचित् दुःखदानि भवन्ति, अन्यथा संसारो न स्यात्. अतस्तैः **किं** तेषां भयमस्तु अन्यद्वा, न तैः किञ्चित्प्रयोजनमित्यर्थः. परमेकमेव प्रार्थनीयं, यदभावे सर्वं शास्त्रं युक्तिश्च व्यर्था स्यात्. तदाहुः **तत्** तस्मात् **प्रसीद** त्वं प्रसन्नो भव. त्वदप्रसादादेव लोका भ्रान्ताः दुःखहेतुष्वपि प्रवर्तन्ते. ननु किं साधनं प्रसादे भवतीनामिति चेत्, तत्राहुः **वरदेश्वरे**ति. ये हि वरान् प्रयच्छन्ति ते लोकानां क्लेशं ज्ञात्वा, यतो दयालवो, अन्यथा तपसि क्रियमाणे वरं न प्रयच्छेयुः. तेषामपि त्व**मीश्वरो**ऽतिदयालुः. तद्द्वारापि सर्वेषां दुःखशमनं करोषि. अतो वयं क्लिष्टाः. क्लेशएव साधनं तपोवत्. निषिद्धप्रकारस्तु यद्यत्र कश्चन भविष्यति, स न कर्तव्यः. ननु यथैतावन्तं कालं पतिसेवा कृता एवमेवाग्रेऽपि कर्तव्या, प्राप्तत्वात्, गौणमपि कर्म समारब्धं समापयेदिति, तस्मादविचार्यैव पतिसेवां कुरुतेति चेत्, तत्राहुः **मा स्म छिन्द्या आशां धृताम**िति. नास्माभिः पतिसेवा कृता तदर्थं वा स्थितम्. त्वदाशया स्थितं, मध्ये स्थितिनिर्वाहार्थमेव तदङ्गीकारः. इदानीं चेत् समागतानामभिलषितार्थो न सिध्येत्, तदा आशा भग्ना भविष्यति. तस्यां गतायां प्राणाएव गमिष्यन्तीति. अतएव केनचित् स्त्रीहृदयज्ञेन निरूपितम् "आशाबन्धो हृदयं रुणद्धी"ति. एतस्य मूलमपि स्त्रीशास्त्रे भविष्यति. **चिरात् त्वय्येव धृतां**, तस्यां छिन्नायाम् अवलम्बनाभावाद् अधः पतिष्याम इति. **स्मे**त्ययमर्थः प्रसिद्धः. **अरविन्दनेत्रे**ति सम्बोधनं दृष्ट्यै-वाप्यायकत्वं निरूपयति. [१](आशाहेतुरप्यनेनोक्तः, तापहारकदृष्ट्या दर्शनाद्, भावोद्गारिण्याएव तथात्वात्. इयदवधि जीवनमप्यतएवेति भावः) ॥३३॥

यदुक्तं "वनदर्शनार्थं किमागता" इति, ततश्च वनवर्णना कृता, तत्राहुः **चित्तं सुखेने**ति.

**चित्तं सुखेन भवतापहृतं गृहेऽपि**
**यन्निर्विशत्युत करावपि गृह्यकृत्ये ।**

## प्रकाशः

दोषं दर्शयन्ति **किञ्च पती**त्यादि. **अन्यथे**ति धर्महेतुत्वे. "धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पत" इत्यत्र तथा निर्णयादित्यर्थः ॥३३॥

१. ( ) चिह्नान्तर्गतं प्रभूणाम्.

**पादौ पदं न चलतस्तव पादमूलाद्-**
**यामः कथं व्रजमथो करवाम किं वा ॥३४॥**

वनदर्शनेच्छा तदा भवति यदा **चित्तं** स्वस्मिन् तिष्ठेत्, तत्तु त्वयैव**ापहृतम्.** तत्रापहारे न तव प्रयासः, तथा सति सर्वं नापहृतं स्यात्, तदाह **सुखेने**ति. **भवता** वा आनन्द**रूपेणापहृतं,** न हि साक्षात् परमानन्दे सति कश्चित् परम्परया पाक्षिकं साधनं गृह्णाति. वनदर्शनं दूरे, **गृहेऽपि यच्चित्तं निर्विशति.** अनेन ज्ञानशक्तेरपहार उक्तः. नापि मन्तव्यं वनं किञ्चित् कार्यार्थमागता इति, तदर्थं क्रियाशक्तेरप्यपहारमाह **उत करावपी**ति, यौ **गृह्यकृत्ये निर्विशतः,** दूरेणापास्तं वनकृत्यं, कामेन बलस्य हृतत्वात्. त्वत्स्पर्शेनैव करौ सजीवौ भवतः, नो चेन्मृतौ. अतः सेवाविधिरपि हस्ताभावात् कुण्ठितः, न हि कररहितं कर्मणि कश्चिन्नियुंक्ते. किञ्च यद् व्याघुट्य गन्तव्यमित्यभिप्रायेण "वनदर्शनं जातमि"त्युक्तं तदप्यसम्भावितं, यतोऽस्माकं **पादौ** द्वावपि **तव पादमूलाद**स्मात् स्थानाद् एकमपि **पदं न चलतः** नान्यत्र गच्छतः. पादानां गतियुक्तानां मूलभूतौ त्वत्पादौ, तस्यापि चेन्मूलं गताः तदा कथमन्यत्र गच्छेयुः? अन्यथा वृक्षाणामपि गतिः स्यात् मूलं गतानाम्. "अस्मात् स्थानादि"ति वक्तव्ये यत् **तव पादमूलादि**त्युक्तं, तत् त्वद्गमनेन सर्वत्र गन्तुं शक्यते न तु त्वद्व्यतिरेकेणेति ज्ञापितम्. अतः **कथं यामः?** शकटादिना प्रेषणीया इति चेत्, तत्राहुः **अथो** अथ तत्र गत्वा **किं वा करवाम?** यथा शकटादिकं गृहे यात(!?)नार्थं साधनमस्ति, न चैवं

**प्रकाशः**

**चित्तं सुखेने**त्यत्र. मनस इव करयोरपहरणं न संभवतीति तत्प्रकारमाहुः **कामेने**ति, भगवदभिलाषेणेत्यर्थः. **अनेने**ति क्रियाशक्त्यभावकथनेनेत्यर्थः.

**लेखः**

**चित्तमि**त्यत्र. **पादानामि**ति, पादौ गोलकं गतिरिन्द्रियमिति सेन्द्रियाणां गोलकानाम् आधिदैविकौ विष्णुरूपौ त्वत्पादावित्यर्थः, अस्मदाधिदैविकानां

**योजना**

**चित्तं सुखेन भवते**त्यत्र **भवता वा आनन्दरूपेणापहृतमि**ति. अस्मिन् पक्षे **सुखेन भवते**त्यत्राभेदेनान्वयः; सुखरूपेण भवतेत्यर्थः, "यो वै भूमा तत्सुखमि"ति श्रुतौ ब्रह्मणः सुखरूपताकथनात् ॥३४॥



हस्तयोः कार्यकरणे किञ्चित् लोकसिद्धम्. न केवलं गमनेन प्रयोजनं किन्तु पित्रादिसेवार्थं गमनं, तदभावाद् व्यर्थमेव गमनमिति भावः. तदाहुः **अथो** अथ **किं वा करवामे**ति. हस्तनिरपेक्षा कृतिः भिन्नप्रक्रमेण भगवद्भावेन भवतीति तथोक्तम्. अनेन स्तनपानमप्यशक्यं निरूपितम्, आशाऽभावे सर्वत्रैव शोषात् ॥३४॥

यद्भगवता "शीघ्रं गच्छते"त्युक्तं तत्राहुः **सिञ्चाङ्गे**ति.

**सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण**
**हासावलोककलगीतजहृच्छयाग्निम् ।**
**नो चेद्वयं विरहजाग्न्युपभुक्तदेहा**
**ध्यानेन याम पदयोः पदवीं सखे ते ॥३५॥**

वयं शीघ्रमेव गमिष्यामो, यदि त्वं प्रतिबन्धं न करिष्यसि. अनेन तूष्णींभावेऽपि मरणं, परावृत्तौ तु न किञ्चिद्वक्तव्यम्. हे **अङ्ग! त्वदधरामृतपूरकेण**

**टिप्पणी**

**सिञ्चाङ्गे**त्यत्र. अत्र सिञ्चनस्यावश्यकत्वे हेतुरुत्तरार्धेनोच्यते. तत्रापि **याम** इति वर्तमानप्रयोगेण स्वजीवनस्य क्षणमात्रमपि तद्विलम्बासहिष्णुत्वं ज्ञाप्यते. एवं सत्येतत्कालीनं जीवनमुक्तिश्च प्रियकृतस्वसम्भाषण-जनितमेवे-त्यन्यथानुपपत्त्या कल्प्यते. यद्यप्युत्तरदानसमये न तदस्ति, तथापि पूर्ववचनाना-मुत्तरदानार्थमेव हृदि स्थापितत्वात्तदनन्तरं तदभावे सति चेत्साक्षात्सुधादान-मन्ततो भाषणमपि वा न भवेत्तदोक्तैव रीतिर्भवित्रीति हृदि कृत्वा पितृचरणैरुक्तं **वयमि**त्यारभ्य **वक्तव्यमि**त्यन्तम्. **नो चेद्वयमि**त्यत्र, **हरेणैव**

**प्रकाशः**

ननु ते स्वतएव पास्यन्तीत्यत आहुः **आशे**त्यादि ॥३४॥

**लेखः**

भगवद्गोलकत्वात्. ननु कराभावेऽत्रापि स्थित्वा किं कर्तव्यमित्यत आहुः **हस्ते**ति, अत्रत्य**कृति**स्तु **हस्तनिरपेक्षा** इन्द्रियजन्या न भवतीत्यर्थः. तत्र हेतुः **भगवद्भावेने**ति, भगवदावेशेन भवतीत्यर्थः. सा भिन्नप्रक्रमेण कृतिस्तत्र न सम्भवति, अतस्तत्र गत्वा किं करवामे**त्यथो** इत्यस्यार्थ उक्तः ॥३४॥

**सिञ्चाङ्गे**त्यत्र. विधेर्बलवदनिष्टाननुबन्धित्वात्तदनिष्टमुत्तरार्धोक्तं विवृण्वन्ति **अनेने**ति. **अधरामृतपूरस्य कं** जलं तेनेति विग्रहमभिप्रेत्याहुः

त्वदधरामृतप्रवाहजलेन **नो हृच्छयाग्निं सिञ्च,** स चाग्निः त्वयैवोत्पादित इति. तत्कारणमाहुः **हासावलोककलगीतजे**ति, तव योऽयं **हास**पूर्वकः **अवलोकः कलगीतं** च, ताभ्यां **जातो** यो **हृच्छयः** कामः, स **एवाग्निः.** हासः कामजनकः, अवलोकः सन्धुक्षणकर्ता, गीतं वायुरिव; तत्रापि कलगीतं सर्वतो वायुः. सोऽपि जातो हृदये. हृदयगामि च त्वदधरामृतमेव. पूरो हि वस्तु प्रवाहयति, तस्यात्र सिञ्चनकरणत्वेनोक्त्याऽग्नेरतिमहत्त्वं ध्वन्यते. अतो युक्ता सिञ्चनोक्तिः. अलौकिकश्चाग्निः अलौकिकेनैव शाम्यति. कन्दर्पो हि मृतो ज्वलति, स हि जीवन् अग्न्यवस्थां त्यजति, नान्यथा. अमृतेनैव च जीवति, तत्रापि न देवभोग्येन, अन्यथा तैरेव जीवितः स्यात्. सृष्टिकारणत्वात् नास्य मोक्षः. अतोऽतिगुप्तेनैवाधरामृतेन तस्य जीवनम्. अतः सिञ्चनमेवोक्तम्, अन्यथा निर्वापणमेव प्रार्थयेयुः. कामे जीवति जीविष्यामः, अन्यथा स स्वयं ज्वलन् अन्यानपि ज्वालयिष्यति. तदाहुः **नो चेदि**ति. सिञ्चनेन यदि मन्त्रवादीव न जीवयिष्यसि, तदा **विरहेण जनितो योऽग्निः तेनोपभुक्तदेहाः ध्यानेन ते पदयोः पदवीं यामः.** स्वयं स्वतन्त्रमार्गाज्ञानात् त्वं च सखा येन मार्गेण गमिष्यसि तेनैव **वयम**पि यास्यामः. [१](यथा त्वमधुनास्मभ्यमार्तिप्रदः तथा वयमपि तथाभूतास्तुभ्यं पश्चात्तापादिहेतवो भविष्याम इति गूढाभिसन्धिः **ते पदयोः पदवीं यामे**ति वक्त्रीणामिति ज्ञेयम्.) देहे गते त्वन्तर्यामिणा

**प्रकाशः**

**सिञ्चाङ्गे**त्यत्र. ननु यथा पित्तादिना हृदये तापो बहिश्चन्दनादिपूरेण शाम्यते, तथायमपि [२]बाह्यैः शमनीय इत्यत आहुः **अलौकिक** इत्यादि. कथमस्यालौकिकत्वमित्याकांक्षायां तथात्वं व्युत्पादयन्ति **कन्दर्पे**त्यादि. नन्वेवं सति मोक्षोऽस्य देय इत्यत आहुः **सृष्टी**त्यादि. एतत्सृष्टिकारणत्वादस्य मोक्षे इयं सृष्टिरेवान्यथा स्यादित्याशयेन फलितमाहुः **कामे**त्यादि. ननु देहाभावे मत्पदपर्यन्तमपि कथं गन्तव्यमित्यत आहुः **देहे**त्यादि. "तं विद्याकर्मणी

**लेखः**

**प्रवाहजलेने**ति. **त्वदधरामृतमेवे**ति, देवभोग्यममृतं नास्मद्धृदयगामि भवती**त्येव**कारः. **ज्वलन्नि**ति, विरहजत्वाद्धृच्छयत्वं विहायाग्निरूप एव सन्नित्यर्थः. पदयोः पदवीं विवृण्वन्ति **देहे** इति, यत्रान्तर्यामिणा गन्तव्यं सा

१. ( ) चिह्नान्तर्गतं प्रभूणाम्. २. करस्पर्शादिभिः.



क्वचिद्गन्तव्यं, देहान्तरस्य तु नोत्पत्तिः, बीजस्य दग्धत्वात्. हरेणैव दग्धो न कामः प्ररोहति, स विपरीतो रहो भवति. तत्रापि विशिष्टो विरहः एकान्ता-

**टिप्पणी**

**दग्ध** इत्यादि. 'वियोगा'दिपदमनुक्त्वा **विरह**पदं यदुक्तवत्यस्तज्ज्ञापितं भावविशेषमाहुः **स विपरीत** इत्यादि. अयमग्निर्न पूर्वोक्तः, तथा सति पुनरग्न्युक्तिर्न स्यात्. तथा च पूर्वस्मादस्य कठिनत्वं वाच्यम्. तदाहुर्नामव्युत्पत्त्या. हरदग्धः कामोऽग्न्यवस्थोऽप्यस्ति, उक्तामृतेन जीवेदपि. अनेन तु दग्धः क्षणेनैव भस्मसाद् भवति पदार्थः, पुनर्जीवनाशारहितश्च. उक्तरूपदाहकर्तृवाचकपदस्थवर्णवैपरीत्येनैतद्वाचकपदस्थवर्णयोरेतद्वाच्ये तद्विपरीतधर्मवत्त्वं लक्ष्यते. सोऽस्माभिरुक्तो'ऽनेन त्वि'त्यादिना. **एव**कारोऽप्यर्थे. तथा चोक्तरूपदाहकर्त्रा हरेणापि दग्धो यत्र कामोऽधुनापि न जीवति, तत्रोक्तरूपेण दग्धाः कथं पुनर्जीवियुरिति भावः. पूर्वं सिञ्चनेन[१] जीवनकर्तृत्वलक्षणोऽपि तद्विपरीतो धर्म उक्त इति प्रभुस्वरूपमेवात्र **रहः**पदेनोच्यते. तत्स्वतएव समर्थं, तत्रापि कोटिकन्दर्पाधिकलावण्येन विभावानुभावादिसामग्र्या च

**प्रकाशः**

समन्वारभेते पूर्वप्रज्ञा चे"ति श्रुत्युक्तस्य देह**बीजस्य** अन्तर्गृहगतानामिव ध्यानेन **दग्धत्वाद्** देहान्तरानुत्पत्तौ अन्तर्यामी खगत्वादुड्डीय त्वत्पादयोरेवायास्यति, अक्षरस्य तद्धामत्वात्तदा तच्छायारूपा वयमपि तेन सहभूतास्तत्रैवैवं समायास्याम इति भावः. ननु दाहानन्तरं परीक्षितीव भवतीषु जीवनं सम्पादयिष्यामीति चेत्तत्राहुः **हरेणे**त्यादि **विशिष्टो विरह** इत्यन्तेन. तत्तात्पर्यमाहुष्टिप्पण्यां **वियोगे**त्यादिना. **अस्ती**ति, नतु भस्मीभूय नष्ट इत्यर्थः. अस्मिन्नग्नौ पूर्वोक्ताग्निविपरीतधर्मवत्ताज्ञानप्रकारमाहुः **उक्तरूपे**त्यादि. तथा च यदि तव जीवनसम्पादनेच्छा स्यात् तदा नानेन दाहं सम्पादये. अतो "भ्रमति भवानबलाकवलाये"ति गीतगोविन्दोक्तएव न्यायोऽत्र तवाभिप्रेत

**लेखः**

भगवत्पदवीत्यर्थः. **बीजस्ये**ति, वासनादेहस्य विरहजाग्न्युपभुक्तत्वादित्यर्थः. 'दग्ध'पदं विहा**योपभुक्ते**ति कथनेन वासनात्मकस्यापि दाहः सूचित इति भावः ॥३५॥

१. सेचनेन मू. पा.

भावरूपो वा. अनेन त्वया सह एकान्ताभावे विरहत्वम्. यद्यपि पूर्वोक्ताग्निनैव दाहः सम्भवति तथापि भस्मसात्करणे न तस्य सामर्थ्यं, यावत् सर्वाङ्गेषु सूक्ष्मावयवेष्वप्यग्निः प्रविश्य नोद्बुद्धो भवति. यथा वह्निसम्बन्धेन शुष्कं काष्ठं ज्वलति. तत उपाधेरत्यन्तं गतत्वात् ते पदयोर्गमनम्. अतो गमनं दूरापास्तं प्रत्युत मरणमुपस्थितमिति शीघ्रं प्रतीकारं कुरु ॥३५॥

किञ्च यदप्युक्तम् "अथवा मदभिस्नेहाद् आगता" इति, यदस्माकं स्नेहः स्तुतः, तत्र याथार्थ्यं शृण्वित्याहुः **यर्हीति**.

**यर्ह्यम्बुजाक्ष तव पादतलं रमाया**
**दत्तक्षणं क्वचिदरण्यजनप्रियस्य ।**
**अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमञ्जः**
**स्थातुं त्वयाभिरमिता बत पारयामः ॥३६॥**

हे **अम्बुजाक्ष** दृष्ट्यैव तापनाशक, **यर्हि** यस्मिन् क्षणे **तव पादतलं अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमञ्जः** सामस्त्येनापि **स्थातुं पारयामः**. साक्षात्

## टिप्पणी

विशिष्टं किं किं न कुर्यात्! एतदेवोक्तं **तत्रापि विशिष्टो विरह** इत्यनेन. लोकप्रसिद्धमर्थमाहु**रेकान्ताभावेति**. ननूक्तरूपत्वे कदाचिदपि सुखदत्वं न स्यादित्याशंक्य श्लिष्टार्थकोऽयं प्रयोग इत्याशयेनाहु**रनेन त्वये**त्यादिना. स्वरूपस्यैव विरहत्वमित्यर्थः. शृङ्गाररसस्य संयोगविप्रयोगात्मकत्वात्तद्रूपत्वा-त्प्रभोस्तथात्वं युक्तमिति भावः. **ततः** काष्ठाद् **उपाधेरार्द्रेन्धन**त्वस्य. दार्ष्टान्तिके स्वरूपातिरिक्तः स्नेहहेतुरुच्यते. तेन सोपधिस्नेहे त्वनेवंभाव इति भावः सूच्यते ॥३५॥

## प्रकाशः

इति भावः. एतं न्यायं प्रतिरुन्धाना आहुः **लोके**त्यादि. तथा चावस्थाभेदेन स्वरूपस्यैव तथात्वादत्राप्रतीकारएव तथा न्यायो न तु प्रतीकार इत्यर्थः. **आर्द्रेन्धनत्वस्ये**ति, अत्र विशेषणाभावप्रयुक्तो विशिष्टाभावो बोध्यः ॥३५॥

## योजना

**नो चेद्वयं विरहजाग्न्युपभुक्ते**त्यस्य विवृतौ **हरेणैव दग्ध** इत्यारभ्य **विरहत्वमि**त्यन्तम्. एतस्यार्थष्टिप्पण्यां स्फुटः ॥३५॥



चरणस्पर्शो दुर्लभो, यत्र पुनः पादः प्रतिफलितः **तत्पादतलमु**च्यते. रमापि तेनैव जीवति. तदुक्तं नागपत्नीभिः "तवांघ्रिरेणुस्पर्शाधिकारः यद्वाञ्छये"ति. अतस्तत् फलस्थानीयम्. **रमायाः क्षणं** सुखं तेनैव **दत्तं** क्वचिद् हृदये समागतं, सुखं तत्रैव भवतीति. तत्र स्पर्श एवास्माकं भूमिष्ठस्य, न तु लक्ष्मीवद् हृदये तत्तलमायाति. अस्माभिर्विचारितं– लक्ष्म्या चेदेतत्प्राप्तं तपसा चाञ्चल्यपरिहारेण, तदास्माभिरपि चाञ्चल्यपरिहारेण तन्निष्ठतया स्थातव्यम्. किञ्च **अरण्यजनाः प्रियाः** यस्य. तेनापि सर्वसङ्गपरित्यागेन स्थातव्यम्, सङ्गाभावएव भगवत्तोषहेतुरिति. अरण्यं हि सात्त्विकं वैष्णवं च.

## टिप्पणी

**यर्ह्यम्बुजाक्षे**त्यत्र, **तल**विशेषणोक्तितात्पर्यमाहु**रस्माभिर्विचारित-मि**त्यादि. "भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया तदध्यवस्यत् कूटस्थो रतिरात्मन्यतो भवेदि"तिवद्रमा वेदार्थं विचार्य– निर्दोषपूर्णगुणएव सेव्यः, स च भगवानेव, स च निर्दोषेणैव सेवितुं शक्य इति निश्चित्याधि-दैविकाध्यात्मिकदोषावप्यपहाय– तं वव्र इति तथा. **अरण्यजने**त्यत्र. ननु चाञ्चल्यत्यागोक्त्यैवान्यसंगत्यागोऽप्युक्त एवेति **तेनापी**ति ग्रन्थो न युक्त इत्यत आहुः **संगाभाव एवे**ति. पूर्वं दोषाभाव उक्तोऽधुना प्रीतिहेतुर्गुण

## प्रकाशः

**यर्ह्यम्बुजाक्षे**त्यत्र. टिप्पण्यां **भगवानि**त्यादिना विचारात्मकतया ज्ञानमयं तप **आधिदैविकाध्यात्मिकदोषावि**त्यादिना च "यद्वांछया श्रीर्ललनाचरत्तपो विहाय कामान् सुचिरं धृतव्रते"त्यत्र 'ललना'पदोक्तः स्त्रीस्वभाव **आधिदैविकः** त्यक्तत्वेनोक्ताः मनोभिलाषरूपाः कामा **आध्यात्मिकः**, तौ विवृतौ. एतौ च सुबोधिन्यां **चाञ्चल्य**पदेनैव संगृहीतौ ज्ञेयौ. श्रीश्चात्र सात्त्विकी शक्तिः न तु ब्रह्मानन्दरूपा शक्तिरिति तत्रैव विवृतम्. **तेनापी**ति हेतुनेत्यर्थः.

## लेखः

**यर्ही**त्यत्र. **तेनैवे**ति, स्वहृदये प्रतिफलितेन पादेनेत्यर्थः. **यद्वाञ्छयेतीति**, हृदि पादस्थापनेऽङ्घ्रिरेणुस्पर्शो भवतीति भावः. **तदि**ति पादतलमित्यर्थः. **तत्तलमि**ति, अस्मद्धृदये पादप्रतिफलनं न जायते इत्यर्थः. गाढभावेन स्थापने तथा भवतीति भावः. **तपसे**ति, "कामत्यागस्तपः स्मृतमि"ति वाक्यसिद्धेनेत्यर्थः. "विहाय कामानि"ति 'धृतव्रते'ति च कथनादिति भावः. **तन्निष्ठतये**ति,

¹(एतेन पुलिन्दीस्मारणं वा, पादतलसम्बन्धिकुङ्कुमसम्बन्धेनैव ता अपि प्रिया आसन्निति. तेन पादतलस्य फलपर्यवसायित्वं प्रभुप्रीतिसाधकत्वं च सहजमिति वयमप्यात्मनि तथैव जानीम इति भावः. स्फुटमिदं न वक्तुं शक्यमित्येवमुक्तम्.) अतः त्वत्प्रास्यर्थं नान्यसमक्षं स्थातुं शक्नुमः. सर्वथा त्वां यो न प्रपन्नः, ²शक्त्यभावः तद्धर्मप्रवेशात्. यो हि यस्य घातकः तद्भावापत्तौ तस्याग्रे स्थातुं न शक्तो भवति, यथा व्याघ्राग्रे देहाभिमानी तथा भगवदीयः, भगवद्व्यतिरिक्तो हि तद्भावं नाशयिष्यतीति. यत्रैवं

## टिप्पणी

उच्यते इति न तथेति भावः. अतएव मूले प्रीतिरुक्ता. **अन्य**पदार्थमाहुः **सर्वथे**ति. **तद्धर्मे**ति भगवद्भावप्राकट्यादित्यर्थः. **सर्वदैव स्वप्न** इति, पूर्वमपि रमणपक्षे तस्य गोप्यत्वादेवमुक्तमिति ज्ञेयम् ॥३६॥

## प्रकाशः

नन्वरण्यजनानां प्रियत्वे को हेतुरित्यपेक्षायामाहुः **अरण्यं ही**त्यादि. भगवत्प्रापकं भगवदीयं चेत्यतस्तथेत्यर्थः ॥३६॥

## लेखः

कामत्यागेनेत्यर्थः. **एतेने**ति, **अरण्यजनप्रिय**पदेन **पुलिन्दीस्मारणम्. अरण्यजनाः** पुलिन्द्यः **प्रिया** यस्येति पादतलस्य प्रीतिसाधकत्वे सम्मतिरुक्तेति भावः. **तथैव जानीम** इति, पुलिन्दीवदात्मनि भगवत्प्रियात्वं जानीम इत्यर्थः. **स्फुटमिदमि**ति, पूर्वरमणमित्यर्थः. अत्र श्लोकद्वये 'लक्ष्मी'पदेन ललनेति ज्ञेयं, ब्रह्मानन्दरूपायास्तादृशशरीरापेक्षाभावात्. अतएव "ललनाचरत्तप" इत्यस्य सम्मतिरुक्ता. एतत्स्वरूपं द्वितीयस्कन्धनवमाध्याये विवरणे विवृतम्. **यस्ये**ति देहत्वस्येत्यर्थः. देहनाशे पूर्वमभिमतमात्मनो देवदत्तत्वं निवर्तते इति भावः. **घातकः** निवारक इत्यर्थः. **तद्भावापत्तावि**ति आत्मनो देहत्वापत्तावित्यर्थः. भगवदीयपक्षे **यस्य** भगवत्त्वस्येत्यर्थः. **तद्भावापत्तौ** "जीवेऽन्तःकरणे चैवे"तिन्यायेन "भगवानहमि"ति भावापत्तौ, एतादृशविगाढभावे इत्यर्थः. इदमेव टिप्पण्यां **भगवद्भावप्राकट्यादित्यर्थ** इत्यनेनोक्तम्. **भगवद्भावो** भगवत्त्वमित्यर्थः. **भगवद्व्यतिरिक्त** इति **भगवता व्यतिरिक्तः** भेदं प्रापितः, भगवन्तं न प्रपन्न इत्यर्थः ॥३६॥

१. ( ) चिह्नान्तर्गतं प्रभूणाम्. २. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे.



सूक्ष्मेक्षिका, तत्रान्यस्य स्थाने गमनं तस्य च देवतात्वेन भावनं दूरापास्तम्. अतः प्रीतिमात्रस्तुतिर्या सा अल्पीयसी, अनन्यभावाएव वयं लक्ष्मीवत्. किञ्च यथा सर्वपरित्यागेन लक्ष्मीः चेत् त्वां शरणं गता तदा **त्वया अभिरमिता** जाता, तथा वयमपि जाताः; सर्वदैव स्वप्ने त्वत्सम्बन्धं प्राप्नुमः, अन्यथा जीवनमेव न स्यात्. एवं भुक्तपूर्वा वयं नान्यत्र प्रेषयितुमुचिता इति ॥३६॥

ननु तस्या दैवगत्या सम्बन्ध आसीत्, स च प्राथमिको, भवतीनां तु प्रथमतोऽन्यत्रैव सम्बन्धः, अतो वैषम्यमिति चेत्, तत्राहुः **श्रीरि**ति.

**श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या**
**लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टम् ।**
**यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयास-**
**स्तद्वद्वयं च तव पादरजःप्रपन्नाः ॥३७॥**

लक्ष्मीरपि न दैवगत्या भवन्तं प्राप्तवती किन्तु त्वच्चरणारविन्दार्थं महत्तपः कृतवती. सा न स्त्रीत्वेन त्वदीया किन्तु भक्तत्वेन, अन्यथा **वक्षसि** स्थलं प्राप्य स्वतन्त्रं तुलस्या सह सापत्न्यमप्यङ्गीकृत्य चरणरजो न कामयेत्. चरणरजस्तुलस्या भवति, भक्ता हि भक्तेः. तदुपपादितं प्रथमस्कन्धे. तस्य रजसः माहात्म्यमाह **भृत्यजुष्टमि**ति, तद्रजसैव भृत्यानां शरीरोत्पत्तेः. **किले**ति प्रसिद्धिः, सर्वएव भक्ताः त्वच्चरणरजसैव सम्पादितदेहवन्तः. अतस्तुलसी तत्र भक्तिरूपा प्रतिष्ठिता. तद्रजःप्राप्तिर्येषां ते त्वत्सेवकाएव

## प्रकाशः

**श्रीर्यत्पदे**त्यत्र. ननु पत्यैक्येन तुलस्याः सापत्न्यस्य सार्वदिकत्वात् **सापत्न्यमङ्गीकृत्ये**त्यादि कथमुच्यत इत्यत आहुः **चरणे**त्यादि. यद्यप्यैकपत्यं सार्वदिकं तथापि "श्रीविष्णुपद्या मनुजस्तुलस्या" इत्यादौ विष्णुपदसम्बन्धित्वेनैव तुलस्याः प्रसिद्धत्वात्तद्रजोऽपि संबन्धनैकट्यात्तुलस्या भवति, लक्ष्मीश्च भक्तिरूपस्य चरणभक्तेति प्रथमस्कन्धे "या वै लसच्छ्रीतुलसीविमिश्रपादाब्जरेण्वभ्यधिकाम्बुनेत्री"त्यत्र श्रियो नित्यभगवत्पूजायां चरणयोस्तुलसीसमर्पणविवरणेन प्रतिपादितं, तथा च पूर्वं सपत्नीत्वेऽपि विषयभेदान्न सापत्न्योद्गमः चरणरजःकामनायां तु तदुद्गम इति तथोच्यत इत्यर्थः. **तत्रे**ति पदाम्बुजे. **महिष्य** इति, एतेन अष्टावक्रप्रसादशापयोर्गोचरा व्यावर्तिताः ॥३७॥

भवन्ति. अतो लक्ष्मीः अन्तःकरणे स्थानं प्राप्यापि अन्यः स्प्रक्ष्यतीति चिन्तया **रजश्चकमे** तस्मिन् प्राप्ते तु न शङ्कापि. ननु किमेतावद्भयं लक्ष्म्याः, तत्राहुः **यस्याः स्ववीक्षणकृते अन्यसुरप्रयासः.** अन्ये सर्वएव ब्रह्मादयो देवाः तपः कुर्वन्ति "लक्ष्मीरस्मान् पश्यत्वि"ति. अन्यथा तेषां कोऽपि पुरुषार्थो न सिध्येदिति. अतो बहुभिः प्रार्थ्यमाना भीता जाता— कश्चिदत्यन्तमपि तपः कुर्यात् स को वेद किं कुर्यादिति. रजःकामनायां तु नेयं शङ्का. प्राप्तौ तु सन्देहएव न भवति. एवं चरणरजसः प्राप्तौ अनन्यगामित्वं निरूप्य स्वस्य तथात्वमाहुः **तद्वद्वयं चे**ति. अस्मानपि बहवः प्रार्थयन्ति, तद्भयादेव पूर्वं चरणरजः स्पृष्टम्. ततो देहोऽपि तच्चरणरजसा समुद्भूत इति सर्वथा **तव पादरजःप्रपन्नाः. च**कारात् या अपि साम्प्रतं नागताः, या वा महिष्यः, ता एतादृशशरीरयुक्ताएव. अतोऽस्मदर्थएव समागतो भवान्. नात्मानं गोपय, नापि गुप्तः स्थास्यसि. तस्मान्नाग्रहः कर्तव्य इति भावः ॥३७॥

एवं स्वस्य भगवदेकभोग्यशरीरत्वमुपपाद्य प्रार्थयन्ति **तन्न** इति.

**तन्नः प्रसीद वृजिनार्दन तेंऽघ्रिमूलं**
**प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः ।**

---

**लेखः**

**श्रीरि**त्यत्र. मूले **यदि**ति रजसो विशेषणं, **यद्र**जः **श्रीश्चकमे** तद्रजः **वयं च प्रपन्ना** इत्यन्वयः. **त्वत्सेवका एवे**ति, सेवां तव कुर्वन्ति अन्यसम्बन्ध-स्तेषां न भवती**त्येव**कारः. अतोऽस्माकमप्यन्यसम्बन्धो नास्तीति भावः. इदं "क्वेमाः स्त्रिय"इति श्लोके व्युत्पादयिष्यते. **नेयं शङ्के**ति, लक्ष्म्या अन्यस्पर्शशङ्का न भवतीत्यर्थः. तत्र हेतुः **प्राप्तौ त्वि**ति, रजःकामनायाः प्राप्तौ तु सर्वेषां सन्देहएव न भवति, विपरीतनिश्चयात्. अतस्तदर्थं यत्नं न कुर्वन्ति. तस्मान्न लक्ष्म्याः शङ्केत्यर्थः. **सन्देहएव भवती**ति पाठे सन्देहएव, तेन निश्चयाभावान्न यत्न इत्यर्थः. **रजसः प्राप्तावि**ति, कामनायामेव तथात्वे प्राप्तौ तथात्वं कैमुत्येनैव सिद्धमिति भावः. अथवा उत्कटैककोटिका शङ्का समकोटिकः सन्देह इति विभागः. तथाच यथाश्रुत एवार्थः. **बहवः प्रार्थयन्तीति**, श्रुतिरूपत्वाभिप्रायेणेदम्. तत्तन्मन्त्राभिमानिदेवाः स्वस्वाधिपत्यं मन्यन्ते, रजःप्राप्तौ तद्गामित्वं न भवतीत्यर्थः. श्रियाः कामनैवोक्ता, स्वस्य तु प्रपत्तिरुक्ता अत आहुः **सर्वथे**ति ॥३७॥



**त्वत्सुन्दरस्मितनिरीक्षणतीव्रकाम-**
**तप्तात्मनां पुरुषभूषण देहि दास्यम् ॥३८॥**

पूर्वश्लोकेनैव भर्तृशुश्रूषणविधिर्निराकृतः. तदपरित्यागः सुतरामेव तेनैव निराकृतो भवति. अनेनापि निराकरणं प्रार्थयन्ति, भगवत्कृपाभावे तादृशेनैव सम्बन्धो भवेदिति. कृपा हि सर्वतोऽधिका, **तत्** तस्मात्कारणात् **प्रसीद** प्रसन्नो भव, त्वयि प्रसन्ने सर्वं सेत्स्यतीति. ननु भवतीनां प्रतिकूलमदृष्टं दुःखप्रापकमस्ति, अतः कथं प्रसाद इति चेत्, तत्राहुः **वृजिनार्दने**ति. **वृजिनं** दुःखजनकं पापं, स्वभावतएव सर्वेषां येन केनापि सम्बन्धेन **तदर्दयसि.** प्रसादे हेतुमाहुः **तेंऽघ्रिमूलं प्राप्ता** इति, यस्तु चरणतलं प्राप्नोति स प्रसादमपि. स च प्रसादः पशुपुत्रादिरूपो मा भवत्विति स्वाधिकारमन्येभ्यो व्यावर्तयन्ति **विसृज्य वसतीरि**ति. गृहस्थाश्रमस्त्यक्तः न तु गृहमात्रमिति **वसतीरि**ति बहुवचनम्. परित्यागेऽपि हेतुमाहुः **त्वदुपासनाशा** इति, "त्वत्सेवां करिष्याम" इति आशामात्रेणैव पूर्वसिद्धं त्यक्तं, तत्र समागतानां पुनर्गृहसम्बन्धे किं वक्तव्यमिति. अतो देयं प्रार्थयन्ति **त्वत्सुन्दरे**ति, **तव सुन्दरं** य**त्स्मितं** मोहकमप्यानन्दजनकं त्वत्सम्बन्धात् परमानन्दरूपं, तादृशस्मितपूर्वकं **यन्निरीक्षणं,** तेन जातः **तीव्रो** यः **कामः,** तेन **तप्ता**न्तःकरणानाम् अस्माकं **पुरुषाणां भूषण**रूप अनन्तकोटि-कन्दर्पलावण्यरूप स्वतःपुरुषार्थरूपमेव **दास्यं देहि.** [1](अधिकारिभेदेन

---

**लेखः**

**तन्न** इत्यत्र. **कृपा ही**ति, सर्वेभ्यः प्रमाणेभ्योऽधिकेत्यर्थः. अन्तरङ्गधर्म-त्वादाधिक्यं युक्तमिति **हि**शब्दः. **प्रतिकूलमदृष्टमि**ति, लोकन्यायेनात्रापि सम्भाव्य तन्निवर्तकत्वं भगवतो बोधितम्. तथा च भगवत्स्वरूपबोधने तात्पर्यान्नातीवाग्रहः कर्तव्यः. **दुःखजनकमि**ति, यतो भगवानेवं वदति तादृशं भजननिष्ठमन्यशेषत्वमित्यर्थः. पूर्वोक्ते**नादृष्ट**पदेनापीदमेव ज्ञेयम्. **येन केनापी**ति, कामादिभावेनापीत्यर्थः. एतद्भजने अन्यशेषत्वाभावेऽपि दैन्येन तदपि भगवदुक्तमङ्गीकृत्य निवारणप्रार्थनमिति भावः. एतेन प्रतिबन्धकनिवारणं प्रार्थितम्, अग्रिमेण हेतुरुच्यत इति विभागः. **स्वतःपुरुषार्थे**ति, दानोक्त्या फलत्वं सूचितमिति भावः. तापोक्त्या देयस्वरूपमुक्तं, दास्यदानोक्त्यापि

---

१. ( ) चिह्नान्तर्गतं प्रभूणाम्.

दास्यस्यानेकविधत्वाद्देयं रूपं स्वतापोक्त्या व्यज्यते– उक्ततापविशिष्टानां यदेतत्तापनिवर्तकं तदिति. किञ्च प्रभोरपेक्षितवस्तुसमर्पणे हि दास्यं भवति, न त्वन्यथा. एवं सति यथास्माकमुक्ततापेन प्रचुरा त्वदपेक्षा, तथा तवास्मदपेक्षायां स्वयमुद्यम्यास्मदुपभोगः कार्य इत्यर्थः पर्यवस्यति. अन्यथा दास्यस्य कृतिसाध्यत्वेन दानोक्तिरनुपपन्ना स्यात्. अतएव तथा सम्बोधनं **पुरुषो** भूत्वा **भूषण**रूपेति. तद्धि कण्ठादिषु सर्वेष्वङ्गेषु भवति, त्वमपि तथा भूत्वा दास्यं देहीति वाक्यैकवाक्यतया प्राप्यते. भूषणत्वोक्त्यैव स्वतन्त्रपुरुषार्थताप्युक्ता. मणिखचितं तद्विभूषणत्वसम्पत्त्यर्थं मध्ये लाक्षावदपि भवति. तेन महानपि तद्धारणार्थं लाक्षामपि धारयति तुच्छामपि, तथा मध्ये कामोपयोग इति न तदुपाधिकृतं दास्यवरणम् अपि तु तद्विपरीतमिति भावः.) अतो दास्यार्थिन्यएव वयं न तु विवाहार्थिन्यः. अत उपनयनाद्यपेक्षापि न लोकव्यवहारेण कर्तव्येति भावः ॥३८॥

ननु भवतीनां सर्वासामेव दास्यवरणे को हेतुः, सालोक्यादेरपि फलस्य विद्यमानत्वात्, तत्राहुः **वीक्ष्यालकावृतमि**ति.

**वीक्ष्यालकावृतमुखं तव कुण्डलश्रि**
**गण्डस्थलाधरसुधं हसितावलोकम् ।**
**दत्ताभयं च भुजदण्डयुगं विलोक्य**
**वक्षः श्रियैकरमणं च भवाम दास्यः ॥३९॥**

अनेन लोकेप्सायां पतिर्न त्यक्तव्य इत्यत्रोत्तरमुक्तम्. लोके हि पुरुषार्थत्रयं– चतुर्विधो मोक्षः इन्द्राद्यैश्वर्यभावेन स्वर्गप्राप्तिः इहलोके परमा लक्ष्मीः. तदत्र त्रयमपि दास्ये सर्वोत्कृष्टमस्तीति तदुपपादयन्ति. प्रथमं सारूप्यं सालोक्यं सामीप्यं सायुज्यमिति मोक्षभेदाः ते दास्याग्रे अप्रयोजकाः यतो मुखारविन्ददर्शनेन ते कामा निवर्तन्ते इति भक्तिरूपमुखारविन्दस्य तदपेक्षयोत्कृष्टधर्मवत्त्वं निरूप्यते. **अलकाः** सारूप्यमिव प्राप्ता भ्रमराः, ते बहवएवात्र आवृत्य मुखं तिष्ठन्ति. अतः सारूप्यं गतानामपि यदि भक्तिशेषत्वं तदा किं सारूप्येण? किञ्च **मुखं कुण्डलश्रि** कुण्डलाभ्यां श्रीर्यस्य,

---

**लेखः**

देयस्वरूपमुक्तं भवतीत्याहुः **किञ्चेत्यारभ्य प्राप्यत** इत्यन्तेन. **यथास्माकमि**ति दृष्टान्तेन "ये यथा मामि"ति मर्यादा सूचिता. आत्मन एवापेक्षितवस्तुत्वात् समर्पकाभावात् **स्वयमुद्यम्ये**त्युक्तम्. **महानपी**ति, यथा महान् भूषणधारणार्थं लाक्षां धारयति तथा वयं कण्ठादिषु भवद्धारणार्थं कामं धारयाम इत्यर्थः. कामाभावे भोगासम्भवेन तथा न स्यादिति भावः ॥३८॥

**वीक्ष्यालके**त्यत्र. **अनेने**ति, लोकेप्साप्यत्रैव विशेषतः सिध्यतीत्यर्थः. श्लोकक्रमे "अस्वर्ग्यमि"त्यस्योत्तरमिदम्, तदग्रे वक्ष्यते. अत्र विशेषतो लोकेप्सासिद्धौ हेतुमाहुः **लोके ही**ति. **पुरुषार्थत्रयमि**ति, पुंप्रीतिरूपमोक्षादित्रय-साधनत्रयमित्यर्थः. **सर्वोत्कृष्टमि**ति. मोक्षादिषु तत्साध्यानन्दरूपा ये मोक्षादय-स्तत्त्रयापेक्षया दास्ये यन्मोक्षादित्रयं तत्सर्वोत्कृष्टं, यतो दास्ये तच्छेषिभूतो मोक्षो, भगवद्बाह्वाश्लेषरूपं द्वितीयं, वक्षःस्थितिरूपं तृतीयमित्यर्थः. **अप्रयोजका** इति, एतदभिलषितं मुखारविन्दफलं दास्यसाध्यम्, एते तु **तत्राप्रयोजका**स्तदसम्पादका इति. मोक्षो हि पुरुषार्थः, तल्लक्षणं च पुंप्रीतिसाधनत्वम्. तथा चैते सारूप्यादयः प्रीतिसाधनरूपाः, मुखशेषत्वेनोक्तास्तु तत्तत्साध्यानन्दरूपा इति विभागः. ननु तत्सम्बन्धिफलं तैरेव जायते इति कथमप्रयोजकत्वमत आहुः **यत** इति. एतद्दर्शनेन ते कामास्तत्साध्यानन्दाभिलाषा निवर्तन्त इति सूचनायैवं निरूप्यते यतोऽतस्तस्य फलस्यानभिलषितत्वादेतदभिलषितफलेऽप्रयोजका एवेत्यर्थः. **तदपेक्षये**ति, मोक्षानन्दापेक्ष**योत्कृष्टधर्मवत्त्वम**ङ्गित्वं **निरूप्यते** इत्यर्थः. **भक्तिशेषत्वमि**ति भक्त्यङ्गत्वमित्यर्थः. स्वानुभूयमानानन्दस्य भक्तिशेषत्वादेतेषामपि तच्छेषत्वमिति



**टिप्पणी**

**वीक्ष्यालके**त्यत्र, **चतुर्विधो मोक्ष** इत्यादिना पुरुषार्थत्रयविवरणम्. अत्र**ालकावृता**दिपदैर्मोक्षादिनिराकरणोक्तेरयमाशयः. मूले हि प्रभोरङ्गान्ये-वोक्तानि दासीभवनहेतुभूतेक्षणविषयत्वेन. तथा च "त्वां वीक्ष्ये"त्येतावतैव चारितार्थ्येऽपि यत्प्रत्यङ्गनिरूपणं, तत्रापि भूषणानां, तत्साभिप्रायमिति स निरूप्यत इति. **सारूप्यमिवे**ति सारूप्यमुक्तिमिवेत्यर्थः. अत्रालिसारूप्यवदलकैः

**योजना**

**वीक्ष्यालकावृतमित्यत्र लोके हि पुरुषार्थत्रयमि**त्यादि. तत्र **चतुर्विधो मोक्ष** एकः पुरुषार्थः, **इन्द्राद्यैश्वर्यभावेन स्वर्गप्राप्ति**र्द्वितीयः पुरुषार्थः, **इह-लोके परमा लक्ष्मी**स्तृतीयः. **भगवत्प्रमाणावलम्बिनी** इति, "कर्णौ दिशः

कुण्डलयोर्वा श्रीर्यस्मात्. सामीप्ये हि नैकट्यं भवति. अत्यन्तसामीप्यं जायमानमपि कुण्डलादप्यधिकं न भविष्यति. ते चेत्सांख्ययोगरूपे भगवत्प्रमाणावलम्बिनी भगवदधीनगतिमती पुनर्भगवन्मुखनिरीक्षके, तदा

## टिप्पणी

सारूप्यमुक्तिमन्तो भक्ता लक्ष्यन्ते. केशा बद्धा अपि भवन्ति, न त्वलकाः. इतोपि तथा. "मत्सेवया प्रतीतं च" "सालोक्यसार्ष्टिसामीप्ये"त्यादिवाक्यैश्च तासां चतुर्विधानामपि दास्यान्न्यूनत्वं सिद्धम्. तत्रैतद्रसप्राप्त्यभावादेतस्य च ततोऽधिकत्वाद्धि तदवरणम्. अतएवात्राप्यावरणरूपत्वमेवोक्तम्. नह्यन्तःस्थितिं विना परितः स्थितिमात्रेण रसपानमलीनां सम्भवति. मुखस्याम्बुजत्वमप्येतेषां रसपानाभावज्ञापनायैव नोक्तम्. किञ्च कमलं हि न पेयमपि तु तत्स्थो रसस्तथा न तदास्यं[1] किन्तु स्वयमेव रसात्मकमित्यपि ज्ञापयितुं तत्त्वं नोक्तमिति ज्ञेयम्. बहुभिरावरणान्महारसत्वं व्यज्यते. किञ्च. लीलाया नादस्य वा श्रवणेन पूर्वं जनितो यो भावः स एतद्दर्शनेन पुष्टः क्रियते. प्रचुरार्तैर्लयो विविधरसभावोत्पत्तिश्चेति स्थितिलयोत्पत्तिकर्तृवाचकवर्णात्मकनाम्ना सूच्यते. अतो युक्तं दासीभवनमिति भावः. "त्वत्सुन्दरस्मिते"त्यादिनोक्ताधिकारवतीनां देये दास्ये मुखं स्वाधीनं भवतीति तच्छेषभूतानामनङ्गीकारः सर्वत्र. **गण्ड-**

## प्रकाशः

**वीक्ष्येत्यत्र**. **भगवत्प्रमाणावलम्बिनी**ति, भगवतः प्रमाणं श्रोत्रं तदवलम्बिनीत्यर्थः. एवं च भगवत्प्रमाणं वेदोऽपि भवतीति वेदाविरुद्धसांख्य(योग)-योस्तदवलम्बित्वं फलति, तयोश्च मुखनिरीक्षकत्वेन भक्त्यभिलाषएव तन्निष्ठानां न तु तत्प्राप्तिरपीति सूच्यते. मूले **श्रियेतीयङ्** छान्दसः. तथा च **श्रियाः**

## लेखः

भावः. **साङ्ख्येति**, तयोर्भक्त्यङ्गत्वादिति भावः. **भगवत्प्रमाणे**ति, **प्रमाणं** श्रोत्रं तदवलम्बिनीत्यर्थः. गोलकेन्द्रिययोर्भगवत्यैक्यमभिप्रेत्योक्तम्.

## योजना

श्रोत्रममुष्य शब्द" इतिवाक्याद्भगवच्छ्रोत्रस्य शब्दरूपत्वात् प्रमाणरूपत्वं, तादृशप्रमाणरूपश्रोत्रावलम्बिनी कुण्डले इत्यर्थः. तथा च भगवत्प्रमाणे[2] यद् भक्तिप्रतिपादकं शास्त्रं भागवत-भगवद्गीतारूपं तदवलम्बित्वं कुण्डलात्मकयोग-

१. दास्यं मू. पा. २. भगवत्प्रमाणयद् इति मुद्रितः पाठः. मुं. वि. पाठः गृहीतः.



किं सामीप्येन? किञ्च **गण्डस्थलाधरसुधमि**ति, **गण्डौ** स्थलरूपौ विशालौ, स्थले हि रसः पातुं शक्यत इति, अधरे च सुधा यस्मिन्; गण्डस्थले स्थित्वा अधरसुधा पातुमत्र शक्येति. सालोक्ये हि आनन्दमात्रमक्षरामृतपानं च. अक्षरापेक्षयापि गण्डस्थले स्थितिः चुम्बनाद्यर्थमुत्तमा, अधररसश्च अक्षररसादुत्तम इत्युक्तम्. **कुण्डलश्रीयुक्तं गण्डस्थलमि**त्यस्मिन् पक्षेऽपि सामीप्यात् भक्तौ शास्त्रीयो रसो अधिको निरूपितः, परस्परं त्वद्गुणवादरूपः. अक्षरादाधिक्यं तु अधररसे स्पष्टमेव. किञ्च **हसितावलोकमि**ति, हसितपूर्वकमवलोको यस्मिन्. ब्रह्मानन्दे प्रविष्टानां न भक्तिविलासः. हासो हि सर्वरसोद्बोधरूपः, ज्ञानं चाविर्भूतम्. ब्रह्मानन्दे तु द्वयमप्यव्यक्तं, जले निमग्नस्य जलपानवत्. अनुभवरसो हि भिन्नतया स्थितौ भवति. अतो भक्तिरूपमुखस्य दृष्टत्वाद् दास्यमेव फलं, न मोक्षः. **भुजदण्डयुगं च विलोक्य** इन्द्रादिभावेनापि स्वर्गो न प्रयोजक इति निरूपयन्ति **दत्ताभयमि**ति. स्वर्गे इन्द्रः परमकाष्ठां प्राप्तः.

## टिप्पणी

**स्थले**त्यत्र, **स्थले ही**ति, एतज्ज्ञापनायैव **स्थल**पदम्, अन्यथा नोक्तं स्यादिति

## लेखः

**विशालावि**ति **यस्मिन्नि**त्यग्रेतनेनान्वयः. **आनन्दमात्रमि**ति स्थलमिति शेषः. सालोक्ये स्थल**मानन्दस्य मात्रा** अंशो यस्मिन् तादृशम् अक्षरात्मकमित्यर्थः. दास्ये तु स्थलं गण्डरूपं पूर्णानन्दरूपमिति भावः. अतोऽत्र **चुम्बनाद्यर्थं स्थितिरुत्तमे**त्यर्थः. तत्राक्षरे स्थित्वाऽक्षरामृतं पातव्यम्, अत्र गण्डे स्थित्वाधररसः पातव्यः. **कुण्डलश्रीयुक्तमि**ति, कुण्डलयोर्गण्डाङ्गत्वकथनेन सामीप्यस्य भक्त्यङ्गत्वनिरूपणाद्भक्तावधिको रसो निरूपितः. तद्रसस्वरूपमाहुः **शास्त्रीय** इति. अस्मिन् पक्षे कुण्डलश्रि गण्डस्थलं यत्रेति समासः, तदनन्तरं कर्मधारयः. **द्वयमप्यव्यक्तमि**ति, आनन्दो ज्ञानं चात्मत्वेनैवेति भेदाभावादव्यक्तमित्यर्थः. एतदेव विशदयन्ति **जले** इति. **स्वर्गो न प्रयोजक** इति अभिलषितफले इति

## योजना

सांख्यशास्त्रयोरतो भक्तेरेव सर्वत्र मुख्यत्वमित्यर्थः. **कुण्डलश्रीयुक्तं गण्डस्थलमित्यस्मिन्पक्षेपी**ति. तथा च **वीक्ष्यालकावृतमुखं तवे**तिश्लोके **कुण्डलश्रीगण्डस्थलाधरसुधमि**त्येकं समस्तं पदम्. **सामीप्याद्भक्तावि**ति. सांख्ययोगशास्त्रात्मककुण्डल**सामीप्याद्भक्ति**रूपे गण्डस्थले **शास्त्रीयो रसोऽधिको निरूपित**

तेऽपि दैत्येभ्यो निरन्तरं भीताः इन्द्रादयः. तेषामप्यभयदातृ-भगवतो भुजदण्डयुगलम्. तच्चेदत्रैवास्ति, तत्परित्यज्य किमिन्द्रत्वेन? **च**कारात् न केवलमभयमात्रं प्रयच्छति किन्तु क्रियाशक्त्या यज्ञादिना हविरपि प्रयच्छति यथाग्रे इन्द्रः स्वाधिकारसमाप्तौ मुक्तो भवति. **दण्डपदेनानुल्लंघ्यशासनत्वमुक्तम्.** उभयत्र च दण्डो **युग**पदेन निरूपितः. ततो हि सर्वथा दैत्यनाशो भवति. किञ्च **वक्षो**ऽपि **विलोक्य;** लोकानां श्रिया रमणं भवति, श्रीरपि तत्र रमते.

## टिप्पणी

भावः. **भुजदण्डयुगमि**त्यत्र, **उभयत्रे**ति. इन्द्रादीनां भयदैरपि दैत्यैर्भगवच्छासनमनुल्लङ्घ्यमित्यैहिकानिष्टनिवर्तकः. देवानामपि तत्तथा. यज्ञाकरणे द्विजान् दण्डयत्येवेत्यनुल्लङ्घ्याज्ञत्वेन मुक्तिहेतुभूतशुद्धिजनकहविर्दानेन पारलौकिकसुखप्रद इत्यर्थः. हविर्दानेन परलोकसाधने विशेषमाहुः **तत** इति, भगवत्क्रियाशक्तिरूपवैदिकक्रियासम्बन्धिहविर्भोगादित्यर्थः. सर्वथा अन्तःकरणस्थानामपीत्यर्थः. ('भुजदण्डावि'त्यनुक्त्वा द्वित्वसंख्यावाचिपदमेकवचनान्तं यदुक्तं तत्रायं भावः. द्वयोः पृथक् प्रतीतौ ह्यपेक्षाबुद्धिः तया च द्वित्वम्. प्रकृते चाश्लेषदशायामुभयोर्भुजयोरेकवत् प्रतीतिः. सा च न स्वाश्लेषसमये संभवति किन्त्वन्यस्याः. तथा च तादृग्दर्शनं भावोद्बोधकं भवत्येवेति. तथापि 'द्वय'पदमनुक्त्वा **युग**पदं यदुक्तं तेन युगस्वभावो यथा न निवर्तयितुं शक्यः केनापि, तथा भुजदण्डयोरप्येकवचनसूचितार्थलक्षणः स्वभावो न मर्यादाशास्त्रादिभिर्निवर्तयितुं शक्यो भवति च तथैवेति ज्ञाप्यते. तेनास्माकं दासीभवनमावश्यकमिति.) ॥३९॥

## प्रकाशः

**एकं** मुख्यं **रमणं** यत्रेति विवक्षितं तदाहुः **श्रीरपीत्यनेन. धर्मस्यापी**ति, "धर्मः स्तन" इति वाक्यात्तस्यापि तत्स्थानमिति लोके श्रीसाधनभूतः सोऽपि तत्रैव रमत इत्यर्थः. **विधिप्रयुक्ते**त्यादि, वीक्षणस्येति शेषः. तथा च

## योजना

इत्यर्थः. **यज्ञादिना हविरपि प्रयच्छतीत्युक्तम्,** तत्प्रयोजनमाहुः **यथाग्रे इन्द्रस्याधिकारसमाप्ताविति.** इन्द्र**स्याधिकारसमाप्तौ यथा इन्द्रो मुक्तो** भवेत् तदर्थं मुक्तिप्राप्तिसाधनीभूतशुद्धिसम्पादकं वैदिकविधिसिद्धं **हविरिन्द्राय प्रयच्छतीत्यर्थः. चकाराद्धर्मस्यापी**ति, "धर्मः स्तनोऽधर्मपथोस्य पृष्ठ" इति-



**च**काराद्धर्मस्यापि. अतो **दास्यएव भवामः.** [1](अत्र वीक्षणस्य दासीभवनहेतुत्वोक्त्या यत्रायं भावो नास्ति तेषां नैतद्वीक्षणमस्ति, विधिप्रयुक्तत्वाभावेन तद्विपरीतविध्यनङ्गीकारश्च युक्त इति ज्ञाप्यते. यदप्युक्तं भगवता "अस्वर्ग्यमि"त्यादि स्वभजने दोषषट्कं, तदपि षड्भिर्गुणैर्निवारितं, न हि परमपुरुषार्थसाधकं पापं भवति, फलतएव पापस्य निन्द्यमानत्वात्) ॥३९॥

## प्रकाशः

विध्यप्रयुक्तवीक्षणस्य दास्यहेतुत्वेन तदसाधकविध्यनङ्गीकारोऽस्माकं युक्त इति भावः. **षड्भिर्गुणैरि**ति, **अलकावृते**त्यादिविशेषणोक्तैः क्रमेणैश्वर्ययशोवैराग्यज्ञानवीर्यश्रीभिरित्यर्थः ॥३९॥

## लेखः

शेषः, यतो भुजदर्शनेन ते कामा निवर्तन्ते इति पूर्वोक्तोऽर्थोऽनुसन्धेयः. **धर्मस्यापी**ति रमणमिति शेषः, मूलवासनया षष्ठ्यन्तमुक्तम्. तथा च मोक्षकामार्थधर्माश्चत्वारोऽपि क्रमेणोक्ता इति भावः. **अयं भाव** इति दास्यभाव इत्यर्थः. **विधीति** अत इति शेषः, वीक्षणाभावाद्धेतोरित्यर्थः. वीक्षितृणामेव भवामेति लोडन्तेन विधिरुक्त इत्यवीक्षितृणां **विधिप्रयुक्तत्वाभावेन** हेतुना दास्यविध्यङ्गीकारः **विपरीतो** यस्त**द्विधेरनङ्गीकारः** स **च युक्त** इत्यर्थः ॥३९॥

## योजना

वाक्याद्धर्मस्य तत्र स्थानात्. अत्र श्लोके सुबोधिन्यामयं गूढाशयः. चतुर्विधपुरुषार्थाभिलाषो व्रजवधूभिर्दूषितः. तत्र यद्यपि सारूप्यमुक्तौ अधिकारिणां मुखदर्शनादिना परमानन्दानुभवो भवति तादृशो दास्ये नानन्दानुभवः तथा च किमर्थं मोक्षानङ्गीकार इत्याशङ्का प्राप्नोति, तथापि स्वरूपान्तःपाते सत्यलकैर्मुखानन्दानुभवः क्रियेत, तथा सति न सकलस्वरूपसुखानुभव इत्येतदर्थं सारूप्यमुक्तेरनङ्गीकारः. एवं सामीप्यादावपि ज्ञेयं, स्वरूपान्तःपातापेक्षया लीलान्तःपातस्यैवोत्तमत्वात्. चतुर्भुजादिरूपं प्राप्तानां वैकुण्ठस्थानां पार्षदादीनां भगवत्सारूप्यं यादृशं तादृशमिदं न भवति, किन्तु भगवत्स्वरूपे सायुज्यं प्राप्य पुनः श्यामरूपतारूपमलकानां सारूप्यमिति बोद्धव्यम् ॥३९॥

१. ( ) चिह्नान्तर्गतं प्रभूणाम्.

ननु तथापि लोकविद्विष्टं स्त्रीणामभिसरणम्, अतः सन्मार्गरक्षणार्थं प्रमाणसिद्धमप्येतन्न कर्तव्यम्, अतः श्रवणदर्शनादिकमेव कर्तव्यमिति चेत्, तत्राहुः **का स्त्री**ति.

**का स्त्र्यंग ते कलपदामृतवेणुगीत-**
**सम्मोहितार्यचरितान्न चलेत् त्रिलोक्याम् ।**
**त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं**
**यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥४०॥**

अयं धर्मः पुरुषाणां वक्तव्यो न तु स्त्रीणाम्, असंभावितत्वात्. नह्यसंभावितो धर्मो भवति. एवं धर्मनाशे धर्मस्थापकं स्वरूपमेव हेतुः, अद्भुतकर्मत्वात्. [1](वस्तुतस्तु स्वरूपसम्बन्धिनां भक्तानां धर्मं स्वरूपेणैव रक्षति. तच्चान्यभावेभ्यो रक्षणमेतद्भावपोषणं च. ये स्वरूपधर्मसम्बन्धिनस्तांस्तैरेवेति न किञ्चिदनुपपन्नमिति भावः. अतएवैवं स्वरक्षणेन स्वान्तरङ्गत्वज्ञापनाय) **अङ्गे**ति सम्बोधनम्, अप्रतारणाय च. या **स्त्री** लोके 'स्त्री'शब्दवाच्या सा कथ**मार्यचरितान्न चलेत्? त्रिलोक्यां** सत्त्वरजस्तमःकार्यरूपायाम्. तामसीनां

### प्रकाशः

**का स्त्री**त्यत्र. **अयमि**ति सन्मार्गरक्षणरूपः. ननु बह्व्य एतादृश्यो या नाभिसरणं कुर्वन्ति, भवत्योऽपि तादृश्य एवेति कथमेवमुच्यते इत्यत आहुः **एवमि**त्यादि, सतीनामपीत्यर्थः. ननु धर्मस्थापकस्य कथं नाशकत्वं तत्राहुः **अद्भुते**ति, यथा "चस्कम्भ यः स्वरंहसाऽस्खलता त्रिपृष्ठमि"त्यत्र पातुकाया एव क्रियायाः स्थापकत्वं, यथा च "वादैर्विमोहयति यज्ञकृतोऽतदर्हानि"त्यत्र वेदबाह्यबोधकस्य वेदस्थापकत्वं, तथात्र विपरीतमित्यर्थः. नन्वेवं सत्येतत्कृतेरधर्मरूपत्वमिव स्यादित्यतः पक्षान्तरमाहुः **वस्तुत** इत्यादि. **तैरि**ति स्वरूपधर्मैः. तथा च प्रतियोगिभेदेन व्यवस्थयात्रापि धर्मस्थापकत्वमेवेति न दोषलेश इति भावः. नन्वविद्यापर्वभिरेव मोहसम्भवे किमिति कलादीनां मोहकत्वमुच्यत

### लेखः

**का स्त्री**त्यत्र. विवरणे सत्त्वादयो लीलासृष्टिस्था इति ज्ञेयम्, तत्रैव वेणुश्रवणाधिकारात्. **कलेषु पदेषु यदमृतमर्थ**रूपं तच्च **तद्वेणुना गीतं** चेति कर्मधारयः ॥४०॥

१. ( ) चिह्नान्तर्गतं प्रभूणाम्.



मौढ्याद् आर्यचरिते स्थितिं मत्वा तन्निराकरणम्. राजसीनां स्वभावएव. सात्त्विकीनां सत्त्वाद्धर्मबुद्धिमाशंक्य तन्निराकरणम्. आर्यमार्गपरित्यागे हेतुः **ते कलपदामृतवेणुगीतसम्मोहिते**ति. सम्मोहिता आर्यचरिताच्चलत्येव. सम्मोहः पञ्चपर्वाविद्यास्थानीयैः. भगवत्सम्बन्धाद् अविद्या तु न बाधते परमन्यएव बाधकाः. तेषां बलं **ते** इति, त्वदीया इति. **कलान्य**व्यक्तमधुराणि यानि **पदानि** तत्राविर्भूतं यद**मृतं** तदेव **वेणुद्वारा गीतं** तेन **संमोहः**. गीतं देहमोहजनकं, "गायन्तं स्त्रियः कामयन्त" इति, स्त्री तु देहएव. इन्द्रियाणां व्यामोहको वेणुः, रसात्मकत्वात्. अमृतं प्राणानाम्. पदान्यन्तःकरणस्य. अव्यक्तता आत्मन — इति सम्यग्विमोहिताः. आर्याः प्रमाणबलविवेकिनः.

### टिप्पणी

**का स्त्र्यङ्ग त** इत्यत्र, भगवत्साक्षात्कारे सति मोहासम्भवमाशङ्क्याह **तेषां बलमि**ति. मर्यादामार्गीयभगवद्धर्मेभ्योऽपि पुष्टिमार्गीयास्ते बलिष्ठा इति भावः. **आर्यचरिता**दित्यत्र. नन्वार्या हि श्रेष्ठाः, ते च भक्ता एवेति तच्चरितमेव सर्वत्यागपूर्वकं भगवद्भजनमिति कथमेवं कथनं युज्यत इत्याशङ्कानिरासाय**आर्य**पदार्थमाहुः **प्रमाणबलविवेकिन** इति. ननु विवाहितभजनं

### प्रकाशः

इत्यत आहुः **भगवदि**त्यादि. गीतस्य देहमोहकत्वे किं मानमत आहुः **गायन्तमि**त्यादि. ननु कामनाया मनोधर्मत्वेन मनोमोहकत्वं युक्तं न तु देहमोहकत्वमित्यत आहुः **स्त्री तु देह** इति. स्त्रीत्वस्य जीवेन्द्रियप्राणान्तःकरणेषु वक्तुमशक्यत्वात्तस्यैव च कामनायां प्रयोजकत्वात्तथेत्यर्थः. **इन्द्रियाणामि**त्यादि, इन्द्रियाणां रूपादिग्राहकत्वेन वेणुद्वारा वामपरावर्तादिरूपेण वेणुविशिष्टस्य रसात्मकस्य स्वरूपस्य विषयत्वे वेणुरपि नाट्य इव रसात्मकतयैव भासत इति. अमृतस्य द्रवत्वेनापोमयप्राणपोषकतया, पदानां सूक्ष्मरूपस्य मनोमयतया, एतस्या अव्यक्ततताया आनन्दीयत्वेनात्मनि चानन्दस्याव्यक्ततया साजात्येन प्राणान्तःकरणात्ममोहकत्वमिति प्रतिभाति. अत्रैवं बोध्यं— द्वितीयस्कन्धे सत्त्वरजस्तमसां क्रमेण सच्चिदानन्दमलत्वं प्रतिपादितम्. तत्राविद्या तामसी मलिनसत्त्वरजोयुक्ता तमसा स्वरूपाज्ञानं[1] विधाय रजःसत्त्वाभ्यां देहादिषु विषयेषु च व्यामोहमुत्पादयति. भगवत्सम्बन्धात्तस्या अबाधकत्वे लीलार्थो

१. स्वस्वरूपाज्ञानम् इति. मुं. वि. पाठः.

प्रमाणे हि इन्द्रमहेन्द्रयोरपि भेदस्वीकारः, पृथगुपस्थिताः सर्वएव भिन्ना इति. अन्यथा इन्द्रयाजिनोऽग्रे सम्वत्सरान्ते प्रायश्चित्तश्रवणं न स्यात् "सम्वत्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेदि"ति. अतो देहव्यतिरिक्तः स्वरूपेणोपस्थितोऽपि प्रमाणबले विरुध्यते. वस्तुविचारस्तु प्रमेयबलमाश्रित्य,

**टिप्पणीः**

हि प्रमाणमार्गः, भगवान् सर्वात्मक इति "गोपीनां तत्पतीनां चे"त्यग्रे वक्ष्यमाणत्वाच्च तन्न हीयते अधिकं परं सम्पद्यत इति नैषोपपत्तिरित्यत आहुः **प्रमाणे ही**त्यादि. तन्मार्गे हि पतित्वादयो धर्मा देहनिष्ठाएव. अतस्तद्भिन्नत्वेनोपस्थितस्तद्वचनविषयो न भवति, "यावद्वचनं हि वाचनिकमि"तिन्यायात्. एवं सत्ययं मार्गो वस्तुविचारं न सहते. न च विहितत्वेनैवोत्तमता निषिद्धत्वेनैवाधमतेति वाच्यं, "शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुष्वि"ति भगवद्वाक्यविरोधात्. न चैतद्विरोधापरिहारात्तन्न

**प्रकाशः**

मोहः स्वरूपविषयक उक्तैरेव स्वरूपधर्मैरुक्तरीत्या सम्पद्यत इति. टिप्पण्याम् **अयं मार्ग** इति प्रवृत्तिरूपः प्रमाणमार्गः. वस्तुविचारासहत्वमुद्घाटयितुमाहुः **न चे**त्यादि. तथा च "शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु" इत्यारभ्य "गुणदोषौ विधीयेते नियमार्थं हि कर्मणामि"त्यन्तस्य भगवद्वाक्यस्योपबृंहणतया श्रुत्यर्थनिश्चायकत्वेन वस्तुतः सर्वसाम्ये सिद्धे विधिनिषेधयोः कर्मार्थतया न वस्तूत्तमत्वादिनियामकतेति भावः. **एतद्विरोधापरिहारादि**ति प्रमाणमार्ग-

**योजना**

**का स्त्र्यंग त** इति श्लोकविवरणे **आर्याः प्रमाणबलविवेकिनः** इति. अस्यार्थष्टिप्पण्यां स्फुटः. **प्रमाणे हीन्द्रमहेन्द्रयोरपि भेदस्वीकार** इति. यद्यपि महांश्चासाविन्द्रश्च महेन्द्र इति निर्वचने इन्द्रएव 'महेन्द्र'पदवाच्यः तथापि यागविषये प्रमाणबलादिन्द्रमहेन्द्रयोरपि भेदस्वीकारः. तत्रान्यथानुपपत्तिं प्रमाणयन्ति **अन्यथा इन्द्रयाजिन** इत्यारभ्य **प्रमाणबले विरुध्यत** इत्यन्तेन. एवं सति आत्मत्वेनैक्येऽपि गुणादिकृतं भेदमादाय देवतान्तरत्वं महेन्द्रस्य कल्प्यते. गुणादयस्तु देहधर्मा इति देहस्य प्राधान्यं प्रमाणमार्गे. तथा च सिद्धमेतत्– प्रमाणमार्गे देहनिष्ठं पतित्वमंगीक्रियते इति गोपाएव पतयो गोपीनाम्. वस्तुतस्तु भगवानेव पतिरतो विवाहितपतिभजनं त्यक्त्वा



अन्यथा विधिनिषेधविधयो व्यर्थाः स्युः. तदुत्तरत्र वक्ष्यति एकादशे. अतो मार्गान्तरविरोधो मार्गान्तरे नोपयुज्यत इति मर्यादाभङ्गोऽत्र न दूषणम्. एतस्योत्तरमग्रे शुकश्च वक्ष्यति रासानन्तरं "धर्मव्यतिकरो दृष्ट" इति.

**टिप्पणी**

कर्तव्यमिति वाच्यं, प्रमेयमार्गस्य स्वतन्त्रत्वेनैतस्माद् बलिष्ठत्वेन चैतद्विरोध-स्याप्रयोजकत्वात्. अन्यथा प्रेममार्गोच्छेदापत्तिः. एतदेवोक्तं **प्रमाणे ही**त्यारभ्य **न दूषणमि**त्यन्तेन ग्रन्थेन. ननु प्रमाणमार्गीयाणां प्रमेयमार्गीयाणां च मिथो भेदात् प्रमाणवाक्यं न प्रमेयमार्गीयं विषयीकरोति, यागविधिर्यतिमिव, अतो न विरोध इति चेत्, स्यादेवं यदि प्रमेयमार्गेऽपि विधिः स्यात्, यत्याश्रम

**प्रकाशः**

विरोधापरिहारात्. **एतस्योत्तरमग्र** इत्यादिग्रन्थं व्याकर्तुमाहुः **नन्वि**त्यादि.

**योजना**

भगवद्भजनं कर्तव्यमित्येव हार्दमुपनिषदाम्. तथा च भजनमेव आर्यमार्ग इति तत्करणे आर्यमार्गात् का स्त्री न चलेदित्युक्तिरेव न संभवति यद्यपि, तथापि इह **आर्य**शब्देन प्रमाणबलविवेकिनो ग्राह्याः. ते च वस्तुविचारमकुर्वन्तः प्रमाणबलेन देहस्यैव प्राधान्यमंगीकुर्वन्ति. देहप्राधान्ये तु विवाहितपतिभजनं मुख्यं, तस्यैव पतित्वात्, न तु भगवद्भजनम्, अतो विवाहितपतिभजनत्यागेन वस्तुतो यः पतिर्भगवांस्तस्य भजनमार्यमार्गाच्चलनमेवेति तथोक्तिर्मूले. **वस्तुविचारस्तु प्रमेयबलमाश्रित्ये**ति, प्रमेयस्य भगवतः सर्वात्मत्वात्सर्व-रूपत्वान्न(च्च!) तद्बलमाश्रित्य "गोपीनां तत्पतीनां चे"त्यादिना भगवति परपुरुषत्वादिखण्डनविचारः इत्यर्थः. तथा च वस्तुतो भगवान्पतिरेवेति तद्भजनमार्यमार्ग एवेत्याशयः. **अन्यथा विधिनिषेधविधय** इत्यादि. प्रमाणबले वस्तुविचारो नास्ति. **अन्यथा** यदि वस्तुविचारः स्यात् तदात्मधर्माणामेव मुख्यता स्यात्, तथा सति देहं पुरस्कृत्य प्रवृत्ता **विधिनिषेधाः व्यर्थाः स्यु**रित्यर्थः. **तदुत्तरत्र वक्ष्यति एकादश** इति. वस्तुविचारेणात्मधर्मपुरस्कारात्त-त्प्रमेयबलं एकादशस्कन्धे उद्धवं प्रति भगवान् वक्ष्यति– "तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनां, प्रवृत्तिं निवृत्तिं च श्रोतव्यं श्रुतमेव च, मामेकमेव शरणमात्मानं सर्वदेहिनां, याहि सर्वात्मभावेन मया स्या ह्यकुतोभय" इत्यादिनेत्यर्थः ॥४०॥

तस्मादत्र फलस्य सिद्धत्वात् साधनदृष्ट्या अपकीर्तिः नास्मत्प्रतिबन्धिका. किञ्च न केवलं नाम्ना मर्यादाभङ्गः किन्तु स्वरूपेणापि, तदाहुः **त्रैलोक्यसौभगमि**ति, त्रैलोक्यस्यापि सुभगत्वं यस्मात्. यथा सूर्येण दिनं, चन्द्रमसा रात्रिः, तथा त्रैलोक्यमेव भगवद्रूपेण सुन्दरतां याति. **इदमि**ति प्रत्यक्षसिद्धं, **च**कारादनुभावाँश्च. तच्छ्रुत्वा एतद् दृष्ट्वा का वा आर्यचरितान्न चलेत्? अस्त्वियं प्रमाणवार्ता दुर्बला, प्रकारान्तरेणापि चलति– भगवतो रूपेण प्रमेयमर्यादाप्यपगच्छति या कथमपि नान्यथा भवति. तदाह **यद्गोद्विजद्रुममृगा** इति. **गावो** हि प्रमाणवार्तानभिज्ञाः, मातरमपि गच्छन्ति. **द्विजाः** पक्षिणः सर्वभक्षाः. **द्रुमाः** स्थावराः, कदाचिदपि बहिःसम्वेदनरहिताः,

## टिप्पणी

इव. तथा सत्यधिकारिविशेषणमहिम्नैवान्यस्याप्राप्तेरविरोधः स्यात्. प्रकृते च प्रभ्वनुग्रहैकलभ्यत्वेन विध्यभावाद्वर्णाश्रमविशेषाधिकारेण प्रवृत्तं वाक्यं न संकुचितुमर्हति, बाधकाभावात्. अतस्ततोऽन्यथाकरणे विरोधो दुर्निवारः. प्रमेयमार्गप्रामाण्यं तु "धर्मव्यतिक्रमो दृष्ट" इत्यादिना "याः श्रुत्वा तत्परोभवेदि"त्यन्तेन शुकवाक्येनैव वक्ष्यत इति सर्वमनवद्यम् ॥४०॥

## प्रकाशः

सुबोधिन्यां **तस्मादत्रे**ति, मार्गान्तरविरोधस्यात्रादुष्टत्वात् प्रमेयमार्ग इत्यर्थः. **कलपदे**त्यादिनोक्तमोहकस्य शब्दरूपत्वेन वेदतुल्यतया मार्गद्वयस्य समबलत्वे प्राप्ते "श्रवणाद्दर्शनादि"ति भगवद्वाक्यस्य प्रमाणमार्गोपोद्बलकतया तस्य बलिष्ठतायां तद्विरोधस्य प्रतिबन्धकत्वमाशङ्क्याहुः **किञ्चे**त्यादि. **नाम्ने**ति शब्देन. **त्रैलोक्यमेवेत्येव**कारोऽग्रिमपदेन योज्यः, दृष्टान्तानुगुण्यात्. तथा च गीतरूपशब्दमात्रेण प्राप्तौ मार्गद्वयस्य तुल्यत्वं शंक्येतापि, न त्वत्र तथेति न तस्य प्रतिबन्धकत्वमिति भावः. अतः परं प्रमाणविचारस्य फल्गुत्वमभिसन्धाय स्वरूपस्यैव चालकत्वं कैमुतिकेन वदन्तीत्यभिप्रायेणाहुः **अस्त्वि**त्यादि. नेदमाश्चर्यं, बलवत्प्रमाणप्रमेयाभ्यां प्रमाणान्तरबाधस्य औदुम्बर्यधिकरणे "औदुम्बरीं स्पृष्ट्वोद्गायेत्, सर्वा सा वेष्टयितव्ये"त्यत्र दृष्टत्वा**दियं** प्रस्तुता **प्रमाणवार्ता** प्रमाणबलाबलचर्चा **अस्तु** विरमताम्. तत्र हेतुः **दुर्बले**ति, स्वरूपधर्मविचारापेक्षया दुर्बलत्वात्. तर्हि स्वरूपेण कथं चालनमित्यत्राहुः **प्रकारान्तरेणे**त्यादि **नाश्चर्यं किञ्चिदत्रे**त्यन्तम्. तथा च स्वरूपं गानं च येषां



निरिन्द्रिया एवेति केचित्. **मृगाः** सर्वतोभयाः. तेऽपि चेद्भगवद्रूपेण गीतेन वा आश्लिष्टरसाः **पुलकानि** धारयन्ति रसिकमनुष्यधर्मानाविष्कुर्वन्ति, ये भगवता अन्यथैव सृष्टाः. स्त्रियस्तु स्वभावतोऽप्यन्यथा भवन्तीति नाश्चर्यं किञ्चिदत्र ॥४०॥

एवं भगवदुक्तानां वाक्यानां निवारणार्थं पुष्टिसिद्धान्तं निरूप्य एतद्भगवत्कृपैकसाध्यमिति भगवत्कृपां प्रार्थयन्ति **व्यक्तमि**ति.

**व्यक्तं भवान् व्रजभयार्तिहरोऽभिजातो**
**देवो यथादिपुरुषः सुरलोकगोप्ता ।**
**तन्नो निधेहि करपङ्कजमार्तबन्धो**
**तप्तस्तनेषु च शिरस्सु च किङ्करीणाम् ॥४१॥**

नापि त्वदुक्तमस्मदुक्तं वा किञ्चित्साधकं बाधकं वा. तथापि स्वावतारप्रयोजनं विचार्य अस्मासु कृपा कर्तव्या. तत्प्रयोजनमाहुः **भवान् व्रजभयार्तिहर** एव **व्यक्तमभिजातः. व्रजस्य आर्तिः** पीडा **भयं** च त्वया दूरीकर्तव्यम्. अन्यथा साक्षाद्भगवतोऽवतारे प्रयोजनं न पश्यामः. भूभारहरणं तु सङ्कर्षणांशेन. वसुदेवादिप्रियं प्रद्युम्नेन. धर्मरक्षा त्वनिरुद्धेन. यदि व्रजभयार्तिनिराकरणं न क्रियेत, तदा किमवतारान्तरकार्यं स्यात्? अतो

## प्रकाशः

प्रमेयमर्यादां नाशयति तेषां चलनं येषां न नाशयति तेषां प्रमेयमर्यादया स्थितिरिति व्यवस्थायां सिद्धायां, येषां प्रमेयमर्यादापि चलनानुगुणा, तत्र "अधिकं तत्रानुप्रविष्टं, न तु तद्धानिरि"ति न्यायान्नाश्चर्यमित्यर्थः. एतेन सगुणैव चलति न तु निर्गुणेति मूले **के**तिपदमनतिप्रयोजनमित्यपि निरस्तम्. "आत्मारामाश्च मुनय" इत्यादिवाक्यानि समर्थितानि ॥४०॥

**व्यक्तमि**त्यत्र. नन्वत्र किं भगवद्वाक्यार्थनिर्धारकरणेन प्रसन्नं भगवन्तं ज्ञात्वा कृपा प्रार्थ्यते, उत सन्देहेऽपि स्वदैन्येन, उत हेत्वन्तरेण? आद्ये स्वत एव तत्सिद्धेः प्रार्थनाप्रयोजनाभावः. द्वितीयेऽपि वाक्योक्तिभिरेव तदनङ्गीकार-सूचनान्न तदौचित्यम्. तृतीयं तु न स्पष्टमित्याशंकायां द्वितीयं सूचयन्त्यस्तृतीयं व्यक्तीकुर्वन्तीत्याशयेनाहुः **नापी**त्यादि. अत्र यद्यपि वासुदेवकार्यं नोक्तमिति प्रकृतं वासुदेवकार्यमिति भवति तथापि पूर्वं मुक्तेस्तत्कार्यत्वेन सिद्धत्वाल्लोक-वेदातीतपुरुषोत्तमकार्यस्य प्रस्तावा**दवतारान्तरकार्य**पदेन पुरुषोत्तमकार्यमेव

व्यक्तं भवान् व्रजभयार्तिहरः. इदानीं यथार्तिरस्माकं तथा न कदापि. अस्मदपगमे तु सर्वस्यापि व्रजस्य महती आर्तिः. अत आर्तिनिवृत्तिः कर्तव्या. ननु मर्यादयैव निवृत्तिकरणमुचितं न तु अमर्यादया, तथा सति भवतीनां कामशान्तिः ज्ञानं वा भवत्विति चेत्, तत्राहुः **देवो यथादिपुरुष** इति. भगवान् ब्रह्मरूपः सर्वसमः, तथापि इन्द्रादिषु कृपां कुर्वन् दैत्यान् मारयन् विषमतामङ्गीकरोति न तु देवेभ्यो ज्ञानं प्रयच्छति. यत्र स्वरूपमेवान्यथाकरोति, तत्र वाचमन्यथाकरोतीति किं वक्तव्यम्? अतो **यथादिपुरुषो**ऽपि **देवो** भूत्वा **सुरलोकगोप्ता** जातः, तथा भवानपि धर्ममर्यादारक्षकः अस्मत्सम्बन्धं करोत्विति भावः. तदेव रसपोषणार्थं व्याजेनाहुः **तन्नो निधेही**ति. आदावस्माकं शिरसि हस्तं स्थापय यथा अस्माकमभयं भवति. ततोऽस्माकं हृदयतापनिवृत्त्यर्थं **स्तनेषु च करपङ्कजम**मृतस्रावि तापनाशकं **निधेहि.** अनौचिती तु नास्ति यतो वयं **किङ्कर्यः.** परीक्षार्थं वा एतद् द्रष्टव्यमिति रसोक्तिः ॥४१॥

एवं प्रार्थनायां भगवान् यत्कृतवान् तदाह **इतीति.**

**॥ श्रीशुक उवाच ॥**

**इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ।**
**प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत् ॥४२॥**

---

## टिप्पणी

**व्यक्तं भवानि**त्यत्र. ननु यथार्तौ सत्यामपीयदवधि तत्र स्थितं तथाधुनापि स्थेयमित्याशङ्कानिरासायाधुनार्तिहरत्वोक्तितात्पर्यमाहुः **इदानीं यथार्तिरि**ति ॥४१॥

## प्रकाशः

तदिति, वासुदेवव्यूहानुक्तिस्तु तस्य व्रजे स्तन्यार्थमाविर्भाविन भगवदैक्येन स्थित्येति प्रतिभाति. **देवो भूत्वे**ति क्रीडापरो भूत्वा. **तथे**ति क्रीडार्थमवतीर्ण इत्यर्थः ॥४१॥

## लेखः

**व्यक्तं भवानि**त्यस्योत्तरार्धे स्तनशिरसोः क्रमो न विवक्षित इत्याशयेनाहुः **आदावि**ति. शिरःसु धारणानन्तरं वक्षसि तथासम्भवादिति भावः ॥४१॥

**एवं प्रार्थनायामि**ति. श्लोकसप्तकस्याभासोऽयं ज्ञेयः.



षड्गुणैश्वर्यभावेन षोढा रेमे हरिः स्वयम् ।
स्वरूपेणापि शृंगारो द्विविधोऽपि निरूपितः ॥(१४)॥

---

## टिप्पणी

**इति विक्लवितमि**त्यत्र. अत्र षड्भिः श्लोकैः रमणं स्वकार्यसहितं निरूप्यते. तत्र संख्यातात्पर्यमाहुः **षड्गुणैश्वर्ये**ति. अत्रायं भावः. भागवते हि परमकाष्ठापन्नं वस्तु 'भगवच्'छब्देनोच्यते. तस्य च षड्गुणवत्त्वमर्थः. प्रकृते च रमणमुच्यते. तच्च विविधभावसाध्यम्. ते च निर्विकारे ब्रह्मणि न सम्भवन्तीति मायया प्राकृतगुणसम्बन्धाद्वैतत्कृतमिति कश्चिद् बहिर्मुखः शङ्केत. तन्निरासो रमणनिरूपकश्लोकसंख्ययैव रमणस्वरूपनिरूपणेन क्रियत इति. एतदेवाहुः **षड्गुणैश्वर्ये**त्यादिना. **षड्गुणे** यो भगवत **ऐश्वर्यभावः** स्वामिभावः रमणे यदा यस्य गुणस्योपयोगस्तदा तत्प्राकट्यकरणेन **रेम** इत्यर्थः. न तु मायाद्यधीनत्वेनेति भावः. अतएव **स्वयं**पदम्. अन्त्येन श्लोकेन

## योजना

**षड्गुणैश्वर्यभावेने**त्यादिसार्धास्तिस्रः कारिकाः. **इति विक्लवितमि**त्यारभ्य **मानिन्योऽभ्यधिकं भुवी**त्यन्तस्य श्लोकषट्कस्य संख्यातात्पर्यमाहुः **षड्गुणैश्वर्यभावेन षोढा रेमे हरिः स्वयमि**ति. "तासां तत्सौभगमदमि"त्यनेन तिरोधानमुक्तं, तत्तात्पर्यमाहुः **स्वरूपेणापी**ति. **षड्गुणैश्वर्यभावेन रेमे, स्वरूपेणापि रेमे** इत्यन्वयः. तथाच **षड्गुणैश्वर्यभावेन हरिः स्वयं** संयोगात्मकशृङ्गाररूपेण रेमे तत् षड्भिः श्लोकैः "मानिन्योऽभ्यधिकं भुवी"त्यन्तैर्निरूप्यते. षड्गुणान् स्वरूपभूतान् कृत्वा धर्मिरूपेण तिरोभावलीलया विप्रलम्भात्मकशृङ्गाररूपेण रेमे तद्रमणं "तत्रैवान्तरधीयत" इत्यनेन निरूप्यत इत्यर्थः. एवं सप्तभिः श्लोकैः सिद्धमर्थमनुवदन्ति **शृङ्गारो द्विविधोऽपि निरूपित** इति (१४).

## कारिकार्थः

**इति विक्लवितं तासामि**त्यत्र षड्भिः श्लोकैः रमणनिरूपणे संख्यातात्पर्यमाहुः **षड्गुणैश्वर्यभावेने**त्यादि. **षड्गुणैश्वर्यभावेने**ति कारिकार्धेन षड्भिः श्लोकैः रमणनिरूपणे तात्पर्यमुक्तम्. **स्वरूपेणापी**ति, **स्वरूपेणापि रेमे** इत्यर्थः. अन्त्येन श्लोकेन विप्रलम्भोक्त्या **द्विविधोऽपि शृंगारो निरूपित** इत्यर्थः. पूर्णेन स्वरूपेण रेमे इति भावः (१४).

सामान्यरमणं पूर्वं विशेषे मेलनं पुरा ।
बाह्येन रमणं पश्चाद् आन्तरं च ततः परम् ॥(१५)॥

## टिप्पणी

तिरोधानोक्त्या विप्रलम्भोऽपि निरूपितो भवतीति पूर्णो रसोऽत्र निरूपितो भवतीत्याहुः **स्वरूपेणापी**ति. विशेषतो लक्षणानि त्वग्रे वाच्यानीति भावः (१४).

वाक्यार्थानाहुः **सामान्ये**त्यादि. विशेषरमणं बाह्याभ्यन्तरभेदेन द्विविधमिति द्वितीयेन बाह्यं तदुक्तमित्याहुः **विशेष** इति. तृतीयेनान्तरम्.

## लेखः

**इतीत्यत्र** कारिकासु **बाह्येन रमणमिति**, स्वरूपाद् **बाह्येन** प्रकारेण गतिकटाक्षादिभिः कामोद्बोधेन **रमणमि**त्यर्थः. अतएव "रक्षणं दूरादेवे"ति तत्र वक्ष्यते. **आन्तरमि**ति स्वरूपनिष्ठं बन्धादिप्रकारकमित्यर्थः. टिप्पण्यां

## योजना

**सामान्यरमणं पूर्वमि**ति, "इति विक्लवितं तासामि"तिश्लोकेन सामान्यरमणं निरूपितमित्यर्थः. **विशेषे मेलनं पुरेति**, **विशेषे** रमणे विशेषरमणार्थं **पुरा** पूर्वं **मेलनं** सङ्गमः "स ताभिः समेताभिरुदारचेष्टित" इत्यनेन श्लोकेन निरूपितः, "व्यरोचतैणांक इवोडुभिर्वृत" इति वाक्यात्. विशेषरमणं द्विविधमित्याहुः **बाह्येन रमणं पश्चादान्तरं चे**ति. **बाह्येन रमणमि**ति साक्षादंगस्पर्शनादेः सकाशाद् बाह्येन विलासपूर्वकगत्यादिरूपेणे-त्यादि. तद्रमण"मुपगीयमान उद्गायन्नि"त्यनेन निरूपितम्. **आन्तरं च ततः परमि**ति, साक्षादंगस्पर्शादिरूपम् आन्तरं रमणं "नद्याः पुलिनमाविश्ये"त्यनेन श्लोकेन निरूपितं बन्धादिप्रकारेण (१५).

## कारिकार्थः

वाक्यार्थानाहुः **सामान्ये**त्यादि. अत्र वाक्यार्थविभागो दुर्बोधोऽपि प्राचां व्याख्यानुसारेण यथाकथंचिदुच्यते. आद्येन सामान्यरमणं ततः त्रिभिः श्लोकैः विशेषरमणमित्याशयेन आहुः **विशेषे मेलनं पुरे**ति. विशेषरमणनिमित्तं **पूर्वमेलनं** ताभिः सह समागमः, तदुक्तं "ताभिः समेताभिरि"ति श्लोकेन. **ततः** पश्चात् द्वितीयेन श्लोकेन "उपगीयमान उद्गायन्नि"त्यनेन **बाह्येन** स्वरूपाद् बाह्यप्रकारेण गतिविलासादिना **रमणम्. ततः परं** "नद्याः पुलिनमाविश्ये"ति तृतीयेन श्लोकेन **आन्तरं** स्वरूपनिष्ठं बंधादिप्रकारेण



ततो नानाविलासेन जातकेलिविभेदतः ।
विप्रलंभस्य सिद्ध्यर्थं तासां मानमुदीर्यते ॥(१६)॥
तिरोभावस्ततश्चापि नायं लौकिककामुकः ॥

## टिप्पणी

अजातस्मरकेलि-जातस्मरकेलिभेदेन द्विविधा विलासा इति द्वाभ्यां तदुक्तिः. ननु नायिकामानापनोदनं चाटुकारैरकृत्वैवं कथं कृतवानित्यत आहुस्तात्पर्यं **नायं लौकिके**ति. एतच्च श्लोकविवृतौ स्फुटीभविष्यतीति तथा[1] (१५-१६).

## लेखः

**द्वितीयेन बाह्यमि**ति, विशेषरमणे द्वितीयेनेत्यर्थः. **तृतीयेनान्तरमि**त्यत्रापि तथा. **द्वाभ्यां तदुक्तिरि**ति, आन्तररमणनिरूपकश्लोकेन नानाविलासरमण-निरूपकश्लोकेन च क्रमेणोभयोक्तिरित्यर्थः (१५-१६).

## योजना

**ततो नानाविलासेन जातकेलिविभेदत** इति, **जातकेलिविभेदतः नानाविलासेन रमणमि**त्यन्वयः. तन्नानाविलासेन रमणं "बाहुप्रसारे"तिश्लोकेन निरूपितम्. **विप्रलम्भस्य सिद्ध्यर्थमि**ति, "एवं भगवतः कृष्णादि"ति श्लोकेन **मानमुदीर्यते** तस्य प्रयोजनमाहुः **विप्रलम्भस्य सिद्ध्यर्थमि**ति. "तासां तत्सौभगमदमि"ति श्लोकस्यार्थमाहुः **तिरोभावस्ततश्चापी**त्यादिना. **नायं लौकिककामुक** इति —एतस्यार्थष्टिप्पण्यां स्फुटः (१६$\frac{1}{2}$).

## कारिकार्थः

**रमणमि**त्यर्थः. **ततो नानाविलासेन जातकेलिविभेदत** इति. "अजातस्मरकेलि-जातस्मरकेलिविभेदेन द्विविधा विलासा इति द्वाभ्यां तदुक्तिरि"त्युक्तं टिप्पण्याम्. अयं टिप्पणीलेखो व्याख्यातः श्रीवल्लभगोस्वामिभिः— "नद्याः पुलिनमाविश्ये"ति श्लोकेन आन्तररमणनिरूपकेण अजातस्मरकेलिविलासा उक्ताः "बाहुप्रसारे"ति श्लोकेन जातस्मरकेलिविलासा उक्ता इति. अतएव सुबोधिन्यां "नद्याः पुलिनमाविश्ये"ति श्लोकव्याख्यानान्ते "एवं तासां सर्व-भावेन जातस्मरकेलित्वं संपादितमि"त्युक्तम्. तथा च "इति विक्लवित-मि"त्याद्येन सामान्यरमणं ततः त्रिभिर्विशेषरमणम्. तत्राद्येन समागमः द्वितीयेन बाह्यरमणं तृतीयेन आन्तररमणं, तत्रैव अजातस्मरकेलिविलासः

१. स्फुटीभविष्यति. तथा तदैव मू. पा.

प्रथमं तासां तापापनोदनार्थं सामान्यलीलामाह **इति** तासां **विक्लवितं** परमवैक्लव्यभाषितं **श्रुत्वा प्रहस्य अरीरमत्.** ननु निरिन्द्रियः कथं रेमे? तत्राह **योगेश्वराणामपीश्वर** इति. योगादिषु सर्वे पदार्थाः स्फुरन्ति, अणिमादयोऽपि, तथा तदैव स्वरूपमेवेन्द्रियादिभावेन प्रकटीकृतवान्. न तु

---

### लेखः

सुबोधिन्यां **विक्लवितमि**ति 'क्लुङ्' गताविति धातोः क्लान्तं, वैक्लव्यमित्यर्थः. **निरिन्द्रिय** इति, इन्द्रियेषु सत्सु हि तैः स्त्रीप्रेक्षणादिना जातेन कामेन गोलके अणुत्वमहत्त्वे भवत इति भावः. **योगादिष्वि**ति **आदि**शब्देन ज्ञानम्, अवान्तरभेदविवक्षया बहुवचनम्. तेषु सत्सु **पदार्थाः** स्वतएव **स्फुरन्ति** इन्द्रियैर्विनैव ज्ञानक्रियोपयोगिनो भवन्तीत्यर्थः. योगेश्वरा

### योजना

**इति विक्लवितमि**त्यस्य विवरणे **ननु निरिन्द्रियः कथं रेमे** इति. भगवतः इन्द्रियाणि न सन्ति. परिदृश्यमाने साकारे ब्रह्मणि गोलकेषु प्रत्यक्षतो दृश्यमानेषु इन्द्रियाण्यंगीकर्तव्यानि स्युः. तथा सति परिदृश्यमानात् साकाराद् ब्रह्मणः सकाशादतिरिक्तं वस्तु ब्रह्मण्यायात्. तथा सति स्वगतद्वैतं स्यात्, तत्तरुपत्रयोरिव. तच्च सिद्धान्ते ब्रह्मणि नास्ति, "सजातीयविजातीयस्वगतद्वैतवर्जितमि"ति वाक्यात्. एवं सति यद्गोलकत्वेन प्रतीयते तद् बह्मैव. न तत्र पार्थक्येन चक्षुरादीन्द्रियाणामंगीकारः न वा सूर्यादिदेवानां किन्तु ब्रह्मैव दर्शनरूपं कार्यं कुर्वच्चक्षुरादिशब्दवाच्यं भवति, "पश्यन् चक्षुर्वदन् वागि"त्यादिश्रुतेः. इत्थमेव तृतीयाध्यायभाष्ये स्फुटमुपपादितम् अलौकिकान्यपीन्द्रियाणि नांगीकृतानीति. अत एवात्राप्येवं समाधानमाहु[1]ः **स्वरूपमेवेन्द्रियादिभावेन प्रकटीकृतवानि**ति, [2]**इन्द्रियादिभावेन** प्रकटीभूतं व्रजसुन्दरीप्रेमफलदानार्थं तादृशभावविशिष्टेन्द्रियादिरूपेण **स्वरूपं** प्रकटितवानित्यर्थः. ननु

### कारिकार्थः

– एवं चत्वारः. "बाहुप्रसारे"त्यनेनोक्ताः जातस्मरकेलिविलासाः. षष्ठश्लोकार्थमाहुः **विप्रलम्भस्य सिद्ध्यर्थमि**ति. सप्तमार्थमाहुः **तिरोभावस्ततश्चापी**ति. तिरोभावे हेतुमाहुः **नायं लौकिककामुक** इति (१५-१६½).

---

१. अत्राप्येवमाहुः इति मुद्रितः पाठः. मुं. वि. पाठः गृहीतः.

२. इन्द्रियादिकार्यं कुर्वत् सर्वदैव विराजमानं रूपं व्रजसुन्दरीः प्रति संप्रति प्रकटीकृतवान् चक्षुरादीन्द्रियलीलाः शृंगाररसरीतिकप्रेमावलोकनादिरूपाः सर्वाः कृतवानित्यर्थः- इति जय. पाठः.



स्वस्य कामेन, तथा सति बीजनिवृत्तौ कामो निवर्तेत. तासां यथा न कदाचिदपि स भावो गच्छति तदर्थं **प्रहस्य** प्रकर्षेण हास्यं कृत्वा. तासामुद्धरणार्थं, न तु भिन्नगणनया मर्यादायां पातयित्वा नाशनार्थमिति, तदाह **सदयमि**ति. **गोपीरेवारमयत्**, स्वयं **त्वात्माराम**एव. तासां रसाधारत्वाय वा **सदयम्.**

---

### टिप्पणी

**तदैव स्वरूपमेवे**त्यारभ्य **वचः स्फुटमि**त्यन्तग्रन्थस्यायं भावः. प्राकृतपुरुषस्येव स्त्रीप्रेक्षणादिभिस्तदा सञ्जातः कामश्चेत्स्यात्, तज्जनितश्चाङ्गादिविकारः स्यात्, तदा प्राकृतस्येव तन्नाशोऽपि स्यात्. न चैवं किन्तु "रसो वै स" इत्यादिश्रुतिभिः स्वरूपमेव रसात्मकमिति रसशास्त्रसिद्धा यावन्तो भेदास्तत्सर्वरूपं स्वरूपमेवेति तादृशमेव पुरुषोत्तमस्वरूपमिति नानुपपत्तिः काचिदिति. यथा दैत्यान्प्रति वीररूपेणैवाविर्भावः, तेषां तथैवाधिकारात्, तथात्रैवमाविर्भाव इति हृदयम्. हासस्य मोहकत्वेनाधुना तत्प्रयोजनाभावमाशङ्क्य तदाहुः **तासां यथे**त्यादि. हासे प्रकर्षोऽयमेव. सख्याङ्गीकारएव हास्यसम्भव इति तथा. अन्यथोक्तरूपेण समं साम्याभावाद्रसो न स्यात्. सख्यस्वभावादेव न स्वस्माद्भिन्नतया गणना. सा तु मर्यादायामङ्गीकारे भवति. तथा सत्येवंभूतानामपि मर्यादायां पातने भक्तिमार्गमर्यादानाशः स्यात्. तदेतदुक्तं **नाशनार्थमि**त्यन्तेन. उद्धारोऽत्रैतदुक्ततापात्. उत्कटतापदर्शनेनैव तदुद्धरणार्थं दया. तथा च हासेनैव तापनाशः सूचितो भवति. अन्यथा रसाभासहेतुत्वेन तां न वदेत्. अथवा. मूले **सदयं रेम** इति सम्बन्धः. इदं हि रमणमभूत-

### लेखः

ब्रह्मादयस्तेषां जिज्ञासायां चिकीर्षायां च ज्ञानयोगावेव ज्ञानकर्मेन्द्रियरूपौ भवत इति निबन्धे पुरञ्जनप्रसङ्गे निरूपितम्. अयं तु तेषामपीश्वरो, अतोऽत्र स्वरूपमेव तथा भवतीत्याहु**स्तथे**ति. **इन्द्रियादी**ति, इन्द्रियादित्वेनेत्यर्थः. **आदि**पदेन प्राणमनोदेहकामास्तत्त्वेनापि स्वरूपमेव प्रकटितवान्. स्वरूपेणैव तत्तत्कार्यं करोतीत्यर्थः. **तथा सती**ति, कामकृतत्वे लोकन्यायः स्यात् तदा तन्न्यायेन तदपि स्यादित्यर्थः. **तदाहे**ति, **तत्** तदर्थम् उद्धारार्थक-हासकरणार्थं दया**माहे**त्यर्थः. **आत्माराम एवे**ति. **आत्मनि** स्वरूपे **आरामो** रमणं यस्येत्यर्थः. गोपीनां भगवता सह रमणं, भगवतस्तु स्वरूपे एव रमणमिति "रेमे तया चात्मरत" इति श्लोके व्युत्पादयिष्यते.

[1]क्रिया सर्वापि सैवात्र परं कामो न विद्यते ॥(१७)॥

## टिप्पणी

पूर्वमादावुक्तं सामान्यरूपं च. अतोऽत्र न पूर्णरसदानं किन्त्वग्रे. तेन न भगवत्समानं सामर्थ्यमधुनास्तीत्यधिकक्रियाशक्त्याविर्भावने नायिकानामुपमर्देन रसनाशः स्यादिति तदभावाय दयोक्ता. यद्यप्येवं रसः पुष्टो न भवति तथापि रसाभासभावाभासैर्मुख्यो रसः पोष्यत इतीदं रमणमग्रिमरसपोषायोपयुज्यते. अतएवाभासे **तापापनोदनार्थं सामान्यलीलामाहे**त्युक्तमाचार्यैः.

[2][ **क्रिया सर्वापि सैवे**त्यत्र. भगवतो भक्तानां चालौकिकत्वं लौकिककामाभावं चाहुः **क्रिया सर्वापी**ति. अयमर्थः. लोके रससम्बन्धिनी क्रिया लौकिककामविषयिण्येव प्रसिद्धेति भगवच्चेष्टायाश्च तत्सजातीयत्वात्कामोऽपि लौकिकएव भविष्यतीति कस्यचिद् भ्रान्तस्याशङ्कां वारयितुमाहुः **परं काम** इति, लौकिकः कामो न विद्यत इत्यर्थः (१७).

## प्रकाशः

**इति विक्लवितमि**त्यत्र. ननु परार्थेऽपि रमणे **योगेश्वरेश्वर**त्वकथनाद्योगिवद्रमणमायाति. ते च संकल्पादेव तथा तथा विदधतीति "संकल्पादेव च तच्छ्रुतेरि"त्यत्र सिद्धं मतान्तरे. स च कामजनक इति कामस्यापि सिद्धौ कथमात्मारामत्वं युज्यत इत्याकांक्षायां तदुपपादयितुमाहुः **क्रिया सर्वे**त्यादि. अत्र कारिकाव्याख्यानं टिप्पणीपुस्तकेषु दृश्यते, तत्पाण्डुलिखने[3] नास्तीति

## योजना

"बाहुप्रसारपरिरंभकरालकोरुनीवीस्तनालभने"त्यादिना लौकिकक्रियासदृशी क्रिया प्रतीयते, सा च कामं विनानुपपन्नेति कामोऽप्यंगीकर्तव्यः, तथा सति प्राकृतत्वमेवायातीत्याशंक्य समाधिमाहुः **क्रिया सर्वापि सैवात्रे**त्यादिकारिकाभिः. "बाहुप्रसारे"त्यादिना या क्रिया उक्ता सा सर्वैव वर्तते परन्तु तस्या अलौकिकत्वात्तया न लौकिकः काम आक्षिप्यते. तदाहुः **परं कामो न विद्यते** लौकिकः कामो न विद्यत इत्यर्थः (१७).

१. अत्र 'निष्कामलीला' व्याख्यानं प्रथमपरिशिष्टे मुद्रितम्.

२. "अत्र कारिकाव्याख्यानं टिप्पणीपुस्तकेषु दृश्यते, तत् पाण्डुलिखने नास्तीति श्रीगोकुलनाथानां तत् प्रतिभाति, लेखरीत्यपि तथेति चे"ति श्रीपुरुषोत्तमाः.

३. इदं पाण्डुलिखनं सुरतिपुरे श्रीमद्बालकृष्णप्रभुमन्दिरे सेवायां विराजते. अनेन संशोध्य श्रीमती टिप्पणी मुद्रितास्माभिः (आद्यसम्पादकीया टिप्पणी).



## प्रकाशः

श्रीगोकुलनाथानां तत् प्रतिभाति, लेखरीत्यापि तथेति च. **क्रिया** रमणोपयोगिनी **सर्वा** रसोद्बोधिका पोषिका पूरिका च **अपि**शब्दात्तदवान्तरभेदभिन्ना च **सैव** "रसो वै स" इति श्रुत्या भगवतो रसात्मकत्वेन रसशास्त्रसिद्धैवात्र रमणे **परं** किन्तु **कामो न विद्यते** कामो नास्ति. तथा च न योगिवद्रमणं किन्तु यथा योगेऽणिमादिसर्वस्फूर्तिः तथात्र तदीश्वरत्वेन रमणोपयोगि सर्वमभिध्यागोचरीकृत्य स्वस्वरूपमेवेन्द्रियादि[1]भावेन प्रकटीकृतवानिति यथा पुरुषविधब्राह्मणे "स वै नैव रेमे" इत्यादिना रमणादिकथनोत्तरं "सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदि"त्युपसंहारात्तत्र कामाभावः, इच्छाया अपि स्वरूपानतिरेकाद्, एवमत्रापि. तेन तत्र यथा तत्क्रियासत्त्वेऽप्यात्मारामत्वम् एवमत्रापीत्यर्थः (१७).

ननु श्रुत्युक्ता लीला स्वाभाविकी स्वार्था च, प्रकृता तु परार्था आगन्तुकी, सा च यदर्था तदनुरूपैव भवित्री, सर्वत्र तथा दर्शनात्. एवं सति यदर्थेयं लीला तास्तु "त्वत्सुन्दरस्मितनिरीक्षणतीव्रकामतप्तात्मनामि"त्यादिवाक्योक्त्या सकामत्वेन निर्णीयन्त इति तत्सम्बन्धाल्लीलायास्तत्कामपूरकतया कामोपाधिकत्वे सिद्धे भगवत आत्मारामत्वं कथं सिध्यतीत्याशंकायामाहुः **तासामि**त्यादि. लीला हि भगवद्धर्मरूपा, भगवांस्तु निष्कामत्वेन सर्वश्रुतिसिद्ध इति तदीयलीलया तत्कामपूर्त्या ता अपि निष्कामाः, श्रुता"वथाकामयमान" इति प्रतिज्ञाय "योऽकामो निष्काम आत्मकाम" इति कथनेनात्मकामस्य निष्कामकोटिनिवेशात्. प्रकृते च "सन्त्यज्य सर्वविषयानि"त्यत्रात्मकामतया तथात्वस्य स्फुटत्वात् भगवता कामपूर्तेः "सोऽश्नुते सर्वान्

## लेखः

**क्रिया सर्वापि सैवे**ति कामशास्त्रसिद्धैवेत्यर्थः. **परमि**ति, कामशास्त्रसिद्धः स्त्रीप्रेक्षणादिजनितोऽङ्गादिविकारहेतुः **कामो न विद्यते** इत्यर्थः (१७). **तासां**

## कारिकार्थः

अत्रैवाग्रे भगवतो भक्तानां चालौकिकत्वं लौकिककामाभावं चाहुः **क्रिया सर्वापी**ति. भगवल्लीलायां **क्रिया सर्वापि सैव** लौकिकसदृश्येवास्ति **परन्तु** भगवति लौकिकः **कामो न विद्यते** इत्यर्थः (१७).

१. इन्द्रियाभावेन इति मुद्रितपाठः जू.पाठमनुसृत्य संशोधितः.

तासां कामस्य सम्पूर्तिर्निष्कामेनेति तास्तथा ।
कामेन पूरितः कामः संसारं जनयेत् स्फुटः ॥(१८)॥

## टिप्पणी

ननु भगवान् पुरुषोत्तम इत्यस्तु नाम लौकिककामाभावः, एतासां लौकिकतद्वत्त्वमस्त्विति चेत्तत्राहुः **तासां कामस्ये**ति. अयमर्थः— यदि भक्तानां लौकिकः कामः स्यात्तर्ह्यलौकिकेन भगवत्कामेन पूर्णो न स्यात्, तयोः परस्परमेकजातीयत्वाभावात्, विजातीयेन विजातीयस्य पूरणासम्भवात्. अतो भगवत्कामेनैव तासां कामस्य पूर्तेर्भगवत्तुल्यत्वं तासामपीति ज्ञापनायोक्तं **तास्तथे**ति. यथा भगवानप्राकृतो लौकिककामरहितस्तथैता अपीत्यर्थः. अन्यथा भगवतः पूर्णरसोद्बोधो न स्याद्, न्यूनाधिकत्वेन भाववैजात्यात्. ननु **कामो न विद्यत** इति कथनाद्भगवति तत्सम्बन्धाद् भक्तेषु चोभयविधकामाभाव एवास्त्विति चेत्, न, पञ्चमाध्यायोक्तकारिकाविरोधात्, तत्र लौकिकनिषेधपूर्वकमलौकिकस्य भगवति निरूपितत्वात्. तथा हि. "अत्रैव लोके प्रकटमाधिदैविकमुत्तमं कामाख्यं सुखमुत्कृष्टं कृष्णो भुङ्क्ते न चापर" इति. अत्र कामसुखस्य आधिदैविकत्वोत्तमत्वविशिष्टस्य प्रभोर्भोक्तृत्वकथनाल्लौकिकस्यैव तस्य निषेधो, न त्वलौकिकस्यापि. अतो भगवद्भोग्यास्वपि तथैव, अन्यथा भगवतो भोक्तृत्वमेव न स्यात्. तस्मात् सुष्ठूक्तं **तास्तथे**ति. विपक्षे बाधकमाहुः **कामेने**ति, प्राकृतेनेति शेषः. तादृशस्य संसारजनना-

## प्रकाशः

कामानि"ति श्रुत्युक्तरीतिकतया तत्कृतावपि भगवतो निष्कामत्वेन तत्सम्बन्धा**त्ता** अपि **तथे**त्यर्थः. नन्वस्त्वेवं, तथापि तासां वाक्येषु "संत्यज्ये"त्यत्रात्मकामत्वस्यैव "त्वत्सुन्दरे"त्यत्र तदतिरिक्तकामवत्त्वस्यापि स्फुटत्वान्न सर्वथा निष्कामत्वविनिगमने[1]त्याकांक्षायां तदुक्तमभ्युपगम्य कामवत्त्वेऽपि निष्कामत्वं परिचाययितुमाहुः **कामेने**त्यादि. यथा द्वारकालीलायां महिष्यादिकामः प्रद्युम्नरूपेणामोघरेतसा भगवता कामेन पूरितः पुत्रादिरूपं संसारं जनयन् प्रकटोऽभूत् एवमत्र मूलरूपीयकामेन पूरितश्चेत्स स्याद्, अत्रापि तं जनयन् स्फुटः स्यात्. यतो नैवम् अतो नायं कामेन पूरितः. यतः पूरितः अतः कामाभावेनैव पूर्णः, अतो निष्कामः, वह्न्याविष्टदारुवत् कामस्वरूपादेव निवृत्त इत्यर्थः (१८).

१. विनिगमनं इति स्यात्.



कामाभावेन पूर्णस्तु निष्कामः स्यात् न संशयः ।

## टिप्पणी

वश्यकत्वात्, प्राकृतेषु सर्वत्रैव तथा दर्शनात्, अत्रत्यभक्तेषु संसाराभावात्प्राकृततदभावो निःसन्दिग्ध इति ज्ञापनायोक्तं **न संशय** इति ($१८\frac{१}{२}$).

## प्रकाशः

ननु महावन्ध्यात्वभावकभेषजभक्षण-त्वभावादिनापि संसाराजननस्य दृष्टत्वात्तर्कितो हेतुः साधारण इति शङ्कायां साधारण्यबाधकमत्र मानं स्मारयन्ति **न संशय** इति. "न मय्यावेशितधियां कामः कामाय कल्पते भर्जिताः क्वथिता धाना भूयो बीजाय नेशत" इति भगवता भाविरमणबोधनसमय एवोक्तत्वात्. तथा च दग्धपटे पटत्वं यथाकारमात्रेण प्रतीयते, तथात्र क्रियासाम्येनोभयत्र तत्प्रतीतिः, न तु भगवति भक्तेषु वा काम

## लेखः

**कामस्ये**ति अभिलाषस्येत्यर्थः. **संसारमि**ति, तादृशकामलीला श्रुता संसारोत्पत्तिमेव कुर्यात् न तु हृद्रोगनिवृत्तिमित्यर्थः (१८). **कामाभावेने**ति, कामस्याभावो यत्र तादृशेन स्वरूपेण **तु निष्काम**एवाभिलाषः **पूर्णः स्याद्,** अतो निष्कामाभिलाषवत्त्वादेता निष्कामा इति शेषः. अत्र **काम**पदेन देवतारूपः कामो विवक्षित इति ज्ञेयम्. "उदारहासे"त्यनेन कामसम्पादनेऽपि तस्यागन्तुकत्वाद् व्यभिचारिभावेन स्थायिभावस्येव न तेन निष्कामत्वस्य हानिरिति भावः (१९). पञ्चमाध्यायोक्तमलौकिककामयुक्तमपि चरित्रं

## योजना

तत्र गमकमाहुः **कामेन पूरितः कामः संसारं जनयेत् स्फुट**मिति. लौकिक**कामेन** चेत् व्रजसुन्दरीणां **कामः पूरितः** स्यात् तदा **संसारं** पुत्रादिरूपं **जनये**दित्यर्थः (१८).

## कारिकार्थः

एवं भगवति लौकिककामाभावमुक्त्वा तासामपि लौकिककामाभावमुपपादयन्ति **तासां कामस्ये**ति. अलौकिककामेन **तासां कामस्य पूर्तिरि**ति हेतो**स्ता अपि तथा** लौकिककामरहिता इत्यर्थः, विजातीयेन विजातीयस्य पूरणासंभवात्. तासु लौकिककामवत्त्वे बाधकमाहुः **कामेन पूरितः कामे**ति, प्राकृतेन कामेनेत्यर्थः. अत्रत्य भक्तेषु संसाराभावात् प्राकृतकामाभावो

अतो न कापि मर्यादा भग्ना मोक्षफलापि च ॥(१९)॥
अत एतच्छ्रुतौ लोको निष्कामः सर्वथा भवेत् ।

## टिप्पणी

प्राकृतत्वाभावे हेत्वन्तरमाहुः **अतो न कापी**ति. यतोऽस्य भावस्यालौकिकत्वम्, **अत**एव मर्यादामार्गीयमोक्षेच्छूनामपि प्रवृत्ति**र्न** बाधितेत्यर्थः. मोक्षमार्गे कामाभाववतामेवाधिकारात्. तथा च श्रुतिः "श्रोत्रियस्य चाकामहतस्ये"ति. तस्माद्यद्यस्य भावस्य प्राकृतत्वं स्यात् तदा तत्कृतलीलाया अपि तथात्वात्तच्छ्रवणे लौकिककाव्यादिवत् कामोद्बोधात्तेषामेतल्लीलाश्रवणस्य विपरीतफलकत्वात् प्रवृत्तिर्न स्यादित्यर्थः. **च**काराद् भक्तिमार्गीयापि **मर्यादा न भग्ने**त्यर्थः (१९).

तस्मादस्य भावस्यालौकिकत्वात्तेषामेतल्लीलाश्रवणे फलमुखां प्रवृत्तिमाहुः **अत एतच्छ्रुतावि**ति. एतल्लीलाश्रवणेन **लोकः** सर्वोऽपि साधारणोऽपि लौकिककामरहितो **भवेत्.** नन्वेतादृक्श्रवणमात्रेण कथं लौकिकतदभाव इति चेत्तत्राहुः **भगवच्चरितं सर्वमि**ति, वस्तुस्वभावादेवेत्यर्थः. यद्वस्तु यादृशं

## प्रकाशः

इत्यर्थः. **कापी**त्यनेन रसशास्त्रीया ब्रह्मधर्मीया संगृहीता ज्ञेया. तत्र ब्रह्मधर्मीयाया अभङ्गस्तु साधितएव, रसशास्त्रीयायास्तु स्वधर्मादिप्रवेशेन साम्यसम्पादने "निरञ्जनः परमं साम्यमुपैती"ति श्रुत्यावधारणीय इति निगूढाशयो बोध्यः (१९).

शेषं टिप्पण्यां स्फुटमिति दिक् ॥४२॥

## योजना

एतल्लीलाश्रवणकीर्तनादिफलत्वेन कामाभावस्योक्तत्वादपि नेयं कामलीलेत्याहुः **अत एतच्छ्रुतौ लोको निष्कामः सर्वथा भवेदि**ति. **ततः शुकवचः स्फुटमि**ति, एतल्लीलाश्रवणकीर्तनफलत्वेन लौकिककामनिवृत्तिबोधकं "कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीर" इति शुकवचः स्फुटमित्यर्थः ॥४२॥

## कारिकार्थः

निःसन्दिग्ध इति ज्ञापनायोक्तं **न संशय** इति. **अतो न कापी**ति; **मोक्षफला मर्यादा–** कामे सति न मोक्षः कामाभावे एव मोक्ष इति लक्षणा – **अपि न भग्ने**ति सम्बन्धः (१८-१९).



भगवच्चरितं सर्वं यतो निष्काममीर्यते ॥(२०)॥
अतः कामस्य नोद्बोधः ततः शुकवचः स्फुटम् ।

## टिप्पणी

भवति तत्स्वनिष्ठमपि तादृशं करोति. एतल्लीलाया लौकिककामराहित्याद् अलौकिकतत्प्रतिपादकत्वादेतत्परोऽपि लौकिकतद्रहितः सन्नलौकिकनिर्हेतुकभगवद्भावयुक्तो भवतीत्यर्थः. श्रवणं तु लीलातात्पर्यावधारणपूर्वकं न तु यथाकथञ्चित् (२०).

**अतः कामस्ये**ति. यत इयं लीला लौकिककामरहिता **अत** एतच्छ्रवणेन लौकिककाव्यश्रवणव**न्न** लौकिकत**दुद्बोधः. ततः** कारणात् "कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीर" इति **शुक**वचनं **स्फुटं** स्फुटार्थमित्यर्थः (२०$\frac{१}{२}$).]

**अतो न कापी**ति. **मोक्षफला मर्यादा** कामे सति न मोक्षः तदभाव एव सः इति **लक्षणापि न भग्ने**ति सम्बन्धः. [1]तथा च श्रुतिः मोक्षरूपब्रह्मानन्दप्राप्तौ "श्रोत्रियस्य चाकामहतस्ये"ति[1]. तत्रोपपत्तिमाहुः **अत एतच्छ्रुतावि**ति (१९$\frac{१}{२}$).

ननु कामलीलाश्रवणेन लौकिकभावोत्पत्तिर्लौकिकस्यावश्यं भवतीति विपरीतं प्रयोजनं स्यादित्यत आहुः **भगवच्चरितमि**त्येकं श्लोकम्. वस्तुस्वभावादेवाद्भुतकर्मत्वाच्च प्रभोरेतच्छ्रवणे तदुद्बोधो नेत्यर्थः. यतो न भवत्यतएव शुक एतल्लीलाश्रवणादिफलं कामाभावमेव "काममपहिनोती"ति प्रकटमेवाह. यद्यपि 'हृद्दोषमपहिनोती'त्येवमेव वाच्यं, तावतैव चारितार्थ्यात्, तथाप्युक्तलीलास्वरूपं ज्ञापयितुं **स्फुटमा**हेत्यर्थः (२०$\frac{१}{२}$).

## लेखः

वस्तुतो निष्काममेवेत्याशयेनाहुः **सर्वमि**ति. **निष्काममि**ति, लीलाश्रवणनिवर्त्यकामरहितमित्यर्थः (२०).

## कारिकार्थः

**अतः कामस्य नोद्बोध** इति, भगवच्चरित्रस्य निष्कामत्वाद् एतच्छ्रवणे लौकिककाव्यवत् न लौकिककामोद्बोध इत्यर्थः. **ततः** कारणात् "कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीर" इति **शुकवचनं स्फुटं** स्फुटार्थकमित्यर्थः (२०$\frac{१}{२}$).

१-१. इदं मूले नास्ति.

आत्मारामस्य आत्मनैव रमणं व्यावर्तयितु**मपि**शब्दः. **अरीरमत्** बहुधा रेमे, उत्तरोत्तरं रसाधिक्यं च प्रकटितवान् ॥४२॥

एवं सामान्यलीलामुक्त्वा विशेषलीलामाह **ताभिरि**ति त्रिभिः.

**ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ।**
**उदारहासद्विजकुन्ददीधितिर्व्यरोचतैणाङ्क इवोडुभिर्वृतः ॥४३॥**

अजातस्मरकेलिभिः प्रथमतः **ताभिः समेतो** जातः मिलितः, पूर्वं भयात् पृथक् स्थिताः. तत **उदाराणि चेष्टितानि** यस्य. अत्र औदार्यं रसविषयकं– यथा तासां महानेव रस आविर्भवति तथा कामशास्त्रसिद्धलीलाः सर्वाएव कृतवान्. ततस्ता अन्तःपूर्णरसाः **प्रियस्य** भगवत **ईक्षणार्थमुत्फुल्लानि मुखानि** यासां तादृश्यो जाताः. **प्रियेक्षणेन** वा सूर्यकिरणैरिव **उत्फुल्लानि मुखानि.** वस्तुतो लोभस्थितरसार्थमेव तथाकरणम्. एतावति कृते रसो निवर्तते, तदभावायाह **अच्युत** इति. तासामपि रससमाप्त्यभावाय **उदारे**ति. **उदारो** यो **हासः** पूर्णकामप्रदः, कामार्थमेव यो मोहः तेनैव स्नेहः सम्वर्धितः. तदाह **हास**सहिता ये **द्विजाः** त एव **कुन्द**पुष्पाणि आरक्तान्यपि हासेन शुभ्राणि तेषु **दीधितिर्**यस्य. कुन्दत्वं स्नेहस्यैतन्मात्रपर्यवसानार्थम्. [1](पूर्वं निरुपधिरेव स्नेहः स्थितः, भगवता परं रसशास्त्रोक्तरीत्या स्वरूपानन्दं दातुं तत्सजातीयः कामोपाधिकः स्नेहोऽधुना जनित इति ज्ञापनाय स्नेहरूपरदानां **द्विज**पदेन कथनम्.) तथा सति फलभोगात् कान्त्यभावमाशंक्य तत्र **दीधितिरु**क्ता. यद्यपि भगवान् तन्निर्बन्धेन रेमे जगद्दोषनिराकरणार्थं च, न तु स्वयं, तथापि न पूर्णमनोरथ इव किन्तु यथा लौकिकः, तदाह

**प्रकाशः**

**ताभिः समेताभिरि**त्यत्र. चेष्टिते रसविषयकस्यौदार्यस्योक्तत्वेन महारसाविर्भावस्य ततएव सिद्धौ हासौदार्यं किंप्रयोजनकमित्यपेक्षायामाहुः **तासामि**त्यादि. अतिशयिते निकटसम्बन्धे स्वरूपधर्मज्ञानावश्यंभावान्माहात्म्यस्फूर्त्या भयोत्पत्तौ रसो भज्येतेति तदभावाय मोहस्यावश्यकत्वादुदारेण तेन स्नेहः संवर्धितः. तथा च मोहेन स्नेहसंवर्धनाय तदित्यर्थः. नन्वेवमौपाधिक-

**लेखः**

**आत्मनैवे**ति, किन्तु मनोवाक्प्राणेन्द्रियशरीरैरपि लीलेत्यर्थः. इदं सामान्यरमणमुत्तरोत्तरपुष्टमध्यायपर्यन्तं विवरिष्यते इत्याशयेनाहु**र्बहुधा रेमे** इति ॥४२॥

**ताभिरि**त्यत्र. **समेतो जात** इति, **ताभिः** कर्त्रीभिर्भगवान् **समेतः** सङ्गतो **जात** इत्यर्थः. कर्मणि क्तः. मूले कर्तरि क्त इति ज्ञेयम्. **सर्वा लीला** इति, **बन्धातिरिक्ता** इति वक्ष्यमाणत्वात् स्पर्शादिरूपा इत्यर्थः. **प्रियस्ये**ति, **ईक्षणार्थमुत्फुल्लानि** अञ्चलेभ्यो निर्गतानीत्यर्थः, अञ्चलावरणे सम्यग्दर्शनं न सम्पद्येतेति भावः. द्वितीयपक्षकथने बीजमाहुः **वस्तुत** इति. अस्मिन् पक्षे **उत्फुल्लानि** लोभग्रहणार्थं विकसितानीत्यर्थः. **तथाकरणमि**ति उत्फुल्लमुखकरणमित्यर्थः. एवं रसग्रहणार्थमुद्योगे भगवति प्रयत्नशैथिल्यमायाति, सामर्थ्यक्षये स्त्रियाः पुरुषाधरपानमित्युक्तत्वादित्याहुः **एतावतीति**. **रसो** **निवर्तते** प्रयत्नशैथिल्यं भवतीति शङ्का स्यादिति शेषः. ताभिरेतावति कृते भगवति निर्वेदाशङ्का स्यात्, तदभावायाहेत्यर्थः. **अच्युत इती**ति. तथा च हृच्छयाग्निसिञ्चनार्थमेव तथा क्रियते, न तु भगवति निर्वेद इत्यर्थः. **तासामपी**ति, अजातस्मरकेलित्वेनाप्रौढात्वादिति भावः ॥४३॥



**टिप्पणी**

**उदारहासद्विजकुन्दे**त्यत्र. **कुन्दत्वं स्नेहस्ये**ति, काममात्रपर्यवसायी स्नेह इति ज्ञापनार्थमित्यर्थः. कुन्दानां रसमात्रोपयोगित्वादिति भावः. अत्रायं भावः. स्वामिनीनां सदा निरुपधिस्नेहएव चेत्स्यात्तदा खण्डितादिभावासम्भवेन पूर्णरसभोग उभयत्रापि न सम्भवतीति निरुपधित्वांशमाच्छाद्य कामोपाधिकत्वं सम्पादितवान्. नैतावता भक्तिमार्गे हीनता, आद्यप्रवृत्तेर्निरुपाधिकत्वाद् भगवता स्वानन्ददानार्थं स्वयमेतद्भावजननादिति. तर्हि कामनिवृत्तौ तन्निवृत्त्यापत्तिरित्याशङ्कानिरासो **दीधिति**निरूपणेन कृतः. स्नेहरूपदन्तेषु दीप्तिरुत्तरोत्तरमेकरूपेण प्रकाशमानत्वमेव. एतमेवार्थं परोक्षेणाहुः **तथा सती**त्यादिना. ननु भगवानेतत्प्रार्थनया रमते **न तु स्वयं** विनैव प्रार्थनां, तथा सति स्वामिनीष्वियदवधि यावान्भावः सम्पादितोऽस्ति तत्पूरणमेवोचितं,

**प्रकाशः**

स्नेहवर्धने निरुपधेस्तस्य न्यग्भावापत्त्या महानेवानय इति शङ्कायां टिप्पण्यां तदाशयमाहुः **अत्रायं भाव** इत्यादिना ॥४३॥

---

[1]. चिह्नान्तर्गतं प्रभूणाम्.

दृष्टान्तेन **एणाङ्कः उडुभिः** नक्षत्रैः सह यथा **व्यरोचते**ति. बन्धातिरिक्ताः सर्वा बाह्याएव लीला उक्ताः ॥४३॥

एषा विशेषतः प्रथमलीला बाधककामनिवारिका. द्वितीयलीलाया उद्बोधार्थं पूर्वसामग्रीमाह **उपगीयमान** इति.

**उपगीयमान उद्गायन् वनिताशतयूथपः ।**
**मालां बिभ्रद्वैजयन्तीं व्यचरन्मण्डयन् वनम् ॥४४॥**

ताभि**रुपगीयमानः** निकटे गीयमानः स्वयमप्यु**द्गायन्** जातः. ततः **वनिताशतानाम**नेकविधस्त्रीणामनेकविधानेव **यूथान् पाती**ति तथा जातः. यावतीभिर्मिलितो रसहेतुर्भवति तावतीनामेकं यूथम्, एवमनेकरूपाणि कृतानि. तेषामत्र रक्षणं दूरादेवाश्वासनेन च. तदा गायतो गच्छतः रूपमाह

**टिप्पणी**

न [1]त्वधिकं(संपादनं), प्रयोजनाभावात्, तावतैव श्रोतॄणां कामदोषनिवृत्तिसंभवादुदारहासादिकरणं कुत इत्याशयेन **यद्यपी**त्यादिनाशङ्क्यात्र भगवद्रिरंसाया एवोपक्रान्तत्वात् स्वानुरूपसर्वसामग्रीसम्पादनमावश्यकम्, अतएव **न पूर्णमनोरथ इवौ**दासीन्येनैतत्सन्तोषार्थमेव रमते, तथा सति रमणस्वरूपाभावेनैतत्सन्तोषासम्भवप्रसंगः, **किन्तु लौकिक**नायकवद्विकारयुक्तः –एतज्ज्ञापनायैव मूले दृष्टान्तोऽयमुक्त इति तत्समाधानमाहु**स्तथापी**त्यादिना. कलङ्कवत्त्वोक्त्या प्रकृते विकारभाववत्त्वं सूच्यते. स यथा पूर्णोऽप्यपूर्णो भवति, पुनः क्रमेण पूर्णोऽपि, न तु सदा पूर्णएव, तथात्रापीति ज्ञाप्यत इति भावः. **बन्धातिरिक्ताः सर्वा** इति. स्वामिनीनामुडुस्थानीयत्वात्तेषामेवावरकत्वोक्त्यावरणस्य[2] च बहिः परितः स्थितिनियमेनात्रापि **बाह्याएव लीला उक्ता** भवन्तीत्यर्थः ॥४३॥

**योजना**

**उदारहासद्विजकुन्ददीधितिरि**त्यस्य विवृतौ **कुन्दत्वं स्नेहस्ये**त्यादेरर्थष्टिप्पण्यां स्फुटः. **वनिताशतयूथप** इत्यस्य विवृतौ **यूथप**पदतात्पर्यमाहुः **तेषा-मत्र रक्षणं दूरादेवाश्वासनेन चे**ति. दूरादाश्वासनं ललितगतिवल्गुवाक्य-मन्दस्मित-कटाक्षप्रक्षेपादिरूपम्. रक्षणं दूरादपि भवतीति तथोक्तम् ॥४३-४४॥

१. त्वधिकं संपादनम् मू. पा. २. 'तेषामावरक' मू. पा.



**माला**मिति. **वैजयन्तीं** नवरत्नखचितां स्वाभाविकीमैश्वर्यप्रबोधिकां कीर्तिमयीं **मालां बिभ्रत् वनमे**व सर्वं **मण्डयन्** अलंकुर्वन् **व्यचरत्** लीलागतिं कृतवान्. एषा हि गतिः तासां कामोद्बोधिका. स तासां कामपूरकः एकस्माद् वनात् वनान्तरं वा गत इति ॥४४॥

एवमुद्बुद्धे कामे ताभिः सह बन्धादिभिः रेम इत्याह **नद्या** इति.

**नद्याः पुलिनमाविश्य गोपिभिर्हिमवालुकम् ।**
**रेमे तत्तरलानन्दिकुमुदामोदवायुना ॥४५॥**

**नद्याः पुलिनम**च्छं कोमल**माविश्य** आसमन्तात् प्रविश्य रमणे बन्धादिभिरतिकोमलं कृत्वा **गोपीभिर**नेकविधाभिः **रेमे. हिमाः** शीतलाः **वालुका** यत्रेति अन्तरूष्मा निवारितः. बहिः शैत्यं चाह **तत्तरलानन्दी**ति. **तस्या** नद्या**स्तरला**स्तरङ्गाः ताभिः कृत्वा **आनन्द**युक्तं पुलिनमेव. **आनन्द**युक्तो **वायु**र्वा. **कुमुदानां चानन्द**युक्तसुगन्धः. तस्यानन्दजनकत्वेनैव मान्द्यं निरूपितम्,

**टिप्पणी**

**माला**मित्यत्र. प्रकरणाद्रसपोषार्थत्वात्सर्वस्य चरणमपि तदर्थमेवेत्याशयेनाहुः **एषा हि गतिरि**ति ॥४४॥ ॥ इति षड्विंशोध्यायः ॥

**प्रकाशः**

**नद्या** इत्यत्र. **रेम** इति, "अरीरमदि"ति पूर्वमुक्तत्वात् तदर्थ एतेन परामृष्टः. **जुष्टमि**त्यस्य **वायुना**न्वयः. **तत्तरलानन्दी**त्यत्र तरङ्गसम्बन्धसार्वदिकत्वादानन्दे विशेषाभावेनापुष्टार्थत्वमाशंक्य तदर्थमाहुः **ताभिरि**ति. तथा च तस्यास्तरला यत्रेति तत्तरलं, तादृशं च तदानन्दि च, तरङ्गाणां पूर्वमपि सत्त्वेनार्थात्ताभिरानन्दीत्यर्थः ॥४५॥

**लेखः**

**बाधककामे**ति, देहस्थितौ **बाधको** विरहाग्निरूपो यः **कामस्तन्निवारिका** तत्प्रतिबन्धिका अधरामृतेन हृच्छयाग्निसिञ्चनरूपेत्यर्थः. यद्यपि "सिञ्चाङ्ग न" इति श्लोके उक्तिरन्यपूर्वाणामेव, तथाप्युपलक्षणेन सर्वासामेव तथेति ज्ञेयम्. **उपगीयमान** इत्यत्र. **शत**पदस्य देहलीदीपन्यायेनोभयत्र सम्बन्धमभिप्रेत्य स्त्रीषु यूथेषु चानेकविधत्वं व्याख्यातम् ॥४४॥

**नद्या** इत्यत्र. **अच्छं कोमलमि**ति **पुलिन**पदस्यार्थः नतु तथा पाठकल्पनम्. **बन्धादिभिरि**ति, वालुकाबन्धादिभिरित्यर्थः. **एवं सर्वभावेने**ति,

शैत्यं च कुमुदानां जलसम्बन्धात्. तादृशवायुना सहितं **पुलिनम्.** महाबन्धेषु वायोरप्यपेक्षा. एवं सर्वभावेन तासां जातस्मरकेलित्वं सम्पादितम् ॥४५॥

अतः परं अष्टविधालिङ्गनादिपूर्वकं चेष्टितकामादियुक्तं रसविलास-चरित्रमाह **बाहुप्रसारे**ति.

**बाहुप्रसार-परिरम्भकरालकोरु-नीवीस्तनालभन-नर्मनखाग्रपातैः ।**
**क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणामुत्तम्भयन् रतिपतिं रमयांचकार ॥४६॥**

दूरे स्थितामवयवं वा स्प्रष्टुं **बाहुप्रसारणम्.** ततो बलादपि **परिरम्भः.** ततः **करालकोरुनीवीस्तनानामालभनानि. करालभनं** हस्ते ग्रहणं, पुरुषायितलीलासम्बन्धे वा. एवं कचोन्नमनार्थं अलकानां स्पर्शः. ऊरुस्पर्शो बाहुबन्धार्थः. नीवीस्पर्शः पुष्टे रसे मोचनार्थः. स्तनयोस्तु रसोद्गमनार्थः. एवं पञ्चस्पर्शा विहिताः. **नर्म** परिहासवचनानि कामस्तम्भनार्थम्. ततो **नखाग्रपाताः** नखक्षत-दन्तक्षत-ताडनादयः कामयुद्धनिरूपकाः. तत्तत्स्थाने स्थितः कामः तैरुद्बोध्यते, यथा सेनावधे राजा समायाति. **क्ष्वेलिः** क्ष्वेलिका प्रस्तोभनादिः, तत्पूर्वकान्येव**अवलोकनानि. हसितानि** रसस्थापकानि. एवं द्वादशविधोऽपि कामः द्वादशाङ्गेषु स्थितः प्रबुद्धो भवति, तदाह **व्रजसुन्दरीणामुत्तम्भयन्नि**ति. संयुक्तः कामो **रतिपतिः,** वियुक्तस्त्वग्निरूपः. एवमाधिदैविकं काममुद्बोधयन् **रमयांचकार** गोपीनां सुखमेव प्रकटितवान्, न तु कामान्तेन विरतिमुत्पादितवान् ॥४६॥

---

**लेखः**

बन्धादिप्रकारकरमणेन सर्वथा तथात्वं **सम्पादितं** पूर्वोक्तबाह्यलीला-पेक्षयापीत्यर्थः ॥४५॥

**बाहुप्रसारे**त्यत्र. **पुरुषायिते**ति, उच्यते इति शेषः. इयं लीला समबन्धो वात्रोच्यते इत्यर्थः. लीलाद्वये एते स्पर्शा विधीयन्ते इत्याहुः **एवमिति. स्तनयोस्त्वि**ति. पूर्वमालभतिः स्पर्शमात्रार्थः, अत्र मर्दनार्थोऽपीति तन्मात्रार्थव्यावर्तनाय **तु**शब्दः. **क्ष्वेल्या**सहितै**रवलोकहसितैरि**त्यन्वयमभिप्रेत्याहुः **तत्पूर्वकान्येवे**ति. **द्वादशाङ्गेष्वि**ति सङ्ख्यातात्पर्यमुक्तम्. **आधिदैविकमि**ति, उपाधिभूत"स्योदारहासे"त्यनेन सम्पादितस्य विकारवत्त्वेऽपि विकाराणामपि स्वरूपात्मकत्वाद्वस्तुत आधिदैविक एवेत्यर्थः. गोपीः **रमयाञ्चकारे**ति परस्मैपदेन गोपिकागामिफलमुक्तमित्याशयेनाहुः **गोपीनामि**ति. पूर्वश्लोके **रेमे** इतिपदेन



एवं संयोगशृङ्गारमुपपाद्य विप्रयोगमुपपादयितुं तासां मानमाह **एवमि**ति.

**एवं भगवतः कृष्णाल्लब्धकामा महात्मनः ।**
**आत्मानं मेनिरे स्त्रीणां मानिन्योऽभ्यधिकं भुवि ॥४७॥**

पूर्वोक्तप्रकारेण **भगवतः** सर्वरसदानसमर्थात् **कृष्णात्** सदानन्दात् फलरूपाद् **लब्धकामाः** प्राप्तमनोरथाः सत्यः **आत्मानमेव** पूर्णं **मेनिरे,** न तु भगवन्तं पूर्णं, तेन वा स्वपूर्णताम्. ननु भगवानेवं कथं कृतवान्, न्यूना एव कथं न संरक्षिताः? तत्राह **महात्मन** इति. भगवान् **महानेवात्मा,** न ह्यगाधे जले प्रविष्टो अमग्नो भवति घटो वा अपूर्णो भवति. किञ्च **आत्मानं स्त्रीणां** मध्ये **अभ्यधिकं मेनिरे, भुवि चाभ्यधिकं, भुवि स्त्रीणां** मध्ये वा. अतएव **मानिन्यो**ऽपि जाताः— "न ह्यस्मत्सदृशोऽन्याः सन्ति अतोऽस्मान् यदि प्रार्थयिष्यति तदा रसं दास्याम" इति मानयुक्ता जाताः. भगवद्धर्मास्तासु समागताः, तथा सति "यथा प्रार्थनया पूर्वं भगवान् वशे जातः एवं वयमपि भविष्याम" इति. रसार्थमेवैवं भावो न तु दोषरूपो, भगवद्भावात् ॥४७॥

भगवांस्तु ऐक्येनैव रसं प्रयच्छन् बहिस्तिरोहितो जात इत्याह **तासामि**ति.

---

**लेखः**

स्वनिष्ठं फलमुक्तमिति भावः. प्रथमश्लोके सामान्यलीलोक्तस्य रमण-स्यातिदेशेनात्रापि प्राप्तिसम्भवेन 'हसितानि कृतवानि'त्येतावतैव चारितार्थ्येऽपि पुनः सर्वान्ते **रमयाञ्चकारे**ति कथनमन्यव्यावृत्तितात्पर्यकमित्याशयेनाहुः **सुखमेवे**ति. व्यावर्त्यमाहुः **नत्वि**ति, लोकन्यायेन **कामान्तेन** हेतुना विरतिः प्राप्ता सा निषिध्यते इत्यर्थः ॥४६॥

**एवमि**त्यत्र. **भगवतः** सकाशाल्लब्ध**कामाः आत्मानं मेनिरे** इति समभिव्याहारात् स्वतएव लब्धकामं मेनिरे इत्यर्थः सम्पन्नस्तमाहुः **आत्मानमेव पूर्णमि**ति. अत्र मानस्य वाक्यार्थत्वादेवं व्याख्यातम्. नहि नायकनैरपेक्ष्यं विना स्त्रीभ्य आधिक्यज्ञानमात्रेण मानो भवतीति भावः. अत एवाग्रिमश्लोके द्वयोरनुवादः ॥४७॥

**तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ।**
**प्रशमाय प्रसादाय तत्रैवान्तरधीयत ॥४८॥**

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे षड्विंशोऽध्यायः ॥

मानः पूर्णता च न दोषाय, स्त्रीषु भूमौ च यदाधिक्यज्ञानं स दोषो भवति. तदनूद्य तत्परिहारार्थं तिरोहित इत्याह **तासां तत्** प्रसिद्धं पूर्वोक्तं सर्वोत्तमत्वलक्षणं **सौभाग्यमदं वीक्ष्य** तस्य मदस्य **प्रशमाय अन्तरधीयत.** ननु भगवद्रमणेन हि तासामेवं भावः अतः स्वकृत एवेति कथं तिरोधानं कृतवानित्याशङ्क्याह **वीक्ष्य मानं च प्रसादाय तत्रैवान्तरधीयते**ति, मानापनोदनं कर्तव्यं, मानस्त्वान्तरो, अशक्तो हि बहिरपनोदनार्थं यत्नं करोति. **च**कारात् स्वधर्मं च. अतः **प्रसादाय,** प्रथमतस्तासां पश्चात् स्वस्य च, **तत्रैव** गोपिकासु यूथमध्ये वा, अन्तर्धानं प्राप्तवान्. नन्वेतद् द्वयमपि न कर्तव्यम्, उपेक्षिताः कुतो नेति चेत्, तत्राह **केशव** इति. यथा रजोगुणं ब्रह्मणो निवार्य तस्मै मुक्तिं दत्तवान्, यथा वा शिवस्य तमोगुणं निवार्य, एवमेतासामपि मदं मानं च निवार्य मुक्तिं दातुं तथा कृतवानित्यर्थः. कायिकतिरोभावोऽयम्, प्रथमाधिकारित्वाद्गोपीनाम् ॥४८॥

*॥ इति श्रीभागवतसुबोधिन्यां*
*श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां*
*दशमस्कन्धविवरणे षड्विंशाध्यायविवरणम् ॥*

---

**प्रकाशः**

**तासामि**त्यत्र. **पूर्णते**ति भगवद्धर्मरूपा आप्तकामता. "सोऽन्तःकरण-सम्बन्धी"ति कारिकायां पूर्वं सूचितं तिरोभावहेतुं स्मारयन्ति **कायिकतिरोभावे**त्यादि. अयं कायिकतिरोभावः "कस्य रूपमभूद् द्वेधा तत्कायमभिचक्षत" इति 'काय'पदनिरुक्त्या द्वैधीभावहेतुकाभिध्यानकृतं देहे कायत्वमिति प्रकृते स्वरूपद्वैधीभावं विधाय बाह्यं कायं ताभ्यस्तिरोधापितवान्. तत्र हेतुः **प्रथमाधिकारित्वात्** सर्वात्मभावारम्भकक्षात्मकाधिकारवत्त्वादिति. तथा च सर्वात्मभावारम्भदशायामेवैवं भावो न तु पूर्णदशायां, तदा चैवं बहिस्तिरोभावेन रसात्मनान्तःस्थितिरिति मर्यादाऽनेन बोधितेत्यर्थः ॥४८॥

*॥ इति षड्विंशाध्यायसुबोधिनीटिप्पण्योः प्रकाशः ॥*



---

**लेखः**

**तासामि**त्यत्र. **सौभगमदं वीक्ष्य प्रशमायान्तरधीयत, मानं च वीक्ष्य प्रसादायान्तरधीयत;** तथा च मदस्यैव दोषत्वात् प्रशमनं न तु मानस्य, भगवद्धर्मत्वेनादोषत्वात्. एवं विभज्यान्वयमभिप्रेत्याहुः **मानः पूर्णता चे**ति. पूर्णताया मानहेतुत्वान्मूलेऽन्तर्धानहेतुत्वेन स्पष्टं द्वयमेवोक्तमिति भावः. **एवं भाव** इति मद इत्यर्थः. तावदेव न स्थितं किन्तु मानोऽपि जातः, सच रमणप्रतिबन्धकः अतस्तदपनोदनार्थं तिरोधानमावश्यकमित्याशयेनाहुः **मानापनोदनमि**ति. **स्वधर्मं चे**ति पूर्णतामित्यर्थः. **प्रसादाये**ति, "प्रार्थनया वशे भविष्याम" इति तद्भावस्य विवृतत्वादन्तःप्रविश्य प्रार्थनया बहिःप्रकार-विलक्षणयाऽनिर्वाच्यया तासां वशीकरणार्थमित्यर्थः. **पश्चात्स्वस्ये**ति, तृतीयाध्यायोक्तप्रार्थनया ताभिः कृतया स्वस्य वशीभावार्थमित्यर्थः. **तत्रैवेत्येव**कारेण यत्र मदमानयोरनुत्पत्तिः तत्र बहिःस्थितिरपीत्याशयेनाहुः **यूथमध्ये वे**ति, तादृशयूथे एवान्तर्हितः. तद्विजातीयभावत्वेन यूथबहिर्भूतायास्तु निकटे बहिरपि स्थितः. अतएव "यां गोपीमनयदि"त्यग्रे वक्ष्यत इति भावः. **द्वयमपी**ति मदप्रशमनं मानापनोदनं चेत्यर्थः. **प्रथमाधिकारित्वादि**ति

**योजना**

**तत्रैवान्तरधीयते**त्यस्य विवृतौ **गोपिकासु यूथमध्ये वे**ति, **गोपिकासु** गोपिकाहृदयेषु लीलासहितस्य प्रभोः क्रीडा सा ह्यलौकिकी लीला. **यूथमध्ये वे**ति तु लौकिकप्रकारेण निलीय स्थितिः. एवं पक्षद्वयेऽपि **तत्रैवान्तरधीयते**त्यत्र **तत्र**पदं प्रमाणमिति बोद्धव्यम्. किञ्च व्यापिवैकुण्ठे गमनं, लक्ष्म्या सहैव तावत्समयपर्यन्तं रमणमिति तृतीयः पक्षः. तत्र मानं तु चतुर्थाध्याय-सुबोधिनीयोजनायां वक्ष्यते. एवं तिरोधाने त्रयः पक्षाः. **तत्रैवान्तरधीयते**त्यत्र **केशव**शब्दे **क**श्च **ईश**श्च केशौ, तयोर्वं मोक्षाख्यं सुखं यस्मात् (स!) केशव इति निरुक्तिर्ज्ञेया. **मानं च निवार्य मुक्तिं दातुमि**ति, **मुक्ति**शब्देनेह विप्रयोगानुभव उच्यते, "वासुदेवानुमोदिता" इत्यस्य सुबोधिन्यास्तथाशयाद्, "वासुदेवानुमोदिता" इत्यस्य टिप्पण्यां विप्रलम्भशृङ्गाररसानुभवस्य मोक्षपदार्थत्वेनोक्तत्वाद् इहापि **मुक्ति**पदेन तदेव ग्राह्यम्. तथा च **एतासां मदं मानं च निवार्य** विप्रलम्भशृङ्गाररसानुभवं **दातुं तथा कृतवान्** तिरोधानं

### लेखः

तामसत्वादित्यर्थः. तामसानां बहिःप्रकटं स्वरूपमेव मुख्यमिति प्रकरणादौ "लौकिकं तामसे मुख्यमि"त्यनेन निरूपितम्. अत आद्यमहिष्या इव वाचिकतिरोधानेन द्वितीयदलानुभवो न भवति. अतएव "स्वागतमि"त्यादिवाक्यैस्तथा न सम्पन्नमतः कायिकतिरोभाव इत्यर्थः ॥४८॥ षड्विंशाध्यायव्याख्या समाप्ता ॥

### योजना

कृतवानित्यर्थः. **प्रथमाधिकारित्वादि**ति तामसत्वादित्यर्थः. तथा च गोपीनां तामसत्वात्स्वरूपमात्रनिष्ठत्वेन वाक्तिरोधाने मानसिकतिरोधाने वा नैतासां दुःखमिति न वियोगानुभवः, किन्तु कायिकतिरोधाने एवामूषां दुःखमिति तदैव विरहानुभवो भवेद्, अतो विरहानुभवकारणार्थं स्वरूपतस्तिरोभूत इत्यर्थः ॥४८॥

इति श्रीमद्गोवर्धनधर-श्रीवल्लभाचार्यवर-श्रीविठ्ठलेश्वर-
चरणानुचरसेवकेन लालूभट्टोपनामदीक्षितबालकृष्णेन कृता
दशमस्कन्धषड्विंशाध्यायसुबोधिनीयोजना संपूर्णा ॥

### ॥ इति षड्विंशोऽध्यायः ॥

# ॥ द्वितीयः स्कन्धादितः सप्तविंशोऽध्यायः ॥

स्वानन्दस्थापनार्थाय लीला भगवता कृता ।
स बाह्यो जनितः पुष्टो यथान्तर्निविशेत्पुनः ॥(१)॥
तदर्थं भगवांस्तासु लीलया सहितोऽविशत् ।

### टिप्पणी

सप्तविंशाध्यायायार्थनिरूपणाय पूर्वाध्यायोक्तान्तर्धानतात्पर्यवर्णने **पुष्टो यथान्तरि**त्यादि. अत्रायं भावः. संगमे ह्यग्रिमाग्रिमरसार्थं नवो नवः प्रयत्नो भाव्यते न तु पूर्वानुभूतो रसः पोष्यते, सर्वेषां तेषां स्वतन्त्रत्वात्. संयोगे यथा यथा रसानुभवाधिक्यं तथा तथा विप्रयोगे दुःखाधिक्यमित्यनुभवसिद्धम्. एवं भावे संस्कारमात्रशेषस्य पूर्वरसस्योपमर्दकाग्रिमसंगमरसाभावेनान्तरेवातिपुष्टो भवति तथा, यथा पूर्वानुभूतलीलास्वरूपात्मका देहेन्द्रियप्राणान्तः-

### योजना

श्रीगिरिधारी जयति. सप्तविंशाध्यायार्थोक्तौ **स्वानन्दस्थापनार्थाये**त्यादि. **भगवता** काम**लीला कृता** सा **स्वानन्दस्य** स्वरूपात्मकानन्दस्य व्रजवधूटीषु **स्थापनार्थम्;** स्वानन्दस्थापनार्थरूपो योऽर्थस्तस्मै इति कारिकार्थः. अत्रेदमाकूतम्. लौकिके हि कामजन्यानन्दः समयविशेषावच्छेदेनोत्पद्यते, स्वल्पकालं तिष्ठति, ततो नश्यति च, विकृतत्वात्. प्रकृते तु कामलीलया प्रादुर्भवन्नानन्दोऽपि स्वरूपात्मकएव, स्वरूपस्याविकृतत्वादविकृत एवोद्भवति. अतएव सर्वदैव तिष्ठति, न तु कदाचिदपि नश्यति. तत्र संयोगावस्थायां बहिःप्राकट्यं, विप्रलम्भे त्वंन्तःप्राकट्यम्[१]. एवं प्रकारद्वयेन तिष्ठतीत्याहुः **स्वानन्दस्थापनार्थाये**त्यादिना (१).

### कारिकार्थः

सप्तविंशाध्याये **स्वानन्दे**त्यादि. पूर्वाध्यायोक्तान्तर्धानतात्पर्यमाहुः **स्वानन्दस्थापनार्थाये**त्यादिसार्धेन. **भगवता कामलीला स्वानन्दस्थापनार्थाय कृता.** तत्र **बाह्यो** बाह्यप्रकारेण **जनितः स** आनन्दो **यथा अन्तःपुष्टः** सन् देहेन्द्रियादिषु **निविशेत् तदर्थं लीलया सहितो भगवान् तासु अविशत्** प्रविष्टवान् ($१\frac{१}{२}$).

१. विप्रलम्भेऽन्तःप्राकट्यम् इति मुद्रितः पाठः. मुं. वि. पाठः गृहीतः.

चत्वारोऽत्र निरूप्यार्थाः रसासक्तिर्हरेः क्रियाः ॥(२)॥
गर्वाभावश्च तत्रादौ निरूप्यन्ते क्रमात् त्रयः ।

**टिप्पणी**

करणात्मानो भवन्ति. किमुत. अतएव "असावहमि"त्यादिरूपं ज्ञानं तथैव क्रिया च भवतः. एतदनन्तरं जाते संगमे पूर्वसंगमादधिकरसत्वस्फूर्तिरप्यत एव, अन्यथा संगमत्वाविशेषेण तदनुपपत्तेरिति दिक् (१).

यद्यपि संगमोत्तरकालीनविप्रयोगमात्र एवैतादृशत्वं सम्भवतीति नान्तःप्रवेशापेक्षा तथाप्येतद्विप्रयोगस्यातिविषमत्वेन क्षणमात्रेणैवान्यथाकरण एतद्रसदानं नोपपद्यत इति रसात्मकत्वात्स्वरूपस्य स्वयमेव प्रविष्ट इत्याहु**स्तदर्थं भगवानि**ति. **चत्वारोऽत्रे**ति, प्रियप्राप्तिसाधनानुष्ठानरूपं तद्रसस्वभावप्राप्तं गुणगानं चतुर्थोऽर्थः. **रसासक्तिरि**ति, रसासक्त्यादित्रयमस्मिन्नध्याय उच्यते. एताः हि रसासक्त्यैवान्वेषणपराः, अन्यथा गृहानेव गच्छेयुः. एवं सति यदैव बहिःसंवेदनं तदैवान्वेषणमिति तदुक्त्या रसासक्तिरेवोक्ता भवतीति तथा. अग्रे स्पष्टम् (२$\frac{1}{2}$).

**प्रकाशः**

**सप्तविंशाध्यायं** विवरिषवः प्रसङ्गरूपां[१] सङ्गतिं बोधयितुं पूर्वाध्यायार्थं सार्धेनानुवदन्ति **स्वानन्दे**त्यादि. **स** इति आनन्दात्मा रसः. प्रसङ्गताबीजं[२] टिप्पण्यां स्फुटम्. **किमुते**ति, सर्वात्मभावाधिकारेऽतः परं किमवशिष्टम्, अपि तु निरोधात्मनः प्रलयस्य[३] जातत्वेन सर्वात्मभावस्य पूर्णोऽधिकारः सम्पन्न इत्यर्थः. तत्र गमकमाहुः **अत एवे**त्यादि (१).

**लेखः**

सप्तविंशाध्याये कारिकासु सार्धेन पूर्वाध्यायार्थकथनम्. बाह्याभ्यन्तर-प्रकारेणात्मना लीलोक्तेत्यर्थः. अन्तःपुष्टः सन् देहेन्द्रियादिषु पुनर्निविशेदिति टिप्पण्यर्थः. बाह्यप्रकारेणात्मना लीलायां प्रविष्टोऽपि आन्तरलीलायां पुनरविशदित्यर्थः. **लीलया सहित** इति, अन्तःप्रविष्टस्य भगवत्त्वकथनेन लीलासाहित्यं ज्ञापितम्. **अत्रे**ति आन्तरलीलायामित्यर्थः. **गर्वाभाव** इति, गर्वोऽहङ्कारस्तदभावः. स्वरूपपरिग्रहे "असावहमि"त्यादिरूपा कृष्णता

१. एककार्यत्वं तु पश्चस्वनुस्यूतमिति तदर्थिकाम् — इति लेखकस्य विवरणम्.
२. संगतौ बीजम् इति मुं. वि. पाठः. ३. फलस्य इति मुं. वि. पाठः.



**प्रकाशः**

सुबोधिन्यां **चत्वारोऽत्रे**ति **अत्रे**त्यनेन रसपोषिका विप्रयोगावस्था परामृश्यते न त्वध्यायः. यद्यपि "गायन्त्य उच्चैरि"त्यत्र गानमप्युद्दिष्टं तथापि लक्षणफलयोरनुक्त्या तत्र 'आदावि'त्यादिपदेन च गानस्य पाश्चात्यत्वं बोध्यते, तेन न विरोधः. यद्वा. उद्देशविचारेण "तद्गुणानेव गायन्त्य" इति समाप्तौ कथनेन चाध्यायएव चत्वारोऽर्थाः, लक्षणादिविचारेणादौ त्रयः. चतुर्थस्तु न लक्षितः, तथाप्युपक्रमोपसंहारयोस्तद्दर्शनादर्थत्रयेऽनुस्यूतः समनन्त-राध्यायोक्ततत्प्रकारादेव बोध्यश्चेत्याशयाद्वा न विरोध इति बोध्यम्. **उद्देशत** इति, उद्देशोऽत्र न नाममात्रेण कीर्तनं किन्तु संक्षेपेण कथनम् एकदेशेन कथनं वा, "एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मये"त्यत्र तथा दर्शनाद्व्याख्या-नाच्चेति न टिप्पण्यामप्यनुपपत्तिः. अन्वेषणस्य वह्निज्वालावदविनाभूतधर्मत्वात्

**योजना**

**चत्वारोऽत्र निरूप्यार्था** इति, **रसासक्तिरे**कोऽर्थः **हरेः क्रिया** द्वितीयोऽर्थः **गर्वाभावश्च** तृतीयः गुणगानं चतुर्थ इति टिप्पण्यां स्वीकृतम्. **उद्देशतो लक्षणतः फलतश्चे**ति— अस्यार्थष्टिप्पण्यां स्फुटः (२-३).

**कारिकार्थः**

**चत्वारोऽत्र निरूप्यार्था** इति, चतुर्थोऽर्थो गुणगानमिति विवृतं टिप्पण्याम्. उक्तार्थत्रयनिरूपणे प्रकारविशेषमाहुः **उद्देशत** इत्यादि. आद्यैः त्रिभिः श्लोकैः त्रयाणाम् उद्देशः कृतः. आसक्तेर्लक्षणम् अन्वेषणम्. **हरेः क्रिया** भगवतो लीला, सा च "कस्याश्चित् पूतनायन्त्या"इत्यादिना लक्षणतो निरूपिता. गर्वाभावलक्षणं च "अनयाराधितो नूनम्" इत्यनेनोक्तं सपत्नीभाग्याभिनन्दनम्. अन्वेषणफलं च "व्यचक्षत वनोद्देशे पदानि परमात्मनः" इत्यत्रोक्तं पददर्शनम्. लीलावेशफलं च प्रियाधीनत्वदर्शनेऽपि प्रिये दोषारोपाभावपूर्वको "रेमे तया चात्मरत" इत्यादिनोक्तो भावः. गर्वा-भावफलम् इतरविस्मृतिपूर्वकं तत्प्राप्त्यर्थैकप्रयत्नः. स च "ततोऽविशन् वनं चन्द्र ज्योत्स्ना यावद्विभाव्यते" इत्यादिनोक्तः. गुणगानं तु विशेषतोऽग्रिमाध्याये उक्तम्, अत्राध्यायेऽपि "पुनः पुलिनमाविश्य" इत्यनेन सामान्यतः उक्तमिति कारिकायां **च**कारेण सूचितम्. एवं आसक्ति-हरिलीला-गर्वाभाव-गुण-गानात्मकाश्च**त्वारोऽर्था अत्र** तिरोधानलीलायां **निरूप्या** इत्युक्तम् (२-३).

उद्देशतो लक्षणतः फलतश्च यथायथम् ॥(३)॥
सप्तविंशे तिरोधानाल्लीलान्वेषणतत्पराः ।
रसमन्तर्गतं चक्रुर्गोपिका इति रूप्यते ॥(४)॥

पूर्वाध्यायान्ते भगवतस्तिरोभाव उक्तः. ततस्तदनन्तरं प्रथमतः तासां रसासक्तचित्तानामापाततो महांस्तापो जात इत्याह **अन्तर्हिते भगवती**ति.

**टिप्पणी**

उक्तार्थत्रयनिरूपणे प्रकारविशेषमाहुः **उद्देशत** इत्यादि. आद्यैस्त्रिभिस्त्रयाणामुद्देशः कृतः. अन्वेषणं रसासक्तेर्लक्षणमसाधारणो धर्मोऽनुमापक इति यावत्. लीलाया एतदन्तःस्थित्यनुमापक एतासु तदाविर्भावः. गर्वाभावज्ञापकं सपत्नीभाग्याभिनन्दनादिकम्. अन्वेषणफलं च पददर्शनम्. लीलावेशफलं प्रियाधीनत्व-स्वानधीनत्वदर्शनेऽपि प्रिये दोषारोपाभावपूर्वको "रेमे तया चे"त्यादिनोक्तो भावः. गर्वाभावफलमितरविस्मृतिपूर्वकं तत्प्राप्त्यर्थैकः प्रयत्नः[१] (३).

**प्रकाशः**

पददर्शनस्य तत्फलत्वेऽपि रसासक्तिफलत्वं न विरुध्यत इति बोध्यम्, आद्ये नायकदर्शनाभावजतापरूपेण रसासक्तेः कथनात्, द्वितीये "तास्ता" इति संक्षेपेण "रमापतेर्विचेष्टा" इत्येकदेशेन च लीलाकथनात्, तृतीये च "तदात्मिका" इति भगवदात्मकत्वकथनेनैकदेशतो गर्वाभावस्य कथनात् (२-३).

एवमर्थत्रयनिरूपणे प्रतिपाद्याननुगमादध्यायार्थमाहुः **सप्तविंश** इत्यादि. तथा च त्रिभिरप्यत्र रसान्तर्गतिकरणमेव प्रतिपाद्यते इति त्रितयनिरूपणेऽपि नाननुगम इत्यर्थः (४).

**लेखः**

स्फुरति नत्वहन्तेति भावः. **आदावि**ति अस्मिन्नध्याये इत्यर्थः. **लीले**ति, **लीलायां अन्वेषणे** च **तत्परा** इत्यर्थः. भगवदावेशस्तु स्वतएव जायते इत्येतत्सम्पाद्यत्वेन द्वयमेवोक्तम्. **अन्तर्गतमि**ति. भगवत्कर्तृका आन्तरलीला पूर्वमुक्ता, स्वामिनीकर्तृकास्मिन्नध्याये उच्यते इति विभेदः (१-४).

**कारिकार्थः**

**लीलान्वेषणतत्परा** इति, लीलायाम् अन्वेषणे च तत्परा इत्यर्थः. **रसमन्तर्गतं चक्रु**रिति बहिस्तिरोधानादित्यर्थः (४).

१. तत्प्राप्त्यर्थैकप्रयत्नः मू. पा.



**॥ श्रीशुक उवाच ॥**

**अन्तर्हिते भगवति सहसैव व्रजाङ्गनाः ।**
**अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् ॥१॥**

**भगवति अन्तः**प्रविष्टे षड्गुणैश्वर्यसहिते यावदन्तरनुसंधानं न कृतवत्यः तावत् **सहसैव** अकस्माद**तप्यन्.** अन्तर्विचाराभावे हेतुः **व्रजाङ्गना** इति. तापे हेतुः **तमचक्षाणा** इति. तापः सहजएव स्थितः कामात्मा तद्दर्शनस्पर्शादिभिः शान्तो भवति. यदा पुनः पूर्वसिद्धं बहिर्दर्शनं न जातं तदा तत्ताप उचितएव. तासां स्पर्शएव मुख्य इति ज्ञापयितुं दृष्टान्तमाह **करिण्य इवे**ति. **यूथपो** महामत्तगजः. "रतिं गज एव जानाती"ति वात्स्यायनः. "रत्यां विमर्दे गज" इति विवृतश्च. सन्ति च सिंहाः, तथात्र कालः. अतः करिणीनां यूथपादर्शने महानेव क्लेशः ॥१॥

**टिप्पणी**

**करिण्य इवे**त्यत्र **तथात्र काल** इति, अवतारसम्पूर्तिकाल इत्यर्थः ॥१॥

**प्रकाशः**

**अन्तर्हित** इत्यस्याभासे **तत** इति विस्तृत इत्यर्थः ॥१॥

**लेखः**

**तत** इति तिरोभावाद्धेतोरित्यर्थः. एतेन तापे हेतुर्भगवन्निष्ठो निरूपितः. एतन्निष्ठं हेतुमाहुः **रसासक्तचित्तानामि**ति. रसासक्तिर्हेतुरित्यर्थः. मूलेऽयं हेतुरर्थापत्त्या ज्ञेयः. तर्हि लक्षणतो निरूपणमेव रसासक्तेः सिद्धमिति उद्देशतो निरूपणमुक्तं विरुध्येतेत्यत आहुः **आपातत** इति. अचिरस्थायित्वादुद्देशत इत्युक्तमित्यर्थः. अग्रिमश्लोकेऽप्येवमेव ज्ञेयम्. **जात** इति, **महान् जात** उद्बुद्धो जात इत्यर्थः. नन्वन्तर्लीलाविशिष्टभगवत्प्रवेशे कथमुद्बोधः सम्भवतीत्यत आहुः **यावदि**ति. **व्रजाङ्गना इती**ति. एतासां बहिःप्रकटमेव रूपं मुख्यमित्यन्तर्विचारो नास्ति येनान्तःस्थित्या तापोद्बोधः प्रतिबध्येतेत्यर्थः. **तापे हेतुरि**ति उपपाद्यते इति शेषः. **अन्तर्हिते भगवती**त्यनेनोक्तस्तिरोभावरूपो हेतुः **तमचक्षाणा** इति पदेनोपपाद्यते इत्यर्थः. **तापः सहज** इति. तथाच तिरोभावस्य प्रतिबन्धाभावत्वेनैव कारणत्वम्, अभावस्य साक्षात्कारणताऽसम्भवादित्यर्थः. **दर्शनस्पर्शनादिभिरि**ति, लीलया शान्तिर्भवति अतएवाग्रिमश्लोके तथा वक्ष्यते इत्यर्थः ॥१॥

यदा पुनः स तापः अन्तःप्रवेष्टुमैच्छत् तावता भगवल्लीला अन्तःप्रविष्टा तापं दूरीकृत्य स्वयमेवाविर्भूतेत्याह **गत्येति**.

**गत्यानुराग-स्मितविभ्रमेक्षितै-र्मनोरमालाप-विहार-विभ्रमैः ।**
**आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥२॥**

**ता** भगवदीयैः कायवाङ्मनोभिः वशीकृताः तद्भावमापन्नाः **तास्ता** एव भगव**च्चेष्टा जगृहुः.** प्रथमतः कायिकीमाह **गत्या** कायचेष्टया वशीकृताः. तत इन्द्रियसहितमनश्चेष्टया वशीकृता जाता इत्याह **अनुरागे**ति. **अनुरागः** स्नेहो मानसः, तत्पूर्वकं **स्मितं,** तस्य विलासः स्वनिष्ठतात्याजनार्थः.

---

**लेखः**

शान्तिरपि यावत्कारणमेव तिष्ठतीति भावेनाहुः **यदा पुनरि**ति. **अन्तः प्रवेष्टुमैच्छदि**ति, स्वप्रौढ्या अन्तः विचारमपि सम्पाद्य तत्र स्थिते स्वरूपलीले चोपमर्द्यान्तरप्युद्बुद्धो भवितुमैच्छदित्यर्थः. तत्तु विपरीतं जातमित्याहुः **तावते**ति, **भगव**त्सहभावे**नान्तःप्रविष्टो**क्ता या **लीला** सा **तावता** बहिःस्थितमपि **तापं दूरीकृत्य** बहिरपि **स्वयमेवाविर्भूता** बहिस्तापोऽपि शान्त इत्यर्थः. सूर्योदयात्पूर्वं तदनुभावेनैव तमोनिवृत्तिरिव तापनिवृत्तिरिति सूचयितुं **दूरीकृत्याविर्भूते**त्युक्तम्. व्याख्याने, **भगवदीयैरि**ति, एतैः पूर्वमेवाक्षिप्तचित्ता वशीकृता इति चेष्टाग्रहणे हेतुः. **तद्भावमि**ति भगवद्भावमित्यर्थः; **तदात्मिका** इत्यस्यार्थोऽयम्. **तास्ता एवे**ति, भगवदीयकायवाङ्मनश्चेष्टा इत्यर्थः. कटाक्षाणामैन्द्रियकत्वेऽपि भावोद्बोधकत्वाद् भावप्राधान्यात् मनश्चेष्टात्वमित्यभिप्रेत्य मनसः प्राधान्यमाहुः **इन्द्रियसहितमनश्चेष्टये**ति. **तस्य विलास** इति, साहित्यस्य व्याख्यास्यमानत्वादत्रापि सम्बन्धमात्रविवक्षायां साहित्यमेव षष्ठ्यर्थो ज्ञेयः. स्मितसहितो विलासः ईक्षितानामिति शेषः.

**योजना**

**सन्ति च सिंहा** इति. बहवः सिंहाः सन्ति, अतो गजमचक्षाणाः सिंहभयात् करिण्यस्त्रसन्तीत्यर्थः. **तथात्र काल** इति अवतारसमाप्तिकाल इत्यर्थ इति श्रीमट्टिप्पणीकाराः ॥१॥

**गत्यानुरागे**त्यस्याभासे **यदा पुनस्तापः अन्तःप्रवेष्टुमैच्छदि**ति, तापस्य भगवद्रूपात्मकत्वेन सच्चिदानन्दरूपत्वा**त्प्रवेष्टुमैच्छदि**ति चेतनः धर्मः सम्भवति. **तस्य विलासः स्वनिष्ठतात्याजनार्थमि**ति. स्मितस्य विलासो भक्तानां



अन्यथैवं सति ज्ञानमेवोदयं प्राप्नुयात्. अतः **स्मितेन** मन्दहासेन ईषद्विमोहिताः— न बहिर्गताः नान्तःस्थिताः किन्तु भगवति मध्ये स्फुरिते तद्धर्मेषु च समागताः. **अनुरागस्मितेन** सहितो यो **विभ्रमो** विलासः अलसवलितादिः

---

**टिप्पणी**

**गत्यानुरागे**त्यत्र **अतः स्मितेन मन्दहासेने**ति, अन्यथा प्रकृष्टोदारहासस्यैव पूर्वमुक्तत्वादधुना स्मितं न वदेदिति भावः ॥२॥

**प्रकाशः**

**गत्यानुरागे**त्यत्र **अन्यथैवं सती**त्यादि, स्मिताभावपूर्वकमीक्षणे सति ईक्षणस्य ज्ञानात्मकत्वात्तथा स्यादित्यर्थः. **तद्धर्मेषु चे**त्यत्र **चो**ऽवधारणे, तेन धर्मेष्वेव समागता इत्यर्थः. स्मितस्य मोहकत्वात्तेनैकस्वनिष्ठतात्याजनसम्भवे तद्विलासस्य नात्यन्तमुपयोग इत्याकांक्षायां तत्तात्पर्यमाहुः **अनुरागे**त्यादि. तथा च कटाक्षेषु तस्योपयोगात्तदुक्तिरित्यर्थः ॥२॥

**लेखः**

**अन्यथे**ति, स्मितेन स्वरूपनिष्ठतात्याजनाभावे रसानुभवएव स्यादित्यर्थः. अयं **ज्ञान**पदार्थोऽग्रिमाध्याये टिप्पण्यां वक्ष्यते. **अत** इति, स्वनिष्ठतायां ज्ञानोदयस्य प्राप्तत्वादित्यर्थः. ईषन्मोहनकार्यमाहुः **न बहिरि**ति. न धर्ममात्रनिष्ठाः नापि स्वरूपमात्रनिष्ठाः **किन्तु भगवति धर्मेषु चो**भयत्र **समागताः** उभयनिष्ठा जाताः. स्वरूपान्तर्गतैरेव धर्मैश्चित्ताक्षेपो जातो, नतु मर्यादामार्गीयैः स्वरूपमात्रेण वा. तथा च पूर्वोक्ता स्वनिष्ठता निवृत्तैवेति भावः. विभ्रमः कटाक्षभेदस्तद्युक्तानि दर्शनानि कटाक्षा इत्यर्थः. **विभ्रम**पदस्य

**योजना**

भगवद्भजननिष्ठतां त्याजयति, स्मितस्य मायारूपत्वात्. भजननिष्ठां त्याजयित्वा केवलं प्रमदाभावसम्पादनेन मानादिकमुत्पादयतीति भावः. **न बहिर्गता नान्तःस्थिता** इति. बहिरनुसंधाने केवलं विरहज्ञानात् क्लेशमेव प्राप्नुयुः, अन्तःस्थितौ तु लीलासहितस्य भगवतः स्वहृदि प्रवेशज्ञानात्केवलं सुखमेव प्राप्नुयुः. एतास्तु क्षणक्षणविलक्षणभावाः विरहज्ञाने दुःखं पुरुषोत्तमान्तःसम्बन्धेन सुखं च प्राप्नुवन्तीति न सर्वथा बहिःस्फूर्तिः, न वा सर्वथान्तर्निष्ठतेति ज्ञेयम्. **भगवति मध्ये स्फुरित** इति, बाह्यानुसंधानान्तर्निष्ठयोरुद्भवितुमुत्सुकयो**र्मध्ये** हृदये भगवान् **स्फुरित**स्तद्धर्मान् स्वयं कृतवत्य

तत्सहिता**नीक्षितानि** सर्वएव कटाक्षाः. वाचिकैरपि विमोहमाह **मनोरमालापे**ति. मनो रमयतीति मनसि रमते इति वा **मनोरमः** योऽय**मालापः** भगवतो गुह्यभाषणानि. केवलवाक्यस्य चित्ताक्षेपकत्वं न भविष्यतीति प्रामाण्यावधारणं स्त्रीणां प्रकारान्तरेण न भवतीति फलमेवादौ निरूपितम्. सुखार्थं हि भगवद्वाक्यानि तदानीमेव च सुखमुत्पादयन्ति. ते चालापाः क्वचिद्बन्धादिबोधका लीलोपयोगिन इत्याह **विहार** इति. तत्रापि विलासाः अवान्तरभेदाः, यथोत्तानके ग्राम्यादयः. तैः पूर्वकृतैः तमःसत्त्वरजोरूपैः त्रिविधमपि चित्तमाक्षिप्तमिति **आक्षिप्तचित्ता** जाताः. अतस्तापं न प्राप्तवत्य इति भावः. **प्रमदा** इति. [1](बाह्याभ्यन्तराननुसन्धाने हेतुभूतोऽत्युत्कटरसभावोऽत्र **मद**पदेनोच्यते. तेन प्रभुलीलाविष्करणं युक्तमिति भावः. किञ्च) **प्रमदाः** प्रकृष्टो मदो यासां स्वभावतएव, अन्यथा दास्यभावान्न प्रच्युताः स्युः. तदा केवलभगवतः लीला स्वानुपयोगिनी साम्प्रतं च नानुभूतेति **रमापते**र्लक्ष्मीपतेः लक्ष्म्या सह विलासरूपां **चेष्टां जगृहुः**. एकस्या अपि बह्व्यश्चेष्टा इति **तास्ता** उक्ताः. नन्वीश्वरधर्माविष्करणं दासीनां निषिद्धमिति चेत्, तत्राह **तदात्मिका** इति, भगवानेवात्मनि यासां तथात्वेन स्फुरितः. अतो भगवल्लीलाग्रहणं ताप-

## लेखः

तात्पर्यमाहुः **सर्व** इति. **प्रामाण्यावधारणमि**ति, "त्वं मत्प्राणप्रिये"त्यादि-वाक्यानां **प्रामाण्यावधारणं** तदैव सुखानुभवाभावे **न भवती**त्यर्थः. **ते चालापा** इति, तथा **चालाप**सहितै**र्विहारविभ्रमैरि**त्यर्थः. आभासे **स्वयमेवेत्येव**कारेणोक्तां तापाप्राप्तिमुपसंहरन्ति **अतस्तापमि**ति, गत्यादिना चित्ताक्षेपादित्यर्थः. **किञ्चे**ति, चित्ताक्षेपात् प्रमदाः स्वभावतश्च प्रमदा इति समुच्चयः. **केवले**ति, गोचारणादिलीलेत्यर्थः. **साम्प्रतं चे**ति, अव्यवहितपूर्व-कालमेता एवानुभूताः. रमायां या लीलाः करोति ताः शृङ्गारप्रकारिका इत्यर्थः. व्याख्याने, **चेष्टामि**ति जात्यपेक्षयैकवचनम्. **तथात्वेने**ति लीला-कर्तृत्वेनेत्यर्थः. **उद्देशत** इति शृङ्गारमात्रलीलाग्रहणमित्यर्थः ॥२॥

## योजना

इत्यर्थः. **यथोत्तानके ग्राम्यादय** इति, बन्धविशेषे ग्राम्यादयो यथा विलासं प्राप्नुवन्ति तद्वदित्यर्थः ॥२॥

१. ( ) चिह्नान्तर्गतं प्रभूणाम्.



निवारकत्वेनोद्देशत उक्तम्. विस्तरमग्रे वक्ष्यति. क्रमहेतुत्वं च वक्ष्यामः ॥२॥

ततो भगवतः स्वरूपपरिग्रहो जात इत्याह **गतिस्मिते**ति.

**गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः।**
**असावहं त्वित्यबलास्तदात्मिकाः न्यवेदिषुः कृष्णविहारविभ्रमाः ॥३॥**

धर्माश्रेत् स्वस्मिन् समागताः तदैकत्रोभयधर्मा विरुद्धा इति भगवति स्वधर्मानारोपितवत्यः. कायवाङ्मनसां दृष्टेश्च चत्वारः प्रधानधर्माः. तेषु सर्वेष्वेव **प्रतिरूढा मूर्ति**र्यासां, भगवद्धर्मेषु स्वमूर्तिरारोपिता, अन्यथा

## टिप्पणी

**गतिस्मिते**त्यत्र **भगवति स्वधर्मानि**ति, स्वगतौ प्रियगतिभावना जातेति तथा. **भगवद्धर्मेष्वि**ति, भगवत एतासां च मिथो वैलक्षण्यं गत्यादिषु सहजम्. अधुना तु भगवद्गत्यादिवदेव गत्यादि, संस्थानविशेषोऽपि तथा, न तु प्राग्वत्. तथा च तद्भावापन्ना मूर्तिर्जातेत्यर्थः ॥३॥

## लेखः

**गतिस्मिते**त्यस्याभासे **तत** इति, धर्मग्रहणानन्तरं **स्वरूपपरिग्रहो जात इति** हेतोः "असौ कृष्ण" इति ज्ञान**माहे**त्यर्थः. स्वरूपपरिग्रहं विवृण्वन्तो भगवत्येतद्धर्मारोपणमुपपादयन्ति **धर्माश्चेदि**ति. **स्वस्मिन् समागताः** सङ्गताः स्वमूर्तेस्तत्रारोपात् स्वसम्बद्धा इत्यर्थः. **एकत्रे**ति, एकमूर्तौ उभयधर्मा विरुद्धा इत्यर्थः. तथा च मूले धर्मेषु स्वमूर्त्यारोपकथनेन भगवन्मूर्तौ स्वधर्मारोपोऽप्युक्त इति भावः. **भगवती**ति– एतेन भगवन्मूर्तौ स्वधर्मारोप उक्तः. तथाच स्वयं तथा कुर्वन्तीनामपि प्रियएव नायिकावत् करोतीति भावनमिति भावः. भगवद्धर्मेषु स्वमूर्त्यारोपमाहुः **काये**ति. तथा च भगवन्मूर्तौ भगवद्धर्मेषु च

## योजना

**गतिस्मिते**त्यत्र. **स्वधर्मानारोपितवत्य** इति, "स्वगतौ प्रियभावना जाते"त्यादिना टिप्पण्यां स्फुट एतदर्थः. **भगवद्धर्मेषु स्वमूर्तिरारोपिते**ति. भगवद्धर्मस्य रमणस्यानुकरणं कुर्वाणाः भगवानेव रमते इति मन्यमानाः पुनः पुनस्तथैव रमन्त इति **भगवद्धर्मे** रमणे **स्वमूर्तेः**[1] स्वदेह**स्यारोपणं** तदेकपरतेति यावत्. तादृगेव रमणं कुर्वन्त्यः स्थिता इति हार्दम् ॥३॥

१. स्वमूर्तिः इति मुं. वि. पाठः.

अन्योऽन्यधर्माभिनिवेशाभावे सम्यक् विलासो न स्यात्. तदाह **गतिः** कायिकी, **स्मितं** मानसं, **प्रेक्षणमै**न्द्रियकं, **भाषणं** वाचिकं, **तदादयो** यावन्तो विभ्रमाः बन्धादयः रतिरूपाएव. तेषु सर्वेष्वेव **प्रियस्य** सम्बन्धिषु स्वयं **प्रियाः** भोगावस्थामेव प्राप्ताः विपरीता जाताः. "रसाधिक्ये स्त्रियः पुरुषत्वमापद्यन्त" इति वात्स्यायनः. अतएव स्वयं प्रियायोग्याः **प्रतिरूढा** विपरीततया आरूढा **मूर्तयः** स्वरूपाणि यासामिति. तत्र यासां भगवानल्पव्यवहितः पूर्वमासीत् ताभिर्भगवत्प्रश्ने कृते अन्तर्हिताज्ञानात् तत्रोत्तरवक्त्र्यो भवन्ति "**असौ** कृष्णः" "**अहं** कृष्ण" इति. अथवा "योऽन्विष्यते सोऽसावहमि"ति. अन्यासां प्रतीत्यर्थं नटः कपटवेषं कृत्वापि वदति क्रीडायां, तथा न किन्तु स्वतएवेत्याह **अबला** इति. **अबलाः** स्त्रियः भगवद्रूपाविष्कारे च बलरहिताः. स्पष्टवैलक्षण्यं च स्त्रीपुरुषयोः. तथा कथने प्रतारकत्वमालक्ष्याह **तदात्मिका** इति. न केवलं धर्म्यापत्तिः किन्तु तद्धर्माणामपीत्याह **कृष्णवद् विहारः** कायवाङ्मनोव्यापारः **विभ्रमाः** तत्रत्या विलासाः यासाम् ॥३॥

---

**प्रकाशः**

**गतिस्मिते**त्यत्र तदात्मकत्वे **असावि**ति प्रयोगो न युज्यत इत्याशङ्क्य पक्षान्तरमाहुः **अथवे**ति ॥३॥

**लेखः**

स्वधर्माणां स्वमूर्तेश्चारोपः स्वरूपपरिग्रह इत्यर्थः. अत्र स्वयं नायकवत् कुर्वन्तीनामपि प्रियः स्वयमेवैवं करोतीति भावनं तथा च स्वत्वं नास्त्येवेति भावः. पूर्वश्लोके स्वस्मिन् लीलावेशः तथा च स्वभानं स्थितमिति विभेदः. **अन्योन्ये**ति, स्वगतौ प्रियगतित्वं प्रियगतौ स्वगतित्वमित्यर्थः. **विपरीततये**ति, भगवद्धर्मेषु स्वमूर्त्यारोपे[१] भगवानिव कुर्वन्त्यो जाता इत्यर्थः. तथापि प्रिय एवैवं करोति, स्वत्वभावनं तु नेति ज्ञेयम्. **धर्म्यापत्तिरि**ति, भगवद्धर्मेषु स्वमूर्त्यारोपणे स्वस्य भगवत्त्वमेव सम्पन्नमिति भावः. **तद्धर्माणामि**ति. स्वधर्माणां भगवत्यारोपणे तेषां भगवद्धर्मत्वं सम्पन्नं– स्वगतिः प्रियगतिरेवेति. अतस्तद्वदेव विहारादिरिति भावः ॥३॥

---

१. स्वमूर्त्यारोपेण स्वस्य इति जो. पाठः.



एवं ताप-लीला-भगवताम् उद्देशतस्तासु सम्बन्धमुक्त्वा प्रथमं तापनिवृत्त्यर्थं अन्वेषणं कृतवत्य इत्याह. गुणानामिव त्रयाणामेषामन्योन्योपमर्दनेन भगवदिच्छयाविर्भाव इति न परस्परकार्यप्रतिबन्धकता आपाततः. अतो यदा प्रपञ्चसम्वेदनं तदा पृष्टवत्य इत्याह **गायन्त्य** इति. प्रथमतो मिश्रभावात् गायन्त्यो जाताः.

**गायन्त्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनम् ।**
**पप्रच्छुराकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥४॥**

---

**टिप्पणी**

**गायन्त्य उच्चैरि**त्यत्र **प्रथमतो मिश्रभावादि**ति. सुप्तप्रबुद्धन्यायेन बहिःसंवेदनासंवेदनाभ्यां संगमविरहविषयक-समूहालम्बनज्ञानं जनितमिति तथेत्यर्थः.

ननु प्रभोरानन्दरूपत्वेन तद्भावेषु सत्सु सदानन्द एवोचितो न तु वक्ष्यमाणावस्थेत्याशङ्काभावाय तस्याः स्वरूपमाहुः **शब्दो हि धूमवदि**ति. अत्रेदमाकूतम्. एतावत्कालपर्यन्तं भगवता स्वरूपानन्दो न प्रकटितः, तस्य स्वरूपात्मकत्वेन तत्प्राकट्यं विना तदनुभवासम्भवात्, "तथा परमहंसानामि"ति[१] वाक्यात्. यादृशेन भक्तियोगेन तत्प्राप्तिस्तादृक्तत्प्रकटनायाधुनैव पुरुषोत्तमावतारात् प्रभुप्राकट्यानर्थक्यापत्तिभिया श्रुत्याद्युक्तसाधनसाध्यत्वं स्वरूपानन्दस्यैतत्साधनभक्तियोगस्य च न वक्तुं शक्यम्. अतएव [१]कुन्तीभिः पूर्णसाधनवतामप्ययं दुर्लभ इति ज्ञापनायैवाधिकारिविशेषणान्युक्तानि. एवं सति स्वरूपस्य रसात्मकत्वेन अत्रत्या भावाः सर्वे रसात्मका एवेति मन्तव्यम्, अन्यथैतच्छ्रवणमात्रेणापि स्नेहोत्पत्तिर्न स्यात्. एवं सति तद्वार्तानभिज्ञस्य तवेयमाशङ्का कण्टकवेधदृष्टान्तेन कामिनीकुचकुम्भे नखवेधस्यापि दुःखहेतुत्व-

**प्रकाशः**

**गायन्त्य** इत्यत्र **एवमि**त्यादि, अनेन प्रकारेण तापाद्युद्देशाद्रसासक्त्यादिसम्बन्धमुक्त्वेत्यर्थः.

टिप्पण्याम् **एतावत्कालपर्यन्तमि**ति, सृष्टिमारभ्य कृष्णावतारकालपर्यन्तमित्यर्थः. **अधुनेत्य**नेना"प्यथ सर्वगुणोपेत" इत्युक्तएव कालः परामृश्यते

---

१. तथा परमहंसानां मुनीनाममलात्मनाम् ।
भक्तियोगवितानार्थं कथं पश्येमहि स्त्रियः ॥ – भा. १।८।२०.

शब्दो हि धूमवल्लोके बाह्याभ्यन्तरयोगतः ।
विराजते विनिर्गच्छन् तारतम्यं च गच्छति ॥(५)॥

**टिप्पणी**

साधनमनुहरतीत्यलमुक्त्या. एवं सति तापकत्वेन विरहोऽग्निरेव. स यथार्द्रेन्धननिष्ठमग्निं स्वयं तत्संयुक्तः प्रकटीकुर्वन्नार्द्रत्वेन प्रतिबन्धात्तत्रासमर्थो धूममेव जनयति, तथायमप्यग्निरापाततो बहिःसंवेदनेन न सर्वात्मना [1]तिरोधानास्फूर्तिरिति तज्जनितत्वेन तादृशएव जातः. बहिःसंवेदनाभावे तिरोधानास्फूर्तिरिति यावानंशस्तस्य तावान्सोऽत्रार्द्रत्वस्थानीयः. अन्यथैकदैव पूर्णतत्प्राकट्ये क्षणमात्रेण सर्वं भस्मसात्कुर्यदिव. तथा सत्यस्याग्नेर्धूमो गानरूपः शब्दएव. एवं सत्यर्धज्वलितदारुतुल्यता सिध्यति. तदेतदुक्तं **बाह्याभ्यन्तरयोगत** इत्यनेन. यथा स पूर्वमेकरूपएव भवति ततोऽनेकधा, तथोत्तरोत्तरं विचित्रभावजननाद् गानमपि विचित्रं भवतीत्याहुः **विराजत** इति. यथाऽगर्वादिधूमस्य निर्गच्छतः शोभा तथास्यापि शब्दस्य गानरूपत्वमिति ज्ञापनाय **विराजत** इत्युक्तम् (५).

**योजना**

**गायन्त्य उच्चैरमुमेव संहता** इत्यत्र. **प्रथमतो मिश्रभावादिति शब्दो हि धूमवल्लोक** इत्यादयः सार्धास्तिस्रः कारिकाः –एतदर्थष्टिप्पण्यां स्फुटः (५-७).

**कारिकार्थः**

**गायन्त्य उच्चैरित्यत्र शब्दो हीत्यादि**. एतदर्थः टिप्पण्यां विस्तरेणोक्तः, तत एवात्र संगृह्यन्ते. ननु प्रभोरानन्दरूपत्वेन तद्भावेषु सत्सु सदानन्दएव उचितो न तु वक्ष्यमाणदुःखावस्थेत्याशंकाभावाय तस्यावस्थायाः स्वरूपमाहुः **शब्दो हि धूमवदिति**. एवं सति स्वरूपस्य रसात्मकत्वेन अत्रत्या भावाः सर्वे रसात्मकाएवेति मन्तव्यम्. भक्तानां गुणगानात्मकः **शब्दो हि** अगरुप्रभृतिधूमवत् **विनिर्गच्छन्** सन् **विराजते तारतम्यं** प्रतिक्षणं वैचित्र्यं **च गच्छति.** अत्र तापकत्वेन विरहोऽग्निरेव. अग्निर्यथार्द्रेन्धनसंयुक्तः सन् तन्निष्ठमग्निं प्रकटीकुर्वन् आर्द्रत्वेन प्रतिबन्धाद् अग्निप्रकटनेऽसमर्थो धूममेव जनयति, तथा अत्रापि बहिःसंवेदने सति सर्वथा तिरोधानस्फूर्तिरिति बहिः-

[1]. तिरोधानस्फूर्तिरिति मू. पा.



अतोऽत्र धर्मिधर्माणामाधिक्याज्ज्ञानमुत्तमम् ।
यथा भगवतो गानात् स्वयमागत्य संगताः ॥(६)॥

**टिप्पणी**

**अतोऽत्रेति**, यतो हेतोर्भगवान् रसात्मकः, तदात्मकाएव च भावाः, **अतो** हेतोरखण्डाद्वैतभानादिदं स्वामिनीनां **ज्ञानमुत्तममि**त्यर्थः. एतदेव स्फुटयन्ति **धर्मिधर्माणामि**ति. एते भावाः स्थायिभावस्य व्यभिचारिभावा इति **धर्मिणः** श्रीकृष्णस्य **तद्धर्माणां** विहारादीनां जीवतद्धर्मापेक्षयोत्कृष्टत्वात् तथेत्यर्थः. उक्तज्ञाने जीवतद्धर्मयोरेव सत्त्वात्तदपेक्षयैतयोर्न्यूनत्वादिति भावः. अथवा. यथा प्रियवद्विहारादिस्तथैवेदं गानमपीत्याहुः **यथा भगवत** इति. प्रीतिविषयाणामाकारणं भगवद्धर्मः सोऽत्रोक्तः. अतएव तदा स्वागमनवदधुना न प्रभोरागमनं, तस्य स्वधर्मत्वात्. भगवान् कौतुकार्थमत्रैव कुत्रचिल्लीनोऽस्ति रसपरवशश्च, अतोऽस्मद्गानेनागमिष्यतीति ज्ञात्वा जगुरित्यर्थः. अस्मिन् पक्षे

**प्रकाशः**

इति ज्ञेयम्. **तज्जनितत्वेने**ति बहिःसंवेदनजनितत्वेन. **उक्तज्ञाने** इत्यादि "कैवल्यं सात्त्विकं ज्ञानमि"ति वाक्यादखण्डाद्वैतभानं जीवधर्मः, जीवश्च चित्प्रधानः. प्रकृतं तु ज्ञानं वरणैकलभ्यं, स्वामिन्यश्च भगवत्पराः, विषयश्च पूर्वोक्त इति तथेत्यर्थः (५-७ $\frac{1}{2}$).

**कारिकार्थः**

संवेदनमेव आर्द्रत्वस्थानीयम्. तस्मिन् सति विरहाग्निरपि गानरूपं धूममेव जनयति. एवं सति असावाग्नेः धूमो गानरूपः शब्दएव. एवं सति अर्धज्वलितदारुतुल्यता सिद्धयति, अन्यथा एकदैव पूर्णतत्प्राकट्ये क्षणमात्रें सर्वं भस्मसात् कुयदिव. यथा धूमः पूर्वम् एकरूपएव भवति ततोऽनेकविधः तथा गानमपि उत्तरोत्तरं विचित्रभावजननात् विचित्रं भवति इत्युक्तं **विराजत** इति (५).

**अतोऽत्रेति**, यतो हेतोः भगवान् रसात्मकः तदात्मकाएव च भावाः **अतो** हेतोः अखण्डाद्वैतभानाद् इदं स्वामिनीनां **ज्ञानम् उत्तममि**त्यर्थः. एतदेव स्फुटयन्ति **धर्मिधर्माणामि**ति. एते भावाः स्थायिभावस्य व्यभिचारिभावाः इति **धर्मिणः** श्रीकृष्णस्य **तद्धर्माणां** "गतिस्मिते"ति श्लोकोक्तविहारादीनां च जीवधर्मापेक्षया उत्कृष्टत्वाद् "असावहमि"ति स्वामिनीज्ञानमुत्तममित्यर्थः. अथवा यथा प्रियवद्विहारादिः तथैवेदं गानमपीत्याहुः **यथा भगवत** इत्यादि (६).

एवं स्वयं भगवत आगत्यर्थं जगुः स्फुटम् ।
कृत्रिमत्वात्तु भावस्य मिलिताश्च स्वतोऽन्यतः ॥(७)॥
ततो विशेषविज्ञानात् तिरोभावोऽस्फुरत् स्फुटः ॥

तदा **विचिक्युः** क्व भगवानस्तीत्यन्वेषणं कृतवत्यः. तत्रापि न सर्वात्मना तिरोभावः स्फुरित इति अन्वेषणेऽपि अनियतवृत्तयो जाता इत्याह

**टिप्पणी**

बहिःसंवेदनमेवास्ति परंत्वदर्शनजात्योक्तरीत्या तथा करणमिति ज्ञेयं, सर्वथा बहिःसंवेदने हि विचयनमिति. तत्र हेतुमाहुः **कृत्रिमत्वादिति**, आत्मनि भगवद्भावस्य कृत्रिमत्वात्तिरोधानमावश्यकम्. तद्धेतुर्विचित्रभाववतीनां मिथो मिलनं, तदाहुः यतो हेतो**र्मिलितास्ततो** हेतोः **स्वतोऽन्यतश्च विशेषविज्ञानात्तथे**ति योजना. यद्वा भगवद्भावापन्नाऽपरां सखीं मत्वाश्लेषादिकं करोतीति **स्वतो** मिलनम्. तदान्यासामस्यां भगवत्त्वबुद्ध्यभावात् तद्भावाननुरूपकरणेऽस्या **विशेषविज्ञानम**भूत्. अन्ययापि भगवद्भावापन्नयाऽस्यां सखीत्वज्ञानेन मिलन**मन्यतो** मिलनम्. तत्रापि पूर्ववत्तथा. नन्वग्रे पूतनासुपानकरणदशापन्नप्रभुभावापन्नैव पूतनायन्त्याएव स्तनमपिबदिति यथा तथात्रापि कुतो न? तथा सति विशेषविज्ञानासम्भव इत्यत आहुः **कृत्रिमत्वादि**ति. अग्रे लीलाविर्भावस्य वक्तव्यत्वाद्यादृशी लीला तादृश्येवाविर्भवतीति सर्वमुपपद्यते. प्रकृते तु प्रियादर्शने सत्युत्कटभावेन प्रियमात्रस्फूर्त्या स्वस्मिन्नपि तत्त्वेन भानमिति कृत्रिमत्वमस्य. एवं सत्यनेनैव भावेन यदोक्तन्यायेनान्यज्ञानं तदा तिरोभावस्फूर्तिरित्यर्थः. बहिःसंवेदने सत्यपि मादकद्रव्यस्वभावादुन्मत्तो विवेकरहितो भवति, एवं विरहभावस्वभावज-वैकल्यात्तथेत्याशयेन **तत्रापि न सर्वात्मने**त्याद्युक्तम् (६-७ $\frac{१}{२}$).

**कारिकार्थः**

**कृत्रिमत्वादि**त्यादि, "विचिक्युरुन्मत्तकवदि"त्यत्रोक्तं विचयनं हि बहिःसंवेदने सति भवति, तत्र हेतुमाहुः **कृत्रिमत्वादि**ति. तत्र हेतुः विचित्रभाववतीनां मिलनं, तदाहुः **मिलिताश्च स्वतोऽन्यत** इति. यतो हेतो**र्मिलितास्ततो** हेतोः **स्वतोऽन्यतश्च विशेषविज्ञानात् तिरोभावः** स्फूर्तिरिति योजना. अत्र **यद् वा** इत्यादिना पक्षान्तरमुक्तं टिप्पण्याम् (७ $\frac{१}{२}$).



**उन्मत्तकव**दिति. अज्ञात उन्मत्त **उन्मत्तकः**, कुत्सितो वा. स यथा स्वपरविवेकं न जानाति वस्त्रादिरहितश्च भवति एवमवस्थां प्राप्ताः. एकस्माद्**वनाद्** वनान्तरं गताः. किञ्च न केवलमन्वेषणमात्रं किन्तु उन्मत्तकवत् पृच्छन्ति स्मेत्याह **पप्रच्छुरि**ति. शुको हि भगवत्स्वरूपाभिज्ञः आनन्दमात्रकरपादमुखोदरादिं कृष्णं सर्वत्रैव विद्यमानं पश्यति. यदि भक्तिसहितं ज्ञानमाविर्भवति तदा अन्योऽपि पश्यति, सर्वत्रैव तिरोधाननाशात्. तादृशमेताः परिच्छिन्नं मत्वा

**टिप्पणी**

**आकाशवदन्तरमि**त्यत्र[१] **शुको** हीत्याद्याभासमार**भ्यायमपी**त्यन्तम्. अत्रायं भावः. "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे"ति भगवद्वाक्याद् भक्तिमार्गे ज्ञानं प्रतिबन्धकमिति मन्तव्यम्. युक्तं चैतद्, आत्मत्वेन भगवज्ज्ञाने तद्दिदृक्षादिजनितार्त्यसम्भवेन प्रभुप्रादुर्भावासम्भवात्सर्वस्वनाशएव यतः. एवं सति यत्र कालादिनियन्तृत्वज्ञानात्मक-प्रतिबन्धके सत्यपि कंसादिभयज्ञानरूपः स्नेहकार्य एव देवक्यां जातः, तत्र प्रतिबन्धरहितानां स्नेहमात्रकार्यसम्भव इति किं वक्तव्यमिति कैमुतिकन्यायः सूच्यते. किञ्च तत्र देवकीधर्मरूपं ज्ञानं प्रति-

**प्रकाशः**

एकादशे भगवद्वाक्येषु व्रजरत्नानामेव सर्वोत्कृष्टत्वेन निरूपणात् "मत्स्वरूपाविदोऽबला" इति च कथनादत्र च **शुको ही**त्यादिग्रन्थे भक्तापेक्षया शुकस्योत्कर्षप्रतीतेर्मूलविरोधः, पुष्टिप्रवाहमर्यादाग्रन्थे "शुद्धाः प्रेम्णातिदुर्लभा" इत्युक्तेः "एतादृशस्तु पुरुषः कोटिष्वपि सुदुर्लभः यो दारागारपुत्राप्तप्राणान् वित्तमिमं परम् हित्वा कृष्णे परं भावं गतः प्रेमप्लुतः सदे"ति निबन्धस्य च विरोधः प्रतीयत इति तत्परिहाराय **शुको ही**त्यादिग्रन्थतात्पर्यमाहुः **अत्रायं भाव** इत्यादिना. **सूच्यत** इति, तथा च यत एतादृशः ज्ञानमिश्रभक्तः

**लेखः**

**गायन्त्य** इत्यत्र. **अज्ञात** इति यस्योन्मादो ज्ञातो न भवति, कदाचिदन्यथा वदति कदाचिन्नेति. तथात्रापि कदाचिदन्वेषणं कदाचिन्नेत्यर्थः. मूले **विचिक्युरि**त्युक्त्वाऽन्वेषणमेव वाक्यार्थ इति तदभावोऽशक्यवचन इत्याशयेनाहुः **कुत्सितो वे**ति ॥४॥

१. °मित्यस्य मू. पा.

पृच्छन्तीति तासामज्ञानकथनार्थमाह **आकाशवदन्तरं बहिर्भूतेषु सन्तमि**ति.

### टिप्पणी

बन्धकत्वेनोक्तम्, अत्र तु विशेषणेन भगवद्धर्मस्तथोक्तः. एवं सति यत्रायमेव न प्रतिबन्धकः तत्रान्यस्य का वार्तेत्यपि ज्ञापनायेदं विशेषणम्. तथा च हेतुसत्त्वेप्युक्तज्ञानाभावेन भक्त्युद्रेकः सूच्यते. एतदेवोक्तं **तासामज्ञानकथनार्थ-मि**त्यनेन. शुकस्यैवं ज्ञानाभावे त्वेतत्कथनेऽप्यशक्तिः स्याद् जीवनं वा न स्यादिति शुकज्ञानोक्तितात्पर्यं वेदितव्यम्. अपरश्च 'सर्वेष्वि'त्यादिपदमनुक्त्वा नपुंसकलिंग**भूत**पददानेन प्रभौ च **पुरुष**त्वोक्त्या यथा षण्ढस्य पुरुषनैकट्ये रसोत्पत्तिर्न किन्तु स्त्रीणामेव, तथा प्रभुसान्निध्येऽपि भूतानां रसानुत्पत्तिः एतासां तदुत्पत्तिश्च युक्तेति ज्ञाप्यते. तेनैतासामेव प्रभुरसाभिज्ञत्वमित्युक्तं भवति. एतावान्परं विशेषो— बहिःसम्बन्धे विलक्षणो भाव उत्पद्यते अन्तरेव सम्बन्धे तु विलक्षण इति. कात्यायनीस्वरूपनिरूपणप्रस्तावे कथितं स्त्रीत्वमत्र

### प्रकाशः

न तु शुद्धप्रेमभक्तः अत एवं वदतीत्याशयेन **कैमुतिकन्यायः शुको ही**त्यादिग्रन्थेन **सूच्यत** इत्यर्थः. अत्र भक्तिपरमकाष्ठाज्ञापनाय कैमुतिकान्तर-माहुः **किञ्चे**त्यादि **अनेने**त्यन्तम्. तथा च न विरोधलेशोऽपीति भावः. ननु "परिनिष्ठितोऽपि नैर्गुण्य" इत्यत्र शुकेन स्वस्य भगवल्लीलागृहीतचित्ततायाः प्रतिपादितत्वेन तस्मिन्नपि भक्तेरेवोद्रेकात्तस्यापि ज्ञानाभाव एवोचितो नत्वेवं कथनमित्याकांक्षायां तदधिकारस्वरूपपरिचायनायायं ग्रन्थ इत्याहुः **शुकस्ये**-त्यादि. तथा च यदि तस्य न्यग्भूतज्ञानाच्छुद्धभक्तिरेव स्यात् तदैवंभावेन श्रीभागवतं न प्रचरेदेव. अतस्तदर्थं शुकस्यैतादृक्स्वरूपं शाब्दमेव न तु भक्तानामिवानुभव इत्येष तदधिकार इति ज्ञानभक्त्युद्रेक इत्यर्थः. इदमेव "गुणगाने सुखावाप्तिर्गोविन्दस्य प्रजायते यथा तथा शुकादीनां नैवात्मनी"त्यत्रापि बोध्यम्. पूर्वोक्तमिदं च द्रढयितुं **भूत**पदतात्पर्यमाहुः **अपरश्च सर्वेष्वि**त्यादि **भवती**त्यन्तम्. तथा च न काल्पनिकमस्मदुक्तम् अपि तु **भूत**पदप्रयोगादर्थसिद्धम् अतो न शङ्कालेश इत्यर्थः. ननु भक्तानां रसज्ञत्वे सर्वदैव कुतो नैवंभाव इत्याकांक्षायां पूर्वोक्तं स्मारयन्ति **एतावानि**त्यादि. ननु भगवतः पुरुषत्वात् स्त्रीत्वावच्छिन्नानामेव रसाभिज्ञानमुचितं नत्वेतासामेव, अतो न **भूत**पदार्थिकमत्र सम्भवदुक्तिकम्, अत आहुः **कात्यायनी**त्यादि.



बाह्याभ्यन्तरविवेकहेतुराकाश इति पूर्वं निरूपितम्. तद्वदेवायमपि, अत एवाकाशस्य ब्रह्मलिङ्गत्वम्. एतादृशं सर्वत्रैव विद्यमानमदृष्ट्वा आत्मनि विचारं त्यक्त्वा चेतनांश्चापृष्ट्वा स्थावरान् पृच्छन्ति **वनस्पतीन् पप्रच्छु**रिति,

### टिप्पणी

विवक्षितमतो न शङ्का कापि. अपरश्च भगवति दृष्ट एवासां बहिरिदमन्तरिद-मिति ज्ञानम्, अधुना तदभावेन तयोरप्यभावादप्यन्तरननुसन्धानमुचितं परन्तु प्राप्तिरपेक्षितेति यत्र कुत्रचित्प्रश्न इत्याशयेन **बाह्याभ्यन्तरे**त्यारभ्य **पृच्छन्ती**त्यन्तेनोक्तम्. **सर्वत्रैव विद्यमानमि**त्याद्यविशेषणतात्पर्यम्. "पुरि हृदयाकाशे शेत" इति व्युत्पत्त्या **आत्मनी**त्यादिद्वितीयविशेषणस्य. यद्वा प्रकरणाद् भक्तिमार्गाद् भगवता ये बहिर्भाविता जीवास्ते **बहिर्भूत**पदेनोच्यन्ते. तथा च तेष्वे**वाकाशव**न्निराकार इवाप्रत्यक्षतयैव **सन्तं**, तत्राप्य**न्तरमे**व न तु कदाचिदपि बहिःप्राकट्येन. वस्तुतस्तु भक्तिमार्गीयेषु पुरुषत्वेन साकारं बहिःप्रकटं भर्तृरूपमतो बहिर्विचयनमेवोचितम्. न हि स्त्रीणां स्वभर्तुरन्तर-न्वेषणमन्तःस्थितिज्ञानं वा स्वास्थ्यहेतुः पुरुषार्थाय वा भवतीति मूलार्थः ॥४॥

### प्रकाशः

तथा च यत्र प्रसादशक्त्यादिसम्बन्धः तत्रैव तदभिज्ञानं नान्यत्रेत्यतः शङ्का-निवृत्तेरार्थिकं न प्रतिक्षेप्तुं शक्यमित्यर्थः. एवमाभासव्युत्पादनेनाधिकारतारतम्यं विविच्य व्याख्यानव्युत्पादनेन तद्दृढीकर्तुमाहुः **अपरश्च भगवती**त्यादि. **अभावादि**ति ज्ञानाभावात्. बहिरनुसन्धानं वारयन्ति **परन्त्वि**त्यादि. तथा च "स एवाधस्तादि"त्यादिना श्रावितभावस्य बहिरन्तर्ज्ञानाभावरूपव्यभि-चारिभाव एतास्वेव स्फुटो न शुक इति प्रथमविशेषणादेवावसीयते. तत्र हि "भूतानां छिद्रदातृत्वं बहिरन्तरमेव चे"ति कापिलेय आकाशलक्षणे आकाशे तथात्वस्य निरूपणाच्छुकेन तद्दृष्टान्तपूर्वकं व्यापकत्वकथनात्स्वस्य तदनुसन्धानं ज्ञाप्यत इति स्फुट एवाधिकारभेद इत्यार्थिकार्थानादरेऽपि नाधिकारतारतम्यं व्याहन्यत इत्यर्थः. एवं व्याख्यानोक्तं व्युत्पाद्य स्वतन्त्रतया प्रकारान्तरेण पूर्वोक्तमधिकारतारतम्यं व्युत्पादयन्ति **यद्वे**त्यादि. **उचितमि**ति अन्तर्ज्ञानेऽप्यु-चितम्. तथा चैवमौपसदन्यायेन[1] भगवद्विचारितादधिकारतारतम्याच्छुकस्य

---

१. ३।३।३३ ब्रह्मसूत्रोक्तन्यायेन.

ते हि वैष्णवा इति. मूढा अपि वैष्णवाएव हि विष्णुगतिं जानन्ति, नत्वत्यन्तं निपुणा अप्यवैष्णवाः ॥४॥

तत्रापि प्रथमं विष्णु-ब्रह्म-शिवतां लोके प्राप्ताः अश्वत्थ-प्लक्ष-वटास्तान् पृच्छन्ति **दृष्ट** इति.

**॥ श्रीगोप्यः ऊचुः ॥**

**दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः ।**
**नन्दसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ॥५॥**

**अश्वत्थो** हि वैष्णवो वृक्षो, विष्णुवत् लोके सन्मानमर्हतीति, प्रायेणायं ज्ञास्यति. तथाप्ययं स्तब्धः स्वोत्तमभावनया न ज्ञास्यतीति तदर्थं हेतुभूतं नामाह "अश्वस्तिष्ठत्यस्मिन्नि"ति अश्वत्थः. लोकास्त्वश्वे तिष्ठन्ति, अस्मिंस्त्वश्वस्तिष्ठतीति, "अश्वो रूपं कृत्वा यदश्वत्थेऽतिष्ठद्" इति श्रुतेः. तर्हि प्राजापत्योऽश्वत्थ इति तदपेक्षया प्राजापत्यो वृक्षः प्रष्टव्य इति प्लक्षं पृच्छन्ति **प्लक्षे**ति. तत्रापि तस्याज्ञानं नाम्ना वदन्ति. अयं हि मनुष्याणामज्ञानार्थं पावित्र्यक्षारणादुत्पन्नः अपवित्रो लोकानामज्ञानहेतुरेव, अतः कथं वक्ष्यतीति, "पशुना वै देवाः स्वर्गं लोकमायन्, तेऽमन्यन्त मनुष्या नो त्वा भविष्यन्तीति, तस्य शिरश्छित्त्वा मेधं प्राक्षारयन्, स प्लक्षोऽभवदि"ति श्रुतेः. तर्हि कर्मसम्बन्धरहितः वैष्णवधर्मोपदेष्टा शिवः प्रष्टव्य इति तद्रूपं न्यग्रोधं पृच्छन्ति **न्यग्रोधे**ति. तस्यापि दूषणं नितरामग्राण्यधो यस्येति. अतोऽन्ते

**प्रकाशः**

भक्तत्वेऽपि नैतद्वदधिकार इति तस्य स्वास्थ्यादिकं, नैतासाम्. अन्तर्ज्ञानं तूभयोस्तुल्यं परमेतासामधिकारस्वभावात्प्रतिहन्यते तस्य तु नेति सर्वमौपसदन्यायादेव समञ्जसं, न कोपि विरोध इत्यर्थः. प्रकारान्तरेण व्याख्यानं तु "उपेयप्रतिपत्त्यर्थमुपाया अव्यवस्थिता" इति न्यायात्, नतु पूर्वोक्ते अस्वरसादिति न दोषलेशः ॥४॥

**दृष्ट** इत्यत्र. वनस्पतिमात्रे वैष्णवत्वस्य तुल्यत्वेऽपि प्रथममश्वत्थादिषु प्रश्ने हेतुमाहुः **तत्रापी**त्यादि. अत्र प्रश्नोत्तरं नामोक्तेस्तत्सूचितमर्थमाहुः **तथापी**त्यादि. एवमग्रेऽपि ज्ञेयम्. [१](**अयं** हीति, **पावित्र्यं** स्नानं, तस्य **सारणात्**.) नन्वेते महत्त्वात्पृच्छ्यन्ते चेद् अनुत्तरणेऽपि दूषणमेतेषु न

१. मूले नास्ति (आद्यसंपादकीयम्), मुं. वि. पाठे उपलभ्यते.



हीनभावं गच्छतीति अग्रे गमने हेतुर्भविष्यति. **वः** युष्माकं सम्बन्धी [१]भवद्भिः किं **दृष्टः?** प्रश्नसम्भावनायां **कच्चि**दिति. दृष्टोऽस्माभिः पूर्वं सर्वदैव वा, ततः किं भवतीनामिति चेत्, **नो मनः हृत्वा गत** इति. ननु स विष्णुः, कथं चौर्यं करिष्यतीति तत्राहुः **नन्दसूनुरि**ति, नन्दस्य चेत् पुत्रो जातः तदा तत्कार्यं कर्तव्यम्. ते हि दधिदुग्धादिचौर्यं कुर्वन्ति, अतो मनश्चौर्यमपि नात्यन्तं विरोधि. भर्तृनामाग्रहणं वा. अतएव हरणपर्यन्तं प्रभुपुत्र इति न ज्ञातः. अन्यथा भोगं परित्यज्य कथं गच्छेत्? नन्वन्तःस्थितं मनः कथं गृहीतमित्यांशक्य त्रिविधं मनः त्रिभिरपि धर्मैर्गृहीतवानित्याह **प्रेमहासावलोकनैरि**ति, प्रेमपूर्वकहास्यसहितान्यवलोकनानि मनोहराणि. तमोरजःसत्त्वभावा उक्ताः– प्रेम्णा अन्तःप्रवेशः हास्येन ग्रहणम् अवलोकनेन हरणमिति ॥५॥

**टिप्पणी**

**नन्दसूनुर्गत** इत्यत्र **प्रभुपुत्र इति न ज्ञात** इति, चोरत्वेन न ज्ञात इत्यर्थः. प्रभुपुत्रो यतो न चौर्यं करोतीति भावः. **प्रेमहासावलोकनैरि**त्यत्र **तमोरज** इत्यादि, यस्य यादृशं मनस्तस्य तादृश्यैव रीत्या तद्धरतीति भावः ॥५॥

**प्रकाशः**

वक्तव्यम् अपि तु स्वस्मिन्नेवारोप्यमित्याशङ्कायामाहुः **अग्रे** इत्यादि. तथा च तान्विहाय भगवतो**ऽग्रे गमने** इदं **हेतु**त्वेन सम्भाव्य वदन्तीत्यर्थः. **नामाग्रहणं वे**ति पक्षान्तरे भवतीभिः स्वमनोरक्षणं कुतो न कृतमित्याभासो ज्ञेय इत्यभिप्रायेणाहुः **अतएवे**त्यादि ॥५॥

**लेखः**

**दृष्ट** इत्यत्र, तृतीयान्ते वसादेशासम्भवात् **व** इति षष्ठ्यन्तं व्याचक्षते **वः युष्माकं सम्बन्धी**ति. सम्बन्धमेव विवृण्वन्ति **भवद्भिः किं दृष्ट** इति, स्वकर्तृकदर्शनविषयतासम्बन्ध इत्यर्थः. तथा च मूले **व** इति "कर्तरि न लोकाव्यये"ति निषेधेऽपि सम्बन्धमात्रविवक्षया शेषषष्ठीति भावः. **नन्दसूनुर्गत** इत्यत्र. द्वितीयपक्षे **नन्दसूनु**पदतात्पर्यमाहुः **अतएवेति. ज्ञातो न** परन्तु भवति चोरएवेत्यर्थः. **अन्यथे**ति चोरत्वाभावे इत्यर्थः. **तमोरज** इत्यस्य टिप्पण्यां

१. युष्माभिरिति पाठः.

तेषामनुत्तरं मत्वा एते अमुख्यफला, महान्तोऽपि काकसेव्या एवेति, ये महान्तः पुष्पवन्तः सुगन्धाः तान् पृच्छामइति कुरबकादीन् पृच्छन्ति **कच्चिदिति**.

**कच्चित् कुरबकाशोकनागपुन्नागचम्पकाः ।**
**रामानुजो मानिनीनां गतो दर्पहरस्मितः ॥६॥**

**कुरबकाशोकौ** कामोद्दीपकौ, एते कामबाणपुष्पाः. **नागो** नागकेसरः **पुन्नागश्चम्पकश्च** अतिसुगन्धपुष्पाः. ते हि कामिनं व्यावर्तयन्ति अतः पश्चाप्येते ज्ञास्यन्तीति **रामानुजः कच्चिद्** भवद्भिर्दृष्ट इति पृच्छन्ति. पूर्ववदेव प्रयोजन-कथनम्. **मानिनीनां दर्पहरं स्मितं** यस्य; व्यर्थमेव **गतो** भगवान्, स्मितमात्रेणैव दर्पो गच्छति, किं गमनेन! भयं तु नास्त्येव यतो **रामानुजः** बलभद्रभ्राता, भर्तृनाम न ग्राह्यमिति. वयं सर्वाएव मानिन्यः स्थिताः अतोऽस्मद्दर्पदमनार्थं गतः. प्रायेणैतैर्न दृष्टः. कुत्सितरवात् कं सुखं यस्य, रोदनप्रियोऽयम्. अशोकश्च शोकनाशकएव, न तु कस्यचित् सुखं प्रयच्छति. नागोऽयं नाम्नैव भयानकः. गजपक्षेऽपि पुंसामपि नागः. चम्पकोऽपि परिणामविरसः. अफलाश्चैते ॥६॥

---

**प्रकाशः**

**कच्चित्कुरबके**त्यत्र **भर्तृनामे**त्यादि, एतेन कुमारीवाक्यत्वं बोधितम्. श्लोकद्वयोक्तेषु दूषणान्तरमाहुः **पूर्वोक्ते**त्यादि. "यत्राकृतिस्तत्र गुणा वसन्ती"तिवत्पुष्पाणां शोभाधायकत्वात्तदभावेन गुणाभावः पूर्वोक्तेषु, एतेषु फलाभावात्प्रश्नस्याप्यफलत्वमिति भावः ॥६॥

**लेखः**

**यादृशमिति**, यत्प्रकारप्रधानमित्यर्थः. **तादृश्ये**ति तत्प्रकारप्रधानयेत्यर्थः. त्रयसत्त्वेऽपि तमःप्रधानं यस्या मनस्तस्या मनः प्रेमप्राधान्येन हरति, एवमन्ययोरपि. सुबोधिन्यां सामान्यतो विभागमाहुः **प्रेम्णे**ति ॥५॥

**महान्त** इति, वक्ष्यमाणाश्चूतादयो मुख्यफला इत्यर्थः. **पुष्पे**ति, तादृशाः सन्तः **सुगन्धाः** कुरबकादयो यूथिकान्ता इत्यर्थः. **कामबाणपुष्पा** इति, कामबाणाः पुष्पाणि येषां तादृशा एते कुरबकादिवृक्षा इत्यर्थः. **भयं त्विति**, रमणाधिकरणस्य क्रियाशक्तिप्रधानस्य भ्रातृत्वाद्रसच्युतिभयं नास्तीत्यर्थः. **अफलाश्चैते** इति, अनुपदोक्ता दोषा अफलत्वं च दोष इति **चकारः** ॥६॥



पूर्वोक्तास्त्वपुष्पाः, एते अफलाः. फलपुष्पाभ्यां नानाविधविनियोग-संभवादज्ञानं मत्वा तुलस्यास्तदुभयं नास्तीति भगवदीयत्वेन प्रसिद्धां पृच्छन्ति **कच्चिदिति**.

**कच्चित्तुलसि कल्याणि गोविन्दचरणप्रिये ।**
**सह त्वाऽलिकुलैर्बिभ्रद् दृष्टस्तेऽतिप्रियोऽच्युतः ॥७॥**

**तुलसी**ति सम्बोधनं सखीमिव मत्वा. सा चेत् पूर्वसम्बन्धस्मरणेन भक्तेव भगवन्तं भजेत् तदा रसो न पुष्ट इति तां भगवत्पत्नीं मन्यमाना आहुः **कल्याणी**ति. एवमपि सति भक्तिप्रधानेत्यस्मदाद्यपेक्षया उत्कृष्टेत्याहुः **गोविन्दचरणप्रिय** इति. किञ्च तव दर्शने उपायोऽप्यस्ति, त्वत्सजातीयस्य तत्र विद्यमानत्वात्; सजातीयो हि सजातीयं मार्गस्थं दृष्ट्वा गच्छति. तदाहुः **अलिकुलैः सह त्वा** त्वां **बिभ्रद् दृष्ट** इति. किञ्च **ते** भगवा**नत्यन्तं प्रियः;** यद्यनेन मार्गेण गतः स्याद् अवश्यं त्वया दृष्टः स्यादिति ॥७॥

तत्राप्यरुचिं मत्वा, इयं सपत्नीवत् स्वोत्कर्षं ख्यापयन्ती कथमन्याभ्यो

---

**टिप्पणी**

**तुलस्यास्तदुभयमि**ति, पुष्पकृतः फलकृतश्च यो [१]विधिविनियोगस्तदुभयं नास्तीत्यर्थः.

**क्वचित्तुलसी**त्यत्र **सा चे**त्यादि. पूर्वं हि भक्तात्वेन निष्कामा निरन्तरं चरणारविन्दमेव सेवमाना स्थिता, लक्ष्म्यादीनामप्यत एवैषा पूजासाधनमन्यथा सपत्नीत्वं ज्ञात्वा तथा लक्ष्म्यादयो न कुर्युः. तथा सति नायिकात्वे यो रसः स नानुभूतो भवतीत्यस्मद्रीतिमज्ञात्वा तूष्णीं तिष्ठेतेति मत्वा तथाहुरित्यर्थः. **अस्मदाद्यपेक्षये**ति. अवस्थाविशेषकृतदैन्याविर्भावज्ञापनायैवमुक्तम्, अन्यथा सपत्नीत्वं ज्ञात्वापि नेमां पृच्छेयुरिति भावः ॥७॥

**प्रकाशः**

**कच्चित्तुलसी**त्यत्र **नानाविधे**ति, एतेनान्यसम्बन्धस्तेषूक्तः ॥७॥

**लेखः**

दोषान्तरमाहुः **फलपुष्पाभ्यामिति**. **कच्चित्तुलसी**त्यत्र टिप्पण्यां **तूष्णीं तिष्ठेते**ति "प्रकाशनस्थेयाख्ययोश्चे"त्यात्मनेपदम्. स्वाशयं चरणसेवां प्रकाशयन्ती तिष्ठेतेत्यर्थः ॥७॥

---

१. विविधो विनियोग इति पाठः. द्विविधविनियोगः स्यादपि.

वक्ष्यतीति, साधारण्यः स्त्रिय एवास्माकमुपकारिण्य इति ताः पृच्छन्ति **मालती**ति.

**मालत्यदर्शि वः कच्चित् मल्लिके जाति यूथिके ।**
**प्रीतिं वो जनयन् यातः करस्पर्शेन माधवः ॥८॥**

हे **मालति, वः** युष्माभिः प्रत्येकं नानारूपाभिः दृष्टः **कच्चित्?** तथैव **मल्लिके,** हे **जाति,** हे **यूथिके.** एताश्चतस्रो लताः अतिसुगन्धपुष्पाः भगवत्प्रियाः, अतः **वः** युष्माकं **करस्पर्शेन प्रीतिं जनयन्** पुष्पावचयं कुर्वन् **माधवो** लक्ष्मीसहितः. लक्ष्म्या सह तिष्ठति अतस्तस्याः चूडाबन्धनार्थं पुष्पावचय आवश्यक इति ॥८॥

ननु यद्यप्येताः स्त्रियः तथाप्यफलाइति अल्पाइति स्वार्थपराइति लक्ष्मीपक्षपातिन्यइति न वदिष्यन्तीति ज्ञात्वा आम्रादीनत्युत्तमान् वृक्षान् पृच्छन्ति **चूते**ति.

**चूतप्रियालपनसाशनकोविदार-जम्ब्वर्कबिल्वबकुलाम्रकदम्बनीपाः ।**
**येऽन्ये परार्थभवका यमुनोपकूलाः शंसन्तु कृष्णपदवीं रहितात्मनां नः ॥९॥**

**चूताम्रौ** मधुराम्लप्रकृतिकौ. कालभिन्नफलौ वा. **प्रियालस्तु** बीजेऽप्यधिकरसयुक्तः. **पनसो** महाफलः. अन्ये **चाशनादयो** वृक्षाः पुष्पफलप्रधानाः. किं बहुना, **अन्येऽपि ये** मधूकादयः. परार्थमेव जन्म येषां ते **परार्थभवकाः.** किञ्च यद्यपि सर्वएव वृक्षाः परार्थजन्मानः तत्रापि ये **यमुनोपकूलाः** यमुनाया उपकूले तपस्विन इव तिष्ठन्ति ते ह्यवश्यं भगवन्तं पश्यन्ति बोधयन्ति च.

---

**लेखः**

**मालतीत्यत्र वः युष्माभिरि**ति. अत्रापि पूर्ववद् **व** इति षष्ठ्यन्तं, तस्य विवरणं **युष्माभिरि**ति. कर्तृत्वं सम्बन्ध इत्यर्थः ॥८॥

**स्वार्थपरा** इति, चूतादिषु परार्थभवकत्वकथनेनैतास्वयं दोषः सूचित इति भावः. छायादिना परार्थसम्पादका इत्यर्थः. **लक्ष्मीपक्षपातिन्य** इति, धनवतामेवैतदुपयोग इति भावः. **चूतेत्यत्र भवका** इति, परार्थो भवो[1] येषामिति विग्रहः. "शेषाद्विभाषे"ति 'कः'. **यथे**ति, येन शंसनप्रकारेण **अस्मद्धृदये** पदवी **समायाति** अनेन मार्गेण गत इति ज्ञातं भवेदित्यर्थः ॥९॥

---

१. जो. पाठमनुसृत्य. भाव इति मुद्रितः पाठः.



अतः सदानन्दस्य **पदवीं शंसन्तु** यथास्मद्धृदये समायाति. दयार्थमाहुः **रहितात्मनामि**ति– केचित् गृहरहिताः धनरहिताः देहरहिता वा, वयं त्वात्मरहिताएव. अतः सर्वापेक्षया वयं दीनाः. अतः **कृष्णपदवीमस्मदर्थे शंसन्तु** ॥९॥

एवमतिविलापे दीनतायामाविष्कृतायां भूमौ भगवच्चरणारविन्दानि दृष्टानि, तद् भूमिं स्तुवन्ति **किं ते कृतमि**ति.

**किं ते कृतं क्षिति तपो बत केशवांघ्रि-**
**स्पर्शोत्सवोत्पुलकिताङ्गरुहैर्विभासि ।**
**अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा**
**आहो वराहवपुषः परिरम्भणेन ॥१०॥**

हे **क्षिति, ते** त्वया **किं** वा **तपः कृतम्?** अस्माभिरपि तपः कृतमेव, परं नैवं फलमनुभूतम्. सर्वथा पुण्यव्यतिरेकेण नेष्टसिद्धिः, सुतरां भगवल्लक्षणा. स्वस्य तदभावमाशङ्क्य **बते**ति खेदे. न केवलं तव पादसम्बन्धमात्रं किन्त्वन्येऽपि भावा दृश्यन्त इत्याहुः. **केशवस्य** ब्रह्मादेरपि मुक्तिदातुः ब्रह्मप्रार्थितचरणारविन्दस्य **अंघ्रिस्पर्शेन उत्सवो** यस्याः. स्वेदो दृश्यतएव, अन्यथा पदानि स्पष्टानि न भवेयुः. अन्योऽप्युत्सवो दृश्यते, **उत्पुलकिता** च. सर्वत्र दूर्वाङ्कुरा उत्थिता इति **अङ्गरुहैः** रोमाञ्चैः कृत्वा **विशेषेण भासि. उत्पुलकिताङ्गरुहैर्वा अंघ्रिस्पर्शोत्सवा विभासि.** ननु सर्वत्रैव पुलको दृश्यते, यदि केशवांघ्रिस्पर्शेन स्यात् तत्रैकदेशे स्यात् स्वेदवदित्याशङ्क्य हेत्वन्तरमुत्प्रेक्षन्ते **अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वे**ति. **अपी**ति संभावनायाम्. अनेन चरणस्पर्शेन पूर्वस्थितचरणस्पर्शः स्मृतः. स तु सर्वत्र भूमौ व्याप्तः. अतस्तेन **अंघ्रिणा संभवो** यस्य उत्सवस्य. **उरुक्रमः** त्रिविक्रमः, तस्य **विक्रमात्** पदन्यासाद्वेति तत्राप्यनिर्धारः. न हि चरणसंबन्धमात्रेण संभोगरहितेन सात्त्विकभावरूपः उत्सवो रोमाञ्चो भवितुमर्हति. तदर्थं पक्षान्तरमाशङ्कते **आहो वराहवपुषः परिरम्भणेने**ति. अनेन स्वसमानता च वर्णिता ॥१०॥

---

**लेखः**

**किं ते** इत्यत्र **भगवल्लक्षणे**ति, **भगवतो लक्षणं** ज्ञानं यया तादृशी **इष्टसिद्धिश्च**रणप्रतिफलनरूपेत्यर्थः. **अप्यङ्घ्री**ति, **उरुक्रमविक्रमाद्धे**तोर्वा **अङ्घ्रिसम्भव** इत्यर्थः ॥१०॥

एवं स्थावरान् पृष्ट्वा जङ्गमान् पृच्छन्ति **अपीति.**

**अप्येणपत्न्युपगतः प्रियया स्वगात्रै-**
**स्तन्वन् दृशां सखि सुनिर्वृतिमच्युतो वः।**
**कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः**
**कुन्दस्रजः कुलपतेरिह वाति गन्धः ॥११॥**

हे **एणपत्नि** कृष्णसारपत्नि, **प्रियया** कयाचित् लक्ष्म्या अन्यया वा **उपगतः** मिलितः स्त्रीसहितः अनेन मार्गेण गच्छन् **स्वगात्रैः** स्वावयवैः भवतीनां **दृशां सुनिर्वृतिं तन्वन्** दृष्टः कच्चित्? अनेनैव मार्गेण गत इति चरणारविन्ददर्शनात् निश्चीयते. यदि दृष्टो भवेत् तदा अस्माभिरपि द्रष्टुं शक्यत इति. त्वं त्वन्यस्य पत्नी अस्माकं च सखी भवसि. अत आहुः हे **सखीति.** सखित्वं कृष्णानुरक्त्या, नेत्रतुल्यत्वेन भीरुत्वादिधर्मैः, अन्यथा भवतीनां विकसितनयनानि न भवन्तीति. ननु [1]कृतलीलः किमिति प्रार्थ्यते, तत्राहुः **अच्युत** इति. ननु कथं ज्ञायते प्रियया उपगत इति, तत्राहुः **कान्ते**ति. **कान्ताया अङ्गसङ्गे यत्कुचयोः कुङ्कुमं** तेन **रञ्जितायाः कुन्दस्रजः** कुन्दपुष्पमालायाः **गोकुलपतेः** सम्बन्धिन्या **इह गन्धो वाति.** आर्द्रश्च गन्धः आर्द्रं कुङ्कुमं ज्ञापयति. सात्त्विकभावादेवार्द्रता, अतो ज्ञायते प्रियया सङ्गत इति ॥११॥

एवं हरिणपत्नीं पृष्ट्वा इयं भर्तृसमीपे वक्तुमशक्तेति पूर्वं भगवत्स्तुतान् वृक्षान् पृच्छन्ति **बाहुमिति.**

---

**प्रकाशः**

**अप्येणपत्नीत्यत्र भीरुत्वादीत्यादि**पदेन स्वासामिव तासामपि भगवद्गात्रैर्निर्वृतिः, भगवता तथा करणं संगृह्यते. **अन्यथे**ति उक्तप्रकारकदर्शनाभावे ॥११॥

**लेखः**

**अप्येणपत्नी**त्यत्र. दर्शनस्य प्रकरणित्वमभिप्रेत्याहुः **दृष्टः कच्चिदि**ति. **भीरुत्वादि**ति, एतैर्ध**र्मैर्नेत्रतुल्यत्वेने**त्यर्थः. **अन्यथे**ति दर्शनाभावे इत्यर्थः ॥११॥

**बाहुमित्यस्याभासे पूर्वमि**ति द्वादशाध्याये इत्यर्थः. तेषां तरुजन्म-

---

१. क्लृप्तलील इति पाठः.



**बाहुं प्रियांस उपधाय गृहीतपद्मो**
**रामानुजस्तुलसिकालिकुलैर्मदान्धैः ।**
**अन्वीयमान इह वस्तरवः प्रणामं**
**किं वाभिनन्दति चरन् प्रणयावलोकैः ॥१२॥**

**प्रियाया अंसे बाहुमुपधाय** द्वितीयेन हस्तेन **गृहीतपद्मः रामानुजो** निर्भयः **तुलसिकायाः** सम्बन्धिनो ये**ऽलयः** तेषां **कुलैः** कृत्वा **अन्वीयमानः** पश्चाद् गम्यमानः. हे **तरवः.** पूर्वं भगवता भक्तत्वेन स्तुताः, अतो भवद्भिः कृतं प्रणाम**मिहैव किमभिनन्दति** न वेति प्रश्नः. प्रियांसे बाहुमुपधायेति समतया गमनेन लक्ष्यते, उभयोः पदानां पंक्त्याकारेण गमनात्. कदाचित्पदानां

---

**टिप्पणी**

**बाहुं प्रियांस** इत्यत्र **समतया गमनेने**त्यादि. यद्यपि चरणचिह्नादर्शनेऽपि भगवद्भावस्वभावादेव तल्लीलास्फूर्तिः सम्भवति, अत एवालिषु तुलसिकासम्बन्धित्वोक्तिः तदनुसारेणाग्रे गमनाभावश्च, तथाप्यधुना प्रियदर्शनवता ज्ञापितः प्रियः शीघ्रं प्राप्स्यत इति ज्ञात्वा प्रश्नपरा इति, तत्राप्युन्मत्तदृष्टान्तस्योक्तत्वादत्यनवहिता इति चिह्नदर्शनेऽपि तन्मार्गेण न

**प्रकाशः**

**बाहुं प्रियांसे**त्यत्र टिप्पण्याम् **अग्रे गमनाभावश्चे**ति, देशान्तरे भगवद्गमनाभावः, **चोऽप्यर्थे**, ज्ञानविषयतया सम्भवतीति शेषः. एतासामेव वा. **तत्रापी**ति भगवद्भावानुभावेन लीलास्फूर्तावपि. इदम् **अनवहिता** इत्यनेन योज्यम्. ननु तीक्ष्णभावशान्त्यर्थमेव चेत्पददर्शनं किमित्यग्रे तत्र-

**लेखः**

वृत्तान्तकथनेन **तरु**पदेन तेषामेवोपस्थितिरिति भावः. व्याख्याने **समतये**त्यस्य टिप्पण्यां **यद्यपी**त्यादि. **इति** हेतोश्चरणचिह्नानां समत्वादीनां दर्शनं हेतुत्वेन न वक्तव्यं, **तथाप्यधुना** तादृश**ज्ञापितः प्रियो** भगवद्भावकृतलीलास्फूर्त्या तत्र गमनेन प्रियप्राप्त्यपेक्षया **शीघ्रं प्राप्स्यत इति ज्ञात्वा** तं प्रकारमवगणय्य **प्रश्नपरा**एव जाता इत्याशयेन अत्यनवहितत्वा**च्चिह्नदर्शनेऽपि तन्मार्गेण न गताः**, अतो यथार्थज्ञानाभावादुत्प्रेक्षारीत्यैव तज्ज्ञान**मित्याशयेन चाचार्यैरेवमुक्तमि**ति अग्रेतनेनान्वयः. तीक्ष्णभावशान्त्यर्थमत्र पददर्शनं भगवता कारितं न तु तद्भगवदावेशकार्यमतोऽत्र न सर्वलीलास्फूर्तिः, तादृशं तु "व्यचक्षत

चाञ्चल्येन भ्रमरोपरुद्धगत्या तन्निवारणार्थं यत्नो लक्ष्यते. तरवश्च नम्राः, नमस्कारार्थमेव फलोपहारं कृत्वा भूमिसम्बद्धशिरसो जाताः, अतो ज्ञायते प्रणामः कृत इति. अनुत्थानात्संदेहः **अभिनन्दति न वेति**. अनभिनन्दने हेतुः **चरन्निति**, यो हि गच्छति सः अनवहितोऽपि भवति. ननु निकटएव स गच्छति; यद्यभिनन्दनं कृतं स्यात् तदेव श्रूयेत, कथं संदेह इति चेत्, तत्राहुः

**टिप्पणी**

गताः. किञ्च यथा सहभूताया अपि स्वामिन्याश्चरणचिह्नादर्शनं पूर्वं पश्चाच्च दर्शनं तथेहाप्येकत्रैकदा पददर्शनं, नाग्रे, तीक्ष्णभावशान्त्यर्थमेव पदचिह्नानां दर्शितत्वात्तस्य च तावतैव शान्तेः. अग्रे तु भगवदावेशकार्यत्वेन वक्ष्यत इत्याशयेनाचार्यैरेवमुक्तम्. पदचाञ्चल्यज्ञापितालिनिवारणयत्नेनैव गृहीतपद्मत्वं ज्ञाप्यते, तेनाञ्जसा तदपीडनेन च तत्सम्भवात्. मदस्य संगाभावहेतुत्वमनुभूयते. तेषां च समदानामपि संगे मर्यादामार्गीयभक्तिरसजनितएव मदो भवितुमर्हतीति तुलसीसंबन्धकथनम्. अनवसरेऽपि गमनान्मदान्धतोक्ता. एवं रसासक्तस्येतरानुसन्धानासम्भवात् स्वमिलनं दुर्लभं जानन्ती तरुप्रणामं चेदनुसन्धास्यत्यस्मिन्नपि समये तदास्मानपि कदाचिदनुसन्धास्यतीत्याशयेन प्रश्नं चक्रे. अन्यथाऽलीनामन्धत्वनिरूपिकायास्तरुप्रणत्यभिनन्दनं प्रश्नोऽनुपपन्नः स्यादिति भावः ॥१२॥

**प्रकाशः**

दर्शनमित्यत आहुः **अग्रे त्वित्यादि**. **एवमुक्तमिति** अत्र ज्ञापकान्तरमुक्तम्. **तेनेत्यादि**, पद्मेन सामस्त्येन तदपीडया चालिनिवारणसंभवादित्यर्थः. **मर्यादामार्गीयभक्तिरसेति** कामरहितभक्तिरसेत्यर्थः ॥१२॥

**लेखः**

वनोद्देशे" इत्यत्र भगवदावेशे वक्ष्यते इत्याशयेन [१]चैवमुक्तमित्याहुः **किञ्चेति**. आधुनिकपददर्शनस्य भगवदावेशजत्वाभावं व्युत्पादयन्ति **यथेति**. तत्र तत्पददर्शनं कादाचित्कत्वान्न भगवदावेशजसार्वज्ञ्यकृतं तथात्र भगवत्पददर्शनमपीत्यर्थः. तादृशं त्वग्रे वक्ष्यते इत्याहुः **अग्रेत्विति**. **मर्यादामार्गीयेति**, पुष्टिमार्गीयमदः केषांचिदेव भवति, "स्त्रीत्वं च तेषु दद्यात् यद्गानज्ञमुनीनपी"ति वाक्यात्. अतस्तादृशमदे कुलत्वं न वदेत् स्त्रीत्वं च वदेदिति भावः ॥१२॥

१. जो. पाठमनुसृत्य, आशयेनैवम् इति मुद्रितः पाठः.



**प्रणयावलोकैरिति**, प्रणयपूर्वकमवलोकैः, न तु वाचा. अतो ये निकटस्थाः तएव जानन्ति नान्ये ॥१२॥

ते ज्ञानिनो वृक्षाः स्त्रीभिः सह सम्भाषणं न करिष्यन्तीति तत्पत्न्य एव प्रष्टव्या इत्याहुः **पृच्छतेमा लता** इति.

**पृच्छतेमा लता बाहूनप्याश्लिष्टा वनस्पतेः ।**
**नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥१३॥**

**वनस्पतेर्बाहुनाश्लिष्टा अप्येताः पृच्छत** यद्यपि तासामप्यनवसरः. ताश्च पुनर्भर्तृभुजालिङ्गिता अपि भगव**त्करजै**रेव नखैः **स्पृष्टाः** सत्यः **उत्पुलकानि बिभ्रति**. न हि रसान्तराविष्टानां रसान्तरार्थं स्पृहा भवति, अतएव ज्ञायते सर्वोपमर्दी भगवत्सम्बन्धी रस इति. एवं सर्वेषामेवावचने मूर्छिता इव जाता इति एतदन्ता प्रश्नकथा. नवविधा एता गोप्यो निरूपिताः. दशमी तु भगवता नीयते. एवमन्वेषणेन रसस्थैर्यं निरूपितम् ॥१३॥

एवं तिरोधानेन जाततापनिवारणार्थं यत्नो निरूपितः. एतदुपमर्दिका भगवल्लीला प्रादुर्भूता. तस्या विलासं वक्तुं पूर्वोपसंहारपूर्वकमुपक्रमते **इतीति**.

**॥ श्रीशुक उवाच ॥**

**इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः ।**
**लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः ॥१४॥**

**इति**शब्दः प्रकारवाची, एवंप्रकारेण प्रश्नायोग्येऽपि प्रश्नकरणादुन्मत्त-

**प्रकाशः**

इतीत्यस्याभासे **एतदुपमर्दिकेति** तापोपमर्दिका. **प्रथमस्यापगम** इति,

**लेखः**

**पृच्छतेमा** इत्यत्र. **दशमी त्विति**. अधुना सङ्गस्थायाएव दशमो भावो न त्वेतासु कस्याश्चिदपि, अग्रे त्वत्रापि स भावो वक्ष्यते इति भावः. उपसंहरन्ति **एवमिति**. **रसस्थैर्यं** रसासक्तिरित्यर्थः. कार्यलक्षणनिरूपणेन कारणं लक्ष्यं निरूपितं जातमिति प्रतिज्ञात[१]लक्षणतो रसासक्तिनिरूपणं सिद्धमिति भावः ॥१३॥

कार्यकारणभावमुपपादयन्ति **एवमिति**. तापस्तु रसासक्त्यैव भवतीति

१. इति ज्ञान° इति जो. पाठः.

वाचो **गोप्यो** जाताः. **कृष्णस्यान्वेषणे कातरा** अपि दीना अपि जाताः. तनुर्वाक् श्रान्ता, मनसि तु त्रयो वर्तन्त इति प्रथमस्यापगमे द्वितीय आविर्भूत इत्याह **लीला** इति. **भगवतस्तास्ताः** पूर्वमुक्ताः कृताश्च **तदात्मिकाः** सत्यः **अनुचक्रुः**. **उन्मत्तवच** इति छान्दसो ह्रस्वः. अथवा. **इति** पूर्वोक्त**मुन्मत्तवचः** एतावदिति, ततो **गोप्यः कृष्णान्वेषणार्थं कातरा** जाता इति. **भगवतो लीलाः** षड्विधाः स्वाभाविक्यस्तासामपि भेदाः **तास्ताः**. **(हि!)** युक्तश्चायमर्थः भगवति हृदि समाविष्टे लीलाभिः सहिते– यदा यदा भगवानवतरति तदा तदा पूतनासुपयःपानादिकं करोति, तथैव संवत्सरलीलायां पुरुषोत्तमादिषु प्रसिद्धिः. एतासामपि मनसि आविर्भूतेन कर्तव्यं तत्साक्षात्कर्तुमशक्यमिति भावनयैवाविर्भूत इति अनुकरणमात्रं कृतवत्यः ॥१४॥

भक्त्यातिमत्तास्तद्भावमीषन्मत्तास्तु रोषतः ॥(८)॥
द्वेषभावं समाश्रित्य क्रीडन्त्यो जातमत्सराः ।

---

**टिप्पणी**

**लीला भगवतस्तास्ता** इत्यस्याग्रे **भक्त्यातिमत्ता** इत्यादि. एतासां प्रिये स्नेहसाम्येऽपि क्वचिद् भगवद्भावे क्वचित्पूतनादिभावे हेतुमाहुः **भक्त्ये**त्यादि. नायिकाभेदेन हि भावभेदः. एकस्या अपि समयादिहेतुभेदेनापि तथा. एवं सति भगवत्तल्लीलातत्सम्बन्धिनां मध्ये यस्या यदा यादृग्रूपस्य यस्य स्मृतिस्तस्यास्तदा तदात्मकत्वं विशुद्धभावत्वाज्जलादिसम्बन्धिस्फटिकस्येवेति प्रघट्टकार्थः. तथा च भगवन्मात्रज्ञानमतिमत्तत्वम्. तत्सम्बन्धिनामपि ज्ञानमीषन्मत्तत्वम्. लीलासम्बन्धिनां येषां ये भावास्तदात्मकतायां ते भावा अपि स्वतएव भवन्तीति ज्ञापनाय **रोषत** इत्यादिना तदुद्देशः कृतः. भावेषु दृष्टान्तेन वैजात्यज्ञापनाय **सत्त्वाद्यु**क्तिः (८-९).

**प्रकाशः**

ज्वालापगमेन वह्नेरिव प्रश्नान्वेषणरूप-यत्नतिरोधानेन रसासक्तेस्तनुवाग्भ्यां तिरोधान इत्यर्थः. **उक्ताः कृताश्चे**ति, प्रमाणादिप्रकरणीयाः फल-प्रकरणीयाश्चेत्यर्थः ॥१४॥

**लेखः**

भावः. **लीला भगवत** इत्यत्र **कृताश्चे**ति, पूर्वमनुक्ता अपि भगवता कृताः "कस्यांचित् स्वभुजं न्यस्ये"त्यनेनोक्ता इत्यर्थः ॥१४॥



सत्त्वादिगुणभावेन नवलीलाः प्रपेदिरे ॥(९)॥
अतो न न्यूनभावोऽत्र ह्याविष्टाः शकटादिभिः ।

---

**टिप्पणी**

ननु तथापि भगवज्ज्ञानं विहाय पूतनादिज्ञानं यत्र तत्र ततो न्यूनभावता गम्यते, तत्र हेतुरपि वक्तुं न शक्य इत्यरुच्या पक्षान्तरमाहुः **अतो न न्यूनभाव** इति. **हि** यस्माद्धेतोः **शकटादिभिराविष्टा अतो न न्यून**तेत्यर्थः. अत्रैवं ज्ञेयम्. अत्र ताप-लीला-भगवताम् अन्योन्योपमर्दकभावेना-विर्भाव इति पूर्वमुक्तम्. सपदि तु लीलाया आविर्भाव एतासूच्यते. सा

**लेखः**

**नवलीला** इति, तथाच लीलाभेदेऽपि एकैकस्मिन् श्लोके उक्ता एकैकविधा इत्यर्थः (९).

**योजना**

**कस्याश्चित् पूतनायन्त्या** इत्यादिलीलानुकृतितात्पर्यकथने **भक्त्याति-मत्तास्तद्भावमि**त्यादिकारिकास्तासामर्थष्टिप्पण्यां स्फुटः (८-१०).

**कारिकार्थः**

**इत्युन्मत्तवचो गोप्य** इत्यत्र **भक्त्यातिमत्ता** इत्यादि. याः **भक्त्यातिमत्ताः** ताः **तद्भावं** "कृष्णोहं पश्यत गतिमि"ति प्रकारेण भगवद्भावं प्राप्ताः. **ईषन्मत्तास्तु** "कस्याश्चित् पूतनायन्त्या" इत्यादिप्रकारेण पूतनादिभावं प्राप्ताः. तदुक्तं टिप्पण्यां "भगवन्मात्रज्ञानमतिमत्तत्वं तत्सम्बन्धिनामपि ज्ञानमीषन्मत्तत्वमि"ति. लीलासम्बन्धिनां येषां ये भावाः तदात्मकतायां ते द्वेषादिभावा अपि स्वतएव भवन्तीति ज्ञापनायाहुः **रोषत** इति. भावेषु वैजात्यज्ञापनाय उक्तं **सत्त्वादिगुणभावेने**ति. यद्यप्यत्र लीला बहुविधाः तथापि नवसु श्लोकेषु एकैकस्मिन् श्लोके उक्ता एकैकविधा विवक्षिता इति **नवलीला** इत्युक्तम् (८-९).

अथवा सर्वासां तुल्यत्वमेवेत्याशयेन पक्षान्तरमाहुः **अतो न न्यूनभावोऽ-त्रे**ति. **हि** यस्माद् हेतोः **शकटादिभिराविष्टा अतो न न्यून**तेत्यर्थः. तथा च भगवद्भाववत्याः पूतनादिभाववतीनां च तुल्यत्वमेवेत्यर्थः. पक्षान्तरमाहुः भगवद्भावापन्नायाः सकाशात् पूतनोलूखलादिभावापन्ना उत्कृष्टा इति ज्ञापनाय **सर्वत्र हरिबुद्ध्या वे**ति. कथंचिदपि चरणारविन्दस्पर्शेच्छया

सर्वत्र हरिबुद्ध्या वा पादस्पर्शेच्छया पुनः ॥(१०)॥
उलूखलादिभावोऽपि तत्सम्बन्धप्रसिद्धये ।

**टिप्पणी**

च भगवत्कृतितत्सम्बन्ध्यात्मिका विशिष्टा, न त्वन्यतरमात्ररूपा. तथा च यदंशो यत्राविर्भूतस्तत्र स एवांश उच्यते, अन्यथा पूतनासुपयःपानसामयिकदशापन्नभगवत्स्वरूपभावापन्नैव पूतनायन्त्याः स्तनं कथं पिबेत्? पूतनायन्ती च तस्यामेव पूतनावत् कथमाचरेत्? अतो न क्वापि कुतश्चिन्न्यूनतेति सारम्. अस्मिन्पक्ष एका लीला यत्राविर्भूता तत्र न द्वितीयेति सिध्यति. तथा सति चिरं विलासोऽयं न स्यादिति पक्षान्तरमाहुर्भगवद्भावापन्नायाः सकाशात् पूतनोलूखलादिभावापन्ना उत्कृष्टा इति ज्ञापनाय **सर्वत्रे**ति. अत्युत्कटविरहभावेनातिदीनतया कथञ्चिच्चरणसम्बन्धं वाञ्छन्त्यो यत्र तत्सम्बन्धः पूर्वमनुभूतोऽस्ति तद्वदाचरन्ति. मयि चेन्न चरणं स्थापयति तदा पूतनोलूखलादिबुद्ध्यापि वा स्थापयत्विति भावेन अत्यार्त्यैव सर्वत्र भगवद्बुद्धिः. अतस्तस्य प्रकर्षेण सिद्ध्यर्थं तथेत्यर्थः. **पुनरि**ति पदादेकस्यां लीलायामनुकृतायामप्युक्तरीत्यात्यार्तौ **पुनरुलूखलादिभावोऽपि** भवतीति ज्ञाप्यते. एवं सति भावप्राचुर्यादत्रोत्कर्षः सिद्ध इति भावः (१०½).

**प्रकाशः**

**आविष्टा** इत्यादि. ननु "लेभे गतिं धात्र्युचितामि"त्यादिवाक्यैः पूतनादीनां मुक्तिकथनाच्छकटाद्यावेशकथनमत्र कथं सङ्गच्छत इत्याशङ्का तु टिप्पण्यां **सा च भगवत्कृतितत्सम्बन्ध्यात्मिका विशिष्टे**ति लीलास्वरूपकथनादपनेया, भगवल्लीलानां नित्यत्वेन तासु भगवद्वीर्यरूपाणामाधिदैविकासुराणां सम्बन्धितया प्रवेशेन मुक्तिवाक्यस्य च तदाविष्टजीवविषयत्वे[1] वा भिन्नविषयत्वेनाविरोधात् (१०).

**कारिकार्थः**

पूतनोलूखलादिभावः इत्यर्थः. "मयि चेत् चरणं न स्थापयति तदा पूतनोलूखलादिबुद्ध्यापि स्थापयतु" इति भावेन तद्वदाचरन्ति. अत्यार्त्यैव सर्वत्र भगवद्बुद्धिरतो भगवच्चरणारविन्दसम्बन्धस्य प्रकर्षेण सिद्ध्यर्थं पूतनादिभावः इत्यर्थः (१०½).

१. तदाविष्टलीलाविषयत्वे इति मुं. वि. पाठः.



**कस्याश्चित्पूतनायन्त्याः कृष्णायन्त्यपिबत्स्तनम् ।**
**तोकायित्वा रुदत्यन्या पदाहन् शकटायतीम् ॥१५॥**

प्रथमतो भगवच्चरित्रं पूतनासुपयःपानमिति काचित्पूतना भूता जाता, अन्या "अहं कृष्ण"इत्युक्तवती, तदा तामङ्के भगवद्बुद्ध्या अगृह्णात्. ततस्तस्याः **पूतनायन्त्याः कृष्णायन्ती स्तनमपिबत्.** तस्यास्तु मरणभावना न स्थितेति सा न मृता नाप्यनुकरणं कृतवती. कृष्णायन्ती च स्तनमात्रमेव पिबति अलौकिकसामर्थ्याभावाद् इति स्तनपानमात्रमुक्तम्. अमङ्गलतानिवृत्तये च शकटभङ्गलीलामाह **तोकायित्वे**ति, तोकवदाचरति, आत्मानं तोकं मन्यते वा, तोकवदात्मानं कृत्वा वा **शकटायतीं** शकटवत् स्थिताम् **अहन्** ताडितवती ॥१५॥

तृणावर्तलीलामाह

**दैत्यायित्वा जहारान्यामेका कृष्णार्भभावनाम् ।**
**रिङ्गयामास काप्यंघ्री कर्षन्ती घोषनिःस्वनैः ॥१६॥**

**टिप्पणी**

**कस्याश्चित्पूतनायन्त्या** इत्यत्र **अन्या "अहं कृष्ण" इत्युक्तवती**ति. यद्यप्यत्रोक्तिप्रयोजनं नास्ति, पूतनासुपयः[1]पानदशायामुक्तिप्राकट्याभावाच्च नैवं सम्भवति, तथापि यदा तदा "पूतना मां गृह्णात्वन्यथा तु कार्यं न भविष्यती"ति भगवदिच्छा स्थिता, तथा "कृष्णत्वेनेयं मां जानात्वि"ति कृष्णायन्त्या अपि तदेच्छासीदिति ज्ञापनपरा तदुक्तिरिति ज्ञेयम्. **तस्यास्त्वि**त्यादि, अत्र मुख्योपपत्ति**र्भावनयैवाविर्भूते**त्यादिना पूर्वमेवाचार्यैरुक्तेति सर्वमवदातम् ॥१५॥

**लेखः**

**कस्याश्चिदि**त्यत्र. **तस्यास्त्वि**ति, पूतनाया मया मर्तव्यमिति भावना न स्थितेत्यर्थः. **तोकायित्वे**त्यत्र, आद्यपक्षे "कर्तुः क्यङ् सलोपश्चे"ति क्यङ्, तोकवदाचरित्वेत्यर्थः. अग्रे पक्षद्वये प्रातिपदिकाद् धात्वर्थे बहुलमिष्टवच्चेति णिच्. **तोकवदि**त्यर्थकथनम्, विग्रहस्तु तोकं मन्यते तोकं करोति वा तोकयति, **आत्मानमि**त्यर्थात्. मूले ककारस्य छान्दसो दीर्घः. तथा चात्मानं तोकायित्वा तोकं मत्वा तोकं कृत्वा वेत्यर्थः ॥१५॥

१. पूतनासुपान° मू. पा.

**दैत्यायित्वे**ति, दैत्यवदात्मानं कृत्वा कृष्णस्यार्भं बाल्यं भावयन्ती **कृष्णार्भभावनां** ता**मेका** आत्मानं **दैत्यायित्वा जहार. काऽपि अंघ्री कर्षन्ती घोषनिःस्वनैः रिङ्गयामास** चलितवती, यथा बाल्ये मुग्धप्रभीतवत् घोषप्रघोषरुचिरं भगवान् गच्छति. पूर्वश्लोके चतस्र उक्ताः लीलाद्वयेन, तास्तामसतामस्यः. अत्र तिस्रएव राजसतामस्य इति चरित्रलीलायामुक्ता विशेषा अत्राप्यनुसंधेयाः. अथवा. युगलास्तिस्रो निरूपिताः, गुणातीता त्वेका. पुनः प्रकारान्तरेण बह्व्यः एकभावमापन्नाः भगवदिच्छया प्रधानगुणभावं प्राप्य रजसा अनेकधा विक्षिप्ताः बहुरूपा जाताः ॥१६॥

वृन्दावनक्रीडायां वत्सपालकरूपा जाताः. तत्र प्रकारमाह **कृष्णे**ति.

**कृष्णरामायिते द्वे तु गोपायन्त्यश्च काश्चन ।**
**वत्सायतीं हन्ति चान्या तत्रैका तु बकायतीम् ॥१७॥**

---

**प्रकाशः**

**कृष्णरामायित** इत्यत्र. ननु वत्सपाललीलायां बालकाएव सङ्गे

**योजना**

**रिङ्गयामास काप्यंघ्री** इत्यस्य विवृतौ **पूर्वश्लोके चतस्र उक्ता लीलाद्वये** इति. "कस्याश्चित्पूतनायन्त्या" इति श्लोके चतस्रो गोपिका उक्ता– पूतनायन्ती कृष्णायन्ती तोकायन्ती शकटायन्ती चेति. **लीलाद्वये** इति, पूतनामारणशकटभंजनाख्ये लीलाद्वय इत्यर्थः. **अत्र तिस्र एवे**ति, **दैत्यायित्वे**तिश्लोके दैत्यायन्ती कृष्णार्भभावना च रिंगणकर्त्री चेति तिस्र एवेत्यर्थः. **अथवा युगलास्तिस्रो निरूपिता** इति. पूतनायन्ती कृष्णायन्ती चेत्येकं युगलम्, तोकायन्ती शकटायन्ती चेत्येकं युगलम्, दैत्यायन्ती कृष्णार्भभावना चेत्येकं युगलमेवं युगलत्रयं वर्तते यासां ता**स्तिस्रो युगलाः**, 'युगल'शब्दा"दर्शआद्यच्." तथा च युगलास्तिस्रः सगुणा इत्यर्थः. **गुणातीता त्वेके**ति, रिंगणकर्त्री गुणातीतेत्यर्थः. **पुनः प्रकारान्तरेण बह्व्यः** इत्यारभ्य **बहुरूपा जाता** इत्यन्तम्. **एकभावमापन्ना** इति, गोपालकरूपा बह्व्यो जाता इत्यर्थः. **प्रधानगुणभावं** कृष्णबलदेवभावं गोपिके द्वे प्राप्ते. **रजसा अनेकधा विक्षिप्ता बहुरूपा जाता** इति. शृङ्गाररससम्बन्धिना रजोगुणाख्येन भावविशेषेण विक्षिप्ता बहुरूपा गोपालकरूपेषु बहुरूपा जाताः, श्रीकृष्णरूप-बलदेवरूप-गोपबालकरूपभेदेन गोपरूपेषु बहुत्वात् ॥१६॥



द्वे **कृष्णरामायिते** कृष्णरामवत् जाते, **काश्चन गोपायन्त्यः. गोपा** अत्र बालकाः, जातिशब्दोऽयम्. वत्सरूपाश्च काश्चन जाताः **च**कारेण समुच्चिताः. **अन्या पुनर्वत्सायिता** वत्सासुरवदाचरति तां घ्नती च जाता, कृष्णायिता अर्थात्. **च**कारात् फलानि पातयन्ती च. अन्या पुनः **बकायन्तीं** घ्नती जाता. वत्सवधो लोके बलभद्रकृत इत्यपि प्रसिद्धः– "प्रलम्बो निहतोऽनेन वत्सको धेनुकादयः." अत उभयोर्मध्ये एका बकायतीम्, अन्या वत्सायतीम् ॥१७॥

ततः परं गोपरूपेण वृन्दावनलीलामाह **आहूये**ति.

**आहूय दूरगा यद्वत् कृष्णस्तमनुकुर्वतीम् ।**
**वेणुं क्वणन्तीं क्रीडन्तीमन्याः शंसन्ति साध्विति ॥१८॥**

गोरूपाः काश्चन जाताः, गोपालरूपाः काश्चन. तत्र **यद्वत् कृष्णः दूरगाः** गाः **आहूय** वेणुक्वणनं करोति, एवं **दूरगा** गोपी**राहूय तं** कृष्ण**मनुकुर्वती** काचित् जाता. तां **वेणुं क्वणन्तीं** ततो नानाविधक्रीडां कुर्वतीम् **अन्याः** गोपायिताः साधु**साध्विति शंसन्ति** ॥१८॥

एका पुनः क्रीडायां कृतापि लीला भागवते अनुक्ता तां भावयित्वा तादृशीं लीलां कृतवती, तदाह **कस्याश्चिदि**ति.

**कस्याश्चित् स्वभुजं न्यस्य चलन्त्याहापरा ननु ।**
**कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः ॥१९॥**

अत्रापि पूर्ववद् युगलास्तिस्रः, चतुर्थ्येषा– कृष्णरामायिते द्वे युगले, साध्वाशंसनसहिता वेणुनादनपरा च तृतीया, एषा तु निर्गुणा. **कस्यांचित्**

---

**प्रकाशः**

सन्तीति 'बालायन्त्य' इति वक्तव्ये **गोपायन्त्य** इति कथमुक्तमित्याकांक्षायामाहुः **गोपा** इत्यादि. तत्रोपपत्ति**र्जाती**त्यादि ॥१७॥

**लेखः**

**आहूये**ति श्लोके "अघगम्भीरये"ति श्लोकोक्ता लीला ज्ञेया ॥१८॥

**योजना**

**कस्यांचित्स्वभुजं न्यस्ये**त्यस्य व्याख्याने **अत्रापि पूर्ववत् युगलास्तिस्र** इति. **अत्रापी**ति, "कृष्णरामायिते" इत्यारभ्य **ललितामिति तन्मना** इत्यन्तेन वृन्दावनलीलाकथनप्रसंग इत्यर्थः. **पूर्ववत् युगलास्तिस्र** इति, "कस्याश्चित्पूत-नायन्त्या" इत्यादिना निरूपितयुगलवद् युगलास्तिस्र इत्यर्थः. तत्र

गोपरूपायां **स्वभुजं** स्थापयित्वा **चलन्ती. अपरा** गोपरूपा अतोऽन्या. **ननु** हे गोप्यः **अहं कृष्णः, मे ललितां गतिं पश्यते**ति. दोषाभावार्थमाह **तन्मना** इति. पूर्वं कायिकीं चेष्टां केवलां कृतवती, इदानीं वाचा सहिताम् ॥१९॥

पुनः प्रकारान्तरेण चातुर्विध्यमाह **मा भैष्टे**ति.

**मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया ।**
**इत्युक्त्वैकेन हस्तेन नयन्त्युन्निदधेऽम्बरम् ॥२०॥**

एषैव निर्गुणा. काश्चन गोगोपगोपीरूपा जाता वृष्टिभीता इव. तदा **वातवर्षाभ्यां** हेतुभूताभ्यां **मा भैष्ट, मया तत्त्राणं विहितम्** इत्युक्त्वा **एकेन हस्तेन अम्बरं नयन्ती** पर्वतवत् स्थापयन्ती ऊर्ध्वं **निदधे** गोवर्धनवद् धारितवती. **यतन्ती** प्रयत्नं कुर्वन्ती वा ॥२०॥

सात्त्विक्याश्चेष्टामाह **आरुह्ये**ति.

---

**लेखः**

**मा भैष्टे**त्यत्र. **हेतुभूताभ्या**मिति भयहेतुभूताभ्यामित्यर्थः ॥२०॥

**योजना**

"कृष्णरामायिते"इत्यनेन श्रीकृष्णबलदेवौ निरूप्य "वत्स्यायतीं घ्नती चान्या तत्रैका तु बकायतीमि"त्यनेन श्रीकृष्णकृतबकमारणलीला-बलरामकृत-वत्समारणलीलोक्ता. अतः श्रीकृष्णरूपा एका अपरा बकरूपेत्येकं युगलम्. बलरामरूपा एका अपरा वत्सरूपेत्येकं युगलम्; इत्थं युगलद्वयम्. तदाहुः "कृष्णरामायिते द्वे युगले" इति. "आहूय दूरगा यद्वदि"ति श्लोके दूरगगवाह्वान-वेणुक्वणन-क्रीडन-कर्त्री कृष्णरूपा एका साध्वाशंसनकर्त्री एकेत्येकं युगलम्, इत्थं तिस्रो युगलाः. युगलं विद्यमानं यासां ता युगला इत्यत्र अर्शआद्यच्. यद्यपि "आहूय दूरगा" इति श्लोके गोरूप-कृष्णरूप-गोपरूपेण त्रित्वं वक्तुमुचितं तथापि गवाह्वानलीलाकर्तृत्वेन एको भगवान् विवक्षितस्तन्मध्ये [१]गोपरूपाणामभिनिवेशादित्यर्थः. **साध्वाशंसनसहिता वेणुवादनपरा च तृतीये**ति, **वेणुवादनपरा** गोपी श्रीकृष्णरूपधारिणी **साध्वाशंसनकर्त्रीभि**र्गोपरूपाभिः **सहिता** तृतीया तृतीययुगलसाधिकेत्यर्थः. **एषा त्विति, कस्यांचित्स्वभुजमि**त्यत्रोक्ता कृष्णरूपा गुणातीतेत्यर्थः ॥१९॥

---

१. गोरूपाणाम् इति मुं. वि. पाठः.



**आरुह्यैकां पदाक्रम्य शिरस्याहापरां नृप ।**
**दुष्टाहे गच्छ जातोऽहं खलानां ननु दण्डधृक् ॥२१॥**

**एकामारुह्य पदा** च **आक्रम्य शिरसि** पादाघातं कृत्वा. **नृपे**ति सम्बोधनं विश्वासाय, एषा लीला कठिना. उपरि वृक्षशाखामवलम्ब्य वा तथा कृतवती. [१](वस्तुतस्तु या लीला यथा प्रभुणा कृता सा तथैवात्राविर्भवति इति निरालम्बनत्वेऽपि नानुपपत्तिः.) हे **दुष्टाहे** कालिय, इतो **गच्छ,** यतोऽ**हं खलानां दण्डधृक् जातः. ननु** इति सम्बोधनं अमारणार्थम् ॥२१॥

**तत्रैकोवाचे**ति.

**तत्रैकोवाच हे गोपा दावाग्निं पश्यतोल्बणम् ।**
**चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममञ्जसा ॥२२॥**

राजसी पुन**स्तत्रैका** जाता, **उवाच** च वक्ष्यमाणम्. गोरूपाः काश्चन, गोपरूपास्तथापराः. एका तु कृष्णरूपा आह **हे गोपा उल्बणं दावाग्निं पश्यते**ति. विरहेण दावाग्निं दृष्टवती, भावनया वा तथा भानम्. सर्वापि क्रीडा भगवद्रूपा तत्र तत्राविशतीति दावाग्नेरपि दर्शनम्. अन्यासां विशेषाकारेण तस्यां भगवद्भावाभावात् न तत्प्रार्थना. एवमेव वातवर्षस्थलेऽपि. अतिमत्तानामेव भगवद्भावेन तल्लीलावेशात् तस्य(स्याः!) एव दर्शनमिति निष्कर्षः ॥२२॥

---

**टिप्पणी**

**तत्रैकोवाचे**त्यत्र **विरहेण दावाग्निं दृष्टवती**त्यादि. अत्रेदमाकूतम्. भगवता यदेयं लीला कृता तदा पूर्वं गोपैर्दावाग्निर्दृष्टः ततः प्रार्थितः प्रभुः, अत्र कथं तद्वैपरीत्यमुच्यत इति शङ्कानेन निरस्यते. अतिविगाढभाववत्या एव भगवद्भावो भवति तादृश्याएव च हृदये विरहाग्निः प्रकटो भवतीति सैव स्वामिनी तं[२] दृष्टवती. तदेतदुक्तं **विरहेणे**त्यादिना. तदा पूर्वं ततः पालनमेव कृतमित्यधुनापि स्वामिन्या रक्षैव सम्पन्नेति भावः. अथवैतस्या एवैतल्लीलाभावनाभूदिति सैवोक्तवतीत्याहु**र्भावनया वे**ति ॥२२॥

**प्रकाशः**

**बद्धान्ययेत्यत्र**. ननु पूर्वं भगवता पूतनासुपयःपानं ततः शकटभङ्गादिश्च कृत इति तेन क्रमेण पूर्वा लीला उक्त्वा अत्र गोवर्धनोद्धरणादिलीलासु

---

१. ( ) चिह्नान्तर्गतं प्रभूणाम्. २. तम् इति मूलपाठे नास्ति.

तामसीमाह **बद्धेति.**

**बद्धान्यया स्रजा काचित् तन्वी तत्र ह्युलूखले।**

**भीता सुदृक् पिधायास्यं भेजे भीतिविडम्बनम् ॥२३॥**

**उलूखले** कयाचिद् **बद्धा स्रजा** मालया, उलूखलस्थानीयापि काचित्. अन्या तु यशोदारूपा. तदा **भीता** सती **सुदृक्** उत्तमदृष्टियुक्ता **आस्यं पिधाय** हस्तेन सम्पूर्णं मुखमाच्छाद्य **भीत्यनुकरणं भेजे.** अत्र क्रमे गुणाएव प्रयोजकाः. तत्तदधिकारानुसारेण तत्तल्लीलाः प्रादुर्भवन्ति. भगवद्वशीकरणान्ता च लीला, अन्यथान्ते उलूखललीला न कृता स्यात्. नातः परं कर्तव्यमस्तीति लीलाया विरतिः. एवं लीलाभावमुपपाद्य भगवद्भावे वक्तव्ये भगवतो भीति-विडम्बनलीलायां सर्वा लीलास्तिरोहिताः. ततः पूर्ववत् पुनः प्रश्न एव स्थितः, तस्य संवेदनपूर्वकत्वात्. एतत्त्वावेशेन जातमिति संवेदनराहित्यम्[1], अतस्त्वस्य नोपसंहारः ॥२३॥

पूर्वं तु "इत्युन्मत्तवच"इति वचनमेवोपसंहृतं, न तु प्रश्न उपसंहृतः.

**प्रकाशः**

किमिति स क्रमो नोक्त इत्याकांक्षायामाहुः **अत्र क्रम** इत्यादि **विरतिरित्यन्तम्.** तथा च अनुक्रियमाणलीलाक्रमे चित्तजानां गुणानामेव प्रयोजकत्वात्तदधिकारा-नुसारिभावनया तत्तल्लीलाप्रादुर्भावात्तासां च भगवद्वशीकरणमेव फलं, यतो वशीकृतएव पदानि दर्शितवानिति वक्तुमत्रैवं कथनं; भगवदिच्छयै-वारब्धक्रमत्यागश्चेत्यर्थः ॥२३॥

**एवं कृष्णमित्यस्याभासे वचनमेवेत्यादि,** एतेनात्रत्यः **पृच्छमाना**

**योजना**

**बद्धान्यया स्रजेत्यत्र भगवद्वशीकरणान्ता च लीलेति.** साधनानां परमकाष्ठा तु तदैव सिध्यति यदा भगवान् स्ववशे भवतीति पुष्टिभक्तिमार्गव्यवस्था. सा चास्य लीलायां सिद्धेति नातः परं किञ्चित्कर्तव्यमतो लीलानां तिरोभावः. साधनत्वेनाविर्भूय कृतार्थीभूताः अतः प्रयोजनाभावा-त्तिरोभूता इत्यर्थः. एतावता भगवति वशीभूते पुष्टिभक्तिस्वरूपं सिद्धं, "कृष्णाधीना तु मर्यादा स्वाधीना पुष्टिरुच्यते" इति निबन्धाद्, "यथा दामोदरलीलायां सा पुष्टिरि"ति व्याख्यानाच्च ॥२३॥

१. संवेदनरहितमिति पाठः.



अत इदानीं मध्ये लीलामुक्त्वा तस्यास्तिरोधाने पुनरेव वृन्दावनलतास्तरून् कृष्णं पृच्छमाना जाता इत्याह **एवमिति.**

**एवं कृष्णं पृच्छमाना वृन्दावनलतास्तरून्।**

**व्यचक्षत वनोद्देशे पदानि परमात्मनः ॥२४॥**

तदा पुनरनुत्तरे प्राप्ते भगवानाविशन् मोहं दूरीकृत्य सर्वं ज्ञापितवानित्याह **व्यचक्षतेति.** तापापनोदार्थमेव त्रयम्– अन्वेषणं लीलावेशो भगवदावेशश्चेति. तत्र प्रश्नोऽन्तरङ्ग इति सएव सर्वत्रानूद्यते, **वृन्दावनलताः तरून् कृष्णं पृच्छमाना** जाता इति. ततो **वनोद्देशे** वनभूमौ भगवतः **पदानि** दृष्टवत्यः. **परमात्मन** इति पदानां परमपुरुषार्थता सूचिता– भगवदावेशे हि सर्वज्ञता भवति, तेषां च कार्यं भगवत्पददर्शनम्, "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय" इति श्रुतेः[1] ॥२४॥

एता अपि पूर्ववद् दशविधाः, तथैव तासां वचनानि. पदानि प्रत्यक्षयोग्यानि सर्वैरेव दृश्यन्त इति तेषां याथात्म्यज्ञानं साध्यम्. अतः प्रथमम् आहुः **पदानि व्यक्तमेतानीति.**

**पदानि व्यक्तमेतानि नन्दसूनोर्महात्मनः।**

**लक्ष्यन्ते हि ध्वजांभोजचक्रांकुशयवादिभिः ॥२५॥**

**एतानि पदानि नन्दसूनोरेव. व्यक्तं** सत्यं, नात्र संदेहः. चिह्नैः पदानां विशेषज्ञानम्. चिह्नान्येव कथं भवन्तीत्याशङ्क्य तत्रोपपत्तिमाहुः **महात्मन** इति– महतामप्यात्मा महान् वा ब्रह्मरूपः, तस्य तत्तत्कार्यार्थं पदे चिह्नानि भवन्ति. प्रकृतेऽपि तेषामुपयोग इति तदभिव्यक्तिः क्रियते. तानि

**प्रकाशः**

इत्यनेनोक्तः कायिकाभिनयः कृतो बोधितः. तेनात्यार्तिर्बोधिता. तादृश्यामार्तौ यज्ञातं तद् व्याख्यान आहुः **तदा पुनरि**त्यादिना. ननु भगवदावेशो मूले वाचनिको नेति स्वयं कथमुच्यत इत्यत आहुः **भगवदि**त्यादि. तथा च सर्वज्ञतालक्षणकार्यानुमेयमित्यर्थः. सर्वज्ञतायाः किं ज्ञापकमत आहुः **तेषां चे**त्यादि, सर्वज्ञानामित्यर्थः ॥२४॥

**लेखः**

**व्यचक्षतेत्यत्र. तापापनोदार्थमिति,** अन्वेषणेन शान्तिरन्याभ्यां तदस्फूर्तिरिति विभागोऽत्र ॥२४॥

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे द्रष्टव्यम्.

चिह्नान्याह **लक्ष्यन्त** इति, अनुमीयन्ते पदानि असाधारणधर्मैः. **(हि!)** लोकेऽप्येतादृशोऽर्थः प्रसिद्ध इति सम्मतिः. **ध्वजस्य** स्थापनं भक्तानां निर्भयवासार्थम्. **अम्भोज**स्थापनं सुखसेव्यत्वाय. **चक्र**स्थापनं रक्षायै. मनोनिग्रहार्थं **अङ्कुश**स्थापनम्. कीर्तिसिद्ध्यर्थं **यवः**. वज्रादयो**ऽप्यादि**शब्देनोच्यन्ते, पापपर्वतादिनिराकरणार्थाः ॥२५॥

एवमसाधारणधर्मैः पदानि निश्चित्य तन्मार्गेण गता इत्याह **तैस्तैरि**ति.

**तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः ।**
**वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् ॥२६॥**

ज्ञानं क्रियापर्यवसायीति क्रिया निरूप्यते. **तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः** जाताः पदान्यन्विष्य तत्पदवीं गता इत्यर्थः. मध्ये तासां प्रतिबन्धमाह **वध्वा** इति. यदि तासां मत्सरदोषो न स्याद्, गच्छेयुरेवान्तिकम्. दोषवशाच्च परं कुण्ठिता भवन्ति. तदाह **वध्वाः** कस्याश्चिद्गोपिकायाः **पदैः सुपृक्तानि** पंक्त्याकारेण गतानि भगवत्पदानि दृष्ट्वा तानि **विलोक्य** च **आर्ता** जाताः. तदा अन्योऽन्यमे**वाब्रुवन्** ज्ञानक्रिययोरुपसर्जनं कृत्वा वाचि प्रतिष्ठिता जाताः. अन्यथा शीघ्रगमने भगवान् प्राप्तः स्यात् ॥२६॥

**प्रकाशः**

**तैस्तैरि**त्यत्र, **अबला जाता** इति, देहमनुसन्दधाना जाता इत्यर्थः. **एता** इति पदद्रष्ट्र्य इत्यर्थः ॥२६॥

**लेखः**

**तैस्तैरि**त्यस्याभासे **गता इत्याहे**ति. "इत्येवं दर्शयन्त्यस्ताश्चेरुरि"त्यनेन गमनस्योपसंहारात्तावत्पर्यन्तस्याभासोऽयम्. तथाच मध्ये यदुक्तं तदपि गमनाङ्गत्वेनैवेति भावः. **तैस्तैरि**त्यत्र **तत्पदवीं गता** इति, "इत्येवं दर्शयन्त्यस्ता" इत्यन्तस्यार्थोऽयम्. **वध्वाः पदैरि**त्यत्र **तानि विलोक्य चे**ति वधूपदानीत्यर्थः. **जाता** इति, **अन्विच्छन्त्यः** सत्योऽ**बलाः** सत्यः **आर्ताः** सत्यो**ऽब्रुवन्नि**त्यन्वये त्रयं तत्तदानन्तर्येण प्राप्तमित्याशयेन तथोक्तम् ॥२६॥

**योजना**

**पदानि व्यक्तमेतानी**त्यत्र, **महान् वा ब्रह्मरूप** इति, अस्मिन्पक्षे कर्मधारयो ज्ञेयः. महांश्चासावात्मा चेति विग्रहे **महा**पदस्यार्थमाहुः **ब्रह्मरूप** इति ॥२५॥



तासामसूयावाक्यान्याह

**॥ श्रीगोप्यः ऊचुः ॥**

**कस्याः पदानि चैतानि यातायाः नन्दसूनुना ।**
**अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा ॥२७॥**

**कस्याः पदानी**ति, पुरुषोऽत्र न संभाव्यते नापि ग्रामान्तरस्त्रियः, अतोऽस्मन्मध्य एव कस्याश्चिद्भविष्यन्तीति. अयं प्रश्न इतरपरिच्छेदेन विशेषज्ञानार्थः; न त्वत्र पदे लक्षणानि सन्ति. **च**काराद्भगवतः तस्याश्च चेष्टाज्ञापकानि चिह्नान्यप्युच्यन्ते. सा हि **नन्दसूनुना** सहैव याता, अन्यथा भगवान् न गच्छेत्, तयैव प्रायेण नीतः. स्वापेक्षया तस्या महद्भाग्यमाहुः **अंसे न्यस्तः प्रकोष्ठ**भागो यस्याम्. **प्रकोष्ठ**भागो भगवदीयः करतलादर्वाचीनभागः. तावता करेण क्वचित्सम्बन्धः सूचितः तावदेव नैकट्यं पदयोरिति. किञ्च मध्ये तयोः रसाविर्भावोऽपि जायत इति दृष्टान्तेनाहुः **करेणोः करिणा यथे**ति, [१]**करेणोरंसे करिणा यथा** हस्तः प्रसार्यत इति. करेणुः स्त्री, तस्या अंसे यथा करी हस्तं प्रसारयति तदा पदानि मिलन्ति, संमुखश्च भवति, [२]उद्घृष्टकण्ठा वा भवति. स्पर्शसुखमेव प्रधानमिति गजो दृष्टान्तीकृतः. एवं त्रिविधा गोपिका उक्ताः ॥२७॥

गुणातीताया वाक्यद्वयमाह दोषाभावप्रतिपादकं गुणप्रतिपादकं च, तामसतामसी भगवदाविष्टा न भवतीति, **अनयाराधित** इति द्वाभ्याम्.

**टिप्पणी**

**यातायाः नन्दसूनुने**त्यत्र प्रभोः सहभावोक्त्या गौणत्वेन सूचितमर्थमाहुः **तयैव प्रायेणे**ति ॥२७॥

**प्रकाशः**

**पदानी**त्यस्याभासे, **अनये**त्यत्र **तामसतामसी**ति "विप्रावमन्ता विशतां तमोऽन्धं यथा गज" इति वाक्याद्गजस्तामस इति तद्दृष्टान्तीकरणात्तद्वक्त्री स्वामिनी तामसतामसीत्यर्थः. **नूनं नाराधित** इत्यनेन स्वयमप्याराधितः परं किञ्चिद्द्वारेति लक्ष्यते. नन्वेवं सद्वारकाराधने तत्क्रतुन्यायेन फलमपि सद्वारकं स्यात् नतु साक्षात्सम्बन्ध इत्यत आहुः **भगवदि**त्यादि. ब्रह्मपुराणसमाप्तौ मायानुकीर्तनाध्यायारम्भे भास्करप्रसादात् शंभोः पूजारुचिमुक्त्वा "तुष्टे

१. करेणोः हस्ते इति पाठः. २. उद्घृष्टकण्ठ इति पाठः.

**अनयाराधितो नूनं भगवान् हरिरीश्वरः ।**
**यन्नो विहाय गोविन्दः प्रीतो तामनयद्रहः ॥२८॥**

तत्र प्रथमं तया सह विशेषरमणे तस्या भाग्यं तस्याः पुण्यं हेतुत्वेनाहुः **अनया हरिर्नूनमाराधितः.** यद्यप्यस्माभिरप्याराधितः तथापि नूनं नाराधितः, भगवदनाराधकैरपि फलत्वाद् भगवतः सम्बन्धसम्भवात्. आराधिते तु फलं स्ववशे भवति. तत्रापि तारतम्यम्. ननु तुल्यकर्मणां मध्ये कथम् अवान्तरभेदः? तत्राह **भगवानि**ति. सामग्रीभेदात् कर्माणि सर्वत्र विलक्षणानि भवन्ति. तदवान्तरवैलक्षण्यं सएव जानाति, अतस्तथा फलनिरूपको जातः. ननु तथापि वयं तथा न ज्ञापनीयाः दुःखसाधकत्वादिति चेत्, तत्राहुः **हरि**रिति. स हि सर्वदुःखहर्ता, वैलक्षण्यज्ञापनार्थं तथा बोधितवान्. ननु भक्तिः तुल्येति कथं भक्त्यनुसारेण तुल्यं फलं न कृतवान्, तुल्यफलत्वेन कर्म कुतः

**टिप्पणी**

**भगवान्हरिरीश्वर** इत्यत्र **वैलक्षण्यज्ञापनार्थमि**ति, तादृशं कर्म स्वकृतमिति स्वदोषज्ञाने मात्सर्यजं दुःखं न भवतीति तथेत्यर्थः. **तुल्यफलत्वेने**ति. यादृक्कर्म तादृगेव फलमिति तुल्यफलकं कर्म भवति. तथा च यथास्मास्वपि

**प्रकाशः**

त्रिलोचने तस्य भक्तिर्भवति केशव'' इति कथनाद्, एकादशे भगवतापि मयबाणयोः शैवत्वेन प्रसिद्धयोरपि ''वृषपर्वा बलिर्बाणो मयश्चाथ बिभीषण'' इत्यादिना स्वपदप्राप्तिकथनाच्च **भगवदनाराधकैः** साधनैरपि तथोक्तत्वान्न साक्षात्सम्बन्धानुपपत्तिरित्यर्थः. एतेनानन्यपूर्वाभिरपि स्वस्य कात्यायनीद्वारकमेवाराधनं स्मृतमिति प्रतिभाति. ननु यद्येवं तर्ह्याराधिते को विशेषो येन तत्र निश्चय उच्यत इत्याकांक्षायामाहुः **आराधित** इत्यादि. ननु यद्येवं तर्हि भगवानाबाल्यादेतद्वशएव ''गोपीभिः स्तोभितोऽनृत्यदि''त्यादिनोक्तः, इदानीमप्येतद्वाक्यांगीकाराच्चैतद्वशत्वमेव प्रकटीकृतमिति कथं **नूनं नाराधित** इत्युच्यत इत्यत आहुः **तत्रापी**त्यादि, साक्षादाराधनेऽपीत्यर्थः. अन्यथा कथं विहाय गत इति भावः ॥२८॥

**लेखः**

**अनयाराधित** इत्यत्र **पुण्यमि**ति, आराधनं पुण्यम्. तज्जनितं भगवत्प्रसादविषयत्वं **भाग्य**शब्देनोच्यते ॥२८॥



स्वीकृतवान्, तत्राहु**रीश्वर** इति, कदाचिद्भक्तिमुररीकरोति, कदाचित्कर्म, कदाचित् स्वेच्छाम्. न हीश्वरो नियन्तुं शक्यो अस्मान् भक्तिमार्गे योजय(ये!)ति, न कर्ममार्ग इति. अतएव **नः** अस्मान् **विहाय गोविन्दः** साधारणेन्द्रोऽपि **रहः** एकान्ते **प्रीतः** सन् **तामेवानयत्.** कामरसः स्त्रीसमूहापेक्षयाप्येकस्यामेव मुख्यतयोत्पद्यते. तथा करणे प्रीतिर्हेतुः, प्रीतौ भक्तिः कर्म वा ॥२८॥

एवं तस्या भाग्यमभिनन्द्य मात्सर्येऽपि गूढे तथा वचनं भवतीति स्वभाग्याभिनन्दनमप्याहुः **धन्या** इति.

**धन्या अहो अमी आल्यो गोविन्दाङ्घ्रब्जरेणवः ।**
**यान् ब्रह्मेशो रमा देवी दधुर्मूर्ध्न्यघनुत्तये ॥२९॥**

**अहो** आश्चर्ये, हे **आल्यः** सख्यः, **अमी अंघ्रिरेणवो धन्याः.** मात्सर्याभावार्थं चैतदुच्यते, यथा रेणवः तथा सेति. विश्वासार्थम् अप्रतारणार्थं च सम्बोधनम्. अनेन रेणूत्कर्षेण रेणवएव धार्याः स्वदोषनिवृत्त्यर्थमित्युक्तं भवति. पूर्वमत्रैव ते रेणवः स्थिताः, न तदा तेषामुत्कर्षः. यदा पुनश्चरणसम्बद्धाः तदा धनमर्हन्तीति. धनं कृष्णः, यथेन्द्रो देवानाम्. यथा धनेन सर्वविषयप्राप्तिः एवं प्रभुणापि. तेषां धन्यत्वमुपपादयन्ति **यानि**ति. **ब्रह्मा ईशो रमा** च देवतारूपा पालिका शक्तिः. तेषां स्वस्वाधिकारे

**टिप्पणी**

कर्मवैलक्षण्येऽप्यस्मान् भक्तिमार्गेऽङ्गीकृतवानिति सा च तुल्येति तुल्यं फलं कृतवान्, तथा चेत्तामप्यङ्गीकुर्यात्तदास्मत्तुल्यैव भवेत्. [1]तस्यामाराधनबललक्षणं कर्माधिकमस्तीति तां तन्मार्गे कुतोऽङ्गीकृतवानित्यर्थः. [2]**गोविन्द**पदतात्पर्यनिरूपणे **साधारणेन्द्रोऽपी**ति. यद्यपि ''इति गोगोकुलपतिं गोविन्दमभिषिच्य चे''ति वाक्यात् साधारण्येन सर्वस्यैव गोकुलस्येन्द्रः न तु विशेषेणैकस्य कस्यचित् अतस्तादृशस्यास्मदपेक्षया विशेषेणैकस्या भोगोऽनुचितः, तथापीश्वरत्वात्तथोपपद्यत इति भावः ॥२८॥

**धन्या अहो** इत्यस्याभासे **स्वभाग्याभिनन्दनमपी**ति, चरणसम्बन्धाद्रेणूनां धन्यत्वोक्त्या स्वस्यापि तथात्वात्तथात्वमायातीति तथा ॥२९॥

**लेखः**

**यान् ब्रह्मेश** इत्यत्र **तन्निवृत्त्यर्थमि**ति. धनं प्रभुमर्हन्ति, अतो येषां

१. आराधनलक्षणमिति तु मूलपाठः. २. 'गोविन्दे'त्यारभ्य 'भाव' इत्यन्तं क्वचिन्नास्ति.

दोषसंभवात् तन्निवृत्त्यर्थं **मूर्ध्नि दधुः**. ब्रह्मानन्दरूपाया निवृत्त्यर्थं **देवता**पदम्. अतः कारणादेतद्धारणेन वयमपि निर्दुष्टाः नीयमानगोपिकातुल्या भविष्याम इति ॥२९॥

अन्या रजःप्रकृतय आहुः **तस्या** इति.

**तस्या अमूनि नः क्षोभं कुर्वन्त्युच्चैः पदानि यद् ।**
**एकापहृत्य गोपीनां रहो भुङ्क्तेऽच्युताधरम् ॥३०॥**

भगवच्चरणारविन्दरजस्तथैव, परमस्याः गोपिकायाः **अमूनि पदानि** सङ्गे गच्छन्त्याः **नो**ऽस्माकं **क्षोभं कुर्वन्ति,** तत्राप्युच्चै**रत्यर्थम्**. नन्वेकाकी भगवान् गच्छेत् तदपेक्षया ससहायो भक्तिमार्गे युक्त इति चेत्, तत्राहुः **यद्** यस्माद् गोपिकानां सर्वासामेव भागरूप**मच्युताधरं** ता विहाय **एकै**वोप**भुङ्क्ते.** तत्रापि **रहः** एकान्ते तासामनुज्ञाव्यतिरेकेण. ननु विरतो भगवान् बहुस्त्रीसम्बन्धाद्भविष्यति, कुतः सा भोक्ष्यते, तत्राहुः **अच्युते**ति. स हि पूर्णकामएव, न तस्य च्युतिरस्ति ॥३०॥

अन्याः पुनस्ततोऽपि खेदं कृतवत्य इत्याह **न लक्ष्यन्त** इति.

**न लक्ष्यन्ते पदान्यग्रे तस्या नूनं तृणाङ्कुरैः ।**
**खिद्यत्सुजाताङ्घ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥३१॥**

अहो किमिति विचार्यते अधरामृतं पिबतीति; एतावद्दूरे समागतानि **तस्याः पदानि अग्रे न लक्ष्यन्ते.** न च वक्तव्यं समीचीनं जातमिति, तत्राहुः **तस्याः तृणाङ्कुरैः खिद्यत्** पादतलं जातम्. तदा तादृशी**मुन्निन्ये** ऊर्ध्वं नीतवान्, कटिभागे स्कन्धभागे वा. वस्तुतस्तु हस्ताभ्यामेवोद्धृतवानिति सुतरां खेदे हेतुः. ननु कथमेवं करिष्यतीत्याशङ्क्याहुः **प्रेयसीमि**ति, साप्यत्यन्तं प्रिया, स्वयमपि **तस्याः प्रियः.** अतो ज्ञायते न सा स्कन्धमारूढा किन्तु केवलमुन्निन्ये ॥३१॥

किञ्च तेन प्रकारेण न बहुदूरे गमनं संभवति. अतः क्वचिद्विश्रम्य

---

**लेखः**

मूर्ध्नि स्वयं तिष्ठन्ति तेषामपि दोषनिवर्तनेन तत्र योग्यतां सम्पादयन्तीत्यर्थः ॥२९॥

**तस्या** इत्यस्याभासे **रजःप्रकृतय** इति, सत्त्वप्रधानास्तिस्र उक्ताः, ततो गुणातीताया वाक्यद्वयम्; अत्र रजःप्रधानास्तिस्र उच्यन्त इत्यर्थः ॥३०॥



पुष्पावचयमपि तदर्थे करोतीत्याहुः **अत्रे**ति.

**अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः ।**
**प्रपदाक्रमणे एते पश्यतासकले पदे ॥३२॥**

**प्रसूनानामवचयो** वृक्षादुत्तारणम्. न च स्वार्थं भविष्यतीति शङ्कनीयं, सा हि श्रान्ता अतः **प्रियार्थ** एव. सा तु कर्तुमशक्तैव तदाहुः **प्रेयसा कृत** इति, सा हि भगवदपेक्षया खर्वा प्रपदाभ्यामुत्थातुमप्यशक्ता अतः प्रेयसैव कृतः. यतः **प्रपदाक्रमणे** पादाग्राभ्यामेवाक्रमणं ययोः. अत **एवासकले,** पार्ष्णिभागो नाभिव्यक्त इति. **पश्यते**ति सन्देहाभावार्थं वचनम् ॥३२॥

ततोऽप्यन्या अधिकमेव सूचयन्त्य आहुः **केशप्रसाधनमि**ति.

**केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतम् ।**
**तानि चूडयता कान्तामुपविष्टमिह ध्रुवम् ॥३३॥**

नखैरेव **केशानां प्रसाधनं** वेण्याकारेण आपीडाकारेण वा. **तु**शब्दोऽन्यथापक्षं व्यावर्तयति, न ह्यत्र ज्ञानोपदेशः सम्भवति. तदाहुः **कामिन्याः कामिना कृतमि**ति. एतद् उत्थायापि भवति, चूडायां पुष्पप्रवेशनं तु उत्थिते न भवति; क्रोडे पुष्पाणि स्थापयित्वा क्रमेण तानि निवेशनीयानि. अतः **तानि चूडयता इहोपविष्टम्. ध्रुवमि**ति सत्यम्. **कान्तामुप** कान्तासमीपे कान्तामुद्दिश्य वा, तथैवाकृतिर्दृश्यत इति ॥३३॥

एवं रसार्थं तस्यानयनं सामग्रीसम्पादनमलङ्करणं चोक्तम्. यदर्थमेतावत्तदाहुः **रेम** इति.

**रेमे तया चात्मरत आत्मारामोऽप्यखण्डितः ।**
**कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्मताम् ॥३४॥**

पुष्टत्वात् कामस्य **आत्मरतः तया च** सह **रेमे. च**कारात् लक्ष्म्या च. अन्तःप्रविष्टाभिर्वा. सापि रेम इति वा. **आत्मन्येव रति**र्यस्य, तेन

---

**लेखः**

**केशप्रसाधनमि**त्यस्याभासे **ततोऽप्यन्या** इति तमःप्रधाना द्वय्य (?) इत्यर्थः. तामसतामसीस्थाने गुणातीताया वाक्यद्वयमुक्तमित्युक्तमेव ॥३३॥

**रेमे** इत्यत्र, **तया चे**ति, कामपोषादात्मरतः स्वार्थपरो जातस्तया सह रेमे चेत्यर्थः. आत्मरतत्वे तया सह रमणे च कामपोषो हेतुरिति **च**कारः. मूलस्थ**च**कारार्थमाहुः **चकारादि**ति. **अन्तःप्रविष्टाभिरि**ति, अन्तर्गृहगताः

निष्काम एव तस्या यथेच्छं कामं पूरितवान्. अस्यामपि दशायामात्मरतएव, रसाधारत्वाय तस्यामात्मानं स्थापितवान्. **आत्मन्येव** मुख्या **रतिः आत्मन्येव**

**टिप्पणी**

**रेमे तया चात्मरत** इत्यत्र **पुष्टत्वात्कामस्ये**त्यादि, यथा प्राकृतः कामी महानपि केवलं स्वार्थपरः सन् स्वयं यदि सुखी भवति तदा स्वकृतेऽपि दुःखिनं नानुसंधत्ते तथा. यथात्मारामत्वलक्षणं स्वधर्ममप्यतिक्रान्तवांस्तथाऽस्मद् दुःखमप्यविचार्य स्वार्थमेवैतावत्सम्पाद्योद्भटभावः स्वयं तादृश्यैव तया च रेम इत्यर्थ इत्याशयेनोक्तं **पुष्टत्वा**दित्यादि. तथा च स्वधर्माविचारकस्य परधर्माविचारे किमाश्चर्यमिति भावः. एवं **सत्यात्मरत** इत्यस्य स्वार्थपरत्वमर्थः पर्यवस्यत्यतो न पौनरुक्त्यमिति ज्ञेयम्. एवं सकामत्वेऽपि न निष्कामताक्षतिरिति ज्ञापनायात्मारामत्वोक्तिरित्याशयेनाहु**र्निष्काम एवे**त्यादि. प्रकारान्तरेणाप्यपौन-रुक्त्यमित्याशयेनात्मरतत्वं प्रकारान्तरेणाहुः **रसाधारत्वाये**ति. अत्रेदमाकूतम्. रसात्मकत्वाद्भगवतस्तस्य च स्थायिभावात्मकत्वात्तमेतस्यां प्रकटीकृत्य रेमे, अन्यथैतद्रसानुभवासम्भवात्, न तु प्राकृतभावे सतीति. यद्वा **आत्मरत**

**प्रकाशः**

**रेम** इत्यत्र टिप्पण्यां **यथा प्राकृत** इत्यारभ्य **ज्ञेयमि**त्यन्तेन **तया च सह रेमे** इत्येतदेव व्याख्यातं ज्ञेयम्. एवं सति "आत्मरत आत्मक्रीड आत्ममिथुन" इति श्रुत्युक्तं भज्येतेति तत्संग्रहाय सुबोधिन्यां **च**कारं व्याकुर्वते **चकारा**दित्यादि. तथा च लक्ष्मीस्ताश्च न स्वतो भिन्ना इति न श्रुत्युक्तस्य[1] भङ्ग इत्यर्थः. ननु तथापि पूर्वोक्तरमणं तु [2]तद्भञ्जकमेवेत्यत आहुः **निष्काम** इत्यादि. ननु पारार्थ्येऽपि तद्भङ्गो नापैतीत्यत आहुः **अस्यामपी**त्यादि. अर्थस्तु टिप्पण्यां **प्रकारान्तरे**त्यारभ्य **सती**त्यन्तेन विवृतः.

**लेखः**

सायुज्यं प्राप्ता भगवदन्तःप्रविष्टास्ताभिरित्यर्थः. **रसाधारत्वाये**ति, तस्याः शृङ्गाराधारत्वा**यात्मानं** शृङ्गारस्थायिभावं **तस्यां स्थापितवा**निति टिप्पण्यर्थः. **आत्मरत**पदस्यार्थमाहुः **आत्मन्येवे**ति, शृङ्गारस्थायिभावात्मकस्वरूपे एव **रति**रासक्तिरित्यर्थः. **आत्माराम**पदस्यार्थमाहु**रात्मन्येव रमणमि**ति. उभय-त्राप्या**त्म**पदं स्थायिभावपरम्, उत्तरपदार्थ एकत्रासक्तिरेकत्र क्रीडेति विभेदः.

१. श्रुत्युक्तकल्पभंगः इति मुं. वि. पाठः. २. निष्कामत्वभञ्जकम्.



**रमणं** क्रीडा च यस्य, यतो **अखण्डितः** इन्द्रियैरन्तःकरणैर्विषयैर्वा. यदि स्वानन्दोऽन्यत्र गच्छेत् तदान्यत्र रतो भवेत्. ननु कथमेवमसमीचीनस्थाने एतावता प्रयासेन एवं रमणं कृतवानिति? तत्र प्रयोजनमाहुः **कामिनां दर्शयन् दैन्यमि**ति, कामिनस्त्वेवमेव दीना भवन्ति. "कामार्ता हि प्रकृतिकृपणा" इति तेषामनुकरणं करोति, अन्यथा तेषां निरोधो न स्यात्. प्रयोजनान्तर-मप्यस्तीत्याहुः **स्त्रीणामि**ति, **स्त्रीणां च दुरात्मता** प्रदर्शिता. न तासां काचिदशक्तिरस्ति नापि सौकुमार्यं किन्तु वशीकृते पुरुषे दौष्ट्यमेव कुर्वन्ति, "शालावृकाणां हृदयान्येता" इति. अत उभयबोधनार्थमेवं रेमे ॥३४॥

**टिप्पणी**

इत्य**त्रात्म**पदं स्वामिनीवाचकम्. तथा **चात्मारामोऽपि तयात्मरतः** कृतो **रेमे. च**काराद्विशेषरमणं विविधबन्धादिविशिष्टमुच्यते. तथा सति नखदशनादि-कार्यसम्भवेनाब्रह्मत्वशङ्का स्यात्, तन्निरासायाहु**रखण्डित** इति, यथा तस्यां रतोप्यात्मारामएव तथा दशनादिभिः खण्डितोऽप्यखण्डित एवेत्यर्थः. **कामिनां दर्शयन्दैन्यमि**त्यत्र **कामिनस्त्वि**त्यारभ्य **एवं रेम** इत्यन्तम्. अत्रायमर्थः.

**प्रकाशः**

सुबोधिन्यां **रमणं क्रीडे**ति **आत्माराम**पदस्यार्थो ज्ञेयः. "केशप्रसाधनमि"त्यारभ्य सात्त्विकीनां वाक्यानि तन्मध्य इदं सात्त्विकसात्त्विक्या इति बोधयितुं टिप्पण्यां प्रकारान्तरं संगृह्याहुः **यद्वे**त्यादि. सुबोधिन्या**मसमीचीनस्थान** इति, "तृणाङ्कुरैः खिद्यत्सुजातांघ्रितलामि"त्यनेन सूचित इति ज्ञेयम्. कामुकानुकरण-करणकस्तन्निरोधप्रकारो न स्फुटइति एतद्वाक्यवक्त्रीष्वपि रसभावज-मानस्य

**लेखः**

**इन्द्रियैरि**ति, एतन्निष्ठैरिन्द्रियैरन्तःकरणे रूपादिविषयै**श्चाखण्डितो**ऽसम्बद्धः स्वानन्दः. स्वानन्द इन्द्रियादिसम्बन्धार्हश्चेद्भवेत् तदा स्थायिभावस्थापनव्यति-रेकेणापि लोकवत्तस्यामिन्द्रियादिद्वारैव सुखं जनयेत्. अयमानन्दः स्वात्मनैव सम्बद्धुमर्हः अतो लोकप्रकारं परित्यज्य तदात्मनि स्वात्मानं स्थापयित्वा तत्र रतो जातः क्रीडां च कृतवानित्यर्थः. **असमीचीनस्थाने** इति तल्पादिसामग्रीरहिते इत्यर्थः. **अन्यथे**ति, कामिषु दैन्यमेव फलतीति ज्ञाने कामिनः कामं परित्यज्य भगवन्तं भजेयुरिति भावः ॥३४॥

एवं सर्ववस्तुयाथात्म्यस्फुरणं भगवदावेशात्तासां निरूपितमुपसंहरति **इत्येवमि**ति.

**॥ श्रीशुक उवाच ॥**

**इत्येवं दर्शयन्त्यस्ताश्चेरुर्गोप्यो विचेतसः ।**

**एवं**प्रकारेण भगवल्लीलाः प्र**दर्शयन्त्यः चेरुः** गतिं कृतवत्यः. तासामनेकविधत्वे हेतुमाह **गोप्य** इति– न हि ताः शास्त्रेण भगवदीया जाताः किन्तु स्वभावेन; स्वभावस्त्वनेकविध इति सर्वमुपपद्यते. किञ्च नहि ताः किञ्चिद् ज्ञात्वा वदन्ति किन्तु **विचेतस**एव. अथवा. **एवं दर्शयन्त्यो विचेतसो** जाताः, प्रकारत्रयस्यापि समाप्तत्वात्. अतस्तासां नाग्रे गतिर्न वचनानि ॥

एवमेतासां स्वरूपं निरूप्य तस्याः स्वरूपं निरूपयति **यां गोपीमि**ति सार्धैः त्रिभिः.

---

**टिप्पणी**

पूर्वमात्मारामत्वोक्त्या तादृशोऽपि सन् यन्नायिकाधीनत्वमेवं भजते तेन रसात्मको रसवांश्च भगवानेव, अन्ये तु कामिनो रसाभासिनो मलपूर्णे वस्तुन्यासक्त्या बीभत्सरसपूर्णाः भ्रान्ताः सन्तस्तादृशीष्वेव दैन्यमात्रं फलं लभन्त इति ज्ञाप्यते. किञ्च आत्मारामोऽपि यद्रसपरवशस्तत्रैव रसभरवशेन मानादिकं भवति, अन्यासु तु रसाभावान्न स मानः किन्तु दौष्ट्यप्रकटनमेवेति. एतेनात्मारामस्यापि प्रभोर्यत्र रतिस्तत्रैव रसो नान्यास्विति फलितम् ॥३४॥

**प्रकाशः**

भगवद्धर्मत्वेन खेदबीजं न स्फुटमिति तदुभयं व्यक्तीकुर्वन्ति टिप्पण्या**मत्रायमर्थ** इत्यादिना, **किञ्चे**त्यादिना च. तथा चोक्तप्रकारकज्ञानेन कामिनिरोधः[1] स्वस्मिन्नमुख्यतमो रस इति खेदबीजमिति भावः ॥३४॥

**लेखः**

**इत्येद**मित्यस्याभासे **एवं सर्ववस्त्वि**ति. इदं स्फुरणं भगवदावेशेन नतु पूर्ववत्पददर्शनेन. अत्र पददर्शनं तु भगवदावेशकार्यत्वेनोक्तं न तु स्फुरण-हेतुत्वेनेति भावः. **अथवे**ति, **इति चेरुः** प्रकारत्रययुक्तमपि चरणं गमनं समाप्तमित्यर्थः, तत **एवं दर्शयन्त्यो विचेतसो** जाता –एवमन्वयः ॥

**स्वरूपमि**ति, सकार्यं मदं मानं चेत्यर्थः. **दोषदर्शन** इति, निमित्तसप्तमीयम्,

---

१. कामनिरोधः इति मुं. वि. पाठः.



दोषोऽभिमानवचनं वचनोत्तरमेव च ॥(११)॥

पूर्ववच्च तिरोभावो विज्ञेयं दोषदर्शने ॥

**यां गोपीमनयत् कृष्णो विहायान्याः स्त्रियो वने ॥३५॥**

**यां गोपीं** पूर्वमजातदोषाम् **अनयत्,** यतः **कृष्णः** सदानन्दः, तस्यामानन्दं स्थापयितुम्. **अन्यास्तु स्त्रियो** जाताः, सा तु मुग्धैव **गोपी.** अतस्ता **वने विहाय तामनयत्,** वनस्थानां विवेको भवतीति ॥३५॥

स्वयं [1]त्वयुक्तकरणात् प्रकृत्याद्यधिकारिणः ॥(१२)॥

---

**टिप्पणी**

**यां गोपीमि**त्यत्र बहिःप्रियसम्बन्धेऽन्तरायहेतुत्वेन माने दोषत्वोक्ति-र्विवृताविति ज्ञेयम्. समानरसत्वेऽप्येतासां तदा मानोऽभून्नैकत्र. तत्राप्यधुना सोऽभूत्, तत्र हेतुमाहुः **स्वगत्ययुक्तकरणा**दिति. नायिकानां हि प्रकृतिः सदा मानिनीत्वम्. प्रकृते चेयदवधि नायकाधीनत्वमेवाङ्गीकृतमिति **स्वस्या**पि नायिकाप्रकृतेर्या **गती** रीतिस्तस्या**मयुक्तकरणा**न्नायकाधीनत्वेन स्थितेर्नायिका-

**लेखः**

एतासां स्वदोषपरिज्ञानार्थमित्यर्थः. "अन्विच्छन्त्य" इति श्लोकव्याख्याने इदं स्फुटं भविष्यति. **स्त्रियो जाता** इति, अन्याः वने विहाय तामनयत् यतोऽन्याः स्त्रियो जाताः ॥३५॥

**योजना**

**सा च मेने तदात्मानमि**त्यस्याभासे **स्वयं त्वयुक्तकरणा**दिति कारिका– एतस्यार्थष्टिप्पण्यां स्फुटः (१२).

**कारिकार्थः**

**यां गोपीमनयत् कृष्णः** इत्यादि सार्धत्रयश्लोकवाक्यार्थानाहुः **दोषो** इत्यादि. **दोषदर्शने** इति निमित्तसप्तमी. तथा च तस्यास्त्यागादिकं तासां स्वदोषस्फूर्तिनिमित्तं विज्ञेयमित्यर्थः. तस्याः तादृगवस्थादर्शनेन तासां स्वदोषस्फूर्तिरभूद् "अस्मद्दोषेणैव वयं त्यक्ता" इति (११ $\frac{1}{2}$).

अत्रैव श्लोके **स्वयन्त्वि**त्यादि. ननु समानरसवत्त्वेऽपि एतासां तदा मानोऽभूत्, नैकस्यां भगवता नीतायां; तत्रापि अधुना मानोऽभूत् तत्र को हेतुः इत्याशंक्याहुः **स्वगत्ययुक्तकरणा**दिति. अत्र टिप्पण्यां "नायिकानां हि

---

१. गत्ययुक्तेति पाठः सूचितः.

बुद्धिं स्म नाशयामासुः साप्यन्येवाभवत्ततः ॥

तदाह.

**सा च मेने तदात्मानं वरिष्ठं सर्वयोषिताम् ।**
**हित्वा गोपीः कामयाना मामसौ भजते प्रियः ॥३६॥**

**सा च** तदा **सर्वयोषितां** मध्ये **वरिष्ठं मेन** इति. **चकारः** पूर्वसमुच्चयार्थोऽप्यर्थे. **तदेति** पूर्वं तस्यास्तथात्वं न जातमिति. अनेन समुदायदोषेण न भगवांस्त्यजति किन्तु प्रत्येकदोषेणेति ज्ञापितम्. तस्यास्तथा

### टिप्पणी

प्रवृत्तिनिवृत्तिहेतुत्वेनाधिकारिण **इवाधिकारिणो** ये, **आदिपदा**त्प्रौढा भावास्ते पूर्वभावान्कोमला**न्नाशयामासुरि**त्यर्थः. **स्वयं त्वयुक्तेति** पाठे **स्वयं**पदं स्वामिनीपरं, शेषं पूर्ववत्. ननु पूर्वमेवास्या अपि स्वामिन्या मानः कुतो नाभूत् रसप्राप्तेस्तुल्यत्वादिति चेद्, उच्यते. भगवान् हि भक्तेभ्यो भजनानन्दं दातुं लीलां करोति, स्वस्य तद्रसानुभवार्थं च. तथा च बह्वीष्वपि प्रियासु सतीष्वेकस्यां पृथङ्नयनेन विशेषरमणे यो रसः स न सम्भूय रमणे. स च स्वरूपात्मकएवेति तत्स्वरूपं प्रकटीकृतवानिति न काप्यनुपपत्तिः. पूर्वं मानाभावे स्वामिनीभिरेव हेतुरुक्तो"ऽनयाराधित" इत्यादिना (११-१२ $\frac{1}{2}$).

### प्रकाशः

**यां गोपीमित्यस्य** टिप्पण्याम्, **अधिकारिणो ये** इति **यच्छब्दे** स्वभावगुणा बोध्याः ॥३५॥

### कारिकार्थः

प्रकृतिः सदा मानिनीत्वम्. प्रकृते च इयदवधि नायिकाधीनत्वमेव अंगीकृतमिति **स्वस्या** नायिकाप्रकृतेः या **गती** रीति तस्या**मयुक्तकरणात्** नायिकाधीनत्वेन स्थितेः नायिकाप्रवृत्तिनिवृत्तिहेतुत्वेन अधिकारिण इव अधिकारिणो ये प्रकृत्यादयः, **आदिपदात्** प्रौढा भावास्ते पूर्वभावान् कोमलान् **नाशयामासुरि**त्यर्थः". तथा च पूर्वे भावानां कोमलत्वात् मानाभावेऽपि पश्चात् नायिकास्वभाववशात् कोमलभावरूपबुद्धिनाशे **सापि** नायिका **अन्येवाभवत्** मानवती जातेत्यर्थः. एवं च अयं मानो नायिकायाः प्रकृतिसिद्धएव न तु दोषात्मक इति भावः. **स्वयं तु अयुक्तकरणादि**ति पाठे **स्व**पदं स्वामिनीपरं, शेषं पूर्ववत् (१२ $\frac{1}{2}$).



दोषे हेतुः **हित्वेति**, **कामयाना** अपि सर्वाः **गोपीः हित्वा असौ मां भजत** इति. तत्रापि **प्रियः** यथैव मम प्रीतिर्भवति तथैव करोति न तु क्वचिदप्यप्रियविषयः. अतोऽहं वरिष्ठा. अन्यथानुपपत्त्या तथात्वं कल्प्यते ॥३६॥

दोषाभावेनैवोत्तमता न तु धर्मान्तरेण, अतस्तस्या भ्रमः. भ्रान्ताया वाक्यमाह

**ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् ।**
**न पारयेऽहं चलितुं नय मां यत्र ते मनः ॥३७॥**

**ततो गत्वेति.** **ततो** भोगस्थानादग्रे **गत्वा वनोद्देशम**तिरमणीयम्.

### टिप्पणी

**ततो गत्वे**त्यस्याभासे **दोषाभावेनैवे**त्यादिना दृप्तात्ववक्तुस्तात्पर्यमुच्यते. शक्तौ सत्यामपि प्राकृतकामिवत्कामाधीनत्वेन स्ववशत्वज्ञानेनाशक्तिख्यापने स्वस्कन्धेनापि नेष्यतीति ज्ञानं भ्रमः. यथा भगवद्रमणे दोषाभावासम्भवाद्भगवद्भावात्मकावेव सौभाग्यमद-मानाविति "तासां तत्सौभगमदमि"त्यत्र निरूपितं, तथा प्रकृतेऽपि प्रियाधीनत्वभावेनात्र रसो दत्त इति स एव भावोऽत्राजनि, न तु दोषरूपः. सएव **हित्वा गोपीरि**त्यनेनोक्तः. [1]एवं सत्यत्र

### प्रकाशः

**ततो गत्वे**त्यस्य टिप्पण्यां पूर्वं भक्तानां भावस्य भगवद्भावात्मकत्वेन स्थापितत्वाद् अत्र च **न तु धर्मान्तरेणे**त्युक्तौ तदापत्त्या पूर्वस्माद्विरोध इति तन्निवारणाय तत्तात्पर्यमाहुः **दृप्तात्वे**त्यादि **भ्रम** इत्यन्तम्. ननु भ्रमस्य सर्वत्र दोषजन्यत्वदर्शनात् कथमेतद्भ्रमजनकभावस्यादोषत्वमित्याकांक्षायां तदुपपादयन्ति **यथे**त्यादिना. **स एवेति** "प्रियो मद्वश" इत्याकारकः. तथा च यथा लोके रमणस्य दोषत्वेऽपि भगवदीयस्य तस्य न तथात्वं तथैतस्यापि

### लेखः

**हित्वे**त्यत्र **अप्रियविषय** इति, अप्रिया विषया यस्माद्, अप्रियविषयसम्पादक इत्यर्थः. तथा च मूले **प्रिय**पदस्य प्रियविषयसम्पादकत्वमर्थः. स एव **यथैव ममे**त्यनेन विवृतः ॥३६॥

**तस्या भ्रम** इति जात इति शेषः. भ्रमस्तु टिप्पण्यां विवृतः. **भ्रान्ताया** इति, **केशवमब्रवीदि**त्यन्तेन पूर्वार्धे भ्रमो विवृतः उत्तरार्धे वाक्यमुक्तमिति

१. **ततो भोगस्थाने**त्यादिग्रन्थतात्पर्यमाहुः **एवं सती**त्यादि.

स्वार्थमयं गच्छति न तु मदर्थम्. ततश्चान्यार्थं मया कथं खेदः प्राप्तव्य इति **दृप्ता.** तादृशभगवत्कृपायामनधिकारिणी प्राप्तप्रसादेन जाताजीर्णा ब्रह्मादिभ्योऽपि मोक्षदातारं देहेन्द्रियादिसर्वरहितं परमानन्दरूपं **केशवमब्रवीत्.** तस्या वाक्यमाह **न पारय** इति, **अहं चलितुं न पारये.** तथापीष्टदेशं गन्तव्यमिति चेत्, तत्राह **यत्र ते मनः** तत्र **मां** त्वमेव **नय** ॥३७॥

तदा भगवानतिचतुरः तद्वाक्यस्योत्तरमाह **एवमुक्त** इति.

---

## टिप्पणी

विप्रयोगात्मकरसाननुभवे पूर्णरसदानं न भविष्यतीति ज्ञात्वा प्रभुः संयोगरसदित्सासंकोचमकरोत्. अयमेव भावः क्रियाशक्तिसंकोचप्रकाशको **न पारयेहं चलितुमि**त्यनेनोक्तो अन्यथाऽनृतवादित्वं स्यात्; न हि भगवन्तं प्रति तदीयानामेवं सम्भवति. स त्वतिपूर्णरसाविर्भावेन स्तम्भरूपः सात्त्विकभावो भवितुमर्हति. दृप्तत्वं ह्यमर्यादत्वं, तथा चोक्तरीत्या निरवधिरसदातुस्तत्संकोचेच्छा रसमार्यादिकी न भवतीति तद्भावोदयोऽत्र **दृप्ता**पदेनोक्तः.

## प्रकाशः

तत्सम्बन्धित्वेन भगवदीयत्वादेव न तथात्वमित्यर्थः. अग्रिमस्य भावतथात्वमुपपादयन्ति **एवं सतीत्यादि अर्हतीत्य**न्तम्. मध्यमस्य साधयन्ति **दृप्तत्वमित्यादि. इति तद्भावेत्यत्र इति**र्हेतौ, तथा च रसमर्यादाविरुद्धेच्छायाः हेतोरित्यर्थः. **उक्त** इति, मूले सुबोधिन्यां चोक्त इत्यर्थः. **अत्रापीति**, स्वामिन्यामपि संयोगजनकभाव-दूरीकरणाय **तद्भावजननं दृप्ता**पदोक्तभावजननमित्यर्थः. तथा च सुबोधिन्यां यत्तादृशकृपानधिकारित्वं जाताजीर्णत्वं च यदुक्तं तत्पूर्वापेक्षया सर्वात्मभावाधिक्यज्ञापनार्थम्. तेन यादृश्यन्यासु कृपा तदनधिकारिणी, किन्तु तद्विलक्षणकृपाधिकारिणी प्रसादप्राप्त्या अत्यन्तमुच्छलद्रसेति हृदयं बोध्यम् ॥३७॥

## लेखः

विभागः. **जाताजीर्णे**ति, **जीर्णा जाता** वृद्धिं प्राप्ता गरिष्ठा जातेत्यर्थः. **देहेन्द्रियादी**ति **केशव**पदार्थ एवोच्यते. मोक्षदत्वकथने स्वस्यापि देहेन्द्रियादिराहित्यं परमानन्दरूपत्वं च प्राप्तमिति भावः ॥३७॥

**वाक्यस्योत्तरमाहे**ति, इति शुक आहेति शेषः.



**एवमुक्तः प्रियामाह स्कन्धमारुह्यतामिति ।**
**ततश्चान्तर्दधे कृष्णः सा वधूरन्वतप्यत ॥३८॥**

प्रियेति कृत्वा उत्तरमुक्तवान्. उत्तरमाह **स्कन्धमारुह्यतामि**ति. एषा हि नृत्यं कर्तुं वाञ्छति स्वान्तर्गतं रसमभिनेतुम्. तद्भूमौ पदस्थापने

---

## टिप्पणी

रजस्तमोऽधिष्ठात्रोरपि तज्जं भावं दूरीकृत्य अमृतदातेत्यत्रापि पूर्णरसदानार्थमेव तद्भावजननं स्वतिरोधानं चेति ज्ञापनाय **केशव**पदोक्तिः. एवं सति पर्यवसानतो रसमार्यादिकीत्वमप्युक्तेच्छाया ज्ञायते. [१]प्रिया त्विमं वृत्तान्तमजानन्ती पूर्ववदेव प्रियः करिष्यतीति ज्ञात्वा **नय मामि**ति क्रियाशक्तिं प्रार्थितवती. परन्तु **यत्र ते मन** इत्यज्ञात्वाप्युक्तेर्भगवन्मन उक्तकार्येऽस्तीति पूर्ववत्क्रियोद्गमस्याशक्यत्वादुभयोः[२] प्रभुरशक्यमेवोपदिष्टवान्प्रियायाः स्वस्कन्धारोहणं, न तु स्वस्य. अग्रिमरसदित्सया प्रभुः स्वहार्दं न ज्ञापयतीति प्रिया प्रियस्कन्धमेव बुद्ध्वा तथैव कर्तुमुद्यताभूत्. तदा प्रभुस्तथाकरोत्. एतत्सर्वं हृदि कृत्वाचार्यैरुक्त**मेषा हि नृत्यमि**त्यादि. नटो हि नृत्यचेष्टया स्वान्तःस्थं रसं द्रष्टारमनुभावयति, एतद्धर्मसाम्येनात्रापि **नृत्य**पदप्रयोगः कृतः. एतदेव विवृतं **स्वान्तरि**त्यादिना. पूर्वं प्रभुणा सर्वथा तदधीनत्वेन रसो दत्तः सोऽन्तःप्रियाया अस्तीत्यधुना स्वयं तं रसं प्रियमनुभावयितुं वाक्कृती प्रकटयति. तच्चाशक्यं, भक्तस्नेहेनैव तद्वशीभूतस्तथा रमते, न त्वन्यथापि. प्रकृते हि "न पारयेहमि"त्यादिस्नेहरीतिविरुद्धम्. यद्रसमार्गाविरुद्धमिति तथा कर्तुमुचितं भवतीत्युच्यते, तन्न साधीयः, तथा सति रसस्वाभाव्येन प्रियान्तःस्थरसच्युतेः किं प्रियमनुभावयेत्? अग्रिमरसदानप्रतिबन्धश्च[३] भवेत्. इदमेवोक्तं **तद्भूमावि**त्यादिना. एतदर्थस्तु

## योजना

**स्कन्धमारुह्यतामितीत्य**स्य विवरणे **एषा हि नृत्यं कर्तुं वाञ्छति स्वान्तर्गतं रसमभिनेतुमि**ति. अयमर्थः. भगवता सह रमणे यो रसोऽनुभूतः सोऽन्तस्तिष्ठति. तस्याभिनयो नृत्येन कर्तव्यः, अभिनयस्य नृत्यसाध्यत्वात्.

---

१. **एषा हि नृत्यमित्यादिग्रन्थतात्पर्यमाहुः प्रियेत्यादि.** २. संयोगविप्रयोगयोरित्यर्थः.
३. प्रतिबन्धकश्च मू. पा.

ऊर्ध्वभावाभावात् रसः च्युतो भवेत्, अतः स्वस्कन्धमेवारुह्यतामिति. स एवात्यन्तं नटवटुः यः स्वस्कन्धमारुह्य नरीनर्ति. अशक्यं ह्युपदिशति, प्रार्थितं तथेति. भगवतो हि मनः अलौकिकरसाभिनयने, तद्भूमौ पदस्थापने न भवति. अशक्ता चेत् कथं वदेत्? अतो मम तत्रैव मनः, यदि तथा करिष्यति

## टिप्पणी

**तद्** उक्ताभिनयनं **भूमौ** स्वान्तर्लक्षणस्थानं त्याजयित्वा बहिःस्वप्रौढ्या तत्प्रकटने न सम्भवतीति शेषः. तत्र हेतु**रूर्ध्वभावे**त्यादि. स्वान्तर्गुप्तो हि रसामृताब्धिरुत्तरोत्तरं भावतरङ्गाननुभावयति, इदमेवोर्ध्वभावत्वम्. सएव बहिःप्रकटितो रसत्वादेव बहिर्भवति. [1]अतोऽयमेवोर्ध्वभावाभावः. **च्युतः** स्वरूपतएव नष्टो **भवेदि**ति यावत्. **अलौकिकरसाभिनयनं** विरहेणार्त्यादिप्रकटनं तत्, लौकिकरीत्या स्वाधिक्यज्ञापनं **भूमौ पदस्थापनम्;** तस्मिन्सति तन्न सम्भवतीत्यर्थः. **अशक्ता चेदि**ति, "यत्र ते मन" इति प्रौढ्या, न तु प्रार्थनरीत्या, सख्येन **कथं वदेदि**त्यर्थः.

## प्रकाशः

**एवमुक्त** इत्यत्र सुबोधिन्यां **नटवटुरि**ति वट वेष्टने कर्तरि उप्रत्ययः. तथा च **नटेषु वटु**र्वेष्टकः स्वांगवेष्टनचतुर इत्यर्थः. (टिप्पण्याम्!) **एषा हि नृत्यमि**त्यादिग्रन्थस्य तात्पर्यमाहुः **प्रिया त्वि**त्यादिना. **उभयोरि**ति संयोग-

## लेखः

**स्वस्कन्धमेवे**ति, स्वान्तरेवानुभवः कर्तव्यो न तु रसो बहिः प्रकटनीयः, तथा सति अन्यथा भवेत्. लीलारम्भे स्वानन्दस्य स्थानत्यागेनान्यथाभवनाभावार्थं योगमाया-श्रयणमुक्तम्. अत्र भगवदिच्छाभावाद्योगमाया न तथा करोति, अतोऽन्यथा भवेदेवेति भावः. रसाधिक्येन तथाभावानन्तरं यथाक्रमकरणे

## योजना

अतोऽभिनयं चिकीर्षुर्नृत्यं कर्तुं वाञ्छतीत्यर्थः. **तद्भूमौ पदस्थापने ऊर्ध्वभावाभावात् रसः च्युतो भवेदि**ति. **भूमौ पदस्थापने** इति, भगवता सह चरणाभ्यां चलने इत्यर्थः. **रसश्च्युतो भवेदि**ति, अभिनायमानः[2] शृङ्गाररसश्च्युतो भवेद् बोधविषयो न भवेदित्यर्थः. **स एवे**त्यारभ्य **नरीनर्ती**त्यन्तं, सङ्गीतशास्त्रे नृत्यविशेषे स्वस्कन्धारोहणमुक्तं. तदतिकठिनम्. अतो यो नर्तकः स्वस्कन्ध-

१. अयमेवो° मू. पा. २. अभिनयाभावाद् इति मुं. वि. पाठः.



तदा नेष्यामीति. नह्यनधिकारी नेतुं योग्यः. भगवांस्तु नान्यथा वदतीति न स्वस्कन्धसम्भावना. तया तु मोहवशात् तथैव बुद्धम्. ततो मोहवशात् तथा चिकीर्षमाणां तां दृष्ट्वा **ततोऽप्यन्तर्दधे,** यतोऽयं **कृष्णः** सदानन्दः. ततः पूर्ववदेव सापि जातेत्याह **सा वधूरन्वतप्यते**ति. **वधूरि**ति सा अनन्यपूर्वा व्रतमध्यस्था, तत्रापि गुणातीता. अतः **अन्वतप्यत** अनुतापं कृतवती ॥३८॥

## टिप्पणी

(एवं सति भङ्ग्यन्तरेणाप्येतद्व्याकृतिः सम्भवति. तथा हि. भगवता ह्यस्यै प्रियायै पूर्णः स्वरसो दत्त इति भगवन्निष्ठा भावाः सर्वे हृदि स्फुरद्रूपा[1] जाताः. तथा च सर्वत आधिक्यमपि स्वस्मिन् स्फुरितम्. तदुक्तं **हित्वा**

## लेखः

उभयनिष्ठरसच्युतेः शास्त्रसिद्धत्वादत्रापि "क्रिया सर्वापि सैवे"त्युक्तत्वाच्छास्त्ररीत्यैव रसानुभवं करोतीति तथा सम्भावना. भगवतोऽच्युतत्वेऽपि तत्र तथा सम्भाव्य-वियोगोपदेश इति निगूढं विभावनीयम्. **नेष्यामीती**ति, विरहेणार्त्यादिप्रकटनेऽदृश्यरूपेण नेष्यामीत्यर्थः. अतएव "पुनः पुलिनमागत्ये"ति श्लोके तथा व्याख्यास्यते. **सा वधूरि**त्यत्र **वधू**पदेन भगवत्समानत्वमुक्तमित्याशयेनाहुः **गुणातीते**ति ॥३८॥

## योजना

मारुह्य नरीनर्ति स अत्यन्तनटश्रेष्ठ इत्यर्थः. नन्वत्र भगवत्स्कन्धारोहणमेव भगवताऽऽज्ञप्तमित्येव कुतो नोच्यत इति चेत्, न, "सत्यं देवानामनृतं मनुष्याणामि"ति श्रुतौ मृषाभाषणस्य मनुष्यासाधारणधर्मत्वान्मनुष्यासाधारणधर्माणां "मायामनुष्यस्य वदस्व विद्वन्नि"त्यादिवाक्यैर्भगवत्यभावात्. तदेतदाहुः **भगवांस्तु नान्यथा वदतीति न स्वस्कन्धसम्भावने**ति. **सा वधूरन्वतप्यते**त्यस्य विवरणे **अनन्यपूर्वा व्रतमध्यस्था तत्रापि गुणातीते**ति, **वधू**पदस्य अननुभूत-शृङ्गाररसायां नवोढायां "वरवध्वोः सुमङ्गलं" "वधूप्रवेशः खलु मङ्गलप्रद" इत्यादिवाक्यैः शक्तत्वस्य निर्धाराद् इयं **अनन्यपूर्वे**त्युक्तं, **सा वधूरन्वतप्यते**ति-**वधू**पदात्. **से**ति तच्छब्देन पूर्वोक्तपरामर्शिना **व्रतस्था** ग्राह्या, पूर्वं व्रतस्थानामेव रासक्रीडायां निरूपितत्वात्. **अन्वतप्यते**त्यनुतापकथनाद्गुणातीतत्वम्. अन्यथा रोषादिकं कुर्यात् नत्वनुतापम्, अतो गुणातीतत्वम् ॥३८॥

१. स्फुरिता मू. पा.

## टिप्पणीः

**गोपीरि**त्यादिना. एवं सति द्वितीयरसलीलाचिकीर्षा यदाभूत्सापि हृदि स्फुरिता. तामविषह्यां मन्यमानापि न कातरा जाता किन्तु पूर्वरसगरिम्णा दृढा सती प्रियमब्रवीत्. एतदेव **दृप्ता**पदेनोक्तम्. दुष्टगुणव्याप्तयोरप्यमृतं ददाति, अहं त्वेतद्गुणैरेव पूर्णेति अवश्यं सुखमेव दास्यति न दुःखमित्यभिप्रायज्ञापनाय **केशव**पदम्. **ततो भोगस्थानादग्रे वन**सम्बन्धिन**मुत्कृष्टं देशं** स्वयं स्वेच्छया **गत्वा** न तु प्रियेण नीता. [1]**गत्वाऽब्रवीदि**त्युक्त्या प्रियनैकट्यं ज्ञाप्यते. तेन तदधीनएव प्रियस्तत्संगे गत इति ज्ञापितं भवति. अथवा **वनमित्युद्देशो** नाममात्रं, वस्तुतस्तु महारसनिधानम्. तेन रसोद्दीपकमित्युक्तं भवति. "एतादृशे वने मद्वियोगेन मां विचिन्वन् यदि प्रियो भवति तदा कीदृशो रसः स्यादि"त्याशयेनाब्रवीत्. [2]अतएव **दृप्तात्वमुक्तम्**. पूर्वरसातिमदात्तथा चेत्करिष्यतीति तदाऽ**हं चलितुं** स्पन्दितुमपि **न पारये** जीवनमेव न संपत्स्यत इति भावः. एवं चेत् किं कर्तव्यमित्याकाङ्क्षायामाह **नये**ति, **यत्र** स्वान्तर्धाने **ते मन**स्तत्रान्तर्धाने **मां नय** तिरोहितां मां कुरु, त्वं मा तथा भवेत्यर्थः. प्रियस्त्विदमत्यशक्यमित्याशयेनोत्तरयति **स्कन्धे**त्यादिना. यथा स्वस्कन्धारोहणमशक्यं, तथा मत्तोऽन्तर्धानं भवत्याः. न हि पूर्णज्ञानशक्तेरविषयः कोऽपि भवितुं शक्नोति. यद्यपि विरुद्धसर्वधर्माश्रयत्वेन रसात्मकत्वेन च जानन्नेवाजानन्नपि भवितुं शक्नोतीत्येवमुत्तरं न सम्भवति, तथाप्यत्रातिप्रीतिविषयत्वेन "तं धर्मं प्रकटयितुं न पारय" इति भगवदाशयज्ञापनाय **प्रिया**पदमुक्तम्. उत्तरदानमप्यतएव, अन्यथा त्वेवमुक्तस्तूष्णीं तिष्ठेत्तिरोधीयेतैव वा. "प्रियात्वान्ममाशक्यं भवत्यास्तिरोधानं, तत्सामर्थ्याभावाद्भवत्याः [3]स्वतस्तिरोधानं [4]तथे"ति भावः. एवं सति प्रियया प्रार्थितं देयं यद्यपि, तथापि प्रियात्वेन स्वाशक्य**मिति** लक्षणो यो हेतु**स्ततो** हेतोः स्वयमेव तथाऽकरोदित्याह **ततश्चे**ति. एवं करणे प्रभुनिष्ठं हेतुमाह

## प्रकाशः

विप्रयोगावस्थयोः. स्वतन्त्रे **स्वतस्तिरोधानं तथे**ति, भगवतः सकाशात्तत्तिरोधानं स्वस्कन्धारोहणतुल्यमित्यर्थः ॥३८॥

१. 'गत्वा' इति नास्ति मूलपाठे. २. अतो दृप्तात्वमुक्तम् मू. पा.
३. भगवतः ४. स्वस्कन्धारोहणतुल्यमित्यर्थः.



न केवलमन्तरनुतापः किन्तु तज्जनितो बहिरपि विलापो जात इत्याह **हा नाथे**ति.

**हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज।**
**दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिम् ॥३९॥**

**हा** इति पश्चात्तापे, अयुक्तं कृतमिति. तथापि हे **नाथ** त्वमेव स्वामी, अतो दोषएव दूरीकर्तव्यो न तु त्यक्तव्या. ननु दूरे स्थित्वा पालनं करिष्यामीति चेत्, तत्राह **रमणे**ति, त्वमेव रतिवर्धको भोक्ता, भोग्यरूपाश्च वयम्, अतो निकटएव स्थातव्यमिति भावः. नन्वनुरोधेन केवलं पालनं करिष्यामि, भोक्तुरिच्छाभावात्; न हि भोग्येच्छया भोक्ता भुंक्ते, तत्राह **प्रेष्ठे**ति, न ह्यन्यः प्रीतिविषयोऽस्ति येन जीविष्यामि. अत्यन्तं व्याकुलाया वचनमाह **क्वासि क्वासी**ति. मोहवशाद् अन्धा पतिता च जाता, तत उत्थापनार्थं संबोधयति **महाभुजे**ति, महान् भुजो यस्य. महती क्रियाशक्तिः, अतो दोषएव दूरीकर्तव्यो नत्वहम्. यतोऽहं **दासी,** तत्रापि **ते** तवैवाहं दासी. स्वभावत एवाहं **कृपणा** अनालोचितयाचिका, अतो मद्वचनान्नान्यथाभावः कर्तव्यः. एवं प्रार्थनायां परमकृपालुस्तामुत्थाप्य स्वस्थां कृतवान् अदृश्यरूपेणैव. तदा पुनराह हे **सखे,** स्पर्शेन स्वधर्मारोपात्स्व**संनिधिं दर्शय** वर्तसे निकटे तथापि यथा सान्निध्यं दृष्टं भवति तथा कुरु. एवमेव वदन्ती स्थिता. भगवानपि तत्रैव स्थितः ॥३९॥

ततो यज्जातं तदाह **अन्विच्छन्त्य** इति.

**अन्विच्छन्त्यो भगवतो मार्गं गोप्यो विचेतसः।**
**ददृशुः प्रियविश्लेषमोहितां दुःखितां सखीम् ॥४०॥**

पूर्वोक्ता **गोप्यः** भगव**न्मार्गमन्विच्छन्त्यः** अविदूरतएव तां **ददृशुः.** तासां क्रोधाभावायाह **दुःखितामि**ति, न हि दुःखितायां क्रोधो भवति. दुःखे हेत्वन्तरनिराकरणायाह **प्रियविश्लेषमोहितामि**ति, भगवतएव विश्लेषेण परममोहं मूर्च्छां प्राप्ताम्. सापि तासां **सखी.** अतः सख्यभावेन बह्व्यः तां प्रबोधितवत्यः, "न दुःखं पञ्चभिः सहे"ति ॥४०॥

## टिप्पणी

**कृष्ण** इति, अस्यां दशायां हृदि प्रकटः सन्नेवानन्दात्मकतद्रसपोषको यत इत्यर्थः.)॥३७-३८॥ ॥ इति सप्तविंशोध्यायः ॥

पूर्वमेताः "भगवानेवमेव कौतुकार्थं गतः न त्वस्मद्दोषेणे"ति ज्ञातवत्यः. अन्यथा दोषनिराकरणार्थमेव यत्नः कृतः स्यात्. स्वदोषपरिज्ञानं च भगवत्कृपयैव भवति न स्वत इति ज्ञापयितुं सा नीता. पश्चात् त्यक्ता कथनार्थमेव, अतो भगवदिच्छया सर्वं कथितवती. तत्र वक्तव्ये यत्प्रयोजकं तदाह **तया कथितमि**ति.

**तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् ।**
**अवमानं च दौरात्म्याद्विस्मयं परमं ययुः ॥४१॥**

**मानप्राप्तिं च माधवाद्, अवमानं च दौरात्म्यादिति तया कथितं** यद्यपि बह्वेव श्रुतम्, तत्रैतावानर्थो निर्धारितः– सन्माननं यत्प्राप्तं तन्न स्वगुणैः किन्तु लक्ष्मीपतेरेव गुणैः, लक्ष्म्यंशा एता इति. **दौरात्म्यात्** स्वधमदिव **अवमानम्. च**कारात् खेदभ्रमादयः. एवं भगवतः अलौकिकं सामर्थ्यं दृष्ट्वा **परमं विस्मयं** प्राप्ताः. एवं तद्वाक्यैः पदार्थनिर्धारो जातः– अन्वेषणादिना भगवान् न प्राप्तव्य इति ॥४१॥

अतः परं भगवत्प्रसादे को हेतुरिति विचार्य, सर्वपरित्यागेन देहपरित्यागपर्यन्तं साधनमिति निश्चित्य, तथा कृतवत्य इत्याह **तत** इति.

**ततोऽविशन् वनं चन्द्रज्योत्स्ना यावद्विभाव्यते ।**
**तमः प्रविष्टमालक्ष्य ततो निववृतुर्हरेः ॥४२॥**

**ततो वनमविशन्.** मोहनिवृत्त्यर्थं वनप्रवेशः. वनं गतानामपि चेन्मोहः तदा किं वनप्रवेशेनेति **चन्द्रज्योत्स्ना यावद्विभाव्यते** तावद्दूरमेव गताः, अतिनिबिडवनं तु न प्रविष्टाः. यदा पुनर्गाढे वने[1] अन्तश्चन्द्रकिरणा न प्रविशन्ति, तदा तत्र **तमः प्रविष्टमालक्ष्य ततो निववृतुः** निवृत्ता जाताः.

**लेखः**

**तया कथितमि**त्यत्र. **प्रयोजकमि**ति. प्रयोजनं वक्ष्यमाणार्थनिर्धारस्तज्जनकं मानप्राप्त्यवमानबोधकं वाक्यमित्यर्थः ॥४१॥

**तत** इत्यत्र. **मोहे**ति, मोहो भगवद्भावान्यभावो, दोष इति यावत्, तन्निवृत्त्यर्थमित्यर्थः. **चन्द्रे**ति, एतच्चन्द्रस्य स्वामिनी-मनोरूपोडु-रक्षकत्वं पूर्वमुक्तम्, अत एतत्प्रकाशरहिते देशे दोषएव भविष्यति न तु तन्निवृत्तिरिति भावः ॥४२॥ सप्तविंशाध्यायव्याख्या समाप्ता ॥

१. गाढवने इति बडौदापाठः.



ननु प्रथमं यदुद्योगेन वनं गताः तदकृत्वा कुतो वा निवृत्ता इत्याशंक्याह **हरेरि**ति, **हरेः** सकाशाद् **हरेः** सम्बन्धिन्यो वा **ततो** अन्धकारान्निवृत्ताः, न हि भगवदीया अन्धकारं प्रविशन्ति. भगवतैव निवर्तिताः ॥४२॥

निवृत्ताः चेद् गृहं गताः भविष्यन्तीत्याशंकायामाह **तन्मनस्का** इति.

**तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ।**
**तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः ॥४३॥**

**ता नात्मागाराणि सस्मरुः. आत्मानं** देहम् **अगारं** गृहम् तत्सम्बन्धीनि च वस्तूनि स्मृतवत्यएव न, कुतो गमिष्यन्ति! अस्मरणे हेतवः **तन्मनस्का** इत्यादिभिः पञ्चभिः पदैः पञ्च निरूप्यन्ते. स्मृतिर्मनसि जायते, तन्मनस्तु केवलं भगवत्येव, अत**स्तन्मनस्काः** भगवन्मनस्का **न सस्मरुः**. अन्यद्वाराप्य-स्मरणार्थमाह **तदालापा** इति. अन्या अपि चेदन्यवार्तां कुर्युः तदा तत्प्रसङ्गाद् गृहादिस्मरणं भवति, सर्वाएव **तस्मिन्** भगवत्ये**वालापो** यासाम्. अतोऽन्यतोऽपि न स्मरणम्. ननु दैहिकी क्रिया क्षुत्पिपासाकृता आवश्यकी, तया देहादिस्मरणं भविष्यतीति चेत्, तत्राह **तद्विचेष्टा** इति, **तस्यैव** भगवतः पूर्ववच्चेष्टाविष्टाः. ननु तथापि सर्वज्ञानेष्वात्मांशः स्फुरति "घटमहं जानामि, पटमहं जानामी"ति, अतः कथमात्मास्फूर्तिः? तत्राह **तदात्मिका** इति, स एवात्मा यासाम्. सर्वदा कृष्णात्मभावनैव चित्ते सहजा तासाम्. अत आत्मत्वेन भगवानेव स्फुरति इति न देहादिस्फुरणम्. ननु "सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधका" इति अदृष्टवशात् कथं न स्मृतिः? तत्राह **तद्गुणानेव गायन्त्य** इति, यदि तूष्णीं तिष्ठेयुः भवेदपि स्मृतिः! अन्यासक्तास्तु ताः कार्यान्तरपराः. यत**स्तस्य** भगवतो **गुणानेव गायन्ति,** गुणैः कृत्वा दुरदृष्टं च नश्यति, अतो नादृष्टद्वारापि स्मृतिबोधः ॥४३॥

तर्हि किं जातमित्याकाङ्क्षायामाह **पुनः पुलिनमागत्ये**ति.

**प्रकाशः**

[ **यदुद्योगेने**ति, देहत्यागपूर्वकं विवेचनम् उद्योगः. **भगवदीया** इति भगवत्सम्बन्धिनः ॥४२॥ ]

*॥ इति सप्तविंशाध्यायसुबोधिनीटिप्पण्योः प्रकाशः ॥*

**पुनः पुलिनमागत्य कालिन्द्याः कृष्णभावनाः ।**
**समवेता जगुः कृष्णं तदागमनकाङ्क्षया ॥४४॥**

॥ इति श्रीभागवतमहापुराणे दशमस्कन्धपूर्वार्धे सप्तविंशोऽध्यायः ॥

पूर्वं पुलिने स्थिता यत्र तत्रैव **पुनरागताः**. ननु विवेकरहिताः कथं तत्रागताः? तत्राह **कृष्णभावना** इति, कृष्णएव भावना यासाम्. तेन भगवदिच्छया भगवत्प्रेरणया तत्रैव स्थाने भगवान् रतिं करिष्यतीति निश्चित्य तत् स्थानमस्माकं हितकरमिति तत्रैवागताः. ततः "कस्या वा भाग्यात् स्नेहेन कृपया वा आगच्छेदि"ति संदेहात् **समवेता** जाताः. तदा साधनान्तरमलभमानाः **कृष्णं** सदानन्दं **जगुः**, दोषनिवारणे हरिगुणगानमेव साधनमिति. निवृत्ते पुनर्दोषे स्वयमेवायास्यतीति **तदागमनकाङ्क्षया जगुः** ॥४४॥

श्रीकृष्णगोपिकास्तत्र द्विविधा नवधा गुणैः ॥(१३)॥
समुदायेन भिन्ना वा गतगर्वा असाधनाः ।
हरेर्गानं प्रियं मत्वा जीवनार्थमपि प्रियाः ॥(१४)॥

---

### योजना

अध्यायविवृतिसमाप्तौ कारिकाद्वयम् **श्रीकृष्णगोपिकास्तत्रे**त्यादि. **द्विविधा** इति श्रुतिरूपाग्निकुमारभेदेनेत्यर्थः. **नवधे**ति सात्विकादित्रिकभेदेनेत्यर्थः. **समुदायेन भिन्ना वे**ति, समुदायेन यूथेन नवधेत्यर्थः. पूर्वस्मिन् पक्षे गोपिकाः प्रत्येकं सात्विक्यः राजस्यस्तामस्यश्चेति. अस्मिन् पक्षे तु समुदायेन तामसत्वं राजसत्वं सात्विकत्वं च. तथा च कश्चिद्यूथः सात्विकीनां, कश्चिद्राजसीनां, कश्चित्तामसीनाम्. तत्रापि सात्विकीनां त्रिकं राजसीनां त्रिकं तामसीनां त्रिकं चेति नवप्रकारा यूथा इति फलितम् (१३-१४).

॥ इति श्रीमन्निरोधस्कन्धसप्तविंशाध्यायसुबोधिनीयोजना सम्पूर्णा ॥

### कारिकार्थः

अध्यायसमाप्तौ **श्रीकृष्णगोपिकास्तत्र द्विविधा नवधा गुणैरि**ति. अन्यपूर्वानन्यपूर्वाभेदेन **द्विविधाः** पुनः प्रत्येकं राजस्यादिभेदेन नवधा इत्येवमष्टादशविधा. उपलक्षणविधया एकोनविंशतितमापि ज्ञेया. पक्षान्तरमाहुः **समुदायेन भिन्ना वे**ति, समुदायभेदेन भिन्नप्रकारा इत्यर्थः. पक्षद्वयमपि



स्वसंदेहात्तु मिलिता जगुर्नानाविधैर्गुणैः ॥

*॥ इति श्रीभागवतसुबोधिन्यां*
*श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां*
*दशमस्कन्धविवरणे सप्तविंशाध्यायविवरणम् ॥*

---

### कारिकार्थः

अग्रिमाध्यायकारिकासु स्वयमेव वदिष्यन्ति. **स्वसन्देहात्तु मिलिता** इति, "कस्या वा भाग्येन स्नेहेन कृपया वा आगच्छेदि"ति संदेहात् मिलिता जाता इत्यर्थः. तदुक्तं "पुनः पुलिनमागत्ये"ति श्लोकविवरणे सुबोधिन्याम् (१३-१४$\frac{१}{२}$).

**॥ इति सप्तविंशोऽध्यायः ॥**

# ॥ तृतीयः स्कन्धादितः अष्टाविंशोऽध्यायः ॥

अष्टाविंशे हरेर्गानं स्वभावादपराधतः ।
कृतावज्ञा गोपिका हि स्तोत्रं चक्रुरितीर्यते ॥(१)॥
एकोनविंशतिविधा गोप्यः स्वस्याधिकारतः ।
एकोनविंशतिविधां स्तुतिं चक्रुर्हरेः प्रियाम् ॥(२)॥
राजसी तामसी चैव सात्त्विकी निर्गुणा तथा ।
एवं चतुर्विधा गोप्यः पतिमत्यो निरूपिताः ॥(३)॥

---

### टिप्पणी

अष्टाविंशाध्यायार्थोक्तौ **स्वभावादपराधत** इति, तदवस्थायाएव स्वभावो यद्गुणगानमेव भवत्येव. अतस्त**त्स्वभावादेव गानं चक्रुरि**ति सम्बन्धः. पक्षान्तरमाहु**रपराधत** इति. भक्तेभ्योऽपि स्वस्मिन्नाधिक्यज्ञान-लक्षणमपराधं प्राप्य "अस्मान् यदि प्रार्थयिष्यति तदा रसं दास्याम" इति मानलक्षणा **कृताऽवज्ञा** याभिस्तादृश्यो यतोऽतः **स्तोत्रं चक्रु**रित्यर्थः. अवज्ञयाऽप्रसादे स्तोत्रेण प्रसादो भविष्यतीति तथेति भावः. यद्वा. **स्वभावाद्र**सस्वभावाद्यो**ऽपराध** इत्यग्रे पूर्ववत्. **स्तोत्रमि**ति गानविशेषणम्, तथा च स्तोत्ररूपं गानं चक्रुरित्यर्थः. अग्रे गुणकथनं भाववैजात्यज्ञापनार्थमिति ज्ञेयम् (१).

### लेखः

अष्टाविंशेऽध्याये कारिकासु **इतीर्यत** इति, **इति**हेतोस्त**त्स्तोत्रमष्टाविंशे ईर्यते** इत्यन्वयः (१).

**राजसी**ति, अत्र सत्त्वादिक्रमो न विवक्षित इति ज्ञेयम् (३).

### योजना

श्रीगिरिधारी जयति. अष्टाविंशाध्यायार्थोक्तौ **स्वभावादपराधत** इत्यादेरर्थष्टिप्पण्यां स्फुटः. **राजसी तामसी चैव सात्त्विकी निर्गुणा तथा एवं चतुर्विधा गोप्यः पतिमत्यो निरूपिता** इत्यादिकाः— **पतिमत्यः** श्रुति-रूपाः गोपानां स्त्रियश्चतुर्षु श्लोकेषु स्तुतिकर्त्र्यो निरूपिता इत्यर्थः (१-३).



### प्रकाशः

अष्टाविंशाध्यायं विवरिषवः पूर्वाध्यायसमाप्तावेव कथासङ्गतेरुक्तत्वादर्थ-मेवाहुः **अष्टाविंश** इत्यादि (१). [**पतिमत्यो** इति अन्यपूर्वा. **सपूर्वा** इति अन्यपूर्वा. **परा** इति सात्त्विकी (३-६). टिप्पण्यां **कुमारीभिरि**ति, एताः

### कारिकार्थः

अष्टाविंशाध्याये **अष्टाविंश** इत्यादिकारिकाः. अथ संक्षेपतो विभज्यन्ते द्विविधा गोप्यः. तत्र अन्यपूर्वा दशविधाः कुमारिका नवविधाः. तथा हि— "जयति ते" (श्लो. १) इति सात्त्विकराजसी-१. "शरदुदाशये" (श्लो. २) इति सात्त्विकतामसी-२. "विषजलाप्ययात्" (श्लो. ३) सात्त्विकसात्त्विकी-३. "न खलु गोपिकानन्दन" (श्लो. ४) निर्गुणा-४. "दिनपरिक्षये" (श्लो. १२) इति द्वादशे श्लोके राजसतामसी-५. "प्रणतकामदं" (श्लो. १३) राजसराजसी-६. "सुरतवर्धनं" (श्लो. १४) राजससात्त्विकी-७. "अटति यत्" (श्लो. १५) सत्त्वमिश्रतामसी-८. "पतिसुतान्वय" (श्लो. १६) इत्यत्र तामसतामसी-९. "रहसि संविदं" (श्लो. १७) रजोमिश्रतामसी-१०.

अथ कुमारिकाभेदः— "विरचिताभयम्" (श्लो. ५) सात्त्विकसात्त्विकी-१. "व्रजजनार्तिहन्" (श्लो. ६) सात्त्विकतामसी-२. "प्रणतदेहिनाम्" (श्लो. ७) सात्त्विकराजसी-३. "मधुरया गिरा" (श्लो. ८) इत्यत्र निर्गुणाः-४. "तव कथामृतं" (श्लो. ९) राजससात्त्विकी-५. "प्रहसितं" (श्लो. १०) राजस-तामसी-६. "चलसि यद् व्रजात्" (श्लो. ११) राजसराजसी-७. "व्रजवनौकसां" (श्लो. १८) सत्त्वमिश्रतामसी-८. "यत्ते सुजात" (श्लो. १९) रजोमिश्रतामसी-९.

**स्वभावादपराधतः** इति. विप्रयोगावस्थायाः **स्वभावादेव गानं चक्रुः**. पक्षान्तरमाहुः **अपराधतः** इति, स्वस्मिन् आधिक्यज्ञानलक्षणो**ऽपराधः कृता** मानलक्षणा **अवज्ञा** याभिः तादृश्यः **स्तोत्रं चक्रुः** इत्यर्थः (१).

**राजसीतामसी**त्यादि. "जयति तेऽधिकं जन्मना व्रज" इति श्लोके सात्त्विकराजसी, "शरदुदाशये" इत्यत्र सात्त्विकतामसी, "विषजलाप्ययाद्" इत्यत्र सात्त्विकसात्त्विकी, "न खलु गोपिकानन्दनः" इत्यत्र निर्गुणा— **एवं चतुर्विधाः पतिमत्यः** अन्यपूर्वा **निरूपिताः** (३).

तदनन्तरं सप्तविधा गोप्यः कुमारिकाः. ततः षड्विधाः पुनः सपूर्वाः. तत्र "दिनपरिक्षये" इति द्वादशे श्लोके राजसतामसी. "प्रणतकामदम्"

तथैवानन्यपूर्वाश्च प्रार्थनामाहुरुत्तमाम् ।
गुणातीताः सात्त्विकीश्च तामसी राजसीस्तथा ॥(४)॥
कृष्णभावनया सिद्धा विशेषेणाह ताः शुकः ।
अनन्यपूर्विकाएव पुनस्तिस्रो मुदा जगुः ॥(५)॥
सात्त्विकी तामसी चैव राजसी चेति विश्रुताः ।
सपूर्वाश्च ततस्तिस्रः तामसी राजसी परा ॥(६)॥

**योजना**

ततश्चत्वारः श्लोकाः अनन्यपूर्वाणामित्याहुः **तथैवे**त्यारभ्य **राजसी तथे**त्यन्तेन (४).

ततः पुनरपि त्रयः श्लोकाः अनन्यपूर्वाणामेवेत्याहुः **अनन्यपूर्विका** इत्यारभ्य **विश्रुता** इत्यन्तेन. ततः श्रुतिरूपाणां त्रयः श्लोकाः इत्याहुः **सपूर्वा** इत्यारभ्य **परे**त्यन्तेन. **परा**शब्देन सात्त्विकी गृह्यते (५-६).

**कारिकार्थः**

इत्यत्र राजसराजसी. "सुरतवर्धनम्" इत्यत्र राजससात्त्विकी. "अटति यद् भवानह्नि" इत्यत्र देवनिन्दका सात्त्विकतामस्यः. "पतिसुतान्वय" इत्यत्र भगवन्निन्दकाः तामसतामस्यः. "रहसि संविदम्" इत्यत्र स्वनिन्दका राजसतामस्यः. इत्याभासोक्तः क्रमः. कारिकोक्तक्रमानुसारेण तु देवनिन्दकाः राजसतामस्यः आत्मनिन्दकाः सात्त्विकतामस्यः इत्यायाति. तथा च उक्तं कारिकायां **राजसी तामसी चैव सात्त्विकीति विभेदतः** इति. तथा च अत्र कारिकोक्तक्रमस्य अविवक्षितत्वेन वा तात्पर्यान्तरेण वा कारिकोक्ताभासोक्तपक्षयोः व्यवस्था ज्ञेया. एवं द्वादशादिसप्तदशान्तश्लोकोक्ताः षड्विधा आद्याश्चतस्रश्चेति दशविधा अन्यपूर्वाः.

अथ कुमारिकाः. "विरचिताभयम्" इत्यत्र सात्त्विकसात्त्विकीत्युक्तमाभासे. कारिकायां तु **गुणातीता** इत्युक्तम्. **गुणातीता** इत्यादिपदचतुष्टयं द्वितीयाबहुवचनान्त**माह** इत्यनेन सम्बध्यते. "व्रजजनार्तिहन्" इत्यत्र सात्त्विकतामसी. "प्रणतदेहिनाम्" इत्यत्र सात्त्विकराजसी. "मधुरया गिरा" इति श्लोके निर्गुणेति प्रतिभाति, पूर्वोक्तैः त्रिभिः श्लोकैः सगुणानामुक्तत्वात्. "तव कथामृतम्" इत्यत्र राजससात्त्विकी. "प्रहसितम्" इत्यत्र राजसतामसी. "चलसि यद् व्रजाद्" इत्यत्र राजसराजसी. अथ "व्रजवनौकसामि"ति



पुनस्ताएव त्रिविधा अटतीत्यादिभिस्त्रिभिः ।
राजसी तामसी चैव सात्त्विकीति विभेदतः ॥(७)॥
अनन्यपूर्वा द्विविधा राजसी सात्त्विकी तथा ।
तमसा तामसी तत्र नास्तीत्येकोनविंशतिः ॥(८)॥
अथवा प्रार्थनाद्याः याः सप्तान्ते द्विविधा पुनः ।
चतुर्थ्यस्तु समास्तत्र तत एकोनविंशतिः ॥(९)॥

**टिप्पणी**

गूढाभिसन्धिना पक्षान्तरमाहुः **अथवे**ति. प्रार्थनाश्च ता आद्याश्च **प्रार्थनाद्याः याः** प्रथमद्वितीयतृतीयपञ्चमषष्ठसप्तमाष्टमश्लोकैः कृताः, **अन्ते** त्रयोदशचतुर्दशाभ्यां च सान्निध्यात् कुमारिकाभिः[१] कृताः, अन्ये तु प्रौढाभिरुक्ताः श्लोकाः. **चतुर्थ्यो** गुणातीतभावापन्नाः कोमलभावा इति यावत्. अतस्तथा श्लोकसंख्येत्यर्थः (९).

ननु "तदागमनकाङ्क्षया जगुरि"ति वचनाद्यथा मानेनापराधाद् गतः तथा स्तोत्रेण सन्तुष्ट आगमिष्यतीति भावो लक्ष्यते, एवं सति दोषारोपादिर-

**प्रकाशः**

अनन्यपूर्वाः. **प्रौढाभिरि**ति, प्रौढास्तु अन्यपूर्वाः पतिमत्यो इत्यर्थः. **अतस्तथे**ति, गुणातीतास्तु समाः सर्वत्र अत एवेत्यर्थः (९). **से**ति अनेकरूपता(१०).]

**योजना**

ततः श्रुतिरूपा एव त्रिषु श्लोकेषु वक्त्र्य इत्याहुः **पुनस्ता एवे**त्यारभ्य **विभेदत** इत्यन्तेन (७).

ततः श्लोकद्वयमग्निकुमाररूपाणामित्याहुः **अनन्यपूर्वा द्विविधे**ति. एवमेकोनविंशतिश्लोकाः (८).

**कारिकार्थः**

अष्टादशे श्लोके सत्त्वमिश्रतामसी. "यत्ते सुजात" इति श्लोके रजोमिश्रतामसी. एवं पंचमादिसप्तश्लोकोक्ता अन्तिमश्लोकद्वयोक्ताश्च इति नवविधाः कुमारिकाः. **तमसा तामसी तत्रे**ति, **तत्र** कुमारिकासु **तामसतामसी नास्ती**त्यर्थः. तथा च अन्यपूर्वा दशविधाः नवविधाः कुमारिकाश्चेति ऊनविंशतिभेदाः. अयं कारिकोक्तः प्रथमः पक्षः (४-८).

१. कुमारीभिः इति बपाठः.

तत्तद्वाक्यानुसारेण तासां भावो निरूप्यते ।
अन्यथाऽनेकता स्तोत्रे प्रकारैर्नोपयुज्यते ॥(१०)॥

**टिप्पणी**

नुपपन्न इत्याशङ्क्य गूढाभिसन्धिमुद्घाटयन्तः स्तुतिस्वरूपमाहुः **तत्तदिति**. स्तुतिर्हि यथाधिकारं भवति. एतासामेतादृश एवाधिकारो येन कुहककितवादिवचनानामपि स्तुतित्वम्. अन्यथाग्रे तथानुवदिष्यन् "तदागमनकाङ्क्षया

**लेखः**

**अथवेति**. टिप्पण्युक्ताः **सप्त अन्ते द्विविधाश्च** एवं नवश्लोकाः कुमारिकाप्रार्थनाया इत्यर्थः. **पुनरप्येवं** प्रौढाप्रार्थनाया अपि नव श्लोका इत्यर्थः. अन्तिमस्तु गुणातीताप्रार्थनायाः, तास्तु कुमारिकासु प्रौढासु च **समाः** अत एकधैवोक्ता इति शेषः (९).

**योजना**

पक्षान्तरमाहुः **अथवा प्रार्थनाद्या याः सप्तेति**. प्रथमद्वितीयतृतीयपञ्चमषष्ठसप्तमाष्टमश्लोकैः कृताः प्रार्थनाः, **अन्ते द्विविधा पुनः** अन्ते त्रयोदशचतुर्दशाभ्यां प्रार्थनाः कृताः– एवं नव श्लोकाः प्रार्थनायास्ते कुमारिकाणाम्. **चतुर्थ्यस्तु समा** इति, **चतुर्थ्यो** "न खलु गोपिकानन्दन" इति चतुर्थश्लोकनिरूपकाः **समा** गुणातीता इत्यर्थः. एवं दश श्लोकाः, नवमदशमैकादशद्वादशपञ्चदशषोडशसप्तदशाष्टादशैकोनविंशश्लोकाः प्रौढानाम्– इत्थमेकोनविंशतिश्लोका इति बोध्यम् (९).

**कारिकार्थः**

गूढाभिसन्धिना पक्षान्तरमाहुः **अथवेति**. अत्र टिप्पण्यां "प्रार्थनाश्च ता आद्याश्चे"ति विग्रहः. तथा च प्रथमद्वितीयतृतीयपंचमषष्ठसप्तमाष्टमश्लोकैः कृताः **अन्ते** त्रयोदशचतुर्दशाभ्यां च कृता **याः** प्रार्थनाः ताः कुमारिकाभिः कृताः. अन्ये प्रौढाभिरुक्ताः श्लोकाः नवमादयश्चत्वारः पंचदशादयः पंच चेत्यर्थः. **चतुर्थ्यस्तु** "गुणातीतभावापन्नाः कोमलभावा इति यावद् अतस्तथा श्लोकसंख्या" इति विवृतं टिप्पण्याम्. "न खलु गोपिकानन्दन" इति चतुर्थश्लोकोक्तास्तु कुमारिकासु प्रौढासु च **समाः** एतच्छ्लोकवक्त्र्यः कुमारिकान्यपूर्वोभयविधा अपीत्यर्थः. अस्मिन् द्वितीयपक्षे सात्त्विक्यादिविभागो दुरूहः. अतएवोक्तं टिप्पण्यां "गूढाभिसन्धिना पक्षान्तरमाहुः" इति (९).



तत्र प्रथमं राजस्यः काश्चन गोप्य आहुः **जयतीति**.

**॥ श्रीगोप्य ऊचुः ॥**

**जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ।**
**दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥१॥**

मङ्गलार्थोऽत्र **जयशब्दः**, यथा फलं साधयेत्स्तोत्रं तथा निर्विघ्नार्थः. अन्यथा क्रियामादौ न प्रयुंज्यात्. त्वदवतारेण व्रजः सर्वोऽपि कृतार्थो, वयमेव परमकृतार्थाएवेति यथा वयमपि कृतार्था भवामः तथा यत्नः कर्तव्य इति वक्तुं व्रजस्य तवावतारेण सर्वोत्कर्षो जात इत्याहुः **ते जन्मना व्रजो अधिकं जयतीति**. सर्वोत्कर्षेण स्थितिः **जयो, अधिकजयो** वैकुण्ठादप्युत्कर्षः– न हि वैकुण्ठे भगवानेवंविधां लीलां करोति. यद्यपि मथुरायां जन्म जातं तथापि तेन जन्मना न मथुरा सर्वोत्कर्षेण स्थिता किन्तु व्रजएव. ननु भगवज्जन्मनः सर्वोत्कर्षहेतुत्वं न लोके प्रसिद्धम्, अनन्यत्वेनैकत्वाद्, अतस्तादृश

**टिप्पणी**

जगुरि"ति न वदेत्. न ह्येवं ब्रह्मादिभिरपि वक्तुं शक्यम्. तथा च स्वस्वभावोद्गिरणे तच्छ्रवणेन प्रभोः परमसन्तोष इति **तासां भावएव निरूप्यत** इत्यर्थः. विपक्षे बाधकमाहुः **अन्यथेति**. यद्यन्यस्तुतिवदत्रापि स्तुतित्वमेव स्यात् न भावमात्रनिरूपणं, तदोपालम्भादि**प्रकारैरनेक**रूपता स्तुतौ न सम्भवतीति सा नोच्येतेत्यर्थः (१०).

**प्रकाशः**

**जयतीत्यत्र** [**क्रियामादौ** इति, क्रियापदम् आदौ कथने दोषः. नन्दगृहे भिन्नं जन्म इति **तेन जन्मना** इति जन्मप्रकरणे कथितम्.] **अनन्यत्वेनैकत्वादि**ति, "नित्यः शब्दः शब्दत्वादि"तिवद् व्रजः सर्वोत्कृष्टः भगवज्जन्मन इत्यस्या-

**लेखः**

**जयतीत्यत्र**. **मङ्गलार्थ** इति मङ्गलप्रयोजक इत्यर्थः. मङ्गलसाधनं च प्रतिबन्धनिवर्तनेनेत्याहुः **यथेति**. **निर्विघ्नार्थ** इति, विघ्नानामभावो निर्विघ्नम्, तत्प्रयोजनक इत्यर्थः, "अर्थोऽभिधेये"ति कोशात् ॥१॥

**योजना**

**जयति तेऽधिकमित्यस्य** विवृतौ **अन्यथा क्रियामादौ न प्रयुञ्ज्यादिति**, **जयतीति**क्रियापदं पूर्वं न प्रयुञ्ज्यात् किन्तु कर्तृवाचकं **व्रज**पदमुक्त्वा **जयतीति**

उत्कर्षहेतुर्वक्तव्यो यो लोके प्रसिद्ध इति चेत्, तत्राह **श्रयत इन्दिरा शश्वदत्र हीति**[१]. **अत्र** व्रज **इन्दिरा** सर्वदा **श्रयते** हीनभावेनाश्रयं कुरुते. वैकुण्ठे तु सैव नियता भार्येति न तस्याः सर्वदा श्रयणं कर्तव्यं भवति, इह तु तादृश्यो वयमनेका इति तस्याः स्वास्थ्याभावात् कदा वा ममावसरो भविष्यतीति निरन्तरं सेवते. अतो लक्ष्मीस्थित्या लोका उत्कर्षं मन्यन्ते सा पुनर्लक्ष्मीः गोकुलाश्रया जाता. **हि** युक्तश्चायमर्थः– पतिव्रता हि सा, यत्र पतिः स्वयमन्याधीनतया तिष्ठति भक्तेषु कृपां ख्यापयितुम्, तदुक्तमुलूखलप्रकरणे, तत्र तद्भार्या सुतरामेवाश्रयत इति किमाश्चर्यम्! तव जन्मना व्रजस्य सर्वोत्कर्षः सर्वजनीनः, अतस्तव रमणे न कापि न्यूनता न वा लक्ष्म्या मनसि विषादो, अङ्गीकृतत्वात्. अतः कारणादस्मदर्थमागतेन त्वया **दृश्यतामिदं** गोकुलमेकदा द्रष्टव्यम्. वाक्यार्थो वा कर्माग्रे वक्ष्यमाणः. **तावकास्त्वयि धृतासवः दिक्षु त्वां विचिन्वत** इति **दृश्यताम्.** एतादृशोऽर्थोऽनुचित इति अनुचितप्रदर्शनेन बोधयन्ति. लोका हि ब्रह्मादयः त्वमवतीर्णो व्रजे[२] वर्तस इति निश्चित्य समायान्ति, व्रजस्थाः पुनरस्मदादयः दिक्षु विचिन्वन्ति– इयं महत्यनौचिती. ननु व्रजस्थानां भक्तिर्नास्ति, अन्यथा विरहे म्रियेरन्, अतः अभक्ता न पश्यन्तीति युक्तम् इति चेत्, तत्राहुः **त्वयि धृतासव** इति, **त्वदर्थमेव धृता असवः** प्राणा यैः. यदैव त्वदनुपयोगं ज्ञास्यन्ति तदैव त्यक्ष्यन्तीति भावः. अतएव **त्वां विचिन्वते** प्राणानाश्वासयितुम्, अल्पविलम्बेऽपि प्राणा गमिष्यन्तीति. अन्यथा व्रजे गच्छेयुः, प्रातस्त्वमेवायास्यतीति अन्वेषणं

**प्रकाशः**

प्यसाधारणहेत्वाभासत्वादित्यर्थः [**हीनभावेने**ति दासीवत्. **उलूखलप्रकरणे** इति "रमाक्रीडं व्रजमभूदि"ति. **सर्वजनीन** इति, सर्वदा सर्वजने भवः सर्वजनीनः. **अंगीकृतत्वादि**ति, व्र(ज!)स्य पूर्वमेवांगीकृतत्वात्. **त्वदनुपयोगमि**ति अलभ्यत्वम्. **पश्येदि**ति अन्तर्हितदशायाम्. **तथे**ति दर्शनप्रार्थना.] ॥१॥

**योजना**

प्रयुञ्ज्यादित्यर्थः. **वाक्यार्थो वा कर्मे**ति, "तावकास्त्वयि धृतासवस्त्वां विचिन्वत" इति **अग्रे वक्ष्यमाणः वाक्यार्थो दृश्यतामि**ति क्रियायाः

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्. २. ब. पाठे नास्ति.



व्यर्थमेव स्यात्. **दिक्षु** त्वदीयाः **त्वयि** सतीति महद्दैन्यम्, अत एकवारं त्वदीयाः पश्येति प्रार्थना. एवमेकया दर्शनं प्रार्थितम्. **दयिते**ति सम्बोधनाद् भर्त्रदर्शनेन स्त्रीणां जीवनं न युक्तमिति निरूपितम्. यद्यपि भगवाँश्चेत् पश्येत् तदा न कोऽपि पुरुषार्थः सिध्येत् तथापि दैन्यं दृष्ट्वा आत्मानमपि प्रदर्शयेदिति तथा प्रार्थना ॥१॥

एवं स्वदैन्यानौचित्यादिनिरूपणेन तस्या राजसत्वं निरूपितम्. तामसी तु वधाभावं प्रार्थयितुमदर्शनस्य वधसाधकत्वमाह **शरदुदाशय** इति.

**शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा**[१] ।
**सुरतनाथ ते शुल्कदासिका वरद निघ्नतो नेह किं वधः ॥२॥**

**शरत्**कालीनो योऽय**मुदाशयः** पुष्करिणी, तत्र **साधु** सम्यक् प्रकारेण **जातं यत्सरसिजं** कमलं, तदन्तर्वर्तिनी या **श्रीः,** तामपि **मुष्णातीति** तादृग्रूपया **दृशा** दृष्ट्या, हे **वरद,** यो निहन्ति तस्य **किं वधो न,** अपि तु वधदोषो भवत्येव. येनैव साधनेन परस्य प्राणा गच्छन्ति तत्सम्पादनसाधको घातकः दोषभाग्भवति. अनेन भगवद्दृष्टिः सर्वघातुका निरूपिता, "आयुर्मनांसि

**प्रकाशः**

शरदुदेत्यत्र [**उदाशय** इति जलाशयः उदकाशयः. **पुष्करिणी**ति

**लेखः**

**शरदि**त्यस्याभासे **अदर्शनस्ये**ति, **अदृशे**तिपक्षमाश्रित्यैवमुक्तम्. व्याख्याने वधपदस्य हननार्थकत्वे **निघ्नतो वधो ने**ति कथनं न सम्भवतीति **वधपद**-स्यार्थान्तरमाहुः **वधदोष** इति. "वध्यतेऽस्मै प्रयोजनाये"ति 'कृन्'-मात्रस्य बाहुलकपक्षेण पचा'द्यच्', वधफलमित्यर्थः. **सम्पादनसाधक** इति, सम्पाद्यतेऽनेनेति सम्पादनं साधनं, तत्साधक इत्यर्थः. प्रकृते दृष्टिर्मारणसाधनं तत्साधको भगवानित्यर्थः. **अनेने**ति, अग्रिमवाक्यात् सर्वघातुकी भगवद्दृष्टिर्दृशा

**योजना**

**कर्मे**त्यर्थः. **दिक्षु त्वदीयास्त्वयि सतीति महद्दैन्यमि**ति, **त्वदीया** इति तु **तावका** इति पदस्यार्थ उक्तः. अस्मिन्पक्षे **त्वयी**ति सतिसप्तमी ज्ञेया, तथा च **त्वयि सति** त्वयि व्रजे विराजमाने सति **तावकास्त्वां विचिन्वते इति महद्दैन्यमि**त्यर्थः ॥१॥

१. "अदृशा इत्यपि पदच्छेदार्थः" इति ब. पाठे.

च दृशा सह ओज आच्छीदि''ति वाक्यात्. तथास्मानपि प्रायेण क्रूरदृष्ट्या पश्यसि, अन्यथा कथं प्राणबाधा स्यात्? रूपं त्वानन्दमयमिति तद्दृष्टौ तदेव जीवयेद्, अतस्तदभावात् केवलं घातयस्येव. किञ्च न वयं वधार्हाः यतो **दासिकाः** कुत्सिता दास्यः, न हि स्त्रियः अप्रयोजिकाश्च हन्यन्ते. किञ्च वयं **शुल्कदासिकाः**, त्वं च **सुरतनाथः**. सर्वपुरुषार्थसाधकत्वेन तव सम्बोधनानि यथाधिकारं नियतानि. यथा धर्ममार्गे हे धर्मपालक, हे ब्रह्मण्य, हे यज्ञेश्वरेत्यादीनि, अर्थे हे लक्ष्मीपते, सर्वसिद्धिद इत्यादीनि, तथा मोक्षे हे मुकुन्द, हे योगेश्वर, हे ज्ञाननिधे इत्यादीनि धर्मार्थमोक्षार्थिभिरुच्यन्ते. एवमस्माभिरपि **सुरतनाथे**त्युच्यते. **सुरतं** सम्भोगः[१] जगति यावानस्ति तस्य

## टिप्पणी

**सुरतनाथे**त्यत्र. (**सुरतं संभोग** इत्यादेरयमर्थः. **रतं** लौकिकं 'भोग'-शब्दवाच्यं, तत्तु सृष्टिमारभ्य प्रवर्तते. तत्र न भगवदाज्ञापेक्षा, [२]सृष्टिसमानयोगक्षेमत्वात्तस्य. एवं सति **सुष्ठु** अलौकिकं शोभनरूपं यत् **रतं** तत् 'सम्यग्भोग'शब्दवाच्यम्. तदस्मास्वेव त्वदाज्ञयेच्छयेति यावत्, तयैव प्रवर्तते. यतो जगत् लौकिकं गच्छति, नश्यत्येव, न तु स्थिरम् अतोत्यलौकिकं स्वरूपानन्दरूपं तत्र प्रकटीभवितुं नार्हति. एतादृशस्य **तस्य भवानेव नाथः** प्रवर्तको रक्षकश्च. एवं सति स रसश्चेत् त्वय्येव निरुद्धस्तिष्ठेत् तदा

## लेखः

वधकथनेनात्र निरूपितेत्यर्थः. स्वयमस्मान् पश्यसि स्वात्मानं च न प्रदर्शयसीत्याहुः **रूपं त्विति**. **घातयसी**ति, दृष्टिः प्रयोज्यकर्त्रीति ज्ञेयम्. हननं दोषहेतुरित्युक्तम्, अनुचितं च भवतीत्याहुः **किञ्चे**ति. विपरीतं च भवती-त्याहुः पुनः **किञ्चे**ति. **जगती**ति भक्तेष्वित्यर्थः. नाथत्वं विवृण्वन्तो लौकिके

## योजना

**वरद निघ्नतो नेह किं वध** इत्यस्य विवृतौ **अनेन भगवद्दृष्टिः सर्वघातुके**त्यादि, यद्यपि भगवतः पुरुषोत्तमस्य दृष्टिरानन्दमयीति परमानन्दमेव प्रयच्छति न तु हन्ति, तथापि विरहे स्मर्यमाणा परमक्लेशं जनयतीति एतस्यामानन्दमय्यामेव दृष्टौ घातुकत्वभानाद् भगवतः कालादिरूपे या सर्वघातुका दृष्टिः सात्रानन्दमये निरूपितेति भावः. **अशक्यचौर्यादपि**

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे. २. सृष्टिसमानकालीनत्वादिति पाठः.



भवान् **नाथः**, त्वदाज्ञाव्यतिरेकेण सुरतं जगति न प्रवर्तते. अतो ब्रह्मणा कामेन वा लोके सुरतप्रवृत्त्यर्थं वयं शुल्करूपा दासिका दत्ताः. **शुल्कं**

## टिप्पणी

त्वलौकिका अपि भक्ताः [१]शून्यहृदया भवेयुरिति त्वदिच्छां ज्ञात्वा त्वां प्रार्थ-यित्वा [२]तादृशीर्वयं प्रकटीकृताः यतः प्रतिबन्धनिवृत्तिः. अतएवाग्रे ''विखनसा-र्थित'' इति वक्ष्यते. कामो भगवदीयः. मनसः पूर्वरूपत्वाद् वाच [३]उत्तररूप-त्वात् ''मनश्चक्र'' इत्युक्त्वा ''जगौ कलं वामदृशां मनोहरं'' ''ता दृष्ट्वान्ति-कमि''त्यादिकं च वाग्रूपमलौकिकभावप्रवर्तकं स्वप्रियास्वित्याशये**नाज्ञा-**पदमुक्तम्. ''मैवं विभोर्हती''त्यादिवाचां भगवद्भावात्मकत्वात्तासामप्याज्ञा-रूपत्वमित्याशयः. तैरेव वचनैः प्रतिबन्धनिवृत्तिरपि). **अतो ब्रह्मणे**ति. अत्रायं भावः. ''ब्रह्मादयो बहुतिथं यदपाङ्गमोक्षकामा'' इत्यत्र भगवद्भावकामाः सन्तः साक्षात्तमलभमानाः श्रियोपाङ्गा भावोद्गारिणो निरन्तरं प्रियसंगतत्वेन तद्भावात्मकत्वं प्राप्ता इति तत्सम्बन्धे तदनुभावेन कदाचित्स भावोऽपि भवेदित्याशया तत्कामास्तपश्चरन्तीति निरूपितम्. प्रकृते च स्वयं प्रभुः प्रकट इति तन्मार्गप्रकटनार्थं द्वारभूता वयं तेन प्रकटिता इति. अत्र **सुरत**शब्देन सुष्ठु भगवता समं रतं येनेति भगवद्भाव एवोच्यते न तु सम्भोगः, तस्यापामरमनुवर्तमानत्वेन **त्वदाज्ञे**त्यादिना नाथत्वविवरणं यत्तदनुपपत्तेः. एतन्मार्गप्राकट्येन ब्रह्मणो न कोऽपि भावः सिद्ध इत्यरुच्या पक्षान्तरमाहुः **कामेन वे**ति, भगवदीयभावरूपेणेति ज्ञेयम्. स्वामिनीदर्शने हि भगवतो भाव उद्रिक्तः सन् कामकार्यं करोत्यतस्तेनैव स्वार्थं वयं प्रकटीकृता इत्यर्थः ॥२॥

## लेखः

जगति तादृशसुरताप्रवृत्तौ हेतुमाहुः **त्वदाज्ञाव्यतिरेकेणे**ति, आज्ञाऽभावाल्लौकिके जगति न प्रवर्तते, अतस्त्वमेव नाथ इत्यर्थः. **अत** इति, नाथत्वेन प्रवर्तकत्वादित्यर्थः. प्रवर्तको हि प्रतिबन्धनिवृत्तौ सत्यां प्रवर्तयत्येवेत्यर्थः. **कामेन वे**ति भगवत्स्थितेन रिरंसारूपेण भावेनेति ज्ञेयम्. **लोके** इति भगवदीये इत्यर्थः, ''तद्द्वारा पुरुषे भवेदि''ति पूर्वोक्तमनुसन्धेयम्. **दत्ता** इति प्रकटीकृता इत्यर्थः. कामपक्षे आकार्यभगवते समर्पिता इत्यर्थः. **सुरतं**

१. शून्यहृदया इति पाठः (?). २. तादृश्य इति स्यात्. ३. पेशलरूपत्वादिति.

मार्गनिर्वाहकं द्रव्यं प्रतिबन्धनिवर्तकम्. सुरतं चेत् भगवत्येव निरुद्धं तिष्ठेत् तदा लोके रसो न भविष्यतीत्यस्मद्द्वारा त्वत्तः तल्लोके प्रसृतं भवत्विति वयमागताः. तत् कार्यं दूरतएव स्थितं, प्रत्युतास्मान्मारयसि. एवं सति सर्वमेव कामशास्त्रं व्यर्थं स्यात् तृतीयः पुरुषार्थश्च न भवेत्. अतः सर्वथा यदर्थं वयं प्रेषितास्तत्कर्तव्यम्. अथवा यदाकदाचित्कर्तव्यम्, इदानीं जीवयितव्या रूपप्राकट्येन. दृशो मारकत्वमुपपादयन्ति **श्रीमुषे**ति. यस्तु चोरो भवति स घातकोऽपि भवति, यथा यथा चौर्ये नैपुण्यं तथा तथा घातकत्वम्. तदर्थमाहुः **उदरश्रीमुषे**ति. तत्रापि ये दुर्गजाताः ते अतिनिपुणाः, तत्रापि जलदुर्गजाः. तत्सरसिजम्. तत्रापि ते दुर्गएव तिष्ठन्ति, तत्रापि ते साधुजाताः प्रभवः, तत्रापि प्रकाशवति काले शीताद्युपद्रवरहिते. एवं देशकालस्वरूपादिभिः अशक्यचौर्यादपि पुरुषात् तदुदरवर्तिसर्वस्वनेता अन्तःस्थितप्राणान् साधारणगोपिकादीनां नेष्यतीति किमाश्चर्यम्! चौर्यं हि क्रियते बलिष्ठेनापकीर्त्यभावाय, तदत्र तु न भविष्यतीत्युक्तं **किं वधः न**

---

**प्रकाशः**

सरसि.] **अपकीर्त्यभावाये**ति, प्रसह्य मारयित्वा हरणेऽपकीर्तिरिति तदभावायेत्यर्थः ॥२॥

**लेखः**

**चेदि**ति, पूर्वोक्तसुरतसम्पाद्यं सुष्ठु रतमित्यर्थः. **कामशास्त्रं व्यर्थमि**ति, भगवल्लीलाप्रतिपादकत्वेन सफलत्वं वक्ष्यते. लीलाप्राकट्याभावे लौकिकप्रतिपादकत्वेन शास्त्रवैयर्थ्यं स्यात्. किञ्च लौकिकपरत्वे तत्प्रतिपाद्यस्य कामस्य पातहेतुत्वमेव स्यात्, न तु पुरुषार्थत्वमिति पुरुषार्थत्रयमेव स्यादित्याहुः **तृतीय** इति. **तत्रापी**त्यारभ्य **रहिते** इत्यन्तेन सरसिजस्वरूपमुक्तं न तु

**योजना**

**पुरुषात्तदुदरवर्तिसर्वस्वनेते**ति– चौरविशेषणमेतत्, अतएव **नेते**ति पुल्लिंगनिर्देशः. **चौर्यं हि क्रियते बलिष्ठेन अपकीर्त्यभावाये**ति, ये बलिष्ठा राजादयस्ते स्वापेक्षितं परकीयं वस्तु मूल्येन न ददाति चेत् चौर्येण गृह्णन्ति, न तु बलात्कारेण लुण्टन्ति. तथा सति अपकीर्तिर्भवेदतोऽपकीर्त्यभावाय चौर्येण गृह्णन्तीत्यर्थः. **तदत्र तु न भविष्यतीत्युक्तमि**ति, **तद**पकीर्त्यभावरूपं विचारित**मत्र न भविष्यति** किन्त्वपकीर्तिर्भविष्यतीत्यर्थः ॥२॥



इति. अथवा **अदृशा** अदर्शनेन दर्शनमदत्वा **निघ्नतः किं वधो न?** सुरतार्थमागताः, तद्व्रतं दूरे, अन्तरा मरणमुपस्थितम्. तथा सति सुरतस्याप्रकटितत्वात् नाथत्वमपि न स्यात्. न हि योगी अश्वनिर्माणसमर्थोऽ'प्यश्वपतिरु'च्यते. प्रकटयति चेत् तदा तथा. किञ्च अस्मद्वधे किमाश्चर्यं, तवादर्शने लक्ष्मीरपि न तिष्ठेत्, तदाहुः **श्रीमुषे**ति. उदरस्थिता श्रीश्चेद् बहिरानीता, तदैव म्रियते, अपुष्टत्वात् आमगर्भवत्. यद्यपि तस्याः जीवने कालद्रव्यदेशवस्तूनि बहून्येव सन्ति, तथापि त्वददर्शने न जीवति, तथा वयमपि. किञ्च त्वं सर्वेषां वरान् प्रयच्छसि, अस्माँस्तु मारयिष्यसीति महदाश्चर्यम्! वरदाता हि प्रत्यक्षो भवति. अथवा **ते** वय**ममूल्यदासिकाः** धर्मदासिकाः, अतो न हन्तव्याः. एवमनेकविधक्रौर्यभावनया काश्चिद्भगवन्तम् उपालभन्ते.

अन्तःस्थितो रसः पुष्टो बहिश्चेन्न विनिर्गतः ।
तदा पूर्णो नैव भवेदिति वाग्निर्गमस्तथा ॥(११)॥२॥

अन्याः पुनः कोमलाः, बहुधा त्वया रक्षिताः इदानीमपि पालयेत्याहुः **विषजलाप्ययादि**ति.

---

**लेखः**

यौगिकोऽर्थः. **तदत्र त्वि**ति, अपयशस्तु न भविष्यति, परं वधदोषो भवत्येवे[1]त्यर्थः. दर्शनस्यैतज्जीवनसम्पादकत्वाददर्शनस्य वधसाधकत्वमित्याहुः **दर्शनमदत्वे**ति. तथा च "कारणाभावे कार्याभाव" इति न्यायेनादर्शनस्य स्ववधसाधकत्वमुक्तम्. कैमुत्येनापि साधयन्तीत्याहुः **किञ्चे**ति, अस्मिन् पक्षे **श्रीमुषे**त्यत्र मोषः प्राणहरणम्. [2]**उदरस्थिते**ति समुद्रस्थितेत्यर्थः.[2] श्रियाः पोषो भगवद्दृष्ट्यैव भवतीत्याशयेनाहुः **अपुष्टत्वादि**ति. **शुल्क**पदे 'नञ्'प्रश्लेषेण पक्षान्तरमाहुः **अथवे**ति. **पूर्णो नैवे**ति, बाह्यांशेऽपूर्णएव स्यादित्यर्थः ॥२॥

**कारिकार्थः**

"शरदुदाशये" इत्यत्र **अन्तःस्थित** इति. **पूर्णो नैव भवेदिति,** गानरूपेण वाग्निर्गमाभावे बाह्यांशे **पूर्णो** रसो **न भवेदिति** हेतोर्गानरूपेण **वाग्निर्गम** इत्यर्थः (११).

---

१. भविष्यत्येव इति जो. पाठः. २. इत्यधिकैका पंक्तिः जो. पाठे.

**विषजलाप्ययाद् व्यालराक्षसाद् वर्षमारुताद्वैद्युतानलात् ।**
**वृषमयात्मजाद्विश्वतो भयादृषभ ते वयं रक्षिता मुहुः ॥३॥**

**विषजलं** कालीयह्रदजलं, तत्पीत्वा सर्वएव बालकाः गावश्च मृताः ते पुनर्जीविताः. **व्यालाः** सर्पाः कालियसुदर्शनादयः, **राक्षसाः** तृणावर्तादयः, तेषामेकवद्भावः; तस्मादपि **रक्षिताः. वर्षमारुता**दिन्द्रकृतात्. तत्रैव **वैद्युतानि अनलो** दवाग्निश्च, तयोरप्येकवद्भावः. **वृषो** योऽयं **मयात्मजः** व्योमासुरः, तस्मादपि **रक्षिताः.** न तासां भूतभविष्यद्विषयकपदार्थज्ञाननिर्बन्धोऽस्ति, सर्वज्ञत्वात्. किम्बहुना, **विश्वत**एव **भयात्.** पालने हेतुः **ऋषभे**ति, भर्ता हि पालयत्येव. अतः सर्वदा पालक इति इदानीमपि पालयेत्यर्थः. ते च मारका बाह्याः, इदानीन्तनस्त्वान्तर इति सर्वथा पालनीयाः ॥३॥

अन्याः पुनः भगवतो महानुभावत्वं ज्ञात्वा तस्य स्वरूपं कीर्तयन्ति, ततश्च ज्ञानिभ्यो यथा मोक्षं प्रयच्छति तथास्मभ्यमपि अस्मदुचितं मोक्षं दास्यतीति. तं स्तुवन्ति **न खल्विति.**

**न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ।**
**विखनसार्थितो विश्वगुप्तये सख उदेयिवान्सात्त्वतां कुले ॥४॥**

भगवतो नन्दसूनुत्वे सर्वे उपालम्भा युक्ता भवन्ति, तदेव नास्ति इति सर्वमयुक्तमुपालम्भनम्[१]. **खल्विति** निश्चये, नात्र तिरोहितमिव. **गोपिकायाः**

**लेखः**

**विषजले**त्यत्र. **ऋषभ**पदतात्पर्यमाहुः **ते चे**ति. ऋषभो हि अन्तर्बहिःपालकः, "स वै पतिरि"ति वाक्यात्. अतः सामर्थ्यस्य विद्यमानत्वादान्तरस्य च बलिष्ठत्वात् सर्वथा पालनीया इत्यर्थः ॥३॥

**न खल्वि**त्यत्र. भगवतो नन्दगृहे प्रादुर्भावस्य व्युत्पादितत्वादत्र तदभावकथनस्य तात्पर्यमाहुः **नन्दसूनुत्वे** इति. यथा मथुरायां वसुदेवाद्देवक्यामागत्य प्रादुर्भावः तथात्र नन्दाद्यशोदायां नागमनं, किन्तु गर्भे मायायाएव स्थितिः, भगवांस्तु तावत्पर्यन्तं भक्तहृदये स्थितः. ततः

**योजना**

**विषजलाप्ययादि**त्यत्र **व्यालाः कालियसुदर्शनादय** इति. इह **आदि**शब्देन कालियपरिकरभूताः सर्पा ग्राह्याः, कालियनिःसारणे तेषामपि निःसारणात्, "सकलत्रसुहृत्पुत्रो द्वीपमब्धे जगाम हे"ति वाक्यात् ॥३॥

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्.



यशोदाया **नन्दनः** पुत्र इति **न.** तथा सति यथा तया स्वाधीनः कृतो ज्ञातो वा तथा गोपिकानामपि भवेत्, गोकुलस्वामिपुत्रत्वात्. तुल्यतायामेव हि विद्यायोनिसम्बन्धः. किञ्च **न** केवलं **भवान्** वैकुण्ठाधिपतिः पुरुषोत्तमः किन्तु

**प्रकाशः**

**न खल्वि**त्यत्र, नन्वयं को वा नियमो यद्गोकुलस्वामिपुत्रत्वाभावेऽधीनो न भवतीति, यतस्तदभावेऽपि स्नेहवशादधीनत्वदर्शनादित्यत आहुः **तुल्यतायामि**त्यादि. **हि** यतो हेतोर्वशीकरणहेतुरि[१]ति शेषः अर्थाज्ज्ञेयः. तथा च "ययोरात्मसमं वित्तमि"त्यत्र भगवता यत्र यत्र तुल्यता तत्र तत्रैव विद्यायोनिसम्बन्धस्य वशीकरणहेतुतायाः प्रतिपादितत्वाल्लोके तथा दर्शनाच्च तदैव तथा. यन्नेदानीं तथा, तेन ज्ञायते नियतं तत्तिरोहितमिवेत्यर्थः. अस्मिन्वाक्ये मूलस्थं **भवानि**तिपदमुद्देश्यसमर्पकमपि भातीति भवानित्यर्थतो

**लेखः**

प्राकट्यसमये मायावृतः सन् प्रादुर्भूतः, ततो लीलार्थमुभयत्र पुत्रत्वबुद्धेः स्थापनाद्व्यस्ततया तत्तत्सूनुत्वमस्त्येव. किन्त्वन्यवन्नन्दाद्यशोदायामागत्यभावात् नन्दसूनुत्वविशिष्टयशोदासूनुत्वं नास्ति. तथा च **गोपिकानन्दन**पदस्य नन्दसूनुत्व-विशिष्टगोपिकानन्दनत्वमर्थः, नन्दसूनुः सन् गोपिकानन्दनो नेत्यर्थः. व्यस्ततया च तत्तत्सूनुत्वमस्तीत्याभासोक्तं महानुभावत्वं समर्थितम्. लोके पितृत्वविशिष्ट-मातृपुत्रत्वस्य दृष्टत्वादत्रापि तथा प्राप्त्या तन्निषेधः. तथा च लोकन्यायेन ज्ञातं गोपिकानन्दनत्वं नेत्यर्थः. एवमे'वाजननी'त्यादि'नञ्'प्रश्लेषेऽप्यर्थो ज्ञेयः. टीकायां **नन्दसूनुत्वे** इत्यस्य नन्दसूनुत्वविशिष्टयशोदासूनुत्वे इत्यर्थः. **तथा सती**ति लोकरीत्या सम्बन्धे सतीत्यर्थः. यशोदायास्तु भक्तवश्यताबोधनार्थं

**योजना**

**न खलु गोपिकानन्दन** इत्यत्र यशोदानन्दनत्वनिराकरणं तु लौकिकभाव-कृतपुत्रभावपरं, "जयति जननिवासो देवकीजन्मवाद" इत्यत्र देवकीनन्दनत्व-निराकरणवत्. अतएव "न माता न पिता तस्ये"त्यादि सङ्गच्छते. तथा च पुरुषोत्तमस्य जन्माभावेऽपि पुत्रभावेन प्रादुर्भावाद्यशोदानन्दनत्वं वर्तत एवेत्युपपादितं पुरस्तात्. अथवा व्रजसुन्दरीणां शृङ्गाररसभाववत्त्वात् कटाक्षोक्त्या यशोदानन्दनत्वनिराकरणं ज्ञेयम् ॥४॥

१. तुल्यतायां वशीकरणहेतुः.

**अखिलदेहिनां** सर्वेषामेवास्मदादीनाम**न्तरात्मानम्** अन्तःकरणं पश्यतीति यद्यस्मद्धृदये तादृशं तापं पश्येत् तदा प्रसन्नएव भवेत्. अतो नास्मिन् वक्तव्यं किञ्चित्. किञ्च आगतश्चास्मदादीनां परिपालनार्थमेव. यदि जानीयाद् एता नश्यन्तीति तदा परिपालयेत्. रक्षणार्थं च प्रार्थितएव, न तु स्वेच्छया समागतः, तदाह **विखनसार्थित** इति. **विखना** ब्रह्मा, विशेषेण खनतीति सर्वथा वेदार्थविचारकः. अतएव वैखानसं मतं ब्रह्मणा कृतं भगवद्भजन-प्रतिपादकम्, तेनैव मार्गेण पूजां भगवान् गृह्णातीति वेङ्कटादौ तथैव पूजा. अतः सर्वेषां पूजामपि ग्रहीतुं ब्रह्मणा प्रार्थितो, **विश्वगुप्तये** इति मुख्यं प्रयोजनम्. एवमन्तरात्मत्वात् सर्वेषामेव जीवानां **भवान् सखा.** तादृशो लोके सख्यं प्रकटयितुं **सात्वतां** यादवानां वैष्णवानां वा **कुले उदेयिवान्** प्रादुर्भूतः. अत एतदर्थमेवागतः. पूर्वमपि सखा यथेच्छमेव प्रेरयसि, आगतस्य

---

## टिप्पणी

**सख उदेयिवानि**त्यत्र, **पूर्वमपि सखा यथेच्छ**मित्यादि. "सुपर्णावितौ सयुजौ सखायावि"ति श्रुतेरन्तरात्मा जीवस्य सखा भवति. प्रकृते च स्वरमणेच्छामनतिक्रम्य तदनुरूपमेवास्मान् प्रेरयसीत्यर्थः. अत एवास्माकं नायिका-भावएव सार्वदिक इति भावः. एतादृशस्यागमनं नायिकायै स्वसमर्पणार्थमेव भवतीति तदेव कर्तुमुचितमिति भाव इत्याशयेनाहुः **आगतस्ये**त्यादि ॥४॥

## प्रकाशः

विधेयसमर्पकं भवतीति ज्ञेयम्, अग्रे **वैकुण्ठाधिपतिः पुरुषोत्तम** इति तदर्थ-विवरणात्. तथा सति तुल्यताया अभावादुपालम्भो न युक्त एवेति भावः. एतावदुक्तौ भगवति सेवकदुःखानवधातृत्वारोपः पर्यवस्यतीति तदभावाय पूर्वं यशोदाधीनत्वसम्पादनेन गोकुलस्वामिपुत्रत्वे सन्देहाभावादिदानीमधी-नत्वाभावे स्वस्मिन् तादृशविद्याद्यभावएव विचार्यतां, न तूपालभ्यतामित्याशयेन वाक्यान्तरं वदन्तीत्याशयेनाहुः **किञ्चे**त्यादि. अनुपालभ्यत्वादेव भगवति दोषाभावं विशेषाकारेण समर्थयन्तीत्याशयेनाहुः **आगतश्चे**त्यादि ॥४॥

## लेखः

वशो जात इति भावः. **सखिपदस्य** तात्पर्यमाहुः **तादृश** इति. तात्पर्यान्तर-माहुः **पूर्वमपी**ति, आविर्भावात् पूर्वमित्यर्थः. **आत्मनिवेदने**ति, **आत्मा**



पुनर्विशेषो वक्तव्यः. स चात्मनिवेदनरूपो भवति. अतो वयं किं विज्ञापयामः, यथोचितमेव कर्तव्यमिति भावः ॥४॥

अन्याः पुनः सात्त्विकसात्त्विक्यः, राजसप्रधानाभ्यो विशिष्टाः, अप्रार्थितं च भगवान् न दास्यतीति भगवत्करस्य स्वशिरःसंबन्धं प्रार्थयन्ति **विरचिताभय**मिति.

**विरचिताभयं वृष्णिधुर्य ते शरणमीयुषां संसृतेर्भयात् ।**
**करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥५॥**

हे स्वामिन्, हृदयं स्फुटति. अतः यथा सर्वाङ्गे आप्यायनं भवति तथा **शिरसि करसरोरुहं धेहि.** शीतलं हि कमलं भवति, तत्रापि सरसि जातम्. तत्रापि करएव सरःस्थानं सरसिजस्थानं च, अत उद्धरणादिना न रसालतापगमः. **कान्ते**ति संबोधनम्, प्रथमतः शिरसि हस्तस्थापनेन स्वाधीनीकरणं द्योतितम्. किञ्च न केवलं हस्तस्तापमेव दूरीकरोति किन्तु **कामदं** च, अभिलषितं कामं प्रयच्छति. ननु भगवान् पुरुषोत्तमो योगिध्येयः, कथं स्त्रीणां स्पर्शं करिष्यतीति चेत्, तत्राह **श्रीकरग्रहमि**ति, **श्रियाः करस्य ग्रहो** ग्रहणं येन. अतो भगवान् गृहस्थ इति यत्र लक्ष्म्या हस्तं गृह्णाति तत्रास्मच्छिरोग्रहणे किं भविष्यतीति भावः. ननु लक्ष्मीर्विवाहितेति विधिवशात् तस्या हस्तग्रहणम्, भवतीनां ग्रहणे को हेतुरिति चेत्, तत्राहुः **संसृतेर्भयात् शरणमीयुषां विरचिताभयमि**ति. यथा विधिर्विवाहे तथैव शरणागतपालनेऽपि.

---

## लेखः

स्वरूपानन्दस्तस्य **निवेदनं** भक्तेष्वनुभावनं[१] तद्रूपो विशेष इत्यर्थः ॥४॥

**अप्रार्थितं चेति चस्त्वर्थे**, स्वरूपकीर्तनेन मोक्षेऽप्यप्रार्थितं तु न दास्यतीत्यर्थः. **विरचिताभयमि**त्यत्र शिरसि स्थापनतात्पर्यमाहुः **हृदयं स्फुटती**ति. हृदयकमलं स्वस्थं सदाप्यायनजनकं भवति, तत्तु स्फुटति, अतस्तत्र नाप्यायनं किन्तु तत्कार्यार्थं शिरसि धेहीत्यर्थः. सरोरुहस्याप्यायकत्वं व्युत्पादयन्ति **शीतलं हीति. तत्रापी**ति, न तु यथाकथञ्चिद् जलसेचनेन संवर्धितमित्यर्थः. **उद्धरणादिने**ति, कमलस्योद्धरणे सरोरूपत्वान्न रसालतापगम इत्यर्थः. तथा च **सरोरुह**पदेन तापहरणार्थं करस्थापनमित्युक्तम्. प्रयोजनान्तरमाहुः **किञ्चे**ति. **तत्रापि स्त्रिय** इति, वृष्णिधुर्यत्वात् स्त्रियएव

---

१. भक्तेषु स्थापनम् इति जो. पाठः.

विवाहापेक्षया शरणागतरक्षा महती, स साधारणधर्मो अयमीश्वरधर्म इति. नन्वयं निषिद्धः प्रकार इति कथं पालनमिति चेत्, तत्राहुः **हे वृष्णिधुर्ये**ति. **वृष्णि**र्हि यदुवंशोद्भवः बहुस्त्रीकः बहुवंशकर्ता. तद्वंशेऽपि भवान् **धुर्यः** श्रेष्ठः. तत्रापि स्त्रियः संसारभयात् समागताः, न हि संसारः स्वभावतएव दुष्टः किन्त्वसह्यदुःखहेतुरिति. तथा वयमपि महद् दुःखं प्राप्नुम इति दृष्टादृष्टद्वारा भवांस्तन्निवर्तक इति. अनेनैव निर्भयतापि सूचिता. अतः **कान्त**सम्बोधनाद् भवानेव भर्ता. अतः स्त्रीणां व्रतमनुस्मरन् वाञ्छितं कुर्वित्यर्थः ॥५॥

ततः तामसी किञ्चिद्वैलक्षण्येन धाष्टर्येन तमेवार्थं प्रार्थयति **व्रजजनार्तिहन्नि**ति.

**व्रजजनार्तिहन् वीर योषितां निजजनस्मयध्वंसनस्मित ।**
**भज सखे भवत्किंकरीः स्म नो जलरुहाननं चारु दर्शय ॥६॥**

हे भगवन्, एता वक्तुं न जानन्ति, मया तु निर्धारितमुच्यते. हे **सखे** इति अप्रतारणार्थं संबोधनम्. **नः** अस्मान् **भजे**ति हितोपदेशः. ननु कथमेवं धाष्टर्यं निषिद्धं च बोध्यते, तत्राहुः **भवत्किंकरीरि**ति. "ये यथा मां प्रपद्यन्ते" इति हि तव प्रतिज्ञा. अतो यथा किंकर्यो वयं भवन्तं भजामः तथा भवानपि भजतु. किंकरीत्वं तव प्रतिज्ञा च प्रसिद्धेत्याहुः **स्मे**ति. न

---

**प्रकाशः**

**विरचिताभयमि**त्यत्र. ननु भवतीनां संसारभयं क्वास्ति येन **संसृतेर्भयादि**त्युच्यत इत्याकांक्षायां तत्तात्पर्यमाहुः **न हीत्या**दि. **अनेने**ति संसारनिवर्तकत्वकथनेनेत्यर्थः. तथा चानया प्रार्थनया दुःखनिवृत्तिरेव प्रार्थितेति भावः ॥५॥

**लेखः**

पालनीयाः, तत्रापि संसारभीता इत्यर्थः. एतासां संसाराभावादेव तत्कथनमप्रयोजनकमित्याशङ्क्याहुः **न ही**ति. दुःखहेतुनिवर्तनस्वभावत्वादस्माकमपि दुःखहेतुर्निवर्तनीय इत्यर्थः. **अनेनैवे**ति, अन्यस्याभयसम्पादनकथनेन स्वस्यापि निर्भयता सूचितेत्यर्थः. **अतः कान्ते**ति, अन्यस्याभयसम्पादनात्तेन स्वस्य चाभयसूचनात् "स वै पतिः स्यादि"त्यत्रोक्तं पतित्वं सिद्धमित्यर्थः. **स्त्रीणां व्रतमि**ति स्त्रीणां सम्बन्धि व्रतं, ताः पालनीया एवेत्याकारकं नियममित्यर्थः ॥५॥



केवलमस्मद्भजने तव सैवैका प्रतिज्ञा हेतुः किन्तु अन्येऽपि हेतवः सन्ति. प्रथमम् अवतारप्रयोजनं **व्रजजनार्तिहन्नि**ति, व्रजजनानां आर्तिं हन्तीति तथा. नातः परमन्या आर्तिरस्ति. सामान्यप्रयोजनमेतत्, विशेषप्रयोजनमाहुः **योषितां वीरे**ति. कृष्णो [1]भगवान्. वीरैर्हि शूरा निराकरणीयाः अन्यगतकामादयः. तत्र मुख्यः कामः. स च बहुविधः; अन्तर्बहिः पदार्थेन पूर्णेन पूरयित्वाश्रयाभावान्निवारणीयः. अतएव लोके दातारः कीर्तिमन्तो भवन्ति वीरेभ्यः. अतो भवान् महावीरः अन्तःस्थितेनानन्देन अतिदरिद्राणां ब्रह्मणापि पूरयितुमशक्यानामिच्छापूरकः. अयं चार्थस्तव सर्वजनीनः, अतः **योषितां वीरे**ति सम्बोधनम्. न हि कृष्णादन्यो जगति कश्चिदेवं सम्बोधनमर्हति, अपूर्णकामत्वात्. अतोऽवतारसामान्यविशेषप्रयोजनाभ्यां च **नो भज.** ननु सत्यं, तथापि भवतीनामभिमानदोषनिवृत्त्यर्थं भजनं न क्रियत इति चेत्,

---

**प्रकाशः**

**व्रजजने**त्यत्र. **कृष्णो भगवानि**त्यनेन **योषितां वीरे**तिपदसमुदायार्थः संक्षेपेणोक्तः. सम्बोधने फलितमर्थमाहुः **वीरैरि**त्यादिना ॥६॥

**लेखः**

**व्रजजनार्तिहन्नि**त्यत्र. **योषितां वीरः** स्वानन्ददातेत्यर्थः. व्युत्पादयन्ति **कृष्ण** इति. **वीरैरि**ति दानवीरैरित्यर्थः. **अन्यगते**ति, दातारो बहुदानेनान्यस्याभिलाषां निवर्तयन्तीत्यर्थः. **मुख्यः काम** इति, अन्नादिकामापेक्षया कामशास्त्रसिद्धः कामो मुख्य इत्यर्थः. **अन्तर्बहिरि**ति. **पूर्णेन पदार्थेन** स्वरूपानन्देना**न्तर्बहिः पूरयित्वे**त्यर्थः. **वीरेभ्य** इति, वीरान्तरेभ्यः सकाशाद्दानवीराः कीर्तिमन्त इत्यर्थः. **अत** इति दानवीरत्वादित्यर्थः. **अयं चार्थ** इति, अत्रापि **स्मे**ति पदं योजनीयमिति भावः. **अभिमानदोषे**ति, वयं सर्वतोऽधिका इत्यभिमानरूपो दोषः **स्मयः**, तन्निवृत्त्यर्थमित्यर्थः. **धर्म एव दुष्ट** इति, दोषो

**योजना**

**व्रजजनार्तिहन्नि**त्यत्र **अतएव लोके दातारः कीर्तिमन्तो भवन्ति वीरेभ्य** इति, वीरा हि मारणीयं स्वरूपतो मारयन्ति, दातारस्तु दीनगृहं समृद्ध्या पूरयित्वा दारिद्र्यं दूरीकुर्वन्ति. तद्गृहे लक्ष्म्याः पूर्त्या दारिद्र्यस्यावकाशाभावात्ततो दारिद्र्यमपसरतीति हार्दम् ॥६॥

---

[1]. भवानिति पाठः सूचितः.

तत्राह **निजजनस्मयध्वंसनस्मितेति**. **निजजनाः** सेवकाः तेषां **स्मयो** गर्वः तस्य **ध्वंसनार्थं स्मितं** यस्य, निजजनानां स्मयदूरीकरणार्थं परित्यागो नोपायः किन्तु तदर्थं स्मितमेव कर्तव्यम्. स्मितं हि मन्दहासः. "हासो जनोन्मादकरी च माया", तस्या मन्दत्वं भक्तेष्वप्रवर्तनम्. नहि मायामोहव्यतिरेकेण कस्यचित्स्मयो भवति. अतएव हास्यसंकोचएव साधनम्. निजजनानामपि धर्मएव दुष्टः न तु धर्मी, अन्यथा निजजनत्वमेव न स्यात्. इत्यलौकिकोपायः. लौकिकेऽपि तव हास्येन ता अपि आत्मानं तुल्यं मन्यन्ते, यदा पुनर्हास्ये संकोचः तदैव तासां गर्वो निवर्तते. किञ्च अभिमानो हि दोषः, स तावदेव तिष्ठति यावत्तव स्मितयुक्तमाननं न पश्यति. नहि काचित्तादृशमप्याननं दृष्ट्वा स्वाभिमानं पालयितुं शक्ता. नन्वेतल्लोके अप्रसिद्धं साधनत्वेनेति कथं ज्ञातुं शक्यत इत्याशङ्क्याहुः **जलरुहाननं चारु दर्शयेति**. **जलरुहं** कमलं, तत्सदृश**माननम**मृतस्रावि; नह्यमृते पीते कस्यचिद्दोषस्तिष्ठतीति युक्तिः. साधनत्वे चेत्संदेहः, एकवारं प्रदर्श्य पश्येत्यर्थः. किञ्च अभिमानो हि मनोधर्मः, तव आननं तु **चारु** मनोहरम्; नहि धर्मिणि हृते धर्मस्तिष्ठति. सख्युः सखिभजनं युक्तमेव ॥६॥

राजसी तु तत उत्तमा तमेवार्थं प्रकारान्तरेण प्रार्थयते **प्रणतदेहिनामिति**.

**प्रणतदेहिनां पापकर्षणं तृणचरानुगं श्रीनिकेतनम् ।**
**फणिफणार्पितं ते पदाम्बुजं कृणु कुचेषु नः कृन्धि हृच्छयम् ॥७॥**

**ते पदाम्बुजं नः कुचेषु कृणु** कृणुष्व, छान्दसो लोपः, स्थापय. तस्य प्रयोजनं **कृन्धि हृच्छयमिति**, हृदये चौरवत् स्थितं कामं कृन्धि. **कुचेष्विति**

---

**प्रकाशः**

**प्रणतेत्यत्र. न** इति बहुवचनेन कुचेषु बहुत्वमायातीत्यरुच्या पक्षान्तरमाहु**र्विरहेणेत्यादि**. संयोगे हि भगवदुपयोगित्वात्तेषु स्वीयत्वेन भानं, विरहे

**लेखः**

रसप्रतिबन्धकता तद्युक्तः स्मय इत्यर्थः. **अभिमानो हि दोष** इति रसप्राप्तौ प्रतिबन्धक इत्यर्थः. **निजजनेत्यस्य** क्रमेण शास्त्रीयप्रकारेण लौकिकप्रकारेण रसमार्गीयप्रकारेण चार्थत्रयमुक्तम् ॥६॥

**प्रणतदेहिनामित्यत्र. कृणु स्थापयेति**, "कृवि हिंसाकरणयोश्चे"ति भ्वादिस्थस्य रूपम्. कुचेषु करणं स्थापनमेवेति भावः. **लक्ष्मीरिति**, लक्ष्मीर्हि



समुदायाभिप्रायेण बहुवचनम्, विरहेण भिन्नान् वा मन्यन्ते. शिरसि हस्तदानेन निकटे समानयनमुक्तम्, ततो भजनेन संबन्ध उक्तः, अनेन विपरीतरस उच्यते. बंधविशेषो वा तिर्यग्भेदः, एकवचनात्. तावता हि हृदयस्थितः कामो गच्छति. स्त्रीणां समूहे लीलाशयने परितः स्थितानां तथा संबन्धो भवतीति वा. ननु कर्कशेषु स्तनेषु कथं कोमलचरणस्थापनमिति चेत्, तत्राहुः **फणिफणार्पितमिति**. नहि कालियफणात् क्रूरा अस्मत्स्तनाः; तत्र यथा चरणस्थापनं कृत्वा तदन्तर्गतो दोषो दूरीकृतः एवमत्रापि कर्तव्यः. **अम्बुज**पदेन च प्रत्यक्षतस्तापहारकत्वम्. ननु तथापि स्त्रीणां वक्षसि चरणस्थापनमयुक्तमिति चेत्, तत्राहुः **श्रीनिकेतनमिति**, लक्ष्म्याः स्थानं तत्. लक्ष्मीः किल तत्र स्पर्शमर्हति अन्यासु कः संदेह इति. ननु भवत्यो मूढाः,

---

**प्रकाशः**

तु न तथेति भिन्नान्मन्यन्त इत्यर्थः. तथा चास्मासु चेन्न स्थापयसि तदास्मद्भिन्नेषु तेषु त्वत्परेषु स्थापयेति भावः. अतएव "गणये कुचयोरि"ति तद्भावः प्रभुभिरुपवर्णित इति श्रीहरिरायाः. सर्वत्र मनोरथतौल्यादर्शनादयमपि पक्षो न बहुत्वसाधक इत्यरुच्या पक्षान्तरमाहुः **स्त्रीणामित्यादि**. ननु कालियनृत्येनैतच्चरणप्राकट्यमिति वेणुगीते प्रतिपादनादत्र **फणिफणार्पितमिति** विशेषणं कथं सङ्गच्छत इति चेद्, "इत्युन्मत्तवचो गोप्य" इति पूर्वाध्याये कथनादत्रापि तदनुस्यूतमित्यतः सङ्गतिरिति केचित्. तत्रोन्मत्तवचनोपसंहारपक्षस्यापि सुबोधिन्यामङ्गीकारात्तत्पक्षेऽसङ्गतितादवस्थ्ये तु "चेरुर्गोप्यो विचेतस" इति पूर्वाध्यायोपान्त्ये कथनादत्र च तदनुसीवनादिति भाति. वस्तुतस्तु ज्ञानपूर्वकमेवैवं कथनं, न च पूर्वविरोधः. **तत्र यथेत्यादि**सुबोधिन्यामेव दोषदूरीकरणार्थतां तस्योक्त्वाग्रेऽ**म्बुज**पदव्याख्यानेन मूले क्रमेणोभयविधचरणस्थापनस्य व्यक्तीकरणान्न तदर्थं प्रयासान्तरं कर्तव्यमिति भाति ॥७॥

**योजना**

**फणिफणार्पितमित्यस्याभासे. ननु कर्कशेषु स्तनेषु कथं कोमलचरणस्थापनम् अयुक्तमिति चेदिति**. इह **कथं कोमलचरणस्थापनमि**त्युक्त्वा **अयुक्तमि**त्यनेन प्रश्ने उपपत्तिरुक्ता. तथा च यतो **अयुक्तम्** अतः **कथं कोमलचरणस्थापनमि**त्यन्वयो ज्ञेयः. अथवा **अयुक्तं** यत्**कोमलचरण**धारणं तत्**कथमि**ति प्रश्नाशयः. **श्रीनिकेतनमि**त्यस्य विवरणे **अन्यासु कः सन्देह**

कथं भवतीनां हितं कर्तव्यमिति चेत्, तत्राहुः **तृणचरानुगमिति**. **तृणचरा** गावः, तेषाम**प्यनुगं** पश्चाद्गच्छति तद्धितार्थं, ते किं भगवता प्रेर्यमाणा इति तृणं परित्यज्यामृतं भक्षयन्ति. तेषां तृणमेवामृतं, तथास्माकमपि काम एवामृतम्. नैतावता परमकृपालोः कश्चनार्थः क्षीयते. ननु भवतीनां जितेन्द्रियत्वाद्यभावात् पापमस्ति, तदपगमे पश्चात्पदं स्थापयिष्यामीति चेत्, तत्राहुः **प्रणतदेहिनां पापकर्षणमिति**. वयं **प्रकर्षेण नताः**, नास्माभिः प्रकारान्तरेण निवर्तयितुं शक्यते किन्तु तव चरणप्रसादादेव नम्राणां पापं गच्छति, तत्रापि **देहिनः**. प्रकर्षेण नतत्वेन धर्ममार्गादिपरित्याग उक्तः. देहाभिमानस्य विद्यमानत्वात् न ज्ञानमपि. प्रणतानां हि नाप्यधोगतिः. अतस्तव पदमेव तेषां पापनाशकं, चिन्तितं दृष्टं स्पृष्टम् आलिंगितं वा ॥७॥

इममेवार्थं ततोऽप्युत्तमा प्रकारान्तरेण प्रार्थयते **मधुरया गिरेति**.

**मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ।**
**विधिकरीरिमा वीर मुह्यतीरधरसीधुनाप्याययस्व नः ॥८॥**

हस्तेन च स्वरूपेण पदा चोपकृतिर्मता ।
मुखेन चोपकारो हि कर्तव्य इति ता जगुः ॥(१२)॥

**प्रकाशः**

**मधुरयेत्यत्र. इममेवेति** वाञ्छितोपकाररूपमित्यर्थः. **गिरेत्यस्य**

**लेखः**

स्पर्शार्हा प्रसिद्धैव, अतो**ऽन्यासु** तस्या एवांशभूतासु **कः सन्देह** इत्यर्थः. **जितेन्द्रियत्वाद्यभावादिति**, उदारहासेनाधुना कामभावस्य सम्पादितत्वेनेन्द्रियवशत्वा[1]द्विषयरीत्या रतेच्छारूपं पापमस्तीत्यर्थः. चरणेनैव स भावो निवर्तिष्यते सर्वात्मभावो भविष्यतीति समाधानम् ॥७॥

**मधुरयेत्यत्र. मतेत्यन्तेन** श्लोकत्रयानुवाद उक्तः, एतच्छ्लोकार्थमाहुः **मुखेनेति**. लोभस्थितरसस्य तत्र विद्यमानत्वान्मुखोपकारो वक्तव्य एवेति **हि**शब्दः. **इति** हेतोः **जगुः** अस्मिन् श्लोके इति शेषः (१२). तर्हि

**योजना**

इति, सर्वासां स्त्रीणां लक्ष्म्यंशत्वाल्लक्ष्म्याः स्पर्शयोग्यतायां तदंशभूतानां योग्यत्वे कः सन्देह इत्यर्थः ॥७॥

१. वशत्वाविषयेति पाठः.



पूर्वोक्तमपि सर्वं हि यावत्स्पष्टं न भाषते ।
तावत्सरसतां याति न कदाचिदिति स्थितिः ॥(१३)॥

हे स्वामिन्, **मधुरया गिरा मुह्यतीरिमा** गोपी**राप्याययस्व.** मोहो हि मरणपूर्वावस्थारूपः. तासामाप्यायने हेतुः **विधिकरीरिति**, आज्ञाकारिणीः सेवाकारिणीर्वा. असामर्थ्यं तु तव नास्तीत्याहुः हे **वीरेति**. शौर्यं हि आर्तानामार्तिनिराकरणार्थम्. **इमा** इति प्रदर्शनेन क्षणमात्रविलम्बेन मरिष्यन्ति इति सूचितम्. ननु वाङ्मात्रेण कथं मोहनिवृत्तिरिति चेत्, तत्राहुः **मधुरयेति**. मोहो हि मायारूपः, स भवत्स्वरूपेणैव निवर्तते सच्चिदानन्दरूपेण.

**लेखः**

लोभप्रार्थनमेव वक्तव्यं न तु वाणीप्रार्थनमित्यत आहुः **पूर्वोक्तमिति. यावन्न भाषते** भगवानिति शेषः **तावत् पूर्वोक्तमपि सर्वं सरसतां न याति.** तूष्णीं रमणे रसो न भवतीति रसमर्यादासूचनाय **स्थितिरित्युक्तम्** (१३).

मोहनिवारणस्यावश्यकत्वमाहुः **मोहो हीति. मध्विति**, तादृशो रसः

**योजना**

**मधुरया गिरेत्यत्र हस्तेन च स्वरूपेणेति** कारिकाः. **हस्तेनोपकारः** "करसरोरुहं कान्तकामदमि"त्यत्रोक्तः. **स्वरूपेणोपकारो** "व्रजजनार्तिहन्नि"त्यनेनोक्तः. **पदोपकारः** "प्रणतदेहिनामि"त्यनेनोक्तः. **मुखेनोपकारो** "मधुरया गिरे"त्यनेनोक्तः (१२).

**कारिकार्थः**

"मधुरया गिरा" इत्यत्र "विरचिताभयम्"इत्यादि श्लोकत्रयोक्तभगवत्कृतोपकारानुवादपूर्वकम् एतच्छ्लोकोक्तमुपकारमाहुः **हस्तेन चे**त्यादि. "विरचिताभयम्" इति श्लोके "शिरसि धेहि नः श्रीकरग्रहम्" इति **हस्तेनोपकारः**. "व्रजजनार्तिहन्" इतिश्लोके "भज सखे भवत्किंकरीः" इति **स्वरूपेणोपकारः**. "प्रणतदेहिनाम्" इति श्लोके "पदाम्बुजं कृणु कुचेषु" इति **पदा उपकारः**. अस्मिन् "मधुरया गिरा" इति श्लोके **मुखेन च उपकारः कर्तव्य** इति **ता** गोप्यः **जगुः** इत्यर्थः (१२).

मधुरवाणीप्रार्थनप्रयोजनमाहुः **पूर्वोक्तमित्यादि, यावद्** भगवान् मधुरवाण्या भाषणं न करोति **तावत्** पर्यन्तं **पूर्वोक्तं सर्वमपि सरसतां न याति** तूष्णींरमणे रसो न भव**तीति** रसमर्यादासूचनाय **स्थितिरित्युक्तम्** (१३).

तत्र तव वाणी आनन्दरूपेत्याह **मधुरयेति**, **मध्व**साधारणो रसः तद्युक्ता मधुरा. **वल्गु** मनोहरं **वाक्यं** यत्र, वाक्यस्य मनोहरत्वं सत्यप्रियप्रतिपादकत्वेन, अतः सद्रूपता निरूपिता. **बुधानां मनोज्ञा** आह्लादकारिणी, अनेन ज्ञानरूपा निरूपिता– ते हि ज्ञानेनैव रता भवन्ति. मुखे नयने वर्तेते इति तयोरपि व्यापारं कृत्वैव वक्तव्यमित्याहुः **पुष्करेक्षणेति**, कमलवत् परतापापहारके ईक्षणे यस्य. किञ्च **अधरसीधुना** अधरामृतेन च **आप्याययस्व**, वक्तव्याः द्रष्टव्याः पाययितव्या इति. मूर्छितानां हि मूर्छानिवारणार्थं महामन्त्राः पठ्यन्ते, कमलादीनि च शीतलद्रव्याणि स्थाप्यन्ते. सर्वथा असाध्ये अमृतमपि पाय्यते. अतिगोप्यान् वा रसान् पाययन्ति. इयं तु मूर्छा नाल्पेन निवारयितुं शक्येति **वीरे**ति सम्बोधनम्. अनेनान्तिमावस्था प्रदर्शिता. पूर्वप्रार्थिताश्चार्थाः स्मारकत्वेनाधिकमूर्छाहितवो जाताः ॥८॥

एवं [१]पदार्थचतुष्टयं संप्रार्थ्य तददाने स्वयमेव हेतुमाशङ्क्य परिहरन्ति **तव कथेति**.

**तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ।**
**श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ये भूरिदाऽजनाः ॥९॥**

ननु सर्वमिदं प्रार्थितं भक्तेभ्यो देयं नत्वभक्तेभ्यः. अभक्तत्वं च विरहेऽपि जीवनादवसीयते. भगवांस्तु सर्वनिरपेक्षः, न तस्य भवज्जीवनेन

**प्रकाशः**

**आप्याययस्वे**त्यनेन सम्बन्धः. **पाययते** इति, भिषक्तम इति शेषः ॥८॥

**लेखः**

प्रीतिः, तस्या आनन्दधर्मत्वात् तद्युक्त आनन्दो मधुर इत्यर्थः. **पुष्करेक्षण**पदतात्पर्यमाहुः **द्रष्टव्या** इति. **अनेनेति** अमृतप्रार्थनेनेत्यर्थः ॥८॥

**पदार्थचतुष्टयमि**[२]ति "हस्तेन च स्वरूपेणे"ति कारिकोक्तमित्यर्थः.

**योजना**

**मधुरया गिरे**त्यत्र **वक्तव्या द्रष्टव्याः पाययितव्या** इति, **मधुरया गिरे**त्यस्य **वक्तव्या** इति विवरणं, **पुष्करेक्षणे**ति सम्बोधनस्य **द्रष्टव्या** इति विवरणम्, **अधरसीधुने**त्यस्य **पाययितव्या** इति ॥८॥

१. प्रार्थनाचतुष्टयमिति लेखपाठः कुत्राप्यदृष्टत्वान्न मूले निवेशितः.
२. जो. पाठमनुसृत्य, मुद्रितपाठस्तु प्रार्थनाचतुष्टयम् इति.



कार्यं, लक्ष्मीसदृश्यो यस्य कोटिशो दास्यः. अत"स्त्वयि धृतासव" इत्यप्यसंगतम्. तस्माद्व्यर्थमेव प्रार्थनमित्याशङ्क्य [१]परिहरति– नेदं जीवनमस्मत्कृतिसाध्यं किन्तु तव कथा विरहेण प्राणानां गमने प्रतिबन्धं करोति. कथायाः पुनः यथा तव सामर्थ्यं तथा; सापि षड्गुणात्मिका मोक्षदायिनी परमानन्दरूपा च, तदाहुः **तव कथा अमृतमिव**. अमृतं भगवद्रसात्मकं, सर्वेषां मरणादिनिवर्तकं यद्रूपं त**दमृत**शब्देनोच्यते. अतो मोक्षदातृत्वं परमानन्दरूपता च सिद्धा. इदानीं षड्गुणान्निरूपयन्ति **तप्तजीवनमि**त्यादिषड्भिः पदैः. **तप्ता** ये संसारे तेषां **जीवनं** यस्मात्. अमृतं हि तापनिवर्तकं प्रसिद्धमेव. वैराग्यं च भगवतो ज्ञानं वा सर्वतापनिवर्तकम्. यत्संस्कारयोग्यं तद् ज्ञानेन नश्यति यदयोग्यं तत्परित्यागेन. अतएव स्मार्तैः

**प्रकाशः**

**तव कथे**त्यत्र. **इत्यप्यसङ्गतमि**त्यत्रापि "विधिकरीरिमा" इति संगृह्यते. **परिहरतीति**, अभक्ताः विरहेऽपि जीवनादिति जीवनानुमितमभक्तत्वं हेतोरुपहितत्वव्यञ्जनेन परिहरतीत्यर्थः. तथा च यथा यागीया हिंसा अधर्मः हिंसात्वादित्यत्र निषिद्धत्वमुपाधिः, तथा प्रकृते स्वकृतिसाध्यत्वमुपाधिरिति भावः. तदेतत्प्रदर्शयन्ति **नेदमि**त्यादिना. **उच्यत** इति, "अमृतत्वस्य तु नाशास्ति वित्तेने"त्यादिश्रुतिषूच्यत इत्यर्थः. **सर्वतापनिवर्तकमि**ति, अत्र "**तप्तजीवनमि**त्यस्य **तप्ते** अयःपिण्डतैलादौ यथा **जीवनं** जलं किञ्चित्पतितं

**लेखः**

**तव कथे**त्यत्र. **षड्गुणात्मिके**ति. **षड्गुणा** [२]**आत्मनि** स्वरूपे यस्याः, तत्कार्यकर्तृत्वात्तद्युक्तेत्यर्थः. कथायाः शब्दरूपायाः तापनिवर्तकत्वं कथमित्याशङ्क्य व्युत्पादयन्ति **अमृतं हीति**. संसारतापयुक्तानां जीवनजनकं तत्तापनिवर्तकमित्यर्थः. **भगवतो ज्ञानमि**ति, भगवद्धर्मरूपं ज्ञानं तत्कृपया जीवेष्वागतं सत् तापं निवर्तयति, कथापि श्रवणद्वारान्तःप्रविष्टा तथा करोतीति भावः. तापनिवृत्तिश्च सांसारिकविषयनाशेन भवतीति व्यवस्थया तन्नाशकत्वमाहुः **यदिति**. **संस्कारयोग्यं** वाचारम्भणविकारराहित्येन ब्रह्मत्वप्रकारकज्ञानविषयत्वयोग्यमित्यर्थः. **तद्वस्तु ज्ञानेन नश्यति** ज्ञानिनं प्रति नश्यति, तदनुभवविषयत्वं वस्तुत्वेन न सम्पद्यते. यच्च स्त्र्यादिकं वस्तु ज्ञानस्यापि स्वसङ्गेन नाशकं

१. परिहरतीति नास्ति क्वचित्. २. आत्मा स्वरूपमिति पाठः.

संस्काराशक्तैः परित्यागएव बोध्यते. अतो ज्ञानं वैराग्यं च तापनाशके भवतः. आपाततस्तापनाशकत्वं जलादावपि वर्तत इति तदर्थमाह **कविभिरीडितमि**ति. **कविभिः** सर्वैरेव शब्दार्थरसिकैः ज्ञानिभि**रीडितं** ज्ञानं वैराग्यं वा. आपाततः स्त्रीषु तथात्वमस्तीति तद्व्यावृत्त्यर्थमाहुः **कल्मषापहमि**ति,

**प्रकाशः**

सदधिकमेव तापं जनयति, एवं तव कथामृतमपि विप्रयुक्तेऽधिकतापमेव करोतीत्यर्थ" इत्याह वैष्णवतोषिणीकारः. तदविचाररमणीयं, तप्तायःपिण्डे पतितस्य स्वल्पस्यापि जलस्य विद्यमानत्वे स्वानुरूपौष्ण्यनाशकत्वस्य प्रत्यक्ष-सिद्धत्वात्. अन्यथाग्न्यन्तरसंयोगस्येव बहुजलसंयोगस्यापि तापाधिक्यहेतुत्वं स्यात्, तप्ततैलादौ तु तस्योत्तेजकत्वेऽपि तीव्रवह्निना तन्नाशेनात्र च कथाया विद्यमानतया तद्वैधर्म्यात्. तत्रोत्तेजनस्यापि बहिर्वह्निक्षेपणेनेतरतापकत्वमेव न तु जलसंयुक्ततापकत्वमित्यस्यापि तत्र दृष्टत्वाच्च प्रकृतेऽपि परतापकत्व-स्वतापशामकत्वयोरेव सिद्धेश्च. ननु कथायाः सर्वतापनाशकत्वे भगवत्संयोग-स्यावश्यकता नायास्यतीति चेत्, न, भगवदपेक्षया कथायाः स्वल्पत्वेन सांसारिकसकल-तापनिवर्तनमात्र-समर्थतया विरहमहातापनिवारणे तद-सामर्थ्यात्सुखेन भगवत्संयोगावश्यकतोपपत्तेः. अतएव मूले जीवनसम्पादकत्व-मेवोक्तं, न तु विरहतापनिवर्तकत्वमपि. किन्तु तदुक्तार्थाङ्गीकारे**ऽमृत**पद-विरोधः, तस्यातापकत्वात्. तथा **भूरिद**पदविरोधश्च. महातापजनक-वाक्यवक्तृत्तुतेस्तादृश-तत्तापतप्त-कर्तृकत्वायोगात्. तत्र काकुविपरीतलक्षणा-द्यंगीकारस्तु साहसमेव. तस्मात्तापनाशकत्वमेवात्रार्थ इति दिक्. **यत्संस्कारे**त्यादि, अत्र प्रथमोदाहरणं अप्रजत्वादितप्तं, "तद्धैक आहुः ऋषयः कावषेयाः किं प्रजया करिष्यामो येषां नो एवायमात्मा नायं लोक" इत्यादिश्रुतेस्तादृशज्ञानादेव तन्नाशात्. द्वितीयोदाहरणं तु जुङ्गितोपगतादितप्तं बोध्यं, स्मृतौ "चतस्रस्तु

**योजना**

**तव कथामृतमि**त्यत्र **ज्ञानं वैराग्यं च तापनाशके भवत** इति. **तप्तजीवनमि**त्यनेन वैराग्यं ज्ञानं वा ग्राह्यं, तापनाशकत्वस्य ज्ञाने वैराग्ये च सत्त्वात्. तथा च उभयोर्मध्ये एको धर्मोऽनेन विशेषणेन सिद्धः. **कविभिरीडितमि**त्यस्य विवृतौ **ज्ञानं वैराग्यं वे**ति. अनेनापि विशेषणेन ज्ञानं वैराग्यं वा ग्राह्यं, कवीडितत्वस्य ज्ञाने वैराग्ये च विद्यमानत्वात्. तथा च



**कल्मषं** पापमपहन्तीति. "ऐश्वर्यस्य समग्रस्य धर्मस्ये"त्यपि क्वचित्पाठः. अलौकिकसाधकं च वीर्यं महत् तद्धर्मरूपमेव भवति. धर्म्यं च पुनः कल्मषनिवर्तकं भवति, पूर्वोक्तधर्मविशिष्टं च. कथायाश्च तथात्वं सर्वत्र प्रसिद्धम्. प्रायश्चित्तादीनामपि आपाततस्तथात्वमस्तीति तद्व्यावृत्त्यर्थमाह **श्रवणमङ्गलमि**ति, तद्धोमयादि-लेपनात्मकमुपवासात्मकं च स्वरूपतोऽप्यमङ्गलं

**प्रकाशः**

परित्याज्या" इत्यनेन त्यागबोधनात्. **इत्यपीत्यपिना** सूचितं पाठान्तरं तु "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरित" इत्येवमाग्नेयादौ दृश्यते. अत्र 'ईरित' इत्यस्य वाचक ईरित इत्यर्थो ज्ञेयः. **पूर्वोक्तधर्मो**ऽलौकिकसाधकत्वम् ॥९॥

**योजना**

उभयोर्मध्ये एको धर्मोऽनेन सिद्धः. तत्र यदा **तप्तजीवनमि**ति विशेषणेन ज्ञानं गृह्यते तथा **कविभिरीडितमि**त्यनेन वैराग्यं ग्राह्यं, यदि पूर्वेण वैराग्यं तदा **कविभिरीडितमि**त्यनेन ज्ञानं ग्राह्यम्– एवमेकेन विशेषणेनैकं ग्राह्यम्. इत्थं द्वाभ्यां विशेषणाभ्यां ज्ञानवैराग्यसिद्धिः. **कल्मषापहमि**त्यनेन धर्माख्यो धर्मः सिध्यति, कल्मषनाशकत्वस्य धर्मे स्फुटत्वात्, ऐश्वर्यादिषु षट्सु धर्मेषु पाठान्तरेण धर्मस्य संग्रहात्. तदेतदाहुः **धर्मस्येत्यपि क्वचित्पाठ** इति, "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा" इतिवाक्ये 'वीर्यस्ये'त्यस्य स्थाने **धर्मस्ये**ति पाठ इत्यर्थः. 'वीर्यस्ये'ति पाठेऽपि **कल्मषापहमि**त्यनेनैव विशेषणेन वीर्यमपि ग्राह्यमित्य-त्रोपपत्तिमाहुः **अलौकिकसाधकत्वं च वीर्यं महत्तद्धर्मरूपमेव भवती**ति. अनेन वीर्यधर्मयोरैक्यमुक्तम्. **श्रवणमङ्गलमि**त्यनेन यशो गृह्यते. **श्रीमदि**त्यनेन श्रीर्ग्राह्या. **आततमि**त्यनेन ऐश्वर्यम्. एवं षड्गुणाः कथायामिति भगवत्कथा भगवत्तुल्येति सिद्धान्तितम्. युक्तं चैतत्, "नामरूपे व्याकरवाणी"तिश्रुतौ नामरूपयोस्तौल्यनिरूपणात्. अतएव "आच्छिद्य कीर्तिं सुश्लोकां वितत्ये"त्युक्त्वा "तमोऽनया तरिष्यन्तीत्यगात्स्वं पदमीश्वर"इत्यनेन स्वकीर्तौ भगवता स्वभारः स्थापित इत्युक्तमेकादशस्कन्धे. "कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह कलौ नष्टदृषामेष पुराणार्कोऽधुनोदित"इत्यनेन नामात्मके श्रीभागवते कृष्णतौल्यं प्रथमस्कन्धे उक्तम् ॥९॥

घोरात्मकत्वात् श्रवणेऽप्यमङ्गलम्, इदं तूदारचरितं श्रुतमेवानन्दं जनयतीत्यनुभवसिद्धत्वात् **श्रवणमङ्गलम्.** तेन कीर्तितुल्यता निरूपिता. पुत्रजन्मादिश्रवणस्यापि किञ्चिद्धर्मसाम्यात् श्रवणमङ्गलत्वमाशङ्क्य तद्व्यावृत्त्यर्थमाह **श्रीमदि**ति, तद्धनव्ययसाधकं न तु धनसाधकं, कथामृतं तु लक्ष्म्या अप्यपेक्षितत्वात् तद्युक्तं भवति. तेन श्रोतुर्वक्तुश्च तत्सिद्धिः. राज्यप्राप्तिश्रवणं तथा भवतीति तद्व्यावृत्त्यर्थमाह **आततमि**ति. **आ** सर्वतः **ततं** व्याप्तम्; राज्यादिकं तु परिच्छिन्नं, भगवत ऐश्वर्यं तु न तथा, अन्तर्बहिः सर्वेषां सर्वथा व्याप्तमिति. कथामृतं च पुनः सर्वलोकान् व्याप्य तिष्ठति, स्वसामर्थ्यं सर्वत्रैव सम्पादयति. तस्मात् स्वरूपतो धर्मतश्च भवत्सदृशी भवत्कथेति तया कृत्वा जीवनं, न तु स्वतः. अनेनोत्कर्षोऽप्युक्तः— त्वं कदाचिन्मारयस्यपि, कथामृतं तस्मिन्नपि काले जीवयतीति. भगवान् स्वतन्त्रः कथामृतं परतन्त्रमित्येतावान् विशेषः. त्वं च अवतारे ब्रह्मादिभिः प्रार्थित आगच्छसि, आगतोऽपि तिरोभवसि, कथा तु समागता न तिरोभवति. अतएव तादृशं **कथामृतं ये भुवि गृणन्ति** तएव **भूरिदाः** बह्वर्थदातारः. **य** इति प्रसिद्धाः व्यासादयः. **भूरिदाश्च** ते **अजनाश्च**, ते केवलं भगवद्रूपाः जननादिदोषरहिता वा. परं विरलममृतं केवलं मरणोपस्थितौ तन्निवर्तकमेवेति, न तु संभूयैकत्र रसजनकम्. रसपिण्डयोरिव तव कथायाश्च विशेषो, अन्यथा कथार्थमेव यत्नः कृतः स्यात्. परं विरहे मरणनिवर्तकत्वेन तदुपयोग इति भगवत्त्वेन स्तूयते. अतस्तैर्भगवत्कथाकथकैः बहु दत्तमिति तद्वशाद् जीवनम्. एतत्सात्त्विक्याः ॥९॥

---

### लेखः

तत्परित्यागेन तथा भवतीत्यर्थः. **उदारचरितमि**ति उदाराणि चरितानि यत्र. **किञ्चिद्धर्मसाम्यादि**ति, ऋणमोचकत्वेन कल्मषापहत्वं ज्ञेयम्. "किं प्रजया करिष्याम" इत्यादिवाक्यानामपि सत्त्वात् **किञ्चिदि**त्युक्तम्. **स्वतन्त्र** इति रसानुभावने इति शेषः. **कथामृतं** तु **परतन्त्रं** सहायसङ्गसापेक्षमित्यर्थः. **बहु दत्तमि**ति लोकेभ्य इति शेषः. **तद्वशादि**ति कथावशादित्यर्थः. कथावक्तॄणां भूरिदत्वोक्त्या कथाया जीवनसम्पादकत्वरूपं माहात्म्यमुक्तं भवति. तेनात्रापि गोपिकान्तरोक्तकथाया जीवनसम्पादकत्वमिति व्यङ्ग्यं जातमिति भावः ॥९॥



तामस्याः वचनमाह **प्रहसितमि**ति.

**प्रहसितं प्रिय प्रेमवीक्षितं विहरणं च ते ध्यानमङ्गलम् ।**
**रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ॥१०॥**

यद्यपि कथया स्थातुं शक्यते, यदि त्वदीयैर्धर्मैः क्षोभो नोत्पादितः स्यात्. यथा भगवति षड्गुणाः सन्ति तथा षड् व्यामोहका अपि गुणाः सन्ति. अन्यथा कथयैव चरितार्थता स्यात्. तदर्थं भगवान् मायया कुहकलीलामपि करोतीति स्वस्वभावदोषाद् भगवति तथा स्फूर्तिरिति; यथा ज्वरितस्य अन्ने विरसताप्रतीतिः. अत आह **तव प्रहसितादिकं नो मनः क्षोभयतीति**, प्रकर्षेण **हसितं**, स्वभावतएव खिन्ना, तां त्यक्त्वा अन्यया सह स्थित इति, ततश्चेत् समागत्य प्रकर्षेण हसति, सुतरां क्षोभं प्राप्नोति. **प्रियेति** सम्बोधनात् तव सम्बन्धोऽपि स्मृतः क्षोभजनको जायते. अतएव यासां न सम्बन्धः तासां न क्षोभः. किञ्च **तव** य**त्प्रेमवीक्षितं** प्रेम्णा वीक्षितं तदपि क्षोभयति स्मृतं सत्. अन्यविषयकं वा विश्वासजनकत्वाद्वा अन्तःकपटरूपमिति क्षोभजनकम्, अन्यथा कार्ये विसंवादो न स्यात्, मनस उत्तोलकं वा आशाजनकम् आशया च श्रमः. **तव विहरणम**पि क्षोभजनकम्. **विहरणं**

---

### प्रकाशः

**प्रहसितमि**त्यत्र, मोहकगुणसद्भावे किं प्रमाणमत आहुः **तदर्थमि**त्यादि, **तदर्थमि**ति मोहनार्थम्. तथा च तदर्थकतादृशलीलैव मानमित्यर्थः. नन्वेवमारोपोऽनुचित इत्यत आहुः **स्वस्वभावे**त्यादि. **त** इत्यस्य सर्वत्र सम्बन्धे

### लेखः

**प्रहसितमि**त्यत्र. **शक्यते** इत्यस्यानन्तरं तथापीति शेषः. **विहरण**शब्दस्य

### योजना

**प्रहसितं प्रिय प्रेमवीक्षणमि**त्यत्र, प्रेमवीक्षणस्य क्षोभकत्वं त्रेधा व्युत्पादयन्ति **स्मृतं सदि**त्यादिना. स्वविषयकं यत्प्रेमवीक्षणं संयोगे, तद्विप्रलम्भदशायां **स्मृतं सत्** क्षोभं जनयति. **अन्यविषयकं वे**ति, अन्यनायिकाविषयकं प्रेमवीक्षणं क्षोभजनकमित्यर्थः. **मनस उत्तोलकं वे**ति, प्रेमवीक्षणमस्मन् **मनस उत्तोलकं** परीक्षकमित्यर्थः. अतोऽपि **क्षोभजनकं** सर्वथा प्रेमवतां ज्ञातप्रेमकाणां परीक्षाकरणस्य क्षोभजनकत्वं स्फुटमतः सुस्थम् ॥१०॥

यच्चलनं, वेणुवादनादिना रसो भगवदीय आकाराद् बहिः स्थाप्यत इति, विशेषेण हरणं यस्मादिति त्रिभङ्गललितादिकं भवति. तत्पूर्वमस्माभिर्ध्यातमिति [1]**ध्यानमेव मङ्गलं,** त्वल्लक्षणं शुभफलं प्रयच्छतीति. तदपीदानीं क्षोभजनकं, तिरोहितत्वात्. **त** इति सर्वत्र सम्बन्धः. अन्यन्माययापि करोतीति मुख्यतया अत्रोक्तिः. एवं रूपसम्बन्धे चतुष्टयं क्षोभकमुक्तम्. नामसम्बन्धि द्वयमाह **रहसि संविद** इति **या हृदिस्पृश** इति, **रहसि** एकान्ते **संविदो** ज्ञानरूपाः भगवद्वाचः. ज्ञानान्येव वा शास्त्रजनितानि बन्धाद्यभिज्ञारूपाणि. तत्रापि **या** वाचो **हृदिस्पृशः** हृदयगामिन्यो भवन्ति. अस्मदनुगुणाएव बन्धसंविदो वा, न तु केवलं नायकानुगुणाः. अतएवमेते सुखहेतवोऽपि, भवान् वक्ष्यति चेत्, तदा क्षोभं जनयन्ति. अयमर्थः सर्वानुभवसिद्ध इत्याह **हीति** ॥१०॥

राजस्या वचनमाह **चलसीति**[2].

**चलसि यद् व्रजाच्चारयन्पशून् नलिनसुन्दरं नाथ ते पदम् ।**
**शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति ॥११॥**

अस्माकं तु स्नेहवशात् त्वद्विषयिकासमीचीनेऽपि खेदबुद्धिर्जायते, तव तु नास्मद्विषयिणी सत्यखेदेऽपि जायत इति न्यायविरोधमिवाह. **यद् व्रजात्पशून् चारयन् चलसि** तत्र चलने **नलिना**पेक्षयापि **सुन्दरं** कोमलं, हे **नाथ, ते पदं** मार्गस्थितैः **शिलतृणाङ्कुरैः— शिलाः** पाषाणाः, तृणानि, **अङ्कुराः** दर्भादीनां, तामसानि सात्त्विकानि राजसानि; अथवा शिलारूपं यत्तृणं **शिलतृणं** कठिनतृणं, तस्याङ्कुरैः— अतिपरुषतीक्ष्णैः **सीदतीति** क्लेशं प्राप्नोतीति, वस्तुतो न प्राप्नोत्येव तथापि, हे **कान्त** भर्तः, **मनः कलिलतां गच्छति. व्रजादि**ति प्रातरारभ्य खेदः सूचितः. चलनादेव च खेदः अतः प्रथमतस्तदेवोक्तम्. वस्तुतस्तु तव पदे अस्मत्स्थानं विहाय न गच्छतः तथापि भवानेव तथा चालयति. किञ्च व्रजस्थिता गावो अरण्ये नीयन्ते. तासां चारणं न मार्गगमनेन भवति अतो अमार्गेऽपि गन्तव्यम्. भूम्यादीनाम् अनुग्रहार्थं न पादुकाग्रहणं, पाल्यानां चर्म च न परिधेयम्, अतो नलिनसुन्दरं पदमेव

**प्रकाशः**

प्रथमतएव तदुक्तिरुचितेत्यत आहुः **अन्यदित्यादि. अत एवमेत** इति **एवम् एत** इति पदच्छेदो बोध्यः ॥१०॥

**लेखः**

चलनार्थकत्वं व्युत्पादयन्ति **वेणुवादनादिने**ति. त्रिभङ्गादिरीत्या व्रजागमने तत्सामयिकवेणुनादेन स्वामिनीनामन्तःस्थितो **भगवदीयो रसस्तदाकाराद्बहिः स्थाप्यते** प्रकटीक्रियते, नादश्रवणे पुलकादिकं भवतीत्यर्थः. तथा च **विशेषेण हरणं** रसस्य बहिःस्थापनं यस्मादित्यर्थः. **तिरोहितत्वादि**ति अन्तरपीति शेषः, अन्तःस्थित्यज्ञापनादेव मुक्तिः. **अत्रोक्तिरि**ति, **त** इत्यस्यात्रैव सन्निधानमुक्तमित्यर्थः. **चतुष्टयमिति, प्रिये**ति सम्बोधनसूचितः सम्बन्धश्चतुर्थः. **द्वयमि**ति संविदस्तासां स्पर्शश्चेत्यर्थः ॥१०॥

**लेखः**

**चलसी**त्यत्र, चलने चारणस्य हेतुत्वोक्त्या भगवतएव तत्कार्यार्थं चलनमभीष्टं न तु पदोस्तदभीष्टमित्याशयेनाहुः **वस्तुतस्त्वि**ति. पदोस्त्वस्मत्स्थानमेवाभीष्टमित्यर्थः. व्रजाच्चलनात् कलिलतां गच्छति, चरणावसादनादपि तथेत्याहुः **किञ्चे**ति. **पादुकाग्रहणमि**ति, चर्मापरिधानस्यैवोपपादनाच्चर्ममय्यौ पादुके न गृह्णाति, दारुमय्यौ तु गृह्णात्यपि. परन्तु ताभ्यां बहुदूरे गमनं न सम्भवतीत्यत्र तदग्रहणमिति ज्ञेयम्. ननु आवश्यकव्यवधानेन भूमेरनुग्रहो नान्यथा भवति, शैत्याद्यर्थमपेक्षित-कुङ्कुमव्यवधानेन वक्षोजयोरिव इत्यरुच्या तात्पर्यान्तरमप्याहुः **पाल्यानामि**ति, व्रजीयाः सर्वएव जीवा भगवतः पाल्याः, तच्चर्मपरिधाने तु तन्मारण-मनुज्ञातमिव भवतीति भावः. चर्मपरिधानाभावस्यैवोपपादितत्वाद्दारुमय्यौ पादुके कदाचित् परिदधात्यपि. अतएव महत्सेवितस्वरूपेषु श्रीमन्मदनमोहन-चरणयोस्तथा. भूमेरनुग्रहस्त्वावश्यकव्यवधानेन नान्यथा भवतीत्यनुपदमेवोक्तम्.

**योजना**

**चलसि यद् व्रजा**दित्यस्य विवृतौ **पाल्यानां चर्म च न परिधेयमि**ति, **पाल्यानां चर्म परिधेयं च ने**त्यन्वयः. भूम्यादीनामनुग्रहार्थं चरणयोश्चर्म न परिधेयं, चर्म परिधेयं च न भवतीति हेतुद्वयं चर्मापरिधाने, पादुकयोरधारणे तु भूम्यादीनामनुग्रहः एकएव हेतुरित्यर्थः. **जलएव स्थातुं योग्यं जलपूर्णे वा,** नलिनं जलजत्वाज्जले स्थातुं योग्यमित्यर्थः. उद्धृतजले स्थापितमपि तथा न शोभत इति पक्षान्तरमाहुः **जलपूर्णे वे**ति, **जलेन पूर्णे** सरसि **स्थातुं योग्यं** सरोजत्वादित्यर्थः ॥११॥

१. ध्यान इति पाठः. २. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्.

शिलतृणाङ्कुरैः सीदति. (नलिनं!) जले एव स्थातुं योग्यं, जलपूर्णे वा. नलिनादपि सुन्दरं चेत्, लक्ष्म्यामस्मासु वा स्थातुं योग्यम्. **नाथे**ति सम्बोधनाद् बहव एवात्रार्थे नियोज्याः सन्ति तथापि स्वयमेव गच्छसीति. वने हि त्रिविधा भूमिः– पर्वतरूपा अरण्यरूपा कच्छरूपा च. तत्र क्रमेणैकमेकत्र भवति, सर्वं वा सर्वत्र. अवसादो अशक्त्या एकत्र स्थितिः तदा चिन्ता भवति, स्वयं गत्वा स्वहृदये स्थापनीयमिति. **मनःकान्ते**ति च, तेन मनःस्थापितमपि न तिष्ठतीति ॥११॥

एवं सप्तविधा अनन्यपूर्वा निरूपिताः. चतस्रश्च ताः[१]. अतः परं क्रमेण षट् ताएव निरूप्यन्ते. तत्र प्रथमं राजसतामस्या वचनम्. ता हि बहिर्गत्वा द्रष्टुमशक्ताः. अतो यदा संध्यायां भगवानायाति तदा भगवन्तं दृष्ट्वा मनसि

### प्रकाशः

**चलसी**त्यत्र. **नलिन**पदसूचितमर्थमाहुः **जल एवे**त्यादि, सरस्यादिरूप उत्पत्तिस्थानएवेति यावत्. तेन चालनायोग्यता सूचिता. तेन व्रजएव स्थापनीयमित्याशयः. यदि चेच्चालनं क्रियेत तदापि नीरसे स्थापनं नोचितमित्याहुः **जलपूर्णे वे**ति, शाद्वलेष्वित्यर्थः. अर्थान्तरमाहुः **नलिनादपी**त्यादि ॥११॥

### लेखः

**जलपूर्णे वे**ति, स्वस्थानादुद्धृतं **जलपूर्णे** घटादौ तिष्ठतीत्यर्थः. **लक्ष्म्यामि**ति. जलस्थानीया लक्ष्मीः, जलस्य नलिनस्थानत्वाल्लक्ष्म्याश्च स्वकीयात्वादिति भावः. पात्रस्थानीयाः स्वयम्, उद्धृतस्यैव नलिनस्य पात्रे स्थापनादेतासां च परकीयात्वादिति भावः. **सीदती**त्यस्यार्थमाहुः **अवसाद** इति, कण्टके लग्ने चलनाशक्त्या किञ्चित्कालमवस्थितिरित्यर्थः. एतासां भावानुभावेन वनलीलाज्ञानमित्युक्तमेव. **मनःकान्ते**ति, **इति च** व्याख्यानं सम्भवतीति शेषः. मनसः कान्तेत्यर्थः. तदा **मनः**पदस्यावृत्तिर्ज्ञेया ॥११॥

**दिनपरिक्षये** इत्यस्याभासे **ता ही**ति, अन्यपूर्वाः पत्याद्यनुरोधेन दिवा वनगमनेऽशक्ताः, अतो दिवा प्रयोजनाभावान्न कामभावसम्पादनं किन्तु गुणगानेनैव रमणं, निशि स्वरमणस्य कर्तव्यत्वात् संध्यायां तदुपयोगिकाम-भावसम्पादनम्. अनन्यपूर्वाणां तु दिवापि रमणसम्भवेन तदुपयोगी नित्य

१. अन्यपूर्वा इति ज्ञेयम् (सम्पा.).



कामो भवति. ततो बन्धप्रार्थना अधरामृतप्रार्थना च रजसा सत्त्वेन च भविष्यतः, अनन्यपूर्वाणां तु नित्यएव कामः, **दिनपरिक्षये** इति.

**दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतम् ।**
**धनरजस्वलं दर्शयन् मुहुर्मनसि नः स्मरं वीर यच्छसि ॥१२॥**

**दिनपरिक्षये** संध्याकाले, क्षयोक्त्या दिने द्वेष्यत्वं ज्ञाप्यते. रजोगुणस्यायं समयः, कामस्य च कालः. **नीलकुन्तला**[१] भ्रमरा इव रसबोधकाः[२]. ये हि मुखकमललावण्यामृतं पिबन्ति ते उद्बोधका भवन्ति, अतस्तै**रावृतं वनरुहवत्** कमलवद् **आननं बिभ्रद्, हे वीर, नः मनसि स्मरं यच्छसि.** [३](सन्ध्यायां नीलवर्णैरावृतत्वे तत्प्रभाव्याप्तत्वं भवतीति तदुक्त्या वनरुहोक्त्या[४] च कुवलयाभत्वं ज्ञाप्यते. तथा च प्रियामुखेन्दुदर्शनेनोत्तरोत्तरमधिक-

### लेखः

एव कामः. अनन्यपूर्वा अग्निकुमारवदन्या अपि तथाविधा इति ज्ञेयम्. तेन अग्निकुमाराणां रात्रावेव विवाहितान्यायेन रमणमिति पूर्वोक्तेन न विरोधः. अत्र सत्त्वादिभेदः समयभेदेनैकस्यामपि बहुधा. अतोऽग्रिमश्लोकद्वयोक्त-प्रार्थना एकस्या अपि सम्भवतीत्याशयेन **ततो बन्धप्रार्थने**त्युक्तम्. **तत** इति कामदानलीलास्मरणेनोद्बुद्धात् कामाद्धेतोरित्यर्थः. अनन्यपूर्वाणां तु कामस्य नित्यत्वात् कामदानकथनं विनैव "व्रजजनार्तिहन्" "प्रणतदेहिनामि"ति श्लोकाभ्यां बन्धप्रार्थना, "मधुरया गिरे"त्यनेनाधरामृतप्रार्थना चेति भावः. व्याख्याने, एतस्या राजसतामसीत्वं व्युत्पादयन्ति **रजोगुणस्ये**ति, अतएव तत्समये दोहनादिवैयग्र्यमिति भावः. तमोरूपस्य कामस्य चोद्बोधको भवति, अतः स कालो राजसतामसः. तत्कालीनलीलाकथनादेतस्या अपि तथात्वमित्यर्थः. **संध्यायामि**ति, तथा सत्यधरे लोचनयोश्चापि नारुणिम-

### योजना

**अनन्यपूर्वाणां तु नित्यएव काम** इति, या **अनन्यपूर्वा** अविवाहितास्तासां पतिकृतप्रतिबन्धाभावाद्दिवा वने गमनाद्रात्रौ भगवदन्तिके गमनादहर्निशं रमणं सम्भवतीति तद्धेतुभूतः **कामो**ऽपि **नित्यएव** दिवा रात्रावपि इत्यर्थः ॥१२॥

१. नीलकुन्तलानि इति ब. पाठः. २. रसबोधकानि इति ब. पाठः.
३. ( ) चिह्नान्तर्गतं प्रभूणाम्. ४. वनरुहत्वोक्त्या इति ब. पाठः.

विकासवत्त्वमितः पूर्वमतादृशत्वं च ज्ञाप्यते. तेन प्रियस्य सर्वास्वासक्तिः सूचिता भवति. अतएव 'जल'पदं विहाय **वन**पदमुक्तम्. तेन वने याऽवस्था तां ज्ञापयितुं तान् धर्मान् बिभ्रदेवाननं दर्शयतीति ध्वन्यते.) **धनेन** गोभिः **रजस्वलं मुहुश्च प्रदर्शयन्.** मध्येमार्गं गच्छन् उभयतः स्थिता गोपीः पर्यायेण पश्यति, अतो मुहुः प्रदर्शनम्. अग्रे गच्छन् पुनः पुनर्व्याघुट्य पश्यतीति वा तथा. तादृग्दर्शनं स्वापेक्षाज्ञापकमिति स्मरजनकम्. निरन्तरदर्शनेन तत्रैव रसास्वादनमिति न स्मरोत्पत्त्यवसरः स्यात्. अतो वारंवारं प्रदर्शनं स्मराग्नेः संधुक्षणमिव भवति. तादृशं कृत्वा तत्पूरणार्थं तन्निराकरणार्थं वा युद्धमवश्यं कर्तव्यम्. तत्सूचयन्ति **वीरे**ति. धनेन रजस्वलं च श्रमसूचकं भवति, श्रमनिवृत्तिश्चास्माभिरेव. **वनरुहमि**ति, वन एवैतत्सर्वथा भोग्यम् अतोऽत्रैव समागमनम्. अनेन गृहे रतिं दास्यामीति पक्षो व्यावर्तितः. **बिभ्रदि**ति बलात्कारेण तामेवावस्थां स्थापयति. यदि मुखसंमार्जनं कृत्वा समागच्छेत् तदा प्रसन्नमुखदर्शनाद् ज्ञानं वा भवेत्. धनसम्बन्धि रज इति कामएव, न तु क्रोधः. यथा पात्रं धृत्वा तत्स्थितमन्नं भोगार्थं दीयते तथा मुखं धृत्वा तत्रत्यो रसः कामात्मा मनसि स्थाप्यत इति मुखधारणस्य हेतुत्वम्. अतो भोगार्थं दत्त इति भोगः करणीयः. अयं काम आगन्तुक इति नास्यान्येन पूरणं भवति ॥१२॥

**टिप्पणी**

**दिनपरिक्षय** इत्यत्र **बिभ्र**त्पदतात्पर्योक्तौ **ज्ञानं वा भवेदि**ति, भक्त्यात्मकत्वात् मुखस्य स्नेहरसानुभवएव स्यादित्यर्थः ॥१२॥

**प्रकाशः**

[**उभयस्थिताः** अन्यानन्यपूर्वाः. **तादृग्दर्शनं** व्याघुट्य दर्शनम्. **तादृशं कृत्वे**ति दर्शनम्. **युद्धमि**ति रतियुद्धम्. **वन एवे**ति, वनएव सर्वथा भोग्यमत एव वनरुहाननम् (अतो!) अत्रैव समागमनम्. **व्यावर्तित** इति निवर्तितः. **आगन्तुक** इति आपाततः ॥१२॥]

**लेखः**

प्रतीतिरिति भावः. **अतएवे**ति आसक्तेरेव हेतोरित्यर्थः. वनात् समागतोऽप्यासक्त्या एतद्रमणार्थं पुनर्वनं प्रवेक्ष्यति. तथा च वनस्थत्वमेव सम्पन्नमिति भावः. **भोगार्थं दत्त** इति, सन्ध्यायां त्वया दत्त इत्यर्थः. **अन्येने**ति



तत उत्तमा अनन्यपूर्वावत्स्तनयोश्चरणधारणं प्रार्थयन्ति **प्रणते**ति. अत एव न पौनरुक्त्यं परं पूर्वापेक्षयात्र चरणमाहात्म्यमधिकं– गुणाधायकमेतत्, पूर्वं तु दोषनिवर्तकम्.

**प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि ।**
**चरणपङ्कजं शन्तमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥१३॥**

हे **रमण** रतिकर्तः, **नः स्तनेषु चरणपङ्कजमर्पय.** प्रयोजनमाहुः **आधिहन्** इति, **आर्तिहन्** इति वा. हृदयतापः चिन्ता च निवारणीया. दृष्टोपकारेणैव तापो गमिष्यति; अस्माभिर्हृदये स्थापितं न बहिः समायाति अतस्त्वया बहिः स्थापनीयम्. चरणपङ्कजस्यापि भगवत इव षड्गुणानाह. तत्र प्रथममैश्वर्यं **प्रणतकामदमि**ति, **प्र**कर्षेण ये **नता** अनन्यशरणाः तेषां **कामदम**भिलषितार्थदातृ. ईश्वरएव तथाविधो भवति. तत्रत्यः कामः स्तब्धैर्ग्रहीतुं न शक्यत इति प्रणतत्वमुक्तम्. **पद्मजार्चितमि**ति धर्मरूपता निरूपिता, ब्रह्मप्रार्थनयैवात्रागतमिति. कीर्तिरूपतामाह **धरणिमण्डनमि**ति, **धरण्या मण्डनम**लङ्करणरूपं श्रीरूपं वा. **आपदि ध्येयं** श्रीरूपं कीर्तिरूपं वा. पङ्कजसाम्यात् स्वरूपोत्कर्ष उक्तः. **शन्तमं** कल्याणतमं ज्ञानरूपम्. **आर्तिहन्नि**ति सम्बोधनात् **ते चरणपङ्कजमि**ति सम्बन्धनिरूपणाद् वैराग्ययुक्तं च.

**प्रकाशः**

[आभासे **पूर्वमि**ति, "फणिफणार्पितमि"त्यादि. व्याख्याने **दृष्टोपकारेणै-वे**ति, दर्शनेनैव तापनाशः. **हृदये स्थापितमि**ति पदमिति शेषः. **षड्गुणानाहे**ति ऐश्वर्यादि. **स्तब्धैरि**ति अनम्रैः. **धर्मरूपता** इति, वीर्यरूपम्. **श्रीरूपं वे**ति, कीर्तिः श्रीरूपा वा. **आपदी**ति, आपदि ध्येयेऽपि द्विरूपता– श्रीरूपता

**लेखः**

भोगातिरिक्तेनाश्वासनादिप्रकारेणेत्यर्थः ॥१२॥

**प्रणते**त्यत्र, **अतएवे**ति, "प्रणतदेहिनामि"त्यत्रानन्यपूर्वा वक्त्र्यः अत्र सपूर्वा इति वक्त्रीणां भेदादित्यर्थः. **गुणाधायकमेतदि**ति, **एतद्** वर्ण्यमानं चरणपङ्कजं भक्तेषु कामादिदायकमित्यर्थः. पाठद्वयेऽप्यर्थमाहुः **हृदये**ति **चिन्ते**ति. **पङ्कज**पदतात्पर्यमाहुः **दृष्टोपकारेणैवे**ति. **तत्रत्य** इति, ईश्वरमनसि दातव्यत्वेनोपस्थित इत्यर्थः. **धर्मरूपते**ति, ब्रह्मा धर्मबुद्ध्यैव पूजयति न तु एता इव स्नेहेनेति भावः. पूजायां हेतुमाहुः **ब्रह्मे**ति. **अथवे**ति पक्षे अस्मिन्

**रमणे**ति, इष्टप्रापकः. **आर्तिहन्नि**ति, अनिष्टनिवारकः. अथवा. यल्लोके पञ्चविधमुपकारं करोति तदस्मास्वेकमेव करोत्विति प्रार्थ्यते. **प्रणतासु कामं** ददाति, तत्पूर्वमुक्तं "मनसि नः स्मरं वीर यच्छसी"ति. **प्रकर्षेण नम्रेषु** वा **कामं द्यति** खण्डयति. **पद्मजेन पद्मजया** वा **अर्चितम्** ऐश्वर्यार्थं कामार्थं

---

**टिप्पणी**

**प्रणतकामदमि**त्यत्र, **अथवा यल्लोक** इत्यादि. लौकिककामखण्ड-नैश्वर्यस्वकामदानालंकरणापद्दूरीकरणात्मकं पञ्चविधमुपकारं करोति तच्चरणपङ्कजं तापनिवारणात्मकमेकमेवोपकारमस्मासु करोत्वित्यर्थः. **पद्मजैरर्चितमि**ति, चरणपद्मजैर्नखैस्तथेत्यर्थः. लोके तेषां संयोगिद्रव्यत्वेऽपि भगवन्नखानां सच्चिदानन्दरूपत्वेन स्वरूपात्मकत्वेन तथा वक्तुमशक्यं यद्यपि तथापि स्वस्याधुना चरणसम्बन्धेऽत्यार्त्या यदेव तत्सम्बन्धि तदेव

**प्रकाशः**

कीर्तिरूपता च. **पद्मजया** इति लक्ष्म्या. **पद्मजैरि**ति नखैः. टिप्पण्यां **तेषामि**ति नखानाम्. **संयोगिद्रव्यत्वेऽपी**ति, लौकिकनखकेशादीनां संयोगिद्रव्यत्वं प्रसिद्धं

**लेखः**

श्लोके तापनिवारणस्यैव प्रार्थनं न त्वभिलषितार्थदानस्य, तत्र हेतुमाहुः **प्रणतास्वि**ति. स्मरदानं स्वासु पूर्वमुक्तम्, तथा च तेनैव भोगप्रार्थना सिद्धैवेति भावः. इदं च तत्रैव श्लोके व्युत्पादितमन्ते. **नम्रेषु वे**ति, प्रथमपक्षोक्तात् कामदानादयं विकल्पः. तथा **चाथवे**त्यस्यैव विवरणं **वा**शब्देनेति ज्ञेयम्. अस्मिन् पक्षे पूर्वार्धोक्त-विशेषणचतुष्टयोक्त-

**योजना**

**प्रणतकामदमि**त्यस्य विवृतौ **कीर्तिरूपतामाह धरणिमण्डनमिति धरण्या मण्डनमलंकरणरूपं श्रीरूपं वे**ति, **धरणिमण्डनमि**ति विशेषणेन यशो ग्राह्यं श्रीर्वेत्युक्तम्. **आपदि ध्येयं श्रीरूपं कीर्तिरूपं वे**ति, **ध्येयमापदी**तिविशेषणेन श्रीर्यशो वा ग्राह्यम्. तथा च यदि **धरणिमण्डनमि**त्यनेन श्रीर्गृह्यते तदा **ध्येयमापदी**त्यनेन कीर्तिर्ग्राह्या, यदा तु पूर्वेण कीर्तिर्गृह्यते तदा **ध्येयमापदी**त्यनेन श्रीर्ग्राह्या– एवं विशेषणद्वयेन धर्मद्वयं ग्राह्यम्. **शंतम-मि**तिविशेषणेन ज्ञानरूपतोक्ता. **आर्तिहन्नि**त्यनेन वैराग्यमुक्तम्. **चरणप-ङ्कजमि**तिविशेष्यनिर्देशे पङ्कजत्वोक्त्या स्वरूपस्य धर्मिण उत्कर्ष उक्तः ॥१३॥



वा **पद्मजैः अर्चितम्** तत्तुल्यं वा. अन्यथा तानि चरणपङ्कजजन्म कथं प्राप्नुयुः? **धरण्य**पि स्त्री अनलङ्कृता न भुज्यत इति तस्यां पदस्थापनम्. भगवदपेक्षयापि चरणो महान्, **आपदि** ध्यानमात्रेणैवापदं दूरीकरोतीति. यथैतेषां सर्वोपकारकर्तृ तथास्माकमपि करोत्विति प्रार्थना. अनेन सर्वएव सुरतबन्धा आक्षिप्ताः ॥१३॥

तदनन्तरं तत उत्तमाः प्रार्थयन्ते **सुरते**ति.

**सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ।**
**इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥१४॥**

**अधरामृतं वितरे**ति, अत्राप्यधरामृतं गुणाधायकम्. एतस्य चतुर्गुणत्वमेव विवक्षितं, ज्ञानवैराग्ययोरत्रानुपयोगात्. तस्यैश्वर्यमाह **सुरतवर्धनमि**ति, गोपिकासु परिच्छिन्नः कामः अपरिच्छिन्नेन सह संयोगे क्लिष्टो भवति. यथा रसाः क्षुदुद्बोधका[1] भवन्ति तथायं रसः कामोद्बोधकः. किञ्च न केवलमयं काममेव पोषयति किन्तु सर्वानिवान्तःकरणदोषान्निवारयति. अतः शोकनाशकत्वं

---

**टिप्पणी**

पूर्णसाधनमित्याशयेन तथोक्तम्. अस्मिन्पक्ष उपपत्तिमाहु**रन्यथे**ति. उक्तारुच्यैव पक्षान्तरमाहु**स्तत्तुल्यं वे**ति, **तैर**तिशोभा अतस्तैश्चरणपद्मं पूजितमिव भवतीत्यर्थः. ध्वजादिचिह्नानि चोक्तरूपाणि ज्ञेयानि ॥१३॥

**प्रकाशः**

तथा भगवति न, सच्चिदानन्दत्वात्, तथापीत्यर्थः. सुबोधिन्यां **तानि** इति नखानि. **धरण्यपी**ति, धरणिः भगवता(तः!) स्त्री वाराहलीलायाम् अनुगृहीता ॥१३॥]

[**अत्रापी**ति, तत्र अनन्यपूर्वाविषये दोषनिवर्तक इति प्रकरणभेदेन न पौनरुक्तिः. **चतुर्गुणत्वमि**ति, ऐश्वर्ये चतुर्गुणं वा षड्गुणम्(?). **परिच्छिन्न** इति स्वल्पः. **अपरिच्छिन्नेन** इति, भगवत्कामः. **भवन्ती**ति, ऐश्वर्यद्योतित–.

**लेखः**

पञ्चविधोपकारकर्तृ-**चरणपङ्कजं नः स्तनेषु शन्तममर्पय** शन्तमत्वेन तापनिवारकत्वेनार्पयेत्यर्थः. **करोत्विती**ति, तापनिवारणात्मकमुपकारमिति शेषः. **सर्वएवे**ति बाह्या विपरीततिर्यक्समा आन्तरं चैकमित्यर्थः ॥१३॥

---

१. भवन्ति कामोद्बोधका इति ब. पाठे अधिकः.

ज्ञानवैराग्यरूपता च निरूपिता, ऐश्वर्यधर्मरूपता च. यशोरूपतामाह **स्वरितो** नादयुक्तो यो **वेणुः** तेन **सुष्ठु चुम्बितमि**ति, यशो हि नादज्ञैः कीर्त्यते; वेणुश्च परमभक्त इति तेनापि चुम्बितमेव न तु पीतम्. **इतररागविस्मारणमि**ति श्रियो रूपं, सा हि सर्वं विस्मारयतीति. स्वतःपुरुषार्थत्वेन प्रमेयबलमुक्तं पूर्वेण प्रमाणबलं **शोकनाशनमि**ति फलबलं **सुरतवर्धनमि**ति साधनबलम्– एवं चतुर्विधपुरुषार्थप्रदं स्वतःपुरुषार्थरूपम्. **नृणाम**स्माकमधिकारिणां[1] दुर्लभपुरुषार्थानां वा. यद्यपीदं देयं न भवति तथापि वितरणगुणेन दातुं शक्यत इति **वितरे**त्युक्तम्. **वीरे**ति सम्बोधनात् शौर्यं नान्यथा संभवतीति निरूपितम् ॥१४॥

एवं त्रिविधा निरूप्य पुनस्तामस्यः त्रिविधा निरूप्यन्ते– देवनिन्दिकाः[2] सात्त्विकतामस्यः भगवन्निन्दिकाः तामसतामस्यः स्वनिन्दिका राजसतामस्य इति.

---

**प्रकाशः**

**निवारयती**ति, दोषनिवारकत्वेन वीर्यरूपता. **पूर्वेणे**ति **स्वरित-वेणुने**ति ॥१४॥ ]

*॥ इत्यष्टाविंशाध्यायसुबोधिनीटिप्पण्योः प्रकाशः ॥*

**योजना**

**सुरतवर्धनमि**त्यस्य विवरणे **पूर्वेण प्रमाणबलमि**ति, **इतररागविस्मा-रणमि**त्यस्मात्पूर्वेण **स्वरितवेणुना सुष्ठु चुम्बितमि**त्यनेन प्रमाणबलमुक्तम्, वेणुनादस्य वेदात्मकत्वात्. न च वेणोर्वेदात्मकत्वे प्रमाणाभाव इति वाच्यं, "वंशस्तु भगवान् रुद्र" इति कृष्णोपनिषत्सु वेणोः शिवत्वकथनात् "वेदः शिवः शिवो वेद" इति श्रुत्या शिवस्य वेदरूपतया वेणोरपि वेदत्वात्. **नृणामस्माकमनधिकारिणामि**ति, **नृ**शब्देन साधारणवाचिना अनधिकारित्वं सूचितम् अतो निःसाधनानां परमपुरुषार्थप्रदत्वादधिक उत्कर्ष उक्तः. **दुर्लभपुरुषार्थानां वे**ति. **नृ**शब्देन पुंजीवाः उक्ताः अतोऽन्यैर्दुर्लभपुरुषार्थो येषां तेषां दुर्लभपुरुषार्थानामित्यर्थो भवति. यदिदमधरामृतमस्माकं **नृ**शब्दवाच्याप्राप्यं तदस्मदितरैर्न प्राप्यत इति भावः ॥१४॥

---

१. अनधिकारिणामिति पाठः. २. निन्दका इति ब. पाठे सर्वत्र.



**अटति यद्भवानह्नि काननं त्रुटि युगायते त्वामपश्यताम् ।**
**कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद् दृशाम् ॥१५॥**

अटतीति, **भवान् अह्नि काननं यदटति** तत्र दिवसे त्रुटिः **युगायते**. तत्र निमित्तं **त्वामपश्यतामि**ति. यदा पुनः पश्यामः तदा **कुटिलकुन्तलं श्रीमुखं ते उदीक्षतां** नोऽस्माकं यः **पक्ष्मकृद्** ब्रह्मा स **जडः**. यथा देवानां पक्ष्म न करोति अलौकिकद्रष्टृत्वात्, तदपेक्षयाप्यत्यलौकिकद्रष्टृत्वादस्माकमपि पक्ष्मकरणमनुचितम्, अतोऽनुचितकरणाद् जडः. देवा हि बहुकालं जीवन्ति, तथा वयमपि, **त्रुटि युगायत** इति. **त्रुटि**शब्दो (ऽ!)स्त्रियाम्. यदि सार्थकं गमनं भवेत् तथापि न [1]काचिच्चिन्ता पर**मह्नि काननमेवाटति,** न तु कानने कश्चन पुरुषार्थः. अस्माकं च न बहिर्गमनं संभवति. एवं देवत्वं भगवता संपादितम्. मूर्खो ब्रह्मा तादृशीनां पक्ष्मकृत् ॥१५॥

तदपेक्षया हीना आहुः **पती**ति.

**पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य तेऽन्त्यच्युतागताः ।**
**गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥१६॥**

हे **अच्युत** स्वतः कामनिवृत्तिभयरहित, **पतिः सुताः अन्वयो** वंशः **भ्रातरः बान्धवाः** संबन्धिनः– एते सर्वथा अविलङ्घ्याः तान**प्यतिविलङ्घ्य ते अन्ति समागताः**. त्वं सर्वेषां गतिं जानासीति **गतिवित्,** सर्वैर्यावती गतिः संपाद्यते तां भवानेव दास्यतीति. वयं वा **गतिविदः** तेषां भजने भगवद्भजने च तारतम्यविदः. किञ्च **तव उद्गीतेन** च **मोहिताः**. अतो मोहयित्वा समानीय उभयभ्रंशार्थम् अरण्ये **निशि योषितः कस्त्यजेत्?** सर्वदैव स्त्रियो न त्याज्याः, सुतरामरण्ये, सुतरां निशि. यदर्थं वा समाहूताः

---

**लेखः**

**अटती**त्यत्र, **त्रुटिशब्दोऽस्त्रियामि**त्यनतिप्रयोजनमपि शब्दस्वरूपकथनार्थ-मुक्तम्. **न तु कानने** इति, द्वितीयया काननस्यैवेप्सिततमत्वेनोद्देश्यत्वकथना-त् तत्रत्यः **पुरुषार्थः** पुरुषसम्बन्धिप्रयोजनमुद्देश्यं **ने**त्यर्थः ॥१५॥

**पती**त्यत्र, **स्वत** इति, परस्य कामनिवृत्तौ स्वयं तल्लीलातो निवर्तते न तु स्वत इत्यर्थः. **किञ्चे**ति, गतिज्ञानात्तेऽन्त्यागताः मोहाच्चागता इति समुच्चयः. **अरण्ये** इति, **कितवे**ति सम्बोधनस्याभिप्रायोऽयं; कितवो ह्यरण्ये

---

१. कापि चिन्ता इति ब. पाठः.

तदप्यदत्वेत्यभिप्रायेण सम्बोधनम्[१]. कितवानां (वा!)[२] वयं संबन्धिन्यः अतोऽस्माकं तेषु न प्रवेशः ॥१६॥

तत उत्तमाः आत्मानमेव निन्दन्ति **रहसी**ति.

**रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ।**
**बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहं मुह्यते मनः ॥१७॥**

नो **मनः अतिस्पृहं** सत् **मुह्यत** इति. तत्र कारणत्रयं गुणत्रयसहितं—
वाक्यं हास्यमुरश्चैव कामानन्दाधिकारिणः ॥

**टिप्पणी**

**रहसि संविदमि**त्यत्र, **गुणत्रयसहितमि**ति, मधुरत्व-वल्गुवाक्यत्व-बुधमनोज्ञत्व-लक्षणं गुणत्रयं ज्ञेयम्. **रहसि संविदो** ज्ञानानि येन वाक्येन तत्तथा. वाक्यनिरूपणे सति यादृशं तदस्ति तादृशमेव प्राप्यत इति **गुणत्रय-सहितमि**त्युक्तम्. अथवा. कारणत्रयस्यैव विशेषणमिदं, कारणोद्देशो **वाक्यमि**त्यादिना कृतः. **कामे**त्यादिना, गुणानां बन्धादिबोधकत्वेन **वाक्यं कामोद्**बोधकं, **हास्यमानन्द**स्य. श्रीधामत्वेन **रसाधिकारिणो** बोध्यन्ते ॥१७॥

**लेखः**

वञ्चयित्वा त्यजतीति भावः. सम्बोधनस्याभिप्रायान्तरमाहुः **यदर्थं वे**ति ॥१६॥

**योजना**

**पतिसुतान्वयभ्रातृबान्धवानि**त्यस्य विवरणे **कितवानां वा वयं सम्बन्धिन्य** इति, अस्मिन्पक्षे **कितवयोषित** इति समस्तमेकं पदम्. **सम्बन्धिन्य** इति कितवानां सम्बधिन्यो न तु नार्यः, भगवदेकभोग्यत्वाद्; गोपानां तु भर्तृत्वाभिमानमात्रं, "मन्यमानाः स्वपार्श्वस्थानि"तिवाक्याद्. रासस‌मये यथा योगमायामोहितैर्गोपैः स्वस्वस्त्रियो भगवन्निकटे स्थिता अपि स्वनिकटे ज्ञाताः, एवं सर्वदैवाभिमानमात्रं नतु तत्कर्तृको भोगो, योगमायामोहितत्वात्. पुत्राद्युत्पत्तिस्त्वलौकिकप्रकारेण भगवतः सकाशादेव. इदं सप्तदशाध्यायटिप्पण्यां स्फुटम्. गोपानां पतित्वाभावेऽपि पतित्वेनांगीकारो रसपोषार्थः, "रसस्तु परकीयायामेवे"ति वात्स्यायनराद्धान्तात्. अतो वस्तुतो भगवदेकभोग्या इति निष्कर्षः. अतएवाग्रे आहुः **अतोऽस्माकं तेषु न प्रवेश** इति ॥१६॥

१. कितवेति इति ब. पाठे अधिकम्. २. वा इति ब. पाठे योजनानुसारेण च अधिकः.



**रहसि** एकान्ते या **संविद्** ज्ञानं वा. पूर्ववत् **हृच्छयस्य** कामस्य **उदयो** येन तादृशम्. **प्रहस्मितयुक्तमाननं प्रेम**पूर्वकं **वीक्षणं** च यस्मिन्. **श्रियो धाम बृहदुरः**. भगवद्रूपस्य वा षड्गुणत्वमुच्यते— **रहसि संविदो** यस्मादिति एतादृशं त्वां, **हृच्छयस्य उदयो** यस्मात्, **प्रहसितमाननं** यस्य, **प्रेम**पूर्वकं

**लेखः**

**रहसी**त्यत्र, **या संविदि**ति सा **येने**त्यग्रिमेणान्वयः, टिप्पण्यां तथा व्याख्यानात्. आद्येन वाक्यमुक्तं द्वितीयेन तस्य कामबोधकत्वमुक्तं तृतीयेन हास्यमुक्तं चतुर्थेन तस्यानन्दबोधकत्वमुक्तं पञ्चमेन उर उक्तं षष्ठेन तस्याधिकारिबोधकत्वमुक्तमिति विभागः. **ज्ञानं वे**ति, अस्मिन् पक्षे वाक्यं हास्यमिति प्रकारो नेति ज्ञेयम्. वाक्यस्थाने एव वा ज्ञानं गणनीयम्. **वीक्षणं चे**ति, **यस्मिन्** आनने इत्यर्थः. प्रहसितधर्ममादाय **च**कारः, तेन स्वस्वाग्रिम-विशेषणयुक्तमिदं त्रयं वीक्ष्येत्यन्वयः. वाक्यपक्षे **वीक्ष्य** ज्ञात्वा श्रुत्वेति यावत्. **षड्गुणत्वमि**ति, प्रमाणादिचतुष्टयबलं यशः श्रीश्चेति षड्गुणा यस्य तत्त्व-मित्यर्थः. अस्मिन् पक्षे **ते** इत्यस्य **बृहदुरः श्रियो धामे**त्यत्रैवान्वयः. **श्रीधाम**

**योजना**

**रहसि संविदमि**त्यस्य विवृतौ **तत्र कारणत्रयं गुणत्रयसहितमि**ति. भगवद्वचनं हास्यसहिताननं भगवदुरश्चेतिकारणत्रयं, **हृच्छयोदयं प्रेमवीक्षणं श्रियो धामे**ति प्रत्येकं गुणत्रयं ज्ञेयम्. कारणत्रयं विवृण्वन्ति **वाक्यं हास्य-मुरश्चैवे**त्यादिना. **भगवद्रूपस्य वा षड्गुणत्वमुच्यत** इति, **रहसि संविदमि**-त्यादिषड्गुणा भगवतएवोच्यन्ते. अस्मिन् पक्षे **रहसि संविदमि**त्यादिषु चतुर्षु बहुव्रीहिसमासो ज्ञेय इत्याहुः **रहसि संविदो यस्मादिति एतादृशं त्वामि**त्यादिना. तथा च **रहसि संविदं त्वां, हृच्छयोदयं त्वां, प्रहसिताननं त्वां, प्रेमवीक्षणं त्वां, वीक्ष्य ते बृहदुरः श्रियो धाम** च **वीक्ष्ये**त्यन्वयो ज्ञातव्यः.

**कारिकार्थः**

"रहसि संविदम्" इत्यत्र **वाक्यमि**त्यादि. संविद् **वाक्यं**, तत् **कामो**द्बोधकम्. **हास्यम् आनन्द**बोधकम्. **श्रीधामे**तिविशेषणेन उरसा लीलाऽ**धिकारिण** उच्यन्ते. अत्र **कामपदमानन्द**पदं च तत्तदुद्बोधकपरं ज्ञेयम् (१३½).

**वीक्षणं** यस्य, **बृहदुरः श्रीधाम** च **वीक्ष्य.** प्रमाणादिबलरूपता भगवद्रूपे निरूपिता. वक्षसि च स्वस्थित्यर्थं यशः श्रीश्च निरूपिता. मुखदर्शनेनैव प्रहसितयुक्तत्वात् पूर्वस्थित्यभावः, ततः कामः, प्रेमवीक्षणेन च तस्य स्थिरीकरणं, ततः स्वयोग्यता, ततो भोगचातुर्यं प्रथमविशेषणेन– एवं सर्वं भविष्यतीति **अतिस्पृहायुक्तं मनः मुह्यते** केवलं मोहं प्राप्नोति, पदार्थालाभात् मुहुर्मूर्च्छा[१] समायातीति जीवनमरणान्यतराभावाद् धिग्जीवनमित्यर्थः ॥१७॥

**लेखः**

**चेति ते** इति शेषः. **प्रमाणादी**ति, एतेषां **बलं रूपे** यस्य तत्तेत्यर्थः. **यश** इति, उरसो बृहत्त्वेन यश उक्तं, सामुद्रे तथोक्तेः. **पूर्वे**ति, हासस्य मायात्वात् तेन पूर्वस्थितिर्नश्यतीत्यर्थः. **ततः स्वयोग्यते**ति उरसः श्रीधामत्वकथनेनेति शेषः. उपक्रान्तामात्मनिन्दामुपसंहरन्ति **मुहुर्मूर्च्छे**ति ॥१७॥

**योजना**

**प्रमाणादिबलरूपते**त्यादि. **रहसि संविदमि**त्यनेन वाक्यमुक्तं, भगवद्वाक्यस्य च प्रमाणरूपता स्पष्टा. **हृच्छयोदयमि**त्यनेन प्रमेयबलं, तादृशवाक्यैः शृङ्गाररससम्बन्धिभिः प्रमाणैर्हृच्छयोदयस्यैव प्रमेयत्वात्. **प्रहसिताननमि**त्यनेन साधनं, तादृशहाससहितश्रीमुखस्य सर्वफलसाधकत्वात्. **प्रेमवीक्षणमि**त्यनेन फलं, प्रेमपूर्वकावलोकनस्य साध्यत्वात्. **वक्षसि च स्वस्थित्यर्थं यश** इति. **स्व**शब्देन वक्त्र्यो ग्राह्याः, समयविशेषे वक्षसि स्वस्थित्यर्थं बृहत्त्वेन उरसः यशो निरूपितमित्यर्थः. **पूर्वस्थित्यभाव** इति, प्रहसिताननदर्शनात्पूर्वं या मानादिना स्थितिस्तस्या अभावः प्रहसिताननदर्शनाद्भवतीत्यर्थः. प्रहसितयुत-श्रीमुखसुषमावलोकनजन्य-परमोत्कण्ठा-प्रादुर्भावान्मानः स्थापयितुं न शक्यत इति भावः. **ततः काम** इत्यारभ्य **स्वयोग्यते**त्यन्तम्. **हृच्छयोदयमि**त्यनेन कामः. अस्मिन्पक्षे **प्रहसिताननमि**त्यस्य **हृच्छयोदयमि**ति विशेषणम्, अत एव **ततः काम** इत्युक्तम्. **ततः** प्रहसिताननरूपविशेष्यदर्शनानन्तरं **कामो** भवति, प्रहसिताननस्य हृच्छयोदयत्वात्. **प्रेमवीक्षणेन च तस्य स्थिरीकरणमि**ति स्पष्टम्. **ततः स्वयोग्यते**ति, **बृहदुरः श्रियो धामे**त्यनेन तत्र बृहदुरसि स्वस्थितियोग्यता निरूपितेत्यर्थः. **ततो भोगचातुर्यं प्रथमविशेषणेने**ति, **रहसि संविदमि**ति विशेषणेन एकान्ते याः रससम्बन्धिसंविदस्ताभिर्भोगचातुर्यं

१. मूर्च्छामिति पाठः.



पुनरनन्यपूर्वा एतावत्कालं मनोरथाभिनिविष्टा किञ्चित्प्रार्थयते **व्रजवनौकसा**मिति.

**व्रजवनौकसां व्यक्तिरंग ते वृजिनहन्त्र्यलं विश्वमङ्गलम् ।**
**त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥१८॥**

इयं **ते व्यक्तिः व्रजवनौकसां वृजिनहन्त्री** पापनाशिका. **विश्वस्या**प्यत्यर्थं **मङ्गल**रूपम्. दोषनिवर्तकं विशेषाकारेणास्माकमेव, गुणाधायकं सर्वेषाम्. अत एतादृशं[१] **मनाक् त्यज.** त्यागावश्यकत्वे हेतुः **त्वत्स्पृहात्मना**मिति, **त्वय्येव स्पृहा**युक्त **आत्मा** अन्तःकरणं यासाम्. किं त्यक्तव्यमित्याशङ्कायामाह **स्वजने**ति, **स्वजनानां** गोपिकानां **हृद्रुजां** हृदयरोगाणां कामरूपाणां **यदेव निषूदनं** भवति, **नितरां सूदनं** नाशनं यस्मात्, केषाञ्चित्पापनाशकः केषाञ्चित्फलदाता, तादृशोऽस्माकं रोगनिवर्तको भवत्विति ॥१८॥

काचिद्राजसतामसी सखेदमाह **यत्त** इति.

**यत्ते सुजातचरणाम्बुरुहं स्तनेषु**
**भीताः शनैः प्रिय दधीमहि कर्कशेषु ।**
**तेनाटवीमटसि तद् व्यथते न किंस्वित्**
**कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥१९॥**

॥ इति श्रीभागवते महापुराणे दशमस्कन्धे अष्टाविंशतितमोऽध्यायः ॥

**सुजातं यच्चरणाम्बुरुहं** चरणकमलं **भीताः** सत्यः **स्तनेषु शनैर्दधीमहि.** शनैर्धारणे हेतुः **कर्कशेष्वि**ति. **प्रिये**ति सम्बोधनात् स्नेहाद्धारणम्. **सुजातमि**ति, [२]तथा महत् सम्यक्प्रकारोत्पन्नं शीतलं सुगन्धि तापनाशकं भवति अतः

**लेखः**

**व्रजे**त्यत्र **विश्वमङ्गलमि**ति, **निषूदनमि**त्यस्य विशेषणम्. हृद्रोगाणां सूदनं यस्मात्तादृशं वस्तु त्यज अस्मास्विति शेषः, अस्मासु त्यज स्थापयेत्यर्थः. एतादृशं (वस्तु) वस्तुस्वरूपमेव. गोपनीयत्वादेवमुक्तम् ॥१८॥

**योजना**

भवतीति भावः ॥१७॥

**व्रजवनौकसां व्यक्तिरि**त्यस्य विवरणे **एतादृशीं मनाक् त्यजे**ति, **त्यज** स्थापयेत्यर्थः, इह स्थापनस्य त्यागपदार्थत्वात्. तथा चैतादृशीमानन्दमयीं भवद्व्यक्तिम् अस्मासु स्थापयेत्यर्थो भवति ॥१८॥

१. एतादृशीमिति पाठः. २. यथेति पाठः.

स्तनेषु स्थापनम्. **प्रियत्वाद्** धाष्टर्येन स्थापनम्. **तेनै**वातिकोमलेन अस्मान् त्यक्त्वा अस्मद्दोषेण इदानी**मटवीमटसि!** स्वयमदुःखेन स्थित्वा यद्यन्यस्मै दुःखं दातुं शक्नुयात् तर्हि प्रयच्छेत्, न तु स्वयमपि दुःखं प्राप्य. तत्रास्माकं संदेहः **किं व्यथते न** वेति. **स्विदि**त्युत्प्रेक्षायां– **किं न व्यथते** अपि तु व्यथत एव. **कूर्पादिभिः** शर्करादिभिः, **कूर्प**शब्देन विषमाः शर्करा उच्यन्ते. तर्हि व्यथत एव, कथमुत्प्रेक्ष्यते, तत्राह **भ्रमति धीरि**ति, बुद्धिः केवलं परिभ्रमति. यदि व्यथत इति निश्चयः स्यात् तदा बुद्धिः शान्तैव भवेत्, पुनर्यदायाति तेन संदेहः. तत्र हेतुः **भवदायुषामि**ति, भवल्लीलार्थमेवायुर्येषाम्. पूर्वं तु खेदेन मनःपीडा निरूपिता, इदानीं तु मूर्च्छा निरूप्यत इत्यन्तस्थितिः. एवं सर्वासां मूर्च्छापर्यन्तं स्थितिर्ज्ञातव्या– पुनर्लीलाप्रवेशे प्रलापः, पुनः

---

**लेखः**

अध्यायान्ते **बुद्धि शान्तैवे**ति, मूर्च्छैव स्यादित्यर्थः. **पूर्वं त्वि**ति पूर्वाध्यायान्ते इत्यर्थः. **पुनर्लीले**ति, लीलासहितो भगवानन्तःप्रविष्ट इत्युक्तं, तत्र लीलास्थितौ **प्रलापः** प्रश्न इत्यर्थः. "प्रश्नोऽन्तरङ्ग"[1] इत्युक्तत्वादेतत्कथनेन तदध्यायोक्तं त्रयमप्युक्तं ज्ञेयम्. **स्वरूपस्थितौ गानमे**तदध्यायोक्तमित्यर्थः.

**योजना**

**यत्ते सुजातमि**त्यत्र **पुनर्यदायाति तेन सन्देह** इति. कूर्पादिभिर्व्यथायाः प्रसिद्धत्वाद्व्यथत इति ज्ञानं, पुनर्वने यद् आयाति तेन न व्यथत इति ज्ञानम्. अन्यथा यदि व्यथा स्यात् तर्हि वनागमनं न स्यात्. एवमुभयकोट्यवगाहि ज्ञानं संशय उत्पद्यत इत्यर्थः. **पूर्वं तु खेदेने**त्यादि, "शिलतृणाङ्कुरैः सीदती"त्यनेन **पूर्वं** भगवच्चरणारविन्दविषयक**खेद**ज्ञानेन स्व**मनःपीडा निरूपिता,** "कलिलतां मनः कान्त गच्छती"ति वाक्यादित्यर्थः. **इदानीं तु मूर्च्छे**ति, **यत्ते सुजाते**त्यनेन तु मूर्च्छा निरूपिता, **भ्रमति धीरि**ति वाक्यात्. उभयत्र चरणखेदस्य स्वतज्जन्यस्वदुःखतौल्येऽप्येतावान् विशेषः– तत्र पीडोक्ता अत्र मूर्च्छेति. **अन्तःस्थितिरि**ति, मूर्च्छाया नवमावस्थात्वात्तदग्रिमावस्थाया अभावान्मूर्च्छैव **अन्तःस्थितिः** पर्यवसानमित्यर्थः ॥१९॥

॥ इति श्रीदशमस्कन्धाष्टाविंशाध्यायसुबोधिनीयोजना सम्पूर्णा ॥

---

१. सुबो. १०।२७।२४ (सम्पा.).



स्वरूपस्थितौ गानमिति. एवं साधनपरीक्षयोर्यावत् तावत्तासां तापो निरूपितः ॥१९॥

*॥ इति श्रीभागवतसुबोधिन्यां*
*श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां*
*दशमस्कन्धविवरणेऽष्टाविंशाध्यायविवरणम् ॥*

---

**टिप्पणी**

एतावन्निरूपणेन भगवत्प्राप्तौ भक्तकृतसाधनस्य यावती पराकाष्ठास्ति तावत्युक्ता जाता; भगवता च भक्तानां स्नेहपरीक्षायां क्रियमाणायां यावती तस्याः पराकाष्ठा साप्युक्ता जातेत्युपसंहरन्ति **एवं साधने**ति. अत्र **यावत्तावदि**त्यव्ययपदे, तथा चोक्तरीत्या साधनपरीक्षयोर्यावत्स्वरूपं तावद्रूपस्तापो निरूपित इत्यर्थः. ॥ इत्यष्टाविंशोध्यायः ॥

**लेखः**

तथा चैतदध्यायोक्तं चतुर्थमर्थमादाय "चत्वारोऽत्रे"ति कारिकोक्तानां चतुर्णां पर्यावृत्तिरिति भावः ॥१९॥ अष्टाविंशाध्यायव्याख्या समाप्ता ॥

**॥ इति अष्टाविंशोध्यायः ॥**

# ॥ चतुर्थः स्कन्धादितः एकोनत्रिंशोध्यायः ॥

एकोनत्रिंशकेऽध्याये प्रसादं भगवत्कृतम् ।
रोदनात् प्राप्य तुष्टास्ता निर्णयज्ञा इतीर्यते ॥(१)॥
नहि साधनसम्पत्त्या हरिस्तुष्यति कस्यचित् ।

---

**प्रकाशः**

अथैकोनत्रिंशाध्यायं विवरिषवः कार्यत्वमत्र कथासङ्गतिरिति बोधयन्तोऽध्यायार्थमाहुः **एकोनत्रिंशक** इत्यादि. निर्णयज्ञानस्यापि प्रसादकार्यतया परंपरया तत्कार्यत्वान्न तद्धानिः (१).

**लेखः**

एकोनत्रिंशाध्याये **प्रसादं भगवत्कृतमि**ति, भगवता सम्पादितं **प्रसादं** मानापनोदं **प्राप्ये**त्यर्थः. मानिन्य एता अन्तःप्रविश्य रोदनरूपेणालौकिकप्रकारेण प्रसादिताः, मानं च वीक्ष्य तासां प्रसादाय तत्रैवान्तरधीयतेति पूर्वमुक्तमन्तर्धानप्रयोजनं सम्पन्नमिति भावः (१).

प्रकारान्तरेणापि मानापनोदनं कर्तुं समर्थस्य रोदनप्रकारसिद्धिपर्यन्तं प्रतीक्षा अयुक्ता इत्याशङ्क्य, यथान्तर्धाने "आत्मा यावत् प्रपन्नोभूदि"त्यनेन शास्त्रमर्यादोक्ता तथाविर्भावेपीत्याशयेनाहुः **नहीति**. **साधनसम्पत्त्ये**ति, "अनेन साधनेन भगवन्तं प्राप्स्याम" इति ज्ञात्वा कृतेन प्रलापरूपप्रश्नेन गानेन चेत्यर्थः, **प्रगायन्त्यः प्रलपन्त्य**स्तयोरसाधनतायां **रुरुदुरि**त्यर्थस्य वक्ष्यमाणत्वात्. साधनत्वं ज्ञात्वा कृतानि साधनानि **साधनसम्पत्तिः**, रोदनं तु पूर्वयोरसाधनतायां जातायां **दैन्या**ज्जातं सत् स्वतएव **साधन**त्वेन पर्यवसन्नम्, न'त्विदं साधनमि'ति ज्ञात्वा कृतमिति भावः (२).

**योजना**

एकोनत्रिंशाध्यायार्थोक्तौ **प्रसादं भगवत्कृतमि**ति, आविर्भूय करस्पर्शदानादिरूपं प्रसादमित्यर्थः. **रोदनात्प्राप्ये**ति रोदनं कृत्वा प्राप्येति ल्यब्लोपे पञ्चमी. रोदनं निःसाधनत्वे भवतीति निःसाधनत्वेन केवलदैन्याविर्भावे भगवान् प्रसादं कृतवानिति ज्ञेयम्. **निर्णयज्ञा** इति जाता इति शेषः. "भजतोऽनुभजन्त्येक" इति पृष्ट्वा "मिथो भजन्ति ये सख्य" इत्याद्युत्तरवाक्यश्रवणे निर्णयज्ञा जाता इति हार्दम् (१).



भक्तानां दैन्यमेवैकं हरितोषणसाधनम् ॥(२)॥
सन्तुष्टः सर्वदुःखानि नाशयत्येव सर्वतः ।
अतो निर्णयवाक्यानि भजनार्थं न्यरूपयत् ॥(३)॥

एवं पूर्वाध्यायान्ते तासां स्तुतिमुक्त्वा, ततः पूर्वाध्याये तासां प्रलापमुक्त्वा, उभयमप्युपसंहरन् तयोरसाधनतायां जातायां रोदनं कृतवत्य इत्याह **इतीति**.

**इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा ।**
**रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥१॥**

पूर्वोक्तप्रकारेण सर्वाएव **गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च** जाताः. अस्माभिरेकः प्रकार उक्तः, तास्तु **चित्रधा** विलापयुक्ता जाताः. यदा तयोरसाधनत्वं जातं तदा सर्वाः सम्भूय महद्रोदनं कृतवत्यः. रोदने निमित्तमाह **कृष्णदर्शनलालसा** इति, न तु स्वदेहरक्षार्थम् ॥१॥

ततो भगवान् ब्रह्मा विष्णू रुद्रश्च भूत्वा पुनः कृष्णएव जात[1] इत्याह **तासामाविरभूदिति**.

---

**लेखः**

"मिथो भजन्ती"त्यादिना निर्णयकथने हेतुमाहुः **सन्तुष्ट** इति. **नाशयत्येवे**ति, स्वमते दुःखस्यानन्दाभावरूपत्वात् प्रतियोगिनाऽभावनाशो भवत्येवेति निश्चयादेवकारः. **अत** इति, यतो दुःखनाशननियमोऽ**तः** सर्वांशेन दुःखाभावाय परोक्ष**भजन**प्रतिपादनार्थं **वाक्यानि न्यरूपय**दित्यर्थः (३).

**योजना**

**अतो निर्णयवाक्यानी**त्यादि, यतः **सन्तुष्टः सर्वदुःखानि नाशयत्यतो** "मिथो भजन्ती"त्यारभ्य "तद्वः प्रतियातु साधुने"त्यन्तानि **वाक्यान्युक्त**वान्. अन्यथा अस्मानेतावत्पर्यन्तं विहाय दुःखिताः कृत्वा भगवान् गत इति दुःखं व्रजवरवधूहृदयसरसीरुहान्न गच्छेदित्यर्थः (३).

**तासामाविरभू**दित्यस्याभासे **ततो भगवान् ब्रह्मा विष्णू रुद्रश्च भूत्वे**त्यादि– एतदर्थष्टिप्पण्यां स्फुटः. **स्मयमानमुखाम्बुज** इत्यस्य विवरणे

**कारिकार्थः**

एकोनत्रिंशाध्याये **एकोनत्रिंशक** इति. "मिथो भजन्ती"त्यादिना निर्णयकथने हेतुमाहुः **सन्तुष्ट** इति (३).

---

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्.

**तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ।**
**पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥२॥**

**तासां** मध्यएव भगवा**नाविर्भूतः** मायाजवनिकां दूरीकृत्य भगवान् प्रकटो जातः यतः **शौरिः** शूरस्य पौत्रः, शौर्यमत्र प्रकटनीयमिति, सर्वेषां

### टिप्पणी

एकोनत्रिंशाध्याये **तासामाविरभूदि**त्यस्याभासे **ब्रह्मा विष्णुरि**त्यादि. अत्रेदमाकूतम्. आद्यब्रह्मकल्पे भगवानेव चतुर्मुखो ब्रह्माभूत्, तपश्च पूर्वं कृतवान्. स वाच्यवाचकतया "भगवान् ब्रह्मरूपधृक् नामरूपक्रिया धत्त" इति वाक्या"च्छब्दब्रह्मेति यं विदुरि"ति वाक्याच्छब्दसृष्टिमर्थसृष्टिं च कृत्वा तदेवानुप्रविश्य सर्वं कार्यं[१] कृतवान्, स्वयं रजोरूपश्च. प्रकृते च पूर्वं रजोरूपमानरूपेणाविर्भूतः, ततस्तापरूपेण, ततो विविधगानप्रलापरूपेण, ततो विविधलीलारूपेण. विष्णुश्च विक्षेपरहितः शुद्धसत्त्वात्मको, यथा यस्य पालनं भवति तथा पाति. प्रकृते च सखीवचनश्रवणानन्तरं स्वापराधहेतुकं गमनं प्रियस्य ज्ञात्वा चित्तविक्षेपं त्यक्त्वा पुनः स्वस्थानस्थिताः स्वजीवनार्थं स्वं स्वं भावं प्रकटीकृतवत्य इति तादृग्भावरूपेण प्रकटः. "यदरोदीत्तद्रुद्रस्य रुद्रत्वमि"ति श्रुतेः स्पष्टं रुद्रत्वम्. देवाः स्वधनमग्नौ निधाय संग्रामाय यदा गताः, तदाग्निस्तद् गृहीत्वा पलायितः, तदा देवा बलात्स्वकीयं धनमगृह्णन्, स तदा दुःखेनारोदीद्— इति श्रुतावुपाख्यानम्. प्रकृते चादेयं रसं स्वं प्रभुः स्वामिनीभ्यो दत्तवान् स्वभोगार्थम्. स्वामिन्यस्तु मानेन स्वस्मिन्नेव तं रसं निरुद्धवत्यः, तदा मानेऽपहृतेऽतिदैन्यमाविष्कृतवत्य इति "रुरुदुरि"त्युच्यते. यथा स सर्वनिरासकस्तथायं भावोऽखिलशास्त्रोक्तसाधनबलनिरासकः, यतः साधनबलस्फूर्तावितदनुदयो भगवदनाविर्भावश्च, एतदुदये तत्स्फूर्तिनाशः प्रभोराविर्भावश्च. "कृषिर्भूवाचक" इति वाक्यात् 'कृष्ण'शब्दवाच्यता यद्यपि सदैवास्ति तथाप्येतद्भावोदयाव्यवहितोत्तरक्षणे यदि नाविर्भूयाद्, भक्तानां तदा देहादिसत्तैव न स्यात्, दैन्येनैवात्युपमर्दकभावेन प्राचीनसत्त्वनाशात्. अतः स्वयमाविर्भूय स्वस्वरूपात्मकं सत्त्वमानन्दं च तत्र स्थापयतीत्याविर्भूतस्य कृष्णतेति. **स्मय-**

### लेखः

**तासामाविरभूदि**त्यत्र, **शौर्यमत्रे**ति पूर्वाध्यायोक्तं दानवीरत्वमित्यर्थः.

---

१. 'कार्यं' इति नास्ति मूलपाठे.



दुःखनिवारणार्थमेव यदुवंशेऽवतीर्ण इति. तदा तासां दोषनिवृत्त्यर्थं **स्मयमानं मुखाम्बुजं** यस्य, ईषद्धसन्मुखः तासां वैक्लव्येन सन्तुष्टः. स्मितयुक्तं **स्मयमानं, स्मयमानाभ्यां** वा सहितं, **मुखाम्बुजं** यस्य, भक्तानां दोषो भक्तेभ्यो निर्गतो भक्तौ समायातीति ज्ञापनार्थम्. तदानीन्तनं रूपं वर्णयति **पीताम्बरधर** इति, पीताम्बरं हास्यसङ्कोचार्थं हस्ते धृत्वा तिष्ठति. अथवा व्यापिवैकुण्ठरूपेण एतावत्कालं लक्ष्म्या सह रमणं कृत्वा तेनैव रूपेण

### टिप्पणी

**मानमुखाम्बुज** इत्यत्र **स्मयमानाभ्यां वे**त्यादि. "न ह्येतादृशोऽन्योऽस्ति यस्य एतादृशा भक्ता" इति **स्मयः**. अतएव "एताश्चेत् मां प्रार्थयिष्यन्ति तदाऽन्यस्मा अपि मद्भक्तायेमं रसं दास्ये, अन्यथा तु मुक्तिमेवे"ति **मानः**. अतए**वाम्बुज**त्वमुक्तम्. तद्धि रविकिरणसम्बन्धादेव विकसितं सद्रसं प्रकटयति, अत्रैतत्प्रार्थनैव तत्स्थानीयेति भावः. **भक्तानां दोष** इति. विचारे क्रियमाणे भगवद्रसपानानन्तरमेव तादृग्भावोत्पत्तेस्तस्यैव स धर्म इति निश्चीयत इत्यर्थः. **अथवा व्यापिवैकुण्ठे**त्यादि. "मयाऽपरोक्षं भजते"तिवाक्यात् श्रीकृष्णस्त्वेतासा-

### लेखः

**तदा तासां दोषे**ति, "निजजनस्मयध्वंसनस्मिते"त्यत्रोक्तप्रकारत्रयेण दोषनिवृत्तिरिति भावः. **भक्तौ समायाती**ति, अयं दोषो भक्तेर्धर्म इति टिप्पण्यामुक्तम् अतो भक्तावेवागत इत्यर्थः. 'पीताम्बरो भगवानि'त्येतावत्येव वक्तव्येऽपि धरणोक्तेस्तात्पर्यमाहुः **हस्ते धृत्वे**ति. वाससा किञ्चिन्मुखाच्छादनेन

### योजना

**स्मयमानाभ्यां वा सहितमि**ति, अस्मिन्पक्षे **स्मयो मान**श्चेति द्वन्द्वं कृत्वा **मुखाम्बुज**पदेन समासः. अर्थस्तु टिप्पण्यां स्फुटः. **भक्तानां दोषो भक्तेभ्यो निर्गत** इति. एतदर्थस्तु टिप्पण्यां स्फुटः. **पीताम्बरधर** इत्यस्य विवृतौ **हास्यसंकोचार्थं हस्ते धृत्वा तिष्ठती**ति. अयमर्थः **पीताम्बरधर** इत्युक्त्या लब्धः. अन्यथा **पीताम्बर** एतावदुक्त्या चारितार्थ्ये **धर** इति न वदेत्. **अथवे**ति, पूर्वस्मिन् पक्षे मायाजवनिकां दूरीकृत्य प्रकटो जात इत्युक्तं, तत्रागमनं नास्ति तथा (सति!) "तं विलोक्यागतम्" इत्यनेनोक्तमागमनं बाध्येत, अतः पक्षान्तरमाहुः **अथवे**ति **व्यापिवैकुण्ठरूपेणे**त्यादि. अयमाशयः. "तं विलोक्यागतमि"त्यनेनागमनमुक्तम्. तच्च गमनं विना न सम्भवत्यतो

प्रादुर्भूतः. **स्रग्वी** वनमालायुक्तश्च. मध्ये ब्रह्मादिपूजां च गृहीतवान् लक्ष्म्या वा अतो विलम्ब इत्यपि सूचितम्. अतएव प्रथमश्लोके पूर्वाध्याये "श्रयत इन्दिरे"त्युक्तम्. इदानीं तु उपेक्षा कर्तुमयुक्तेति प्रादुर्भूतः. अत आगमनमुक्तमग्रे. [1](यद्वा तत्र हेतुमाह विशेषणद्वयेन. इदानीमनाविर्भावे तु न रसो

## टिप्पणी

मेव निकटे स्थितः. एवं सति "तं विलोक्यागतमि"ति यदागमनकथनं तेन येन रूपेण तत्रास्थितिः पूर्वं तेन रूपेणागमनमित्यवश्यं वाच्यं, तत्र स्थितस्यैव आगमनासम्भवात्. अतो येन रूपेणागमनं तद्रूपमुक्तं **व्यापिवैकुण्ठे**त्यादिना. व्यापिवैकुण्ठे हि पुरुषोत्तम एव, नांशः. व्रजे तु "श्रयत इन्दिरे"ति वाक्याल्लक्ष्म्याः कदाचिदपि नावसरः. इदानीमेतन्मानापनोदनं तदार्तिनाशनं चैकदैव करिष्यन् लक्ष्म्या रमणं येन रूपेण करोति तेन रूपेण कृत्वा तत्स्वरूपस्य एतदभिन्नत्वात् तान् धर्मान् प्रकटीकृत्य प्रकट इत्याशयेनागमनमुक्तम्. एवं सत्येतेषां धर्माणां पूर्वमसत्त्वात् तद्विशिष्टस्यापि तथात्वात्तादृशस्यागमनमुक्तं

## योजना

गमनं वक्तव्यम्. कुत्र गमनमित्यपेक्षायां गमनस्थलस्यानुक्तत्वा"द्विशेषानुक्तौ सामान्यं ग्राह्यमि"तिन्यायेन सामान्यस्थलस्य ग्राह्यत्वाद् व्यापिवैकुण्ठं च भगवतो नित्यनिवासत्वेन सामान्यं स्थलमतस्तदेव ग्राह्यमित्याशयेनाहुः **व्यापिवैकुण्ठरूपेणे**त्यादि. [2]वनमालायाः सर्वदा प्राप्तत्वेन पुनःकथनस्य निष्प्रयोजनत्वं स्याद् अत आहुः[2] **मध्ये ब्रह्मादिपूजां वे**ति, ब्रह्मणा कृतायां पूजायां माला समर्पिता तां परिधाय समागत इति **स्रग्वी**त्युक्तम्. ब्रह्मा हि यत्र यत्रावतारस्तत्र तत्र दर्शनार्थं गच्छति. अतोऽत्राप्यवतारादर्शनार्थं गतो भगवन्तं पूजितवान्. अत्राप्यवतारोऽस्ति, व्यापिवैकुण्ठादवतरणाद्, अवतारो नाम व्यापिवैकुण्ठाद्भगवतः प्रपञ्चे समागमनमित्यवतारलक्षणात्. अतएव **तासामाविरभूच्छौरिः** इत्यनेनाविर्भावः उक्तः. **पीताम्बरधरः स्रग्वी**तिविशेषणद्वयस्य तात्पर्यान्तरमाहुः **यद्वे**ति. **इदानीमनाविर्भावे तु न रसो न वा कीर्तिरि**ति, यदि प्रभुर्नाविर्भवेत् तदा व्रजसुन्दरीणां तिरोभावो भवेत्, तदा रसो न स्यात् कीर्तिश्च न स्यादित्यर्थः. भगवतस्तु रसापेक्षा

१. ( ) चिह्नान्तर्गतं प्रभूणामित्यस्मन्मतिः. २-२. मांड. पाठे एतावान् अंशो अधिकः.



न वा कीर्तिः, स्वयं त्वाच्छादनेन रसत्वसाधक**पीताम्बरधरः** कीर्तिमय**स्रग्वाँश्च** अतः प्रकट इत्यर्थः. अन्यथा तु भक्तानां स्वरूपतिरोधाने उक्तोभयाभावः स्फुट इति भावः.) ननु कन्दर्पेण कथं न वशीकृतः, स्वपूतना खिन्नेति, तत्राह **साक्षान्मन्मथस्या**पि **मन्मथः**. आधिभौतिको **मन्मथः** देवतारूपः. तत आध्यात्मिकः सर्वहृदयेषु **साक्षान्मन्मथः**. तस्याप्ययं **मन्मथः** आधिदैविकः,

## टिप्पणी

भवतीति भावः. **ननु कन्दर्पेणे**ति **पूतनो**क्तेरिदमाकूतं ज्ञायते– पूतनया हि परपक्षनिरासः क्रियते. दुःखिता तु सा न तं कर्तुं समर्था किन्तु सुखिता. स्वामिनीभिरपि सर्वात्मभावविरुद्धाः सर्वे भावा निरस्ताः. तथा च सर्वात्मभाववत्सु भक्तेषु दुःखसम्भवे मर्यादामार्गीया भक्ता अप्यस्मिन्मार्गे दुःखसम्भावनारहितान्मोक्षादप्याधिक्यं न ज्ञास्यन्तीत्येतन्मार्गप्रवृत्तिर्न भविष्यतीति ज्ञात्वा– कुतोऽतिरोधानं न कृतवानिति. तथा च **कन्दर्प**शब्दः सर्वात्मभावपरः, एतासां कामभावोऽपि सर्वात्मभावात्मक एवेति ज्ञापनाय **कन्दर्प**पदप्रयोगः. **स्वपूतना खिन्ने**ति भविष्यतीति शेषः. यद्वा. दैन्येनाविर्भूतो न तु हेत्वन्तरेणेतीममर्थं स्फुटं कर्तुमत्रापि लौकिकरीतिं जानतो भ्रान्तस्याशङ्कामनुवदन्ति **ननु कन्दर्पेणे**त्यादिना. **साक्षादि**त्यनेनाद्यपक्षे समाधानमेवं ज्ञेयम्. अस्मिन्मार्गे मोक्षादाधिक्यज्ञानाभावः किं रसवार्ताभिज्ञस्यापाद्यते उत तदनभिज्ञस्य? तत्रान्त्ये 'ओमि'ति ब्रूमः. आद्ये तु विवरणोक्ताध्यात्मिकमन्मथरसस्यैव यत्र विप्रयोगे महारसत्वमुच्यते तत्र तस्यापि तद्रूपस्य विप्रयोगे महारसत्वेन ज्ञाने का शङ्का नामेति द्वितीयपक्षसमाधानं विवरणे स्फुटम् ॥२॥

## योजना

[1]कीर्तिश्चापेक्ष्या[1] अतः प्रादुर्भाव एव कृतः. रसापेक्षासूचकम्[2] आच्छादकं पीताम्बरं हि, "गुप्तो हि रसो रसत्वमापद्यते" इति शास्त्रात्. कीर्त्यपेक्षासूचिका वनमाला. अतो रसकीर्त्योरुभयोरपेक्षितत्वात् प्रादुर्भूतः. अतः **पीताम्बरधरः स्रग्वी** च. **भक्तानां स्वरूपतिरोधाने उक्तोभयाभाव** इति, रसकीर्त्योरुभयोरभाव इत्यर्थः. **साक्षान्मन्मथमन्मथ** इत्यस्याभासे, **ननु कन्दर्पेणे**ति– एतस्यार्थष्टिप्पण्यां स्फुटः ॥२॥

१-१. मांड. पाठे एतावान् अंशो अधिकः.
२. रसापेक्षासूचकः इति मुद्रितः पाठः. मुं. वि. पाठः गृहीतः.

सर्वस्यापि सर्वत्वात्. अतः कन्दर्पोऽपि मुग्धः कन्दर्पस्याप्यशक्यमोहः कन्दर्परूपश्च. अतस्तासां दैन्ये प्रादुर्भूते तन्निवारणार्थं कामरूपमेव प्रकटीकृतवान्. अतस्तेन पूर्ववत् कामसम्पन्नाः ताः कृताः ॥२॥

ततो यज्जातं तदाह **तं विलोक्येति**.

**तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः ।**
**उत्तस्थुर्युगपत् सर्वास्तन्वः प्राणमिवागतम् ॥३॥**

**तमागतं विलोक्य युगपत् सर्वा** उत्थिताः. पूर्वमाविर्भावमुक्त्वा अधुना यदागमनमुक्तं तद्विलोकनसमये स्वामिनीभावानुवादरूपम्. पूर्वमन्तःस्थितोऽधुना बहिरागत इति वा ज्ञापनाय तथोक्तिः. ननु किमाश्चर्यं भगवत्यागते उत्थिता इति? तत्र न ह्येताः सजीवाः स्थिताः किन्तु निर्जीवा इति वक्तुं दृष्टान्तमाह **तन्वः** करचरणाद्यवयवाः **प्राणमागतमिवेति**. प्रयत्ने हि एकमेवाङ्गं व्यापृतं भवति, प्राणे तु सर्वाणि सम्भूय, अतो बहुवचनं युगपदुत्थानार्थम्. उत्थानं पञ्चानां भाव्यं देहेन्द्रियप्राणान्तःकरणजीवानाम्.

**प्रकाशः**

**तं विलोक्ये**त्यत्र, **इति वक्तुमि**ति एवं प्रकारकमाश्चर्यं वक्तुम्, अन्यथा दृष्टान्तमेतं न वदेत्, प्रयोजनाभावादित्यर्थः. **प्राणे तु सर्वाणि सम्भूये**ति, बृहदारण्यके "यो ह वै ज्येष्ठं च श्रेष्ठं चे"ति ब्राह्मणे सर्वेन्द्रियाणां शरीरस्थितेश्च मुख्यप्राणाधीनत्वं प्रतिपादितं, प्रत्यक्षमपि तथेति तथेत्यर्थः. **पञ्चानां भाव्यमि**ति, यद्यपि देहस्यैव प्रतीयते तथापि व्युत्पाद्यमानरीत्या तथेत्यर्थः. तत्र जीवस्य व्युत्पादयन्ति **तत्रे**त्यादि. तथा च "चित्तेन हृदयं चेत्यः क्षेत्रज्ञः प्राविशद्यदा विराट् तदैव पुरुषः सलिलादुदतिष्ठते"ति तृतीये तदागमनेनैव पुरुषोत्थानस्योक्तत्वादन्यत्रापि तथेत्यर्थः. ननु पूर्वं जीवाभावे पूर्वाध्यायद्वयोक्त-

**लेखः**

हास्यसङ्कोचो रसिकानुकरणसिद्धः. **अतः कन्दर्पोऽपी**ति, आधिभौतिकाध्यात्मिकाधिदैविकरूपत्वं क्रमेणोक्तम्. **पूर्ववदि**ति "उदारहासे"तिवदित्यर्थः ॥२॥

**तं विलोक्ये**त्यत्र. पूर्वश्लोके "तासां मध्यएवाविर्भूतो" जात इत्युक्तम्. **अथवे**ति पक्षेऽपि टिप्पण्यां धर्माणामेवागमनमुक्तं जातम्. धर्म्यागमनस्वरूपमाहुः **पूर्वमाविर्भावे**ति. **भगवत्सङ्गे समागत** इति, अन्तःस्थिते भगवति



तत्र जीवस्यान्याधीनमुत्थानं परं तस्मिन्नागते सर्वाण्युत्तिष्ठन्ति. स तु भगवति प्रविष्टो भगवत्सङ्गे समागतो भगवत्युत्थित एवोत्थितः. अन्तःकरणं तु उत्थितमित्यत्र हेतुमाह **प्रेष्ठमि**ति, अत्यन्तं प्रियो भगवान्, तं दृष्ट्वा उत्थितम्. भगवति या **प्रीति**स्तया कृत्वा **उत्फुल्ला दृक्** यासाम्– अनेन प्रीत्या इन्द्रियाणामुत्थानम्. [१](एतासां विलोकनार्थमेवागमनमित्यागमनमात्रेण विलोकनमादौ सम्पन्नम्. उत्फुल्लता तु ततो भिन्ना. तस्याः पुष्पधर्मत्वेन तदुक्त्या दृशां कमलत्वं व्यज्यते. तत्र प्रीतेर्हेतुत्वोक्त्या इयदवधितत्कार्याभावेनाधुनैव तत्प्राकट्यं ज्ञाप्यते रवेरिव. विरहे सर्वतिरोधानादेतत्तिरोधानमप्यासीद्, अतएव**बलात्व**मुक्तं कार्यमात्रे स्वसामर्थ्याभावज्ञापनार्थम्. दृष्टान्तेनैव प्राणानामुत्थानं, प्राणानां भगवान् प्राण इति. शरीरं तु

**प्रकाशः**

कार्यं कथं निरपद्यतेत्यत आहुः **स त्वि**त्यादि. तथा च पूर्वं भगवानन्तःप्रविष्ट इति सुषुप्ताविव **सोऽपि भगवँति प्रविष्टः.** अतएव "जगृहुस्तदात्मिका" इत्यारम्भएवोक्तम्. एवं च सुषुप्तौ प्राज्ञस्य सम्परिष्वङ्गमात्रं नान्या क्रियेति सुखमात्रं, जीवस्य तमोऽभिभवादज्ञानं च. प्रकृते तु भगवतो ब्रह्मविष्णुरुद्रभावेन लीला चिकीर्षितेति तमोऽभिभवाभावात्सर्वं कार्यं निरपद्यतेति न काचिदनुपपत्तिरिति भावः. शेषं स्फुटम् ॥३॥

**लेखः**

तत्र स्थितो भगवति बहिरागते अयमपि स्वस्थाने समागत इत्यर्थः. तथा**चागतमि**तिपदेनोक्तमागमनं जीवोत्थाने हेतुरित्यर्थः ॥३॥

**योजना**

**तं विलोक्यागतं प्रेष्ठमि**त्यस्य विवृतौ. **जीवस्य अन्याधीनमुत्थानमि**ति, लीलासहिते हृदयस्थिते भगवति जीवस्य स्थितत्वाद्भगवदुत्थाना[२]धीनमुत्थानमित्यर्थः. अन्तःकरणोत्थाने भगवन्निष्ठं प्रेष्ठत्वं हेतुः अतः **प्रेष्ठमि**ति विशेषणम्. इन्द्रियाणामुत्थाने प्रीतिर्हेतुः अतः **प्रीत्युत्फुल्लदृश** इत्युक्तम्. **दृष्टान्तेनैव प्राणानामुत्थानमि**ति, तच्च **प्राणमिवागतमि**ति दृष्टान्तेन प्राणानामुत्थानमुक्तम्. शरीरोत्थाने पूर्वोक्ताभिलषितपदार्थता हेतुः **अतस्तमि**ति विशेषणमुक्तम् ॥३॥

१. ( ) प्रभूणां स्यादिति.
२. भगवदुत्थाधीनम् इति मुद्रितः पाठो ह्यशुद्धएव. मुं. वि. पाठः गृहीतः.

पूर्वोक्ताभिलषितपदार्थत्वेन निरूपणाद् उत्थितमित्यत्र **तमि**ति हेतुः) ॥३॥

एवमुत्थितानां भगवता सह स्थितानां कार्यमाह **काचिदि**ति पञ्चभिः.

**काचित् कराम्बुजं शौरेर्जगृहेऽञ्जलिना मुदा ।**
**काचिद् दधार तद्बाहुमंसे चन्दनरूषितम् ॥४॥**

पूर्वमनेकविधा अपि भगवत्याविर्भूते सप्तविधा एव जाताः. एको भगवान् सर्वार्थे प्रकटीभूतः. तत्र या अग्रे स्थिताः ता अपि निकटस्थिता एव पूर्वमुच्यन्ते– शुद्धसात्त्विक्यः शुद्धरजोयुक्ता रजःसात्त्विक्यश्च निर्गुणाश्च, शिष्टाः सप्तविधा गण्यन्ते. **काचिदत्र शौरेः कराम्बुजं मुदा अञ्जलिना**

## टिप्पणी

**काचित्कराम्बुजमि**त्यत्र, **पूर्वमनेकविधा अपी**ति, अनाविर्भावे चित्तविक्षेपादनेकविधत्वं पूर्वाध्याय उपपादितं वचनरीत्या, अधुना तु प्रभु'भग'शब्दार्थं प्रकटीकृत्य स्वयमाविर्भूत इति ता अप्याविर्भूतस्वरूपैकनिष्ठा इति तदात्मिका जाता इत्यर्थः. एवं सति स्वरूपस्य रसात्मकत्वेन तद्धर्माणामपि तथात्वाद् भ्रुकुटिबन्धनादिभावा अप्युपपद्यन्त इति भावः. **निर्गुणाश्च शिष्टा** इति **च**कारात्तमस्सजातीयभाव उच्यते ॥४॥

## लेखः

**काचिदि**त्यत्र **एको भगवानि**ति, अयं सर्वासामर्थे प्रकटः अत**स्तत्र** सङ्घे **या अग्रे** दूरे **स्थितास्ता अपि निकटस्थिता एव** ज्ञेयाः, सर्वासामर्थे प्राकट्यात्. सर्वत्रैव प्रकटीभूय सर्वासामेव नैकट्यं सम्पादितवान्, अतः कराम्बुजधारणादिकार्यं युगपदेव सर्वासां सम्पन्नमिति भावः. **काचिदि**त्येकवचन-मेकजातीयभाववत्त्वेन, वस्तुतस्तु तादृश्योऽपि बह्व्य इति ज्ञेयम्. सप्तविधत्वस्य धर्मधर्मिभेदेन विवक्षितत्वेऽपि पूर्वोक्तोऽप्यंशोऽधुना तिष्ठतीत्याशयेन गुणप्रकारेण सप्तविधत्वमाहुः **शुद्धसात्त्विक्य** इति. **रजःसात्त्विक्यश्चे**ति **च**कारेण सत्त्वप्रधानराजस्यः. **निर्गुणाश्चे**ति **च**कारेण तमःसजातीयभाववत्य इति टिप्पण्यामुक्तमेव. एवं षट्. **शिष्टाश्च**तस्र[1] एकविधा अत्रोक्ता, एवं सप्त.

## योजना

**काचित्कराम्बुजमि**त्यत्र **पूर्वमनेकविधा अपी**त्यादि, एतस्यार्थष्टिप्पण्यां स्फुटः ॥४॥

१. सत्त्वप्रधानतामस्यः, रजःप्रधानतामस्यः, तमःप्रधानसात्त्विक्यः, तमःप्रधानराजस्यः.



अगृह्णात्. एकएव हस्तो भगवता प्रसारितः, "पीताम्बरधर" इति द्वितीयेन हास्यनिवारणार्थं पीताम्बरग्रहणात्. बहुमानेन ग्रहणमञ्जलिना भवति. **शौरे-रि**ति वीरत्वज्ञापनाय. **मुदे**ति पूर्वोक्तक्लेशव्यावृत्त्यर्थम्. अन्या पुनस्ततोऽप्य-न्तरङ्गा भविष्यामीति **तद्बाहुमंसे दधार** यथालिङ्गितैव भवति. अग्रे एतस्या विनियोगो वक्तव्यः "भुजमगरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु" इति. अतएव तदीयो धर्मोऽन्तःस्थितस्तस्या निरोधं साधयिष्यतीति **चन्दनरूषितमि**त्युक्तं, **चन्दनेन रूषितं** लिप्तम्. चन्दने हेतुः पूजा लक्ष्मीर्वा पूर्वोक्ता ॥४॥

**काचिदञ्जलिनागृह्णात्तन्वी ताम्बूलचर्वितम् ।**
**एका तदङ्घ्रिकमलं सन्तप्ता स्तनयोरधात् ॥५॥**

तथा ताम्बूलेऽपि. एवं सामग्रीप्रकटनेन तासां देवोत्तमानां च कृत्यं प्रदर्शितम्– एता आरोढुकामाः देवोत्तमास्तु पूजका इति. अतः **काचित्ताम्बूल-**

## प्रकाशः

**काचित्कराम्बुजमि**त्यत्र, [**सप्तविधा** इति, एको भगवान् षड्गुणैः प्रकटीभूत इति सप्तविधः. टिप्पण्यां **तदात्मिका** इति भगवदात्मिका. सुबोधिन्यां **कदा नु** इति भ्रमरगीते भुजधारणम्.] नन्वत्रानुभूतस्यैव तत्र स्फूर्तिनियमात्तत्रैतत्सत्त्वे "चन्दनसुगन्धमि"ति वदेदित्यत आहुः **अतएवे**त्यादि. यतस्तत्रेयमेवातो भगवद्बाहुसम्बन्धी स्वाभाविको धर्मश्चन्दनान्तःस्थस्तथा करिष्यतीति बोधयितुं चन्दनस्यागन्तुकत्वाय तथोक्तमित्यर्थः. अतएव दह्यमानपूतनादेहस्य भगवत्सम्बन्धादपहतपाप्मत्वेन धूमस्यागरुसौरभत्वमुक्तं "दह्यमानस्य देहस्य धूमश्चागरुसौरभ" इत्यतो न कोपि विरोध इति दिक्. [**निरोधमि**ति, निरोधो प्रपंचविस्मृतिपूर्वकभगवदासक्तिः. **पूजा** इति ब्रह्मादि-(कृता!).] ॥४॥

## लेखः

पञ्चमाध्याये तु "काचित्सममि"त्यादिना भगवद्गुणरूपत्वमेव वक्ष्यते, **निर्गुणाश्चे**त्यत्र क्रमाविवक्षया पूर्वं तामसी ततो निर्गुणा निरूपयिष्यत इति ज्ञेयम्. **एतस्या विनियोग** इति, एतस्यां विनियोगो बाहोरिति शेषः. **तदीयो धर्म** इति बाहुनिष्ठो धर्म इत्यर्थः. **पूजा लक्ष्मीर्वे**ति, **स्रग्वि**पदसूचितायाम् उभयकृतपूजायां **पीताम्बरधर**पदसूचितलक्ष्मीरमणे वा चन्दनालेप इत्यर्थः ॥४॥

**चर्वितमञ्जलिना अगृह्णात्.** तस्याः ताम्बूलयोग्यतामाह **तन्वीति**, कोमलाङ्गी. **एका** पुनर्बहिःस्थिता साक्षात्सम्बन्धमलभमाना उत्थातुं वा अशक्ता उपविश्यैव **तदङ्घ्रिकमलं स्तनयोरधात्.** अनुत्थाने धारणे च हेतुः **सन्तप्तेति**, सा ह्यत्यन्तं विरहातुरा ॥५॥

**एका भ्रुकुटिमाबध्य प्रेमसंरम्भविह्वला ।**
**घ्नन्तीवैक्षत् कटाक्षेपैः सन्दष्टदशनच्छदा ॥६॥**

**एकेति**, अन्या पुनर्दूरस्था तामसी तमसा **भ्रुकुटिमाबध्य कटाक्षेपैः घ्नन्तीव ऐक्षत्.** अत्र सवर्णे वर्णलोपः, कटाक्षक्षेपैरित्यर्थः. **प्रेम्णा** सहितो

## टिप्पणी

**चन्दनरूषितमित्यत्र एवं सामग्रीत्यादि.** एतास्वनुग्रहविशेषो ज्ञापित इति भावः ॥५॥

## प्रकाशः

[**तथा ताम्बूलेऽपीति**, तथा ताम्बूलमपि भोगसूचकं पूजासूचकं च. **देवोत्तमानामिति** देवेभ्यो उत्तमानां ब्रह्मादीनाम्. **एका पुन** इति निर्गुणाः ॥५॥]

## लेखः

स्रगादिप्राकट्यपूर्वकमाविर्भावे तात्पर्यमाहुः **एवं सामग्रीति. अत** इति, उभयकृत्यप्रदर्शनेनानुग्रहज्ञापनादित्यर्थः. **ताम्बूलयोग्यतामिति**, कोमलाङ्ग्या मृदुत्वचि ताम्बूलप्रतिफलनेऽधिका शोभा रसशास्त्रसिद्धा, अतस्तादृशशोभावलोकनाय ताम्बूलं दत्तवानिति भावः. **बहिःस्थितेति**, मण्डलाद्**बहिर्दूरे स्थितेत्यर्थः**. सर्वासां नैकट्यं पूर्वं व्युत्पादितमिति पक्षान्तरमाहुः **उत्थातुं वा अशक्तेति** ॥५॥

**दूरस्था तामसीति**, यावता तादृगीक्षणेन मानभावस्तिष्ठति तावद्दूरस्थे-

## योजना

**अंसे चन्दनरूषितमित्यत्र तासां देवोत्तमानां च कृत्यं प्रदर्शितमिति, देवोत्तमानां** ब्रह्मादीनां पूजारूपं यद्भगवति **कृत्यं तत्तासां** व्रजसुन्दरीणां **प्रदर्शितं** व्रजसुन्दरीभ्यः प्रदर्शितमित्यर्थः, पूजायां स्थापितस्य चन्दनादेर्व्रजसुन्दरीभिर्बाहुधारणे प्रत्यक्षीकरणात्. **ताम्बूलयोग्यतामाह 'तन्वी'ति कोमलांगीति**, कोमलांगीत्वाच्चर्वितताम्बूलं कण्ठे प्रतिफलत्यतः परमसौन्दर्यं सूच्यते. इयमेव ताम्बूलयोग्यता नाम ॥५॥



यः **संरम्भः** क्रोधः तेन **विह्वला सम्यक् दष्टः दशनच्छदो** यया तादृशी च जाता. **भ्रुकुटिबन्धनेन** चित्तकौटिल्यम्. प्रेमसहितसंरम्भेण इन्द्रियवैक्लव्यम्. सन्दंशेन देहक्षोभः. **घ्नन्तीवेति** प्राणैर्बलस्फूर्तिः. ज्ञानसाधनमपि तस्या विकृतं— प्रान्तदृष्टिः **कटाक्षः** तत्रापि **आक्षेपभावः**. यथा वाचावगुरणं तथा कटाक्षाएव आक्षेपरूपाः निरन्तरं प्रवृत्ताः. तादृशभावस्य पूर्णत्वाय कालनियमनार्थं वा भ्रुकुटिभङ्गः. स्वभावनियमनार्थं च संरम्भः. लोभनाशार्थं

## टिप्पणी

**एका भ्रुकुटिमाबध्येत्यत्र, तादृशभावस्येत्यादि.** पूर्वं मानमात्रं निरूपितम्, अधुना तु "शतधापि मानापनोदनार्थं यत्ने कृते मानमहं न त्यक्ष्यामी"ति[१] गाढमानो निरूप्यते. तथा हि कालविलम्बेन हि मानः शिथिलो भवति, व्यभिचारित्वेनाचिरस्थायित्वात्. तथा चायं मानस्तथा यथा न भवति [२]गाढता तादृश्यैवास्य सार्वदिकी भवति. तथा कृतिरेव कालनियमनम्. प्रियवचनादिभिर्मानमवश्यं त्यजतीति नायिकास्वभावः, "स मा भवतु, मानस्वभावएव मम तिष्ठत्वि"ति प्रयत्नस्तन्नियमनं स्वभावनियमनं नाल्पेन भवतीति **संरम्भ** उक्तः. मानस्य प्रियसंगमविलम्बहेतुत्वेन दुःखदत्वात् किमित्येवंकरणमित्याशङ्क्यैतद्विचारानुदयं तत्र हेतुत्वेन वक्तुमेतद्धेतुमाह **विह्वलेति** मूले. पूर्वानुभूतसंगमसुखस्मरणे तल्लोभात् कदाचिन्मानत्यागः स्यादिति तदभावाय दंशः. एवमत्याग्रहेऽपि हृदि प्रियस्थितेरावश्यकत्वा-

## प्रकाशः

**एका भ्रुकुटीत्यस्य** टिप्पण्यां, [**यत्ने कृते** इति, "अहं मानं न त्यक्ष्ये; कस्माद् एतावत्कालं खेदिता" इति. **मानस्तथेति** शिथिलः. **संरम्भ** इति,

## लेखः

त्यर्थः. **तादृशभावस्येति**, पूर्णतास्थापनाय कालनियमनं कर्तव्यं तदर्थं भङ्ग इत्यर्थः. भृकुटिभङ्गकार्यं चित्तकौटिल्यं पूर्वमुक्तम् अतोऽत्र **वाशब्दः** ॥६॥

## योजना

**तादृशभावस्य कालनियमनार्थमित्यारभ्य लौकिकी भक्तिरित्यन्तम्**, एतस्यार्थष्टिप्पण्यां स्फुटः ॥६॥

---

१. त्यक्ष्य इति मू. पा. ब.पाठश्च.
२. गाढतादृशैवास्य इति पाठः, 'गाढतादशैव' इति तु मूलस्थः पाठः ब.पाठश्च.

दंशः. मोक्षाभावार्थं ज्ञानवक्रता. प्रमाणनिराकरणार्थं हननमिति. यतो लौकिकी भक्तिः पुष्टा भवति. एतदर्थमेषा निरूपिता ॥६॥

एवमतिपुष्टां निरूप्य अत्युत्तमां निरूपयति **अपरे**ति.

**अपराऽनिमिषदृग्भ्यां जुषाणा तन्मुखाम्बुजम् ।**
**आपीतमपि नातृप्यत्सन्तस्तच्चरणं यथा ॥७॥**

एषा हि भगवद्दर्शनेन गतदोषा, अतो ध्यानेन भगवन्तं हृदये स्थापयितुकामा नेत्राभ्यां नेत्रद्वारा भगवन्तं हृदि स्थापितवती. अत्र लावण्यामृतं पेयं, **मुखस्याम्बुजत्वोक्तेः. अनिमिषदृग्भ्यामि**ति पानकरणम्.

**टिप्पणी**

न्मानस्यापि तत्रैव सत्त्वात् कदाचिदस्य तस्मिन् लयः स्याच्चेत्तदापि मानराहित्यं भवेदिति तदभावाय ज्ञाने कौटिल्यम्. निर्दोषभावे हि धर्मिणो मुक्तिः, तस्यातथात्वे तत्सम्बन्धाद्यत्र धर्मिणोऽपि न मुक्तिस्तत्र तस्य कथं सा भवेदिति भावः. **प्रमाणनिराकरणार्थमि**ति, "सर्वस्येशानः" "य आत्मानमन्तरो यमयती"त्यादिश्रुतिभ्य ईशितृत्व-नियामकत्वादि-धर्मवत आज्ञोल्लङ्घनं, तदग्रे स्तब्धत्वादिकं, प्रभुश्चान्तःकरणं मानान्निवर्तयितुं यतते अन्तःकरणं च न निवर्तत इति प्रमाणविरुद्धत्वान्न सम्भवति, तच्च प्रमाणबलनिराकरणे सम्भवतीति तद्धननमेव कृतं भवतीत्यर्थः. **यतो लौकिकी भक्तिरि**ति लोकरीत्यनुसारी स्नेह इत्यर्थः ॥६॥

**अपराऽनिमिषदि**त्यत्र **एषा ही**त्यादि. **गतदोषा** विस्मृतपूर्वदुःखेत्यर्थः ॥७॥

**प्रकाशः**

संरम्भो अवष्टम्भः. **तत्रैवे**ति हृदये.] **अस्य तस्मिन्नि**ति हृदयस्य भगवतीत्यर्थः. [**कौटिल्यमि**ति, कौटिल्यं कृतं भवति. **तस्यास्तथात्वे** इति मुक्तेः सदोषत्वे.] **तस्यातथात्वे** इति भावस्य सदोषत्वे. [**तस्ये**ति धर्मस्य. **से**ति मुक्तिः.] ॥६॥

**लेखः**

**अपरे**त्यत्र, **अत** इति गतदोषत्वादित्यर्थः. नेत्रद्वारा सेवनपदार्थमाहुः **हृदि स्थापितवती**ति. पूर्वोक्तं ध्यानेन स्थापनं, स्वाधीनत्वेन[१] स्थापनमिति विभेदः. स्वाधीनत्वेन स्थापनरूपमेव पान**मापीतमि**त्यनेनानूदितम्. पेयमाहुः **लावण्यामृतमि**ति, अम्बुजस्थापने मकरन्द इव मुखस्थापने लावण्यं स्थापितं

१. ननु अन्तर्गृहगतानामिव इति भावः (सम्पा.).



द्रवद्द्रव्यस्यान्तर्निवेशनं पानम्. मध्ये रसविच्छेदो भविष्यतीति **अनिमिषदृग्भ्यां** पानम्. नेत्रयोरञ्जलित्वं, लावण्यामृतस्य विरलत्वात्. प्रीतिसेवनमत्राभिप्रेतम्. यद्यपि **आसमन्ताद्धर्मसहितं** सर्वमेवाभिनिविष्टं स्वाधीनं जातं, यदैवेच्छति तदैव हृदये पश्यतीति, त**थापि नातृप्यद्** अलंभावं न कृतवती. तत्र हेतुर्विषयसौन्दर्यं न तु प्रयोजनाभावः प्रतिबन्धकः. एतदर्थं दृष्टान्तमाह **सन्तः तच्चरणं यथे**ति. सन्तो हि जातकार्याः, तथापि चरणारविन्दे सहजो रसो, न तु किञ्चित् प्राप्तव्यं निवर्तनीयं वा ॥७॥

**प्रकाशः**

**अपरे**त्यत्र, ननु विषयसौन्दर्ये सत्यपि प्रतिबन्धके विद्यमाने पानं न सम्भवतीत्यत आहुः **न त्वि**त्यादि ॥७॥

**लेखः**

भवतीति भावः. हृदिस्थापनस्य पानत्वं व्युत्पादयन्ति **द्रवद्द्रव्यस्ये**ति. दृग्भ्यां पाने हेतुमाहुः **नेत्रयोरि**ति. **अञ्जलित्वं** पुटाकारत्वमित्यर्थः, विरलं ह्यमृतं पुटेनैव पातुं शक्यमिति भावः. 'जुषी'धातोः पानार्थकत्वं कथमित्याशङ्क्याहुः **प्रीतिसेवनमि**ति, धात्वभिप्रेतोऽर्थस्त्वयमेव परं हृदि स्थापनं विना प्रीतिसेवनं न भवतीति तद्धेतुत्वेन सोऽर्थ उक्त इति भावः. **आपीतमित्यत्राङो**ऽर्थमाहुः **स्वाधीनं जातमि**ति. अतो **ध्यानेने**त्यनेनोक्तं कार्यं सम्पन्नमित्यर्थः. तथाच स्वाधीनं जातमपि मुखाम्बुजं नेत्राभ्यां हृदि स्थापयन्ती नातृप्यदित्यर्थः ॥७॥

**योजना**

**अपरानिमिषदृग्भ्यामि**त्यत्र **प्रीतिसेवनमत्राभिप्रेतमि**ति, **जुषाणा तन्मुखाम्बुजमि**त्यत्र "जुषी प्रीतिसेवनयोरि"ति जुषधातुना यद्यपि कुत्रचित्प्रीतिरुच्यते कुत्रचित्सेवोच्यते, तथाप्यत्र प्रीत्यर्थकधात्वन्तरं सेवनार्थकधात्वन्तरं विहाय जुषधातोः प्रयोगः कृतोऽतो ज्ञायते प्रीतिसेवनमत्राभिप्रेतमिति. मुखाम्बुजस्य प्रीतिसेवनं नाम तन्निष्ठलावण्यामृतपानम्. अतए**वापीतम**तः **स्वाधीनं जातमि**ति, **आपीतमित्याङः** प्रयोगात् **आसमन्ताद्धर्मसहितं** पीतमतः **स्वाधीनं जातमि**त्यर्थः. तस्य स्वाधीनत्वस्य स्वरूपमाहुः **यदैवेच्छती**त्यादिना ॥७॥

एका पुनर्दूरस्था अनया तुल्यशीला योगानुसारेण भगवन्तं गृहीतवतीत्याह **तं काचिदिति.**

**तं काचिन्नेत्ररन्ध्रेण हृदिकृत्य निमील्य च ।**
**पुलकाङ्ग्युपगूह्यास्ते योगीवानन्दसम्प्लुता ॥८॥**

पूर्वं लौकिकी पश्चाद् भक्तिमार्गानुसारिणी निरूपिता. इयं योगानुसारिणी अतोऽस्याः सर्वावयवे दृष्टिः. उभयोरेकीकरणम्, अन्यथा दृष्टिभेदः स्यात्.

### टिप्पणी

**तं काचिन्नेत्ररन्ध्रेणे**त्यत्र, **पूर्वं लौकिकी**त्यारभ्य **दृष्टिभेदः स्यादि**त्यन्तम्. "एका भ्रुकुटिमि"त्यनेन लौकिकसरूपभाववती निरूपिता, तद्यथा तथोपपादितम्. भक्तिमार्गे हि स्नेहवशाद् बहिर्मुखारविन्ददर्शने तेनैव विस्मृतसर्वा तदन्यन्नापेक्षते, सा "त्वपरे"त्यनेन निरूपिता. योगे हि ध्याने प्रत्येकमङ्गं पृथक् चिन्त्यते, धारणायां तैः समुदितमेकत्वेन स्वरूपं चिन्त्यते, परस्परसम्बन्धास्मरणपूर्वकमेकाङ्गस्मरणस्यानुचितत्वेनापराधरूपत्वात्. प्रकृते तु स्वरूपस्य रसात्मकत्वेन भावात्मकत्वादेकैकस्यैवाङ्गस्य स्वामिनीभावविषयत्वे तत्र परस्परं भेदापत्तिः स्यात्, सा च अनेन भावेनापास्यते. इदमेवोक्त**मन्यथा दृष्टिभेदः स्यादि**त्यनेन, दृष्टिकृतो भेदः स्वरूपे स्यादित्यर्थः. न च विषयत्वेन स्वरूपस्य भावाद् भेदो वाच्यः, एतन्नियमाभावात्, "सर्वं ज्ञानं प्रमेयमि"त्यादौ व्यभि-

### प्रकाशः

**तं काचिदि**त्यस्य टिप्पण्यां, **रसात्मकत्वेन भावात्मकत्वादि**ति, इदं यथा तथा विचारितं "चूतप्रवाले"त्यत्र. [**विषयत्वेने**ति, नेत्रयोः स्वरूपविषयः.] **भेदो वाच्य** इति, तथा सति दृष्टिभेदो न दोषायेति भावः. [**एतन्नियमाभावादि**ति, दृष्टिकृतो भेदः विषयस्वरूपे न भवति इति

### लेखः

**तं काचिदि**त्यत्र, **सर्वावयवे** इति, सम्पूर्णस्वरूपस्यैव नेत्रद्वारा हृदि स्थापनादिति भावः. **उभयोरि**ति, 'सर्वेषामि'ति वक्तव्येऽपि संयोग उभयोरेव, अन्येषां पुनस्तेनेत्याशये**नोभयोरि**त्युक्तम्. टिप्पण्यां **योगे ही**ति कथनादयं

### योजना

**तं काचिदि**त्यत्र, [1]**अन्यथा दृष्टिभेदः स्यादि**ति[1] एतदर्थष्टिप्पण्यां

१-१. मांड. पाठे एतावान् अंशो अधिकः.



पूर्वस्यास्तु दर्शनमेव प्रयोजनम्. एषा विरलेति **काचिदि**त्युक्तं, **तं** पूर्वोक्तं, "न खलु गोपिकानन्दनो भवानि"ति यया निरूपितम्. **नेत्ररन्ध्रेणे**त्येकवचनं रूपप्रवेशार्थम्. **हृदि कृत्ये**ति हृदि कृत्वा, असमासेऽपि ल्यप्. **हृदिकृत्ये**त्यलुक्समासो वा. ततो "अन्तःप्रविष्टो बहिर्मा गच्छत्वि"ति **निमीलनं** कृतवती, न हि तस्या बुद्धौ भगवान् बहिरवशिष्टोऽस्ति स्वकीयो वा

### टिप्पणी

चारात्. ईश्वरज्ञानस्य सर्वविषयकत्वेन स्वविषयकत्वस्यापि सर्ववादिसम्मतत्वेन प्रकृते च स्वयंप्रकाशचिद्रूपत्वात् स्वरूपस्य न काप्यनुपपत्तिः. एतेषां भावानां व्यभिचारिभावत्वे तु न स्वरूपभेदकत्वं स्यात्. स्थायिभावत्वेन तद्भेदकत्वमावश्यकमिति तत्समाधानमावश्यकमिति भावः. **स्वकीयो वा भाग** इति, प्रभुरेताभ्यः प्रत्येकमाविर्भूय रसं ददातीति सर्वासां भागरूपो भवति. तथा च यदर्थमाविर्भूतं यद्रूपं तत् तस्या भागरूपमिति तथा. एतेन पितृधने पुत्राणामिव प्रभुस्वरूपे स्वामिनीनामेव स्वत्वमिति ज्ञापितं भवति ॥८॥

### प्रकाशः

नियमात्. **व्यभिचारादि**ति, प्रमेयं ज्ञानं व्यभिचारि भवति तस्य स्थाईत्व अ(यित्वा!)नियमात्. **ईश्वरज्ञानस्ये**ति, ईश्वरस्य ज्ञानं सर्वविषयकं भवति अथ च स्वविषयकमपि भवति– "अहं सर्वविषयक ज्ञानवान्" इति. अत्र स्वयंप्रकाशः चित् ज्ञानरूपत्वात् सर्वं सुवचम्.] **न काप्यनुपपत्तिरि**ति, विषयविषयिणोरभेदानुपपत्तिः दृष्टिभेदकृतापराधानुपपत्तिश्च नेत्यर्थः. प्रकारान्तरीयानुपपत्तिं हृदिकृत्याहुः **एतेषामि**त्यादि. [**एतेषामि**ति भक्तानाम्. **यदर्थमाविर्भूतमि**ति स्वरूपानन्ददानाय. **स्वत्वमि**ति स्वकीयत्वम्. सुबोधिन्यां **हृदि कृत्वे**ति हृदये इति. तत्र **हृदि** इति लिप्(ल्यप्!)प्रत्ययः. **ल्यबि**ति

### लेखः

दोषो योगमार्ग एवेति पूर्वत्र नायं दोषः प्राप्नोतीत्याशयेनाहुः **पूर्वस्या** इति. सा तु भक्तिमार्गानुसारिणीति दर्शनमेव फलं न तु रूपकल्पनापेक्षे**त्येव**कारः. परिदृश्यमानमेवं स्वरूपं हृदिस्थितं भवतीति भावः. अत्र टिप्पण्यां **प्रकृते त्वि**ति. केवलयोगमार्गेऽपराधमात्रं, योगानुसारिभक्तिमार्गे तु स्वरूपेऽपि भेदापत्तिः स्यादित्यर्थः. [1]**रूपप्रवेशार्थमि**ति, समुदितस्वरूपस्यैकत्वादिति भावः.

१. सुबोधिन्याम्.

भागस्तया गृहीत इति. **चकारात्** सर्वेन्द्रियनिवर्तनम्. ततोऽन्तरानन्दे पूर्णे **पुलकाङ्गी** जाता. केवलानन्देन पुलके गोपीत्वं न भविष्यतीति तदर्थं विशेषमाह **उपगूह्यास्त** इति. अयं रोमाञ्चः सात्त्विकभावे प्रविष्टो, अतएवान्त**रुपगूह्या**लिङ्ग्य **आस्ते** तामेव स्थितिं धारितवती अवस्थान्तराभावाय. ननु तस्या उत्तरत्र कार्यं– भगवता सह सम्भोगः कर्तव्यः, आलापाः, गृहे च गन्तव्यमिति कथं तामेवावस्थां स्थापितवती? तत्राह **योगीवे**ति, योगी हि तयैवाग्रे सर्वं कार्यं साधयति तथेयमपि तयैवावस्थया सर्वं साधनीयमिति स्थिता. किञ्च **आनन्दसम्प्लुता** आनन्दे निमग्ना, अतएव बहिःसंवेदनरहिता. संवेदनायामेव कार्यानुसन्धानं, न हि पूर्णे आनन्दे कश्चन कामोऽस्ति ॥८॥

एवं विशेषाकारेण कृत्यमुक्त्वा सर्वासां सामान्याकारेण प्रयोजनमाह **सर्वास्ता** इति.

**सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ।**
**जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥९॥**

**प्रकाशः**

प्रत्ययः.] असमासे ल्यपो व्याकरणान्तरसिद्धत्वेन पक्षान्तरमाहुः **अलुक् समास** इति, "हृद्द्युभ्यां चे"ति सूत्रेण तथेत्यर्थः. [**उत्तरत्रे**ति, अग्रे अवस्थान्तरा भवति तत्कथं?] ॥८॥

**लेखः**

**केवलानन्देने**ति आत्मानन्देनेत्यर्थः. **किञ्चे**ति, योगिवत् "तथा साधयिष्यामी"ति ज्ञानात्तथास्ते आनन्दसम्प्लवेन तादृशानुसन्धानाभावाच्च[१] तथास्ते इति समुच्चयः ॥८॥

**सर्वासामि**ति, भगवता **सामान्याकारेण सर्वासां** सम्पादितं विरहज-तापनिवृत्तिरूपं **प्रयोजनं** फल**माहे**त्यर्थः. **सर्वास्ता** इत्यत्र. **अतएवे**ति,

**योजना**

स्फुटः. **स्वकीयो वा भाग** इति, एतदर्थष्टिप्पण्यां स्फुटः. **केवलानन्देन पुलके गोपीत्वं**[२] **ने**ति, योगिनो हि अन्तर्भगवदाविर्भावे आनन्देन पुलकिताङ्गा भवन्ति. तद्वन्नेयं किन्तु उपगूहनं कृतवतीति कामभावोऽस्या मुख्य इति गोपीत्वमेव प्रधानं न तु योगरीतिरिति हार्दम् ॥८॥

१. तादृशानुभावाच्च इति जो. पाठः. २. योगित्वं नेतीति मांड. पाठः.



यो हि बलिष्ठरजस्तमोभ्यां व्याप्तयोरपि फलसम्पादकः तस्य क्षुद्रगुण-क्षोभयुक्तानामासामुद्धारे कः प्रयास इति वक्तुं **केशवे**त्युक्तम्. तस्य योऽय**मालोकः** आलोकनं प्रकाशो वा अन्तर्बहिः. अतएव सएव **परमोत्सवो**, यथा लौकिकानां महाराज्यप्राप्तिः पुत्रोत्सवो वा. तेन **निर्वृताः सर्वा**एव जाताः. एवं तासामिष्टसिद्धिरुक्ता, अनिष्टनिवृत्तिमाह **जहुर्विरहजमि**ति. नन्वेवं सति मुक्ताएव ता भवेयुः; नहि संसारे निवृत्ते भगवत्साक्षात्कारेण

**टिप्पणी**

**सर्वास्ताः केशवालोके**त्यत्र **क्षुद्रगुणक्षोभयुक्तानामि**ति, एतासां भगवतश्च गुणाः सर्वे महान्तः, परोक्षभजनस्याज्ञानं क्षुद्रो गुण एतासामिति हृदयम्. **मुक्ताएव ता** इत्यादि. तदात्यार्तितः प्राणेन्द्रियान्तःकरणजीवा भगवत्येव प्रविष्टास्तत्सम्बन्धेन च परमानन्दं प्राप्तवत्य[१] इति पुनर्बहिरनुसन्धानमेतादृशी-

**प्रकाशः**

**सर्वास्ता** इत्यत्र. [**व्याप्तयोरपी**ति ब्रह्माशिवयोः **फलसम्पादकः** मोक्षदाता. **क्षुद्रगुणे**ति, अन्तर्हितनिकटस्थस्य भगवतो ज्ञानाभाव क्षुद्रगुणो, तेन **क्षोभो** मानात्मकः. **केशवेत्युक्तमि**ति, "क(ब्रह्मा)श्च ईश(शिव)श्च केशौ, तयोः(वं!) मोक्षसुखं यस्माद्" इति केशवः. अतएव **केशव**पदप्रयोजनम्. **निर्वृताः** इति सुखिताः. **नन्वेवं सती**ति, मोक्षे "स्वाप्ययसम्पत्त्योः

**लेखः**

अन्तर्बहिर्विद्यमानत्वादेवेत्यर्थः. **सर्वाएवे**ति, एकत्रोक्तं नेत्ररन्ध्रेण हृदिस्थापनादि सर्वास्वेव प्रकारभेदैर्ज्ञेयमित्यर्थः. **इष्टसिद्धिरुक्ते**ति पूर्वानुवादः. **नन्वेवं सती**ति, अनूदिते प्रकारे सतीत्यर्थः. तमाहुः **संसारे** इति. **स्वसम्बन्धे**ति, न तु स्वस्मिन् लयं सम्पादयितुमित्यर्थः ॥९॥

**योजना**

**सर्वास्ताः केशवालोके**त्यत्र **केशव**पदतात्पर्यमाहुः **बलिष्ठरज-स्तमोभ्यामि**त्यादिना. **बलिष्ठरजस्तमोभ्यां व्याप्तयो**र्ब्रह्मशिवयोरित्यर्थः. **फलसम्पादको** मोक्षसम्पादक इत्यर्थः, कश्च ईशश्च केशौ केशयोर्वं मोक्षात्मकं सुखं यस्मादिति **केशव**पदव्युत्पत्तेः. **तस्य क्षुद्रगुणक्षोभयुक्तानामि**ति– एतदर्थष्टिप्पण्यां स्फुटः ॥९॥

१. प्राप्तवन्त इति मू. पा. स्तु ब.पाठानुसारेण संशोधितः.

परमनिर्वृतौ सत्यां कश्चन पुरुषार्थोऽवशिष्यते, तत्राह **प्राज्ञं प्राप्येति**. **प्राज्ञः** सुषुप्तिसाक्षी. स्वाप्यये भगवदाविर्भावो निरूपितः. तत्र च जीवानां प्रवेशो वासनासहितानाम्. तं **प्राप्य यथा जनाः** अधिकारिणो मनुष्याः पुनरायान्ति एवमत्राप्यागमिष्यन्तीति भावः. यतो **जनाः** जायमानाः, न तु उत्तमाधिकारिणः. स्वसम्बन्धख्यापनार्थमेव परं भगवान् प्रकटः ॥९॥

एवं तासां कृत्यमुक्त्वा ताभिर्भगवत्कृत्यमाह **ताभिरिति**.

---

**टिप्पणी**

नामसम्भावितमित्यर्थः. **एवमत्रापी**ति. एतास्तु न लौकिक्यो नापि प्रसिद्धमुक्तिमार्गीयाः किन्तु बहिः प्रियसंगमाभिलाषवत्यो, भगवांश्च एतन्मनोरथं पूरयत्येवेति तथैव संपत्स्यत इत्यर्थः ॥९॥

**प्रकाशः**

अन्यतरापेक्षम्" इति सूत्रे. टिप्पण्यां **एतादृशीनामसम्भावितम्** इति वादिमतम् **एवमत्रापीति** इति समाधानं च. सुबोधिन्यां **प्राज्ञ** इति, सुषुप्तिसाक्षी भगवान् **प्राज्ञ**शब्देन उच्यते.] **स्वाप्यय** इत्यादि, स्वाप्ययः सुषुप्तिः, "स्वमपीतो भवती"ति श्रुतेः. तत्र भगवदाविर्भावः "एवमेवायमात्मा प्राज्ञेनात्मना सम्परिष्वक्त" इति श्रुतौ सम्परिष्वङ्गकथनेन बोधित इत्यर्थः. [**जना** इति, **यनाः** यननशीलाः (जना जननशीला!)] **अधिकारिण** इति संसाराधिकारिणः. एतस्यैव व्याख्यानं **यत** इत्यादि. [**नत्विति**, ननु अनुत्तमाधिकारिणां जनानां सुषुप्तौ कथं भगवदावेशः तत्राह **स्वसम्बन्धेति**.] नन्वेवं तत्तौल्ये "तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुः, एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्तीति, सति सम्पद्य न विदुः, सति सम्पद्यामह" इत्यादिश्रुत्या तत्राज्ञानकथनादत्रापि तथा स्यादित्यत आहुः **स्वसम्बन्धे**त्यादि. तथा च तादृशावस्थायामपि यद् ज्ञानं तत्परोक्षभजनदशायामपीदानीमिवाहं स्थितः परं भवतीभिर्न ज्ञात इति तदानीन्तनस्वसम्बन्धख्यापनार्थमिदानीं प्रकट इति नाज्ञानमित्यर्थः. एतेन दृष्टान्तवैलक्षण्यमपि बोधितम्. तदेव टिप्पण्यां विवृतम् **एतास्तु ने**त्यादिना. अतो मुक्ताधिकारवैलक्षण्यमात्रएव दृष्टान्त इति भावः ॥९॥

**लेखः**

**तासां कृत्यमिति**, अयं "काचित् कराम्बुजं शौरे"रित्यारभ्य सर्वेषा-



**ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः ।**
**व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥१०॥**

तासां सम्बन्धे प्राकृतीनां भगवतोऽन्यथात्वं शङ्क्येत, तन्निवर्त्यते. [1]अन्यथा स्वार्थमेव भगवत्तिरोधानं स्यात्, "स नैव व्यरमत्[2], तस्मादेकाकी न रमत" इति श्रुतेः. लोकोऽपि केवलं भगवन्तं पश्यन् न निर्वृतो भवति

---

**टिप्पणी**

**ताभिर्विधूते**त्यत्र **प्राकृतीनामि**ति प्राकृतीत्व इत्यर्थः ॥१०॥

**प्रकाशः**

**ताभिर्विधूते**त्यत्र. [मूले **तात** इति हे राजन्. **भगवतोऽन्यथात्वमिति** कश्चित् प्राकृतत्वम्[3].] ननु भगवतः सर्वदैव रोचमानत्वेन परापेक्षाभावादत्र ताभी रुच्याधिक्यं किमित्युच्यत इत्याकांक्षायामाहुः **तासामि**त्यादि. तथा च तासां तथात्वे भगवतः प्राकृतवत् क्षीणरसत्वं शंक्येतेति तन्निवृत्त्यर्थं तथोच्यत इत्यर्थः. ननु तदनिवृत्तौ को दोष इत्यत आहुः **अन्यथे**त्यादि. **स्वार्थमि**ति रमणाभावार्थम्. [**भगवत्तिरोधानमि**ति, तिरोधानं न कृतवान्, यदि स्वार्थपरः भगवान् स्यात्. प्रणिपातादिना लौकिकवत् मानापनोदनं तदा कृतवान्.] ननु रसरूपत्वस्य श्रुतिसिद्धत्वात्कथमेतच्छङ्कोदय इत्यत आहुः **स वा** इत्यादि. तथा च सिद्धे रमणाभावे तदिवेदमपि रमणं कादाचित्कं स्यात्, ततश्च पूर्वशंकापुष्टौ रसरूपत्वमपि तथा स्यात्, "प्रशमाय प्रसादाये"ति पूर्वोक्तमपि विरुध्येतेति तन्निवृत्त्यभावे दोष इत्यर्थः. तथापि दृष्टान्तस्य किं

**लेखः**

मनुवादो ज्ञेयः. दृष्टान्तेन पुनरागमनरूपं कृत्यमस्मिन्नपि श्लोके निरूपितमिति भावः. **ताभिरिति, ताभिः** सह स्थितस्य **भगवतः कृत्यम**धिकशोभासम्पादनमित्यर्थः. **ताभिरित्यत्र, अन्यथात्वमि**ति, भगवतोऽपि प्राकृतत्वं शङ्क्येत, अतस्तासां प्राकृतीत्वं शोभाकथनेन निवर्त्यत इत्यर्थः. उपपादयन्ति **अन्यथे**ति, तासां प्राकृतीत्वे तत्सम्बन्धेन स्वस्यापि प्राकृतत्वेऽलौकिकशोभातिरोभावशङ्क्या भगवत्तिरोधानमिति स्यात्, कुतस्तरां तत्सहितस्य शोभेत्यर्थः. **स नैवे**ति, **इति श्रुतेः** रिरंसायामपि सत्यां यत्तिरोहितवांस्तत्पूर्वोक्तशङ्कयैव **स्यादि**ति

---

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्.
२. रेमे इति पाठः. ३. प्राकृतत्वं कश्चित् शंक्येत इति अन्वयो अवभासते - सम्पा.

किन्तु सर्वशक्तियुक्तं परं, "पुंसः स्त्रियाश्च रतयोः सुखदुःखिनोर्न"ति वाक्यात्. पूर्ववत् ता दुःखिताश्चेत् तदोत्तमता न भवतीत्याह **विधूत-शोकाभिरि**ति. **ताः** पूर्वोक्ताः; गुणास्तासामुक्ताएव, सर्वथा प्रपन्ना इति. मध्ये शोकः समजनि. तस्मिन्निवृत्ते यथापूर्वमेव ताः. **भगवांश्च** षड्गुणैश्वर्ययुक्तः. तथापि प्राकृत इव यदि परिच्छिन्नकामः स्यात् तथापि वैलक्षण्यात् न रोचेत, भगवाँस्तु पूर्णकाम इत्याह **अच्युत** इति. अतः **ताभिर्वृतः अधिकं व्यरोचत**

---

**प्रकाशः**

प्रयोजनमत आहुः **लोकोऽपी**त्यादि. [ **निर्वृतो** आनंदितः. **पुंसः स्त्रियाश्चे**ति दशमस्कन्धे श्रीरुक्मिणीवाक्यं श्लोकम्. रमणे अतिशोभा पुंसः स्त्रियोः (पुंस्त्रियोः!) सुखसहितयोः भवति, न तु एकःसुखी एको दुःखी सत्यां भवति (एकः सुखी अपरस्यां दुःखिन्यां सत्यां भवतीति भावः!). **गुणा** इति सर्वात्मभावसहिता गुणाः. **यथापूर्वमेवे**ति प्रेमपूर्णः. **परिच्छिन्नकाम** इति स्वल्पः. **वैलक्षण्यादि**ति बहुस्त्रीकात्. **अच्युत** इति नास्ति क्षरणमिति. **आह** इति, सहजस्वभावात् ताभिः वृतः सन् अधिकं व्यरोचत् इति ताभिः कृत्वा अधिकशोभा चेत्, प्राकृतत्वं भगवति आयाति परन्तु राजा "शुकोक्तं सर्वं सत्यमेव" इति शुकस्य हृदयं पुष्णाति विश्वासेन; तथा च विश्वासेन सन्तुष्टः

**लेखः**

पूर्वोक्तेनैवान्वयः. **लोकोऽपी**ति. ताः स्वसहितस्य भगवतो दर्शनेन निर्वृताः न तु पूर्वाध्यायद्वयवद्भावनया केवलदर्शनेनेति पूर्वश्लोके निरूपितं, लोकोऽपि तथैवे**त्यपि**शब्दः. **परमि**ति, दुःखितत्वेऽपि लोकनिर्वृतिस्तु भवति परन्तु भगवति रसोत्तमता न भवतीत्यर्थः. **परिच्छिन्ने**ति, काल**परिच्छिन्नो**ऽनित्यः **कामो** यस्येत्यर्थः. एतासामपरिच्छिन्नकामत्वं **ताभिरि**त्यनेन स्मारितया सर्वथा प्रपत्त्या निरूपितम्. अनित्यकामत्वे कामाभावदशायां प्रपत्त्यभावात् सर्वथा प्रपत्तिर्न भवेदिति भावः. तथा च भगवतः परिच्छिन्नकामत्वे वैलक्षण्यं स्यादित्यर्थः. **भगवांस्त्वि**ति **तु**शब्देनैतासां व्युदासः. भक्तानामपि पूर्णकामत्वे भगवदपेक्षा न स्यादिति "आनन्दादयः प्रधानस्ये"ति सूत्रे निरूपणादिति भावः. एता अपरिच्छिन्नकामाः, भगवाँस्तु पूर्णकामएव, अतस्तत्कामस्य परिच्छेदः सम्भावयितुमपि न शक्य इत्यर्थः. **अत** इति, उभयोरपरिच्छिन्न-कामत्वादित्यर्थः. **व्यरोचते**ति, शोभाया अन्यदर्शनसापेक्षत्वेऽप्यन्योन्यमेव



सहजापेक्षया. उक्तार्थविश्वासेन हि श्रोता वक्तारं पुष्णातीव पितेव पुत्रं स्वार्थम्. अतएवाग्रेऽतिगुप्तार्थकथनेन वक्ता श्रोतारं सुखयति, अन्यथानधिकारिणं मत्वा न वदेदलौकिकमर्थम्. प्रकृते चास्मिन्नर्थे राज्ञो विश्वासं दृष्ट्वातिसन्तोषेण स्नेहेन, न पितृत्वेन, सम्बोधयति **ताते**ति. नन्वेवं सति भगवत्कान्तेः तारतम्यात् सहजत्वं न स्याद्, अत आह **पुरुषः शक्तिभिर्यथे**ति. यथायं प्राकृतोऽपि पुरुषः सर्वसामर्थ्येषु लीनेषु लोकप्रतीत्या न रोचत इव, स चेत् क्रियाज्ञानादिशक्तीराविष्करोति तदाधिको रोचते, तथा अयमपि **भगवान्** रोचमानएव प्रकटासु शक्तिषु गोपिकासु सर्वप्रतीत्या[१] भावुकानामप्यन्तःकरणेन **अधिकं व्यरोचत** अतिसौन्दर्यं प्राप्तवान्. ततो **भगवान्,** परमानन्दयुक्तः स एव, "एष ह्येवानन्दयाती"ति श्रुतेः ॥१०॥

तासामानन्दजननार्थं यत् कृतवाँस्तदाह **ताः समादाये**ति.

**ताः समादाय कालिन्द्या निर्विश्य पुलिनं विभुः ।**
**विकसत्कुन्दमन्दार-सुरभ्यनिलषट्पदम् ॥११॥**

**ताः सम्यग् आदाय** समीचीने **पुलिने निर्विश्यो**पविश्य **विभुर्जा**तः.

---

**प्रकाशः**

शुकः **तात** इति सम्बोधनं राजार्थे वदति. अतः तत्समाधानाय **पुरुषः शक्तिभिरि**ति. **इवे**ति, पाचक-पाठकादिसामर्थ्यगुप्तेषु लोकप्रतीत्या न रोचते परन्तु तस्मिन् ताः क्रिया सन्त्येव, लोकप्रतीत्यां सत्याम् अधिकं व्यरोचत इत्यर्थः. **परमानन्दयुक्तः** कृष्णः. **ह्येवानन्दयाती**ति, आनन्दयति इति वैदिके आनन्दयाति.] ॥१०॥

[ **विभुर्जात** इति **जात** इति शेषः. **द्यती**ति, कलिं कलहः परस्परविवादो,

**लेखः**

स्वस्वसहितदर्शनं, तद्भावयितृणां भक्तानां च भावनया तद्दर्शनमित्याहुः **सर्वप्रतीत्या भावुकानामप्यन्तःकरणेने**ति ॥१०॥

**ताः समादाये**त्यस्याभासे **यत्कृतवानि**ति, विभुत्वं प्रकटितवानित्यर्थः. अत्र श्लोके क्रियाया अनुक्तत्वात् क्रियान्तराध्याहारापेक्षया स्वरूपधर्मविभुत्व-प्राकट्यकथनमेव वरमित्याशयेनाहुः **विभुर्जात** इति, व्यापको जातः सर्वासामेव निकटे स्थितो जात इत्यर्थः. **तासामन्योन्यमि**ति, मदो

---

१. सर्वप्रीत्या इति ब. पाठः.

**कालिन्दी** कलिन्दकन्या, "कलिं द्यती"ति कलिन्दः, अतस्तस्याः **पुलिने** तासामन्योन्यं भगवता वा कलहो न भविष्यतीति ज्ञापितम्. पुलिनं वर्णयति क्रीडायोग्यत्वार्थं सार्धेन– सर्वत उपरि अधश्चेति. प्रथमतः सर्वतः सौभाग्यमाह **विकसन्ति कुन्दमन्दार**पुष्पाणि तेषां **सुरभ्यनिलः षट्पदा** भ्रमराश्च यत्र. वायोस्त्रयो गुणाः स्पष्टाः. मकरन्दोऽपि पुष्पेष्वधिकः. तेन मत्ता भ्रमरा अपि नादसाधकत्वेन गानादावुपयुज्यन्ते. विकासो वाय्वर्थएव. कुन्दगन्धः शान्तः मन्दारगन्धः पुष्टः, तेन गुप्तागुप्तकामयोरुद्बोधको निरूपितः. [1](शत्रन्तोक्त्या

**प्रकाशः**

तं द्यति खण्डयतीति कलिन्दः. **अधश्चेति**, इति स्थलस्य त्रिभिः प्रकारैः क्रीडोपयोगित्वमाह. **त्रयो गुणा** इति, पुलिनसम्बन्धेन शीतः कुन्दादिसम्बन्धेन सुरभिः अतिमकरन्देन मन्दत्वम् इति त्रिगुणो वायुः. **वाय्वर्थ** इति, वायुसुगन्धार्थे पुष्पाणां विकासः. **शान्त** इति मधुरः, **पुष्ट** इति उग्रः.

**लेखः**

मानश्चेत्यर्थः. स्वस्मिन् सर्वत आधिक्यज्ञानरूप-मदेनैवान्योन्यसापत्न्यभावेन कलहो भवतीति भावः. अत्र पुलिने यमुनायाः कलिखण्डनरूपो धर्मः प्रकट इति पूर्वलीलापुलिनाद्विशेषः. तत्र तु मदमानौ सम्भविष्यत इति यमुनाया एतद्धर्मप्राकट्यं सूचयितुं "नद्याः पुलिनमाविश्ये"ति श्लोके 'नदी'पदमेवोक्तम्. **षट्पदा भ्रमराश्चेति**, **तेषामि**त्यस्यात्राप्यन्वयः. तथा च सुरभ्यनिलश्च षट्पदाश्चेति द्वन्द्वं कृत्वा विकसत्कुन्दमन्दाराणां ते यत्रेति व्यधिकरणपदो बहुव्रीहिः कर्तव्य इति भावः. वायोर्गुणान्तराकथने हेतुमाहुः **स्पष्टा** इति. एवं समासे तात्पर्यमाहुः **मकरन्दोऽपी**ति, उभयत्र पुष्पसम्बन्धकथने **पुष्पेष्वधिको मकरन्दोऽपि** उक्तो भवति, भ्रमरा अपि तत्सम्बन्धान्मत्ता इत्युक्तं भवेत्. **भ्रमरा अपि** इति स्यादिति शेषः. **मन्दारैः सुरभिरि**ति तृतीयासमासे तु भ्रमरेषु पुष्पसम्बन्धाभावान्मादो नोक्तः स्यादिति भावः. भ्रमरेषु मादकथनप्रयोजनमाहुः **नादे**ति, यत इति शेषः. अधुना विकासस्य प्रयोजनमाहुः **वाय्वर्थमि**ति, वायौ स्वगन्धसम्पादनार्थं न तु पूर्ववत् प्रसूनावचयेन वेण्यादिषु प्रसूनस्थापनार्थमित्येवकारः. **परितो जलमि**ति, पुलिनस्य विशेष्यत्वादस्मिन्नप्यर्थे जलमुक्तमेवेति भावः ॥११॥

१. ( ) चिह्नान्तर्गतं प्रभूणाम्.



प्रभुनिवेशनसमये एव विकासारम्भो न तु पूर्वमपीति ज्ञाप्यते. अन्यथा 'विकसिते'ति वदेत्. एवं सति यस्मिन् क्षणे यस्यार्थस्योपयोगः तस्मिन्नेव क्षणे तत्कार्यं भवति नान्यदेति लीलामात्रोपयोग्येवात्रत्यं [1]सर्वमपि इति ज्ञापितं भवति. अन्यथा सार्धाध्यायत्रयोक्तलीलायां क्रियमाणायां भूयस्येव रात्रिरतीतेत्यधुनैव विकासे हेत्वन्तराभावात् स न भवेद्, अतएव न वदेदपि. एवं सत्येतादृक्कुन्दादिसम्बन्धित्वेनोक्तत्वादनिलादयोऽप्यधुनैव प्रवृत्ताः न पूर्वमपीति ज्ञेयम्.) स्वतन्त्रतयापि सौरभ्यप्रतीत्यर्थं सुरभिरनिल उक्तः. एवं परितो जलं, परितः सुगन्धः, परितः पुष्पाणि, परितो वायुः, परितो नाद इति निरूपितम् ॥११॥

उपर्युक्तमतामाह **शरदि**ति.

**शरच्चन्द्रांशुसन्दोहध्वस्तदोषातमःशिवम् ।**
**कृष्णाया हस्ततरलाचितकोमलवालुकम् ॥१२॥**

**शर**त्कालीना ये **चन्द्रांशवः** तेषां ये **सन्दोहाः** समूहाः तैर्**ध्वस्तं दोषाया** रात्र्या**स्तमो** यत्र, तेन अत्यन्तं **शिवं** कल्याणरूपम्. अन्धकारे गतेऽपि यदि भूताद्यभिनिविष्टं भवेत् तथापि तदाप्यसमञ्जसमिति कल्याणरूपता निरूपिता, निर्विघ्नमग्रिमेष्टकार्यसम्पादकत्वज्ञापनाय च– परितश्च निकृष्टाः पदार्थाः

**प्रकाशः**

**शत्रन्तोक्त्या** इति, शत्रन्तप्रयोगे वर्तमानार्थे **विकसदि**ति. **हेत्वन्तराभावादि**ति. सार्धाध्यायलीलाकरणे रात्रिः सार्धप्रहरिका गता भवति. तत्समये विकसितं कुन्दादि इति लीलासमये विकास सूचितम्(तः!). अन्यथा सार्धप्रहररात्रे विकासः कथं वदेत् हेत्वन्तराभावात् ॥११॥]

**लेखः**

**शरदि**त्यत्र, शिवत्वे हेत्वन्तरस्यानुक्तत्वात् समभिव्याहारेण पूर्व-विशेषणमेव हेतुरित्याशयेनाहुः **तेनात्यन्तं शिवमि**ति. अर्धद्वयार्थमुपसंहरन्ति

**योजना**

**शरच्चन्द्रांशुसन्दोहे**त्यस्य विवृतौ **परितश्च निकृष्टाः पदार्था नोपर्यधश्चे**ति, **परितः उपरि अधश्च निकृष्टाः पदार्था** नेत्यन्वयः. सर्वत्रैवोत्कृष्टाः पदार्थाः सन्तीति भावः ॥१२॥

१. सर्वम् इति ब. पाठः.

नोपर्यधश्च. अधस्तस्य पुलिनस्य गुणानाह **कृष्णेति**. सापि भगवत्सनाम्नी भूसंस्कारं कृतवती भगवद्रमणार्थम्. **कृष्णाया हस्त**रूपाः **तरला**स्तरङ्गाः तैः **आचिताः कोमलवालुका** यत्र. अन्यथा हस्तरूपताभावे समता न स्यात्. तेन शैत्यं कोमलत्वं समता चोक्ता. तादृशं पुलिनं निर्विश्य तत्र गत्वा वा स्थितः. उपवेशनमग्रे वक्ष्यति. भावेनैवोपवेशनम् ॥१२॥

ततो गोपिकानां कृत्यमाह **तद्दर्शनाह्लादेति**.

**तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथान्तं श्रुतयो यथा ययुः ।**
**स्वैरुत्तरीयैः कुचकुङ्कुमाङ्कितैरचीक्लृपन्नासनमात्मबन्धवे ॥१३॥**

शोके गतेऽपि कामस्तापात्मको वर्ततएव, सम्बन्धस्याजातत्वात्. यदा पुनस्तादृशस्थाने तदर्थं गतः तदा **तद्दर्शनेन** तस्य तदवस्थामापन्नस्य दर्शनेन योऽय**माह्लादः** भाव्यर्थनिश्चयात् तेन **विधूताः हृद्रुजो** यासाम्. एवं निवृत्ते दोषे तासां यज्जातं तदाह **मनोरथान्तं ययुरिति**. ताभिर्यथाकथञ्चित् सम्बन्धोऽभिलषितः, जातस्तु ततोऽनन्तगुणसामग्रीसहितः, अतो **मनोरथस्याप्यन्तो** यत्र तादृशं **ययुः**. नन्वनभिलषितं कथं प्राप्नुयुः? तत्राह **श्रुतयो यथेति**. श्रुतयो हि निरन्तरं भगवद्गुणवर्णनपराः. तेन धर्मेण वाचः पूर्वरूपं यन्मनः तस्यापि यदगम्यं भगवत्स्वरूपं तत् प्राप्तवत्यः. "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे"ति भगवदानन्दो मनोरथान्तो भवति, तत्प्रतिपादिकाः

**प्रकाशः**

[**ज्ञापनाय चेति**, ज्ञापनाय च कल्याणरूपता निरूपिता. **सापीति** कृष्णा. **आचिताः** समाः ॥१२॥]

**श्रुतयो यथे**त्यत्र, [**वर्तत एवेति**, स्पर्शसंगमनं जातम् अतः तापो वर्ततएव. **तादृशस्थाने** रमणयोग्यस्थाने. **तदर्थं** रमणार्थम्. **तस्येति**, **तस्य** भगवतः **तदवस्थापन्नस्य** उद्बुद्धरसात्मकस्य. **भाव्यर्थनिश्चयादिति**, भावि अर्थः सुरतं, तस्य निश्चयो जातः; तेन विधूतहृद्रुजो यासाम्. **निवृत्ते दोषे** इति हृद्रुजे. **मनोरथान्तमिति**, स्वल्पं प्रार्थितम् अनन्तगुणं प्राप्तमिति मनोरथान्तम्. **तादृशमिति** सम्बन्धम्.] **तादृशमिति** अवाङ्मनसगोचरम्. ननु श्रुतीनामवाङ्मनसगोचरप्राप्तिर्न प्रसिद्धेति दृष्टान्तसङ्गतिः कथमित्याशङ्क्य तासां तामुपपादयन्ति **श्रुतयो हीत्यादि**. [**भगवत्स्वरूपमिति**, यतो यस्माद् वाचः मनसा सहैव अप्राप्य निवर्तन्त एतादृशम् अगम्यम् अप्राप्यं भगवत्स्वरूपम्. ततएव भगवदानन्दं कथं प्राप्नुयुः? मनोरथान्तं कथं सम्भवति?] **प्राप्तवत्य** इति ज्ञातवत्यः. एवं प्राप्तिं प्रतिज्ञाय तत्र मानमाहुः **यत** इत्यादि. [**तत्प्रतिपादिका** इति ब्रह्मप्रतिपादिका.] ननु प्रतिपादनमात्रेण कथं प्राप्तिनिश्चय इत्याकांक्षायां तदुपपादयन्ति टिप्पण्याम् **अत्रायं भाव** इत्यादिना. [**तत्सम्पत्तौ** भगवत्सम्पत्तौ **साधनत्वं च** इति द्वयम्.] प्रथमांशं निश्चाययन्ति **तत्र स्वेत्यादिना**. [**स्वशक्त्येति** श्रुतीनाम्. **तदनुभवो** ब्रह्मानुभवः. **वाग्रूपत्वादिति**, "निश्वसितमस्य वेदा" इति श्रुतेः.] **एवं कथन** इति वाङ्निवृत्त्युत्तरं विद्वत्त्वकथने. [**वदद्व्याघातश्चेति**, यदेव वदति तस्य व्याघातो इति दोषापत्तिः.] **स्यादिति**, तद्बोधकप्रमाणान्तराभावात्स्यात्. [**तदिति** ब्रह्मस्य-(णः!). **तद्गुणेति**, भगवद्गुणवर्णनेन **तदनुग्रहाद्** भगवदनुग्रहात्.] **मन्तव्यमिति** श्रुतार्थापत्त्या मन्तव्यमित्यर्थः. ननु "यतो वाच" इत्यत्र निषेधमुखेनैव

**लेखः**

**परितश्चेति**; **नेत्य**स्य देहलीदीपन्यायेनोभयत्राप्यन्वयः. **पुलिनं निर्विश्येति** **विभुर्जात** इति पूर्वानुसन्धानेनान्वयः. विभुत्वस्य सार्वदिकत्वादधुना प्राकट्यारुच्या पक्षान्तरमाहुः **तत्रेति**, निर्विश्य स्थित इत्यर्थः. अधुनोपवेशनाकथने हेतुमाहुः **भावेनैवेति**, ताभिर्भावेनासने कृते **सत्युपवेशनं** भवतीति शेषः. अतोऽ**ग्रे वक्ष्यती**त्यन्वयः ॥१२॥

**गोपिकानां कृत्यमिति**, मनोरथान्तप्राप्त्या आसनक्लृप्तिरित्यर्थः. **तद्दर्शनेत्य**त्र. "विधूतशोकाभिरि"त्युक्तत्वा**द्विधूतहृद्रुज** इति पुनरुक्तिर्भवेदित्याशङ्क्याहुः **शोके गतेऽपीति**. अत्र **मनोरथस्यान्तो** यत्र तादृशमानन्दं **ययुः**



**टिप्पणी**

**श्रुतयो यथे**त्यत्र, **श्रुतयो हीत्यारभ्य युक्तिं**[1] **वे**त्यन्तम्. अत्रायं भावः. श्रुतिष्वस्त्यंशद्वयम्— भगवत्स्वरूपानुभूतिः अन्येषां तत्सम्पत्तौ साधनत्वं च. तत्र स्वशक्त्यैव चेत्तदनुभवो जातो भवेत्तदा "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे"ति न वदेयुः. भगवदनुग्रहेणानुभवैकवेद्यत्वाभावे श्रुतीनां वाग्रूपत्वादेवं कथने वदद्व्याघातश्च स्यात्. अतः श्रुतीनां पूर्वं तदप्राप्तिः, सततं तद्गुणवर्णनेन तदनुग्रहात्पश्चादनुभवो भगवदानन्दस्येति तथोक्तिरिति मन्तव्यम्.

१. युक्तिर्वा इति ब. पाठः.

श्रुतयो जाताः. सर्वे च मन्यन्ते— "तं त्वौपनिषदं पुरुषं पृच्छामि", "अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम" इति, "सर्वे वेदा

## टिप्पणी

एतदेवोक्तं **श्रुतयो जाता** इत्यन्तेन ग्रन्थेन. अपरश्च. "तं त्वौपनिषदं पुरुषं पृच्छामी"त्यादिश्रुतिभ्योऽन्येषां भगवज्ज्ञानं श्रुत्यादिभिरेव भवतीति निश्चितम्. तच्च श्रुतीनां वाग्रूपत्वा"द्यतो वाचो निवर्तन्त" इत्यादिश्रुतिभ्योऽसम्भावितम्. एवं सत्युभयविरोधपरिहाराय श्रुत्युक्तभगवद्धर्मश्रवणेन तत्कृत्या च भगवदनुग्रहे भक्तौ जातायां स्वयमेव तदानन्दानुभवयोग्यता [1]भवतीति वाच्यम्. तदेतदुक्तं **सर्वे चे**त्यारभ्य **युक्तिं**[2] **वे**त्यन्तेन ग्रन्थेन. एवं सति प्रकृतेंऽशद्वयबोधनार्थमयं दृष्टान्तः. तेन सार्धाध्यायत्रयेण निरूपितस्नेहेन वशीकृतेन प्रभुणा कृत्वैतासां मनोरथान्तप्राप्तिः. अन्येषामपि कृतपुण्यपुञ्जानामेतदुक्तिश्रवणकीर्तनादिना एतद्भावानुसारेण भजनेन च भगवदानन्दानुभावो[3] भविष्यतीत्युक्तं भवतीति.

## प्रकाशः

प्रतिपादनमभिप्रेतं न विधिमुखेनेति कथं तत्प्राप्त्यवगम इत्यत आहुः सुबोधिन्यां **सर्वे चे**त्यादि. तथा चोक्तश्रुतिस्मृतिभ्यां विधिमुखप्रतिपादनं सर्वैरेवाभियुक्तैरङ्गीक्रियते, तेन तथेत्यर्थः. [**तंत्विति**, **तम् औपनिषदम्** उपनिषत्प्रतिपाद्यं **पुरुषं पृच्छामि** इति वेदप्रतिपाद्यं निश्चितम्.] एतदेव टिप्पण्यां विवृण्वन्ति **अपरश्चे**त्यादिना. [**उभयविरोध** इति, वाग्रूपत्वे सति "यतो वाचो निवर्तन्त" इत्यादि न सम्भवति (इति!) उभयविरोधः. **तत्कृत्या** इति करणेन. **जातायां** सत्याम्.] **श्रुत्युक्तभगवद्धर्मः** सर्वभावेन भजनं, "यो मामेवमसंमूढो जानाति पुरुषोत्तमं स सर्वविद्भजति मां सर्वभावेन भारते"ति गीतास्मृतेः. एवम् **अपरश्चे**त्यादि **वाच्यमि**त्यन्तेन द्वितीयांशो विवृतः. इदमंशद्वयं दार्ष्टान्तिके योजयन्ति **एवं सती**त्यादि **भवती**त्यन्तम्. [**मनोरथान्तप्राप्तिरि**ति, प्रभुणा एतासां मनोरथान्तप्राप्तिः. **कृतपुण्यपुञ्जानां** भक्तानाम्. **कीर्तनादिने**ति **आदि**शब्देन मनननिदिध्यासने. **एतदि**ति व्रजभक्तभावानुसारम्.] नन्वभियुक्ताङ्गीकारमात्रेण श्रुत्यर्थो न निर्णेतुं शक्य इत्यतः सुबोधिन्यामाहुः **सर्वे वेदा** इत्यादि. [**आमनन्ती**ति 'मना'भ्यासे धातुः.

१. योग्या भवन्तीति ब. पाठः. २. युक्तिर्वेति ब. पाठः.
३. °नुभवो इति मू.पा.स्तु ब.पाठानुसारेण संशोधितः.



यत्पदमामनन्ति" इत्यादिवाक्यैः ब्रह्मणि श्रुतयः प्रमाणमित्यध्यवसीयते;

## प्रकाशः

**सर्ववेदान्तप्रत्ययमि**ति सूत्रम्.] तथा च प्रत्यक्षश्रुत्या व्यासवाक्येन च विधिमुखप्रतिपादनमेव निर्णीयत इत्यभियुक्ताङ्गीकारोऽपि तदनुसारित्वात्तथेत्यर्थः. ननु विधिमुखप्रतिपादनस्य पदपदार्थसम्बन्धाधीनत्वाद् ब्रह्मणोऽ-

## लेखः

प्राप्तवत्य इत्यर्थः. **श्रुतयो जाता** इत्यन्तेन भगवत्स्वरूपानुभूतिरूपष्टिप्पण्युक्तः श्रुत्यंशो निरूपितः. द्वितीयांशमाहुः **सर्वे चे**ति, श्रुतिभ्य इति शेषः, **सर्वे** श्रुतिभ्य एव भगवत्स्वरूपं **मन्यन्ते** जानन्तीत्यर्थः. एतस्य द्वितीयांशत्वसूचनाय

## योजना

**तद्दर्शनाह्लादविधूतहृद्रुज** इत्यस्य विवृतौ **तत्प्रतिपादिकाः श्रुतयो जाता** इति **सर्वे च मन्यन्त** इति, वेदैर्ब्रह्म प्रतिपाद्यते इति लोका मन्यन्ते इत्यर्थः. लोका वेदानां ब्रह्मप्रतिपादकत्वं मन्यन्ते तत्र किं मानमित्याकांक्षायां श्रुति-भगवद्गीतावाक्य-श्रुतीरुपन्यस्यन्ति— "तं त्वौपनिषदं पुरुषं पृच्छामि" "अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" "सर्वे वेदाः यत्पदमामनन्ति". "तं त्वौपनिषदमि"त्यत्र प्रश्नकर्त्र्या औपनिषदत्वं ब्रह्मण उच्यते, अत उपदेशात्पूर्वमेव प्रष्टुरेतावज्ज्ञानमस्ति यद् "उपनिषत्प्रतिपाद्यं ब्रह्मे"ति. अतो "वेदप्रतिपाद्यत्वं ब्रह्मणो लोका मन्यन्ते" इति यदुक्तं तत्सत्यमेव. भगवतापि गीतासु "वेदे च प्रथितः पुरुषोत्तम" इत्यनेन वेदप्रतिपाद्यत्वमुक्तम्. **सर्वे वेदाः** पदरूपं पद्यते प्राप्यत इति **पदं** प्राप्यं **यद्** ब्रह्म **आमनन्ति** अभ्यस्यन्तीत्यर्थात् वेदप्रतिपाद्यत्वमुक्तम्. अतो वेदैर्ब्रह्म प्रतिपादितमिति मनोरथान्तप्राप्तिः श्रुतीनाम्. सा च भगवदनुग्रहेणैव, अन्यथा "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे"ति श्रुतेर्मनोवागप्राप्यस्य प्रतिपादनं कथं स्यात्? अतो मनोरथस्यापि यत्र गतिर्नास्ति तादृशं ब्रह्म श्रुतयो निरूपयन्ति. तद्भगवतोऽनुग्रहविशेषसाध्यम्. तथा व्रजसुन्दरीणां मनोरथान्तप्राप्तिः. अत्र भौतिक्य शब्दात्मिकाः श्रुतयो दृष्टान्तरूपाः, आधिदैविक्यो व्रजसुन्दरीसंज्ञकाः श्रुतयो दार्ष्टान्तिकाः. अतो दृष्टान्तदार्ष्टान्तिकभावः श्रुत्योरेव, व्रजवरवधूटीनामपि श्रुतिरूपत्वात्, "न स्त्रियो व्रजसुन्दर्यः पुत्र ताः श्रुतयः किले"ति भृगुं प्रति बृहद्वामनपुराणे ब्रह्मवाक्यात्, "गोप्यो गावरुचस्तस्ये"ति कृष्णोपनिषद्भि-

"सर्ववेदान्तप्रत्ययमि"ति न्यायाच्च. अलौकिको वेदार्थः अलौकिका वेदशब्दाः, लोके च न सङ्केतः, तथापि निरन्तरं भगवत्कार्यं कथयन्तीति लोकाः

**प्रकाशः**

लौकिकत्वेन तत्र पदानां सम्बन्धासम्भवे तद्ग्रहस्याप्यसम्भवात्कथं तथा प्रतिपादनं? कथं वा तन्निश्चायकस्तेषां तादृशो बोधोऽङ्गीकर्तुं शक्य इत्यत आहुः **अलौकिक** इत्यादि. परानपेक्षप्रामाण्ये वेदे जैमिनिनार्थानुपलब्धावप्यव्यतिरेकाच्चोदनांशस्य यथाऽलौकिको धर्मोऽर्थः स्वीकृतः, तथा "हिरण्यपर्णप्रदिवस्ते अर्थमि"त्यादिभिः प्रत्यक्षैर्मन्त्रवर्णैर्यजमानर्त्विजां वेदादेव स्वस्वकार्यावगमप्रत्यक्षाज्ञमदग्नीनां पश्चावत्तमित्याद्यनुमानाच्च व्यासपादैर्मन्त्राद्यंशस्याप्य**लौकिकः** पुरुषावयवरूपो**ऽर्थः** स्वीकृतः; **शब्दाश्च** स्वरादिवैशिष्ट्यादिना स्फुटमे**वालौकिकाः**, अतो **न** तेषां **लोके संकेतः**, **तथापि** जैमिनीयानुसारेणाकृतौ व्यासचरणोक्तपक्षान्तरानुसारेण प्रवाहे वा शब्दसम्बन्धमवधार्य तच्छ्रवणे लोकाः प्रवर्तन्ते. परं वेदशब्दास्तु पूर्वोक्तश्रुत्या **निरन्तरं भगवत्कार्यं कथय-**

**लेखः**

**चकारः**. नन्वेवं सति वागगम्यत्वं स्यादित्यत आहुः **अलौकिक** इति. वेदप्रतिपादितो यज्ञस्तदङ्गभूताः पश्वादयश्च भगवत्तदवयवभूताः, अन्यथा लोकसिद्धानुवादकत्वे अनधिगतार्थगन्तृत्वाभावात् प्रामाण्यं न स्यादित्यर्थः.

**योजना**

गोपिकानां श्रुतिरूपताकथनात्. **अलौकिका वेदशब्दा** इति. वेदे येऽग्निवाय्विन्द्रादिशब्दा दध्यादिशब्दास्ते सर्वे न लौकिकाः. अतएव "वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः तावन्ति हरिनामानि कीर्तितानि न संशयः" इत्यनेन वेदाक्षराणां हरिनामत्वमुक्तम्. यत्र हरिनामत्वेनाक्षराणामलौकिकत्वं तत्र तादृशाक्षरसमुद्भूतशब्दानामलौकिकत्वं (त्वे!) किं वाच्यमित्यर्थः. "निःश्वसितमस्य वेदा" इति श्रुतेर्वेदस्य भगवन्निःश्वासरूपत्वमुक्तम्. वेदाश्च "इषे त्वोर्जे त्वा वायव स्थो" इत्यादिशब्दरूपाः. अतः शब्दानामलौकिकतैव, "वेदो नारायणः साक्षादि"ति वाक्याच्च. **लोके च न संकेत** इति, एतेषां शब्दानामलौकिकत्वादेषां लोके संकेतो नास्ति. लौकिकशब्दसादृश्यं दृष्ट्वा लौकिकसंकेतबलेनार्थकल्पनायां तु वेदार्थो यः कल्प्यते, न स वेदार्थः. अतो वेदानां संकेताभावादर्थज्ञानं दुर्लभमिति कृष्णानुग्रहैकलभ्यो वेदार्थ इति



तच्छ्रवणेन शुद्धान्तःकरणाः स्वयमेवालौकिकविषये सामर्थ्यं मन्यन्ते. श्रुतिश्च तत्प्रतिपादिका भगवदिच्छया, नात्र लौकिकं साधनमपेक्षते युक्तिं वा. तथा

**टिप्पणी**

ननु सर्वथा वागविषयत्वे त्वेवं कथनमपि न सम्भवति, अनेनैव प्रकारेण तथात्वस्य प्राप्तेः. किञ्च. भगवदानन्दानुभवहेतुत्वेन हि गुणवर्णनं श्रुतीनां पूर्वमुक्तं तदप्येवं बाधितं भवेत्. तथा सत्येवं निरूपणमपि बाधितम्, अतो निषेधमुखेनैव वाग्विषयत्वं न विधिमुखेनेत्यस्याः श्रुतेस्तात्पर्यमिति चेत्, तत्राहुः **श्रुतिश्च तत्प्रतिपादिके**त्यादि. प्रतिपादनं हि तद्बोधकवाक्यकथनं,

**प्रकाशः**

**न्तीति तच्छ्रवणेन** तद्बलेन **शुद्धान्तःकरणाः** सन्तो यथौत्पत्तिकमनीषया हर्यश्वादयो नारदीयवाक्कूटार्थमवधारितवन्तः, तथा **स्वयमेव** पूर्वोक्ते**ऽलौकिके विषये** तेषां **सामर्थ्यं मन्यन्त** इति तद्ग्रहे सति सुखेन विधिमुखप्रतिपादनं तथा बोधश्चाङ्गीकर्तुं शक्य इत्यर्थः. शुद्धान्तःकरणैरप्यलौकिकार्थविषयकविधिमुखबोधस्य वाग्रूपवेदशब्दजन्यताया एवाङ्गीकारात् पुनराशंकान्तरं टिप्पण्यामाहुः **नन्वि**त्यादि. **एवं कथनमि**ति निरन्तरं भगवत्कार्यं कथयन्तीति कथनम्. **तथात्वस्ये**ति कार्योक्तिद्वारा भगवत्स्वरूपे वाग्विषयत्वस्य. **एवमि**ति भगव-

**लेखः**

व्युत्पादितं च वैदिकसृष्टेर्भिन्नत्वं "शब्द इति चेन्नातः प्रभवादि"ति सूत्रे. **अलौकिका** इति तामसाहंकारकार्यशब्दरूपा नेत्यर्थः. अतएव नामसृष्टेर्व्यवस्था भिन्नैवोक्ता. तथाच सङ्केतग्रहाभावान्न शब्देन ज्ञानं किन्तु चित्तशुद्ध्या स्वरूपयोग्यता सम्पाद्यते इत्यर्थः. **स्वयमेवे**ति, भगवदनुग्रहादेवास्माकमलौकिकविषयज्ञाने सामर्थ्यं जातमिति मन्यन्त इत्यर्थः. ननु शक्तिग्रहाभावे तदुक्तधर्मज्ञानमपि कथं भवेदित्यत आहुः **श्रुतिश्चे**ति, भगवदिच्छयैव तद्बोध

**योजना**

भावः. **तथापि निरन्तरमि**त्यारभ्य **मन्यन्त** इत्यन्तं, वेदाः भगवद्यशो गायन्ति, अतो वेद**श्रवणेन शुद्धान्तःकरणाः** पुरुषाः वेदस्य **स्वयमेवालौकिकविषये** भगवत्स्वरूपविषये प्रतिपादनसामर्थ्यं[1] **मन्यन्त** इत्यर्थः. **श्रुतिश्च तत्प्रतिपादिके**त्यारभ्य **युक्तिं वे**त्यन्तस्यार्थष्टिप्पण्यां स्फुटः.

१. प्रतिपादनम् इति मुद्रितः पाठः मांड.पाठमनुसृत्य संशोधितः.

## टिप्पणी

बोधश्च न शक्तिग्रहं विना. लोके तद्वाचकशब्दाप्रसिद्ध्या सोऽपि न सम्भवति, अतस्तदर्थबोधो भगवदिच्छयैवेत्यर्थः. अतएव भगवतोक्त"मतोस्मि लोके वेदे च प्रथित" इति. मुक्त्युच्छेदाभावाय तथेच्छा. यदप्युक्तं "सर्वथा वागविषयत्वे"त्यादि, तत्राप्युच्यते– जीवानां सर्वपुरुषार्थसिद्ध्यर्थं हि

## प्रकाशः

त्स्वरूपस्य सर्वथा वाङ्मनसागोचरत्वे. **एवं निरूपणमि**ति दृष्टान्ते मनोरथान्तप्राप्तिनिरूपणम्. **तात्पर्यमि**ति, न तु पूर्वं सर्वथा वागविषयस्यानन्तरमिच्छया वाग्विषयत्वे. तथा च प्राप्तिमात्रे दृष्टान्त इति व्याख्याय विरन्तव्यम्, न तु मनोरथान्तप्राप्तिं कथञ्चित्प्रकल्प्य तत्र दृष्टान्त इत्यत्र यतनीयमित्यर्थः. समाधानं व्याकुर्वन्ति **प्रतिपादनमि**त्यादि. **बोध** इति वाक्यार्थबोधः. अयमर्थः. सर्वेषां मते वाक्यार्थबोधे पदजन्यपदार्थोपस्थितेस्तन्त्रत्वात्तस्याश्च पदशक्तिग्रहाधीनत्वात्तस्य च "शक्तिग्रहं व्याकरणे"तिश्लोकोक्तवाग्विशेषादिरूपकारणाधीनत्वात्तेषां च लोकवर्तिवाचकशब्दसापेक्षत्वादुक्तश्रुत्या वागादिनिवृत्तिकथनेन भगवत्स्वरूपवाचकशब्दाप्रसिद्धौ सिद्धायां तद्विषयकः शक्तिग्रहो न सम्भवतीति तन्मूलकस्तादृशस्वरूपप्रतिपादकवाक्यार्थबोधोऽपि लौकिकसाधनयुक्त्योरभावान्न सम्भवति. तथापि तस्य यो विधिमुखो बोधः स केवलं भगवदिच्छयैवेति. ननु स जायत इत्यत्र किं मानमत आहुः **अत एवे**त्यादि. अत्र हि क्षरातीतत्वकथनेन क्षरांशशक्तशब्दरूपाणां वाचां तादृशमनसश्चागोचरत्वं स्वस्य बोधितम्, अक्षरादुत्तमत्वकथनेन "अथ परा यया तदक्षरमधिगम्यते यत्तददृश्यमग्राह्यमि"त्यादिश्रुत्युक्त-परविद्यारूपवाचां तत्पूर्वरूपमनसश्चागोचरत्वं बोधितम्. तत एताभ्यामेव हेतुभ्यां स्वस्य पुरुषोत्तमत्वेन प्रथितत्वमुक्तं, तच्च तदगोचरत्वेन बाधितं सत् तदतीतत्व-तदुत्तमत्वाभ्यां पुरुषोत्तमत्वेन प्रथितत्वस्येच्छयैव लोकवेदगोचरत्वं बोधयतीति श्रुतार्थापत्तिरेव मानमित्यर्थः. तादृशेच्छायां प्रयोजनमाहुः **मुक्ती**त्यादि, "मोक्षमिच्छेज्जनार्दनादि"तिवाक्यान्मोक्षो भगवतएव. स च "तमेवं विद्वानि"त्यादिश्रुतेर्ज्ञानादेव. यदीच्छा न स्यात्तदा साधनान्तराभावेन ज्ञानाभावे मुक्त्युच्छेदएव स्यादतस्तदभावाय तथेत्यर्थः. ननु "शब्दोऽपि बोधकनिषेधतयात्ममूलमर्थोक्तमाह यदृते न निषेधसिद्धिरि"त्येकादशस्कन्धेऽपि निषेधमुखेनैव वाग्विषयत्वस्यादृतत्वा-



## टिप्पणी

भगवान् वेदमाविश्चकार. तत्र येन रूपेण साधनात्मकेन यः पुरुषार्थो यादृशाधिकारिणः सिध्यति, तद्रूपं तं पुरुषार्थं तमधिकारिणं च श्रुतिर्निरूपितवती मोक्षपर्यन्तम्. एवं करणे संतुष्टो भगवान् यद्रूपं प्रकटीकृत्य यमानन्दं दत्तवान्, तद्रूपं स आनन्दश्च पूर्वं न ज्ञातौ, अधुनापि मनोवागविषय इत्येतादृशमपि फलात्मकं वस्त्वस्तीति ज्ञापनाय चाहुः "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने"ति. अत्र पूर्वार्धमानन्दस्य विशेषणम्. तथा चैतस्मात्पूर्वं "रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवती"त्यादिना यद् भगवत्स्वरूपं निरूपितं तत्सर्वात्मभावैकलभ्यं न त्वन्यथेति ज्ञापयितुं सर्वात्मभावस्य निर्वचनमशक्यमिति तद्व्यञ्जकं धर्ममाहोत्तरार्धेन– एतादृश**मानन्दं** यो **विद्वान्** ज्ञातवान् वा स **कुतश्चन** लोकाद्वेदात्, किं बहुना परीक्षार्थं साक्षाद् भगवदुक्तोल्लङ्घनान्मानादिदशायां तदतिक्रमादपि **न बिभेती**त्यर्थः. मोक्षसाधनस्य स्वकृतिसाध्यत्वेन तत्र श्रवणादीनि साधनान्युक्तानि, अत्र तु भगवदनुग्रहैकलभ्यत्वेन स्वकृत्य-

## प्रकाशः

त्तदुपगमे को दोष इत्याकांक्षायामाहुः **यदपी**त्यादि. **येन रूपेणे**ति साधनात्मकेन. **निरूपितवती**ति, यथा वीणावादकस्येच्छादिना तत्तदर्थकशब्दाविर्भावो वीणातः तथा भगवदिच्छानुसारेण निरूपितवतीत्यर्थः. **एवं करणे संतुष्ट** इत्यादि **दत्तवानि**त्यन्तम्. यथा वैणिकेच्छानुरूपशब्दाविर्भावे वीणोपरि संतुष्टः स तां विविधविधाभिर्गोपायति, तथा श्रुतिभ्यो रूपं प्रकटीकृत्यानन्दं दत्तवानित्यर्थः. **एतस्मादि**ति फलरूपवस्त्वनुभवात्. शेषं स्फुटम्. तथा च निषेधमुखेन वाग्विषयत्वोपगमे स्वरूपबोधकस्य पदस्य सम्बन्धषष्ठीपक्षे ब्रह्मणः षष्ठ्याश्च विरोधएव दोष इत्यर्थः. न चैकादशीयवाक्यविरोधः, तत्रापि "यर्ह्यब्जनाभचरणे"त्यग्रिमे "साक्षाद्यथाऽमलदृशोः सवितृप्रकाश" इतिदृष्टान्तेनात्माविर्भाव एवात्मप्रकाशस्य बोधनादत्रोक्तस्यैव प्रकारस्य सिद्ध्या सर्वथा वागाद्यविषयत्वएव तात्पर्येण निषेधबोधे तात्पर्याभावात्. उक्तरीत्यादरे ""को अद्धा वेदे"ति, "वेदा अवेदा" इत्यादीनां "नायमात्मे"त्यादीनां स्वारसिकसङ्गतिसिद्धेश्चेति. तस्मान्मूले मनोरथान्तप्राप्तिपर्यन्तो दृष्टान्तः, न तु प्राप्तिमात्र इति सुबोधिन्युक्तं सर्वं निःसन्देहमेवेत्यर्थः ॥१३॥

एतासामपि मनोरथान्तप्राप्तिः. एवं परमपुरुषार्थदातुर्भगवतोऽन्यत्राभिनिवेशे आधारधर्मसम्बन्धात् स्वस्य कृतार्थता न भविष्यतीति पूजार्थमात्मनिवेदनार्थं च आसनं चक्रुरित्याह **स्वैरुत्तरीयैरि**ति. तद्देशस्थानां स्त्रीवस्त्राणि त्रीणि भवन्ति— परिधानीयं कुचपट्टिका उपरिवस्त्रं च. सर्वाभिरेव स्वोपरिवस्त्राणि आसनार्थं दत्तानि. उपरिवस्त्राण्यपि द्विविधानि भवन्ति— सर्वदा परिधेयानि भोगसमये च. तानि सूक्ष्माणि भवन्ति. तान्येव भगवते दत्तानीति ज्ञापयितुमाह **कुचकुङ्कुमाङ्कितैरि**ति. शुष्काण्यपि कुङ्कुमानि क्रीडायामार्द्राणि भवन्ति, अतस्तेनाङ्कितानि उत्तरीयाणि **अचीक्लृपन्** कल्पयामासुः. ननु स्वोपरिपरिधेयं कथमधः कल्पयाञ्चक्रुरित्याशङ्क्याह **आत्मबन्धव** इति, **आत्मनः** सएव **बन्धुः**, रक्षित आत्मा तदर्थमेव— देहः स्वात्मा च, अत उपर्याच्छादनमपि तदर्थमिति तस्यासनक्लृप्तिरुचिता ॥१३॥

---

**टिप्पणी**

साध्यत्वादनुवादएव कृत इति. **स्वैरुत्तरीयैरि**त्यस्याभासे **आधारधर्मसम्बन्धादि**त्यादि. स्वामिन्यो हि सर्वांशे स्वसम्बन्धमेव प्रियस्यापेक्षन्ते, तद्भावस्वाभाव्यात्; प्रभुश्च तदर्थमेवाधुना प्रकट इति न तदन्यस्य तत्सम्बन्धयोग्यतापि. अतएवाग्रे वक्ष्यति "कल्पितासन" इतीति भावः ॥१३॥

**लेखः**

इत्यर्थः. **आत्मबन्धवे** इत्यत्रात्मपदस्यार्थमाहुः **देहः स्वात्मा चे**ति ॥१३॥

**योजना**

**स्वैरुत्तरीयैरि**त्यस्याभासे **आधारधर्मसम्बन्धात् स्वस्य कृतार्थता न भविष्यतीती**ति. यदि भगवते आसनार्थं स्वकीयवस्त्राणि न दद्युः तदा भगवान् स्वसम्बन्धातिरिक्तवस्तुन्युपविशेत्, तदा तावत्यंशे कृतार्थत्वाभावो भवेत्. पुष्टिमार्गे हि कृतात्मनिवेदनानां यस्मिन्क्षणे येन वस्तुना येनेन्द्रियेण वा भगवत्सेवोपयोगो न स्यात्, तस्मिन्नेव क्षणे तस्य वस्तुनस्तदिन्द्रियस्य कृतार्थता नास्तीति सिद्धान्तो निरुद्धानाम्. तथा च निरुद्धानां भक्तानां सर्वत्र सर्वेषु पदार्थेषु भगवत्सम्बन्धोऽभिलषितः; तत्सत्त्वे कृतार्थत्वं तदसत्त्वे ह्यकृतार्थत्वम्. अत आधारसम्बन्धाभावेऽप्यकृतार्थता स्याद्, अतः आसनं ददुरित्यर्थः ॥१३॥



ततो भगवान् तासु सर्वत्र निविष्ट इति ख्यापयितुं तद्दत्तासन उपविष्ट इत्याह **तत्रोपविष्ट** इति.

**तत्रोपविष्टो भगवान् स ईश्वरो योगेश्वरान्तर्हृदि कल्पितासनः ।**
**चकास गोपीपरिषद्गतोऽर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् ॥१४॥**

**भगवानि**ति तेषां कार्यसाधकत्वम्. ननूत्तरीयवस्त्रापगमे सभायां रसाभासो भवेद्, अतः कथमुपविष्ट इति चेत्, तत्राह **स ईश्वर** इति. **सः** पूर्वं प्रार्थितः, **ईश्वरः** सर्वकरणसमर्थः, अतस्तासां दिव्यानि वस्त्राणि सम्पन्नानीति बोधितम्, येषां जलक्रीडायां **न** वाससामार्द्रता. अतः सर्वकरणसमर्थः **तत्रोपविष्टः सः** प्रार्थितः. [1](यद्वा. पूर्वं वरदानसमये वस्त्रेष्वपहृतेषु सर्वथा तदभावे यस्य रसाभासो न जातः तस्य केवलमुत्तरीयाभावे कथमधुनापि स भवेदिति वक्तुं **स** इत्युक्तवान्. ननु तदानीमपि कथं न रसाभास इत्यत आह **ईश्वर** इति. कर्तुं सामर्थ्यवत्त्वात् यदि स भवेत् तदा तथा न कुर्यादिव. अकर्तुं सामर्थ्यवत्त्वेन रसाभासहेतुत्वेऽपि तद्दत्तमासनं त्यक्तुमशक्यमेव. अन्यथाकर्तुं सामर्थ्यवत्त्वेन रसाभासप्रकारेणापि रसमुत्पादयितुं शक्तः. अतस्तादृशे न किञ्चिदनुपपन्नमिति भावः.) ननु भगवान् अपवित्रे

---

**टिप्पणी**

**स ईश्वर** इत्यत्र **येषां जलक्रीडायामि**त्यादि, [2]जलक्रीडानन्तरं येषामार्द्रता न तिष्ठतीत्यर्थः. **योगेश्वरान्तर्हृदी**त्यस्याभासे **अपवित्रे**त्यादि,

**लेखः**

**तत्रोपविष्ट** इत्यस्याभासे, आसनक्लृप्तिकथनेनैवोपवेशनस्य प्राप्तावपि **तत्रोपविष्ट** इत्यनेन पुनस्तत्कथनस्य तात्पर्यमाहुः **तासु सर्वत्रे**ति. वसनद्वारा तत्परिधात्रीषु सर्वासु निविष्ट इत्यर्थः. मूले **तत्रोपविष्टः** सर्वासूपविष्ट इत्यर्थः. व्याख्याने, वसनानामेवं सामर्थ्ये हेतुमाहुः **भगवानितीति**, **तेषां** वसनानां **कार्यसाधकत्वं** स्वद्वारा भगवत्सम्बन्धसम्पादकत्वम् उपवेष्टुर्भगवत्त्वादित्यर्थः. तथा च स्वसमर्पितपदार्थाङ्गीकारे तद्द्वारा भगवत्सम्बन्धः स्वस्यापि भविष्यतीति भावेन भगवते पदार्थाः समर्पणीया इति स्वीयेभ्य उपदेशोऽपि सूचितः. **दिव्यानीति** कामरूपाणि व्रतचर्यायां दत्तानीत्यर्थः. तत्रोक्तं **स्मारयन्ति येषामिति** ॥१४॥

---

१. ( ) चिह्नान्तर्गतं प्रभूणाम्. २. अत्र स्वतन्त्र व्याख्यानं प्रथम परिशिष्टे.

भोगादिलेपयुक्ते कथमुपविष्ट इति चेत्, तत्राह **योगेश्वरान्तर्हृदि कल्पितासन** इति. योगेश्वराणां हृदयं शुद्धं, तत्राप्यन्तर्हृदयम्. तत्रापि कल्पितमेव भगवदासनं न तु क्लृप्तम्. मानसी मूर्तिस्तिष्ठति, न तु कदाचिदपि स्वयमुपविष्ट इति मुख्यमासनमेतदेव. अत**श्चकास** परमशोभां प्राप्तवान् पूर्ववद् **गोपीनां परिषदं गत**श्च जातः. परितो गोपिका उपविष्टा इत्यर्थः. सभापतिर्भगवान् अतस्ताभि**रर्चितः**. ततो भगवान् तासामर्थे **त्रैलोक्ये** यावन्ति **लक्ष्मी**रूपाणि इन्द्रपदादीनि तासां **यदेकं पदं**, यस्यांशविलासाः तत्तल्लक्ष्मीभोक्तारः, तादृशं **वपुर्धृत**वान्. अस्मिन्नर्थे देशकालादिभेदेन यावन्त उत्कृष्टा अर्था अपेक्ष्यन्ते तान् प्रकटितवान् तादृशवपुर्धारणेन ॥१४॥

एवं प्रसन्नं भगवन्तं दृष्ट्वा स्वान्तःकरणदोषदूरीकरणार्थं– स्वकृतघ्नतां पूर्वं भगवति कल्पितवत्य इति तन्निराकरणार्थं लोकदृष्ट्या भगवति कृतघ्नतालक्षणो दोषोऽस्ति न वेति निर्णयार्थं– किञ्चित् प्रष्टुमुद्यता इत्याह **सभाजयित्वे**ति.

**सभाजयित्वा तमनङ्गदीपनं सहासलीलेक्षणविभ्रमद्भ्रुवा ।**
**संस्पर्शनेनाङ्ककृताङ्घ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे ॥१५॥**

प्रश्नार्थं प्रथमतः **सभाजनं** स्तोत्रं कृत्वा. ननु किमनेन विचारेण साम्प्रतं, जातं फलं भुज्यतामिति चेत्, तत्राह **अनङ्गदीपनमि**ति, अनङ्गं दीपयति निरन्तरमेव, अङ्गाभावं सम्पादयतीति च ध्वनिः. अतो नैकेन भोगेन कार्यनिष्पत्तिः, पुनस्तेनापि भोगेनाग्रे अधिकएव खेदः स्यात्. स चेत् स्वदोषेण, तदा दोषो दूरीकर्तव्यः. भगवद्धर्मेण चेत्, वाङ्निर्बन्धं कारयित्वा प्रार्थयित्वा वा फलानुभवः कर्तव्य इति भावः. अनङ्गदीपने साधनमाह **सहासे**ति. साधनाभावार्थं वा प्रार्थनीय इति साधनकीर्तनम्. **हास**पूर्वकं **यल्लीलेक्षणं**, तेन **विभ्रमन्ती** या **भ्रूः**, तया अनङ्गं दीपयति. पञ्चात्र साधनानि– हासो लीला ईक्षणं विलासाः भ्रूश्चेति. पञ्च चेद्धेतवः कार्यमप्रतिहतं भवति. (हासो!) माया व्यामोहिका स्वरूपविस्मारणार्थम्. लीला स्वासक्तिं साधयति. ईक्षणं तत्र ज्ञानजनकम्, अन्यथा ज्ञानान्तरेण तन्निराकरणं स्यात्. विलासाः पोषकाः. भ्रूर्यमः नियन्ता काल इति, यावत्प्रसाददाता वा तत्रैव. ततः प्रश्नार्थम् उपढौकनं कुर्वन्ति **संस्पर्शनेने**ति. **अङ्के कृतः** स्थापितो यो भगव**दङ्घ्रिः**, तत्सम्बन्धिनौ यौ **हस्तौ**, तयोः

---

**टिप्पणी**

लोके वेदे च पवित्रत्वेन यादृशं वस्तु नोपादेयं तादृशमप्येतत्सम्बन्धियोगेश्वरान्तर्हृदयादपि भगवत उपादेयं यत्र, तत्र लोकादिषूपादेयत्वेन प्रसिद्धं यादृशं तादृशस्य एतत्सम्बन्धिनो वस्तुनः का वार्तेति ज्ञापयितुमेवं कथनमिति ज्ञेयम् ॥१४॥

**सभाजयित्वे**त्यस्याभासे **स्वान्तःकरणदोषे**त्यादि, दोषस्यैव विवरणं **स्वकृतघ्नतामि**त्यादिनोच्यते. परोक्षं भजता प्रभुणा तादृशो रसो दत्त इति तदज्ञानं स्वकृतघ्नता. प्रभौ दोषाभावात्तदारोपएव तत्र सम्भवति. स च गृह्यमाणस्य स्मर्यमाणस्य वा वस्तुनः सम्भवति. स्वामिनीनां तु प्रियातिरिक्तधर्मास्फूर्तिनियमेन स्वनिष्ठस्यैव एतस्यायमारोप इति भावः. यद्यप्ययमपि रसमध्यपात्येवेति न दोषत्वं वक्तुमुचितं, तथापि भगवति दोषाभावस्य शास्त्रसिद्धत्वादारोपस्य च भ्रमत्वनियमाच्छास्त्ररीतिमवलम्ब्य तथोक्तम्. अग्रेऽपि **दोष**पदं यत्र तत्रेदमेव तात्पर्यं ज्ञेयम्. **विभ्रमद्भ्रुवे**त्यत्र,



**टिप्पणी**

**भ्रूर्यम** इत्यादि, यमयति नियमयतीति **यमः** कालः. तथा च कालविलम्बेन स भावः कदाचिन्नश्येतेति तदभावाय तस्यैव भावस्य नियमनं सदा स्थितिं तादृशी भ्रूः करोतीति तथा. अथवा. फलस्यैव नियमनमत्राभिप्रेतम्. [1]एतदेवाहुः **यावत्प्रसादे**ति, **तत्रैवा**नङ्गभाव एवाशेषस्वरूपानन्ददाता नान्यत्रेत्यर्थः.

**प्रकाशः**

[ टिप्पण्यां **तत्रैवानंगभाव** इति, अंगराहित्यं सम्पूर्णद्विदलात्मकं स्वरूपानन्ददानम्. सुबोधिन्याम् **उपढौकनं कुर्वन्ती**ति उपायनं कुर्वन्ति; स्पर्श

**लेखः**

**सभाजयित्वे**त्यत्र, **अङ्गाभावमि**ति देहानुसन्धानाभावमित्यर्थः. **अत** इति अनङ्गदीपनत्वादित्यर्थः. **पञ्च चेदि**ति, पञ्चभिः साधितं कार्यम् अप्रतिहतं भवतीति लोकप्रसिद्धिः. **स्वस्वरूपे**ति भक्तस्वरूपेत्यर्थः. **स्वासक्तिमि**ति लीलासक्तिमित्यर्थः. **तत्रे**ति लीलायामित्यर्थः. दृशा सूचने चिकीर्षितलीलाज्ञानं भवतीति भावः. यमः कालः, भ्रुवस्तद्रूपत्वे हेतुमाहुः **नियन्ते**ति, नियन्तृत्वात् कालत्वमित्यर्थः. **उपढौकनमि**ति उपगमनमित्यर्थः. उपगमनस्वरूपमाहुः

---

१. तदेवाहुः इति ब. पाठः.

**सम्यक्स्पर्शनेन** सँल्लालयन्त्य इत्यर्थः. संस्पर्शनेन सहिताः तत आभिमुख्यार्थं **संस्तुत्य.** एवं सर्वभावेन प्रपन्नानपि त्यजतीति भगवति दोषदृष्ट्या **ईषत्कुपिताः,** साधनैर्निवर्तितोऽपि दोषो न सम्यक् निवर्तते यावद् भगवान्न निवर्तयतीति. अतो विवादमिव कुर्वन्त्यो **बभाषिरे** ॥१५॥

---

### टिप्पणी

**ईषत्कुपिता** इत्यत्र **साधनैर्निवर्तित** इत्यत्रापि **दोषपदं** पूर्ववज्ज्ञेयम्. "काचित्कराम्बुजमि"त्यादिनोक्त-स्वकृतकराम्बुजधारणादीनि साधनानि. ननु स्वरूपेणानिवर्तितो दोषो वचनेन कथं निवर्तिष्यते? तस्मात्तस्य दुर्बलत्वात्तदुपपादितमाद्येऽध्याय इति चेद्, अत्रायं भावः— "रसो वै स" इत्यादिश्रुतिभिर्भावात्मको हि भगवान्. स चाधुना दोषात्मको, रसस्वरूपस्यैव तथात्वात्. स्वामिनीभावाविर्भावमूलकारणं वेणुनादात्मकः शब्दः इति निर्दोषपूर्णगुणरूपभावाविर्भावोऽपि वाग्रूपशब्देन भविष्यतीति किमनुपपन्नम्? किञ्च यथा वीक्षणेन यो रसः स न स्पर्शादिना, सम्भाषणेन च यः स नेक्षणादिनेति तत्तद्रसस्वभावः, तथास्मांस्त्यक्त्वा गतः कथमिति भावस्तादृग्वचनैरेवेति शिशिरय निजहृदयम्. आद्येऽध्यायेऽप्येवमेव ज्ञेयम्. अतः सुष्ठूक्तं **साधनैर्निवर्तित**

### प्रकाशः

एव उपढौकनं उपायनम्. **आभिमुख्यार्थं** सन्मुखीकरणार्थम्. टिप्पण्यां **दोषपदमि**ति, भ्रमएव दोषम्(षः!). **भावात्मको** इति, स्थाई(यि!)भावो रसः स्मृतः. **वाग्रूपशब्देन** इति, स्वामिनीषु भावाविर्भावमूलं कारणं नादं शब्दात्मकम् अतो शब्देनैव. **नेक्षणादिने**ति, परस्परेन्द्रियादिद्वारे भिन्नरसत्वात्. **निजहृदयमि**ति, वचनेनैव हृदयं शिशिरयति. **प्रभुविषयकस्योद्देशे** इति,

### लेखः

**संलालयन्त्य** इति. **तत्सम्बन्धिनौ यौ हस्ताविति,** भगवान् स्वामिन्यङ्ककृतस्वचरणे हस्तौ स्थापयित्वा स्थित इति स्वच्छन्दस्थित्यनुकरणम्. **तत** इति, अत्रायं क्रमः— पूर्वं सभाजनरूपं स्तोत्रं सम्यक्तमागतमित्यादिरूपं, ततोऽङ्घ्रिहस्तसंस्पर्शनं, तत आभिमुख्यार्थं स्तुतिः 'हे स्वामिन्नि'त्यादिरूपेति. **साधनैरि**ति, कराम्बुजधारणादीनि साधनानि इति टिप्पण्यामुक्तं तथा च कृत्येत्यर्थः. **भगवानि**ति. वाचेति शेषः ॥१५॥



तासां प्रश्नमाह **भजत** इति.

**॥ श्रीगोप्य ऊचुः ॥**

**भजतोऽनुभजन्त्येक एक एतद्विपर्ययम् ।**
**नोभयांश्च भजन्त्यन्ये एतन्नो ब्रूहि साधु भोः ॥१६॥**

त्रयः पक्षाः सन्दिग्धाः— फलतः स्वरूपतश्च भजनाभजनाभ्याम्. तत्रैके ये यथा भजन्ति ते तथा तानपि भजन्ति. एके पुनरभजतोऽपि भजन्ति.

---

### टिप्पणी

इत्यादि. ननु भजनाभजननिर्णयस्य प्रभुविषयकस्योद्देश्ये[१] सति साधारण्येन प्रश्ने को हेतुरिति चेद्, उच्यते— भगवद्विषयकप्रश्नस्यैवाद्धा क्रियमाणत्वे[२] "वयमेतादृश्यो भक्तास्त्वमेतादृशीरस्मान्कथं त्यजसि?" इति हि प्रश्नः स्यात्. स च नायिकोत्तमानां स्त्रीरत्नानामग्रे भगवता स्तुत्यानां स्वामिनीनां मुखाम्बुजान्न निःसर्तुमर्हति किन्तु ग्राम्याणां रसाभासयुक्तानामेव स्यात्. न हि विकचशारदसरोरुहात् तिन्तिणीरसस्पन्दः सम्भवति. अतो व्याजेन प्रश्ने भावगोपनेन महान् रस इति मुख्यरसस्वाभाव्यादेव तथोक्तिरिति बुध्यस्व. भगवांस्तु जीवेभ्यः स्वस्य वैलक्षण्यं वक्तुं तत्स्वरूपज्ञानं विना ततो वैलक्षण्यं ज्ञातं न भविष्यतीति तत्स्वरूपमुक्त्वा स्वस्वरूपमुक्तवान्. अन्यथा स्वामिनीतात्पर्यविषयः स्वयमेवेति तान्न निरूपयेत् ॥१५॥

### प्रकाशः

अन्योक्तरीत्या प्रभुविषये उद्देशे. **तत्स्वरूपज्ञानमिति, तदिति** भजनम्. **तान्** इति भजनाभजनवाक्यान् ॥१५॥ ]

### योजना

**भजतोनुभजन्त्येक** इत्यस्य विवरणे **त्रयः पक्षाः सन्दिग्धाः फलतः स्वरूपतः भजनाभजनाभ्यामि**ति. तत्र भजनकर्तॄन् भजन्तीत्येकः पक्षः. तदाहुः **तत्रैके ये यथा भजन्ति ते तथा तानपि भजन्ती**ति. द्वितीयं पक्षमाहुः **एके पुनरभजतोऽपि भजन्तीति एक एतद्विपर्ययमि**ति मूले पठितस्यार्थ

---

१. उद्देशे इति ब. पाठः. २. क्रियमाणे इति मू.पा.स्तु ब.पाठानुसारेण संशोधितः.

**प्रकीर्णदीपिका**

"**भजतोनुभजन्ति**" (श्लो. १६-२२) इत्यत्र **प्रकीर्णदीपिका. फलतः स्वरूपतः च**[सुबो.] इति. त्रयाणां मध्ये उभयोः किं फलं पूर्वस्य कीदृशं स्वरूपं च इति अर्थः. **भजनाभजनाभ्याम्**[सुबो.]इत्यस्य

अन्ये तु उभयानपि न भजन्ति. तेषां त्रयाणाम् उभयोरपि प्रतियोगिनोः

## टिप्पणी

**भजतोऽनुभजन्त्येक** इत्यत्र **तेषां त्रयाणामि**त्यादि. भजनानुसारेण भजनकर्ता प्रथमः, अभजतो भजनकर्ता द्वितीयः, उभयाभजनकर्ता तृतीयः. द्वितीयो यमभजन्तं भजते स एकः प्रतियोगी, तृतीयो यं भजन्तं न भजते स द्वितीयः प्रतियोगीति ज्ञेयम् ॥१६॥

## प्रकाशः

**भजत** इत्यत्र **उभयोरि**त्यादि, टिप्पण्यां विवृतयोरभजद्भजनकर्तृभजदभजनकर्त्रोः फलविषयः सन्देहो निवारणीय इत्यर्थः. तेन स्वरूपविषयस्तु

## योजना

उक्तः. एवं भजने प्रकारद्वयं, तृतीयमभजनपक्षमाहुः **अन्ये तूभयानपि न भजन्ती**ति. **उभयानपी**ति भजतः अभजतश्चेत्यर्थः. एवं भजनाभजनाभ्यां त्रयः पक्षाः भवन्ति. **उभयोरपि प्रतियोगिनोरि**ति. **एक एतद्विपर्ययमि**त्यनेनोक्तस्य अभजद्भजनकर्तुः अभजनकर्ता प्रतियोगी एकः, **नोभयांश्च भजन्त्यन्ये** इत्यनेनोक्तस्य भजदभजनकर्तुः भजनकर्ता प्रतियोगी द्वितीयः. तस्य भजनस्यावश्यं फलं वाच्यम्. **ये भजनानुसारेण भजन्ति ते किं कृतघ्ना** इति. भजनरूपोपकारममत्वा भजनस्य फलं दातुमवाञ्छन्तो भजनमेव कुर्वन्ति, नतु प्रत्युपकारम्, अतः कृतघ्नत्वं सम्भाव्यते, प्रत्युपकारसामर्थ्यस्य विद्यमानत्वात्. **आहोस्विद्धूर्ता** इति. अयं अस्मान् भजति धनाप्तये, एतस्मै धनं तु न देयम्, एतस्यापि भजनमस्माभिः कर्तव्यमिति बुद्ध्या भजन्ते तत्र धूर्तत्वं सम्भवति, धनार्थिने तदर्थमेव भजनं कुर्वते धने विद्यमानेऽपि धनादानात्. द्वितीयपक्षे अभजद्भजनरूपे क्वचिद्दोषमाहुः **अभजतो भजन** इत्यादिना ॥१६॥

## प्रकीर्णदीपिका

अर्थः श्लोकस्य व्याख्यानान्ते **भजतः पुरुषान्**[सुबो.] इत्यारभ्य **एव**[सुबो.] इत्यन्तेन उक्तो ज्ञेयः. **तेषां त्रयाणाम्**[सुबो.] इति, त्रयाणां मध्ये इति शेषः. **उभयोरपि प्रतियोगिनोः**[सुबो.] इत्यस्य अर्थः टिप्पण्यां **द्वितीयोऽयम्**[टिप्प.] इत्यादिना उक्तः, तदनुसारेण श्रीपुरुषोत्तमानां प्रकाशे **अभजद्**[प्रका.] इत्यादिना उक्तएव ज्ञेयो, न अन्यत्प्रकारेण विचारणीयः. प्रथमप्रश्नस्य फलविषयकः सन्देहो न उक्तः.



फलं वक्तव्यं– ये भजनानुसारेण भजन्ति ते किं कृतघ्नाः आहोस्विद् धूर्ताः आहोस्वित् समीचीना इति. केनचित् पादप्रक्षालनं कृतं, सोऽपि चेत् करोति, तदा किं स्यात्. फलार्थकरणे फलं देयम्. तेनापि तदेव कर्तव्यमिति करणे तदेव कर्तव्यम्. निरपेक्षकरणे तु सन्देहएव– अभजतो भजने क्वचिद्दोषः स्यात्

## प्रकाशः

सर्वेषां वारणीय इति फलति. तदाहुः **य** इत्यादि. **किं कृतघ्ना** इति, भजनानुसारिभजनोत्तरं [1]पूर्वभजनस्यानुपकारत्वादिकं स्वकृतस्य तत आधिक्यं चानुसन्दधानाः पूर्वकृतं निकर्षन्ति न मन्वत इति तादृशा इत्यर्थः. **धूर्ता** इति, पूर्वकृतावुपकारत्वानुसन्धानेऽपि स्वकृतौ तत्साम्यमनुसन्दधानाः[2] पूर्वकृतं नोत्कर्षन्ति वञ्चयन्तीति तादृशा इत्यर्थः. समीचीनत्वं व्युत्पादयन्ति **केनचिदि**त्यादि. **किं स्यादि**त्यस्यैव विवरणं **फलार्थे**त्यादि. **निरपेक्षे**त्यादि, पूर्वेण [3]तथाकरणे उत्तरेण प्रत्युपकारस्य निश्चेतुमशक्यत्वात्संदेह इत्यर्थः. तथा च फलदाने तत्करणे सन्दिहानत्वेन[4] स्वस्मिंस्तद्द्वाराङ्गीकारे च समीचीना[5] इत्यर्थः. सन्देहबीजं तु लोके त्रिविधानां दर्शनमेव. एवं प्रथमपक्षे स्वरूपसन्देहो विवृतः. द्वितीये फलसन्देहं विवृण्वन्ति **अभजत** इत्यादि. दोषोदाहरणं भागवतीयं तार्तीयं कश्यपादित्युपाख्यानम्. उपकारोदाहरणं

## लेखः

**भजत** इत्यत्र, **कृतघ्ना** इति, तत्कृतं भजनं घ्नन्ति स्वभजनरूपप्रत्युपकारेण मुख्यफलासम्पादकं कुर्वन्तीत्यर्थः. अयमेव पक्षोऽग्रे निर्धारणीयः.

१. पूर्वकृत. २. स्वकृतिसदृशमेव, न त्वधिकम्. ३. निरपेक्षभजनकरणे **उत्तरेण** पुरुषेण.
४. कोटिज्ञानं सन्देहः. अयं प्रत्युपकारः कर्तव्यो वाऽयं प्रत्युपकारः इति सन्देहः. कस्य कस्याधुना कामभावः. आग्रहेण कृतं चेत् दुःखदम्.
५. भजनानुसारेण भजन्ति ते त्रिविधाः समीचीनान्ताः ज्ञेयाः.

## प्रकीर्णदीपिका

तदभिप्रायः **यो भजनकर्ता**[लेख.] इत्यादिना उक्तो द्रष्टव्यः. **तेनापि तदेव कर्तव्यम् इति करणे**[सुबो.] इति, "यथा अहम् अस्य पादप्रक्षालनं करोमि तथा तेनापि मम पादप्रक्षालनं कर्तव्यम्" इति भावेन करणे इति अर्थः. **तदेव कर्तव्यम्**[सुबो.] इति, तस्यापि पादप्रक्षालनमेव किं कर्तव्यम् इति अर्थः. **तथाकरणे**[प्रका.] इति निरपेक्षभजनकरणे इति अर्थः. **द्वितीयः प्रतियोगी**[टिप्प.]

यथा निष्कामे कामिनी, क्वचिदुपकारो अपेक्षितश्चेदर्थः, क्वचित् स्नेहः क्वचिद्धर्म इति; एकं फलं निर्धारितं वक्तव्यम्. यो वा न भजति पूर्वः तस्य वा किं फलमिति? ये वा नोभयविधान् भजन्ति तेषामुभयविधानां वा किं

---

### प्रकाशः

पाञ्चमिकमाग्नीध्रोपाख्यानम्[१]. स्नेहोदाहरणं नावमिकमुर्वश्युपाख्यानम्. धर्मोदाहरणं [२]भारतीयं सुदर्शनोपाख्यानं पाद्मे वैशाखमाहात्म्ये चित्रोपाख्यानं च. एवं नानाफलस्मरणात् द्वितीयप्रतियोगिफलविषयकः सन्देहो विवृतः. स्वरूपसन्देहोऽत्रानुषङ्गिको बोध्यः. अनुयोगिविषयकमाहुः **यो वे**त्यादि. अर्जुन उर्वशीशापस्य, नारदे जराशापस्य, मार्कण्डेये वरूथिनीप्रत्याचक्षाणे ब्राह्मणे धर्मवृद्धेश्च दर्शनेन सन्देहोऽत्र बोध्यः. अत्रापि कृतनिन्दनाद्यैः पुनर्भजनापेक्षातदनपेक्षाभ्यां च कृत्वा कृतघ्नत्व-धूर्तत्व-समीचीनत्वैः स्वरूपसन्देहो बोध्यः. तृतीये सन्देहमाहुः **ये वे**त्यादि. **तेषामि**ति भजदभजदभजनकृतामुदासीनानाम्. **उभयविधानामि**ति उक्तोदासीनभजनकर्तॄणां तदभजनकर्तॄणां चेत्यर्थः. अत्रापि

### लेखः

**यथे**ति, **निःकामे** पुरुषे **कामिनी** चेद्भजते इति शेषः, तदा **दोषः** कामिन्याः **स्यादि**ति पूर्वेणान्वयः. **अपेक्षितश्चेदि**ति, भजनकर्तुरर्थापेक्षायामर्थः फलं भवतीत्यर्थः. **ये वा नोभयविधानि**ति, भजनकर्तुः प्रतियोगी यो भजनकर्ता तस्य फलं द्वितीयकृतं भजनं स्पष्टमेवेति तदत्र नोक्तम् ॥१६॥

---

१. ब्रह्मप्रेरिताः गताः न तु स्वमनीषया.
२. भारते उत्तरो भजति पूर्वो न भजतीत्यर्थः सुबोधिन्याम्.

### प्रकीर्णदीपिका

इति टिप्पण्यां, द्वितीयो यम् अभजन्तं भजते स एकः प्रतियोगीति द्वितीयो अभजद्भजनकर्ता प्रथमप्रतियोगी इति ज्ञेयः. **आनुषङ्गिकः**[प्रका.] इति, **फलतः स्वरूपतः च**[सुबो.] इत्यत्र उक्तः स्वरूपसन्देहो बोध्यः. **यो वा न भजति पूर्वः**[सुबो.] इति, द्वौ अत्र अभजनकर्तारौ, तन्मध्ये **पूर्वः** यो भजतः करुणान् न भजति तस्य वा किं फलम् इति अर्थः. **अर्जुने उर्वशीशापस्य**[प्रका.] इत्यारभ्य **बोध्यः**[प्रका.] इत्यन्तेन भजदभजनकर्तुः फलसन्देहे उदाहरणानि उक्त्वा पुनरपि **अत्रापि**[प्रका.] इत्यारभ्य बोध्यः[प्रका.] इत्यन्तेन तस्यैव स्वरूपसन्देहे तान्येव उदाहरणानि उक्तानि. तत्र **कृतनिन्दन...**[प्रका.] इति, उर्वश्या अर्जुनस्य निन्दनं कृतं तेन कृत्वा अर्जुनस्य कृतघ्नत्वं



फलमिति? कृतस्य साधनस्य कुत्र वा उपयोगः– **एतत्** सर्वं **ब्रूहि साधु** यथा भवति तथा. **भो** इति सम्बोधनं सावधानार्थम्. **भजतः** पुरुषा**ननु** तदनुसारेण **भजन्ति** एके पुनः भजनव्यतिरेकेणैव भजन्ति– इत्युभये भजनकर्तारः. **अन्ये** तु भजनरहिताएव ॥१६॥

---

### प्रकाशः

सूर्यस्य किमुदासीनस्य यत् फलं तद्, उत कृतघ्नादेर्यत्तत्? तथोत्तरस्य किं धर्मात्मनां यत् तद्, उत मूर्खाणां यत् तत्? एवं तृतीयस्य किमुदासीनस्य यत्तद्, उत धूर्तस्य यत्तद्वेति. अत्रापि पूर्ववत्स्वरूपसन्देहोऽपि बोध्यः. साधनविषयकमाहुः **कृतस्ये**त्यादि. **कुत्रे**ति अपूर्वजनने स्नेहे लौकिकप्रशंसायां वेत्यर्थः ॥१६॥

---

### प्रकीर्णदीपिका

लक्ष्यते. तथैव जरयापि पुनः भजनापेक्षा कृता परं नारदेन तस्याः भजनं न कृतं, तेन कृत्वा नारदस्य धूर्तत्वं लक्ष्यते. तदेव उक्तं नारदेन "भयोपदिष्टमासाद्य वव्रे नाम्नाभयं पतिम्" इति. तथा वरूथिन्यातु मार्कण्डेयं जितेन्द्रियं ज्ञात्वा तदनपेक्षणं कृतं, तेन मार्कण्डेयस्य समीचीनत्वं लक्ष्यते. **तृतीये**[प्रका.] इति, तृतीयप्रश्ने इति अर्थः. **उदासीनानाम्**[प्रका.] इति, आत्मारामपूर्णकामानाम् इति अर्थः. अत्रापि उदासीनादीनां फलकथने उदाहरणानि आहुः **अत्रापि**[प्रका.] इत्यादिना. तत्र **सूर्यस्य**[प्रका.] इति, सूर्यस्य उदासीनस्य यत् फलं भवति तद् आत्मारामाणां पूर्णकामानां फलं भवति किम्? अथवा कृतघ्नादीनां यद् भवति तद् भवति किम्? एवम् आत्मारामपूर्णकामानां फलसन्देहे उदाहरणानि उक्त्वा तद्भजनकर्तॄणाम् अभजनकर्तॄणां च आहुः **तथा**[प्रका.] इत्यादिना. **उत्तरस्य**[प्रका.] इति, आत्मारामपूर्णकामानां भजनकर्तॄणाम् अभजनकर्तॄणां च. तदेव उक्तम् **उभयविधानां किं फलम्**[सुबो.] इति, तत्र भजनकर्तॄणां धर्मात्मनां यत् तदुक्तं तद् ज्ञेयम्. अभजनकर्तॄणां मूर्खाणां यद् उक्तं तद् ज्ञेयम्. मूर्खत्वन्तु आत्मारामादीनाम् अभजनकरणाद् ज्ञेयम्. एवं **तृतीयस्य**[प्रका.] इति, तृतीयप्रश्नविषयस्य अकृतज्ञस्य गुरुद्रोहिणः च इति अर्थः. **साधनविषयकम्**[प्रका.] इति, अभजतां भजनकर्तुः साधनविषयकम् इति अर्थः ॥१६॥

एतेषां भेदान् फलं चाह भगवान् **मिथो भजन्तीति** त्रिभिः.

**॥ श्रीभगवानुवाच ॥**

**मिथो भजन्ति ये सख्यः स्वार्थैकान्तोद्यमा हि ते ।**
**न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा ॥१७॥**

तत्राद्यपक्षस्य निर्धारमाह– **ये मिथो भजन्ति ते स्वार्थैकान्तोद्यमाः स्वार्थ**एव **एकान्तः** एकं फल**मुद्यम**स्य[१], ते हि ज्ञात्वैवान्योन्यं भजन्ते तरतमभावेन च भजनमनुवर्तयन्ति. अतो न तेष्वन्योन्यं वञ्चनापि सम्भवति. अतः **स्वार्थमे**व लौकिकार्थमेव तेषा**मुद्यमः**. ननु उभये ब्राह्मणाः

**प्रकाशः**

**मिथ** इत्यत्र. स्वार्थैकान्तोद्यमत्वमुपपादयन्ति **ते ही**त्यादि, **मिथः**शब्द-बोधितायामन्योन्यतायां यौगपद्यस्याशक्यत्वात्पूर्वापरभाव आवश्यकः. तत्रोत्तरेण क्रियमाणे भजने पूर्वकृतभजनतुल्यता-दर्शनेनोत्तरस्य तदनुरूपं ज्ञानमनुमीयते. तदुत्तरं पूर्वेण पुनस्तथा तदकरणात् पूर्वस्यापि तादृशं ज्ञानमनुमीयते. असकृत्कृतौ तूभयोस्तथा ज्ञानं सुस्पष्टानुमानम्. एवं तरतमभावानुवृत्त्या तयोः स्वार्थपरत्वमपि सुस्पष्टानुमानम्, अन्यथा तथा नानुवर्तयेयुः. अनुवृत्त्या काकतालीयता निवारिता. एवञ्च पौनःपुन्ये कृतावाधिक्यानुसन्धानबाधा-त्कृतघ्नता वञ्चनासम्भवाद्धूर्तता च निवारिता. एवं दोषकोटिव्यावृत्तौ उपकार-स्नेह-धर्मान्यतमसम्भवेन समीचीनता सम्भवति. तत्रोपकारस्य तुल्यतायामुपक्षीणत्वान्न समीचीनतानिर्वाहकत्वमित्यन्याभ्यां समीचीनत्वं **नन्वि**त्यादिनाशंक्य परिहारं व्युत्पादयन्ति **क्षणेनैवे**त्यादि. उदाहरणं तु

**योजना**

**मिथो भजन्ती**त्यस्य विवरणे **स्वार्थएव एकान्तः एकं फलमुद्यमो यस्येति**. स्वार्थ एकान्तो यस्येति बहुव्रीहिं कृत्वा स्वार्थैकान्त उद्यमो यस्येति पुनर्बहुव्रीहिः. तथा च स्वार्थएव एकान्तः फलं यस्य तादृश उद्यमो यस्येति

१. उद्यमो यस्येति पाठ.

**प्रकीर्णदीपिका**

**मिथो**[भाग.] इत्यत्र, **क्रियमाण...**[प्रका.] इति, पूर्वस्य उत्तरेण भजने क्रियमाणे इति अर्थः. **अनुमीयते**[प्रका.] इति, पूर्वेण अनुमीयते इति अर्थः. **अनुमीयते**[प्रका.] इति, उत्तरेण अनुमीयते इति



अतोऽन्योन्यभजनेन धर्मः स्नेहो वा भवेत्, कथं स्वार्थ एवेत्याशङ्क्याह **न तत्र सौहृदमि**ति, क्षणेनैव द्वितीयस्याभजनं ज्ञात्वा क्रोधकरणात्. अतो न सौहार्दम्. **नापि धर्मः**, "सम्भोजनी नाम पिशाचभिक्षा नैषा पितॄन् गच्छति नोत देवान् इहैव सा चरति क्षीणपुण्या शालान्तरे गौरिव नष्टवत्से"ति. गुरुसेवायामपि यदि दृष्टार्थतोभयोः तदापि न धर्मः. शास्त्रानुसारी चेत्,

**प्रकाशः**

गजेन्द्रमोक्ष अगस्त्यक्रोधः. ननु धर्मत्वे किं बाधकमत आहुः **नापी**त्यादि. तथा चोक्तवाक्यसूचितमन्योन्यभजनं न धर्मो, अन्योन्यभजनत्वात्, पिशाचभिक्षावदित्यनुमानमेव बाधकमित्यर्थः. ननु "यत्र- यत्रान्योन्यभजनत्वं न तत्र धर्मत्वमि"ति व्याप्तिर्गुरुसेवायां व्यभिचरतीत्यसदनुमानत्वान्नास्य बाधकतेत्याशङ्कायां दृष्टार्थायां तस्यामपि न धर्मत्वमित्याहुः **गुरुसेवायामि**त्यादि. **दृष्टार्थते**ति वृत्तिप्रतिष्ठाद्यर्थता. तथा च तत्र शास्त्रप्रयुक्त्यभावेन तादृश-गुरुसेवायां धर्मत्वस्याशक्यवचनत्वान्मिथो भजनं धर्मः, मिथो भजनत्वात्, गुरुसेवावदित्यत्र तादृशी सा न धर्मः, दृष्टार्थत्वाद्वाणिज्यवदिति प्रत्यनुमानेन

**लेखः**

**मिथो भजन्ती**त्यत्र. स्वार्थ एकान्तो यस्य तादृश उद्यमो येषामिति विग्रहः. **दृष्टार्थते**ति, गुरुः प्रशंसते चेत् सेवां करोति, तूष्णीं तिष्ठति चेत् न करोतीत्यर्थः. **शास्त्रानुसारी**ति, शास्त्रविहितसेवाकर्ता शिष्यश्चेदित्यर्थः.

**प्रकीर्णदीपिका**

अर्थः. **अन्याभ्याम्**[प्रका.] इति, स्नेहधर्माभ्याम् इति अर्थः. **उक्तवाक्ये**[प्रका.] इति, "सम्भोजनी नाम पिशाचभिक्षा" इति उक्तवाक्ये इति अर्थः. **व्याप्ति...**[प्रका.] इति प्राप्ति... इति अर्थः. **असदनुमानत्वाद्**[प्रका.] इति, पिशाचभिक्षावदिति असदनुमानत्वाद् इति अर्थः. **नास्य बाधकता**[प्रका.] इति, **अस्य** अन्योन्यभजनस्य गुरुसेवायां धर्मत्वे न बाधकता इति अर्थः. **वृत्तिप्रतिष्ठाद्यर्थता**[प्रका.] इति, गुरुशिष्ययोः च उभयोः इति अर्थः. अत्र गुरुसेवादिरूपा पूर्वोक्ता या व्याप्तिः "सा वाणिज्यवद्" इति प्रत्यनुमानेन खण्डयन्ति **तथाच**[प्रका.] इत्यादिना. अत्र **मिथोभजनम्**[प्रका.] इत्यारभ्य **इति अर्थः**[प्रका.] इत्यन्तस्य अयम् अन्वयः कर्तव्यः. तत्रापि **गुरुसेवावद्**[प्रका.] इति, "गुरुः सेवावान्, मिथोभजनत्वाद्" –"गुरुशिष्ययोः मिथोधर्मत्वाद्, मिथोभजनं धर्मः" इति. अत्र

मिथोभजनाभावः. विद्या तु फलरूपा. **सख्य** इति सम्बोधनादप्रतारणा. **य**

## प्रकाशः

तन्निरासात्स्वार्थार्थैव सेति न सापि धर्म इत्यर्थः. ननु दृष्टार्थतायामपि शिष्यस्य गुरोश्च "वसन् गुरुकुले दान्तो ब्रह्माधीयीत चाहुतः" "उपनीय तु यः शिष्यमि"त्यादिशास्त्रानुसारित्वे गुरुसेवा धर्मो, विहितत्वाद्यागवदिति शास्त्रसनाथानुमानेन तस्यां धर्मत्वे सिद्धे पूर्वोक्तहेतोः[1] साधारणत्वनिश्चयान्न तस्यानुमानस्य बाधकतेत्यत आहुः **शास्त्रे**त्यादि. तथा च यदि वृत्त्याद्यभिसन्धानं तदा तदंशे शास्त्राभावाद्दाम्भिकत्वेन पाषण्डत्वादिकमेव तत्रेति न हेतोः साधारणत्वम्. यदि च न तादृगभिसन्धानं तदा तु शास्त्रस्यैव प्रयोजकत्वेन तस्यां मिथो भजनत्वमेव न किन्तु विहितत्वमेवेति तेन रूपेण व्याप्तेरबाधान्न बाधकत्वहानिरित्यर्थः. ननु दृष्टार्थत्वेन मिथोभजनरूपाया गुरुसेवाया

## योजना

फलितम्. **शास्त्रानुसारी चेदि**ति, यः[2] स्वस्मै भोजनं दत्तवते ब्राह्मणाय भोजनं ददाति. परंतु ब्राह्मणसेवा भोजनादिरूपातिशयपुण्यजनिका इति ज्ञात्वा ब्राह्मणभोजनादि कारयति स धर्मभाग्भवत्येव, धर्मबुद्ध्या क्रियमाणत्वात्. तत्र न मिथो भजनमित्यर्थः. तथा च न स्वार्थैकान्तोद्यमत्वं तत्रेति ज्ञेयम्. ननु शिष्यः सेवते, तादृशाय गुरुर्विद्यां ददाति, तत्र पुण्यं गुरोर्भवतीति श्रूयते, पूर्वोक्तविचारे तु सेवाकृतावेव पाठयतीति मिथो भजनमापतत्यतः स्वार्थपरतैव भवतीत्याशंक्याहुः **विद्या तु फलरूपे**ति, विद्यारूपफलाप्त्यर्थं सेवाकरणे विद्या

१. दृष्टार्थत्वादिति हेतोः, वृत्तिप्रतिष्ठाद्यर्थत्वादिति यावत्.
२. मिथः इति मुद्रितः पाठः मांड. पाठमनुसृत्य संशोधितः.

### प्रकीर्णदीपिका

"**ननु यत्र-यत्र**"[प्रका.] इत्यादि पूर्वोक्ता, तादृशी तव या व्याप्तिः, दृष्टार्थत्वाद् न धर्मः, कुतो न इति आशंक्य आह **वाणिज्यवद्**[प्रका.] इत्यादिना. **सा** इति, अन्योन्यभजनता इति अर्थः. **सापि**[प्रका.] इति, गुरुसेवापि इति अर्थः. **पूर्वोक्तहेतोः**[प्रका.] इति, 'वाणिज्यवद्' इति हेतोः इति अर्थः, **तस्य**[प्रका.] इति, गुरुसेवारूपानुमानस्य इति अर्थः. **न हेतोः**[प्रका.] इति, पूर्वोक्तहेतोः न साधारणत्वम् इति अर्थः. **व्याप्तेः**[प्रका.] इति, गुरुसेवारूपा(प!)व्याप्तेः इति अर्थः. **न बाधकत्वहानिः**[प्रका.] इति, "यत्र



इति प्रसिद्धास्ते वणिज इव, स्वार्थएव तेषां प्रवृत्तिः. यद्यपि धर्मादयोपि

## प्रकाशः

धर्मत्वाभावसाधनमसङ्गतम्, विद्यारूपस्य दृष्टार्थस्य वैधसेवायामपि सत्त्वादित्याकांक्षायामाहुः **विद्ये**त्यादि. "तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तममि"त्यादौ 'जिज्ञास्वा'दिपदानां "चित्रया यजेत पशुकाम" इत्यादिषु 'पशुकामा'दिपदवत्फलबोधकत्वादिच्छाविषयाया विद्याया दृष्टत्वेऽपि शास्त्रएव प्रवेशेन [1]धर्मत्वाभावसाधकहेतौ वैधभिन्नत्वस्य विशेषणीयत्वान्न दोष इत्यर्थः. ननु धर्मादयः पुरुषार्थताविषया इति शास्त्रीयत्वेऽपि स्वार्थत्वस्य तेषु निर्बाधत्वात्स्वार्थार्थत्वेन मिथोभजननिन्दा न युक्ता. तथा "सहयज्ञाः प्रजाः सृष्ट्वेति" सन्दर्भे "देवान्भावयतानेन ते देवा भावयन्तु वः परस्परं भावयन्तः श्रेयः परमवाप्स्यथे"ति वाक्येन यज्ञस्य मिथोभजनत्वसिद्धेर्मिथोभजनत्वेन धर्मत्वाभावसाधनमप्ययुक्तमित्यत आहुः **यद्यपी**त्यादि. अत्र हि लौकिको-

## लेखः

**स्वार्थैकान्तोद्यमा** इत्यनेन सर्वेषां निराकरणसम्भवेऽपि धर्मसौहार्दयोः पृथङ्निराकरणे हेतुमाहुः **यद्यपी**ति. एतयोरपि स्वार्थत्वात् तेनैव तयोर्निरा-

१. धर्मार्थत्वाभावसाधकहेतौ इति मांड. पाठः.

### प्रकीर्णदीपिका

अन्योन्यभजनत्वं न तत्र धर्मत्वम्" इति व्याप्तेः, गुरुसेवायां पूर्वं यद् बाधकत्वम् उक्तं तस्य बाधकत्वस्य न हानिः इति अर्थः. **यद्यपि**[सुबो.] इत्यारभ्य **सिध्यन्ति**[सुबो.] इत्यन्तस्य अर्थः प्रकारद्वयेन आशंकाम् उद्भाव्य (प्रकाशे!) उक्तः. तत्र प्रथमः प्रकारः **ननु धर्मादयः**[प्रका.] इत्यारभ्य **मिथोभजननिन्दा न युक्ता**[प्रका.] इत्यन्तेन उक्तः. कथं निन्दा न युक्ता? इति चेत्, तत्रैव उक्तं **पुरुषार्थताविषया**[प्रका.] इति, "धर्मस्य ह्यापवर्गस्य" इत्याद्युक्तप्रकारेण धर्मादीनां मोक्षपर्यवसायित्वात् न निन्दा युक्ता इति अर्थः. द्वितीयप्रकारश्च **तथा**[प्रका.] इत्यारभ्य **अयुक्तम्**[प्रका.] इत्यन्तोक्तः. **इत्यतः आहुः**[प्रका.] इति, एवम् उभयोः धर्मयोः यथार्थत्वेऽपि एतयोः मध्ये मिथोभजने कस्य निन्दा इत्यतः आहुः इति अर्थः. **यद्यपि**[सुबो.] इति, उभयविधाअपि धर्मादयो यद्यपि स्वार्थाएव, तथापि अन्योन्यभजने ते मोक्षपर्यवसायिनो धर्मादयो न सिध्यन्ति इति अर्थः. यद्वा **अन्योन्यभजनेन**[सुबो.] इति, तृतीयान्तपक्षे ते लौकिकाः सिध्यन्तीति

स्वार्थाएव तथाप्यन्योन्यभजने न ते सिध्यन्ति. तथा सौहार्दमपि, यद्यन्यमपेक्षेत.

---

### प्रकाशः

पयोगि स्वार्थाभिसन्धानपूर्वकं यन्मिथो भजनं तन्निन्द्यते, "भजतोऽनुभजन्ती"ति प्रश्नवाक्येन तत्स्वरूपनिश्चयात्, न तु यत्किञ्चित्स्वार्थाभिसन्धानम्, अतो धर्मादीनां स्वार्थत्वेऽप्यदोषः. न च [1]तेषामन्योन्यभजने सिद्धिः, तथा सति हविर्ग्रहणायात्रागत्य फलं ददतां देवानामपि धर्मापत्तेः. न च तेन तेषां कोऽपि धर्मः, "भजन्ति ये यथा देवान्देवा अपि तथैव तान् छायेव कर्मसचिवाः साधवो दीनवत्सलाः" "देवाः स्वार्था न साधव" इत्यादिनिन्दादर्शनात्. एवं सत्युक्तसन्दर्भस्थं परस्परभावनमपि स्वार्थसाधनत्वेनैव फलति न तु धर्मसाधकत्वेन, "श्रेयः परमवाप्स्यथे"ति फलकथनेन अकरणे दोषबोधनेन च तथा निश्चयात्. तदेतदुक्तं **न ते सिध्यन्ती**ति. **अन्योन्यभजनेने**ति तृतीयान्तपक्षेऽपि तेन ते सिध्यन्ति[2], न तु तद्रूपा इत्यर्थो बोध्यः. अनुपपत्तेरुक्तत्वात्[3]. एवं "ये यथा मां प्रपद्यन्त" इत्यत्रापि द्रष्टव्यम्, "एवं मदर्थे"त्यस्य टिप्पण्यां तस्य भजनस्य प्रावाहिकधर्मरूपताया वक्ष्यमाणत्वात्. एवं मिथो भजने धर्माभावं साधयित्वा क्वचित्तदकरणे[4] क्रोधाभावे सौहार्दं तु स्यादेवेति तन्निषेधो नोपपद्यत इत्याकांक्षायां तदभावमप्युपपादयन्ति

---

१. धर्मादीनाम् इति मांड. पाठः. २. लौकिकान्योन्यभजनेन धर्मादयः लौकिकाः सिद्ध्यन्ति न तु तद्रूपा अलौकिकाः इत्यर्थः. (मांड.).

३. फलं ददतां देवानां धर्मानुपपत्तेरुक्तत्वात् मांड. पाठः. ४. प्रतिभजनाकरणे.

### प्रकीर्णदीपिका

ते निन्द्याः इति योज्यम्. तदेव उक्तम् **अत्रहि**[प्रका.] इत्यादिना. **धर्मादीनाम्**[प्रका.] इति, मोक्षपर्यवसायिधर्मादीनां स्वार्थत्वे सत्यपि न निन्दा युक्ता इति अर्थः. **तेषाम्**[प्रका.] इति, मोक्षपर्यवसायिधर्मादीनाम् इति अर्थः. **तेन तेषाम्**[प्रका.] इति, फलदानेन देवानाम् इति अर्थः. **दोषबोधनेनच**[प्रका.] इति, "इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेनएव स" इति, दोषबोधने(न!) च इति अर्थः. **तेन**[प्रका.] इति, लौकिकान्योन्यभजनेन **ते** धर्मादयो लौकिकाः **सिध्यन्ति. नतु तद्रूपाः**[प्रका.] इति, अलौकिकाः मोक्षविषयाः धर्मादयो न सिध्यन्ति इति अर्थः. **अनुपपत्तेः उक्तत्वाद्**[प्रका.] इति, फलं ददतां देवानां धर्मानुपपत्तेः उक्तत्वाद् इति



तस्य साधनस्य विनियोगमाह **स्वार्थार्थमि**ति, अन्यार्थमपि प्रतीयमानं स्वार्थमेव. एवं सेवादिदानेष्वपि, दुःखनिवृत्तिस्तत्र फलम्. अत्रार्थे सर्वोऽपि लोकः प्रमाणमिति **हिशब्दः**. **अन्यथा** परोपकाराय **न,** अन्यस्य हृदये तत्प्रतीकारार्थं चिन्ताजननात्. अतः फलं स्वार्थसिद्धिः लौकिकी. नाममात्रेणैव तेषां धर्मत्वं न तु वस्तुतः ॥१७॥

ये पुनः अभजतोऽपि भजन्ति ते द्विविधा इत्याह **भजन्ती**ति.

**भजन्त्यभजतो ये वै करुणाः पितरौ यथा ।**
**धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः ॥१८॥**

**ये अभजतो**ऽपि तूष्णींस्थितान् **भजन्ति,** तत्र निमित्तद्वयं लौकिकं

---

### प्रकाशः

**तथे**त्यादि **हिशब्द** इत्यन्तम्. **दुःखनिवृत्तिरि**ति सेवाकर्तुर्दुःखनिवृत्तिः. शेषं स्पष्टम्. अत्र च "यस्त आशिष आशास्ते न स भृत्यः स वै वणिगि"ति फलितं बोध्यम् ॥१७॥

### लेखः

करणं न भवेदित्यर्थः. पुनः **स्वार्थार्थमि**ति अभ्यासे भूयांसमर्थं मन्यन्त इति न्यायेनोक्तमित्याशयेनाहु**रन्यार्थमपी**ति ॥१७॥

### योजना

तु देयैव, यो यदर्थं यतते तस्मै तद्दाने धर्मो भवत्येव, न तत्र मिथो भजनमिति भावः. **तथा सौहार्दमपि यद्यन्यमपेक्षेते**ति, भोजनवसनादिदानेन सौहार्दमिव कुर्वन्नपि "यद्ययं ममेष्टं साधयती"त्यपेक्षया कर्ता न सौहार्दवान् भवतीत्यर्थः ॥१७॥

---

### प्रकीर्णदीपिका

अर्थः. तत्र **अकरणे**[प्रका.] इति, द्वितीयेन प्रतिभजनाकरणे सति इति अर्थः. **तथा सौहार्दमपि यदि अन्यम् अपेक्षेत**[सुबो.] इति, यथा धर्मादयो न सिध्यन्ति तथा सौहार्दमपि यदि अन्यत् यत्किञ्चित् फलम् अपेक्षेत, तदा क्रोधाभावेऽपि सौहार्दमपि न सिध्यति इति अर्थः. **सेवादिदानेष्वपि**[सुबो.] इति, सेवां कारयित्वा धनादिदाने सेवाकर्तुः दुःखनिवृत्तिः फलं नतु धर्मफलं कस्यापि इति अर्थः. **अन्यस्य**[सुबो.] इति, यस्य उपकारं करोति तस्य इति अर्थः ॥१७॥

वैदिकं वा, स्नेहो विधिश्च. तत्र सौहार्दं धर्मश्च फलं क्रमेणैव. यः पूर्वः तस्य सौहार्दे अवसरे कर्तव्य एवोपकारः, अन्यथा कृतघ्नः स्यात्. धर्मशेषश्चेत्

---

### टिप्पणी

**भजन्त्यभजतो ये वा** इत्यत्र **धर्मशेषश्चे**त्यादि, धर्मार्थं यो भजते तस्य धर्मएव मुख्य इति भजनीयस्तच्छेषः. एवं सति भजनकर्तुः पातकादिसम्भवे तद्दोषो निवर्तनीयएव कृतघ्नतापरिहारायेत्यर्थः. ननु पुण्येनैव पापनिवृत्ति-

### प्रकाशः

**भजन्त्यभजत** इत्यत्र, **पूर्व** इति भजनकर्ता. **कर्तव्य** इति, अभजता उत्तरेण कर्तव्य इत्यर्थः. **विधेयमि**ति भजनीयेन विधेयम्. तदेव टिप्पण्यां विवृतं **धर्मार्थमि**त्यादिना. **पातकादीत्यादि**पदेन लौकिकानिष्टम्. तथा च "श्रोत्रियस्य ब्रह्मचारिणो दीक्षितस्य व्रतिनो लिङ्गिनो वामां दृष्ट्वा जातरागस्य मुमूर्षोर्मित्रवाक्यादानृशंस्याच्च गमनं धर्मोऽधर्मो वेति संशय" इति कामसूत्रोपदर्शितादिस्थले भजनीयस्तदर्थं स्वयं प्रायश्चित्तादिकं कुर्यादित्याशयः. उदाहरणं तु पाद्मवैशाखमाहात्म्यप्रथमाध्यायस्थं चित्रोपाख्यानं बोध्यम्. तत्र

### लेखः

**भजन्ती**त्यत्र, **यः पूर्व** इति, **यः** सौहार्देन भजनकर्ता **तस्यावसरे** प्राप्ते भजनीये**नोपकारः कर्तव्यो** भवति, तदकरणात् सौहार्दं **निरपवादम**-पवादरहितम्. धर्मार्थं भजने प्रायश्चित्तं विधेयम्, तदकरणाद्धर्मो निरपवाद इति शेषः. **अन्यथा कृतघ्नः स्यादि**ति मध्यस्थमुभयत्रान्वेति.

---

#### प्रकीर्णदीपिका

**भजन्त्यभजतः**[भाग.] इत्यत्र **अवसरे**[सुबो.] इति, पुत्रादीनां सामर्थ्ये प्राप्ते सति इति अर्थः. **पातकादिसम्भवे**[टिप्प.] इति, निरपवादधर्मे न पातकादिसम्भावना, सापवादधर्मे सम्भावना. तदेव उक्तं **लौकिकानिष्टम्**[प्रका.] इति. तदेव विचारितं कामसूत्रेण **तथाच**[प्रका.] इत्यादिना. तत्र **लिङ्गिनः**[प्रका.] इति, अन्येऽपि भक्तिमार्गीयादिलिङ्गिनः इति अर्थः. **मित्रवाक्याद्**[प्रका.] इति, यस्याम् आसक्तः सैव मित्रं, तस्याः वाक्याद् इति अर्थः. **आनृशंस्याद्**[प्रका.] इति, लज्जां त्यक्त्वा इति अर्थः. संशयपरिहारस्तु व्याख्यानान्ते **तथाच ब्राह्मणस्य** इत्यादिना उक्तो द्रष्टव्यः. **तदर्थम्**[प्रका.] इति, सापवादभजनं कृतं येन तदर्थम् इति अर्थः. **वेश्याभूतया**[प्रका.] इति, पञ्चपुरुषाणां



प्रायश्चित्तं विधेयम्, तदीयएव धर्मः तद्द्वारा तेषु गच्छतीति. तत्र धर्मे यत्र

---

### टिप्पणी

रित्यस्य तत्र नोपयोग इत्यत आहुः **तदीयएवे**ति, धर्मशेषीयएव धर्मो भजनद्वारा भक्तेषु गच्छतीत्यर्थः. ननु विहितत्वात्तद्भजनस्यापूर्वएव धर्मस्तेनोत्पद्यत इति चेत्, मैवम्, तादृक्फलसाधकत्वेन तद्भजनविधाने भजनीयनिष्ठतादृग्धर्मवत्त्वस्यैव प्रयोजकत्वात्, "तेजस्कामोऽग्निमेव तेजस्वन्तं स्वेन

### प्रकाशः

हि वैश्यजातीयया वेश्याभूतया विचित्रैः सुरतोपचारैरदृष्टबुद्ध्या संसेवितोऽतिथिस्तीर्थान्यटमानो यस्सुदेवनामा[1] विप्रो रेवायां वैशाखस्नानोपदेशं विधाय तया सार्धं तत्र स्नानं कुर्वन् कारयन् दयया तदुपरोधेन वसंस्तां स्वात्मानं चोद्धृत्य स्वयं पाण्ड्यदेशाधिपो वीरसेनाख्यो जन्मान्तरे जातः. सा च काशिपतेर्वैष्णवतमस्य[2] दिवोदासस्य सुता दिव्यादेवीनाम्नी जातेत्युक्तम्. **पुण्येनैव पापनिवृत्तिरि**त्यादि, "धर्मेण पापमपनुदती"तिश्रुतौ कर्त्रैक्यस्य विवक्षितत्वादन्यथातिप्रसङ्गाच्च तथेत्यर्थः. **धर्मशेषीय** इत्यादि. "पतिं त्वपतितं भजेदि"त्यादिस्मृता'वपतित'इत्यादिविशेषणात्तथेति तथा. [**भक्तेषु गच्छती**ति, यथा गुरुसेवाकृतौ सत्यां गुरोः ...त्वं सेवाद्वारा सेवकेषु आयाति.

---

१. वासुदेव इति मांड. पाठः.　२. वैष्णवोत्तमस्य इति मांड. पाठः.

#### प्रकीर्णदीपिका

सङ्गं या करोति सा वेश्याप्राया भवति, तथाभूतया इति अर्थः. **अदृष्टबुद्ध्या**[प्रका.] इति, "मद्दोषम् अयं नाशयिष्यति" इति बुद्ध्या इति अर्थः. **तथा**[प्रका.] इति, अस्य भजनीयस्य न उपयोग इति अर्थः. **'अपतित' इत्यादिविशेषणात् तथा**[प्रका.] इति, यदि स्वयम् अपतितः तदा भजनकर्तुः पापं निवर्तयितुं समर्थो भवति इति अर्थः. तदेव उक्तम् **अन्यथा तेजस्वन्तम् इति न वदेद्**[टिप्प.] इति. **तथा**[प्रका.] इति भजनीयकर्तृकं भजनं पूर्वभजनकर्तृषु गच्छति इति अर्थः. **अस्य(?)**[टिप्प.] इति, भजनीयस्य इति अर्थः. **भक्तेषु**[टिप्प.] इति, भजनकर्तृषु इति अर्थः. **तद्भजनस्य**[टिप्प.] इति, धर्मार्थं यो भजते तस्य इति अर्थः. **तेन**[टिप्प.] इति, भजनकर्तुः भजनेन इति अर्थः. **तादृक्फलसाधकत्वेन**[टिप्प.] इति, पापनिवृत्तिरूप-फलसाधकत्वेन इति अर्थः. **तद्भजनविधाने**[टिप्प.] इति, भजनकर्तुः भजनकरणे इति अर्थः. **तादृग्धर्मवत्त्वस्यैव**[टिप्प.] इति, प्रायश्चित्तरूपधर्मवत्त्वस्यैव इति अर्थः.

कर्म प्रधानं यत्र वा देवता तदुभयं न विवक्षितं, प्रतियोगिनि भजनशङ्काभावात्.

## टिप्पणी

भागधेयेनोपधावती''त्यादिश्रुतिभ्यस्तथा निर्णयात्. अन्यथा 'तेजस्वन्तमि'ति न वदेत्. न चामूर्तत्वं बाधकमिति वाच्यम्, अलौकिकस्यार्थस्य लोकरीत्या निर्णेतुमयुक्तत्वात् ''अलौकिकास्तु ये भावा न तांस्तर्केण योजयेदि''ति श्रुतेश्चेति दिक्. निषेधस्य प्राप्तिपूर्वकत्वनियमेनात्र चापवादनिषेधोक्तेर्यत्र धर्मापवादसम्भावना सएवात्र धर्मः परिगृहीतो, यत्र न तत्सम्भावना न सोऽत्र विवक्षित इत्याशयेनाहुः **तत्र धर्मे यत्रे**त्यादि. नित्यं कर्म कर्तव्यत्वेनैव यत्र क्रियते तत्र तदेव प्रधानम्. यत्र देवताराधनेनैव धर्मस्तत्र सा प्रधानम्. न चोक्तेषु धर्माभावादविवक्षितत्वमिति वाच्यं, भगवता हि निर्णयः क्रियते, स च सन्दिग्धे कर्तुमुचितः, उक्तेषु सन्देहाभावादत्राविवक्षितत्वात् ॥१८॥

## प्रकाशः

**तेजस्वन्तमि**ति, तेजस्कामः तेजस्वन्तं अग्निमेव भजतु, तेन तत्भजनेन तेजत्वं(स्त्वम्!) आयाति. **वाच्यमि**ति, तेजस्य(सः!) आगमने(नं!) मूर्त्यभावात् कथं सम्भवति?] **दिगि**ति, जातेष्टि-गयाश्राद्ध-पुण्यदानादिशास्त्रेभ्योऽपीत्यर्थः. अत्र निर्णीयमानोऽभजद्भजनरूपो धर्मः को वेति निष्क्रष्टुं वदतीत्याशयेनाहुः **निषेधे**त्यादि. **धर्मापवादे**ति धर्मे अपवादेति समासो बोध्यः. [**धर्म** इति, यत्र धर्मस्य संशयः तस्यैव भगवता निर्णयः क्रियते, न तु निःसंदेहधर्मस्य निर्णयः.] **कर्तव्यत्वेने**ति, ''कार्यमित्येव यत्कर्मे''ति, ''एतान्यपि तु कर्माणि'' इत्यादिवाक्यादित्यर्थः. [**सा** देवता.] **न चे**त्यादि, कर्मदेवतागवादिषु जडत्व-स्वर्गवासित्वाज्ञत्वैर्धर्मानुत्पत्तेस्तस्याविवक्षितत्वं, न तु प्रतियोगिनि भजनशङ्काभावादित्यर्थः. **उक्तेष्वि**त्यादि. बहुलाव्याघ्रसंवादादिना इन्द्राद्यश्व-

## योजना

**भजन्त्यभजतो ये वा** इत्यस्य विवृतौ **धर्मशेषश्चे**दित्यस्य **तदीयएव धर्म** इत्यस्यार्थष्टिप्पण्यां स्फुटः. **तत्र धर्मे यत्र कर्म प्रधानं यत्र वा देवते**त्यादेरर्थष्टिप्पण्यां स्फुटः ॥१८॥

## प्रकीर्णदीपिका

**कर्मदेवतागवादिषु**[प्रका.] इति, सुबोधिन्युक्तं कर्मादिषु इति योज्यम्. **प्रतियोगिनि**[प्रका.] इति,



यत्र वा असमानता, गोः पङ्कोद्धारणवत्, तत्रापि तथा. यत्र पुनराधारे प्रत्युपकारः सम्भवति तत्र प्रवृत्तौ पूर्वस्याभजने उत्तरभजने निरपवादो धर्मः सौहृदं च फलम्. अधिकारिविशेषणं तु एकत्र करुणा अपरत्र दैहिकः

## प्रकाशः

मेधकथादिभ्यश्च निमित्तवशात्तत्रापि धर्मोत्पत्त्यवगतेर्न तेन तथा किन्तूक्त-शङ्काभावादेव तथेत्यर्थः. सुबोधिन्यां **यत्र पुनरि**त्यादि, अत्र निरपवाद-धर्मोदाहरणमानुशासनिकपर्वस्थं सुदर्शनोपाख्यानं बोध्यम्. तत्र ह्योघवत्या स्वपत्युर्गृहस्थधर्मं रक्षन्त्या स्वात्मप्रदानेनातिथिर्ब्राह्मणः पूजित उटजान्निर्गत्य स्वस्वरूपं धर्म इति प्रकटीकृत्य, अग्रे ''एषा हि तपसा स्वेन संवृता ब्रह्मचारिणी, पावनार्थं च लोकस्य सरिच्छ्रेष्ठा भविष्यति, अर्द्धेनोघवती नाम त्वामर्द्धेनोपयास्यति, यत्र नावृत्तिमभ्येति शाश्वतांस्तान्सनातनान्, अनेनैव तु देहेन लोकांस्त्वमभिपत्स्यसे'' इत्यादि सुदर्शनं प्रत्युवाचेत्याद्युक्त्वा ''धन्यं यशस्यमायुष्यमिदमाख्यानमुत्तममि''त्यादिना भीष्मेण श्रवणकथनफलकथनात्. नन्वेवं सम्भावितापवादमप्यभजद्भजनं चेन्निरपवादधर्मात्मकं तर्हि सर्वः प्रवर्त्स्यत इति मर्यादा भंक्ष्यत इत्यत आहुः **अधिकारी**त्यादि. **एकत्रे**ति

## प्रकीर्णदीपिका

सुबोधिन्युक्तगवादिप्रतियोगिनि भजनशंकाभावाद् अत्र धर्मे अविवक्षितत्वम् इति अर्थः. **तत्रापि**[प्रका.] इति, गवादिष्वपि इति अर्थः. **न तेन तथा**[प्रका.] इति, गवादिषु अज्ञत्वादिना धर्माभावाद् न अविवक्षितत्वम् इति अर्थः. **उक्तशंकाभावादेव तथा**[प्रका.] इति, प्रतियोगिनि भजनशंकाभावाद् अविवक्षितत्वम् इति अर्थः. **यत्र पुनः**[सुबो.] इत्यादिना निरपवादो धर्मो वक्तव्यः तत्र प्रथमं मूलश्लोकस्य एवम् अन्वयः कर्तव्यो— **भजन्त्यभजतो ये वै**[(श्लो. १८) सुबो.] इति, ''**ये** करुणाः पितरौ **अभजतः वै** निश्चयेन **भजन्ति** तदा धर्मो निरपवादो भवति'' इति योज्यं, निश्चयेन भजनन्तु प्रत्युपकाररहितम् इति ज्ञेयम्. तदेव उक्तम् **आधारे प्रत्युपकारः सम्भवति**[सुबो.] इति, भजनीये प्रत्युपकारसामर्थ्ये सत्यपि इति अर्थः. **तत्र प्रवृत्तौ**[सुबो.] इति, तस्य भजनकरणे इति अर्थः. **पूर्वस्य**[सुबो.] इति, भजनकर्तुः अभजने इति अर्थः. **उत्तरभजने**[सुबो.] इति, अभजनकर्तुः केवलभजनकरणे इति अर्थः. तादृशं निरपवादभजनम् ओघवत्या ऋषिपत्न्या कृतं तदुदाहरणं **अत्र**[प्रका.] इत्यादिना उक्तं द्रष्टव्यम्. ननु एवं भजने मर्यादाभङ्गो भविष्यति इति

सम्बन्धः, तदाह **करुणाः पितराविति**. अन्यत्रापि दृश्यत इति तद्धर्मातिदेशमाह **यथेति**. ये संसारिणः क्रूराः तेऽपि कदाचिद्दीनेषु भजनं कुर्वन्ति स्निग्धा इव च भवन्ति तेषां सङ्ग्रहार्थं **यथेति**. सम्बन्धस्तु जन्मान्तरीयोऽपि भवतीति उपमानोपमेययोरभेदादेकविधाएव. **निरपवाद** इति, एतदुपकारेण हि

---

## प्रकाशः

धर्मजनके तस्मिन्. अत्र सौहृदधर्मानुषङ्गिकमर्थस्वभावादेवानुबध्यते. **अपरत्रेति** सौहृदजनके. **अन्यत्रापि दृश्यत** इति, सांसिद्धिककरुणास्नेहरहितेष्वप्यभजद्भजनं दृश्यत इत्यर्थः. अतिदेशप्रयोजनमाहुः **य** इत्यादि. ननु राजधर्मे "सहार्थो भजमानश्च सहजः कृत्रिमस्तथा धर्मात्मा पञ्चमो मित्रमि"ति पञ्चविधमित्रेषु सहजभजमानौ निरुपधी उक्ताविति तयोर्भावभेदेन स्नेहेऽपि भेदात्कथमेकएवात्र दृष्टान्त इत्यत आहुः **सम्बन्ध** इत्यादि. तथा च कर्मणां गहनगतित्वेन सम्बन्धादेव तथाभाव इति भावभेदेऽपि निरुपधित्वेनैक्यादेकविधाएवेत्यर्थः. एतेन स्नेहाद्भजने जन्मान्तरीयसम्बन्ध एव प्रयोजक इति न तत्र

---

## प्रकीर्णदीपिका

आशंक्य सुबोधिन्याम् आहुः **अधिकारिविशेषणम्**[सुबो.] इत्यादिना, एंवं भजने को अधिकारी इति अधिकारिविशेषणम् इति अर्थः. **धर्मजनके**[प्रका.] इति, अतितेजस्विनि करुणा कर्तव्या, यथा ओघवत्या कृता, नतु सर्वत्र, अतो न मर्यादाभङ्ग इति भावः. **सौहृदजनके**[प्रका.] इति, पुत्रादिषु सौहृदं कर्तव्यम् इतिं अर्थः. एवं निरपवादधर्मं निरूप्य सापवादधर्मं निरूपयन्ति **अन्यत्रापि**[सुबो.] इत्यादिना. **तद्धर्मातिदेशम् आह**[सुबो.] इति, स्वाभाविक-करुणा-रहितानां धर्मान् दृष्टान्तार्थम् आह इति अर्थः. **यथा**[भाग.] इति, "यथा अन्ये संसारिणोऽपि करुणाः पितरौ अभजन्तं भजन्तीति दृष्टान्तार्थं तथा" इति योज्यम्. तदेव उक्तं **ये संसारिणः**[सुबो.] इत्यादिना. ननु दृष्टान्त-दार्ष्टान्तिकयोः एकविधनियमात् सापवाद-निरपवाद-भजनकर्तारः कथम् एकविधाः भवन्ति? अतः कथंवा दृष्टान्त-दार्ष्टान्तिकयोः एकविधत्वम्? इति आशंकापरिहाराय आहुः **संबन्धस्तु**[सुबो.] इत्यादिना. तदर्थः **ननु राजधर्म...**[प्रका.] इत्यादिना उक्तः. तत्र **संबन्धादेव तथा भावः**[प्रका.] इति, भजनीयानां कर्मप्राबल्याद् भजनकर्तॄणां निरुपाधिकभावो भवति इति अर्थः. **भावभेदेऽपि**[प्रका.] इति, उभयेषां भावभेदेऽपि इति अर्थः. **एकविधाएव**[प्रका.] इति, एकविधाएव प्रतीयन्ते, नतु



तस्यापवादः, तदभावान्निरपवादएव. **अत्र** [1]तादृशेऽर्थे, अनेन यत्र प्रत्युपकारसम्भावनापि न तत्र धर्म इति सूचितम्. अतएव केचित् क्रियमाणमपि नाङ्गीकुर्वन्ति. सौहार्देऽपि धर्मोऽस्तीति **चकारः**. **सुमध्यमा** इति सम्बोधनमुक्तविश्वासाय. धर्मेणैव उत्तममध्यमता ॥१८॥

---

## प्रकाशः

धर्मसंभावनेति सूचितम्. **एतदुपकारेणेति** अभजता कृतेन [2]प्रत्युपकारेणेत्यर्थः. एतेन स्नेहाद्भजने पूर्वसम्बन्धस्याशक्यज्ञानत्वादपवादोऽपि सम्भवतीति सूचितम्. एवं व्याख्याय धर्मस्थलं निष्कर्षन्ति **अनेनेत्यादि**. **क्रियमाणमिति**, प्रत्युपकारं मिथोभजनत्वभिया नाङ्गीकुर्वन्तीत्यर्थः. तथा च "ब्राह्मणस्य कामपरवशस्य प्राणत्राणार्थं गमनं धर्मो निरनुबन्ध" इति कामसूत्राद्युक्तसजातीयादिस्थले धर्मानुबन्धधर्मस्थले च धर्मः. तथा "तस्यैव लोकविद्विष्टस्य मायाविनो वा तथाभूतस्यैव शरीररक्षणार्थं गमनं धर्मोऽधर्मानुबन्ध" इति कामसूत्राद्युक्तस्थलेऽप्यनुबन्धस्य बलिष्ठत्वात् श्येनवदधर्म एवेति भावः. **धर्मोऽस्तीति**, करुणालेशस्य तत्रापि सत्त्वात्तथेत्यर्थः [**उत्तममध्यमता** इति, उत्तमं मध्यमं (वा!) हृदयम्.] ॥१८॥

## लेखः

**सम्बन्धस्त्विति**, आधुनिकसौहार्देन जन्मान्तरीयसम्बन्धस्यादृष्टस्यानुमेयत्वाद् बहुत्वेन तत्र **यथेत्युक्तम्**, यथा पितरौ तथा भ्रात्रादयोऽपीत्यर्थः. करुणा दृष्टत्वेनैकैवेति तत्रोपमानोपमेययोरेकत्वमुक्तमित्यर्थः. **धर्मेणेवेति**, स्वापेक्षया उत्तमानभजतो ये भजन्ति ते उत्तमाः, मध्यमान् ये भजन्ति ते मध्यमा इति धर्मकृतएव उत्तममध्यमभावस्तेष्वन्योन्यमित्यर्थः ॥१८॥

---

१. एतादृशेऽर्थे इति ब. पाठः. २. प्रत्युपकारेण तस्य भजनस्य बाधः नामापवादः.

## प्रकीर्णदीपिका

एकविधाः इति अर्थः. **तदेव उक्तम् एतेन**[प्रका.] इत्यादिना. तेन पूर्वोक्ता शंका परिहृता ज्ञेया. सुबोधिन्याम् उपमानोपमेययोः अभेदाद् एकविधत्वं यद् उक्तं तदपि दृष्टान्त-दार्ष्टान्तिकयोः एकविधत्वज्ञापनाय, नतु एकविधत्वाभिप्रायेण इति भावः. **तस्यैव**[प्रका.] इति, ब्राह्मणस्यैव इति अर्थः. **श्येनवद्**[प्रका.] इति, श्येनपक्षिवत् छलेन धर्षणकर्तुः गमनम् अधर्मएव इति भावः. **उक्तविश्वासाय**[सुबो.] इति, मध्यमाधिकारिणामपि उक्तधर्मे विश्वासो भवति, नतु हीनाधिकारिणाम्

ये तु पुनः सर्वथैव न भजन्ति, भजनार्थं भजतः, सौहृदेन वा भजतः, धर्मार्थे तु न शङ्का, तानुभयविधानपि केचिन्न भजन्ति. अभजतो दीनान् धर्माधिकारिणश्च तानपि न भजन्ति. तेषां स्वरूपमाह **भजतोऽपीति**.

**भजतोऽपि न वै केचिद् भजन्त्यभजतः कुतः ।**
**आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः ॥१९॥**

केचिन्महापुरुषा **भजतोऽपि न भजन्ति, अभजतः कुतो** भजिष्यन्ति?

---

**प्रकाशः**

**भजतोपि न वै केचिदित्यत्र, ये त्वित्यादिनोक्तस्यैव** विवरणं **भजनार्थमित्यादि. धर्मार्थे तु न शङ्केति, सौहृदेन भजतो**ऽवसरे प्रत्युपकारस्य कृतघ्नतापरिहारायावश्यकतया शङ्कासत्त्वेपि[१] धर्मार्थे तस्मिंस्तदर्थं प्रायश्चित्त-क्रियामात्रेण चारितार्थ्यात्तथेत्यर्थः. [**पूर्वोक्तन्यायेन** इति, **पूर्वोक्तः**

**लेखः**

मूले **भजत** इति पदस्यार्थमाहुः **भजनार्थमिति. तानुभयानपी**[२]ति, भजनार्थं भजतः सौहृदेन वा भजतः पुरुषानित्यर्थः. मूले **अभजत** इतिपदं विवृण्वन्ति **दीनानिति**, येषां भजनेन भजत्सु दया सिध्यति तानित्यर्थः.

---

१. कृतघ्नतादोषरूपा शङ्काऽभजतः पुरुषस्य. २. उभयविधानिति मू. पा.

**प्रकीर्णदीपिका**

अतो भवतीनान्तु अधुना मम प्रतिभजनापेक्षया मध्यमाधिकारित्वं जातं, पुनरपि मदुक्तविश्वासाद् अग्रे उत्तमाधिकारित्वं भविष्यति इति भावः ॥१८॥

**भजतोऽपि न वै केचिद्**[भाग.] इत्यस्य आभासे **भजनार्थं भजतः**[सुबो.] इति, "मिथोभजन्ति" इत्यत्र उक्ताः ज्ञेयाः. **सौहृदेन वा**[सुबो.] इति, "भजन्त्यभजतो ये वै" इत्यत्र उक्ताः ज्ञेयाः. **धर्मार्थेतु न शंका**[सुबो.] इति, तत्रैव उक्ताः ये करुणाः ते आत्मारामस्य पूर्णकामस्य धर्मार्थं भजनं कुर्वन्ति, तेषां भजनमात्रेण धर्मः सिध्यति, अतो न प्रायश्चित्तार्थं शंका इति भावः. तदेव उक्तं **धर्मार्थेतु**[प्रका.] इत्यादिना. तत्र **तस्मिन्**[प्रका.] इति, अवसरे इति अर्थः. **तदर्थम्**[प्रका.] इति, कृतघ्नतापरिहारार्थम् इति अर्थः. **प्रायश्चित्तक्रियामात्रेण चारितार्थ्यात् तथा**[प्रका.] इति, आत्मारामाप्तकामानां प्रायश्चित्तं नाम पापनिवृत्तिरूपा या स्वाभाविकी क्रिया तन्मात्रेण चारितार्थ्याद् इति भजनकर्तृणां फलसिद्धेः, अतः तदर्थं पृथक् प्रायश्चित्तकरणेन तेषु शंका



ते पूर्वोक्तन्यायेन चतुर्विधाः. तन्मध्ये उभये समीचीनाः, उभये न– ये [१]धर्माधिकारिणस्ते अधमाः ये लौकिकनिमित्तास्ते उत्तमा इति. तान् गणयति

---

**टिप्पणी**

**भजतोपि न वै केचिदित्यत्र ये** [२]**दयाधर्माधिकारिण** इत्यादि, धर्मार्थं भजत्सु धर्मं सम्पादयितु**मधिकारिणः** समर्थास्तान् **ये** न भजन्ति **ते त्वधमा** इत्यर्थः. अकृतज्ञत्वादिदोषवत्त्वेन तएवाग्रे वाच्याः. लौकिकमेव निमित्तं भजने येषां ते **लौकिकनिमित्ता**स्तान् **ये** न भजन्ति **ते उत्तमा** इत्याहुः **ये लौकिकनिमित्ता** इति. तएव आत्मारामत्वादिधर्मवत्त्वेनाग्रे वाच्याः ॥१९॥

**प्रकाशः**

भजतोपि न भजन्ति.] **येदयाधर्मे**त्यत्र **अदया** इति [३]विछेत्तव्यम्, **ये कृतं ने**त्याद्यग्रिमग्रन्थस्वारस्यात्. [ टिप्पण्यां **न भजन्ती**ति, समर्थास्तान् ये न भजन्ति ते अधमाः. सुबोधिन्यां **सांकर्याभावाय** इति, परस्परमेलनं न भवेत्

**लेखः**

**धर्माधिकारिण** इति धर्मसम्पादने समर्थान्, येषां भजनेन धर्मः सिध्यति तानित्यर्थः. एते एव व्याख्याने **दयाधर्माधिकारिण** इत्यनेनोक्ता इति ज्ञेयम्. **दयायां धर्मे चाधिकारिणः** समर्थास्तद्द्वयसाधकास्तान् **ये** न भजन्ति **तेऽधमा**

**योजना**

**भजतोऽपि न वै केचिदित्यस्य** विवृतौ **ये दयाधर्माधिकारिणस्ते अधमा** इति– अस्यार्थष्टिप्पण्यां स्फुटः. **आत्मारामा ह्याप्तकामा** इत्यस्य

---

१. दयाधर्माधिकारिण इति पाठः न संबद्धः, अतः अदया इति छेत्तव्यमिति श्रीपुरुषोत्तमाः. दयाधर्मेति पाठो लेखकृतामपि संमतः. मूले तु दयेति नास्ति श्रीविठ्ठलरायाणां पुस्तके.
२. धर्माधिकारिण इति ब. पाठः.
३. छेत्तव्यम् इति मुद्रितपाठः मांडपाठमनुसृत्य संशोधितः.

**प्रकीर्णदीपिका**

इति अर्थः. **अभजतः**[सुबो.] इति, "अभजतः कुतः" इत्यत्र उक्तान् अभजनकर्तॄन् दीनान् धर्माधिकारिणः च इति अर्थः. तदेव उक्तं प्रतिभजने असमर्थान् समर्थान् च इति अर्थः. **पूर्वोक्तन्यायेन**[सुबो.] इति, "नोभयांश्च भजन्त्यन्ये" इत्यत्र उक्त-'भजदभजन'न्यायेन इति

साङ्कर्याभावाय. **आत्मारामा** इति आत्मन्येव रमन्त इति अन्येन भजनीयो देहादिनिरपेक्षित इति भजनमेव न मन्यन्ते. तेषां भजनार्थं च साधनत्वेन स्वदेहादिकमपि न मन्यन्ते. तथा अन्ये **आप्तकामाः– आप्तः** प्राप्तः **कामो** यैः. यो भुक्तवन्तं ब्रूयात् "त्वं भुङ्क्ष्व-मा भुङ्क्ष्वे"ति वा. एकत्राप्रवृत्तिः अपरत्र सिद्धसाधनत्वेनानुवादः, उभयथापि वैयर्थ्यम्. प्रवर्तमानस्य धर्मः

---

**प्रकाशः**

तस्माद् इति सांकर्याभावः.] लौकिकनिमित्ताभजनकर्तारः कथमुत्तमा इत्यपेक्षायाम**आत्मारामा**दिपदतात्पर्यमाहुः **अन्येने**त्यादि. [**स्वदेहादिकमपी**ति, आत्मारामाः देहादिकं न मन्यन्ते. तर्हि कथं भजते भजनीयतेति? **एकत्राप्रवृत्तिरि**ति, भुक्ततृप्तस्य द्विधाकथनमेव अयुक्तः– "त्वं भुंक्ष्व मा भुंक्ष्वे"तीति. **सिद्धसाधनत्वेने**ति भोजनसाधनकृते. **अनुवाद** इति, एकं वस्तु यस्मिन् वर्तते तस्य तत्रैव कथनम् अनुवादः.] कृतस्य विनियोगापेक्षायामाहुः **उभयथे**त्यादि. एवं प्रतियोगिविचारेण साधनवैयर्थ्येऽपि कर्तृविचारेण विनियोगमाहुः **प्रवर्तमानस्ये**त्यादिना. तथा च ज्ञातुस्तेन धर्मोऽज्ञातुस्तु स्वरूपं

**लेखः**

इत्यर्थः. **साङ्कर्याभावाये**ति तद्धर्माणामिति शेषः. **प्रवर्तमानस्ये**ति, 'भुङ्क्ष्वे'ति कथने **प्रवर्तमानस्य** तादृशवाक्यवक्तुर्**धर्मः**. 'मा भुङ्क्ष्वे'ति वक्तुर**ज्ञानमि**त्यर्थः.

**योजना**

विवरणे **एकत्राप्रवृत्तिरि**ति, भुक्तवन्तं प्रति 'भुंक्ष्वे'ति कथने अस्य भुक्तवतः भोजने प्रवृत्तिर्न स्यादित्यर्थः. **सिद्धसाधनत्वेनानुवाद** इति, भुक्तवन्तं प्रति 'मा भुंक्ष्वे'त्युक्ते अनुवादएव. तस्य कृतभोजनस्य भोजनेच्छाभावाद्भोजनं न करिष्यत्येव, अतो भोजनाभावकथनमनुवाद एवेत्यर्थः. **उभयथापि वैयर्थ्यमि**ति, भुक्तवन्तं प्रति 'भुंक्ष्वे'त्युक्तावपि भोजनाभावदर्शनाद्**वैयर्थ्यम्, अर्थो** भोजनं भोजनप्रेरयितुः अपेक्षितत्वात् तादृशस्य भोजनस्याभावाद्वैयर्थ्यमित्यर्थः.

---

**प्रकीर्णदीपिका**

अर्थः. **तद्धर्माणाम्**[लेख.] इति, आत्मारामादिचतुर्णां धर्माणां पृथक्करणार्थम् इति अर्थः. **प्राप्त कामो यैः**[सुबो.] इति, "काममयोऽयं पुरुषः", "पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" इति श्रुत्युक्तः प्राप्तः कामो यैः तेऽपि भक्ताः न अन्येषां भजनं कर्तुं शक्नुवन्ति इति भावः.



सेत्स्यति. अज्ञानं वा. उभये तु अधमा इत्याह. ये **कृतं** न जानन्ति तदुपकारं ते प्रत्युपकारसमर्था अपि उभयविधानपि न भजन्ति. तेषामज्ञानमेव हेतुरभजने. ज्ञात्वा चेदभजनं, **गुरुद्रोहः**. यः कश्चित् स्वस्य पुरुषार्थसाधकः स गुरुः, स पूज्यः. तस्यापदि स्वशक्तौ सत्यां तदुपेक्षायां तद्द्रोहः अनेनैव कृत इति गुरुद्रोहकर्ता भवति. एवं सर्वेषां गुणदोषा निरूपिताः ॥१९॥

---

**प्रकाशः**

ज्ञातं भवतीत्यर्थः. अधमेष्वपि ज्ञानाज्ञानाभ्यां विशेषमाहुः **ये कृतं ने**त्यादि. तथा चाज्ञाने करण(णा!)संभवादज्ञातारोऽल्पदोषाः, ज्ञातारस्तु ज्ञानेऽप्यकरणा-

**लेखः**

**तदुपकारमि**ति दयां धर्मं चेत्यर्थः. **पुरुषार्थसाधक** इति दयाधर्मसम्पादक इत्यर्थः ॥१९॥

**योजना**

भुक्तवन्तं प्रति 'मा भुंक्ष्वे'त्युक्तौ अनुवादएव, तस्य भुक्तवत्त्वाद्भोजनेच्छाया अभावादेव भोजनाभावे सिद्धे 'मा भुंक्ष्वे'ति कथनस्य वैयर्थ्यम्. एवमुभयथापि वैयर्थ्यमिति हार्दं, तस्याप्तकामत्वात्. आप्तकामे 'भुंक्ष्वे'ति कथनं न फल-साधकं यतस्तस्य तृप्तत्वान्न भुंक्ते, 'मा भुंक्ष्वे'ति कथनमपि फलसाधकं न, तृप्तत्वादेव च भोजनाभावस्य सिद्धत्वाद्भोजनाभावविधानमकिञ्चित्करमेवेत्युभ-यथा वैयर्थ्यम्. **प्रवर्तमानस्य धर्म** इति, यो 'भुंक्ष्वे'ति भोजनार्थं प्रेरयति कारुण्याद्यधीनस्तस्य धर्मः सेत्स्यति, परोपकारार्थं प्रवृत्तत्वात्. **अज्ञानं चे**ति, "अयं तु कृतभोजन [1]एनं कुतः भोजनार्थं प्रेरयामी"त्याद्याकारकज्ञानाभाव इत्यर्थः ॥१९॥

---

१. एवं भोजनार्थं कथम् इति मुद्रितः पाठः मांडपाठमनुसृत्य संशोधितः:.

**प्रकीर्णदीपिका**

**प्रतियोगी**[प्रका.] इति, पूर्णकाम इति अर्थः. **स्वरूपं ज्ञातं भवति**[प्रका.] इति, आप्तकामस्य पूर्णत्वं स्वस्य च अज्ञत्वं ज्ञातं भवति इति अर्थः. **दयां धर्मं च**[लेख.] इति, येषां भजने दया धर्मः च भवति तान् पूर्वोक्तान् दीनान् धर्माधिकारिणः च उभयविधान् न भजन्ति ते अकृतज्ञाः ज्ञेयाः. **दयाधर्म...**[लेख.] इति, सएव दयाधर्मसम्पादकः, तान् न भजन्ति ते गुरुद्रुहः इति अर्थः. तदेव उक्तम् **अकरणे अज्ञानसम्भवाद्**[प्रका.](१) इति, दयाधर्मसम्पादकानां भजनाकरणे अज्ञानमेव हेतुः

(१) नात्र प्रामाणिकः पाठो, अस्मन्मुद्रितम् एतत्पुस्तकं द्रष्टव्यम् अत्र.

## प्रकाशः

दधिकदोषा इत्यर्थः. [**तदुपेक्षायाम्** इति, आपत्सहनम् उपेक्षा.] अत्रेदं सिद्धं – शास्त्रीयफलातिरिक्त-लौकिकफलाभिसन्धिपूर्वकं यदितरेतरभजनं तन्मिथोभजनम्. तत्र न धर्मः, पिशाचभिक्षान्यायात्. न सौहृदम्, इतरेणाभिसंहिताप्रतिकरणे क्रोधाद्, अक्रोधेऽपि सौहार्दशैथिल्यस्य लोकसिद्धत्वाच्च. [१]सेवादिदानेष्वपि सेवाकर्तुर्दुःखनिवृत्तिरेव फलं, न तु धर्मः. अतएव पुराणादिषु तन्निन्द्यते. अदाने त्वाशाभङ्गादिना पापमपवादश्च लोकादेवावगम्यते. [२]इदं च निरपवादे तादृग्भजने. संभावितापवादे तु पापमपवादोऽपि. अतस्तत्कर्तारो वणिज इव स्वार्थपराएव. साधनं स्वार्थमात्र-एवोपक्षीयत इति नाममात्रेणैव तस्य धर्मत्वं, न तु वस्तुत इति. अभजद्भजनं तु लौकिकवैदिकभेदेन द्विविधम्. तत्र स्नेहप्रयुक्तं लौकिकम्. तत्र [३]भजतो अभजत्सौहार्दं[४] फलम्. धर्मस्त्वानुषङ्गिकत्वादल्पः. सौहार्दप्रयोजकस्त्वैहिको जन्मान्तरीयो वा सम्बन्धः. तत्रापि जन्मान्तरीयसम्बन्धस्य दुर्ज्ञेयत्वात्संभाविता-

१. सेवादानं कलौ युगे इति पुराणेषु निंद्यते.

२. मूले **अन्यथे**तिपदस्य परोपकाराय नेत्यर्थः. स्वार्थार्थमेव न परोपकारार्थं मिथोभजनभावादिति यावत्. परोपकारविषये द्वितीयस्य.

३. पुरुषस्य.

४. अभजतो भजने सौहार्दं फलम् इति मुं. वि. पाठः.

## प्रकीर्णदीपिका

इति अर्थः. **अत्र इदं सिद्धम्**प्रका. इत्यादिना, "मिथोभजन्ति" इत्यादिश्लोकत्रयाणां समुदायार्थकथने. तत्र **अभिसंहिते**प्रका. इति, मिलने इति अर्थः. **क्रोधाद्**प्रका. इति, यथा इन्द्रद्युम्नं प्रति अगस्त्यक्रोधाद् इति अर्थः. **इति**प्रका. इत्यन्तग्रन्थे प्रथमश्लोकस्य व्याख्यानम्. **स्नेहप्रयुक्तम्**प्रका. इति, स्नेहेन प्रेरितं सौहृदार्थं पुत्रादीनां भजनं तद् लौकिकम् इति अर्थः. **धर्मफलम्**प्रका. इति, पुत्रादीनां भजनकाले सुखजननाद् धर्मफलम् इति अर्थः. **अल्पः**प्रका इति सौहार्दस्य मुख्यत्वाद् इति अर्थः. **प्रयोजकः**प्रका. इति, सौहार्दकरणे प्रयोजकः इति अर्थः. **ऐहिकः**प्रका. इति, अस्मिन्नेव जन्मनि प्रथमतः सम्बन्धः इति अर्थः. **दुर्ज्ञेयत्वाद्**प्रका. इति, ऐहिकः पारलौकिको वा सम्बन्धो न ज्ञायते इति अर्थः. अतो अयं सापवादो धर्मो वा निरपवादः इत्यपि न ज्ञायते. तर्हि कदा ज्ञायेत? इति आशंकायां ज्ञानप्रकारम् आहुः **सम्भावितापवादस्थले**प्रका.



## प्रकाशः

पवादस्थलेऽपवादोऽपि अभजतः[१]. प्रतियोगिनस्तु[२] यथावसरं तत्प्रत्युपकारः कृतघ्नतापरिहाराय कर्तव्यएव. अन्यथा[३] "कृतघ्ने नास्ति निष्कृतिरि"ति शास्त्रान्महादोषः स्यात्. अत[४]एव "वृद्धौ च मातापितरौ साध्वीं भार्यां शिशुं सुतं, गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन्मृत" इत्यादिवाक्यानि. वैदिकं तु विधिप्रयुक्तम्. तच्च कर्मप्रधानदेवताप्रतियोगिकासमानप्रतियोगिकसमान-प्रतियोगिकभेदाच्चतुर्विधम्. तत्राद्यत्रये भजतो धर्मो निःसन्दिग्धः. तुरीयं तु निरपवादसंभावितापवादभेदाद् द्विविधम्. अत्राप्याद्ये निःसंदिग्धो धर्मः. द्वितीये तु प्रतियोगिकृतप्रत्युपकारसंभावनाराहित्ये निरपवादो धर्मो भजतः, संभावितापवादे तु संदिग्धो, नृणामनित्यचित्तत्वात्. [५]अभजतस्तु प्रायश्चित्तं विधेयं स्वार्थं तदर्थं च, यदि तदर्थं न तत्कुर्यात्तदैतद्धर्मो भजति गच्छेत्ततश्च पापभागी स्यादिति. अभजन्तस्तु यद्यात्मारामा आप्तकामा वा तदा निर्दोषा एव. तत्राद्यप्रतियोगिकं साधनं धर्मे उपयुज्यते. द्वितीयप्रतियोगिकं तु भजतोऽज्ञतां ज्ञापयद्भ्यर्थमेव. संभावितापवादे तु निर्बन्धेन प्रवृत्तौ दोषमप्युत्पादयति भजतः. यदि चाभजन्तो नैतादृशास्तदापि उपकाराज्ञाने

१. पुरुषेण. २. भजनकर्तुः. ३. प्रत्युपकाराभावे.
४. कृतघ्नतापरिहारार्थमेव. ५. अभजतः पुरुषस्य तु प्रायश्चित्तं भजनकर्त्रा विधेयम्.

## प्रकीर्णदीपिका

इति, यदा भजनीयः सौहार्दलक्षणं प्रत्युपकारं करोति तदा तत्स्थले भजनकर्तुः अपवादोऽपि भवति इति अर्थः. **प्रतियोगिनस्तु**प्रका. इति, अभजतो भजनकर्ता तस्य इति अर्थः. **वैदिकम्**प्रका. इति, भजनम् इति अर्थः. **प्रतियोगिक...**प्रका. इति, देवताभजनकर्ता इति अर्थः. **असमान...**प्रका. इति, गोः पङ्कोद्धारकर्ता. **समान...**प्रका. इति, प्रत्युपकारं कर्तुं समर्थः इति अर्थः. **नृणाम् अनित्यचित्तत्वाद्**प्रका. इति, भजनकाले निरपवादभावः कालान्तरप्रत्युपकारं गृह्णातीति अनित्यचित्तत्वम् इति अर्थः. **प्रायश्चित्तम्**प्रका. इति, यथा वासुदेवविप्रेण कृतम् इति अर्थः. **धर्मः**प्रका. इति, तीर्थाटनादिधर्मः इति अर्थः. **स्याद् इति**प्रका. इत्यन्तो द्वितीयः. **सम्भावित...**प्रका. इत्यारभ्य **भजतः** इत्यन्तग्रन्थः पूर्वं गोपिकानां प्रश्ने, सुबोधिन्याम् "अभजतो भजने क्वचिद् दोषः स्याद् यथा निष्कामे कामिनी" इत्यत्र उक्ताभिप्रायेण अत्रापि अभजतो भजनप्रस्तावे

151

गोपिकानां हृदये भगवानेतन्मध्ये क इति जिज्ञासायाम्— अभजनकर्तृत्वाद् भजनसामर्थ्यस्यापि विद्यमानत्वान्मिथोभजनपक्षः अभजनभजनपक्षश्च व्यावर्तितः. ननु द्वितीये पक्षे गोपिकानां भजने स्नेहाद्

---

### प्रकाशः

अज्ञताप्रयुक्तदोषभाजः, ज्ञात्वा प्रत्युपकाराकरणे गुरुद्रोहिण इति ॥१९॥

**नाहमि**त्यत्र, एवं भगवति भजनसामर्थ्यसत्तया भक्तानां धर्मार्थ-भजनपक्षव्यावृत्तावपि स्नेहाद्भजनस्याव्यावर्तितत्वात्तत्र भक्तानां प्रवेशे शिष्टानां वाक्यानामसङ्गतिरित्यतस्तमपि[1] व्यावर्तयितुमुद्भावयन्ति **नन्वि**त्यादि.

### योजना

**ननु द्वितीयपक्षे** इति, "भजतोनुभजन्त्येक एक एतद्विपर्ययमि"ति प्रश्ने द्वितीयो यो अभजद्भजनकर्ता तत्कर्तृकभजनपक्षगः[2] इत्यर्थः. **गोपिकानां भजन** इति गोपि-काकर्तृकभगवद्भजन इत्यर्थः. **स्नेहाद्भजनमस्तु** इति, गोपिकाकर्तृकं भजनं स्नेहभजनमस्त्वित्यर्थः. **गोपिका भोग्या** इत्यारभ्य

---

१. तामपि इति मुं. वि. पाठः.

२. पक्ष इति मुद्रितपाठः मांड.पाठमनुसृत्य संशोधितः.

### प्रकीर्णदीपिका

उक्तो ज्ञेयः. यथा अभजतो वासुदेवविप्रस्य भजने दोषे सती जाता तथा अत्रापि आत्मारामस्य भजने दोषो भवति इति भावः. **नैतादृशाः**[प्रका.] इति, अभजनकर्तारो न आत्मारामादिसदृशाः, केवलदीनाः धर्माधिकारिणः च इति अर्थः. **द्रोहिणः इति**[प्रका.] इत्यन्तः तृतीयः ॥१९॥

**नाहम्**[भाग.] इत्यस्य आभासे **गोपिकानां हृदये**[सुबो.] इति, "सभाजयत्वि" इत्यत्र 'अनङ्गदीपन' पदस्य अर्थविचारे पूर्वमपि विचारः उत्पन्नो— अस्मद्दोषेण स्वदोषेण वा त्यक्ता! – इति, तदुत्तरजातं निर्धारयन्ति. तदनुवादः श्रीमदाचार्यैः कृतो **अभजन...**[सुबो.] इत्यादिना. तत्र भजनसामर्थ्यस्यापि विद्यमानत्वाद् अभजनकर्तृत्वात् मिथोभजनपक्षो अभजद्भजनपक्षः च व्यावर्तितः इति अन्वयः. तेन भगवति दोषो निर्धारितः सोऽपि परिहृतो **ननु**[सुबो.] इत्यादिना. **भजनसामर्थ्यासत्तया**[प्रका.](१) इति, अभजनकर्तृत्वाद् असामर्थ्यम् उक्तम् इति ज्ञेयं नतु सामर्थ्याभावः इति भावः. **शिष्टानाम्**[प्रका.] इति, "नाहन्तु" इत्यादीनाम् इति अर्थः. **तमपि**[प्रका.] इति, स्नेहभजनपक्षम् इति अर्थः.

(१) भजनसामर्थ्यसत्तया इति शुद्धः पाठः.



भजनमस्तु, अतो भगवान् निरूपकत्वेन नैषामन्तर्भूतः ईश्वरश्च नैषामन्तर्भवतीति कथमेवं विचार इति चेत्, मैवम्. गोपिका भोग्या इत्यविवादम्. ताश्च भोग्यसमर्पकत्व एवोपक्षीणाः. अतो भगवतएव विचारः कर्तव्यः. ईश्वरोऽपि

---

### प्रकाशः

**निरूपकत्वेने**ति स्नेहविषयतया भजनप्रयोजकत्वेन. **एषामि**ति आत्मारामादि-चतुर्णाम्. तथा च बालादिवदविचार्यएवेत्यर्थः. [**नैषामि**ति, **एषां** गोपिकानाम् अन्तःकरणेन **अन्तर्भूतः ईश्वरः एषां न अन्तर्भवति** (इति!) कथं विचार इति चेत्, मैवम्.] ननु सामर्थ्यसत्तायां तेऽपि विचार्याएवेत्यत आहुः **ईश्वरश्चे**त्यादि. अत्र प्रतिभजनशङ्कायाएवाभावात् पञ्चमोऽयमिति तथेत्यर्थः. [**नैषामि**ति, **न एषां** जीवानां अन्तर्भवतीति.] तथा च भजद-भजतोरुभयोरप्यविचार्यत्वादेव प्रश्नोत्तरसिद्धावग्रिमवाक्यानां न सङ्गतिरिति शङ्काग्रन्थाशयः. अत्र समादधानाः सङ्गतिं व्युत्पादयन्ति **मैवमि**त्यादि. **उपक्षीणा** इति, तावतैव तादृग्भजनसिद्धेर्न विचारार्हा इत्यर्थः. [**भगवत एवे**ति, भोग्यं सर्वं भोगाय समर्पितं तदा विचारः कः? अतो भगवतो विचारः

### लेखः

**भजनसामर्थ्यस्ये**ति, सामर्थ्याभावे तु गोः पङ्कोद्धारणवदविवक्षितत्वमेव स्यादिति भावः. **नन्वि**ति, द्वितीयपक्षस्था गोपिका भवन्तु, भगवांस्तु

### योजना

**उपक्षीणा** इत्यन्तम्. गोपिकाभिर्भजनं यत्कृतं तद्गोपिकानां भोग्यत्वाद्भोग्य-समर्पकत्वे उपक्षीणम्, भोग्यत्वसिद्धये देहादीनां भगवदुपयोगः कृतः कृतात्म-निवेदनत्वात्[1]. एतावतै**वोपक्षीणाः** प्रतिभजनावश्यकत्वानर्हा इत्यर्थः. **ईश्वरोपी**त्यारभ्य **न विचार्य** इत्यन्तं, फलार्थं सेव्यमानादीश्वरात् फलं प्राप्त-व्यम् नतु तत्कर्तृकभजनापेक्षेति भजनाभजनयोस्तदीययोर्न विचारः कर्तव्य

---

१. कृतात्मनिवेदितत्वात् इति मुद्रितः पाठः. मुं. वि. पाठः गृहीतः.

### प्रकीर्णदीपिका

**अतः**[सुबो.] इति, यतो गोपिकानां भजनसिद्ध्यर्थं प्रथमतः स्वयं भजनं करोति, अतो न लौकिकात्मारामादिसदृशो भगवान् इति अर्थः. **बाला...**[प्रका.] इति, "पितरो यथा" इत्यत्र उक्ताः ज्ञेयाः. **पञ्चमो अयम्**[प्रका.] इति, आत्मारामाद्यतिरिक्तो "नाहन्तु" इत्यत्र उक्तो भजदभजनकर्ता इति अर्थः. **तथा**[प्रका.] इति, अविचार्यः इति अर्थः. **उभयोः**[प्रका.] इति, उभयोः मध्ये

फलार्थं सेव्यश्चेत्, न विचार्यः. व्यवहारे दृष्टार्थश्चेद्, दीयमानग्रहणाग्रहणाभ्यां विचार्य एव. पूर्वं गृहीतत्वात् नात्मारामता, नापि पूर्णकामता. प्रथमप्रवृत्त्या तृप्तावपि परित्यागो नोचितः. ततस्तृतीयपक्ष एवाभिनिवेश उचितः. तदपि सर्वज्ञस्यानुचितम्, ईश्वराणां फलदातॄणां कदाचिदेवं भवतीति – शङ्कायाः

**प्रकाशः**

कर्तव्यः.] नन्वीश्वरत्वाद्भगवानविचार्य इत्यत आहुः **ईश्वरोऽपीत्यादि**. **नोचित** इति, कालान्तरेऽपेक्षया नोचितः. **तृतीयपक्ष** इति अकृतज्ञतादौ. [पूर्वमस्माकं ग्रहणं, तेन न आत्मारामता नापि आप्तकामता. आप्तकामानाम् अस्माकं ग्रहणे को(क्वो!)पयोगः? अतः तृतीये अकृतज्ञे अभिनिवेशः उचितः.]

**लेखः**

कस्मिन्नपि पक्षे नान्तर्भवतीत्यर्थः. **प्रथमे**ति, पूर्णकामत्वेन तृप्तौ सिद्धायामपि परित्यागो नोचितः, तत्र हेतुः **प्रथमप्रवृत्त्ये**ति, परित्यागे करिष्यमाणे प्रथमत एव प्रवृत्तिः किमर्थं कृतेत्यर्थः. **नाहं त्वि**त्यत्र, **अहं राम एवे**ति, **अहं** तु

**योजना**

इत्यर्थः. **व्यवहारे दृष्टार्थश्चे**दित्यारभ्य **विचार्य एवे**त्यन्तम्. भजनकर्ता दृष्टमेव पश्वादिरूपं फलम् अर्थो यस्य एतादृशश्चेत्तदा दृष्टं फलं चेन्न प्राप्तं तदा भजनविषय ईश्वरो विचार्यः– किमस्माभिः कृतायां पूजायां ह्यर्पितान् गन्धाद्युपचारानीश्वरो गृहीतवान्नवेति. यदि गन्धाद्युपचारा गृहीताः स्युस्तदास्मन्मनोभिलषितं स्यात्. तस्मान्न गृहीतवानित्येका कोटिः, शास्त्रोक्तयथावदुक्तमर्यादया कृतत्वाद्गृहीतवानेवेति द्वितीया कोटिः– एवं कोटिद्वयोपस्थितौ निर्णयसिद्ध्यर्थमीश्वरो विचार्य एव. ननु भगवानात्मारामः, तस्य प्रयोजनाभावाद्भवतीनां भजने प्रतिभजनं न कुर्यादेवेति किमर्थमत्र भजनाभजनविचार इत्याशङ्क्याहुः **पूर्वं गृहीतत्वान्नात्मारामता नापि पूर्णकामते**ति. अस्मत्समर्पितस्य देहादेः पूर्वं गृहीतत्वाद् अङ्गीकृतत्वान्नात्मारामता किन्तु व्रजसुन्दरीगणविहारैकतानतेत्यर्थः. अत एव पूर्णकामतापि नास्तीति भावः. ननु मास्त्वात्मारामता पूर्णकामता वा, तथापि पूर्वरमणस्य कृतत्वात्तृप्तो भगवान्न रमते, किमत्र दूषणमित्याशङ्क्याहुः **प्रथमप्रवृत्त्या तृप्तावपि परित्यागोऽनुचित** इति. पूर्वकृतेन रमणेन तृप्तिरास्तां नाम, परन्त्वस्माकं परित्यागस्त्वनुचित एवेति भावः.



परिहारमाह [1]**नाहं तु सख्य** इति.

**नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तिवृत्तये ।**
**यथाधनो लब्धधने विनष्टे तच्चिन्तयान्यन्निभृतो न वेद ॥२०॥**

**तु**शब्दस्तं पक्षं व्यावर्तयति. नापीश्वरभजनपक्षः शङ्कनीय इत्याह **सख्य** इति, गोपिकास्तु **सख्यः** रसे तुल्याः एकार्थाभिनिवेशाश्च. **अहमि**ति भगवान् न तु जीवः, तेन आत्मारामादिपक्षा व्यावर्तिताः. अहं राम एव, न

**प्रकाशः**

**ईश्वराणामि**त्यादिना द्वितीयापि कोटिर्वारिता तेन[2] भगवद्धर्मसंदेहएव पर्यवसन्न इति तन्निवृत्त्यर्थानि वाक्यानीति नासङ्गतिरित्यर्थः. **तं पक्षमि**ति पूर्वोक्तकोटिपञ्चकम्. [जीवपक्षं व्यावर्तयति, जीवस्मात् (जीवाद्!) व्यतिरिक्ता व्यवस्था भगवतो ज्ञेया.] **न तु जीव** इत्यनेनाकृतज्ञत्वादिव्यावृत्तिः. तथाप्यात्मारामत्वादेर्भगवति श्रौतत्वात्कथं तद्व्यावृत्तिरित्याकांक्षायां तद् व्युत्पादयन्ति **तेने**त्यादि. तथा च शुकादिभिः स्वप्रतिष्ठत्वेन [3]आत्मारामत्वाय

**योजना**

**नाहं तु सख्य** इत्यस्य विवृतौ, ननु ईश्वरोऽपि प्रतिभजनं फलदानादिना करोत्येवेति वयमपि प्रतिभजनं प्रतीक्षामह इत्याशङ्क्याहुः **नापीश्वरभजनपक्ष** इत्यादि. तत्र हेतुः **सख्य** इति– "यतो भवतीभिः फलमुद्दिश्य भजनं न कृतं किन्तु शुद्धपुष्टिरीत्या कृतम् अतः फलदानादि मयापि न कृतम्. अपि च भवतीनां मयीश्वरबुद्ध्यभावात्सख्यमात्रेण रमणं

१. मर्यादामार्गे भजनं न करोति. २. तेन च भगवद्धर्मसन्देहः इति मांड. पाठः.
३. रामत्वाय इति मुद्रितपाठः मांडपाठमनुसृत्य संशोधितः.

**प्रकीर्णदीपिका**

भगवान् अविचार्यः इति अर्थः. **द्वितीया...**[प्रका.] इति, आत्मारामाः सकामरूपाः इति प्रथमा कोटिः, अकृतज्ञादिरूपा इति द्वितीया ज्ञेया. **पूर्वोक्तकोटिपञ्चकम्**[प्रका.] इति, व्याख्याने "भजतोऽनुभजन्त्येके" इत्यत्र [1]"मिथो भजनकर्त्रोः कीदृक् स्वरूपम्?" इति प्रश्नरूपा एका कोटिः, "एक एतद्विपर्ययम्" इत्यत्र [2]अभजद्भजनकर्तुः, [3]तस्य अभजतः च किं फलम्? "नोभयांश्च भजन्त्यन्ये" इत्यत्र [4]भजदभजनकर्तॄणाम् आत्मारामादीनां; [5]तेषाञ्च भजनकर्तॄणां किं फलम् इति पञ्चकोट्यः. **शुकादिभिः**[प्रका.] इत्यादेः, अयम् अर्थः–शुकादीनाम् आत्मनि

त्वात्मारामः. ममात्मव्यतिरिक्तपदार्थाभावान्न व्यावर्त्यमस्ति. कामाभावादेव नाप्तकामत्वम्. अतो मम भिन्नैव व्यवस्था, न तु जीवतुल्यता. **नाहं तु सख्य** इति तामेव व्यवस्थामाह— **भजतोऽपि जन्तून् अहं न भजामि.** तत्रान्य एव हेतुः **अमीषामनुवृत्तिवृत्तय** इति, **अमीषां** जीवानाम्. **जन्तु**पदेन

---

**प्रकाशः**

तथोच्यते, न तु व्यावर्त्यव्यावृत्तय इति न स पक्ष इत्यर्थः. [**न त्वात्माराम** इति. यदा ममातिरिक्तोऽन्योस्ति तदा तं विहाय आत्मनि रमन्ति(!) तदा आत्मारामता. तत्तु नास्ति अतो आत्मारामता नास्ति किन्तु रामता एव.] एवं "सोऽकामयते"त्यादावभिध्यैवोपदिश्यते, न तु काम इति. "न ह्यपुत्रः पण्डितपुत्रो भवती"तिन्यायेन सोऽपि पक्षो निरस्तो बोध्यः. [**अमीषामनुवृत्ति-**

**लेखः**

**रामएव,** स रमते सर्वत्रैव तादृशएवेति. बाहुलकात् कर्तरि घञ्. **ममात्मे**ति, जीवानामात्मानात्मविवेकोऽस्ति, मम तु देहादिकं विषयाश्चात्मरूपा एवेत्यर्थः.

**योजना**

कृतमिति न तत्र प्रतिभजनापेक्षे"ति भावः. **नत्वात्मारामः ममात्मव्यतिरिक्त-पदार्थाभावान्न व्यावर्त्यमस्ती**ति. **आत्माराम**पदे **आत्म**शब्देनात्मन्येव रमते नान्यत्रेत्युच्यते, तथा **चात्म**शब्दस्याव्यावर्तकत्वमस्ति[1], अतः आत्मारामत्वं भगवति नास्ति, "आत्मैवेदं सर्वं, स सर्वं भवती"त्यादिश्रुतेर्भगवतः सर्वरूपत्वे**नात्मव्यतिरिक्तपदार्थाभावाद्** आत्मन्येव रमते नान्यत्रेति व्युत्पत्तेः

---

१. आत्मशब्दस्यान्यव्यावर्तकत्वमस्ति इति मुद्रितः पाठः. मुं. वि. पाठः गृहीतः.

**प्रकीर्णदीपिका**

स्थित्वा भगवान् रमते, अतो भगवान् 'आत्मारामः' इति उच्यते इति अर्थः. **नतु व्यावर्त्यव्यावृत्तये**[प्रका.] इति, भगवतितु "अयम् आत्मा भिन्नो अस्ति – तस्मिन् अहं (न!) रमे" इति भेदो नास्ति. अतः शुकादिभिः न व्यावर्त्यव्यावृत्तये 'आत्मारामः' इति उच्यते इति अर्थः. तद् उक्तं **मम**[सुबो.] इत्यादिना. **न स पक्षः**[प्रका.] इति, आत्मारामेति पक्षो न इति अर्थः. **एवम्**[प्रका.] इति, वेदे "सोऽकामयत" इति **अभिध्यैव उपदिश्यते**[प्रका.] इति, कथनमात्रेण उपदिश्यते इति अर्थः. तत्र दृष्टान्तम् आह **नहि**[प्रका.] इत्यादि. **सोऽपि पक्ष**[प्रका.] इति, आत्मकामपक्षः इति



प्राणिमात्रम्. भगवतो न केनाप्युपयोगः, भगवान् फलरूप इति सर्वेषा-मेवोपयोगः. तथा सति तेषां भजनमेव इष्टमिष्टसाधनं वा. तत्राहं चेत् साधनत्वेन प्रविशामि तदा भजनमेव नाशयामि, अग्रे भजनस्य प्रतिबन्धात् पूर्वभजनस्य च वैयर्थ्यापादनात्. चतुर्धा हि भगवदुपयोगः— भगवान् भोग्यो भोक्ता वा, भोग्यपक्षे कामनापूरकत्वेन स्वातन्त्र्येण वा, भोक्तापि भक्त्या

---

**प्रकाशः**

**वृत्तय** इति. **अमीषां** जीवानां यथा मयि **अनुवृत्तिः** भजनबुद्धिर्भवति अतो अहं न भजामि. मम भजने तु तेषा**मनुवृत्तिः** अंतरायः.] **तत्रे**ति भजनस्येष्ट-साधनत्वपक्षे. [**वैयर्थ्यापादना**दिति, **पूर्वभजनस्य** क्रियमाणभजनस्य तुच्छफल-

**लेखः**

**इष्टमि**त्यनेन फलरूपं भजनमुक्तम्, **इष्टसाधनमि**ति साधनरूपम्. कामनापूरकत्वेन भोग्यत्वपक्षे विषयत्वेन भोक्तृत्वपक्षे चेष्टसाधनत्वम्, इतरयोः पक्षयोरिष्टत्वमिति विभेदः. **तत्रे**ति, उभयोर्मध्ये **साधनत्वेन** भजने क्रियमाणे **चेदहं प्रविशामि,** कामपूरकत्वेनेति शेषः, तदा कामभोगे**नाग्रे भजनप्रतिबन्धा**द्भजनं नश्येदित्यर्थः. भगवतएवेष्टत्वात् तत्साधनत्वं भजनस्य न जातमेवेति भावः. **वैयर्थ्यापादना**दिति, नित्यफलासाधकत्वे भजनफलं न सिद्धमेवेत्यर्थः. एतदेव विशदयन्ति **चतुर्धा ही**ति— **भगवानि**ति, भोग्यत्वेन भोक्तृत्वेन वा भगवदुपयोग इत्यर्थः. **कामने**ति, परिरम्भादिभिरभिलाषां

**योजना**

असम्भवादित्यर्थः. **चतुर्धा हि भगवदुपयोग** इति, भोग्यत्वेन द्वेधा भोक्तृत्वेन च द्वेधेत्येवं चतुर्धेत्यर्थः. तत्र भोग्यत्वे प्रकारद्वयं— **कामनापूरकत्वेन**

---

**प्रकीर्णदीपिका**

अर्थः. **नाहम्**[भाग.] इत्यत्र **जीवानाम्**[सुबो.] इति, "अमीषां व्रजीयजीवानाम् अनुवृत्तिवृत्तये परोक्षभजनं करोमि" इति योज्यम्. एतदर्थो **न पारयेऽहम्**(श्लो. २१) इत्यस्य टिप्पण्याम् आभासे "प्रकृते" इत्यादिना उक्तो द्रष्टव्यः. **प्राणिमात्रम्**[सुबो.] इति, 'प्राणिमात्र'शब्देन "साधनमार्गीयजीवान् भजतोऽपि नाहं भजामि, तेषान्तु फलं दत्त्वा निश्चिन्तो भवामि" इति योज्यम्. एतदर्थोऽपि तत्रैव टिप्पण्यां "साधन..."[टिप्प.] इत्यादिना "अग्रे निरुध्य"[टिप्प.] इत्यादिना उक्तो द्रष्टव्यः ॥२०॥

भक्तदत्तपदार्थस्वीकाराद् विषयत्वेन भोगाद्वा. आद्ये भजनं नश्येद्, अल्पफलदानात्, स्वरूपतो महत्त्वेऽपि कालपरिच्छेदात्. द्वितीये तु तथात्वमतिभजनेन भवति, तद् गोपिकानां नास्तीति तत्सिद्ध्यर्थमभजनम्.

**प्रकाशः**

त्वाद् वैयर्थ्यम्. **स्वातन्त्र्येणे**ति, स्वातन्त्र्यं गोपिकावद् रसरूपत्वेन. **आद्ये** विषयत्वे. **कालपरिच्छेदादि**ति समयान्तरविनाशि. **तथात्वं** भोग्यत्वम् **अतिभजनेन भवति. तद्** अतिभजनं **गोपिकानां नास्ति** अतो अपेक्षाकृता अभजनता कृता.] **पूर्वमुक्तमि**ति अनुपदमेव **द्वितीये त्वि**त्यादिनोक्तम् ॥२०॥

**लेखः**

कामिन्याः पूरयतीत्येवं तद्भोग्यो भवतीत्यर्थः. **स्वातन्त्र्येणे**ति, भक्तो यथैवेच्छति तथैव स्वरूपानन्दमनुभवतीत्यर्थः. **भक्त्ये**ति हेतौ तृतीया, **भक्तदत्तपदार्थस्वीकारात्** तस्य भक्तिसिद्ध्यर्थं तद्दत्तपदार्थ**भोक्ते**त्यर्थः. **विषयत्वेने**ति, काममात्रपूरकत्वे भोग्यत्वं स्वेच्छया भोगे भोक्तृत्वमिति भावः. **निभृतानामि**ति, स्वातन्त्र्येण भगवतो भोग्यत्वं **प्रयोजनं** फलमित्यर्थः ॥२०॥

**योजना**

**स्वातन्त्र्येण चे**ति. भोक्तृत्वे प्रकारद्वयं– **भक्त्या भक्तदत्तपदार्थस्वीकारेण विषयत्वेन भोगे**न चेति. एवं चतुर्धा. **आद्ये भजनं नश्येते**ति, कामनापूरकत्वेन भोग्यत्वपक्षे इत्यर्थः. कामनापूरकत्वेन यदि भगवान् भोग्यः स्यात्तदा जीवकामनायाः[1] अल्पत्वात्तावत्कामनापूर्तौ अग्रे प्रयोजनाभावाद्भजनं न स्यादित्यर्थः. अतो भजनं नश्येतेत्यर्थः. तत्र हेतुमाहुः **अल्पफलदानादि**ति, अल्पफलं प्राप्य कामनाया निवृत्तौ भजनानुवृत्तिर्न स्यादित्यर्थः. ननु भगवतस्त्वगणितानन्दत्वात्कामनापूर्त्यर्थमपि भगवत्सम्बन्धे पूर्णानन्दानुभवएव भविष्यतीति किं बाधकं कामनापूरकत्वेन भोग्यत्व इत्याशङ्क्याहुः **स्वरूपतो महत्त्वेऽपि कालपरिच्छेदात्**, भगवतः **स्वरूपतो महत्त्वं** पूर्णानन्दत्वं यद्यप्यस्ति तथापि **कालपरिच्छेदात्** कालेन कामनाविषयस्य रमणस्य परिच्छेदात्तावता रमणेन मनोरथपूर्तौ अग्रे भजनानुवृत्तिर्न स्यादित्यर्थः. **द्वितीये त्वि**ति, द्वितीये पक्षे स्वतन्त्रत्वेन भोग्यत्वपक्षे इत्यर्थः. **अतिभजनेन भवती**ति, अहर्निशं विप्रयोगसंयोगभेदेन चेदतिभजनं कुर्युः तदा स्वतन्त्रत्वेन फलरूपतया भोग्यत्वं भगवतो

१. तदातीव कामनाया इति मुद्रितः पाठः.मुं. वि. पाठः गृहीतः.



अपेक्षाभावात् नाहं विषयन्यायेन भोक्ता. भक्त्यर्थं तु अभजनमेवेति सिद्धान्तसङ्ग्रहः. यथा अभजने अनुवृत्तिः सिध्यति तथा प्रकारमाह **यथाधन** इति. पूर्व**मधनः** पश्चाल्लब्धं **धनं** तच्चे**द्विनष्टं** तदा **तच्चिन्तया** व्याप्तः **निभृतः** तदेकनिमग्नः सन् **अन्यन्न वेद**– एतत्तु लोकप्रसिद्धम्. तथा गोपिकानामपि पूर्वमप्राप्तो भगवान् प्राप्तश्चेत्तिरोभवति, तदा निभृताः तत्रैव मग्नचित्ताः न प्रपञ्चं स्मरिष्यन्ति. निभृतानां प्रयोजनं पूर्वमुक्तमेव ॥२०॥

एवं स्वस्याभजने हेतुमुक्त्वा प्रकृते तदभावमाह **एवमि**ति.

**एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः ।**
**मया परोक्षं भजता तिरोहितं मासूयितुं नार्हथ तत्प्रियं प्रियाः ॥२१॥**

यदुक्तं ताभिररण्ये स्त्रियो रात्रौ कथं त्यक्तव्याः तदर्थमेवमुच्यते. द्वयमत्र कर्तव्यं– भजनानुवृत्त्यर्थमभजनं, रात्रौ रक्षार्थं भजनं च. तत् परोक्षभजनेन सिध्यतीति **मया परोक्षं** [1]**भजता तिरोहितम्.** भजने हेतुमाह **एवमि**ति, **मदर्थमेव उज्झिता लोकवेदस्वा** याभिः. वृथापरित्यागव्यावृत्त्यर्थं मोक्षार्थपरित्यागव्यावृत्त्यर्थं च **मदर्थमुज्झिते**त्युक्तम्. आद्ये त्यागोऽनिष्टहेतुः,

**प्रकाशः**

**एवं मदर्थे**त्यत्र, [आभासे **तदभावमिति, तद्** (इति!) अभजनस्य **अभावमाह.** व्याख्याने **यदुक्तमि**ति "कस्त्यजेन्निशि" इति पूर्वम्. **परोक्षभजनेने**ति, **परोक्षभजनं** तिरोहितलीलया भजनम् अतिरोहितं, तेन. **मोक्षार्थे**त्यादि, निषेधो **व्यावृत्तिः**, तस्यार्थं **मदर्थोज्झिते**त्युक्तम्, अन्यथा

**लेखः**

**एवमि**त्यस्याभासे. **तदभावमि**ति अभजनाभाव**माह,** अहं तु भजन्नेव

**योजना**

भवतीत्यर्थः. अतो विप्रयोगदानार्थं भगवता तिरोहितमिति भगवतः सरणिरन्यैव, नतु आत्मारामादिषु चतुर्ष्वन्तर्भाव इति भावः. अतः परं विषयन्यायेन भोक्तृत्वेन उपयोगं दूषयन्ति **अपेक्षाभावादि**त्यादिना. **भक्त्यर्थं त्वि**ति, भक्त्या दत्तस्य पदार्थस्य भोक्ता भवतीति पक्षे तु **भक्त्यर्थं** निरन्तरभक्तिसिद्ध्यर्थ**मभजनं** भगवता कृतमतो यदा निरन्तरं भक्तिर्भविष्यति तदा भोक्ता भगवान् भविष्यतीति भावः ॥२०॥

१. भजतातिरोहितम् इति ब. पाठः.

द्वितीये न मम भारः. त्रयः पदार्थास्त्यक्तव्याः. लोको दुस्त्याज्यः. आर्यमार्गो वैदिकः, प्रकारस्तादृश इति, मयैव लोके तथैव प्रतीतिजननात्. पतिपुत्रादयो दुस्त्याज्याः. तत्रापि न मयि प्राप्ते, किन्तु **मदर्थे** मत्कामनायामेव, तदा मे विचिकीर्षितो भवतीति. "सर्वधर्मान् परित्यज्ये"ति तादृश एव मम भाव इति त्रितयपरित्यागे मया भजनं कृतम्. [1](वस्तुतस्तु **स्व**पदं स्वात्मपरम्, अन्यथा पतिपुत्रादीनामपि लोकवेदमध्यपातात्तैनैव तत्प्राप्तेः **स्व**पदमनर्थकं

## प्रकाशः

**उज्झितेत्**युक्तं भवति. **आद्ये** इति वृथापरित्यागे. **द्वितीये** इति, मोक्षार्थपरित्यागे **ममो**परि **न भारः. त्रय** इति, लोकवेदस्वकीयत्वं च त्रयः. **लोक** इति, प्रथतः(मः?) लौकिको दुस्त्याज्यः. **तादृश** इति दुस्त्याज्यः. **तथैव** दुस्त्यजैव. **तत्रापी**ति, **तत्रापि मयि प्राप्ते न** त्याज्या **किन्तु मदर्थे एव** कामनामात्र एवेति.] **मे विचिकीर्षित** इति विशिष्टः सर्वाधिकश्चिकीर्षितः, "यदा पुमांस्त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे" इति वाक्यादित्यर्थः. [ **विचिकीर्षितो** कर्तुमिच्छागोचरो, "मया अस्य किं कर्तव्यमि"ति.

## लेखः

स्थित इत्यर्थः. व्याख्याने. **तादृश इती**ति, दुस्त्याज्य इत्यर्थः. तस्य दुस्त्याज्यत्वे हेतुमाहुः **मयैवे**ति. **विचिकीर्षितो भवती**ति, कृतिर्लीला तदिच्छाविषयो भवतीत्यर्थः. तस्मिन् लीलां कर्तुमिच्छामीत्यर्थः. **वः युष्मानि**ति. **व** इति

## योजना

**आद्ये त्यागोऽनिष्टहेतुरि**ति, वृथा त्यागो विध्यभावात्त्याज्यानां दुःखसम्पादकत्वाच्चानिष्टहेतुरित्यर्थः. **द्वितीयेन मम भार** इति, **द्वितीयेन** मदर्थत्यागेनेत्यर्थः. मदर्थत्यागेन हेतुना ममोपरि भवतीनां **भारः** मयि ऋणित्वमित्यर्थः. तथा च ऋणित्वपरिहारार्थं परोक्षभजनं कुर्वता मया तिरोहितमित्यर्थः. वस्तुतस्तु भवतीनामृणी भवाम्येवेत्यग्रिमश्लोके वक्ष्यते ॥२१॥

---

१. ( ) चिह्नान्तर्गतं प्रभूणाम्.

### प्रकीर्णदीपिका

**एवं मदर्थ...**[माग.] इत्यत्र, **त्रयः पदार्थाः त्यक्तव्याः**[सुबो.] इति उक्तं, तत्र, 'स्व'पदस्य अर्थः **पतिपुत्रादयो दुस्त्याज्याः**[सुबो.] इति उक्तः, तदर्थे अरुचिं मत्वा **वस्तुतस्तु**[सुबो.] इत्यादिना,



स्यात्. तथा च स्वात्मत्वेन स्नेहविषयत्वाभावएव तत्त्यागः, एतासां भगवदर्थत्वेन प्रीतिविषयत्वादात्मादीनामिति सारम्.) (**हि!**) युक्तश्चायमर्थो, अनन्याः पालनीया इति. **वः** युष्मान्. **मय्यनुवृत्तय** इत्येकं फलम्. **अबला** इति सम्बोधनात् न सतामिव प्रत्यक्षेण भवतीनां भजनं सिध्यतीति ज्ञापितम्. **परोक्षं भजता अतिरोहितं** वा. भजनं भोगो वा, भोक्त्रैव **मया** भोगं कुर्वता **तिरोहितं** भवतीभिर्न दृष्ट इत्यर्थः. अनेनाभजनपक्षो व्यावर्तितः. तस्मिन् सत्यसूया सम्भवति अकृतज्ञत्वादिदोषारोपणेन, **मा** माम् **असूयितुं नार्हथ.** यतः **प्रियम्,** प्रिये दुष्टे स्वस्यापि तथात्वस्यावश्यकत्वात् त्यक्तुमशक्यत्वात्. किञ्च **प्रिया** यूयम्. कृतज्ञत्वादयो हि धर्मा न प्रीतिविषये

---

## प्रकाशः

**स्वात्मपरमि**ति, न तु पतिपुत्रादिपरम्. **तत्त्यागः** इति आत्मत्यागः. **प्रीतिविषयत्वादि**ति, आत्मादीनां यद्धर्मः तत् स्वार्थे त्यक्तं, तत्पालनादिकं भगवदर्थएवेति स्वत्यागः. **युक्तश्चायमर्थः** इति **ही**ति. **इत्येकमि**ति, इति एकं फलम्. **सतामिव** ज्ञानिनामिव. **व्यावर्तितः** निवर्तितः. **तस्मिन्** अभजनपक्षे. **मा मामि**ति, **मा** इति **माम्. तथात्वस्ये**ति, दुष्टत्वम् अवश्यम्. **आवश्यकत्वादि**ति, यथा दुष्टेऽप्यासक्तिः दुष्टत्वं करोति. **धर्मा** इति, **कृतज्ञत्वादि**अकृतज्ञत्वादि**धर्मा प्रीतिविषये** न प्रतीयते(न्ते!) न गण्यन्ते, औदासीन्ये भव(वं!)ति.] ॥२१॥

## लेखः

पदमावृत्तमेकत्र षष्ठ्यन्तमेकत्र द्वितीयान्तम्. तथा च त्यक्तलोकादीनां युष्माकमेवमभजनसिद्धानुवृत्तिप्रकारे**णानुवृत्तये वः** युष्मान् **परोक्षं भजता तिरोहितमि**त्यन्वयः ॥२१॥

---

### प्रकीर्णदीपिका

उक्तः 'स्व'पदस्य अर्थो ज्ञेयः. **एकं फलम्**[सुबो.] इति, "**वो** युष्माकम् अनुवृत्तये इति एकं षष्ठ्यन्तं फलं, **वो** युष्मान् परोक्षं भजता तिरोहितम् इति द्वितीयं तं फलम्" इति योज्यम्. **न सतामिव**[सुबो.] इति, सतां यथा मम प्रत्यक्षमात्रेण फलसिद्धिः भवति, न तथा भवतीनां किन्तु विप्रयोगेणैव अनुवृत्तिरूपं फलं भवति. तत्करणे भवतीनाम् असामर्थ्याद् 'अबला' इति उक्तम्. अतो मया तिरोहितम् इति भावः. **कृतज्ञत्वादयो हि**[सुबो.] इति, 'आदि'पदेन अकृतज्ञत्वधर्माअपि. **न प्रीति-**

भवन्ति, औदासीन्यसामानाधिकरण्यात् ॥२१॥

एवं तासां मनोमार्जनमुक्त्वा भक्तिमार्गविरोधं परिहर्तुं ताः स्तौति **न पारयेऽहमिति**.

---

## टिप्पणी

**न पारयेहमि**त्यस्याभासे **भक्तिमार्गविरोधमि**त्यादि, ननु "नाहं तु सख्य" इत्यादिना साधनमार्गीयभक्तविषयकमभजनमुक्तम्, प्रकृते च परोक्षभजनमुक्तम्, अनुवृत्तिवृत्त्यर्थं परोक्षभजने च हेतुत्वे"नैवं मदर्थे"त्याद्युक्तम्. तथा चैतद्भजनानुरूपमेव स्वभजनमुचितं न तु कामपि मर्यादां स्थापयित्वा, तथा सति भक्तिमार्गविरोधापत्तिः. एतादृशीनां दुःखदर्शनमपि

## प्रकाशः

**न पारये** इत्यस्य टिप्पण्याम् **उक्तमि**ति 'जन्तु'पददानादुक्तम्. **वृत्त्यर्थमि**ति सिद्ध्यर्थम्. **तथा सती**ति मर्यादालेशस्थापने सति. **विरोधापत्तिरि**ति, "ये यथा मां प्रपद्यन्त" इति वाक्यात्तथेत्यर्थः. [**तथा सती**ति, भजति सति भक्ताः भजन्ति स्वयं तथा न भजति इति विरोधापत्तिः.]

## योजना

**न पारयेहमि**त्यस्याभासे **भक्तिमार्गविरोधमि**ति– एतदर्थष्टिप्पण्यां स्फुटः ॥२२॥

इति श्रीमद्गोवर्धनधर-श्रीवल्लभाचार्यवर-श्रीविठ्ठलेश्वरचरणानुचरसेवकेन
लालूभट्टोपनाम-दीक्षितबालकृष्णेन कृतायां
दशमस्कन्धैकोनत्रिंशाध्याय-सुबोधिनीयोजना सम्पूर्णा ॥

---

### प्रकीर्णदीपिका

**विषये**[सुबो.] इति, यत्र 'प्रीति'पदार्थः तत्र न भवन्ति. तदेव उक्तं वृत्रस्य चतुःश्लोक्यां "प्रियं प्रियेव" इति पदस्य व्याख्याने श्रीमत्प्रभुचरणैः " 'प्रिय'पदात् निरुपाधिकः स्नेहो निरूपितः" इति. स्नेहस्य तथात्वं तदभिज्ञेन उक्तम्– "आविर्भावदिने न येन गणितो हेतुस्तनीयानपि, क्षीयेतापि नवापराधविधिना नत्या न वै वर्धते, पीयूषप्रतिवादिनस्त्रिजगतां दुःखद्रुहः साम्प्रतं, प्रेम्णस्तस्य गुरोः किमद्य करवै वाङ्निष्ठता गौरवम्" इति. अत्र "येन" इति, स्नेहेन इति अर्थः. अतः उभयोः मध्ये सोपाधिकः स्नेहो न केनापि कार्यः इति सारम् ॥२१॥



## टिप्पणी

स्वस्य तद्विरुद्धमिति प्राप्त उच्यते– अत्र स्वामिनीभजनानुरूपं न भजनमिति हि तवाशङ्का. तत्तु प्रावाहिकधर्मरूपम्. एतदेव भगवताप्युक्तं मद्दत्तयत्फलार्थिनो यादृशं भजनं तत्फलं दत्वा ततो विमुच्य[1] इत्याशयेन "ये यथा मामि"त्यादि. अत्र 'यथा-तथे'ति पदाभ्यां भजनप्रकारयोरप्येकरूपत्वमुच्यते. प्रकृते च दास्यं प्रकारः. स च भक्तधर्मएव, नत्वीश्वरे सम्भवति. कदाचित्क्रियमाणमप्यनुकरणवद् भवति. न हि महाराजः कदाचित् संतोषेण स्वसेवकाङ्घ्रमर्दनं कुर्वन् दासो भवति. तथा प्रकृतेऽपि रसवशात् मानिनीपदपद्मपरागानुरागं कुर्वन्नपि पतिरेव न त्वन्यथा भवतीति क्व प्रत्युपकृतिसम्भवो भजनानुरूपं भजनं वा? एवं सति प्रत्युपकृत्यपेक्षया तदभावेन दोषारोपो न कार्यो अशक्यत्वादित्युक्तं भवति.

नन्वेवं सति सुतरां परोक्षभजनमनुपपन्नं, न ह्यप्रत्युपकार्यभजनासु दुःखहेतुकृतिः सम्भवतीति चेद्, अत्र ब्रूमः. रसात्मक प्रभुरित्यविवादम्. स च संयोगविप्रयोगभेदेन द्विविधः. तत्रान्यतराभावे त्वसम्पूर्णएव सः स्यात्, अतः सम्पूर्णं रसं दत्वा तदुत्तरकालीन-दोषारोपात्मक-व्यभिचारिभावोत्पत्तौ

## प्रकाशः

**तदि**ति भजनानुसारेण भजनम्. [**तव** प्रतिवादेः (प्रतिवादिनः!). **मद्दत्तयत्फलार्थिनो** इति, मया दत्तं यत्फलं तदेव अर्थो येषां ते, तत्फलं दत्वा अहं विमुच्येत इति "ये यथा मामि"त्यादि.] **विमुच्ये** इति निश्चिन्तो भवामि. [**"ये यथा मामि"**ति, "ये यथा मां प्रपद्यन्ते" इति 'यथा-तथा' इति पदाभ्यां भजनप्रकारयोः एकरूपत्वम्.] गीतावाक्यस्यायमेव विषय इत्यत्र किं गमकमित्यपेक्षायां तदुपपादयन्ति **अत्र यथे**त्यादि, **भजनं वे**त्यन्तम्. [ **प्रकृते** प्रस्तावे. **दासो भवती**ति, किन्तु न भवत्येव. **पतिरेव** प्रभुरेव. **अप्रत्युपकार्यभजनासु** गोपिकासु. **अन्यतराभावे** इति, एकस्य भावे एकस्य अभावः इति अन्यतराभावः. **सः** रसः. **तदुत्तरे**त्यादि, **तद्**रसस्य

---

१. विमुच्यते मू. पा.

### प्रकीर्णदीपिका

**न पारयेहम्**[भाग.] इत्यस्य टिप्पण्यां **मर्यादाम्**[टिप्प.] इति, एतासां भजनानुरूपभजनं दासभावेनैव कार्यं, तत्र ऐश्वर्यादिरूपा मर्यादा न कापि स्थापनीया इति अर्थः. **एतेन**[टिप्प.]

## टिप्पणी

तच्छान्तिर्वचनैः कृता तस्याग्रिमरसानुभवविरोधित्वादिति न किञ्चिदनुपपन्नम्. एतेनैतादृशीषु दुःखदर्शनं स्वस्य भक्तिमार्गविरुद्धमित्यपि निरस्तम्. एवं सतीश्वरत्वमेवाशक्तौ हेतुरित्याशयेन प्रभुराहेत्याहुः **भक्तिमार्गविरोधं परिहर्तुमि**ति.

नन्वेतेन स्वस्येश्वरत्वमेवोक्तं भवति न त्वेतत्स्तुतिरिति चेद्, अत्रायं भावः. यद्यपीश्वरत्वेनोक्तरीत्या प्रत्युपकारकरणं न सम्भवत्येव तथापि तर्कितमुच्यते– यदि कथञ्चिन्मयि दास्यमापद्येत तथापि निरन्तरं दास्यकरणेऽपि कदाप्यनृणो न भवामीति प्रभुणा निरवध्युत्कर्ष उक्त इति का वान्या स्तुतिरेतदग्रे! अन्यथा **बिबुधायुषापी**ति न वदेत्, **स्वसाधुकृत्यं न पारये** इत्येतावतैव चारितार्थ्यात्.

नन्विदमितरभक्तसाधारणमिव भाति. तथा हि. चतुर्वर्गार्थिषु तद्दानस्य प्रत्युपकृतिरूपत्वेऽपि प्राप्तात्यन्तिकभक्तियोगेषु सेवातिरिक्तानपेक्षणात्तस्याश्च. स्वतन्त्रपुरुषार्थत्वात् किं वा प्रत्युपकृतित्वं भजेत? प्रकृतेऽपि दास्यातिरिक्तान-पेक्षणान्न प्रत्युपकृतिः सम्भवतीति कोऽत्र विशेष इति चेद्, अत्रेदं प्रतिभाति. न ह्यपेक्षितत्वेन प्रत्युपकृतित्वं सम्भवति, स्वल्पं कृत्वाऽधिकप्रेप्सोरधिकं कृत्वा स्वल्पप्रेप्सोश्चार्थे व्यभिचारात्. अतः स्वरूपतः पूर्वकृत्यनुरूपत्वं मृग्यम्.

### प्रकाशः

**उत्तरकाले** संपूर्णदानानन्तरं **दोषारोपो** मानात्मकः. **तस्य** दोषारोपात्मक-व्यभिचारिभावस्य. **प्रभुराहे**ति, ईश्वरत्वाद् दासस्य प्रत्युपकृतिकरणे असमर्थता अतएव प्रभुः. **न त्वेतद**िति, **एतद्** इति गोपिकानाम्.] **कथञ्चिदि**ति "अकरोः सचिवं दूतमि"त्यादाविव लीलयेत्यर्थः. [**इतरभक्तसाधारणमिवे**ति मर्यादा-मार्गीयभक्तवत्. **चतुर्वर्गार्थिषु** धर्मार्थकाममोक्षार्थिषु.] **अर्थ** इति तस्मै

### प्रकीर्णदीपिका

इति, "विप्रयोगाभावे **स** रसो **असम्पूर्णएव स्याद्**"[टिप्प.] इत्यादिना, उक्तेन इति अर्थः. **एवं सति**[टिप्प.] इति, "**प्रकृते दास्यम्...**"[टिप्प.] इत्यादिपूर्वोक्तप्रकारेण ईश्वरत्वमेव अशक्तौ हेतुः इति आशयेन. **प्रभुः आह**[टिप्प.] इति, "न पारयेऽहम्" इति प्रभुः आह इति अर्थः. **इति आहुः**[टिप्प] इति, श्रीमदाचार्यचरणाः भक्तिमार्गे विरोधं परिहर्तुं ताः स्तौति इति आहुः इति



## टिप्पणी

तत्रापेक्षानपेक्षे अप्रयोजिके. स्वामिनीभजनानुरूपं भजनमीश्वरेऽपि न सम्भवति, किं पुनर्जीवे! यच्चोक्तं 'प्राप्तात्यन्तिके'त्यादि तत्राप्युच्यते– ते हि पूर्वं सकामत्वेन नित्यकर्तव्यत्वज्ञानेन वा प्रवृत्ता मध्ये भगवदनुग्रहेण सेवारसानुभवे जातेऽन्यापेक्षां त्यक्तवन्तः स्वार्थं, न तु तदर्थं तथा. एवं सत्युत्तरोत्तरं तादृक्सेवासम्पादनेन तदेकसाध्यसुखदानमेव प्रत्युपकृतिस्तेषु. अत्र तु "त्वदुपासनाशाः" "एवं मदर्थोज्झितलोकवेदे"त्यादिवाक्यैस्तत्प्राप्तेः पूर्वमेव त्यागः. प्रभौ सहजस्नेहोऽतः तत्सुखे स्वोपयोगं मत्वा तत्प्रतिबन्धकं दूरीकृत्य स्वं निवेदितवत्यः. अतएव "यत्ते सुजाते"त्याद्युपपद्यते. अतए"वैवं मदर्थोज्झिते"त्यत्र स्वत्यागोऽप्युक्तः. स्वार्थमन्यत्यागो लौकिकानामलौकिकानां च पुंसां सम्भवति, न तु यथाकथञ्चिदपि स्वत्यागः. अत्र 'स्व'पदेनात्मोच्यते. तथा च स्वात्मत्वेन स्नेहविषयत्वाभाव एवैतत्त्यागो, भगवदुपयुक्तत्वेनैव तस्य देहादेश्च स्नेहविषयत्वात्. एवं सति भगवदर्थमात्मा प्रियो न त्वात्मार्थं भगवानित्यागतम्. खण्डितादिष्वपि स्वसम्पाद्यसुखानङ्गीकृतिरेव दुःखे माने च हेतुः. तथा च भगवत्सुखसम्पादनं केन प्रत्युपकृतं भवेत्? न चैतत्साधन-सम्पादनमेव प्रत्युपकृतिरस्त्विति वाच्यम्, अत्र भावस्यैव साधनरूपत्वात् तस्य पूर्वकक्षापन्नत्वात्सदैकरूपत्वेन नित्यत्वेनासाध्यत्वाच्च. किञ्च भावबले-नैव यद् भवति तत्र न भगवत्कृत्यपेक्षा, "वशे कुर्वन्ति मां भक्त्ये"ति वाक्यात्. अन्यच्च "नैकात्मतां मे स्पृहयन्ती"त्युपक्रम्य सेवाकथारसासक्ति-युक्तानां तेषां "पश्यन्ति ते म" इत्यनेन स्वरूपरसानुभवमुक्त्वा एतादृशानपि "भक्तिरनिच्छतो मे गतिमण्वीं प्रयुङ्क्त" इति कपिलदेवेनोक्तम्. इह तु रसमार्गरीत्याङ्गीकार इति न कदाचिदपि तदिच्छाननुरूपा कृतिः सम्भवति,

### प्रकाशः

दीयमानेऽर्थ इत्यर्थः. एवं प्रत्युपकृतिस्वरूपमेतद्भजनस्वरूपं च निश्चित्य

### प्रकीर्णदीपिका

अर्थः. **पूर्वकक्षापन्नत्वाद्**[टिप्प.] इति, पूर्वं भावे विद्यमाने पश्चाद् अन्यानि साधनानि भवन्ति, नतु पूर्वस्थितानि साधनानि भावं सम्पादयन्तीति भावस्य पूर्वकक्षापन्नत्वम्. **सदैकरूपत्वेन नित्यत्वेन**[टिप्प.] इति, सच भावः स्वामिनीषु सदा एकरूपो नित्यः चेति कथं सम्पादनं

## टिप्पणी

तस्य रसस्य तादृशत्वादेव. अपरश्च स धर्ममार्गोऽयं धर्मिमार्ग इत्यन्येभ्य इयान् विशेष इति कथं वदामः, खद्योतेभ्य इव तरणेः? अतः सुष्ठूक्तं **न पारय** इति.

यद्यपि गेहशृङ्खलाछेदस्य भावस्वभावकार्यत्वात्तस्य च भगवदनुग्रहैकलभ्यत्वाद् गेहशृङ्खलाछेदोऽपि भगवतैव कारितो भवतीति नैतदुत्कर्ष आयाति, तथाप्येताभ्यएवायं भावो दत्तो नान्येभ्य इत्येतदुत्कर्षः. अतएव एतस्यैव प्रत्युपकृतिरूपत्वं भगवतोक्तम्. तर्हि **न पारय** इत्यनुपपन्नं, प्रत्युत एतादृग्भावदातरि प्रत्युपकृत्यसम्भवाद्वैपरीत्यमापततीति चेद्, अत्रेदं प्रातिभाति. पूर्णाखिलशक्तिपूर्णस्यापि प्रभोरशक्तिर्यत्करणे तद्वस्त्वत्यन्ताभावएवेति निश्चयः. न हि सर्वसामर्थ्यवत्त्वेन द्वितीयमीश्वरं कर्तुं समर्थः. अतएव प्रभुणोक्तं "न शक्यन्तेऽनुसंख्यातुमनन्तत्वान्मयापि ही"ति. तथा प्रकृतेऽपि केवलभावस्य

### प्रकीर्णदीपिका

सम्भवति इति अर्थः. **अतएव**[टिप्प.] इति, यतो भगवतैव भावदानं कृतं तद् **एतस्यैव**[टिप्प.] भावदानस्यैव **प्रत्युपकृतिरूपत्वं**[टिप्प.] जातम् इति अर्थः. **तर्हि**[टिप्प.] इति, तर्हि भावदानस्यैव प्रत्युपकृतिरूपत्वे भगवता उक्तं "न पारये" इति **अनुपपन्नं**[टिप्प.] स्याद् इति योज्यम्. **वैपरीत्यम्**[टिप्प.] इति, प्रत्युत एतासां प्रत्युपकृतित्वे अशक्यत्वम् आपद्यते इति अर्थः. **नहि**[टिप्प.] इति "यथा नहि" इति योज्यम्, अग्रे **तथा प्रकृते**[टिप्प.] इति वक्ष्यमाणत्वाद् इति अर्थः. असमर्थे दृष्टान्तम् आह **अतएव**[टिप्प.] इत्यादिना.. **न शक्यन्तेतु**[टिप्प.] इति, "जन्मकर्माभिधानानि सन्ति मेऽङ्ग सहस्रशो न शक्यन्तेऽनुसंख्यातुम् अनन्तत्वाद् मयापि हि" इति मुचुकुन्दं प्रति भगवता उक्तम्. यथा मम जन्मकर्मादीनि अनन्तत्वात् परिसंख्यातुं मया न शक्यन्ते तथा सर्वसामर्थ्यवत्त्वेऽपि द्वितीयम् ईश्वरं कर्तुम् असमर्थो अहम् इति अर्थः. **केवल...**[टिप्प.] इत्यारभ्य **मन्तव्यम्**[टिप्प.] इत्यन्तस्य अयम् आशयः— यद्यपि स्वामिन्यः संयोगे विप्रयोगे भावात्मकरसात्मकस्य अनुभवं कारयन्ति, तथा एतासामपि भगवान् कारयतीति तदनुरूपभजने न अशक्तिः, तथापि एतासाम् "एवं मदर्थोज्झित..." इत्यत्र स्वत्यागोऽपि उक्तः, अतः स्वप्रत्युपकृतिः स्वात्मगामिन्येव भवतीति अशक्तिरेव निष्प्रत्यूहा इति मन्तव्यम् इति अर्थः. **अन्यथा**[टिप्प.]



## टिप्पणी

रसात्मकत्वेन भगवदात्मकत्वात्तदनुरूपवस्त्वभावादशक्तिरेव निष्प्रत्यूहेति मन्तव्यम्, अन्यथा ईश्वरत्वमेव न स्यात्, श्रुत्युक्तरूपाभावादिति बुध्यस्व. वैपरीत्यापत्तिरिति दूषणं यदुक्तं, तत्रोच्यते— कर्मज्ञाने साधनमार्गीयभक्तिं च जीवार्थं कृतवान् भगवान्, फलमार्गीयभक्तिमार्गं तु स्वार्थमाविश्चकार. अन्यथा रसात्मक-स्वस्वरूपानन्दानुभवो न स्यात्, "तस्मादेकाकी न रमत" इति श्रुतेः. तथा च भावदानादेरपि स्वार्थत्वान्नोक्तदूषणम्. नन्वेवमपि **न पारय** इति नोपपन्नमिति चेत्, न, अस्यानन्दस्य स्वरूपात्मकत्वेऽप्येताभ्यएव तदनुभवादनुभूतस्य च वस्तुन एवैतादृशत्वेनैवं कथनस्य तत्स्वरूपनिरूपकत्वात्. यथा "विस्मापनं स्वस्य च सौभगर्द्धेरि"त्यत्र वस्तुस्वरूपनिरूपणं तथात्रापीति सर्वमनवद्यम्.

### प्रकाशः

साधारण्यपरिहारायाहुः **यच्चे**त्यादि. **श्रुत्युक्तरूपाभावा**दिति, अनुरूपवस्तुसत्तायां "न तत्समश्चाभ्यधिकश्च दृश्यत" इति श्रुत्युक्तरूपाभावादित्यर्थः.

### प्रकीर्णदीपिका

इति, तदनुरूपवस्तुसत्त्वे इति अर्थः. **ननु एवमपि**[टिप्प.] इति, स्वार्थत्वेऽपि इति अर्थः. **न उपपन्नम्**[टिप्प.] इति, भगवता स्वरूपात्मकानन्दः स्वभोगार्थं स्वामिनीषु स्थापयित्वा स्वयं भुज्यते चेत् स्वामिनीकृतोपकाराभावात् "न पारये" इति कथनं न उपपन्नम् इति अर्थः. **एताभ्यः**[टिप्प.] इति, एतत्स्वामिनीद्वारा इति अर्थः. **एतादृशत्वेन**[टिप्प.] इति, एताभ्यएव तदनुभावत्वेन इति अर्थः. **एवं कथनस्य**[टिप्प.] इति, "न पारयेऽहम्" इति कथनस्य इति अर्थः. स्वरूपनिरूपणमेव आह **यथा**[टिप्प.] इत्यादिना, "**यन्मर्त्यलीलौपयिकस्वयोगमायाबलं दर्शयता गृहीतं, विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणाङ्गम्" इत्यत्र वस्तुस्वरूपनिरूपणम्**[टिप्प.] इति, यथा तृतीयस्कन्धे उद्धवैः वस्तुस्वरूपनिरूपणं कृतं, तत्र भगवत्सौन्दर्यस्य सर्वदा विस्मापकत्वेऽपि विस्मापकं स्वस्य इति यद् उक्तं, तद् भगवतः दर्पणादिदर्शनेन विस्मयो भवतीति वस्तुस्वरूपनिरूपणम् इति अर्थः. **तथा अत्रापि**[टिप्प.] इति, भगवतो रसात्मकस्वरूपं श्रुतिसिद्धं सर्वदा अस्त्येव, तथापि यदा स्वामिनीसम्बन्धेन रसानुभवं करोति तदा रसात्मकस्वरूपानुभावात् स्वस्य विस्मयो भवति इति अर्थः. **सर्वमनवद्यम्**[टिप्प.] इति, एवं

**न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः ।**
**या माभजन् दुर्जरगेहशृङ्खलां संवृश्च्य तद्वः प्रतियातु साधुना ॥२२॥**

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धपूर्वार्धे रासक्रीडायां गोपीसान्त्वनं नाम एकोनत्रिंशोऽध्यायः ॥

**निरवद्यसंयुजां** निर्दुष्टभजनयुक्तानां **स्वसाधुकृत्यं** स्वप्रत्युपकारकरणं **विबुधायुषा** ब्रह्मायुषा मन्वन्तरपरिमितायुषा वा **विशेषेण बुधानां** ज्ञानिनाम**नन्तायुषा** वा **न पारये,** भजनप्रत्युपकारयोर्वैसादृश्यात्— भवतीनां भजनं निष्कपटम् अस्मद्भजनं सकपटमिति. न ह्यल्पजलस्यापि तुल्यं बह्वपि मरुमरीचिकाजलं भवति. सत्यभजनं तु ब्रह्मणोऽशक्यमेव, जीवधर्मत्वात्. तत्रापि विशेषमाह **या माभजन्निति. दुर्जरा** हि **गेहशृङ्खला,** या जीर्यतोऽपि न जीर्यत इति. तां **संवृश्च्य** छित्त्वा **याः** [1]भवत्यः प्रसिद्धाः **मा मामभजन्.** यैः पूर्वं बद्धाः स्थिताः स्वार्थं तेषामर्थमात्मानं च मय्येव समर्पितवत्यः. बहिःशृङ्खला त्यक्तुमपि शक्या, न तु सर्वत आवृते गृहं = शृङ्खला. एवमलौकिककर्त्रीणां यद् भजनं **तद्** भवतीनामेव **साधुना,** भावप्रधानो निर्देशः, साधुत्वेन **प्रतियातु** प्रत्युपकृतं भवतु. साधवो हि महत् कर्म कृत्वा स्वयमेव तुष्यन्ति न तु प्रत्युपकारमपेक्षन्ते. अतो मयि भजनं नास्ति, भजनस्य जीवधर्मत्वात्. अतोऽग्रेऽपि यदि स्वतएव सन्तुष्टाः तदा भजत, नो चेत् यथासुखं विधेयमिति भावः. न ह्यशक्यं कश्चित् कर्तुं शक्नोतीति ॥२२॥

*॥ इति श्रीभागवतसुबोधिन्यां*
*श्रीमल्लक्ष्मणभट्टात्मज श्रीमद्वल्लभदीक्षितविरचितायां*
*दशमस्कन्धविवरणे एकोनत्रिंशाध्यायविवरणम् ॥*

---

**प्रकाशः**

**न स्यादि**ति स्वस्य न स्यादित्यर्थः. [सुबोधिन्यां **जीवधर्मत्वादि**ति, सत्यभजनं दास्येन भवति, तत्तु जीवधर्मत्वात्. **जीर्यतोऽपि न जीर्यत** इति, स्वयं **जीर्यतोऽपि** गेहशृंखला **न जीर्यते** न जीर्णायति. **मा मामभजन्** इति, **मा** इति **माम्. यै** पत्याद्यैः. **तेषां** पत्यादीनाम्. **गृहं शृंखला** इति, गृहशृंखला तु सर्वतः आवृत्य अंतर्बहिस्तिष्ठति. **साधुना** इति, साधुकृत्यत्वेन तत्प्रत्युपकृतं च भवतु. टिप्पण्याम् **अत्रोपकृतेरेवे**ति, उपकृतेरेव प्रतिकृतिः कथिता.] **तद्भिन्नतदपेक्षायामि**ति उपकृतिभिन्नप्रत्युपकृत्यपेक्षायामित्यर्थः. [**तत्सम्भवादि**ति, **तत्** प्रत्युपकृतिः. सुबोधिन्यां **स्वतएवे**ति स्वकृत्येनैव. टिप्पण्यां] **नो चेदि**ति सुबोधिनीस्थं प्रतीकम्. [**तच्चे**ति, **तत्** सर्वोपाधिभजनम्. उपकृतिर्भिन्ना प्रत्युपकृतिर्यदा वाञ्छन्ति तदा सोपाधिभजनं कार्यम्. सोपाधिभजने अहमपि सोपाधिभजनं करोमि तदा प्रत्युपकारः संभवति. तत्तु भवतीनां सोपाधित्वं नास्ति.] **अयमि**ति अशक्यकृत्यशक्तिरूप इत्यर्थः ॥२२॥ इत्येकोनत्रिंशाध्यायसुबोधिनीटिप्पण्योः प्रकाशः ॥

**लेखः**

**न पारयेहमि**त्यत्र, निरवद्यं यथा स्यात्तथा संयुञ्जन्तीति निरवद्यसंयुजः, कर्तरि क्विप्, तादृशीनामित्यर्थः ॥२२॥ एकोनत्रिंशाध्यायव्याख्या समाप्ता ॥

---

**टिप्पणी**

अत्र पूर्वार्धेनैवैतत्स्तुतिसंपत्तावप्युत्तरार्धकथनस्य तात्पर्यमाहुः **अतो मयी**त्यादिना. अत्रोपकृतेरेव प्रत्युपकृतिरूपत्वोक्त्या तद्भिन्नतदपेक्षायां सोपाधिभजनं कार्यं भवति, तथा च भजनएव तत्सम्भवात्. एतदेवोक्तं **नो चेदि**त्यनेन. तच्च भवतीष्वसम्भावितमशक्यत्वादित्याहुः **न ह्यशक्यमि**त्यनेन. प्रत्युपकृत्यशक्तावयं भगवन्निष्ठोऽपि हेतुरिति ज्ञेयम् ॥२२॥ इत्येकोनत्रिंशोध्यायः ॥

---

१. याः प्रसिद्धास्ताः इति ब. पाठः.

**प्रकीर्णदीपिका**

सर्वाशङ्कापरिहारोक्त्या "न पारयेऽहम्" इत्यादिना उक्तं सर्वमनवद्यम् इति अर्थः. **तत्रापि विशेषम् आह**[सुबो.] इति, निष्कपटभजनादपि सर्वत्यागपूर्वकभजने विशेषम् आह इति अर्थः. **जीर्यतोऽपि**[सुबो.] इति, देहादिः जीर्यतोऽपि इति अर्थः. **यैः**[सुबो.] इत्यारभ्य **समर्पितवत्यः**[सुबो.] इत्यन्तेन भजनरूपम् आह. तत्र **यैः**[सुबो.] इति, प्रतिबन्धाद्यैः इति अर्थः. **बहिःशृङ्खला**[सुबो.] इति, लोहकाष्ठादिरूपा इति अर्थः. टिप्पण्यां **तथा(च) भजने**[टिप्प.] इति,



**प्रकीर्णदीपिका**

प्रत्युपकारापेक्षया[(१)] भजने इति अर्थः. **तत्सम्भवाद्**[टिप्प.] इति, सोपधिभजनसम्भवाद् इति अर्थः. **नो चेद्**[सुबो.] इति, यदि भवतीनाम् अधुना प्रत्युपकारापेक्षा जाता तदा यथासुखं

(१) प्रत्युपकल्पापेक्षया इति पाठः.

**प्रकीर्णदीपिका**

तथा भजनं विधेयं, तथा अहमपि प्रत्युपकारार्थं भजनं करिष्यामि तथापि मे प्रत्युपकारो न भविष्यत्येव इति. अतएव उक्तं **नहि अशक्यम्**[सुबो.] इत्यादि. **अयं भगवन्निष्ठोऽपि हेतुः**[टिप्प.] इति, सोपधिभजनासम्भावनारूपो हेतुः भगवन्निष्ठोऽपि ज्ञेयः. भगवति स्वामिनीविषयकं सोपधिभजनं न सम्भवति, अतः प्रत्युपकृतिः अशक्या इति अर्थः ॥२२॥

*इतिश्री श्रीमत्-कल्याणरायचरणसन्निधौ वृषभानुपुरे*
*गोस्वामिश्रीप्रद्युम्नात्मज-गोस्वामिश्रीसात्त्वतेशसहायेन*
*श्रीमत्पञ्चाध्यायीचतुर्थाध्यायीय- "भजतोनुभजन्त्येके" इत्यत्रोक्त-*
*सुबोधिन्यादेः प्रकीर्णदीपिका*
*पाहाडश्रीविश्रामात्मजहरिकृष्णेन कृता*
*समाप्तिम् अगमत् ॥*

## ॥ इति एकोनत्रिंशोऽध्यायः ॥

# ॥ पञ्चमो स्कन्धादितः त्रिंशत्तमोऽध्यायः ॥

त्रिंशत्तमे हरिः प्रीतो लीलां कामकृतामपि ।
इन्द्रादिदुर्लभां चक्रे स्वानन्दार्थमितीर्यते ॥(१)॥

**टिप्पणी**

त्रिंशत्तमाध्यायार्थकथने **त्रिंशत्तमे हरिरि**त्यादि, **इति**शब्दो हेतुवाची. **लीलां चक्रे** इति लोके प्रकटामिति शेषः. तथा सत्ययं वाक्यार्थः—यद्यप्यतिगोप्यत्वादियं लीला न वक्तुमुचिता, तथापि प्रभुर्लोके प्रकटां **लीलां चक्र इति** हेतो**रीर्यत** इति, अन्यथा "रासलीलेर्यत" इत्येव वदेयुः. सा च "यथा मदच्युद् द्विरदः करेणुभिरि"त्यन्तेन ग्रन्थेनोक्ता. एतदग्रेऽतिदेशेन कामशास्त्रोक्तरीत्यापि सोक्तेत्याहुः **कामकृतामपी**ति. इन्द्रो विषयभोगेऽभियुक्त इति तन्नामग्रहणं, वस्तुतस्तु ब्रह्मादीनामपि दुर्लभैव. **कामकृता** सा हि लोकानुसारिणी भवति. एवं सति यत्र सापीन्द्रादिदुर्लभा तत्र पूर्वोक्तलीलायास्तथात्वे किं वाच्यमिति भावः (१).

**प्रकाशः**

अथ त्रिंशाध्यायं विवरिषवः पूर्ववदेव कथासङ्गतेर्ज्ञातुं अशक्यत्वाद-ध्यायार्थमेवाहुः **त्रिंशत्तम** इत्यादि. अर्थस्तु टिप्पण्यामेव स्फुटः.

[ टिप्पण्यां **सा चे**ति रासलीला. **अभियुक्त** इति मुख्यः. **सा** लीला. **तथात्वे** दुर्लभत्वे. सुबोधिन्यां **लीलां** प्रकटामिति शेषः. **इतीर्यते** इति, **इति** अतः हेतोः **ईर्यते,** अन्यथा गुप्ता लीला शुको न वदेत्. ] (१).

**लेखः**

त्रिंशेऽध्याये, **त्रिंशत्तमे ईर्यत** इत्यन्वयः. "तासामाविरभूदि"त्यस्याभासे "कृष्ण एव जात" इत्यनेनोक्तं तासु स्वसत्तानन्दस्थापनमधुनैतादृशलीलाकरणे

**कारिकार्थः**

त्रिंशेऽध्याये **त्रिंशत्तमे** इत्यादि. एतच्च टिप्पण्यां विस्तरेण व्याख्यातमपि संक्षेपतो लिख्यते. **लीलां चक्रे** इति लोके प्रकटामिति शेषः. तथा सति **हरिः प्रीतः** सन् **कामकृतामपि लीलां** लोके प्रकटां **चक्रे इति** हेतोर्गोप्यापि लीला **त्रिंशत्तमे**ऽध्याये **ईर्यते** इति वाक्यार्थः (१).

अस्याः सर्वोपकाराय फलश्रुतिरुदीर्यते ।

**टिप्पणी**

लीलोक्तिप्रस्तावे फलश्रुतिरसंगतेत्याशङ्क्य तत्तात्पर्यमाहुः **अस्या** इति. लोके कामकथा तदुद्बोधिका दृष्टेति तच्छङ्कया वैराग्यार्थी कदाचिन्न शृणुयात्. तथा भक्त्यर्थ्यपि मातृणां रहस्यवार्ता न श्रोतुमुचिता तथा सति चित्तवैषम्येऽतिमहान्दोषः स्यादिति शङ्कया न शृणुयात्. एवं सति विषय्येवावशिष्यते. तथा सति तु हीनाधिकारिविषयत्वेनोत्तमत्वं न स्यादित्येतत्सर्वपरिहाराय फलश्रुतिरित्यर्थः. विषयिणः पूर्वं विषयत्वेन श्रवणेऽपि तत्स्वभावादेव दोषनिवृत्तिपूर्वकं परमपुरुषार्थप्राप्तिरिति भावः. अन्ते प्रश्नोत्तरयोस्तात्पर्यमाहुः

**प्रकाशः**

[ **अस्याः** लीलायाः. टिप्पण्याम् **एवं सतीति**, एवं सति विषयी एव अवशेषः. सएव शृणोति तदा लीलायाः हीनाधिकारिविषयत्वाद् उत्तमत्वं न भवतीत्याशंकापरिहाराय फलश्रुतिः. **तत्स्वभावादेव** लीलाकथास्वभावादेव. **परमपुरुषार्थेति** भक्तिः. **अन्ते** इति, अध्यायान्ते प्रश्नोत्तरं तस्य तात्पर्यमाह.

**लेखः**

हेतुत्वेनानुवदन्ति **प्रीत** इति. प्रीतेरानन्दधर्मत्वात् तद्युक्तः सन्नित्यर्थः. तथा च तासु स्वसत्तानन्दस्थापनपूर्वकत्वं प्रथमाध्यायापेक्षया विशेष इति भावः. **लीलामिति**, अलौकिकचन्द्रप्रकाश्यासु रात्रिष्वलौकिकप्रकारिकामित्यर्थः. **कामकृतामिति** कामशास्त्रोक्तरीत्या कृतां लौकिकचन्द्रप्रकाश्यासु रात्रिषु लौकिकप्रकारिकामित्यर्थः. तथा च द्विविधामपि **लीलां** प्रकटां **चक्रे इति** हेतोरुभय्यपि लीला **त्रिंशत्तमे ईर्यते** इति टिप्पण्यनुसारेणार्थः. अलौकिकलीला "यथा मदच्युदि"त्यन्तेनोक्ता. लौकिकलीला "एवं शशांकांश्वि"ति श्लोके 'काव्यकथा'पदे अतिदेशेनोक्तेति ज्ञेयम् (१-२).

**कारिकार्थः**

लीलोक्तिप्रस्तावे फलश्रुतिरसंगता इत्याशंक्य तत्तात्पर्यमाहुः **अस्याः सर्वोपकारायेति**. वैराग्यार्थिनां भक्तानां च **सर्वेषामुपकाराय अस्याः** लीलायाः "विक्रीडितं व्रजवधूभिरि"त्यादिना **फलश्रुतिरुदीर्यते.** लोके कामकथा तदुद्बोधिका दृष्टेति तच्छंकया वैराग्यार्थी कदाचिन्न शृणुयात् तथा भक्त्यर्थ्यपि मातृणां रहस्यवार्तां न शृणुयादिति सर्वेषां निःशंकश्रवणप्रवृत्तिसिद्धये



लौकिक्यपि यदा दृष्टिस्तदा सिद्धान्त ईर्यते ॥(२)॥
रसात्मकस्तु यः कामः सोत्यन्तं गूढएव हि ।

**टिप्पणी**

**लौकिक्यपीति**. सर्वथा प्रपन्ना दृष्ट्वाऽदेयमपि स्वरूपानन्दं दत्तवानिति तु वस्तुस्थितिः. भगवतो रसात्मकत्वेन तत्स्वरूपमध्यपातित्वमेतासामिति च. पूर्वमन्यत्र विवाहाभावे रसस्वरूपमेव न सम्भवति, यतस्तद्रसस्वरूपमर्यादा तथा. एतादृशेऽर्थे विषयत्वेनोभयोः प्रवृत्तिः अतोऽनुचितमिदमिति बुद्धिः कस्यचिच्चेत्स्याद्, वस्तुतस्तु उपेक्ष्यएव सः, तथापि प्रभुः सर्वोद्धारक इति तादृशस्याप्यलौकिकी बुद्धिर्यथा भवति तथा वक्तव्यमिति प्रश्नतात्पर्यम्. शुक"स्तुष्यतु दुर्जन" इतिन्यायेन तन्मतमेवानुसृत्योत्तरितवान्. अन्यथाग्रे "गोपीनां तत्पतीनामि"त्यनेन परदारात्वस्यैव दूषितत्वेन तद्दोषाप्रसक्त्या "तेजीयसां न दोषाये"ति निषेधोऽनुपपन्नः स्यात्, "नैतत्समाचरेदि"त्यादिरपि. एवं सति "कुतएव बन्ध" इत्यन्तमुक्तरीत्योक्तम्, अग्रे तु वस्तुस्थितिमनुसृत्येति भावः (२).

नृत्यबन्धादेरुपयोगमाहुः **रसात्मक** इति (३-४).

**प्रकाशः**

**वस्तुस्थितिरिति**, श्रीकृष्णवस्तुस्थितिः स्वभावः. **तत्स्वरूपेति**, भगवत्स्वरूपमध्यपातित्वं गोपिकानाम् (२).]

**कारिकार्थः**

फलश्रुतिरित्यर्थः. अन्ते प्रश्नोत्तरयोस्तात्पर्यमाहुः **लौकिक्यपीति**. **यदा** कस्यचिद् **दृष्टिः लौकिकी** भगवति दोषारोपात्मिका भवति **तदापि सिद्धान्त ईर्यते** प्रश्नोत्तराभ्यां निर्णय उच्यते इत्यर्थः. भगवतो रसात्मकत्वेन स्वरूपात्मककामरसभोक्तरि भगवति दोषारोपवान् वस्तुतस्तु उपेक्ष्यएव तथापि प्रभुः सर्वोद्धारक इति तादृशस्यापि अलौकिकीबुद्धिः यथा भवति तथा वक्तव्यमिति प्रश्नतात्पर्यम्. स च प्रश्नः "संस्थापनाय धर्मस्य" इत्यादिना राज्ञा कृतः. शुकस्तु "तुष्यतु दुर्जन" इति न्यायेन तन्मतमेवानुसृत्य "तेजीयसां न दोषाये"त्यादिना उत्तरं कृतवान्. अग्रे "गोपीनां तत्पतीनां च" इत्यादिना यदुत्तरं तत्तु वस्तुस्थितिमनुसृत्येति भावः (२).

अतः शास्त्रं प्रवृत्तं हि तृतीयं भारतं तथा ॥(३)॥
अतोऽत्र भगवांश्चक्रे नृत्यं कारितवांस्तथा ।
सर्वाङ्गेषु तु यो लीनः स यथा व्यक्ततां व्रजेत् ॥(४)॥

### लेखः

**रसात्मक** इत्यस्याभासे **टिप्पण्यां नृत्यबन्धादेरि**ति, अलौकिकप्रकारकरमणे इति शेषः. **जलानिलयोरि**ति, "ततश्च कृष्णोपवने" इति श्लोकोक्तयोरित्यर्थः. **तस्योद्बुद्धे**ति, अत्रोद्बोधकानामुक्तत्वात् प्रभुरपि लोकमनुसृत्य लीलां कृतवान् न तु स्वरूपप्राधान्येनेति ज्ञायते. अतः स्वरूपमपि विशेषतो न वक्तुं शक्यम् इति भावः. सुबोधिन्यां, कामस्य गूढत्वमर्थापत्त्या साधयन्ति **अतः शास्त्रमि**ति, तस्य गूढत्वाच्छास्त्रोक्तनृत्यबन्धादिभिरेव स प्रकटो भवति. अन्यथा महता समारम्भेण शास्त्रद्वयं न प्रवृत्तं स्यादित्यर्थः (३).

### योजना

त्रिंशत्तमाध्यायविवरणारम्भे **रसात्मकस्तु यः कामः सोऽत्यन्तं गूढएव ही**ति. त्रिषु लोकेषु रसात्मकः कामो गूढएव. देवादयोऽपि कामेन रसमुत्पाद्यानुभवन्ति, न तु तेषां रसात्मकः कामः. तत्रापि रसलेश एवानुभूयते, न तु रसः. **रस**शब्देनानन्दो बोध्यः, "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती"ति श्रुतेः. अतो भगवता कीदृशो रसोऽनुभूयते इति जिज्ञासायां तादृशरसस्य सर्वत्रैवाभावान्निरुपमत्वेन बोधयितुं न शक्यते. अतो भगवता भुज्यमानस्य रसस्यात्यन्तं गूढत्वं, "रसो वै स" इति श्रुतेः स्वरूपाभिन्नानन्दत्वात्[1]. तद्रसस्य गूढस्य बोधनार्थं वात्स्यायनभरतयोः प्रवृत्तिरित्याहुः **अतः शास्त्रं प्रवृत्तं हि तृतीयं भारतं तथे**ति. **तृतीयं** कामशास्त्रं वात्स्यायनप्रणीतम्. **भारतं** भरतकृतसूत्राणि (३).

### कारिकार्थः

नृत्यबन्धादेरुपयोगमाहुः **रसात्मक** इति. **अतः शास्त्रप्रवृत्तं ही**ति, **अतो** रसात्मककामस्य गूढत्वात् तज्ज्ञापनाय भरतोक्तं वात्स्यायनोक्तं च **शास्त्रं प्रवृत्तं** धर्मार्थकाममोक्षशास्त्रेषु **तृतीयं** कामशास्त्रम्. **अतोऽत्र भगवांश्चक्रे** इति, कामस्य गूढत्वात् तदुद्बोधार्थं स्वयं **नृत्यं चक्रे** स्वामिनीभिर्**नृत्यं कारितवांश्च**. बन्धोपयोगमाहुः **सर्वांगेष्वि**ति (३-४).

१. स्वरूपाद् अभिन्नत्वाद् इति मुं.वि. पाठः.



जलं वायुश्च सामग्री श्रमात् शीताच्च जायते ।

### टिप्पणी

नृत्यबन्धाभ्यामुद्बुद्धे रसे भोगः संपन्न एवेति स्वरूपेणैवानन्ददानाच्च जलानिलयोः क्वोपयोग इत्याशङ्क्याहुः **जलं वायुश्चे**ति. रमणं जलस्थलभेदेन द्विविधम्. तत्राद्ये जलं सामग्री, द्वितीयेऽनिलः. तयोस्तथात्वे हेतुः स्वामिनीभगवतोः **श्रमः. शीत**त्वं जलानिलनिष्ठो हेतुरत्र सामग्रीत्वभवने. तथा च **जलं वायुश्च** रमण उक्तहेतुभ्यां **सामग्री जायत** इति योजना. **जायत** इति पदादपूर्वा सा भगवल्लीलार्थमेव तदैव जायत इति ज्ञाप्यते. **शीतादि**ति भावप्रधानो निर्देशः.

ननु भरतवात्स्यायनप्रणयनं हि जीवार्थं; तथा च तदुक्तरीत्या

### प्रकाशः

**रसात्मकस्तु यः काम** इत्यादिकारिकाद्वयेन यदुक्तं तदाक्षिपन्ति टिप्पण्यां **नन्वि**त्यादिना. **प्रणयनं हि जीवार्थमि**ति "तदेतद्ब्रह्मचर्येण परमेण

### लेखः

**अतोऽत्रे**ति, कामस्य गूढत्वात् तदुद्बोधार्थमित्यर्थः. **नृत्यं कारितवानि**ति स्वामिनीभिरिति शेषः. बन्धोपयोगमाहुः **सर्वाङ्गेष्वि**ति, नायकस्य स्वरूपे कामस्थितिः. नायिकानां विभेदेन प्रत्यङ्गेषु कामस्थितिरिति विभेदः शास्त्रसिद्धः.

### योजना

तस्यालौकिकस्यानन्दरूपस्य सर्वाङ्गेषु स्थितस्य गुप्तत्वात्तत्प्रकटनार्थं भगवान् नृत्यं करोति कारयति चेत्याहुः **अतोऽत्र भगवांश्चक्रे नृत्यमि**त्यारभ्य **व्रजेदि**त्यन्तम् (४). **जलं वायुश्च सामग्री**त्यादेः **अत्रैव लोके प्रकटमि**त्यादेरर्थष्टिप्पण्यां स्फुटः (५$\frac{१}{२}$).

### कारिकार्थः

जलानिलयोः उपयोगमाहुः **जलं वायुश्च सामग्री**ति. रमणं जलस्थलभेदेन द्विविधम्. तत्र आद्ये जलं सामग्री द्वितीयेऽनिलः. तयोः सामग्रीत्वे हेतुः स्वामिनीभगवतोः श्रमः. शीतत्वं जलानिलनिष्ठो हेतुः अत्र सामग्रीत्वभवने. तथा च **जलं वायुश्च** रमणे श्रमशीतत्वाभ्यां **सामग्री जायते** इति योजना. **शीतादि**ति भावप्रधानो निर्देशः. "सोऽम्भस्यलम्" इति श्लोकोक्ता जलक्रीडा "ततश्च कृष्णोपवने" इति स्थलक्रीडा (४$\frac{१}{२}$).

## टिप्पणी

प्रवृत्तस्य जीवस्यापि तथानन्दसम्भवादत्रावैशिष्ट्यापत्तिः. न च प्रभुस्वरूपमेव विशेषः, तस्योद्बुद्धरसात्मकत्वेन तदुद्बोधकानामप्रयोजकत्वादिति चेत्, मैवं, अत्र हि रसात्मकं स्वरूपमेवोच्यते. तच्चोद्बोधकविशिष्टमेवोद्बुद्धं, न तु केवलम्. अन्यथा रसात्मकत्वं न स्यात्, तत्स्वरूपस्यैव तथात्वात्. तच्च

## प्रकाशः

समाधिना[१] विहितं लोकयात्रार्थं,[२] न रागार्थोऽस्य संविधिरि''ति शास्त्रसमाप्तौ वात्स्यायनसूत्रादवगम्यते. एवं भरतग्रन्थादपि बोध्यम्, अध्यायानां शतसहस्रेण ब्रह्मणा चतुर्वर्गप्रणयनकथनाच्चेत्यर्थः. तथा च रसाभिव्यञ्जनार्थक-प्रणाड्यङ्गीकारे रसस्य भगवद्रूपत्वहानिः, भगवद्रूपतायां च प्रणाडीवैयर्थ्यान्मूल-विरोध इत्युभयतः पाशारज्जुरिति पूर्वपक्षतात्पर्यम्. तत्र समादधते **मैवमि**त्यादि. **अत्रे**ति मूले कारिकायां चेत्यर्थः. अत्रायमर्थः. श्रुतौ हि ''असद्वा इदमग्र आसीत्, ततो वै सदजायत, तदात्मानं स्वयमकुरुत, तस्मात्तत्सुकृतमुच्यत इति, यद्वै तत्सुकृतं, रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवती''त्येवं पूर्वसृष्टेरसाधुत्वं, ततः सृष्ट्यन्तरस्य साधुत्वं, साधुत्वे स्वात्मरूपत्वरूपं हेतुः, तस्य सुकृतत्वं, सुकृतस्य रसत्वं, रसस्यानन्दरूपता च बोधिता. तत्र यद्युद्बोधकादिप्रणाडी न विवक्षिता स्याद्, आत्मकरणं न वदेत्. यदि वा सर्वसामान्या स्यात्, पूर्वसृष्टेरसाधुत्वमनेवंरूपतां च वा न वदेत्. यदि च रसस्य मनोविकारत्वं लौकिकत्वं वा विवक्षितं स्यात्, तदाप्यात्मकरणम् आनन्दरूपत्वं च न वदेत्. अत उद्बोधकादिवैशिष्ट्यं श्रुतिसिद्धम्. तदेतदुक्तं **तत्स्वरूपस्यैव तथात्वादि**त्यन्तेन. तथा च प्रणाड्यङ्गीकारेऽपि न भगवद्रूपत्वहानि-रित्यर्थः. किञ्च अनुकृत्यधिकरणे सर्वस्य भगवदनुकारित्वं ''तमेव भान्तमनुभाति विश्वमि''ति विषयवाक्येन प्रतिपादितम्. अतः प्रकृतेऽपि यदि लौकिको रसः प्रतिपाद्यते तदापि [३]मूलरसानुकारितयैव तत्स्वरूपं सिध्यतीत्येतद्दृष्टान्तेन[४] [५]सोऽपि रसोऽनुमीयताम्— अयं लौकिकः परिच्छिन्नो[६], मात्रोपजीवनश्रुतेः, स त्वपरिच्छिन्नो, भूमत्वात्[७]. तथा च लोकेऽनुकरणमात्रेण तदाभासस्यैव प्राकट्यं, न तु तस्येति जीवस्य तत्करणेऽपि न तद्रससम्बन्धलेशः. शास्त्र-

१. मया गौतमेन रसशास्त्रं कथितम्. २. निर्वाहार्थम्. यात्रार्थमिति रसरूपभगवत्प्राप्त्यर्थम्.
३. भगवद्रसानुसारि. ४. लौकिकः. ५. अलौकिकः. ६. परिमितः. ७. व्यापकत्वात्.



अत्रैव लोके प्रकटमाधिदैविकमुत्तमम् ॥(५)॥
कामाख्यं सुखमुत्कृष्टं कृष्णो भुङ्क्ते न चापरः ॥

## टिप्पणी

विशेषतो न भावयितुं शक्यमज्ञानादिति तज्ज्ञानार्थं भरतवात्स्यायनाभ्यां तत्स्वरूपं निरूपितम्— एवं भगवता नृत्यमकारि, एवं च रमणमिति. जीवास्तु ब्रह्मपरां श्रुतिमिवैतदपि द्वयं जीवपरमिति ज्ञात्वा प्रवृत्ताः क्लिश्यन्ति परमिति बुध्यस्व.

एतदेवाहुः **कृष्णो भुङ्क्ते न चापर** इत्यनेन. तत्र हेतु**रुत्तममि**ति, क्षराक्षराभ्यामुत्तमं पुरुषोत्तमस्वरूपात्मकमित्यर्थः. न हि भगवत्स्वरूपमन्येन भोक्तुं शक्यमिति भावः. एतल्लीलाया भूमौ प्राकट्यकरणे प्रयोजनमाहुः **अत्रैवे**ति. आधिदैविकत्वे संपन्ने हि पुरुषोत्तमभजनं साक्षात्सम्पद्यते. तच्च वैकुण्ठे भवति. प्रभुस्तु अस्मि**न्नेव लोके आधिदैविकं** रूपं जीवानां **प्रकटं** यथा भवति तथा **भुङ्क्त** इत्यर्थः. एतल्लीलाश्रवणेऽपि तथा भवतीति तथा. **उत्कृष्टमि**ति मोक्षसुखादपीति शेषः (५$\frac{१}{२}$).

## प्रकाशः

प्रणयनं तु दूरतस्तस्यैव परिचायनायेति तत्रैव स्फुटम्. वस्तुतस्तु पाद्मे पातालखण्डे रामाश्वमेधे शेषवात्स्यायनसंवादादृषेर्वैष्णवत्वमवगम्यते. एवं भरतस्यापि, नाट्यशास्त्रज्ञातुर्मोक्षकथनात्. किञ्च [१]आञ्जनेयोऽपि प्रणेता नाट्यशास्त्रस्य. स च परमभक्तो जनकतनयाप्राणनाथस्य. अतस्तादृशां य एतावान् प्रयासः स न त्रिवर्गोपयोगितया जीवार्थः, अपि तूक्तरीत्या मोक्ष-साधनतापर्यन्ततया. किञ्च वात्स्यायनेन सांप्रयोगिकाधिकरणे ''ऋचां दशतयीनां चतुःषष्टिसंज्ञितत्वादिहापि तदर्थसम्बन्धात्पाञ्चालसम्बन्धाच्च बह्वृचैरेषा पूजार्थं संज्ञा प्रवर्तितेत्येक'' इति सूत्रयता संप्रयोगाङ्गचुम्बनादीनामृगर्थत्वं[२] प्रदर्शितम्. ''सर्वे वेदा यत्पदमामनन्ति'' ''वेदैश्च सर्वैरहमेव वेद्य'' इति श्रुतिस्मृतिभ्यां वेदस्य भगवत्परत्वं सिद्धम्. एवं सत्यस्य शास्त्रस्य तत्सामानाधिकरण्ये वेदवत् परोक्षवादेन लीलासहितभगवत्प्रतिपादकत्वं युक्तमेव. गान्धर्वस्य सामवेदोपवेदतया च. अतएवमर्थाज्ञातॄणां जीवानां भ्रान्तिरित्येतदाद्यभि-सन्धायोक्तं **तच्चे**त्यादि **बुद्ध्यस्वे**त्यन्तम्. तस्मान्न कोऽपि शङ्कालेश इति दिक्.

१. हनुमान्. २. ऋग्वेदार्थत्वम्.

एवं पूर्वाध्याये तासां सर्वभावेन प्रमाणेन प्रमेयेन दुःखं दूरीकृतवान्. तद् दुःखमज्ञानतश्चेत्, तदैव दूरीकृतं भवति. अन्यथा भगवतैव दुःखं दत्तं स्यात्. अतो भगवता त्यक्त्वा न गतमिति न भगवान् दुःखे हेतुः, किन्त्वज्ञानमेव. अतो भगवद्वाक्यादज्ञाने गते तन्मूलकं दुःखमपि गतमित्याह **इत्थमि**ति.

## टिप्पणी

**प्रमाणेन** वचनैरित्यर्थः. **प्रमेयेण** स्वरूपेणेत्यर्थः. **इत्थं भगवतो गोप्य**

## लेखः

**अत्रैवेति**, **आधिदैविकं** जीवानां रूपमिति शेषः. तच्च कामरहितं लौकिकवासनात्मकलिङ्गरहितमिति यावत्. ''कामं हृद्रोगमाश्वपहिनोती''ति-वाक्ये लिङ्गभङ्गः[1] फलमुक्तम्. लौकिकलिङ्गरहितमेवाधिदैविकं रूपमिति भावः. तथा च जीवाना**माधिदैविकं** रूपम् **अत्रैव लोके प्रकटं** यथा स्यात्तथा **कामाख्यमुत्तममुत्कृष्टं सुखं कृष्णो भुङ्क्ते** इति टिप्पण्यनुसारेणान्वयः. उत्तमत्वं मोक्षेऽप्यस्तीति ततोऽप्युत्कृष्टमित्युक्तम् (४ $\frac{१}{२}$).

**इत्थमि**त्यस्याभासे, वाचां शब्दरूपत्वाद् ज्ञानजनकत्वं न तु तापनिवर्तकत्वमित्याशङ्क्य तद्व्युत्पादनाय पूर्वाध्यायार्थमनुवदन्ति **एवमि**त्यारभ्य **दुःखमपि गतमि**त्यन्तेन. तथा च शब्दादज्ञाननिवृत्तिः, ततो विरहरूपदुःखनिवृत्तिः, ततस्तापनिवृत्तिः. तथा च मूले **इत्थम**मुना प्रकारेण **श्रुत्वे**त्यनेन दुःखनिवृत्तिपर्यन्तार्थमनूद्य तापत्यागो विधीयते इति भावः. तथा **चेत्थमि**त्यनेनोक्तायां प्रकारतायाम् अज्ञाननिवृत्तिदुःखनिवृत्त्योर्निवेश इति ज्ञेयम्.

## योजना

**प्रमाणेन प्रमेयेन दुःखं दूरीकृतवानि**ति, **प्रमाणेने**ति ''नाहं तु सख्य'' इत्यारभ्य ''तद्वः प्रतियातु साधुने''त्यन्तेन भगवद्वाक्येनेत्यर्थः. **प्रमेयेन** स्वरूपेणाविर्भूतेनेत्यर्थः.

## कारिकार्थः

एतल्लीलायाः भूमौ प्राकट्यकरणे प्रयोजनमाहुः **अत्रैव लोके** इति. **प्रकटम्** इति क्रियाविशेषणम्. तथा च अस्मिन् **लोके आधिदैविकं** रूपं जीवानां **प्रकटं** यथा भवति तथा **भुंक्ते** इत्यर्थः. एतल्लीलाश्रवणे जीवानाम् आधिदैविकं रूपं प्रकटीभवतीति तथा. **उत्तममि**ति क्षराक्षराभ्यामुत्तमं पुरुषोत्तमस्वरूपात्मकमित्यर्थः (५ $\frac{१}{२}$).

१. जो. पाठानुसारेण. लिंगभंगफलमिति मुद्रितः पाठः.



**॥श्रीशुक उवाच॥**

**इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः ।**
**जहुर्विरहजं तापं तदङ्गोपचिताशिषः ॥१॥**

**भगवतो वाचः श्रुत्वा विरहजं तापं जहुः**, भ्रमादेवास्माकं विरहो जात इति. ननु वचनमात्रेण कथमज्ञाननिवृत्तिः? तत्राह **भगवत** इति. **गोप्य** इति विपरीतभावनानिवृत्त्यर्थम्. ननु ता वाचः कथं न मनसि सन्देहमुत्पादितवत्यः? तत्राह **सुपेशला** इति अतिमनोहरा इतिं. मनसि

## टिप्पणी

इत्यत्र, **विपरीतभावने**त्यादि, नागरीवत्कुतर्कोपहतमतयो न भवन्तीति तथा. **ननु ता वाच** इत्यादि, अनुभवविरोधित्वाद्वचनानां भगवति चाप्तत्वनिश्चयादिति

## लेखः

**इत्याहे**ति **इति** हेतो**राह** तापनिवृत्तिमिति शेषः. व्याख्याने, अज्ञाननिवृत्तिं विवृण्वन्ति **भ्रमादि**ति. **विरहो** विरहजन्यं दुःखमित्यर्थः. **इति ज्ञातवत्य** इति शेषः. परोक्षभजनाज्ञानं निवृत्तमित्यर्थः. **वचनमात्रेणे**ति, वक्तर्याप्तत्वनिश्चयव्यतिरेकेणेत्यर्थः. भगवत्त्वेनाप्तत्वनिश्चयादिति भावः. तर्हि पूर्वानुभवस्यापि दृढत्वेनोभयविधज्ञानात् संशयः स्यादित्याहुः **नन्वि**ति. **शब्दस्वाभाव्यादि**ति,

## योजना

**इत्थं भगवत** इत्यत्र **भ्रमादेवास्माकं विरहो जात इती**ति. ननु विरहस्य शृङ्गाररसद्वितीयदलात्मकस्य भगवद्रूपत्वाद् भ्रमजन्यत्वं कथं सम्भवतीति चेत्, सत्यं, यस्य विरहस्य भगवदात्मकत्वं स भिन्नएव, न तस्य निवृत्तिः. स रसरूपः. यत्र तु भगवान् अस्मान् विहाय गतो अतो नास्माकं भगवत्सम्बन्ध इति बुद्धिः; नत्वन्तर्भगवत्स्फूर्तिः भगवद्रमणं वा लीलास्फूर्तिर्वा सम्भवति किन्तु यत्कृतघ्नत्वबुद्ध्या प्रकटीभूतेऽपि भगवति सम्यक्त्वेन न सुखानुभवः, सोऽज्ञानजन्मा विरहः, स भगवद्वचोभिर्नाश्यते. एतासां तु विरहद्वयमप्यस्ति. तत्र भगवदात्मकस्य विरहस्य त्वाविर्भूते भगवति तिरोभावो, द्वितीयस्य तु भगवद्वाक्यैर्निवृत्तिरिति बोध्यम्. अतएव द्वितीयविरहस्याज्ञानजन्यत्वेन वास्तवत्वाभावाद् ''भवतीनां वियोगो मे न हि सर्वात्मना क्वचिदि''त्यनेन तदभावो भगवता बोधितः. **मनसि विचिकित्सायामेवे**ति —अस्यार्थष्टिप्पण्यां स्फुटः ॥१॥

विचिकित्सायामेव सन्देहः. शब्दस्वाभाव्यादेव मनसि सन्देहो न जातः. अतो **विरहजं तापं जहुः** नास्माकं विरहो जात इति ज्ञातवत्यः, यथा स्वप्नादुत्थितः स्वाप्निकं दुःखं न मन्यते. **तस्य** भगवत **अङ्गैरुपचिता आशिषो** यासाम्. भगवत्कार्यव्यतिरेकेणैव भगवदवयवैरेव सर्वमनोरथाः पूरिताः ॥१॥

एवं दुःखाभावसुखयोः प्रतिबन्धकं रूपेण वाचा च निवार्य स्वकर्तव्यमारभते **तत्रारभते**ति.

---

## टिप्पणी

भावः. **मनसि विचिकित्सायामेवे**ति, मिथो विरुद्धत्वज्ञान एवेत्यर्थः. प्रकृते भगवद्वचनानुभावात्पूर्वसान्निध्यानुभवोऽधुना सम्पन्न इति नानुभवविरोधोऽतो न सन्देह इति भावः ॥१॥

## लेखः

एतद्वाचां स्वभावो मनोहरणमुक्तं, तच्च स्वोक्तस्य परोक्षभजनस्य मनस्यनुभावनमिति भावः. **भगवत्कार्ये**ति, भगवत्कृतस्पर्शादिव्यतिरेकेणेत्यर्थः. **भगवदवयवैरि**ति, 'सहासलीलेक्षण'-'विभ्रमद्भ्रुवा'-'ऽनङ्गदीपनमि'त्युक्त्या 'अङ्कृताङ्घ्रिहस्तयोः संस्पर्शनेने'त्युक्त्या च भ्रुवादिभिरङ्घ्रिहस्ताभ्यां चेत्यर्थः. तथा च तत्रैतद्विशेषणोक्त्या भाविरमणमेतैः सूचयन्नेव वाक्यान्युक्तवानिति निरूपणादवयवानामपि वचनाङ्गत्वादेतत्कृतोपचयोऽपि वाक्कृतएवेति भावेनाग्रिमश्लोकाभासे सुखप्रतिबन्धस्य वाचा निवारणमनुवदिष्यन्तीति ज्ञेयम् ॥१॥

**तत्रारभते**त्यस्याभासे, पूर्वाध्याये "सर्वास्ता" इति श्लोके "तापं जहुरि"त्युक्तम्, अत्रापि "तापं जहुरि"त्युक्तम्. अनयोस्तापयोर्विभेदमनुवादेनाहुः **एवं दुःखाभावे**ति, प्रतियोगिनो अभावे प्रतिबन्धकत्वाद्दुःखाभावप्रतिबन्धकं दुःखं पूर्वत्र 'ताप'शब्दवाच्यम्. तं तापं स्वरूपेण निवारितवानिति "सर्वास्ता" इति श्लोके निरूपितम्. अतए"वानिष्टनिवृत्तिमाहे"ति तत्रोक्तम्. 'अनिष्टं' दुःखं, तन्निवृत्तिमाहेत्यर्थः. वक्ष्यमाणसुखे प्रतिबन्धकमवयवेषु कार्श्यादिकमत्र 'ताप'शब्दवाच्यम्. अतएव "तदङ्गोपचिताशिष" इत्युक्तम्. आशिषो व्रतचर्यायां वसनदानेन कालक्रमं विनैव सम्पादितावयवाः उपचिता यासामित्यर्थः. कार्श्यादौ विद्यमाने क्षीणरसतां स्यादतस्तन्निवर्तनमिति भावः. **स्वकर्तव्यमि**ति **स्वस्य** भगवतः कर्तव्यमित्यर्थः. उभयविधतापनिवृत्तिस्तु



**तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः ।**
**स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥२॥**

**गोविन्द** इति, एतदर्थमेवेन्द्रो जातः. अतोऽसाधारणो भोगश्च तस्यावश्यक इति च. **अनुव्रतैः स्त्रीरत्नैरन्वितः रासक्रीडामारभत.** बहुनर्तकीयुक्तो नृत्यविशेषो **रासो,** रसस्याभिव्यक्तिर्यस्मादिति. रसप्रादुर्भावार्थमेव हि नृत्यम्. **रासे क्रीडा** लीला स्वस्य. क्रीडायां मनसो रसस्योद्गमः. नृत्ये देहस्य. कामस्तु भोक्तृनिष्ठ इति स्वप्राधान्यम्. समाजेनापि रस उत्पद्यत इति एक-

---

## लेखः

प्रतिबन्धकाभावरूपा स्वरूपदर्शनेन वचनश्रवणेन च स्वतएव सिद्धा, न तु तदर्थं भगवत उद्यम इति भावः. व्याख्याने, **इति चे**ति, आधिदैविकरूपप्राकट्यार्थं लीलां कृतवानित्युक्तं, गोविन्दत्वाच्च तथेत्यर्थः. **अभिव्यक्तिर्यस्मादि**ति– इदमर्थकथनं, विग्रहस्तु रसस्यायं **रासः** रसाभिव्यञ्जकं नृत्यमित्यर्थः. रासक्रीडयोर्विभेदमाहुः **क्रीडायामि**ति, **नृत्ये** इति. अत्र नायिकाप्राधान्ये वक्तव्येऽपि भगवतः प्राधान्यकथने हेतुमाहुः **कामस्त्वि**ति. क्रीडायाः कामरूपमनोरसोद्गमहेतुत्वमुक्तम्, तस्य च भोक्तृनिष्ठत्वाद्भोक्तुरेव

## योजना

**तत्रारभते**त्यस्य विवृतौ **अतोऽसाधारणो भोगश्च तस्यावश्यक इति चे**ति. एतासामङ्गीकारस्य कृतत्वात्फलदानार्थं रासक्रीडा कर्तव्या. **गोविन्दपदे**नेन्द्रत्वनिरूपणाद् "इदि परमैश्वर्ये" इति धातुना परमैश्वर्यकथनादसाधारणो भोग आवश्यक इत्यर्थः. "गोविन्द इति चाभ्यधादि"त्यत्र 'च'कारेण गोपेन्द्रो व्रजेन्द्रो गोकुलेन्द्र इत्यादिनामानि प्रकटीभूतान्यतो गोकुलेन्द्रत्वात्तत्सम्बन्ध्यसाधारणो भोगो भगवता कर्तव्य इति भावः. **बहुनर्तकीयुक्तो नृत्यविशेषो रास** इति. रूढिसिद्धमिदं लक्षणं; "रसानां समूहो रास" इति यौगिकी व्युत्पत्तिः. **क्रीडायां मनसो रसस्योद्गमः, नृत्ये देहस्ये**ति, मानसिकस्यानन्दस्य क्रीडायामाविर्भावः, नृत्ये दैहिकानन्दस्याविर्भावः. नृत्यं तु **रास**पदवाच्यमतो रासे दैहिकानन्दस्याविर्भाव इति क्रीडाया रासस्य च भेदो ज्ञेयः. अतएव **रासे क्रीडा** इति पूर्वं रासक्रीडयोर्भेदेन व्याख्यानम्. यद्यपि 'रस'शब्दवाच्यस्यानन्दस्याविर्भावो मनस्येव; तथापि भगवत्परिकरस्यालौकिकत्वेन सच्चिदानन्दरूपतया सर्वत्रानन्दस्य विद्यमानत्वाद्देहेप्यानन्दाविर्भावो युक्त एवेति

वचनम्. तदा हीक्षुरसवद् भक्तिरसवद्वा कामरसोऽप्युत्पद्यते. गोपिकानां रस-योग्यतामाह **अनुव्रतैरि**ति, अनुव्रतं यासां तासामपि रसोत्पादनमावश्यकमिति. यादृशो भगवतोऽभिप्रेतः तादृशएवेति च. नन्वयं रसो अलौकिको न लौकिकेषूत्पद्यते, अतो व्यर्थ आरम्भो, न हि सिकतासमूहात् तैलमुत्पद्यत इति चेत्, तत्राह **स्त्रीरत्नैरि**ति, स्वभावतः **स्त्रियस्त्रि**विधाः लोकभेदेन. तत्रापि मानुषीषु जातिभेदाश्चत्वारः पद्मिन्यादयः. वासनाभेदाश्चतुर्दश अश्वप्रकृत्यादयः.

## लेखः

तत्र प्राधान्यमित्यर्थः. क्रीडाया अनेकविधत्वेऽप्येकवचने हेतुमाहुः **समाजेनापी**ति. **रसः** एक इति शेषः. **तदा ही**ति समाजे कृते इत्यर्थः. **इक्ष्वि**ति, यथा बहुभ्य इक्षुभ्योऽपि निर्गतो रस इक्षुरसत्वेनैकएव, यथा वा भक्तिरूपोऽधरसुधारसोऽनेकस्वामिनीमुखारविन्देभ्योऽपि निर्गतः सुधारसत्वेनैकएव; अतएव "अन्तः प्रविष्टो भगवानि"ति कारिकायामेकवचनमेवोक्तम्, तथा कामरसोऽपि सर्वाभ्योऽपि निर्गतः कामरसत्वेनैकएव. **सोऽप्युत्पद्यते** एक इति शेषः. भगवता एकीकृत्य भुज्यते इत्यर्थः. **अपि**शब्दान्नृत्यरसः. तथा च **रासे क्रीडा** काम**लीले**त्यर्थः. अतएव **स्वस्ये**त्युक्तम्, कामभोक्तुरित्यर्थः. अग्रे तु नृत्यकामरसयोः प्रत्येकपर्यवसानं वक्ष्यते. **तादृशएवे**ति तासामभिप्रेत इति शेषः. तथा चानुव्रतत्वेनावश्यकत्वादेकाभिप्रायकत्वाच्च रसोत्पादनमित्यर्थः. **लौकिकेष्वि**ति, "पादन्यासैरि"त्यत्र वक्ष्यमाणप्रकारेणावयवेभ्यो रसनिर्गमार्थं हि रासारम्भः. तथा चैतदात्मनामलौकिकत्वेऽप्येतदवयवानां तु लौकिकत्वम्, अन्यथा तत्तदवयवलक्षणक-पद्मिनीत्वादिव्यवहार एतासु न स्यात्, परिचयार्थं लौकिकैरेवावयवैः शास्त्रे लक्षणकरणात्. अतः स रसो **लौकिकेष्व**वयवेषु **नोत्पद्यते** न तिष्ठत्यतस्ततः कथं निर्गम इत्यर्थः. उत्पत्तेः सत्तार्थकत्व"मौत्पत्ति-

## योजना

बोध्यम्. **अनुव्रतैरि**त्यस्य विवृतौ **अनुव्रत**पदतात्पर्यमाहुः **तासामपि रसोत्पादनमावश्यकमितीति**, यथा भगवतो रमणोत्कण्ठया रसोत्पादनमावश्यकं तथा तासामपि रसोत्पादनम् आवश्यकं, रिरंसाधिक्यादतोऽनुव्रतात्वमित्यर्थः. अथवा तासाम् अनुव्रतानामुपरि परमानुग्रहाद्रसोत्पादनं भगवता कर्तव्यमेवेति भावः. **अनुव्रत**पदस्यार्थान्तरमाहुः **यादृशो भगवतोऽभिप्रेतस्तादृशएवेति चेति**, ताभिरभिव्यक्तीक्रियत इति शेषः. तासामनुव्रतात्वेन भगवदभि-



सर्वास्वेवैता **रत्न**भूताः स्वासाधारणधर्मैस्तद्धर्मप्रकाशिकाः. अतः सर्वभावेन रसोत्पत्तियोग्यता. **तैरन्वित** इति– स्वयं नायकमणिः, तद्योग्या एते मणय इति. एकरसत्वाय च मेलनम्. अनेन रसप्रकटनार्थं शुल्कदासिका भगवते दत्ता इति यदुक्तं तदपि समर्थितम्. नन्वेते जीवाः, भगवानानन्दमयः, कथं वैषम्याद्रसोत्पत्तिरिति चेत्, तत्राह **प्रीतैरि**ति– ता अपि भगवत्सदृश्यो जाताः, सर्वतः प्रीता इति. तासामभिनिवेशप्रकारमाह **अन्योन्याबद्धबाहुभिरि**ति, ताः परस्परमासमन्तादुभयतः **बद्धौ बाहू** यासां, न तु भगवता सह ॥२॥

भगवान् पुनः हस्तमण्डलाद् बहिःस्थितो यथा सम्बध्यते तथा सन्निवेशमाह **रासोत्सवः सम्प्रवृत्त** इति.

## लेखः

कस्तु शब्दस्यार्थेन सम्बन्ध" इति सूत्रे व्याख्यातम्. **स्वासाधारणे**ति, **स्वस्यासाधारणा** ये **धर्माः** पद्मिनीत्वादयस्तेषां यत्किञ्चित् स्थापनेन लौकिकीनां लौकिकेष्वप्यङ्गेषु पद्मिनीत्वादि**धर्मप्रकाशिकाः.** नैतावता तासां स धर्मः किन्त्वेतदवयवानामेवेति भावः. यथा श्रीपुष्ट्यादीनां लौकिकेषु यत्किञ्चित्स्थापनेन तेष्वपि श्रीपुष्ट्यादिमन्त इति व्यवहारो, न तु वस्तुतस्तास्तेषां शक्तयः किन्तु भगवतएवेति सिद्धान्तः, तथात्रापीति ज्ञेयम्. तथा च **रत्नानि** रत्नसदृश्य इत्यर्थः. यथा कङ्कणादिषु स्थितानि रत्नानि स्वासाधारणधर्मैश्चाकचिक्यादिभिः कृत्वा कङ्कणादिष्वपि चाकचिक्यादिप्रकाशकानि तथैता अपीति सादृश्यम्. **अनेने**ति क्रीडार्थमन्वितत्वकथनेनेत्यर्थः. एवं कथनेन कामेन हेतुनान्वितो जात इत्युक्तं भवति. तथा च भगवते कामेन समर्पिता इति सिद्धमेवेत्यर्थः. **भगवत्सदृश्यो जाता** इति, प्रीतेरानन्दधर्मत्वात् तद्युक्ता आनन्दरूपा जाता इत्यर्थः ॥२॥

**सन्निवेशमाहे**ति, "गृहीतानां कण्ठे" इत्यन्तस्याभासोऽयम्. **सर्वेषामि**ति, कामलीलान्तःपातिनामाश्लेषादीनामित्यर्थः. "मह उद्भव उत्सव" इति

## योजना

प्रायानुकूलएव रसोऽभिव्यक्तीक्रियत इति भावः. **स्त्रीरत्नैरि**त्यत्र **स्वासाधारणधर्मैरि**त्यादि. **असाधरणधर्मैरि**त्यादि, **असाधारणधर्मैः** कृशाङ्गीत्व-मृगनयनीत्व-चन्द्रमुखी-त्वादिरूपैः स्त्रीरत्नत्वप्रकाशका इत्यर्थः ॥२॥

**रासोत्सवः सम्प्रवृत्तो गोपीमण्डलमण्डितः ।**
**योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ।**
**प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः ॥३॥**
**यं मन्येरन्, नभस्तावद्विमानशतसङ्कुलम् ।**
**दिवौकसां सदाराणामौत्सुक्यापहृतात्मनाम् ॥४॥**

सर्वेषामेव गुणभावाद् रसप्राधान्याद् **रासोत्सव**एव **सम्यक् प्रवृत्तः**. **उत्सवो** नाम मनसः सर्वविस्मारक आह्लादः. उत्सवत्वसम्पादनाय सजातीयानेकरसोत्पादनार्थं विशेषमाह **गोपीमण्डलमण्डित** इति, **गोपीनां मण्डलैर**नेकविधै**र्मण्डितः**. उत्सवोऽप्यनेकविधैर्ब्राह्मणादिमण्डलैर्मण्डितो भवति. अत्रापि तुल्यस्वभावाः रसार्थमेकीकृताः पृथङ्मण्डलभाजः, तैरपि मण्डितः. पोषकाश्च रसास्तत उत्पादिता इति उत्तरोत्तरमण्डलैः पूर्वपूर्वरसः पोष्यत इति नायं रसोऽन्यत्र भवितुमर्हति. **सम्यक्प्रवृत्ति**र्निरन्तरमाविर्भावः. ननु कालकर्मस्वभावानां प्रतिबन्धकत्वादनेकत्र जायमानो रसः कथमेकीभवति? तत्राह **योगेश्वरेणे**ति, स हि सर्वोपायवित्. सर्ववस्तुषु विद्यमानं भगवदैश्वर्यादिकं योगएवोद्घाटयतीति साधनेषु योगः प्रधानम्. तत्रैश्वर्ये सर्वत्रैव मूलभूतो रस उत्पादयितुं शक्यत इति सिद्धमेव. किञ्च. **कृष्णो**ऽयमिति स्वयमेव सदानन्दः. उद्गतोऽग्निः सर्वत्रैवाग्निं लीनं जनयितुं शक्नोति. तस्य भगवतस्तासु सन्निवेशप्रकारमाह **तासां मध्ये द्वयोर्द्वयोरि**ति. मण्डलीकृता यावत्यो गोप्यः तासां द्वयं द्वयं भिन्नतया भावनीयम्. द्वित्वद्वयस्य नैकाधिकरणता भाव्या. अतो मण्डलमध्ये यत्र हस्तद्वयग्रन्थिः तत्र भगवदुदरं यथा भवति तथा भगवानुत्थितो जातः. तथोद्गतस्योभयत्र सम्बन्धमाह **द्वयोर्द्वयोर्मध्ये प्रविष्टेन** भगवता **कण्ठे गृहीतानामि**ति, हस्तद्वयेन पार्श्वस्थितयोः कण्ठे ग्रहणम्. एवं षोडशगोपिकानामष्ट[१] कृष्णा भवन्ति. अन्यथा रसाभासः स्यात्, कृष्णद्वैविध्यप्रतीतेः. इममेवार्थमाह **स्वनिकटं स्त्रियः यं मन्येरन्नि**ति, स्वस्यैव

## टिप्पणी

**गोपीमण्डलमण्डित** इत्यत्र, **उत्तरोत्तरे**ति, उत्तरोत्तरक्षणसम्बन्धिभिरित्यर्थः. **पूर्वपूर्वे**ति, पूर्वपूर्वक्षणसम्बन्धीत्यर्थः ॥३॥

## लेखः

कोशप्रसिद्धमुत्सवलक्षणमाहुः **उत्सव** इति. अतएव **नामे**त्युक्तम्, प्रसिद्धमित्यर्थः. **उत्सवत्वे**ति, रासजन्यह्लादस्य सर्वविस्मारकत्वं संपादयितुमित्यर्थः. तथाच रासजन्याह्लादो रासोत्सव इत्यर्थः. **पोषकाश्चे**ति, अतोऽपि **मण्डल**पदमित्यर्थः. मण्डलस्य पोषकत्वं व्युत्पादयन्ति **उत्तरे**ति. **कालकर्मस्वभावानामि**ति, प्राकृतानां पूर्वमेव निरस्तत्वात् "तमद्भुतं बालकमि"त्यत्रोक्तानां भगवद्रूपाणामित्यर्थः. तेषामपि लीलार्थं तथा स्वभावत्वादिति भावः. **तत्रे**ति,

## योजना

**गोपीमण्डलमण्डित** इत्यत्र, **उत्तरोत्तरमण्डलैः पूर्वपूर्वरसः पोष्यत इती**ति, एतदर्थष्टिप्पण्यां स्फुटः. **तासां मध्ये द्वयोर्द्वयोरि**त्यस्य विवृतौ **तासां**



## प्रकाशः

सुबोधिन्यां **तासां मध्य** इत्यत्र **अन्यथे**ति षोडशकृष्णपक्षे चतुःकृष्णपक्षे

## लेखः

योगे इत्यर्थः. **अग्निं लीनमि**ति, एतास्वपि "कृष्णएव जात" इत्यनेन स्वानन्दस्थापनस्योक्तत्वादिति भावेन दृष्टान्तः.

**सन्निवेशप्रकारमाहे**ति, **रासोत्सव** इत्यत्रोक्ताभासस्यानुवादोऽयम्. **नैकाधिकरणते**ति, गोपीनां द्वित्वद्वयमेकस्मिन् भगवति **न** एकं भगवन्तवलम्ब्य न तिष्ठति; किन्तु द्वित्वान्तरे द्वितीयो भगवानित्यर्थः. **अन्यथे**ति समसङ्ख्याया-

## योजना

**द्वयं द्वयं भिन्नतया भावनीयमि**ति, गोपिकाद्वयं भावयित्वा श्रीकृष्णभावना कार्या, ततः पुनः गोपिकाद्वयं भावनीयं, पुनः श्रीकृष्णो भावनीयः. एवं सति सर्वासाम् एकस्मिन् पार्श्वे भगवान्, तेन सह क्रीडा. भगवतस्तु वामपार्श्वे व्रजसुन्दरी तया सह क्रीडा, दक्षिणपार्श्वे चैका तया सह क्रीडा इत्येकस्य भगवत्स्वरूपस्योभाभ्यां गोपिकाभ्यां क्रीडेति बोध्यम्. **द्वित्वद्वयस्य नैकाधिकरणता भाव्ये**ति गोपिकाद्वित्वद्वयस्य एकाधिकरणता न भाव्या. गोपिकाचतुष्टयमेकं भगवत्स्व[२]रूपमवलम्ब्य तिष्ठतीति न भावनीयं किन्तु गोपिकाद्वयमेकं भगवन्तमवलम्ब्य तिष्ठतीति भावनीयम्. तत्राप्येकस्या वामभागे भगवान्, अन्यस्या दक्षिणभागे हरिरिति ध्येयम्. इह द्वित्वद्वयं भिन्नभिन्नतया **भावनीयमि**ति श्रीमदाचार्यैर्भावनायां कृत्यप्रत्ययस्योक्तत्वादवश्यं जपादिसमये सर्वदैवैतादृशं रूपं स्मर्तव्यम्. **एवं षोडशगोपिकानामष्टकृष्णा भवन्ती**ति,

१. गोपिकानां मध्येऽष्टेति पाठः सूचितः.
२. एकभगवत्स्वरूपम् इति मुद्रितः पाठः. मुं. वि. पाठः गृहीतः.

निकटे न त्वन्यासाम्. स्वसम्मुखस्थित-गोपिकाकण्ठालिङ्गित-भगवद्दर्शनमपि भगवदिच्छया तासां न जायत इति. प्रयोजनार्थं हि रूपकरणं, तदर्धसङ्ख्ययैव प्रयोजनं भवतीति न समसङ्ख्या मृग्या. "यावतीर्गोपयोषित" इत्यग्रे समसङ्ख्यां भगवतो वक्ष्यति. यत्पुनः कैश्चिदुक्तम् "अङ्गनामङ्गनामन्तरे माधव" इति, तत्रापि सविसर्गः पाठो ज्ञेयः, द्विवचने बहुवचनप्रयोगश्च.

---

**प्रकाशः**

चेत्यर्थः. तत्राद्यपक्षे हेतुमाहुः **कृष्णे**त्यादि. द्वितीये हेतुर्मूलादेव स्फुटतीत्याशयेनाहुः **इममि**त्यादि, **इमं** अष्टकृष्णपक्षरूपम्. तथा च चतुःकृष्णपक्षे अष्टानां सम्बन्धाभावेन मूलं विरुध्येतेत्यष्टकृष्णपक्षएवादर्तव्य इत्यर्थः. प्रकारान्तरेण रसाभासमाशङ्क्य परिहरन्ति **स्वसंमुखे**त्यादि. ननु भगवदिच्छया दर्शनाभावसमर्थने षोडशपक्षोऽप्यदुष्ट इत्यत उपपत्त्यन्तरमाहुः **यावतीरि**त्यादि. नन्वस्त्वेवं, तथापि भक्तानां प्रत्यक्षस्यापि प्रामाण्याद् बिल्वमङ्गलैश्च समसंख्यादर्शनान्नैकान्ततोऽष्टसंख्यानिर्णय इत्यत आहुः **यदि**त्यादि. तथा च

**लेखः**

मित्यर्थः. **तासां द्वयोर्द्वयोर्मध्ये प्रविष्टेन** भगवता **कण्ठे गृहीतानां** सम्बन्धी **रासोत्सवो योगेश्वरेण कृष्णेन सम्प्रवृत्त** इत्यन्वयः. **स्वस्यैवे**ति स्वद्वित्वस्यैवेत्यर्थः. ननु स्वपार्श्वस्थ-द्वित्वस्थित-भगवददर्शनेऽपि संमुखस्थितं तद्दर्शनं तु स्यादित्यत आहुः **स्वे**ति. **सविसर्ग** इति, अङ्गना अङ्गना अन्तरे इत्यत्र लुप्त-

**योजना**

षोडशगोपिकानामेकं मण्डलम्, एवं नानामण्डलानि. तत्र षोडशगोपिका भगवतः कलारूपाः, ताभिः कलारूपाभिः सहितः श्रीवृन्दावनचन्द्रो भगवान् बोधितः. अतएव षोडशैव गोपिकाः गणिताः, तावतीनामेव मण्डलं निरूपितम्. अनेन प्रमाणप्रकरणे एकादशाध्याये वृन्दावनगमनप्रसङ्गे "गोपवृद्धा महोत्पातानननुभूय बृहद्वने" इत्यारभ्य "राममाधवयोर्नृपे"त्यन्तैः षोडशभिः श्लोकैः षोडशसंख्यातात्पर्येण सूचितं श्रीकृष्णस्य चन्द्रत्वं फलप्रकरणे स्फुटीकृतं षोडशगोपिकामण्डलकथनेन. **अन्यथा रसाभासः स्यादि**ति, यदि एकामेकां गोपिकां प्रति एकं एकं कृष्णस्वरूपं स्यात् तदा मण्डलमध्ये एकस्या एकस्या गोपिकायाः पार्श्वद्वये भगवान् स्यात्. तदा भगवत्स्वरूपद्वयेन एकैकस्याः सम्बन्धे रसाभासः स्यादित्यर्थः. तदेवाहुः **कृष्णद्वैविध्यप्रतीतेरि**ति.



अन्यदेव वा तन्मण्डलं, न भागवतोक्तं, मध्ये वेणुनादस्योक्तत्वाद्, अत्र तु रसार्थे नृत्यमिति गानार्थमपेक्षायामपि देवैरेव तत्सिद्धिः. "मध्ये मणीनां हैमानामि"त्यत्र तु दर्शनार्थमुक्तत्वाद् गोपिकानां देवानां च दर्शनं तथैवेति नानुपपन्नं किञ्चित्. एवं रसार्थं सर्वसामग्र्यामुक्तायां स रसः प्रादुर्भूतः सर्वेषां

---

**प्रकाशः**

तद्वाक्ये कालवशेनाधुना पाठभ्रमो, **वा** तादृशपाठस्य प्रामाणिकत्वे **तद्दृष्टं मण्डलमन्यदेव** रसपोषोत्तरभावीति निश्चेयमित्यर्थः. ननु मध्ये 'वेणुनादो'-क्तिर्नान्यित्वगमिका, रसार्थेऽपि मण्डले गानस्यापेक्षितत्वादित्यत आहुः **गानार्थमि**त्यादि. नन्वत्राप्यग्रे समसंख्यापक्षस्य संभवदुक्तिकत्वान्नैकान्ततः संख्यानिर्णय इत्यत आहुः **मध्ये मणीनामि**त्यादि. तथा च यथात्र भगवदिच्छया संमुख-स्थित-कण्ठालिङ्गित-दर्शनाभावः, तथा तत्र देवानां समसंख्यादर्शनं, न तावतात्र तादृक्संख्यासिद्धिरित्यर्थः. अत्र बीजं **तासां मध्ये**

**लेखः**

विसर्ग इत्यर्थः. इदं बहुवचनं च महत्त्वविवक्षया द्विवचनार्थे. तथा चाङ्गनयोः अन्तरे इत्यर्थः. द्विवचनान्तत्वे पररूपापत्त्या 'अङ्गनेङ्गनेन्तरे' इति स्यात्, तथाच छन्दोभङ्ग इति भावः. **नृत्यमिती**ति, नृत्यस्यैव रसोद्बोधार्थकत्वात् तदुद्बोधको वेणुनादो नोक्त इति शेषः. नन्वेवंप्रकारकमण्डले सति "मध्ये मणीनामि"त्यनेन भगवत एकस्य स्थितिः कथमुक्तेत्याशङ्क्याहुः **मध्ये मणीनामि**ति. तत्र तु **दर्शनार्थं** दृष्टान्त**स्योक्तत्वाद् गोपिकानां देवानां च**कराद् गन्धर्वादीनां **दर्शनं तथैव** परितो गोपिकाः मध्ये एको भगवानिति

**योजना**

**मध्ये मणीनां हैमानामित्यत्र त्वि**ति, "हैमानां मणीनां मध्ये महामारकतो यथे"त्युक्ते एको भगवान् बह्वीषु नृत्यतीति प्रतीयते. तच्च पूर्वोक्तविरुद्धं, पूर्वं **तासां मध्ये द्वयोर्द्वयोः प्रविष्टेने**त्युक्तत्वादित्याशंक्य समादधते **"मध्ये मणीनां हैमानामि"त्यत्र तु दर्शनार्थमुक्तत्वाद्गोपिकानां देवानां च दर्शनं तथैवे**त्यनेन. पूर्वं यथा भगवान् मण्डलमध्ये रूपाणि कृत्वा प्रविष्टः तथा वर्णितं भगवतो बहुरूपत्वं शुकेन, "मध्ये मणीनामि"त्यत्र तु यथा देवानां[1] दर्शनं जातं "बह्वीषु गोपिकास्वेको भगवानि"ति तथैव शुकेन वर्णितमि-

---

१. दैवानाम् इति मुद्रितः पाठः. मुं. वि. पाठः गृहीतः.

भविष्यतीति देवादयः सर्वे अलौकिकज्ञानयुक्ता दर्शनार्थमागता इत्याह **नभस्तावदिति, तावन्नभो विमानशतसङ्कुलमासीत्**. मण्डपे हि नृत्यं रसजनकम्. अन्यथोपरि वैचित्र्यं न स्यात्. तदर्थमपि विमानशतेन सङ्कुलम्. यथा रसोत्पादनार्थं स्त्रियः पुरुषाश्च सम्बद्धाः नानाबन्धयुक्ताः चित्रे स्थाप्यन्ते तदर्थं भगवता ते चित्रप्रायाः स्थापिताः. अत एवाग्रे **औत्सुक्यापहृतात्मनामि**ति वक्ष्यति. स्वलीलार्थं सर्वं तथा प्रेरयतीति न औत्सुक्येनान्यथासिद्धिः. तासां रसग्रहणार्थमागमनं, भगवदिच्छा तु चित्रार्थम्. विमानस्थितान् तत्सम्बन्धिनो वर्णयति **दिवौकसामि**ति. स्वर्गएव स्थानं येषाम्. **सदाराणामि**ति तेषां भावान्तरव्युदासार्थम्. स्त्रीणामुपसर्जनत्वं तासां भावार्थं, स्वर्गस्थिता रसाभिज्ञा रसयोग्याश्च भवन्तीति. नन्वीश्वरलीला न द्रष्टव्येति कथं तेषां दर्शनार्थं

**प्रकाशः**

**द्वयोर्द्वयोः** "यावतीरि"तिवाक्यद्वयार्थापत्तिरेव बोध्येत्याशयेनाहुः **नानुपपन्नं किञ्चिदि**ति. नन्वौत्सुक्यस्य भगवद्दर्शने प्रयोजकत्वात्तेन कथमात्मापहार इत्यत आहुः **स्वे**त्यादि ॥३॥

**लेखः**

प्रकारकमेवेत्यर्थः. तथा च तत्र दृष्टानुवाद इति भावः. **सर्वेषामि**ति द्रष्टृणामपीत्यर्थो, यथाधिकारमिति शेषः. **सामग्र्यामि**त्यस्यानन्तरं सत्यामिति शेषः. **उक्तायां सामग्र्यां** सत्यामित्यर्थः. **अन्यथे**ति विमानाभावे इत्यर्थः. **तदर्थमपी**ति, दर्शनार्थमागमनं वैचित्र्यार्थमपीत्यर्थः. **अन्यथासिद्धिरि**ति प्रवृत्त्यात्रागमनमित्यर्थः. **तत्सम्बन्धिन** इति, दारसाहित्यकथनात् मिथुनरससम्बन्धिन इत्यर्थः. **औत्सुक्येने**ति, उत्सुकतया विचाररहितं लीलाक्षिप्तं च मनो जातमत आत्मनोऽपहार इत्यर्थः ॥३-४॥

**योजना**

त्यविरोधः. **गोपिकानां देवानां चे**ति सुबोधिनीफक्किकायां **गोपिकानां दर्शनं** गोपिकाकर्मकं दर्शनमित्यर्थो बोध्यः. **देवानां चे**ति तु देवकर्तृकं दर्शनमित्यर्थो बोध्यः. तथा च देवानां भगवद्दर्शने एको भगवान् नृत्यति मध्ये इति दर्शनं, गोपिकानां तु बह्वीनां तु दर्शनं मारकतमणेः परितो योजितानां हैममणीनामिवेत्यर्थो भवति. एवं सति गोपिकानां परितः स्थितानामेव देवैर्दर्शनं कृतम्, न तु गोपिकासम्बन्धिनी काचिदन्तरङ्गा लीला दृष्टेति फलितम् ॥३॥



प्रवृत्तिः? तत्राह **औत्सुक्यापहृतात्मनामि**ति, **औत्सुक्येन** विचाररहितलीलाक्षिप्तमनसा **अपहृत आत्मा** स्वरूपं बुद्धिर्वा येषाम्. अतः स्वधमदिव प्रवृत्ताः, न तु भगवद्धर्मं विचारितवन्तः ॥३-४॥

ततो नृत्यारम्भे यद् भाव्यं तज्जातमित्याह **तत** इति.

**ततो दुन्दुभयो नेदुर्निपेतुः पुष्पवृष्टयः ।**
**जगुर्गन्धर्वपतयः सस्त्रीकास्तद्यशोऽमलम् ॥५॥**

आदौ **दुन्दुभि**वादनं, "परमा वा एषा वाग् या दुन्दुभावि"ति श्रुतेः. ततः प्रथमतः **पुष्पवृष्टि**र्मङ्गलार्था. पुष्पाञ्जलिः प्रसिद्धः, आगतो रसः तदधिष्ठाता वा पूज्यत इति. नानाविधानां पुष्पाणां भिन्ना वृष्टय इति बहुवचनम्. ततो गानं साधारणं जातमित्याह **जगुर्गन्धर्वपतय** इति, भगवान् श्रोष्यतीति उत्तमैरेव गानम्. **गन्धर्वपतयो** विश्वावसुप्रभृतयः. ते ह्यधिकारिण इति नटानामिव तेषां दर्शनं न दोषाय. अन्यथा भगवद्धस्तस्थितेन्द्रादीनामपि

**टिप्पणी**

**जगुर्गन्धर्वपतय** इत्यत्र, **अन्यथा भगवद्धस्ते**त्यादि. अत्रायं भावः. यथा भगवल्लीलामात्रोपयोगिनो नटा इव विश्वावसुप्रभृतयः, तथा भगवद्गृहसदनादिमात्रोपयोगिक्रियाशक्तिमन्त इन्द्रादयो दिक्पालेभ्यो भिन्नाः सन्ति. ते त्वेतद्भुजदण्डमात्रावलम्बाः, तयो रसरूपत्वेन रसात्मकक्रियाशक्तिप्रधानानामेव तत्र स्थितेरुचितत्वात्. अतः सुष्ठूक्तं **भगवद्धस्ते**त्यादि ॥५॥

**प्रकाशः**

**जगुरि**त्यत्र **नटानामि**ति नर्तकीशिक्षकाणामित्यर्थः. **अन्यथाबुद्धिरि**ति

**लेखः**

**ततो दुन्दुभय** इत्यत्र, **दोषत्वमि**ति, दोषयतीति[१] दोषस्तत्त्वं दोषजनकत्वमित्यर्थः. **अर्थद्रव्यविरोधेऽर्थ** इति, "अर्थद्रव्यविरोधेऽर्थो द्रव्याभावेऽतदुत्पत्तेर्द्रव्याणामर्थशेषत्वादि"ति प्रतितन्त्रसूत्रादित्यर्थः. **अतस्तेषां दर्शनं न दोषाये**ति पूर्वेणान्वयः. **तथापी**ति, तद्दर्शनस्य भगवति दोषावहत्वाभावेऽपि तेषु दोषावहत्वं स्यादित्यर्थः. **वैषयिके**ति, तत्र तथाबुद्ध्यभावेऽपि चित्रदर्शनेनेव

**योजना**

**जगुर्गन्धर्वपतय** इत्यत्र **अन्यथा भगवद्धस्ते**त्यादि, अस्यार्थष्टिप्पण्यां

१. दूषयति इति जो. पाठः.

दोषत्वं स्यात्. "अर्थद्रव्यविरोधेऽर्थो बलीयानि"ति न्यायात्. तथापि तेषामन्यथाबुद्धिः सम्भाव्येतेति विशेषणमाह **सस्त्रीका** इति. वैषयिकदोषव्यावृत्त्यर्थमाह **अमलं तद्यश** इति. तद्धि मलनिवर्तकम्, अतो न तासां तेषां वा तत्कालोपयोगिपदार्थादतिरिक्तो भाव उत्पद्यते ॥५॥

एवं बाह्यगीतवाद्यादिकमुक्त्वा नृत्यमध्ये रसोपयोगिवादित्राण्याह **वलयानामि**ति.

**वलयानां नूपुराणां किङ्किणीनां च योषिताम् ।**
**सप्रियाणामभूत् शब्दस्तुमुलो रासमण्डले ॥६॥**

स्थानत्रये हि वादित्राण्यपेक्ष्यन्ते— नीचस्थाने भूमाविव, मध्ये उपरि च; तथैव तालभेदाः. अतोऽत्रापि उपरि **वलयानां शब्दः**, अधो **नूपुराणां**, मध्ये **किङ्किणीनाम्.** अन्योन्याबद्धबाहवएव मध्ये मध्ये हस्तद्वयं योजयन्तीति

**प्रकाशः**

मर्यादामार्गादिरीतिमनुसृत्येत्यर्थः. **सस्त्रीका** इति विशेषणेन स्वस्त्रीणामपि दर्शनं भवतु एताश्चोपयुज्यन्तामिति भावस्तेषां स्फुटतीति भक्तिमार्गीयत्वान्न तथेति भावः ॥५॥

**लेखः**

स्वस्त्रीष्वेव कामोद्बोधः स्यादित्यर्थः. **तासां तेषां वे**ति गन्धर्वीणां गन्धर्वाणां चेत्यर्थः ॥५॥

**अन्योन्ये**ति. ग्रन्थियुक्ते हस्ते एव तालाभिव्यक्त्यर्थं मध्ये मध्ये द्वितीयं हस्तं योजयन्तीत्यर्थः. **पादन्यासैरिति** इति श्लोके 'भुजविधुतिमि'ति शेषः.

**योजना**

स्फुटः. **सस्त्रीकास्तद्यशोऽमलमि**त्यस्य विवरणे **वैषयिकदोषव्यावृत्त्यर्थमाहे**ति, देवानां भगवल्लीलादर्शने भगवत्परिकरविषयकदोषोत्पत्त्यभावेपि स्वभोग्यस्त्रीषु कामोद्बोधः स्यात्तन्निवृत्तये यशो जगुः. तद्यशःस्वरूपमाहुः **अमलं तद्यश** इति. न मलं यस्मादिति पञ्चम्यन्ते अन्यपदार्थे बहुव्रीहिणा मलनिवर्तकं यश इत्यर्थः सिध्यति. तदाहुः **तद्धि मलनिवर्तकमि**ति. **अतो न तासां तेषां वे**त्यादि. **तासां** देवस्त्रीणामित्यर्थः, **तत्कालोपयोगिपदार्थादतिरिक्त** इति स्वस्वपुरुषविषयकः काम**भाव** इत्यर्थः. **तेषां वे**ति, **तेषां** देवानां भगवत्परिकरविषयकः स्वस्वस्त्रीविषयकश्च काम**भावो नोत्पद्यत** इति भावः ॥५॥



वलयानां शब्दः. अथवाग्रे शब्दोत्पत्त्यर्थं प्रकारं वक्ष्यति "पादन्यासैरि"ति. **सप्रियाणां** कृष्णसहितानाम्. अतएव सर्वलास्यसम्पत्तिः सर्वासां भगवत्सम्बन्धार्थम्. **च**काराद् अन्येऽपि कूजितशब्दा मुखशब्दाश्चोक्ताः. सर्वः एकीभूय **तुमुलो** भूत्वा, यथा दूरस्थानामवान्तरग्रहणं न भवति. तथा सति किं स्याद्, अत आह **रासमण्डल** इति, रसानां समूहमण्डले. यथानधिकारित्वेन शूद्रस्य वेदश्रवणे तदध्येतुर्मन्त्रस्य च शक्तिह्रासः शूद्रे च पापसम्भवः, तथैतद्भक्तातिरिक्तानामेतच्छ्रवणेऽप्यनधिकारादस्य रसस्यालौकिकत्वादेतच्छ्रवणे मण्डले सर्वेषां रसो गच्छेत्. श्रवणे सति तदन्वेषणपरत्वं स्यात्. तत्तेषामेवानिष्टकरमिति तदेव पापरूपम् ॥६॥

एवं नृत्यमध्ये प्रविष्टो भगवान् गुणभावात् कदाचिन्न भासेतेत्याशङ्क्य सर्वजनीना भगवच्छोभा तदा जातेत्याह **तत्रे**ति.

**तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः ।**
**मध्ये मणीनां हैमानां महामारकतो यथा ॥७॥**

स्वभावशो भातो**ऽप्यतिशयेन शुशुभे.** तदुक्तं शक्तिभिः सहितोऽधिकां शोभां प्राप्नोतीति. कदाचित् स्वतएव शोभां प्रकटयेदिति तद्व्यावृत्त्यर्थं **ताभिरि**त्युक्तम्. ननु सहजशोभायुक्तस्य कथं ताभिरतिशोभा, तत्राह **भगवानि**ति, यथा गुणैः. ननु गुणाः सर्वोत्तमाः, न तथैता इति चेत्, तत्राह **देवकीसुत** इति, भक्त्या यथा देवक्या अपि पुत्रो जातः, स्त्रीणामेवोपकारायाविर्भूतः, अतस्तास्वपि स्वसामर्थ्यमेव दत्वा शोभां प्राप्तवान्. सहजस्य

**लेखः**

**सर्वलास्ये**ति, कुलाङ्गनानामसम्भावितनृत्याभ्यासानामेतावत्प्रकारकज्ञानं भगवदनुभावादेवेत्यर्थः. **सम्बन्धार्थं चे**ति, **सप्रियाणामि**ति पदमुक्तमिति शेषः. **तुमुलो भूत्वे**ति स्थित इति शेषः ॥६॥

**तत्रातिशुशुभे** इत्यस्याभासे, शोभायाः सार्वदिकत्वेऽपि कथनस्य प्रयोजनमाहुः **नृत्यमध्ये** इति. तथा च गौणत्वसंभावितशोभाभावस्य कैमुत्येन निरासो वाक्यतात्पर्यार्थ इति भावः ॥७॥

**योजना**

**तत्रातिशुशुभे** इत्यस्य विवरणे **तदुक्तं शक्तिभिः सहितोऽधिकां शोभां प्राप्नोती**ति, "व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथे"त्यत्रोक्तमित्यर्थः ॥७॥

कृत्रिमैः शोभा न भविष्यतीत्याशङ्क्य दृष्टान्तमाह **मध्ये मणीनामि**ति—**महामारकतो** गरुडोद्गारी स मणिः सहजः, सुवर्णमणयः कृत्रिमाः, तथापि ते परितः क्लृप्ताः सहजमणिमप्यतिशोभयन्ति ॥७॥

एवं पूर्वपीठिकामुक्त्वा मुख्यं नृत्यमाह **पादन्यासैरि**ति.

**पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैः**
**भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः ।**
**स्विद्यन्मुख्यः कबररशनाऽग्रन्थयः कृष्णवध्वो**
**गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥८॥**

**पादन्यासाः** सर्वएव चारीकरणरूपाः. **भुजानां विधुतयश्च** सर्वहस्तकभेदाः; एकेनावयवेन शिष्टावयवाः तथा संविधानयुक्ता इति ज्ञेयम्. मन्दहाससहिताः सर्वएव कटाक्षा उक्ताः, भ्रूभेदाश्च, तत्तद्रसे हृदयाविष्टे तथैव भवन्तीति. **भज्यद्** भङ्ग्युक्तानि **मध्यानि** उपरिभागपरिवर्तनात्मकानि, रसाभिनिविष्टानां तासां सर्वावयवातिभ्रमणेन रस एकीभवतीति. परिवर्तनादिभिरेव वा **चलेषु कुचेषु पटा** इति सर्वाण्येव कम्पनान्युक्तानि. **कुण्डलैर्गण्डलोलैरि**ति सर्वएव शिरोभेदा उक्ताः. शिरोभेदेष्वेव वक्तव्येषु कुण्डलानां यच्चलननिरूपणं तद्विद्युतामिव शोभार्थम्. **गण्डलोलैरि**ति सर्वा कान्तिस्तत्रोपक्षीणेति ज्ञापनार्थम्. [1]गण्डे हि केवलो रसः, पेयो रसस्ततएव पीयत इति. विद्योतनं तस्यैवाभिव्यक्त्यर्थम्. ततोऽन्तःस्थितो रसः पुष्टोऽभिव्यक्त इति ख्यापनार्थमाह **स्विद्यन्मुख्य** इति, **स्विद्यत्** स्वेदयुक्तानि **मुखानि** यासामिति. **कबररशनासु**

**लेखः**

**देवकीसुत**पदेन तासामपि तथा व्यवस्थापितत्वाद् अग्रिमश्लोके शोभासाधकान्तरं नृत्यसामयिक-पादन्यासादिकमेव वाक्यार्थ इत्याशयेन तदाभासमाहुः **मुख्यं नृत्यमाहे**ति.

**पादन्यासैरि**त्यत्र, अत्र सङ्केतादिसूचनाभावेऽपि भ्रूविलासकथने हेतुमाहुः **तत्तद्रसे** इति, स्वतएव भवन्त्यत उक्ता इत्यर्थः. **रसाभिनिविष्टानामि**ति, रसार्थं मण्डले अभिनिविष्टानां अवयवेषु स्थितो रसो भ्रमणेनैकीभवतीत्यर्थः. प्रसिद्धमर्थमाहुः **परिवर्तनादिभिरि**ति. एतैः कृत्वान्तःस्थितो रसोऽनुभूयते, न त्ववयवेषु स्थितस्यैकीभवनमिति पक्ष **इत्येव**कारः. **केवलो रस** इति, नत्वधरादिवत् कामादिधर्मसहितः. अतएव मात्रादिभिरपि तत्र चुम्बनं क्रियत इति भावः. धर्मसहितापाने हेतुमाहुः **रस** इति, नृत्ये इति शेषः. तथा च "केवलो नाट्ये प्रसिद्ध" इत्युक्तत्वान्नृत्ये लोभादिग्रहणासम्भवाच्च केवलस्यैवाभिव्यक्त्यर्थं गण्डविद्योतनमुक्तमित्यर्थः. गण्डशोभां पश्यन्नृत्यतीत्यर्थः.

**योजना**

**पादन्यासैरि**त्यस्य विवृतौ **एकेनावयवेने**त्यादि, चारीकरणरूपपादन्यासादिसमये सङ्गीतशास्त्रोक्तप्रकारेण यादृशी भुजविधुतिरपेक्षिता तादृश्येव जायते, तस्मिन्नेव चारीकरण-भुजकम्पनादि-व्यापारे यादृशो नेत्रव्यापार उचितो यादृशो भ्रुव्यापारस्तादृशः कर्तुं शक्यते, भगवदीयपरिकरस्य परमालौकिकत्वात्. तथा **चैकेन** नृत्यव्यापारितहस्ताद्य**वयवेन** सह **शिष्टावयवा** भ्रूचरणादिरूपा**स्तथा संविधानयुक्ता** यथोचितविधानकरणशीला इति फक्किकार्थः. ननु पादन्यास-भुजविधुत्यादि-समये यथोचिता भ्रूप्रभृतिव्यापाराः कथं जायन्त इत्याकांक्षायामाहुः **तत्तद्रसे हृदयाविष्टे** इत्यादि. अयमाशयः—नृत्ये हि संयोगशृङ्गारस्याभिनयः क्रियते, स च संयोगस्फूर्तिं विना न सम्भवत्यतः स्मर्यमाणो यादृशसंयोगरसस्तस्मिन् क्षणे हृदये आविष्टो भवति तादृगेव व्यापारो भवतीत्येतासां हृदये भगवत्संयोग आविष्टोऽस्ति, स च सर्वगुणयुक्त इति तस्मिन् आविष्टे सर्वएवावयवा यथोचितविधानयुक्ता भवन्तीति भावः. **रस एकीभवती**ति, नृत्ये सर्वेषामवयवानां भ्रमाधिक्यात्सर्वत्रावयवेषु सच्चिदानन्दरूपेषु स्थितः आनन्द एकीभवतीत्यर्थः. **विद्युतामिवे**ति, भगवद्गण्डेषु व्रजसुन्दरीकुण्डलसम्बन्धे श्यामगौरप्रभामेलनाद् घनेषु विद्युच्छविरिव शोभा भवतीति भावः. **गण्डलौलैरि**त्यस्य विवरणे **सर्वा कान्तिस्तत्रैवे**ति. गण्डेषु सम्बन्धं प्राप्य कुण्डलानां सौन्दर्यगर्वो गच्छति. अतएव गण्डं प्राप्य कुण्डलानां लोलत्वं भवति. युक्तं चैतद्, यो यस्माद्गुणन्यूनः स तस्याग्रे लोलतामापद्यत इति. **गण्डे हि केवलो रस** इति, सर्वस्नेहवद्भोग्यत्वात्सर्वसाधारण इत्यर्थः. न तत्र शृङ्गाररसवत्येकभोग्यताऽधरवत्. अतएव बाल्यभाववतीभिरपि गण्डचुम्बनं क्रियते, अतः साधारणत्वम्. तत्र गण्डे स्थित्वा कुण्डलैरधरे पेयो रसः प्रकाश्यत इत्याहुः **पेयो रस** इत्यारभ्य **अभिव्यक्त्यर्थमि**त्यन्तेन. **रसेन सर्वावयवस्थेने**त्यादि, **रसेन**

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्.

च **अग्रन्थयो** जाताः. रसेन सर्वावयवस्थेन एकीभूतेन देहः सूक्ष्मतामापन्नो, अतः केशपाशे रशनायां च ग्रन्थिः शिथिलः. नन्वेवं कथं श्रमः? तत्राह **कृष्णवध्व** इति, सदानन्दस्य हि कुलस्य ता उपभोक्त्र्यः अतः क्रियायां श्रमो भवत्येव. एतादृश्योऽप्यन्तःसन्तोषेण **गायन्त्यो** जाताः. एवं कायादिश्रमैरपि **ता विरेजुः** अतिशोभायुक्ता जाताः. ननु लोकानां दर्शनसापेक्षा शोभा, तास्तदा कथं सर्वैर्दृष्टा इति? तत्राह **तडित इव ता** इति. नहि **तडिद्** बहुकालं दर्शनयोग्या भवति, **मेघचक्रे** शोभामेव परं सम्पादयति. तथा कृष्णसमूहे भगवता आच्छादिताः परितः कदाचिदेवोद्गताः केनचिदंशेन दृष्टा भवन्ति. अतस्तासां शोभा न दोषावहा जाताः किन्तु विशिष्टैव जाता ॥८॥

गाढनृत्यमुक्त्वा मध्यनृत्यमाह **उच्चैर्जगुरि**ति.

**उच्चैर्जगुर्नृत्यमाना रक्तकण्ठ्यो रतिप्रियाः ।**
**कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम् ॥९॥**

**नृत्यमाना** नृत्यं कुर्वन्त्यएव **उच्चै**र्गानयुक्ता जाताः. अथवा आदावुच्चैर्जगुः ततो **नृत्यमाना** नृत्यन्त्यो जाताः. उभयत्र हेतुमाह **रक्तकण्ठ्यो**

### लेखः

कामलीलायां तु सर्वं वक्ष्यते एवेति भावः. **उपभोक्त्र्य** इति, न लौकिकवद्रसानुभवमात्रं किन्तु मूर्तिमत आनन्दस्य क्रियारूपम् उपभोगं कुर्वन्त्य इत्यर्थः. **कायादिश्रमैरपी**ति, **देवकीसुत**पदेन तासु स्वसामर्थ्यस्थापनमुक्तं तेन **ता विरेजुः**, पादन्यासादिभिरपि विरेजुरि**त्यपि**शब्दः. **सर्वैर्दृष्टा** इति अन्योन्यं ताभिः भावुकैश्चेत्यर्थः ॥८॥

**उच्चैरि**त्यस्याभासे. प्रथमव्याख्याने नृत्यस्य गौणत्वेऽपि द्वितीयव्याख्यानानुसारेणाभासमाहुः **गाढे**ति. पूर्वश्लोके 'गायन्त्य' इत्यनेन गानस्य गौणत्वमुक्तम्, अत्रोभयोः समत्वमुच्यते इत्यर्थः. व्याख्याने, **रक्त** इति, रञ्जकस्वरस्यैव राग-

### योजना

आनन्देनेत्यर्थः. एतासां देहस्य सच्चिदानन्दात्मकत्वात् सर्वदेहे आनन्दोऽस्ति. स स आनन्दः एकत्रागतस्तदा तदितरत्र कार्श्यं भवति. तदा पूर्वं स्थौल्यानुसारेण कृता ग्रन्थिः पश्चात् शिथिला भवतीति भावः. **उपभोक्त्र्य** इति. उपभोक्तृत्वं पुंधर्मः, स च रसाधिक्यादेतास्वागतः, अत उपभोगे श्रमो भवतीति युक्तम्. एतच्च **कृष्णवध्व** इति मूलस्थस्य पदस्यार्थः उक्तः ॥८॥



**रतिप्रिया** इति– **रक्तः** रञ्जकस्वरेण युक्तः **कण्ठो** यासामस्तीति **रतिरेव प्रिया** यासामिति. गानेन व्यामोहनं नृत्येन च तासां प्रसिद्धम्. ननु पूर्वनृत्येन जातश्रमाः कथमेवं कृतवत्य इत्यत आह **कृष्णाभिमर्शमुदिता** इति. भगवतः **अभितो मर्शः** प्रोञ्छनादिविशेषरूपः, तेन **मुदिताः** अन्तःपूर्णानन्दाः. इतरविस्मारणार्थं नादाधिक्यमाह **यद्गीतेनेदमावृतमि**ति, **यासां गीतेनेदं** जगद् व्याप्तम्. अथवा. यदर्थमेतन्नृत्यादिकं तत् सफलं जातमित्याह **यद्गीतेने**ति, लोकैः क्रियमाणेन **गीतेन** एतत्प्रकाशकेन एतज्जगद् रसेन व्याप्तमित्यर्थः. लोके रसप्राकट्यार्थमेवैतत् कृतमिति ॥९॥

उत्पन्नस्य नादस्यामृतमयत्वाय भगवतापि नादः कृतः. स च मधुर एव कर्तव्यः. तेन च जगत् पूरणीयम्. ततोऽघटमानमेतदिति तदर्थमाह **काचिदि**ति.

### लेखः

पदार्थत्वादेवमुक्तं, "योऽसौ ध्वनिविशेषस्तु स्वरवर्णविभूषितः रञ्जको जनचित्तानां स रागः कथ्यते बुधैरि"तिवाक्यात्. तथाच रञ्जनयुक्त इत्यर्थः; कर्तरि क्तः. **रतिरेवे**ति, रतिप्रियत्वात् तत्कर्तुर्भगवतो व्यामोहनार्थं नृत्यमित्यर्थः. **तासामि**ति स्त्रीणामित्यर्थः, कर्तरि षष्ठी. **इतरविस्मारणार्थमि**ति नायिकान्तरकृतनादविस्मारणार्थं भगवत इति शेषः. स्वयुगलस्थो भगवान् युगलान्तरकृतं नादं विस्मरत्विति भावेनेत्यर्थः. अस्मिन् पक्षे नादाधिक्यं वाच्योऽर्थः, अग्रिमपक्षे उपनिबद्धश्रवणानुपपत्तिलभ्यमिति भेदः. **लोकैरि**ति, अत्यनुगृहीतैरेतल्लीलान्तःपातिभिर्गोविन्ददासप्रभृतिभिरित्यर्थः. **रसप्राकट्यार्थमि**ति, अत्रैव लोके जीवानामाधिदैविकरूपप्रकटनेन रसानुभवार्थमित्यर्थः. एतस्य भगवच्चरित्रफलत्वादनुवदिष्यमाण-भगवद्गीतसहितं गीत**मेतत्**पदेनोच्यते. एवं च प्रथमपक्षेऽपि **यासां गीतेने**त्यत्र भगवद्गीतसहितेनेति शेषो ज्ञेयः ॥९॥

**अमृतमयत्वाये**ति, स्वामिनीनां भगवद्विषयकभावोत्पादनेन रसानुभावकत्वायेत्यर्थः. तथा च स्वामिनीनामेव रसानुभावनार्थं कृतत्वात् तेन जगतः पूरणं न घटेतेत्यर्थः. अन्यदप्याहुः **स चे**ति, भगवता कर्तव्यो नादो मूले सहभावोक्त्या मधुरएव. तथा सति गीतकर्तृणामश्रवणे तदुपनिबन्धाभावादपि तेन जगत्पूरणं न घटेत. तथा चैतदर्थं "कृष्णो भुङ्क्ते" इति विरुध्येतेति भावः. **तदर्थमाहे**ति. भगवन्नादेन जगत्पूरणार्थं मुकुन्दसाहित्यकथनेन मोक्षो-

### टिप्पणी

**काचित्समं मुकुन्देने**त्यस्याभासः, **उत्पन्नस्य नादस्ये**त्यादि, अत्रायं भावः— अयं नादो न लौकिकः पूर्वसिद्धो वा किन्त्वलौकिकोऽपूर्वः. स च भगवतोऽन्यभावनिवृत्तिपूर्वकं स्वमात्रविषयकभावोत्पत्त्यर्थं प्रत्येकं कृतः. अयं च स्वामिनीनामप्युक्तभावानुरूप-भगवद्विषयकभावविशेषोत्पत्तौ रसानुभावको भवति. मूलकारणत्वात्स्वामिनीगानस्य तथात्वम्. इदमे**वामृतमय**त्वम्. सा च भगवन्नादेनेति तथा कृतः. अपरश्च. स्वामिन्याः स्वरजात्युन्नयने

### प्रकाशः

**काचित्समम्**इत्यस्याभासे **उत्पन्नस्य नादस्य अमृतत्वाये**ति. अत्रेदं प्रतिभाति. आहतानाहतभेदेन नादो द्विविधः. तत्रानाहतः प्राणघोषात्मा, स न रञ्जकः. आहतस्तु "आत्मा विवक्षमाणोऽयं मनः प्रेरयते मनः, देहस्थं वह्निमाहन्ति स प्रेरयति मारुतम्, ब्रह्मग्रन्थि स्थितः सोऽथ क्रमादूर्ध्वपथे चरन्, नाभिहृत्कण्ठमूर्धास्येष्वाविर्भावयति ध्वनिम्, नादोऽतिसूक्ष्मः सूक्ष्मश्च पुष्टोऽपुष्टश्च कृत्रिमः, इति पञ्चाभिधा धत्ते पञ्चस्थानस्थितः क्रमात्, व्यवहारे त्वसौ त्रेधा हृदि मन्द्रोऽभिधीयते, कण्ठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरः, तस्य द्वाविंशतिर्भेदाः श्रवणाच्छ्रुतयो मताः" इत्यादिरूपेणोत्पन्नो रञ्जकः. स आसन्यांशो लोकेऽपि तुल्य इति तस्य नामृतप्राचुर्यम्. स यदा आसन्यात्मा मूलरूपोऽपहतपाप्मा पूर्णो भवति तदा तथेति तत्प्रचुरत्वायेत्यर्थः. ननु स्वामिनीगानस्य भगवन्नादेनामृतमयत्वं किमित्याकाङ्क्षायां टिप्पण्यां प्रभवस्तदाशयं स्फुटीकुर्वन्ति **अत्रायं भाव** इत्यादि. 'कथमेतदवगम्यत?' इत्याकांक्षायामलौकिकत्वमपूर्वत्वं च कार्यद्वारा परिचाययन्ति **स चे**त्यादि **तथात्वम्**इत्यन्तम्. **मूलकारणत्वाद्**इति, मूले भगवद्गाने प्रयोजकत्वादित्यर्थः. **इदम्**इति कार्यद्वयजनकत्वम्. **सा चे**ति भगवद्विषयकभावविशेषोत्पत्तिश्चेत्यर्थः. **तथा कृत** इति मूलासन्यरूपः प्रकटीकृत इत्यर्थः. तथा च कार्यात्तस्य तथात्वमवगन्तव्यम्. यदि सामान्यः स्याद् भगवता न पोष्येतेति तर्काच्च. नन्वेवं भगवन्नादस्यैवैतत्कार्ये प्राधान्यमायातीति नैवं स्वामिनीगानस्य तथात्वसिद्धिरित्याकांक्षायां तस्य तथात्वं विशदीकर्तुमाहुः **अपरश्चे**त्यादि **रूपत्वाद्**इत्यन्तम्. तथा चैवं स्वामिनीनादप्राधान्यात्तस्यैव तत्कार्यमित्यर्थः. तर्हि प्रभुगानस्य किं मुख्यं कार्यमित्याकांक्षायां तदाहुः **एवं सती**त्यादि.



### टिप्पणी

प्राधान्योक्त्या प्रभोस्तत्सहभावोक्त्या ततः सकाशादस्य माधुर्यं लक्ष्यते. अन्यथा प्रभोस्तारनादेनास्याभिभवे रसाभास एतद्वैयर्थ्यं च स्यात्. साम्ये तूभयोः स्वातन्त्र्येण करणात्परस्परानुगुणत्वेन च मिथो रसानुपयोगित्वप्रसंगः. स्वयं नादस्वरूपमज्ञात्वा भगवन्नादं श्रुत्वा [1]तत्स्वरूपनादकरणेऽपि तथा. अतो भगवद्विचारितानुपूर्वीं स्वयं ज्ञात्वा तथैवोन्नीतवतीति ज्ञेयम्. पूर्णरसोदयो भगवति जात इत्यपि ज्ञापनाय तदधीनत्वमपि ज्ञापयितुमेवं कथनम्, नायिकाप्राधान्यस्य एतद्रसस्वभावरूपत्वात्. एवं सति तारनादसाध्यजगत्पूरणं मधुरेण न भवति, अन्यधर्मनिवृत्तौ ह्येतेन पूरणं भवति. तदर्थमेतत्स्वरूपे रसाभिज्ञा निरूपिकाश्चैताएवेति यथा "तं त्वौपनिषदं पुरुषमि"ति श्रुतेस्तदुक्तमेव ब्रह्मस्वरूपं तथैतन्निरूपितधर्मवदेव पुरुषोत्तमस्वरूपं नान्य-धर्मविशिष्टमित्येतद्गानस्योपनिषद्वाक्यरूपत्वाद् एतच्छ्रवणेन भगवति प्राकृतधर्मराहित्यज्ञानं स्वस्मिंश्च तत्सम्बन्धित्वेनान्यधर्मराहित्यं तज्ज्ञानं च भवति. तदनन्तरं भगवदानन्दानुभवो भवति. एतत्प्रभुगानकार्यम्. एवं सत्येतेन जगत्पूरणं भवत्येवेति सर्वमवदातम्.

### प्रकाशः

**तदर्थम्**इति सुबोधिनीप्रतीकं, जगत्पूरणार्थमित्यर्थः. **षड्जादय** इत्यादि,

### लेखः

पयोग्युपनिषद्रूपत्वं स्वामिनीनां निरूपयन् स्वरजात्युन्नयनमाहेति टिप्पण्यनुसा-रेणार्थः. टिप्पण्यां **स्वस्मिंश्चे**ति, श्रोतृषु विषयान्तरसञ्चाराभावो भवति तत-स्तज्ज्ञानं भगवन्नादश्रवणं भवतीत्यर्थः. **एतद्**इति भगवदानन्दानुभव इत्यर्थः.

व्याख्याने एतत्समाधानम्— गीतकर्तृणामुपनिषच्छ्रवणवदेतन्नादश्रवणेन विषयान्तरसञ्चाराभावो भवति, ततो भगवन्नादस्य मधुरस्यापि श्रवणं भवति, ततो भगवदानन्दानुभवो भवति, तेन तत्तदुपबन्धने तत्तच्छ्रवणेना-स्मदादीनामपि तत्तत्फलं भवति, एवं जगत्पूरणमिति. तथा चैतत्कृपया

### योजना

**उत्पन्नस्य नादस्यामृतमयत्वाये**ति, एतदर्थष्टिप्पण्यां स्फुटः.

---

१. तत्सरूप. मू. पा.

**काचित् समं मुकुन्देन स्वरजातीरमिश्रिताः ।**
**उन्निन्ये पूजिता तेन प्रीयता साधुसाध्विति ॥**
**तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ॥१०॥**

**मुकुन्देन समम् अमिश्रिताः स्वरजातीः काचिदुन्निन्ये. काचित्** सम्यग् भगवद्भावं प्राप्ता. भगवतो नादकरणे हेतुः **मुकुन्देने**ति, मोक्षदानार्थमेव उपनिषदि स्वनादं पूरितवान्. उभयोरेकता नादे तुल्यता. मोक्षे कार्यद्वयं– पूर्वसङ्घातान्निवर्तनं ब्रह्मप्रापणं च. तदर्थमितरनिवारणार्थमुपनिषदामुपयोगः.

---

### लेखः

भविष्यतीति प्रथमस्यापि समाधानं सम्पन्नमिति ज्ञेयम्. **भगवद्भावं प्राप्ते**ति, इमां स्वरजातिमुन्नेष्ये इति भगवदाशयं ज्ञातवतीत्यर्थः. नादः सर्वसाधारणः, भगवद्विचारितानुपूर्विकोन्नयनमेतस्या एवेति भावः. **मोक्षे**ति, आधिदैविकरूप-प्रकटनेनान्येषां भगवद्भजनार्थं स्वामिनीनां च भगवद्विषयकभावोत्पादनेन रसानुभावनार्थमित्यर्थः. **उपनिषदी**ति स्वामिनीनादे इत्यर्थः. **सममि**त्यस्य तुल्यार्थकत्वमपीत्याशयेनाहुः **एकते**ति, मोक्षरूपैककार्यकर्तृत्वमित्यर्थः. इयमेव **तुल्यता.** तत्रांशद्वयमाहुः **मोक्षे** इति. प्रथमांशः स्वामिनीनादेन द्वितीयांशश्च

### योजना

**काचित्सममि**त्यत्र **मोक्षदानार्थमि**ति, अयमर्थः– "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं विजानीयादि"तिश्रुतेर्मोक्षे ब्रह्ममात्रैकस्फूर्तिस्तथा स्वमात्रविषयकासक्ति-सम्पादनेन केवलं शृङ्गाररसात्मक-कृष्णाद्वैत-स्फूर्तिर्व्रजसुन्दरीणां यथा भवेत्त-थोपायो भगवतश्चिकीर्षितः. स च तादृशनादो भवति. नादेन हि परमाह्ला-दोत्पत्त्या तदितरविस्मृतिर्लोके प्रसिद्धा. एवं सति शृङ्गाररसात्मक-कृष्णाद्वैत-स्फूर्तिर्**मोक्ष**पदवाच्या. ततश्च **मोक्षदानार्थमि**त्यस्य शृङ्गाररसात्मक-कृष्णाद्वैत-स्फूर्त्यर्थमित्यर्थो भवति. **उपनिषदि स्वनादं पूरितवानि**ति, व्रजसीमन्तिनी-कृतनादोऽत्र**ोपनिषत्**पदवाच्यः, स्वामिनीनादस्य भगवत्स्वरूपप्रकाशकत्वात्. स्वामिनीनादेन रसात्मकप्रभुस्वरूपमेव गीयते. यादृशं प्रभुस्वरूपमेताभिर्गीयते तादृगेव स्वरूपमस्ति, तत्स्वरूपस्य तदेकमात्रज्ञेयत्वात्. अत उपनिषद्रूपे स्वामिनीनादे स्वनादं पूरितवानित्यर्थः सिद्धः. **मोक्षे कार्यद्वयमि**त्यारभ्य **उपयोग** इत्यन्तं, व्रजसुन्दरीकृत-भगवद्गुण-गानेन हि तद्गानश्रोतृणां पूर्वसंघाता-



**स्वरा** षड्जादयः. तेषां **जाति**भेदाः– यथा मयूरः षड्जं वदति तथा अन्येऽपि पक्षिणः मनुष्या अन्येऽपि जीवाः षड्जं वदन्ति, तथापि तेषामवान्तरजातिरस्ति. ते चेद्यथाक्रमेण यथारसाभिव्यक्तिः यदभिप्रायेण सृष्टावुत्पादिताः तथैव[1] योजिताश्चेत्, तदा स्वरजातयः **अमिश्रिताः** भवन्ति. तद्भगवता कर्तुं शक्यं नान्येन. तासां चेदुन्नयनं तदा युक्तएव सन्तोषः. तदाह **पूजिता तेन** भगवतेति. स्वस्य ब्रह्मत्वात् स्वविचारितानुपूर्वीति स्वस्य तथा गानं नाश्चर्यहेतुः. अन्ये तु तत्स्वरूपमेव न जानन्ति कुतः पुनः करिष्यन्तीति **तेनैव पूजिता.** किञ्च कार्यमपि उन्नयनेन जातमिति **साधुसाध्वि**ति. **प्रीयता** प्रीतिं कुर्वता भगवता. स्वरूपतः फलतश्च साधुत्वाय द्विरुक्तिः. प्रीतिश्च तुल्यत्वात् सर्वथा कार्यानुगुणत्वात्. अन्या पुनः उन्नीतमेव यावद् भगवता पुनर्गृह्यते तावत्तथैवोन्नयनं कृतवतीत्याह **तदेवे**ति, **तदेवो**न्नीतं **ध्रुवं** निश्चलं यथा भवति तथा **उन्निन्ये** तं नादं **ध्रुव**नादे योजितवती. ध्रुवनादः कारणनादः स्थायी स्वरः– "यत्रोपविशते रागः स्वरः स्थायी स कथ्यते". भगवन्नादएव वा,

---

### प्रकाशः

"स्यातां निषादगान्धारौ द्विश्रुती, धैवतर्षभौ त्रिश्रुती वेदश्रुतयः षड्जमध्यमपञ्चमाः, मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः; गजश्च सप्त षड्जादीन् क्रमादुच्चारयन्त्यमी"त्यादिषु बोधिता इत्यर्थः. **तदेवे**त्यत्र. "गानक्रिया वर्णसंज्ञया सङ्गीते व्यवह्रियते, गानक्रियोच्यते 'वर्णः' स चतुर्धा निरूपितः, स्थाय्यारोह्यवरोही च संचारीत्यथ लक्षणम्, स्थित्वा स्थित्वा प्रयोगः स्यादेकैकस्य स्वरस्य यः, स्थायी वर्णः स विज्ञेय" इति तस्य लक्षणान्तरात्प्रकृते को वा स्थायी विवक्षित इति सन्देहानपायात्पक्षान्तरमाहुः **भगवन्नादएव वे**त्यादि. "चतुर्विधाः स्वरा वादी संवाद्यथ विवाद्यपि, अनुवादीति वादी

### लेखः

भगवन्नादेन सम्पाद्यत इत्यर्थः. **पुनः करिष्यन्ती**ति पूजामिति शेषः. **कार्यमपी**ति, भगवतः स्वामिनीविषयक-भावोत्पादनमित्यर्थः. **अन्या पुनरि**ति

### योजना

न्निवर्तनं ब्रह्मप्राप्तिश्च भवति. तदाहुः **तदर्थमितरनिवारणार्थमुपनिषदामुपयोग** इति, **उपनिषदां** रसात्मकश्रीकृष्णस्वरूप-प्रतिपादकानां व्रजसुन्दरीकृतनादाना-

---

१. तास्तथेति पाठः.

भगवता तथैव गीतमिति. ध्रुवतालादिषु योजितवतीति केचित्, तन्न विचारक्षमम्. एवं ध्रुवयोजनायां भगवाँस्तस्यै **बह्वेव सन्मानमदात्**, **च**कारादभीष्टमपि. एवं तासामन्तःसामर्थ्यं जातमिति बहिःसामर्थ्यं किं वक्तव्यमिति भावः. **बह्विति** सर्वगोप्यधिकम्. ऐश्वर्यवीर्यरूपे चैते निरूपिते.

---

**प्रकाशः**

तु प्रयोगे बहुलः स्वरः, श्रुतयो द्वादशाष्टौ[1] च ययोरन्तरगोचराः, मिथः संवादिनौ तौ स्तो निगावन्यविवादिनौ, रिधयोरेव वा स्यातां तौ तयोर्वा रिधावपि, शेषाणामनुवादित्वं वादी राजात्र गीयते, संवादी त्वनुसारित्वादस्यामात्योऽभिधीयत" इति सङ्गीते निरूपणाद्भगवन्नादो वादी. सएव राजत्वाद् ध्रुव इति तस्मिन्नेव संवादिनादं स्वामिनी योजितवतीत्यर्थः. तत्र हेतुमाहुः **भगवता तथैव गीतमिति**, यादृशे नादे स्वामिनीनादयोजनं भवति तथा गीतमित्यर्थः. **न विचारक्षममिति**, तावतः कार्यस्य सुकरतया तादृक्संमाननप्रयोजकत्वासंभवेन **तस्यै मानं च बह्वदादिति** ग्रन्थासङ्गतेस्तथेत्यर्थः ॥१०॥

**लेखः**

द्वितीयपार्श्वस्थितेत्यर्थः. **तन्न विचारक्षममिति**, तथा सति 'ध्रुवे उन्निन्ये' इति सप्तम्युक्ता स्यादिति भावः. **ऐश्वर्यवीर्यरूपे चैते** इति, तत्तद्धर्मस्थापनेऽयोगोलकन्यायेन तत्तद्रूपत्वमेव सम्पन्नमिति भावः. **चकारादु**पनिषद्रूपत्वम् ॥१०॥

**योजना**

**मुपयोग** इत्यर्थः. **ऐश्वर्यवीर्यरूपे** इति, **काचित्समं मुकुन्देने**त्यत्रोक्ताया गोपिकाया भगवदेकोन्नेयस्वरजात्युन्नयन-सामर्थ्यवत्त्वादैश्वर्यमेतस्या ज्ञेयम्, ईश्वरतुल्यकार्यकरणात्. **तदेव ध्रुवमुन्निन्ये** इत्यत्रोक्तायां वीर्यवत्त्वम्, उन्नीतमेव यावद्भगवता पुनर्गृह्यते तावत्तयोन्नीयमानत्वात्. न हि तादृशवीर्यं विना भगवदुन्नयनात्पूर्वं केनाप्युन्नयः कर्तुं शक्यतेऽतो वीर्यवत्त्वमङ्गीकार्यम्. **ऐश्वर्यवीर्यरूपे** इत्यत्र ऐश्वर्यवीर्ये रूपयत इति ऐश्वर्यवीर्यरूपे, **एते** गोपिके हि स्वनिष्ठसामर्थ्यप्रकटीकरणेन स्वसामर्थ्यकारणीभूतं भगवदैश्वर्यं वीर्यं च यथाक्रमं सूचयतः अत ऐश्वर्यवीर्यरूपता एतयोर्ज्ञेया ॥१०॥

---

१. वादिषु द्वादश संवादिषु अष्ट इति मुं. वि. पाठे टिप्पणी.



अन्याश्चतस्रः क्रमेण बोद्धव्याः ॥१०॥

कीर्तिर्हि भगवन्तमेवावलम्बते. अतः कायिकं व्यापारं द्वयोराह **काचिदिति**.

**काचिद्रासपरिश्रान्ता पार्श्वस्थस्य गदाभृतः ।**
**जग्राह बाहुना स्कन्धं श्लथद्वलयमल्लिका ॥११॥**

**रासेन परितः श्रान्ता** स्वस्यैकस्मिन् **पार्श्वे** विद्यमानस्य **स्कन्धं स्वबाहुना जग्राह. गदाभृत** इति भगवतः स्थिरत्वाय. अधिकप्रयत्ने अन्यथा क्रियमाणे रासो भज्येत. परिश्रमो रसाधिक्याद्, अन्यथा रसार्थं प्रवृत्तिर्न स्यात्. मण्डलपरित्यागे मण्डलसिद्ध्यर्थं भगवतापि हस्तग्रहणं सम्भवति. अत

---

**टिप्पणी**

**काचिद्रासपरिश्रान्ते**त्यत्र **भगवतः स्थिरत्वाये**ति, कदाचित्प्रभुर्गदामवष्टभ्य तिष्ठति चलति वा. यथेतस्ततश्चरणस्खलनं न भवति तथा

**प्रकाशः**

**काचिद्रासपरिश्रान्ते**त्यत्र, ननु श्रान्तत्वे स्थिरे भगवति स्वभारनिक्षेपादिकमेव श्रमाभावाय वक्तव्यं, न तु स्कन्धग्रहणमात्रमित्यत आहुः **अधिके**त्यादि. नन्वयं रसाधिक्यजन्यएव श्रम इत्यत्र किं गमकमत आहुः **अन्यथा रसार्थमि**त्यादि, परिश्रमस्य देहक्लेशजनितत्वे उपवेशनादिरेव स्यात् न तु स्कन्धग्रहणमित्यर्थः. ननु स्कन्धग्रहणे हस्तपरित्यागेन मण्डलभङ्गे रासभङ्ग इत्यत आहुः **मण्डले**त्यादि. **हस्तग्रहणमि**ति स्वामिन्यन्तरस्येत्यर्थः. रसार्थप्रवृत्तौ

**लेखः**

**कीर्तिर्ही**ति, पूर्वद्विकस्य वाचिकव्यापार उक्तः, अस्य द्विकस्य कायिकव्यापार उच्यते. तत्र श्रिया भगवति कायिको व्यापारः प्रसिद्ध इति तद्रूपायाएव स्वामिन्यास्तादृशव्यापारस्य वक्तव्यत्वेऽपि **हि** यतः **कीर्तिर**पि **भगवन्तमेवावलम्बतेऽतः कायिकं व्यापारं** कीर्तिश्रीरूपयोर्द्वयोरपि स्वामिन्योर**राहे**ति श्लोकद्वयाभासकथनम्. **स्थिरत्वायेति**, **स्कन्धं स्वबाहुना जग्राहेति** पूर्वेणान्वयः. गदाभृत्त्वात् स्थित्यर्थमवष्टम्भाय गदां स्मरेदिति शङ्कया स्वयमेवावष्टम्भं सम्पादयतीत्यर्थष्टिप्पण्युक्तः. गदाग्रहणे बाधकमाहुः **अधिके**ति, स्थित्यर्थ**मधिकप्रयत्ने** गदया क्रियमाणे इत्यर्थः. **अन्यथे**ति, परिश्रमस्थितावित्यर्थः. **मण्डले**ति, नृत्यावेशेन कदाचित् स्वामिनीहस्तग्रन्थिवियोजने

एकस्मिन् पार्श्वे भगवानेव. पार्श्वभागे विद्यमानस्य भगवतः कण्ठग्रहणं वृक्षाधिरूढालिङ्गनं भवति. भगवता पूर्वं कण्ठे सा गृहीता, तथापि भगवान् गृहीत इति मित्रवत् स्थितिः स्यादिति तन्निवृत्त्यर्थमाह **श्लथद्वलयमल्लिकेति**, **श्लथन्ती वलया**कारा **मल्लिका** यस्याः. कबरे वलयाकारेण मल्लिकामाला बद्धा, सा च शिथिला जातेति वैकल्यं प्रदर्शितम्. आप्तता च प्रदर्शिता ॥११॥

**टिप्पणी**

तद्गृहीतस्कन्धएव यथापूर्वं मण्डलं नृत्यं चानुवर्तयतीति ज्ञाप्यत इत्यर्थः. **वृक्षाधिरूढालिङ्गनमि**ति, "रमणचरणमेकेनोरुणाक्रम्य खिन्नश्वसितमपरपादेनाश्रयन्ती तदूरुं निजमथ भुजमेकं पृष्ठतोऽस्यार्पयन्ती"त्यादिना रसशास्त्रे निरूपितम् ॥११॥

**प्रकाशः**

गमकमाहुः **पार्श्वभागे**त्यादि. एतस्यार्थस्य मूलाभिप्रेतत्वं प्रकटयितुं तुरीयपादं व्याकुर्वन्त आहुः **भगवते**त्यादि. **आप्तता च प्रदर्शितेति**, शुकेन स्वस्य यथादृष्टार्थवादित्वं चैतेन दर्शितमित्यर्थः ॥११॥

**लेखः**

**मण्डलसिद्ध्यर्थं** स्वामिन्यन्तरहस्तस्थाने भगवतापि स्वहस्तो ध्रियते, तदा पार्श्वे भगवानेव न तु भगवद्व्यवहिता सा[1] स्वामिनीत्यर्थः. **कण्ठे सा गृहीते**ति, "द्वयोर्द्वयोः प्रविष्टेन गृहीतानां कण्ठे" इति पूर्वमुक्तत्वादिति भावः. **तयापी**ति, एकेन हस्तेन ग्रन्थिः स्थापिता द्वितीयेन बाहुना स्कन्धं गृहीतवती, तथा च सांमुख्यं जातमिति ज्ञेयम्. अयं प्रकारो द्वितीयस्वामिनीस्थितौ न भवतीति **पार्श्वे भगवानेवे**त्युक्तम्. **वलयाकारेणे**ति, शिरःप्रान्ते शिखायां कङ्कणाकार-परिवर्तनेनेत्यर्थः. **सा चे**ति, कबररशनाग्रन्थिशैथिल्यं चकारार्थः. **आप्तता चे**ति, कबरे धृत्वा चुम्बनं रसातिमादे भवतीति तथाकरणे मल्लिकाशैथिल्यं जातमिति महारसदानेनाप्तता प्रदर्शितेत्यर्थः. अतएवाङ्गुलीभिः पुष्पाणामेव शैथिल्यं न मालाया इति भावः ॥११॥

**योजना**

कचिद्वासेत्यस्य विवृतौ **भगवतः स्थिरत्वायेति**, अस्यार्थष्टिप्पण्यां

१. सा इति अधिकं जो.पाठमनुसृत्य.



**तत्रैकांसगतं बाहुं कृष्णस्योत्पलसौरभम् ।**
**चन्दनालिप्तमाघ्राय हृष्टरोमा चुचुम्ब ह ॥१२॥**

अन्या पुनः स्वस्य **एकांसगतं बाहुम्** उत्पलापेक्षया अधिकपरिमलयुक्तं **चन्दनेनालिप्तं बाहुमाघ्राय** अन्तःप्रविष्टामोदा पूर्णानन्दा सती **हृष्टरोमा बाहुमेव चुचुम्ब.** रूपस्पर्शौ पूर्वमेव स्थितौ, गन्धरसयोरप्यनुभवं कृतवतीति. **ह**ेत्याश्चर्ये. **तत्रे**ति तस्मिन्नेव समये, तत्रैव भगवति वा. उभयपार्श्वस्थयोर्गोपिकयोस्तथा सति विनियोग उक्तो भवति. **एकांसगतमि**ति वा. सैव तथा कृतवतीति केचित्. सदानन्दत्वात् सर्वत्रैव समरसता. उत्पलं हि रात्रिविकासि, तत् स्त्रीणां मनोज्ञम्. आघ्राणे चन्दनजसौरभमेव न हेतुः किन्तु ततोऽपि विलक्षणं साधारणजनावेद्यं तदपेक्षयापि सौरभयुक्तत्वेनात्यलौकिकभाववतीनामेव वेद्यम्. सहजसौरभमित्यपि ज्ञापनायेदं विशेषणम्. चन्दनालेपः

**टिप्पणी**

**हृष्टरोमा चुचुम्ब** हेत्यत्र **सदानन्दत्वादि**ति, चुम्बनेन हि रस आस्वाद्यते, अधरादिवद् बाहौ न रसोऽतः कथं तथेत्याशङ्कानिरासायेदमुक्तम्.

**लेखः**

**अन्या पुनरि**ति द्वितीयपार्श्वस्थितेत्यर्थः. अनयोर्विनियोगः कालभेदेन. अतः "पार्श्वे भगवानेवे"त्युक्तेन न विरोधः. **तस्मिन्नेव समये** इति पक्षे तु भगवदनुभावेनैव द्विकान्तरस्थभगवत इवान्योन्यमप्यदर्शनम्. **तथा सती**ति, अन्या एवं कृतवतीति पक्षे सतीत्यर्थः. **सैवे**ति वक्ष्यमाणपक्षे तूभयोर्विनियोगो नोक्तो भवेदिति भावः. **तत्रैका** इति प्रथमान्तं विकल्पेनोक्तम्. **सैवे**ति, पूर्वश्लोकोक्तैवेत्यर्थः. तथा सति कीर्तिश्रीरूपत्वेन तयोर्भेदः पूर्वोक्तो बाधितो भवेद्, अतः **केचिदि**त्यस्वरस उक्तः. आघ्राणस्य सर्वसमत्वेऽप्यस्यास्तत्कथने विशेषमाहुः **घ्राणेने**ति. **अस्यायं विशेष** इत्यर्थः ॥१२॥

**योजना**

स्फुटः. **श्लथद्वलयमल्लिके**त्यस्य विवृतौ **आप्तता च प्रदर्शिते**ति. क्रीडायां परस्परं स्वोत्कर्षएव ख्याप्यते, न तु परिश्रान्तत्वम्. इह त्वनया भगवत्स्कन्धो गृहीतस्तेन च श्रमज्ञापनात्क्रीडायां नोत्कर्षो ज्ञापितः किन्तु यः स्वकीय इष्टो भवति तदवलम्बनं क्रियत एवेति भगवति **आप्तता** स्वेष्टता **प्रदर्शिते**ति भावः ॥११॥

विवेकधैर्यनाशनार्थः. घ्राणेनान्तःप्रवेशनमस्या विशेषः. एषा श्रीरूपा ॥१२॥

कयाचिद्भगवद्गृहीतताम्बूलं ज्ञानवद्गृहीतमित्याह **कस्याश्चिदिति**.

---

## टिप्पणी

चन्दनालेपतात्पर्यमाहुः **विवेकधैर्ये**ति, अङ्गरागस्यानुभावात्मकत्वेन प्रचुरभावविशेषजननात्तेन तयोर्नाश इत्यर्थः. बाहौ तथा कृतिर्न लोकसिद्धाऽतः "सखीनां समक्षं कथमेवं करोमी"ति विवेकः, एकान्तसमयप्रतीक्षया स्थितिर्धैर्यकार्यम् ॥१२॥

## प्रकाशः

**कस्याश्चिदि**त्यत्र आभासे इयं स्वामिनी पूर्वाध्याये "काचिदञ्जलिने"ति श्लोकोक्तेति ज्ञापयितुमाहुः **गृहीतमि**ति, अन्यथा मूले **प्रादादि**ति पदेन विरोधापत्तेः. **इत्याहे**ति, **इतीदं** दानकथनमुखे**नाहे**त्यर्थः. अत्रैतद् बोध्यं—द्वितीयस्कन्धे निरोध[1]लक्षणे द्वासप्ततिर्नाडीरूपा देहशक्तयः स्वस्य द्वादशश्रियादयः शयनं जाग्रत्स्वप्नसुषुप्तभेदेन त्रिविधमिति [2]स्कन्धस्थाध्यायसंख्याबीजमुक्तम्. तच्च स्थूलतया, "अत्रैतदेकशतं नाडीनां तासां [3]शतं शतं एकैकस्यां द्वासप्तति प्रतिशाखानाडीसहस्राणी[4]"ति प्रश्नश्रुतेः, अत्रापि[5] वाक्यप्रकरणादिप्रतिपाद्यविचारेणानन्त्याद्; एवं "परास्य शक्तिर्विविधैवे"ति श्रुतौ स्वशक्तेर्विविधत्वेन श्रावणादत्रापि[6] [7]गुणधर्मादिभेदेन नानात्वात्[8].

## लेखः

**कस्याश्चिदि**त्यस्याभासे, पूर्वाध्याये "काचिदञ्जलिने"ति श्लोकोक्तताम्बूलस्य श्रीसमर्पितत्वमुक्तम्. इदं तु ताम्बूलं **कस्याश्चिदि**ति षष्ठ्या सम्बन्धसूचनादेतयैव समर्पितमित्याशयेनाहुः **भगवद्गृहीते**ति, यथा ज्ञानं गुरूपसत्त्यादियत्नेन गृह्यते, तथा **भगवद्गृहीतताम्बूलम**नया गण्डसन्धानयत्नेन **गृहीतं** ग्रहणानुकूलव्यापारविषयीकृतम्, **ज्ञानवद्**ग्रहणार्थं गण्डसन्धानं कृतमिति यावद्, **इति ज्ञाववद्**ग्रहणाद्धेतोः **आह** भगवत्कृतं ताम्बूलदानमिति शेषः.

## योजना

**हृष्टरोमा चुचुम्ब** हेत्यस्य विवरणे **विवेकधैर्यनाशनार्थ** इति, एतस्यार्थष्टिप्पण्यां स्फुटः ॥१२॥

---

१. निरोधोऽस्यानुशयनमित्यादि. २. दशमस्कन्ध. ३. "शतं चैका च हृदयस्य नाड्य" इति श्रुतेः. ४. अनन्तानि. ५. निरोधस्कन्धेपि. ६. भक्तानां निरोधेपि. ७. भगवतः. ८. भक्तेषु.



**कस्याश्चिन्नाट्यविक्षिप्त-कुण्डलत्विष-मण्डितम् ।**

**गण्डं गण्डे सन्दधत्या प्रादात्ताम्बूलचर्वितम् ॥१३॥**

**कस्यैचित् ताम्बूलचर्वितमदादि**ति. स्वगण्डं भगवद्गण्डे **सन्दधत्या** इति तस्या अपेक्षा लाघवं च सूचितम्. सम्मुखत्वाभावेऽपि लाघवेनैव **प्रादात्**. अनेन तस्यै स्वविद्या दत्तेति ज्ञापितम्. तेनेयमेवोपदेष्ट्री भगवदसन्निधाने सर्वासां भविष्यति. तस्याः विद्यायोग्यतां वक्तुं लौकिकक्रियाज्ञानशक्तिमत्त्वमाह

---

## टिप्पणी

**कस्याश्चिन्नाट्यविक्षिप्तमि**त्यत्र **अनेन तस्यै स्वविद्ये**ति, यथा सर्ववेदान्तवाक्यानां निष्पीडितोऽर्थो ब्रह्मविद्या तथोपनिषदादि-वागधिपतिना रसात्मकेन स्वान्तरेव भक्तविषयकस्नेह-कलाभिर्निष्पीड्य स्थापितं ताम्बूलचर्वितमिति तथेत्यर्थः. दानप्रयोजनमाहु**स्तेनेयमेवे**ति, विप्रयोगदशायामुपस्थितमरणनिवर्तकवाक्यकथनेन सखीनां जीवयित्री भविष्यतीत्यर्थः. ब्रह्मविद्या हि ब्रह्मप्रापिका, अत्रापीयं स्वामिनी प्रियं प्रापयिष्यतीति भावः ॥१३॥

## प्रकाशः

सर्वास्वन्तरङ्गास्तु धर्मरूपा एव, [1]भगवत्त्वनिर्वाहकत्वात्. तत्र प्रकृतलीलास्थास्ता एवेति संख्याबलान्निश्चीयते. तत्रैश्वर्यादिचतूरूपाणां[2] निगमनं [3]तत्तत्कार्यैरेव जायत इति तत्र विशेषो न स्पष्टीकृतः. प्रकृतस्वामिन्यास्तु ज्ञानरूपतागमकं[4] कार्यमत्राग्रे च न स्फुटमिति योग्यतैव च स्फुटेति योग्यताबलात्तथात्वं[5] स्फुटीकर्तव्यम्. यथा "अञ्जलिना सक्तून् प्रदाव्ये जुहुयादि"त्यत्र सक्तुस्थितियोग्यताबलादञ्जलेर्व्याकोशत्वम्. तत्र भगवद्धर्मा ऐश्वर्यादयो भगवति नित्याः

## लेखः

व्याख्याने, **कस्यैचिदि**ति, तस्याः सम्बन्धितया समर्पितं तस्यै अदादित्यर्थः. **अनेने**ति दाने प्रकर्षकथनेनेत्यर्थः. वाक्पतिना भक्तानां जीवनसम्पत्त्या द्वितीयदलानुभवार्थं स्नेहेन भक्तविषयकेण निष्पीड्य स्थापितोऽर्थो विद्यासादृश्याद्विद्येति टिप्पण्यनुसारेणार्थः. मायानिर्मितव्युदासाय **स्व**पदम्. तथा चैतेन तादृक्सामर्थ्यं दत्तं येन द्वितीयदलानुभावनं भवतीति भावः. **लौकिके**ति लोकसिद्धा, संयोगरसानुभाविका या क्रियाशक्तिर्ज्ञानशक्तिश्च

---

१. भगवद्रूपत्वज्ञान. २. अत्रैव पूर्वोक्तानां. ३. "काचित्सममि"त्यादि. ४. प्रमाणकम्. ५. ज्ञानत्वम्.

**नाट्यविक्षिप्त-कुण्डलत्विष-मण्डितमिति. नाट्येन विक्षिप्तस्य कुण्डलस्य त्विषा मण्डितं गण्डम्.** नाट्ये क्रियाशक्तिः प्रतिष्ठिता, कुण्डले ज्ञानशक्तिः.

**प्रकाशः**

इतरत्रागन्तुका इति "युक्तं भगैः स्वैरितरत्र चाध्रुवैरि"त्यत्र [1]स्थितम्. अतएव प्रकृते रसस्वरूपान्तःपातितया धर्मरूपतया चैतासां भगवदभेदेऽप्यवतारेण भेदात्तत्रागन्तुकमेव [2]तदिति कार्यद्वारापि परिचायितम्. तथा सति ज्ञानमपि [3]तथेति संप्रदानस्य[4] साधनतः स्वरूपतश्च योग्यतादानकारणीभूतः प्रसादश्च मूले सूचित इति ताभ्यां देयस्वरूपं स्फुटीकरिष्यन्तो व्याख्यानमुखेन [5]तौ प्रदर्शयन्ति **नाट्ये** इत्यादि. तत्र भगवत्कुण्डलयोः सांख्ययोगात्मकत्वादत्रापि तदभेदेनैतत्कुण्डलयोरपि तथात्वात्स्वामिन्याश्च वामदक्षिणपार्श्वस्थत्वयोरेकतर-निर्णायकस्यात्राभावात्पक्षद्वयेन वदिष्यन्तः प्रथमं सांख्यपक्षेणाहुः **कुण्डले ज्ञाने**त्यादि. अभ्यास[6] आवृत्तिरिति पूर्वोत्तरतंत्रयोः[7] स्थितम्. तथा च सांख्यपक्षे ज्ञानपूर्वकभगवद्विचारितरीतिक-कर्मात्यावृत्त्या[8] योग्यतेत्यर्थः. योगपक्षे

**लेखः**

तद्वत्त्वं भक्तेराहेत्यर्थः. तथा च प्रथमदलानुभवसामर्थ्यस्य सिद्धत्वाद् द्वितीयदलानुभव-सम्पादकविद्या-ग्रहणयोग्यतेति भावः. अनुकरणे तादृक्शोभां दृष्ट्वा प्रीतस्ताम्बूलं प्रादादिति. **कुण्डल**पदेन ज्ञानशक्तिः. पक्षान्तरमाहुः

**योजना**

**कस्याश्चिन्नाट्यविक्षिप्ते**त्यस्य विवृतौ **नाट्ये क्रियाशक्तिः प्रतिष्ठिते**ति, इह हि आध्यात्मिकरीत्या सिद्धोऽर्थ उच्यते. तदनुसारेण यः शास्त्रार्थः सेत्स्यति स शिक्षायां साधनं कुर्वता ग्राह्यः. नाट्यस्य कर्मेन्द्रियजन्यत्वेन **क्रियाशक्तिः प्रतिष्ठिता** प्राधान्येन स्थितेत्यर्थः. **कुण्डले ज्ञानशक्ति**रिति. "बिभर्ति सांख्यं योगं च देवो मकरकुण्डले" इति द्वादशस्कन्धवाक्याद्भगवत्कुण्डलस्य सांख्य-रूपत्वात्सांख्यस्य च ज्ञानपर्यवसन्नत्वात्कुण्डले ज्ञानशक्तिप्रतिष्ठोक्ता. यद्यपि कुण्डलयोः सांख्यरूपत्वं योगरूपत्वं चोक्तं, तथापि **गण्डं गण्डे सन्दधत्या** इत्यत्रोक्तस्यैकगण्डस्य **कुण्डलत्विषमण्डितमि**त्यनेन विशेषितत्वादेकमेव कुण्डलं

१. विशालस्थलत्वम्. २. ऐश्वर्यादि. ३. आगन्तुकम्. ४. प्रादात्ताम्बूलेपि.
५. क्रियाज्ञानरूपौ. ६. एतस्यैव पर्यायः आवृत्तिः.
७. पूर्वमीमांसायां उत्तरमीमांसायां चेत्यर्थः. ८. कर्मावृत्त्या इति मुं. वि. पाठः.



क्रियाशक्त्या **विक्षेपो**ऽत्यभ्यासः. योगात्मकत्वात्, साधनानि वा. तस्य कान्तिरनुभवः, तेनालङ्कृता भक्तिः भगवत्प्रेम्णा सम्बद्धा. यथा सा भगवति

**प्रकाशः**

आहुः **योगे**त्यादि, "योगः कर्मसु कौशलमि"तिवाक्यात् कौशलेन कृतानि शमादीनि विक्षेप इत्यर्थः. तथा च योगपक्षे तादृशसाधनसमुदायेन योग्यतेत्यर्थः. तादृशं च कर्म ज्ञानपर्यवसायि ज्ञानं च प्रकाशकं तदत्राहुः **तस्ये**त्यादि. रूक्षं तु तदक्षरपर्यवसायि, प्रकृते तु भक्त्यङ्गं विवक्षितं सन्धानकथनादिति तदाहुः **तेने**त्यादि. एवमत्र योग्यतायाः काष्ठा निरूपिता. एतादृशी योग्यता प्रसादे कारणमिति तत्फलभूतप्रसादकाष्ठामाहुः **यथे**त्यादि,

**लेखः**

**योगात्मकत्वादि**ति. **साधनानि कुण्डल**पदार्थ इत्यर्थः. **तस्ये**ति योगस्येत्यर्थः. तथा च क्रियाशक्त्यभ्यस्त-योगरूप-साधनानुभवसहिता भक्तिरित्यर्थः. ज्ञानस्य **कुण्डल**पदार्थत्वपक्षे तस्य कान्तिः प्रकाश इत्यर्थः. **अलङ्कृता भक्तिरि**ति, स्वामिनीगण्डं, भगवद्विषयकः स्नेह इत्यर्थः. **भगवत्प्रेम्णे**ति, भगवद्गण्डेन,

**योजना**

गृह्यते; अतः सांख्यस्यैव ग्रहणं न तु योगस्य. किं च सांख्यरूपत्वं यद्यपि भगवत्कुण्डलस्योक्तं तथापि व्रजसुन्दरीणामपि भगवच्छक्तिरूपत्वेन भगवद-भेदात्कुण्डलस्यापि सांख्यरूपता युक्तेति **ज्ञानशक्तिः प्रतिष्ठिते**त्युक्तम्. **क्रियाशक्त्या विक्षेपो अत्यभ्यास** इति, एवं सति **नाट्यविक्षिप्ते**त्युक्त्या **नाट्येन** क्रियाशक्त्या **विक्षिप्तम्** अत्यभ्यस्तं यज्ज्ञानमिति यावत्, कर्मेन्द्रिय-व्यापारेण गुरुपरिचर्यादिना साधितं यज्ज्ञानमिति फलितोऽर्थः. **योगात्मक-त्वात्साधनानि वे**ति. एकगण्डस्योक्तत्वादेकमेव कुण्डलं ग्राह्यम्. तत्र सांख्य-ग्रहणे योऽर्थः सिद्धः स उक्तः. कुण्डलस्य योगरूपत्वमप्यस्त्यतो योगग्रहणपक्षे **नाट्यविक्षिप्तकुण्डले**त्यत्र **नाट्येन** क्रियाशक्त्या **विक्षिप्तम्** अत्यभ्यस्तं यत्**कुण्डलं** योगात्मकं साधनमित्यर्थो भवति. कर्मेन्द्रियव्यापारेणासनप्राणायामादिना साधितं यत् योगात्मकं साधनं चित्तैकाग्र्यमिति फलितं, "परो हि योगो मनसः समाधिरि"ति वाक्यात्, चित्तैकाग्र्यस्य 'योग'पदार्थत्वात्. **तस्य कान्तिरनुभव** इति, मूले **कुण्डले त्विषे**त्युक्त्या क्रियाशक्त्या अभ्यस्तं यज्ज्ञानं चित्तैकाग्र्यं वा, तस्य या त्विट् कान्तिरनुभव इत्यर्थः. **तेनालंकृता भक्तिरि**ति,

रता एवं तस्यामपि भगवान् रतः. तत्रापि गण्डमिदं साध्यरूपा भक्तिरुच्यते.

## प्रकाशः

ईदृश्यपीयं भक्तिर्न फलरूपा किन्तु "चेतस्तत्प्रवणं सेवे"त्युक्तसाध्यरूपैवेति वदनैकदेशबोधक-**गण्ड**पदेनोभयनिष्ठोच्यत[1] इत्याशयेनाहुः **तत्रापी**त्यादि, **तत्रापी**ति सम्बन्धेऽपि. तथा चेदृशत्वेऽपि ज्ञानोपक्षीणत्वात्साध्यरूपैव, न तु फलकाष्ठारूपेत्यर्थः. एवं मूलव्याख्यानेन योग्यताप्रसादौ स्फुटीकृत्य ताभ्यां देयस्वरूपनिश्चायनप्रकारमाहुः **ताम**मित्यादि. भगवत्स्वरूपज्ञत्वं तदुपदेष्टृत्वं

## लेखः

स्वामिनीविषयकस्नेहेनेत्यर्थः. **तस्यामपी**ति, भगवानात्मन्यपि रत **इत्यपि**शब्दः. अतएव "आत्मारामोऽपि लीलये"ति वक्ष्यते. **सा** तु **भगवत्येव रता** आत्मापि भगवदर्थमेव प्रिय इति भावः. **तत्रापी**ति, भक्तावपी**दम**त्रोक्तं **गण्डं साध्यरूपा भक्तिः** लोभस्थरसानुभवसहितेत्यर्थः, न तु "कुण्डलैर्गण्ड-

## योजना

**मण्डितं गण्डमि**त्यनेन भक्तिरुच्यते, मुखस्य भक्तिरूपत्वात्. **तेन** ज्ञानानुभवेन चित्तैकाग्र्यानुभवे**नालंकृता** या **भक्तिरि**त्यर्थः. एतावता नाट्येन विक्षिप्तं यद् व्रजवल्लवीकुण्डलं तस्य या त्विट् तया मण्डितं यद् व्रजवल्लवीगण्डं तस्य स्वरूपमाध्यात्मिकपक्षेणोक्तम्. तथा च कर्मेन्द्रियव्यापारेण नृत्येन हस्तग्रहणादिना जातं यत्पुरुषोत्तमस्य रसात्मकत्वज्ञानं चित्तैकाग्र्यं भगवदेकतानत्वं, तस्यानुभवेन सिद्धा या पुरुषोत्तमविषया व्रजसुन्दरीहृदये भक्तिः स्नेहरूपेति सिद्धम्. **भगवत्प्रेम्णा सम्बद्धे**ति, मूले **गण्डं गण्डे सन्दधत्या** इत्युक्त्या गोपिकया स्वगण्डं भगवद्गण्डे स्थापितम्. गण्डस्य भक्तिरूपत्वेन भक्तेः स्नेहरूपतया स्वस्नेहो भगवत्स्नेहे स्थापित इत्यर्थः. तदेतदुक्तं **तेनालंकृता भक्तिर्भगवत्प्रेम्णा सम्बद्धे**ति. इदं व्रजसुन्दरीणां गण्डस्य भगवद्गण्डे यद्धारणं तस्य तात्पर्यमाध्यात्मिकपक्षेणोक्तम्. तथा च गोपिकागण्डरूपाया भगवद्विषयकप्रेमभक्तेः नाट्यरूपक्रियाशक्तिहेतुक-विक्षेपात्मकाभ्याससिद्ध-कुण्डलात्मकज्ञानस्य चित्तैकाग्र्यस्य वानुभवेन या अलंकृतता तया विशेषितत्वात्कर्मेन्द्रियाणां अभ्यासस्य च ज्ञानस्य योगस्य च भक्तिशेषत्वमिति[2] सिद्धान्तनिष्कर्षः.

१. पुरुषोत्तमगोपीनिष्ठोच्यते. २. भक्तिदातृत्वम् इति मुं. वि. पाठः.



**तां** लक्ष्मीं प्रति **मूलपर्यटनमिति** लक्ष्मीवन्तं प्रति पुनः पुनरावर्तत इति

## योजना

**ताम्बूलचर्वित**मित्यत्र **ताम्बूलचर्वितमि**त्यस्य प्रकारान्तरेण **ताम**िति विभज्यार्थमाहुः **तां लक्ष्मीं प्रति मूलपर्यटनमितीति**, **तां लक्ष्मीं प्रति** तां लक्ष्मीरूपगोपिकां प्रति **मूलचर्वितं मूलस्य** तादृग्भ्रमणे मूलस्य गोपिकाविषयक-भगवत्स्नेहस्य स्नेहरूपगण्डस्य **पर्यटनं** पुनः पुनः गोपिकागण्डे धारणमित्यर्थः. **गण्डं गण्डे सन्दधत्या** इति वाक्यात्तया भगवद्गण्डे स्वगण्डं स्थापितम्. गण्डस्य स्थापनं च स्नेहेन भवति. तथा च यया[1] यथा स्नेहेन भगवद्गण्डे गण्डस्थापनं कृतं तथा भगवतापि स्वगण्डस्थापनं तद्गण्डे स्नेहेन कृतमिति भावः. तथा च **प्रादात्ताम्बूलचर्वितमि**त्यत्र **ताम**िति तच्छब्देन यया गण्डे गण्डधारणं कृतं सा गृह्यते. तदेतद्विवृतं **तां लक्ष्मीं प्रती**ति, लक्ष्म्याः[2] प्रवेशाल्लक्ष्मीत्वमुक्तम्. ततश्च **तां प्रति मूलचर्वितं** मूलस्य स्नेहरूपगण्डस्य चर्वितं पुनः पुनर्धारणं **प्रादात्** यथा तया स्वगण्डं स्थापयित्वा स्नेहः प्रदर्शितः तथा भगवतापि स्वगण्डं स्थापयित्वा तद्विषयकस्वस्नेहः प्रदर्शित इति सिद्धम्. युक्तं चैतत्, चर्वितताम्बूलदानं परमप्रेम्णैव भवतीति. अनेन "ये यथा मां प्रपद्यन्त" इति भगवत्प्रतिज्ञापि सिद्धेति ज्ञेयम्. **ताम्बूल**शब्दे **ताम**िति द्वितीयान्तं कृत्वा **मूल**शब्दस्य व्याख्या कृता. तत्र यद्यपि **बूल** इति **ब**कारोऽस्ति न तु **म**कारः, तथाप्यार्षे एतावानाग्रहो न रक्षणीय इति **ब**कारस्थाने **म**कारकथनेऽप्यदोषः. किञ्च **ताम्बूल**पदे "वापदान्तस्ये"ति परसवर्णेन **म**कारोऽप्यस्तीति **मूल**पदोक्तिरप्यविरुद्धा(?!). वस्तुतस्तु नैरुक्तीयं व्युत्पत्तिरिति वर्णसाम्येन शब्दार्थो वक्तव्य इति नात्यन्तं साधुत्वासाधुत्वविचारो, "अप्यक्षरवर्णसाम्येन निर्ब्रूयान्न संस्कारमाद्रियेते"त्यनुशासनात्. **लक्ष्मीवन्तं प्रति पुनः पुनरावर्तत इति ज्ञानताम्बूलयोस्तुल्यते**ति, **लक्ष्मीवन्तं** भगवन्तं **प्रति** गोपिकागण्डं **पुनः पुनरावर्तते** स्नेहेन सा गोपिका पुनः पुनर्भगवद्गण्डे गण्डं धारयति. यथा ज्ञानोपदेष्टुः सकाशाज्ज्ञानं प्राप्य यादृशं बुध्यते तादृशं ज्ञानं पुनरुपदेष्टुरग्रे निवेद्यते, संशयशमनाय पुनः पुनरावृत्तिः क्रियते, एवं पुनः पुनर्लक्ष्मीवन्तं भगवन्तं प्रति गण्डधारणं क्रियत इति ज्ञानताम्बूलयोस्तुल्यतेत्यर्थः. यथा ज्ञानवतः सकाशादुपदेशद्वारा ज्ञानं गृह्यते तथा लक्ष्मीवतः पुरुषोत्तमाद्भगवतः

१. तया यथा इति मुद्रितः पाठः. मुं. वि. पाठः गृहीतः.
२. लक्ष्मीप्रवेशादिति मुद्रितः पाठः. मुं. वि. पाठः गृहीतः.

ज्ञानताम्बूलयोस्तुल्यता **चर्वितमि**ति साधनप्रयासाभावेन सिद्धदानम् ॥१३॥

**प्रकाशः**

कूर्मपुराणादौ लक्ष्म्याः सिद्धम्. अत्र च साधनप्रकरणीय-ब्रह्मानन्द-मज्जनोद्धरण-कथयैतासु योग्यताबोधनेन लक्ष्मीत्वं सिद्धम्. [1]वृत्तिरूपं ज्ञानं मनोधर्म इति "ह्रीर्धीर्भीरि"त्यत्र श्रावितं; विद्यात्मकं ज्ञानं च तथेति प्रकृते तदभिप्रेतम्. 'प्रति'र्लक्षणे कर्मप्रवचनीय इति तद्योगे द्वितीया. तथा च **तां** पूर्वोक्तरीत्या **लक्ष्मीं प्रति** लक्षीकृत्य **मूलपर्यटनं** विद्यामूलस्य भगवन्मनसः परित आवृत्ति**रिति** मूले "'धाञ्'पोषणार्थ" इत्याभीक्ष्ण्यसिद्ध्या **लक्ष्मीवन्तं** धर्मिणं लक्षीकृत्य **पुनः पुनरावर्तते** सन्धानायोद्युज्यत **इति ज्ञानताम्बूलयोः** उक्तरीतिकयोग्यतायां देययो**स्तुल्यता.** तथा च यथा सादृश्येन व्रीहिस्थले नीवारग्रहणं तद्द्रव्यैक-देशभाक्तया, तथात्रापि तयोः सिद्धायां तुल्यतायां तादृशज्ञानांशभाक्तया तद्दानमिति भावः. एतदेवाभिप्रेत्य टिप्पण्यामुक्तं **तथा सर्ववेदान्ते**त्यादि. तथा सरस्वतीताम्बूलचर्वितग्रहणेन ग्रहीतुः [2]कवित्वशक्त्यादिकं लोकेऽपि प्रसिद्धमित्युपदेष्टृत्वेऽपि न संदेह इति सर्वमसन्दिग्धमिति दिक् ॥१३॥

**लेखः**

लोलैरि"त्यत्रेव केवलरसग्रहणसहितेत्यर्थः. **तां लक्ष्मीमि**ति, **तां** कुण्डलशोभां प्रति **मूलस्य** स्वामिनीविषयकस्नेहरूपभगवद्गण्डस्य **पर्यटनं** जायते **इति** हेतो[3]स्तथेत्यर्थः. भगवांस्तच्छोभां लक्षीकृत्य स्वगण्डं पुनः पुनस्तत्र संयोजयतीति यावत्. ज्ञानरूपत्वकथनस्य निगूढाशयमाहुः **लक्ष्मीवन्तमि**ति, तादृशशोभावन्तं गण्डं **प्रति** मुखान्तःस्थितं ताम्बूलं **पुनः पुनरावर्तते** इति चर्वणानुकरणम्. भगवज्ज्ञानमपि तादृग्गण्डं प्रत्येवावर्तते, पुनः पुनस्तद्विषयकं भवतीति यावद्, अतस्तुल्यतेत्यर्थः. ताम्बूलदानानन्तरं भगवान् कुण्डलत्विषमण्डित-ताम्बूलावृत्तिचलद्गण्ड-शोभापहृतचित्तस्तदेव पुनः पुनः पश्यति, अतो ज्ञायते

**योजना**

सकाशाद्गण्डस्थापनेन चर्वितताम्बूलं गृहीत्वा ज्ञानं गृह्यते, "भगवान्मय्यत्यन्त-मनुरक्त" इति 'रसिकशिरोमणिरि'ति च. एवमस्यां ज्ञानं निरूपितम् ॥१३॥

१. ह्रीर्धीरिति श्रुतिव्याख्याने वृत्तिरूपं ज्ञानं मनोधर्म इति श्रावितम्. २. श्रीमद्विठ्ठल-नाथैस्ताम्बूलचर्वितदानेन गोपालदासेषु कवित्वं प्रदर्शितम्. ३. प्रादादिति पाठः.



अपरा पुनः वैराग्यात्मकं क्रियारूपमच्छिद्रं ज्ञाने सहायार्थं भगवद्धस्तं स्वहृदये स्थापितवतीत्याह **नृत्यती**ति.

**टिप्पणी**

**नृत्यती गायती**त्यस्याभासः, **अपरा पुनर्वैराग्यात्मकमि**त्यादि, अत्रायं भावः— स्वस्यापि स्नेहातिभरेण विप्रयोगासहिष्णुत्वेऽन्यासां समाधानं न सम्भवतीति तदापि यथान्यासां समाधाने शक्तिर्भवति तथा पूर्वदत्तज्ञान-कार्यसिद्ध्यर्थं क्रियाशक्तिरूपमच्युतीयत्वेन तदापि कार्यक्षममच्छिद्रत्वेन फलाव्यभिचार्यब्जत्वेन तदापि तापकार्यनिवर्तकं तथाऽकरोदिति तापनिवर्तकत्वं ज्ञानसहायत्वं च वैराग्ये प्रसिद्धम्. यद्यपि स भावोऽन्याप्रतिबध्यस्वभावस्तथापि प्रभुसम्बन्धित्वेन यथा स तथा तथा हस्ताब्जमपि तथेति. तदोभयोरनुवृत्त्यो-भयकार्यसम्भवेन विचित्रो महारसात्मको भाव उत्पद्यत इति भावः. ननु पूर्वोत्तरश्लोकोक्त-नायिकयोर्मिथो भेदेनेदं सर्वमनुपपन्नमिति चेत्, मैवम्, अत्र ह्यैश्वर्यादिषड्गुणरूपा एताएव. अत एतद्विशिष्टमेव स्वरूपं 'भगवच्'छब्द-वाच्यमिति निरूप्यते. धर्मयोर्भेदश्चावश्यकः, तथापि धर्म्यभेदात्सर्वोपपत्तेः. तथाच भगवतो ज्ञानवैराग्ये वियोगदशायां स्वामिनीनामेवार्थ उपयुज्यत इत्युक्तं भवति. एतेन तस्मिन्समये प्रभोरपि रसात्मकत्वेन स्वामिनीविरहज-भावकार्यशान्तिरेताभ्यां भवतीति सूच्यते.

**प्रकाशः**

**नृत्यती**त्यत्र टिप्पण्यां वैराग्यात्मकत्व उपपत्तिं स्फुटीकुर्वन्ति **तापनिवर्तकत्वमि**त्यादिना. तथा च तत्सम्बन्धेनोपदेशसाहाय्यरूपभक्तकार्यद्वारा वैराग्यरूपत्वं श्रीहस्ते निश्चेयमित्यर्थः. किञ्च शक्तिबाणाद्यग्रभागे फलव्यवहारो लोके दृश्यते; हस्तश्च क्रियाशक्त्यात्मकस्य बाह्वोरग्रभागः, वैराग्यं च कर्मणां फलम्, अतोपि तथा. अच्छिद्रत्वमप्यग्रभागत्वादेव, प्रान्तएवाच्छिद्रकरणादिति

**लेखः**

ताम्बूलव्याजेन ज्ञानमेव तस्यै दत्तवांस्तस्यां स्वज्ञानं स्थापितवानिति निर्गलितोऽर्थः. **त्विष** इति घञर्थे 'क'विधानम्. स्त्रीत्वविवक्षाभावान्न 'टाप्'. कुण्डलयोस्त्विट् कुण्डलत्विषमिति समासान्तो वा, पद्मनाभ इतिवत् ॥१३॥

**नृत्यती**त्यस्याभासे, **अपरे**ति द्वितीयपार्श्वस्थेत्यर्थः. **अच्छिद्रमि**ति, कर्णादिवत् सच्छिद्रं नेत्यर्थः. व्याख्याने, **अनेने**ति भावोद्दीपककूजनकथनेनेत्यर्थः.

**प्रकाशः**

बोध्यम्. ननु वैराग्यलक्षणं तत्काष्ठा च पतञ्जलिना "दृष्टानुश्रविकविषय-वितृष्णस्य वशीकारसंज्ञा वैराग्यं, तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमि"ति सूत्राभ्यां दर्शिता. तदर्थश्च भाष्ये व्यासपादैरेवं प्रदर्शितः– "स्त्र्यन्नपानैश्वर्यादिरूपे 'दृष्टविषये' स्वर्ग-वैदेह्य-प्रकृतिलयत्व-प्राप्तिरूप 'आनुश्रविकविषये वितृष्णस्य' तद्दोषदर्शिनः पुरुषस्य दिव्यादिव्यविषयसंप्रयोगेऽपि चित्तस्य 'वशीकारसंज्ञा' उपेक्षाबुद्धिः– कषायेषु रागादिरूपेषु पक्केषु इन्द्रियाणां विषयेष्वप्रवृत्त्या चित्ते औत्सुक्यरूपेणापि रागाद्यस्थित्या या एकाग्रता– सा 'वैराग्यम्'. इतोप्युत्कृष्टं तु 'गुणवैतृष्ण्यम्', तच्च विविक्तात्मज्ञानवतो भवतीति ज्ञानपरमकाष्ठारूपं कैवल्यमेतदविनाभूतमि"ति. एवं सति गुणपर्यन्तेषु यावद्विषयेषूपेक्षापूर्विका चित्तस्यात्मैकतानता वैराग्यमिति फलति. अत्र च भगवति परस्परं च रागस्य मात्सर्यस्य चोक्तत्वेनात्मैकतानत्वाभावान्न मुमुक्षुसाधारणं वैराग्यम्. न च यतमानसंज्ञादिरेवात्रेति शङ्क्यं, तल्लक्षणस्याप्यत्राभावात्. किन्तु "सन्त्यज्य सर्वविषयान्" – "यत्पत्यपत्य" – "कुर्वन्ति ही"त्येतेषु यावद्विषयवैतृष्ण्यस्य सिद्धत्वात्तदेव वैराग्यत्वेन वक्तव्यम्. किञ्च विप्रयोगे आत्मानमप्यनिच्छतीनां भगवदेकतानतेत्येवमात्मैकतानत्वेऽपि पूर्वोक्तवैराग्याद्विशेषः. तदुभयमत्र सर्वसाधारणमिति किमत्र वैराग्यं विवक्षितमिति चेद्, अत्रैवं प्रतिभाति– नवमस्कन्धे "नाहमात्मानमाशास" इत्यादिवाक्येषु भगवतो भक्तेषु कृपा तदतिरिक्ते रागाभाव इत्याकारकं तत्सिद्धम्. तथा वेणुगीते "उत्कर्षश्चापि वैराग्य" इति कारिकया भक्त्या भगवत्क्लेशहारकसेवारूपो वैराग्योत्कर्ष उक्तः. एवं सति स्वसमानानां भगवद्विप्रयोगसामयिक-नवमाद्यवस्था[1]निवृत्त्य-भावे भगवतः क्लेशसंभवात् तादृशक्लेशं स्वयं सोढ्वापि सखीनां तन्निवारणरूपा या सेवा तदात्मको यो वैराग्योत्कर्षः स उक्तरूपभगवद्वैराग्यं विना न सम्भवतीति तदेवात्र विवक्षितम्, भक्तेषु कृपायास्तदितरेषु रागाभावस्य चात्र स्फुटत्वादिति. तदेतत्सर्वं हृदि कृत्वा प्रभुचरणैरुक्तम् **अत्रायं भाव** इत्यारभ्य **सूच्यते** इत्यन्तमिति न किञ्चिदनुपपन्नम्. सुबोधिन्यां वैराग्याधिकारबोधनाय स्वामिनीविशेषणानां तात्पर्यमाहुः **शाब्दमि**त्यादि. अन्यथा न वदेत्, नृत्यादेः सर्वसाधारणत्वादिति भावः. ननु पूर्वक्रियापरित्यागो

१. मूर्छापर्यंतम् इति मुं. वि. पाठः.



**नृत्यती गायती काचित् कूजन्नूपुरमेखला ।**
**पार्श्वस्थाच्युतहस्ताब्जं श्रान्ताधात् स्तनयोः शिवम् ॥१४॥**

सा नृत्यं गानं च कुर्वती स्थिता. तत्राभिनये यथान्यहस्तः स्थाप्यते, स्वहस्तो वा, तथा भगवद्धस्तमेव स्थापितवती. शाब्दं ज्ञानं तदर्थानुष्ठानं च तस्या वर्तत इति ज्ञापनार्थं नृत्यगानयोः कथनम्. **कूजती नूपुरे मेखला** च यस्याः, उपरि गानाभिनयनं पादयोर्नृत्यम् अतएव नूपुरयोर्मेखलायाश्च शब्दः. स च [1]भावोद्दीपकः. अनेन तस्याः पूर्वस्थिता सर्वैव क्रियाशक्तिः सफलेति सूचितम्. एकस्मिन्नेव **पार्श्वे** विद्यमानस्य भगवतः **श्रान्ता** सती तत्तापहरणार्थं **स्तनयोरधात्.** तापहारकत्व**मब्जस्य** प्रसिद्धम्. श्रमो निर्वृतिसूचकः. स्वस्याः पूर्वक्रियापरित्यागो बाह्यतएवेति भगवत एकस्मिन्

**प्रकाशः**

वैराग्यबोधकः, स चात्रोक्तएवेति किमवशिष्टं वैराग्य इत्यत आहुः **स्वस्या** इत्यादि. तथा चान्ततः(?!) स्वक्रियात्यागो भगवत्क्रियाशक्त्यैवाग्रे भाव्य इतीदानीमन्तस्तत्सत्तैवावशिष्टेत्यर्थः ॥१४॥

**लेखः**

तथा च भगवान् नूपुरमेखलाकूजनेनोद्दीप्तभावो अन्याज्ञातप्रकारेण तदभिलषितं सर्वं हस्तेनावयवस्पर्शेन पूरितवांस्ततो निर्वृत्या श्रान्ता जाता, वियोगे ताप-सम्भावनया तापस्य हरणार्थं च तद्धस्तं स्तनयोरधादिति मूलार्थः. अभीष्ट-पूरणात् **क्रियाशक्तिः** पूर्वमेतद्भावनया कृता **सर्वैव सफला** जातेति शेषः. श्रमे नृत्यपरित्यागे भगवतः स्थितिः पार्श्वे किमर्थेत्याशङ्क्याहुः **स्वस्या** इति.

**योजना**

**नृत्यती गायती काचि**दित्यस्याभासे **वैराग्यात्मकक्रियारूपमच्छिद्रमि**ति, एतस्यार्थष्टिप्पण्यां स्फुटः. **नृत्यती गायती**त्यस्य विवृतौ **शाब्दं ज्ञानं तदर्थानुष्ठानं च तस्याः वर्तत** इति. इहैकस्याएव गानं नृत्यं चोच्यते. तथा च **गायती**त्युक्त्या शाब्दं ज्ञानं तस्या वर्णितं, यादृशं गीयमाने प्रबन्धे नृत्य-स्वरूपमुक्तं तादृशं जानातीति. अतो ज्ञात्वा गायतीत्युक्तम्. यादृशं स्वगीय-मानप्रबन्धे नृत्यस्वरूपं वर्णितं तादृशमेव नृत्यं करोतीति **नृत्यती**त्यनेनोक्तम्. तदेतदाहुः **तदर्थानुष्ठानं चे**त्यादिना, **तदर्थस्य** गीयमानप्रबन्धार्थभूतस्य नृत्य-

१. रसोद्दीपक इति पाठः.

भागे स्थितिरुक्ता. भगवत्क्रियाशक्तेरक्षयत्वसूचनाया**च्युते**ति, अग्रे सम्बन्धस्यापि करिष्यमाणत्वात् तदविघातार्थं च. तस्य पुनः कामाद्युद्बोधकत्वेन तापानाशकत्वमाशङ्क्याह **शिवमि**ति, तदेव कल्याणरूपम्, आनन्दरूपत्वाच्च भगवतः ॥१४॥

एवं षण्णां स्वरूपमुक्त्वा स्वरूपेण सर्वासां साधारणीं लीलामाह **गोप्य** इति.

**गोप्यो लब्ध्वाच्युतं कान्तं श्रिय एकान्तवल्लभम् ।**
**गृहीतकण्ठ्यस्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे ॥१५॥**

**अच्युतः कान्तो** भगवानेव भवति, अन्तर्बहिश्च नित्यानन्ददायी. अतएव सर्वस्त्रीणां मूलभूतायाः **श्रिय एकान्ततो वल्लभः** परमः प्रियः. तादृशं **लब्ध्वा तमेव गायन्त्यो विजह्रिरे.** ननु परमानन्दे प्राप्ते क्रियाया अपगम एवोचितः, न तु पुनः क्रिया, तत्कथं विहार इति चेत्, तत्राह **तद्दोर्भ्यां गृहीतकण्ठ्य** इति, भगवत्क्रिययैव व्याप्ताः, न तु स्वक्रिया काचित्, कण्ठे क्रियायाः स्थापितत्वाद्गानं क्रिया च सम्भवतः. इयं क्रिया शक्तिरूपेति स्वातन्त्र्यं तासां निरूपितम् ॥१५॥

अतः परं राधा[1]दामोदरवदुभयोर्नृत्यमाह **कर्णे**ति.

---

**लेखः**

श्रमावसरेऽपि नृत्यपरित्यागो बाह्यतएव, अन्तस्तु नृत्याभिलाषस्तिष्ठत्येव, अतः पुनर्नृत्यार्थं भगवतस्तथैव स्थितिरित्यर्थः. स्पर्शमात्रेणाभिलाष-पूरणमच्युतत्वादित्याहुः **भगवत्क्रिये**ति. अनेनैव कार्यसिद्धावग्रे मुख्यभोगो न स्यादित्याशङ्काप्य**च्युत**पदेनैव निरस्तेत्याहुः **अग्रे** इति. **आनन्दे**ति, **शिवत्वेना**-नन्दसाधनत्वाद् भगवत्सम्बन्धित्वेनानन्दरूपत्वाच्च तापाजनकतेत्यर्थः ॥१४॥

**योजना**

**स्यानुष्ठानं** करणमित्यर्थः. **क्रियाशक्तेरक्षयत्वे**त्यादि, नृत्यरूपक्रियाशक्तेरक्षय-त्वसूचनाया**च्युत**पदमित्यर्थः. **अग्रे सम्बन्धस्यापी**ति, सम्बन्धस्य मुख्यरमणस्य करिष्यमाणतया तत्र प्रच्युतत्वा[1]दिदोषपरिहाराया**च्युत**पदमित्यर्थः ॥१४॥

**गोप्यो लब्ध्वाच्युतमि**त्यस्य विवरणे **कण्ठे क्रियायाः स्थापितत्वा**दिति, **गृहीतकण्ठ्यस्तद्दोर्भ्याम्** इति वाक्यात्कण्ठे भगवत्क्रिया स्थापिता. अतः कर्मे-न्द्रियरूपवाग्व्यापारो गानं सम्पन्नं, कण्ठाधीनत्वाद्गानस्य. क्रियायाः स्थापित-त्वा**द्विजह्रिरे** इतिवाक्यसिद्धा विहाररूपा क्रिया च सम्पन्नेत्यर्थः ॥१५॥

---

**टिप्पणी**

**गायन्त्यस्तं विजह्रिर** इत्यत्र **इयं क्रिया शक्तिरूपे**ति, **शक्तिरूपा** भगवत्सामर्थ्यरूपेत्यर्थः. तस्मिन्सति स्वातन्त्र्यमुचितमिति भावः ॥१५॥

उपक्रमात्प्राप्तेऽपि नृत्ये यत्पुनर्वाद्योक्तिपूर्वकं नृत्यकथनं तत्कञ्चन विशेषमाश्रित्येति तमाहुः **अतः परं राधादामोदरव**दिति. अथवा रसावेशजनिता मर्यादारहिता क्रिया विहार इति तदुक्त्योत्तरस्यादिना पूर्वस्यावसानमिति न्यायवत् पूर्वनृत्यविरामो ज्ञाप्यते. तथा सति पुनर्नृत्योक्तिरुचिता. तच्चेत्पूर्ववदेव स्यात्तदा तत्त्यागो न स्याद्, रसार्थमेव तत्करणात्तदुदयं विना तत्त्यागासम्भवात्. एवं सत्यपूर्वरसार्थमेवापूर्वमेव नृत्यमथोच्यत इति ज्ञाप्यते. तदेवाहु**रतः**

**प्रकाशः**

**कर्णोत्पले**त्यत्र टिप्पण्याम् **अतः परमि**त्यादिप्रतीकेन प्रकृतनृत्ये उभयोस्तौल्यमेव विशेष इति बोधितम्. तेन उभयतौल्यविशिष्टं पूर्वनृत्य-मेवेदमित्यर्थः. ननु फले विशेषाभावे साधननिष्ठविशेषाङ्गीकारो न युक्त इति पुनर्नृत्योक्तिरनुपपन्नेत्यरुच्या पक्षान्तरमाहुः **अथवे**त्यादि, तथा चोक्तविहार-जनकरसाविर्भावः पूर्वनृत्यफलं, प्रकृतस्य त्वपूर्वरसाविर्भाव इति फलभेदात्प्रकार-भेदाच्च नृत्यान्तरत्वबोधनाय पुनस्तदुक्तिरिति नानुपपत्तिरित्यर्थः. सुबोधिन्यां,

**लेखः**

**कर्णे**त्यस्याभासे, **अतः परमि**ति, अत्र समुदायरमणं प्रत्येकरमणं च वक्ष्यते. तत्तद्रमणानुकूलभावोद्दीपनाय नृत्यमपि तथा तथा वाच्यं; तत्र समुदायनृत्यं पूर्वमुक्तम्, अस्मिन् श्लोके प्रत्येकनृत्यमुच्यते इत्याहुः **उभयोरि**ति. प्रतिगोपीमेकैकस्वरूपो भगवानासीदित्येका स्वामिनी एको भगवानित्येवं प्रकारकं नृत्यमित्यर्थः. तत्र दृष्टान्तो **राधे**ति. यथा पूर्वं समुदायरमणानन्तरं युगलरसानुभवार्थम् एकां गोपीं पृथङ् नीतवानिति द्वितीयाध्याये "ततो गत्वे"त्यस्य टिप्पण्यां निरूपितं, तथात्रापि युगलरसानुभवार्थमिदं नृत्यमित्यर्थः. एतावान् परं विशेषः— तत्रैकस्याएव युगलरसानुभवः अन्यासां तु विरहानुभवः, अत्र सर्वासामेव तथेति. षष्ठ्यर्थे 'वतिः', तयोरिव तयो रमणमिवेत्यर्थः.

---

१. न्यूनतेति मुद्रितः पाठः चिन्त्यः, मुं. वि. पाठः गृहीतः.

१. अत्र स्वतन्त्रव्याख्यानं प्रथमपरिशिष्टे मुद्रितम्.

**कर्णोत्पलालकविटङ्ककपोलधर्म-**
**वक्त्रश्रियो वलयनूपुरघोषवाद्यैः ।**
**गोप्यः समं भगवता ननृतुः स्वकेश-**
**स्रस्तस्रजोभ्रमरगायकरासगोष्ठ्याम् ॥१६॥**

रासार्थमेवैतदपि, परं प्रत्येकं रस उत्पद्यत इति **गोष्ठी**मात्रमुक्तम्, उभयोर्गाढनृत्ये विनियोगात्. **भ्रमरो गायकः**, वाद्यं तु पूर्ववदेव भविष्यति. तदाह **वलयनूपुरघोषवाद्यैरि**ति, **वलयानां नूपुराणां घोष**शब्देन किङ्किणीनां शब्दाएव **वाद्य**शब्दाः. अत्यन्तं नृत्याभिनिवेशार्थं **स्वकेशात् स्रस्ताः स्रजो**

**प्रकाशः**

ननु यदीदमुभयनिरूपितं तदा **गोप्य** इति बहुवचनस्य कथं सङ्गतिरित्यत आहुः **गोष्ठीमात्रमि**ति. तथा च टिप्पण्युक्तरीत्या सिद्धे नृत्यान्तरत्वे अत्र प्रत्येकं पर्यायेण नृत्यमित्यन्यासां द्रष्टृतया सभ्यत्वबोधनाय बहुवचनमिति भावः. ननु पूर्वं सामान्यनृत्ये "किंकिणीनां च योषितामि"त्यनेनोक्तत्वाद्गाढनृत्ये तस्य कथनावश्यकत्वमिति कुतस्तदनुक्तिरित्यत आहुः **घोषे**त्यादि, तथा च "उच्चैर्घुष्टं तु घोषणे"ति कोशाद्**घोष**शब्दस्य 'उच्चैःशब्द'वाचकतया तेनैव तस्यापि संग्रहान्न पृथक् तदुक्तिरित्यर्थः. **वाद्य**पदमजहत्स्वार्थया वाद्यशब्द-बोधकमित्याशयेनाहुः **वाद्यशब्दा** इति. उद्बुद्धरसात्मकस्य नानुभावकापेक्षेत्य-

**लेखः**

युगलरसानुभवार्थकत्वेन साधर्म्यम्. सङ्के नीता या 'राधे'ति नामा इति सहस्रनामनामावलीपाठादवगन्तव्यम्. व्याख्याने, "बहुनर्तकीयुक्तो नृत्यविशेषो रास" इत्युक्तत्वादिदं प्रत्येकं भगवतोऽवस्थानं रासाननुगुणं भविष्यतीत्याशङ्क्याहुः **रासार्थमेवैतदपी**ति. भगवांस्तावद्रूपः सन् प्रत्येकं रसमुत्पादितवांस्तावता बहुनर्तकीयुक्तत्वं न क्षतं परं समुदितैकरसाभावात् पूर्ववत् 'क्रीडामि'त्येकवचनं नोक्तं किन्तु प्रत्येकरसोत्पादनाद्**गोष्ठी**पदमुक्तम्. गोष्ठ्यां हि यथाधिकारं सर्वैर्भिन्नो रसोऽनुभूयते इति भावः. **घोषशब्देने**ति, घोषयन्तीति घोषा इति व्युत्पत्त्या **घोष**शब्देन किङ्किण्य उच्यन्ते. तत्त्रयाणां

**योजना**

**कर्णोत्पलालके**त्यस्य विवरणे **रासार्थमेवैतदपी**ति, उभयोर्नृत्यं रासार्थ-मित्यर्थः. "रसानां समूहो रास" इति व्युत्पत्त्या रससमूहोत्पादनार्थं



यासामित्युक्तम्. [१] (यद्वा गायकास्तु भ्रमरा निरूपिताः, ते च मकरन्दार्थिनः, स च पुष्पेष्वेव तिष्ठति, तानि च वियुक्तानि तद्रहितानि च भवन्तीति स्वनृत्यानुरूप-गानकरणाद् अतिप्रसन्नास्तेभ्यः स्रजएव दत्तवत्यः. अन्यथा रसार्थं स्वकेशेषु शोभाहेतुत्वेन [२]धृतानां तासामुपेक्षा न भवेत्. तेन भ्रमराणां गाननैपुण्यं प्रभुप्रियाणां च तदभिज्ञत्वं च ध्वन्यते.) नृत्यारम्भे तासां शोभामाह **कर्णे**ति. अन्यथा पूर्वोक्तनृत्येन श्रान्तानां पुनर्नृत्यमनुचितमेव स्याद्; न वा रसालम्. **कर्णे उत्पल**स्थापनं तस्य अपातने चातुर्यार्थम्, तत्सहिता **अलकाः** भ्रमरा इव रसपातारः, तेषां **विटङ्कः** अलङ्करणरूपं स्थानम्, एतादृशौ कपोलौ. तत्र यो **धर्मः** अन्तरुद्गतश्रमजलं नृत्याभिनिवेशा-ज्जातं तैः कृत्वा **वक्त्रे श्रीर**लौकिकी काचित् सम्पन्ना, यथा मुक्ताभिर्मण्डितं भवति कपोलद्वयम्. अनेन मुखे श्रमो निवारितः, ताभिः सह भगवतो नृत्ये अनुभावकश्च भवति, स्वतो वा. क्रीडानिवृत्तिरनेन सूचिता. **गोप्य** इति

**टिप्पणी**

**परमि**त्यादिना. **कर्णोत्पलालके**त्यत्र **स्वतो वे**त्यादि, श्रमाभावज्ञापक-धर्मश्रीकथनेन रसावेशादेवैतदपि नृत्यं जायत इति तस्मिन्भवति सति स्वत-एव पूर्वविहारनिवृत्तिर्जातेति सूच्यत इत्यर्थः. अथवा क्रीडाया अनिवृत्तिः **क्रीडानिवृत्तिः**, श्रमाभावसूचनेन पूर्वक्रीडाया निवृत्तिर्न स्वामिनीनामशक्येति

**प्रकाशः**

रुच्या पक्षान्तरमाहुः **स्वतो वे**त्यादि. टिप्पण्यां **श्रमाभावे**त्यादि, तथा "चोत्तरस्यादिना पूर्वस्यावसानमि"ति न्यायोऽत्रापि बोध्यते, तेन **स्वत** इत्यस्य 'अथदिव' इत्यर्थो बोध्य इत्यर्थः. न्यायस्य पूर्वं सूचितत्वेनापुष्टार्थ-मिदमित्यरुच्या पक्षान्तरमाहुः **अथवे**ति. अस्मिन्पक्षे **स्वत** इत्यस्य स्वामिनीशक्त्येत्यर्थो बोध्यः ॥१६॥

**लेखः**

शब्दाः अतस्त्रयाणां वाद्यत्वमित्यर्थः. **अन्यथे**ति शोभाकथनाभावे इत्यर्थः. **अनेने**ति, कपोलयोः स्वेदेन मुखश्रीकथनेनेत्यर्थः. **श्रमो** म्लानतेत्यर्थः. स्वेदश्रीदर्शनेन चुम्बनादिना अनुभावको धर्म इत्याहुः **ताभिरि**ति. धर्मश्रीकथनस्य प्रयोजनान्तरमाहुः **स्वतो वे**ति. नात्र सहार्थे **सममि**ति किन्तु तुल्यार्थे; तथा

१. प्रभूणां स्वतन्त्रः. २. श्रान्तानामिति पाठः.

भगवतएव तासामेतावत्त्वं न स्वत इति ज्ञापितम्. अतो **भगवता समं** यथा यथा भगवान् नृत्यति तथा तथा ता अपि नृत्यन्तीति ॥१६॥

एवं प्रादुर्भूते रसे अत्यन्तोद्गमनार्थं साक्षात्कामशास्त्रोक्ताश्चेष्टा निरूपयति **एवमिति**.

**एवं परिष्वङ्गकराभिमर्श-स्निग्धेक्षणोद्दामविलासहासैः ।**
**रेमे रमेशो व्रजसुन्दरीभिर्यथार्भकः स्वप्रतिबिम्बविभ्रमः ॥१७॥**

आलिङ्गनादयस्तत्र निरूपिताः. एवमेव रसोद्गमनार्थं **परिष्वङ्गः** आलिङ्गनं, ततः **कराभिमर्शः** तत्तदवयवेषु भगवद्धस्तस्पर्शः, ततः **स्निग्धेक्षणं** भावोद्गारि, तत **उद्दामो विलासः** अमर्यादो भोगः, ततो **हास्यानि** पूर्णमनोरथानाम्. एवं परिष्वङ्गादिहासान्ताः सर्वासु. ननु प्राकृतीभिः कथं रेमे? तत्राह **रमेश** इति, रमाया ईशः, सर्वत्र तासु रमापि भगवदाज्ञया

### टिप्पणी

सूच्यत इत्यर्थः. **गोप्य इति भगवत एवे**त्यादि. भगवत्साम्येन नृत्यकृतिर्न पूर्वशिक्षया गोपजातीयानां, तत्रापि कुलवधूनां, तदसम्भवात्; किन्तु तथा रसाविर्भावो येन तथा नृत्यं स्वतएवाभूदिति ज्ञापनायेत्यर्थः ॥१६॥

### प्रकाशः

**एवं परी**त्यत्र, [१]मूलस्थातिदेशः प्रयोजनांशे एव न तु प्रकारांशे इत्याशयेनाहुः **एवमेव रसोद्गमार्थमि**ति. नन्वेवं सर्वभावेन रमणे रसोद्गम उभयोस्तुल्यतायामेव भवति, न तु न्यूनाधिकभावे, प्रकृते च "न तत्सम" इत्यादिश्रुत्या भगवत्तुल्यस्याभावात्कथं रसोद्गम इत्याशङ्कां हृदि कृत्वाहुः **ननु**

### लेखः

च भगवत्प्रधानकमेव नृत्यमित्येताभिः सहेत्युक्तम्. **अत** इति, भगवता तुल्यतायाः सम्पादितत्वादित्यर्थः. **भगवता समं** तुल्यमित्यर्थः. भगवन्नृत्यं दृष्ट्वा तदनुसारेण ननृतुः, अतो भगवतः प्राधान्यमिति भावः ॥१६॥

**साक्षात्कामे**ति, नृत्यादयः परंपरया कामोद्बोधकाः, आलिङ्गनादयस्तु साक्षादुद्बोधकाः. तथा च साक्षात्त्वेन कामशास्त्रोक्ता इत्यर्थः.

### योजना

प्रतियुवतिभेदेन प्रकटीभूत इति भावः. **अतो भगवता सममि**ति, **सम**शब्दोऽस्मिन् पक्षे तुल्यपर्यायः, तथा च **भगवता समं** भगवता तुल्यं ननृतुरित्यर्थः ॥१६॥

१. मूलस्य इति मुं. वि. पाठः.



### टिप्पणी

**रेमे रमेश** इत्यस्याभासे **ननु प्राकृतीभिरि**त्यादि. अत्राप्राकृतीत्वं निरूपयितुं तद्विपरीतधर्मोक्तिः पूर्वपक्षे. सिद्धान्तस्तु— ब्रह्मानन्दरूपत्वेनाप्राकृती रमा, भगवांस्तु तदीशत्वेनाप्राकृतीरमणैकस्वभावः, तेनात्र रमणोक्त्यैवा-प्राकृतीत्वमप्युक्तमेव भवतीति भावः. किञ्च. स्वामिनीनामप्राकृतत्वे का नाम शङ्का, यत एतत्सम्बन्धद्वारैव रमापि प्रभुसम्बन्धं प्राप्तवती नान्यथेत्याहुः **रमापि भगवदाज्ञये**त्यादि. तदुक्तं "श्रयत इन्दिरे"त्यादि. तथा च स्वामिनीषु प्रभोः स्नेहभरदर्शनेन स्वयं तत्र प्रविश्य तद्द्वारा प्रभुसम्बन्धं प्राप्तुमिच्छन्त्यपि तन्महत्त्वस्फूर्त्या स्वयं न प्राविशत् किन्तु तदार्तिं दृष्ट्वा तन्निवृत्त्यर्थं प्रभुणाज्ञापिता तथाकरोदिति ज्ञापनायोक्तं **भगवदाज्ञये**ति. अपरञ्च. यदा नागरीवदस्मदतिरिक्तायाः प्रभुसम्बन्धो मा भवत्विति चित्तकौटिल्यं स्यात्

### प्रकाशः

**प्राकृतीभिरि**त्यादि, प्राकृतशरीरत्वमन्तर्गृहस्थितास्वेव, न तु रासमण्डल-मण्डलायमानास्वपीति "उक्तं पुरस्तादि"त्यस्य स्वतन्त्रे एतत्कथोपक्षेपार्थापत्त्या प्रभुचरणैः स्थापितम्, न तु मूले[१] पांक्तं न वा श्रीमदाचार्यैरुक्तम्, अतो न तथा तत्राशयः; अत्र सिद्धवत्प्राकृतीत्वकथनाच्चेत्याशङ्कायां तदुभयगोचरत्वं बोधयितुं प्राकृतीत्वोक्तितात्पर्यं प्रभवष्टिप्पण्यामाहुः **अत्राप्राकृती**त्यादि. अप्राकृतीत्वं मूले कुतः सिद्धमित्याकांक्षायां तत्सिद्धिप्रकारं वदन्त आहुः **सिद्धान्त** इत्यादि, तथा चासाधारणस्वभावपरिचायका**द्रेमे रमेश** इति समभिव्याहारादेव सिद्धमित्यर्थः. नन्वयमेव श्रीमदाचार्याशय इति कथं विनिगन्तव्यमित्याकांक्षायामाहुः **किञ्चे**त्यादि **आज्ञयेती**त्यन्तम्. तथा चोक्तवाक्येन बोधिते रमानिवेशे भगवदाज्ञाया हेतुत्वकथनाद्विनिगन्तव्य-मित्यर्थः. ननु यद्येवं तदा **अधिष्ठानयोग्या** इत्यनेन रमापेक्षया निकर्षइव किमिति बोध्यते इति शङ्कायां नात्र निकर्षबोधनमपि तूत्कर्षार्थमेवैतदित्याहुः **अपरञ्चे**त्यादि, तथा च यदि निकर्षाभिप्रायेणात्र योग्यता बोध्या स्यात् तदा मूले **व्रज**पदं न वदेत् किन्तु "किल सुन्दरीभिरि"त्येव वदेत्. अतो मूले **व्रज**पदात् श्रीमदाचार्याणामपि तथैवाशय इत्यर्थः. एवं च "न तत्सम"

१. मूलेऽप्युक्तम् इति मुं. वि. पाठः.

निविष्टा. ता अपि अधिष्ठानयोग्या इत्याह **व्रजसुन्दरीभिरि**ति. नन्वात्मारामः

**टिप्पणी**

तदा रमा न तथा कर्तुं शक्नुयाद्, एतास्तु सर्वथाङ्गीकृतव्रजसम्बन्धिन्य इत्यतिसौजन्यादिगुणवत्य इति सुखाराध्या इति रमायास्तथाकरणमित्याशयेनाहु**स्ता अप्यधिष्ठानयोग्या इत्याहे**ति. नन्वेतद्रसप्राप्त्यर्थं ह्येतदाज्ञापनम्. सा चोभयोरपि दम्पतित्वभावस्य जागरूकत्वेनात्रासंभाविता. एवं सति प्रियस्यापि पूर्वभावविलक्षणभावोत्पत्त्या रसाभासप्रसंगेन पूर्वरसस्यापि भञ्जिकेयमाज्ञा, स्वौधःस्पर्शमप्यसहमाना शिक्यस्थमपि क्षीरं नीरे पातयन्ती

**प्रकाशः**

इत्यादिभिर्यद्यपि साम्यं निषिद्धं तथापि "निरञ्जनः परमं साम्यमुपैती"ति भगवद्वरणेनानञ्जनत्वे तस्यापि [1]श्रावणादत्र तथात्वस्य सिद्धत्वान्न रसोद्गमानुपपत्तिरिति भावः. नन्वेवं रसोद्गमविचारे रमणस्य पारार्थ्यमायाति. तादृशं तु षड्विंश एव "अरीरमदि"ति णिजन्तेन बोधितम्. प्रकृते तु **रेमे** इति कर्तृसमवेतक्रिया-फलबोधकात्मनेपदेन रमणस्य स्वार्थता लभ्यते इत्यात्मारामत्वभङ्गमाशङ्क्य मूले दृष्टान्तेन तन्निरस्यत इत्याशयेन **नन्वि**त्यादिना दृष्टान्तमवतार्य, **एताभिरि**ति पदेन साम्येऽपि भिन्नाभी रमणमात्मारामत्वभञ्जकमिति **कथं रेम** इत्यनेनाशङ्क्य, लक्ष्मीवद्धर्मरूपत्वेन तादात्म्याददोष इति समाधाने, ब्रह्मानन्दरूपत्वाभावेन तदभावं लक्ष्म्यावेशेन समाधाने ब्रह्मभावाभावेनावेशदौर्घट्यं च दोषं बोधयित्वा, तेन लक्ष्म्यामेतासु च रमणस्य भिन्नविधत्वसूचनेन पूर्वपक्षं दृढीकृत्य, ततो **बालको ही**त्यादिना व्याख्यानेन सामर्थ्यादिभिरेव रमणान्नात्मारामत्वभङ्ग इति समाहितम्. तथा सति धर्मात्मकव्यतिरिक्तासु न रमणमित्यायातीति श्रीमदाचार्याणां कथं तथाशयोऽवगन्तुं शक्य इत्याकांक्षायां "रेमे तया चात्मरत" इत्यत्र "साधारत्वाय तस्यामात्मानं स्थापितवानि"ति यदुक्तं तदनुसन्धाय मूलस्य दृष्टान्तद्वयगर्भत्वस्फुटीकरणाद् द्वितीयदृष्टान्तावतारिकायामात्मारामत्वनिर्वाहकरमणसाधकसिद्धान्ताक्षेपात्तत्र तादृशसिद्धान्तावतारिकाक्षेपस्यार्थतो लाभाच्चावगन्तव्य इत्याशयेन पूर्वदृष्टान्तं द्वितीयावतारिकां च विवरीतुं पूर्वदृष्टान्ताक्षेपं पूर्वं तत्र स्फुटीकुर्वन्ति **नन्वेतद्रसे**त्यादि. **से**ति आज्ञा. **तत्सम्पादनमनुचितमि**ति,

१. अनञ्जनत्वस्यापि श्रवणाद् इति मुं. वि. पाठः.



कथमेताभी रेमे? लक्ष्मीस्तु ब्रह्मानन्द इति रमणमुचितमपि. एतास्वावेशोऽप्यनुचितः ब्रह्मभावाभावादिति चेत्, तत्राह **यथार्भक** इति, बालको हि दर्पणजलादिकं पुरतः स्थापयित्वा तत्र तत्रात्मानं पश्यन् रमते तथा भगवानपि स्वसामर्थ्यं स्वरूपं वा तत्र स्थापयित्वा ब्रह्म ब्रह्मानन्दं चाविर्भावयित्वा रेमे. नन्वेतदप्यनुचितं, किमनेनेति चेत्, तत्राह **यथार्भकः**,

**टिप्पणी**

गौरिव, अतस्तत्सम्पादनमनुचितम्. किञ्च ब्रह्मभावे हि ब्रह्मानन्दाविर्भावो, रमा चैतद्रूपा, स्वामिन्यस्तु ततोऽधिकभगवद्रसभाववत्यो अतस्तत्सम्बन्धोऽत्राशक्यवचन इत्याहु**र्नन्वेतदप्यनुचितमि**त्यादिना. अत्रार्भकदृष्टान्तेन समाहिते-

**प्रकाशः**

आज्ञया तासु रमानिवेशसम्पादनमनुचितं, रमणस्य स्वार्थताबोधनात्तादृशरमणविघटकत्वेनानुचितम्. ननु मूलवाक्यात्तदावेशे सिद्धे आज्ञायां को दोष इत्याकांक्षायां तमप्याक्षिपन्ति **किञ्चे**त्यादि. तथा च रसात्मत्वेनैतासु रमणौचित्येऽपि भगवत आत्मारामत्वेनाप्येवं रमणस्य सप्तविंशे उक्तत्वात्तदभङ्गेन कथं रेमे? न च लक्ष्मीवत्, तस्याः ब्रह्मानन्दरूपतया ब्रह्माभिन्नत्वेन तथा रमणौचित्येऽप्येतासु ब्रह्मानन्दरूपत्वाभावेनाभेदस्य दुर्वचत्वात्. **एत**ल्लक्ष्मीवद्रमणम् **अपि**शब्देन रमावेशकृतभेदाभेदात्पूर्वदृष्टान्तप्रतिपादितं रमणं च ब्रह्मभावाभावेनावेशस्याशक्यवचनत्वाद**नुचितमि**त्येवं पूर्वावतारिकायास्त-

**लेखः**

**एवमित्यत्र**, **नन्वात्माराम** इति, **आत्मनि** स्वार्धभूतायां रमायां दाम्पत्येन **रमणकर्ता** रमेशो रमासमक्ष**मेताभिः कथं रेमे?** ननु यथैतत्समक्षं लक्ष्म्या रेमे तथा लक्ष्मीसमक्षमेताभिरपीत्याशङ्क्याहुः **लक्ष्मीस्त्वि**ति. सा तु ब्रह्मानन्दत्वादात्मनोऽर्धं, स्वीयेति यावत्. अतोऽन्यसमक्षं तया रमणमुचितमपि. **अपि**शब्दात्तत्रापि अस्वारस्यं— मुख्यरसप्राप्तिस्तु तस्याः अपि न भवत्येव किन्तु यथाकथञ्चिद्रमणं स्यात्, परमेताभिस्तु सह लक्ष्मीसमक्षं रमणमपि न स्यादेवेत्यर्थः. आशङ्कान्तरमाहुः **एतास्वि**ति. द्वितीयाशङ्कासमाधानं सुबोधिन्यां स्फुटमनुक्तं टिप्पण्यामेवोक्तमिति ततोऽवधारणीयम्. **नन्वेतदि**ति, अतो दृष्टान्तस्याभासान्तरं वक्तव्यमिति शेषः. **नन्वात्माराम** इत्याभासादाभासान्तरमाहुः **किमनेने**ति. कैमुत्येनाप्राकृतत्वसूचनार्थकेन रमानिवेशनेन

यथा बाललीलां कृतवान् तथैतदपि कृतवानित्यर्थः. [1](यद्वा.

## टिप्पणी

रयमाशयः— यदुक्तं रमावेशे रसाभासप्रसंगः पूर्वरसविच्छेदश्चेति, तत्रोच्यते, यथा स्वप्रतिबिम्बं पश्यन् बालो दर्पणादौ गृहादिप्रतिबिम्बे सत्यपि स्वप्रतिबिम्बएव रमते, न तु तदन्यस्मिन्, अतएव मूले **स्व**पदोपादानम्; तथा स्वामिनीषु रमासमागमेऽपि स्वस्य रसरूपत्वेन तदात्मकान् भावान् यत्र दृष्टवांस्तत्रैव तदनुरूपभावचेष्टावानेव रेमे, न तु रमास्फूर्तिरपि, येन भार्यात्वज्ञानेन पूर्वरसविच्छेदः स्यात्. तस्य रसस्य तादृक्स्वभावत्वादेव तथात्वं प्रभोः, अर्भकत्वस्वभावस्य तथात्वात्तस्येव. रमायास्तु भगवति भर्तृभाववत्त्वेन न मुख्यरसप्राप्तिः; अतएव "नायं श्रियोङ्ग उ नितान्तरतेरि"ति श्रीमदुद्धववचनं, किन्तूक्तभावविशिष्ट-प्रियाङ्गसंगिव्रजाङ्गना-ऽङ्गसंगित्वेनैव पूर्वमननुभूतजातीयः कश्चनानन्दविशेषः समजनि, येन सर्वविस्मृतिरभूत्. एतेनैव रमाप्रवेशे स्वामिनीनां भाववैलक्षण्येन पूर्वरसविच्छेद इति निरस्तम्. नहि प्रतिबिम्बाश्रयस्तज्ज्ञानं लोके कचिद्दृष्टचरं, ज्ञानस्यात्मधर्मत्वेन तत्र

## प्रकाशः

त्सिद्धान्तस्य चार्थोऽत्राक्षिप्तो बोध्योऽतोऽत्र न त्वदभिमतोऽर्थ इत्यर्थः. नन्वेवं पूर्वावतारिकार्थस्तदा स्याद्यदि पूर्वदृष्टान्तव्याख्याने तदनुसारी समाधिर्दृश्येत, तत्र त्वर्भकदृष्टान्तेन समाधानान्न तथार्थ इत्याशङ्कायां तदाशयमाहुः **अत्रे**त्यादि, **अत्रे**ति उक्ताशङ्कायाम्. **अयमि**ति वक्ष्यमाणः. कथमित्याकांक्षायां तथात्वमुपपादयन्ति **यथे**त्यादि. नन्वेवं सति **रमेश**पदबोधितरमावेशो व्यर्थः स्यादित्याशङ्कायां तन्निरासायाहुः **रमाया** इत्यादि. तथा च रमार्थं रमावेशोऽतो न व्यर्थ इत्यर्थः. नन्वस्त्वेवं तथाप्यावेशे स्वस्मिन् रमात्वानुसन्धानात्पूर्वरसविच्छेद इत्यत आहुः **एतेने**त्यादि. नन्वस्त्वेतासामज्ञानं तथापि प्रभोः सर्वज्ञत्वेन तदनुपपन्नं, ताम्बूलग्रहणादिना एतासामपि तथेत्याशङ्कायां द्वयोस्तदनु-

## लेखः

स्वामिनीनां तु स्वाच्छन्द्यहान्या रसन्यूनतैव भवेद्, अतस्तासां किं फलं सम्पादितवानिति प्रश्ने तासु रसविच्छेदाभावं दृष्टान्तेनाहेत्यर्थः. अस्मिन्पक्षे

१. यद्वेत्यारभ्य श्लोकान्तं व्याख्यानं प्रभूणामिति प्रतिभाति.



## टिप्पणी

तदसम्भवात्. अपिच. स्वामिनीनां प्रभोश्च तज्ज्ञानेऽपि न काचित्क्षतिः, यतो रसाभासभावाभासैर्मुख्यो रसः पोष्यते. प्रकृते च तदावेशतः क्षणमात्रं तथाभावो अग्रिमक्षण-जायमानरस-विशेषानुभावक इतीष्टएव. अतः प्रस्तुतस्वौधोभार-धाराभरेण शिक्यस्थभाण्डान्यप्यतिशयेन पूरयन्त्यद्भुता गौरिवेयमाज्ञेत्युचिततरा.

यच्चोक्तं ब्रह्मभावाभावात् तदानन्दरूपाया रमायाः सम्बन्धोऽनुपपन्न इति, तत्रोच्यते— न हि ब्रह्मभावात्मकसाधनेनाविर्भवद्ब्रह्मानन्दो रमा, तस्य तद्विशिष्टेषु पुरुषेष्वप्याविर्भावाद् अस्याः पुरुषोत्तमैकनिष्ठत्वात्, किन्तु पुरुषोत्तमस्य रसात्मकत्वेन स यावद्विधस्तावद्विधोऽयं निरूपणीयः. तथा च स्निग्धदम्पतीभावोऽप्येकस्तत्प्रकार इति तदात्मकानन्दप्रकाशिका "अर्धो वा

## प्रकाशः

सन्धानेऽप्यक्षतिरित्याहुः **अपि चे**त्यादि **उचिततरे**त्यन्तम्. तथा चावेशस्योक्तत्रितयार्थत्वेऽन्यतरार्थत्वे वा क्षत्यभावान्नाज्ञायामनौचित्यग्रास इत्यर्थः.

नन्वस्त्वाज्ञाया उचितत्वं, तथापि रमायाः ब्रह्मानन्दरूपत्वस्य पूर्वं स्थापितत्वात्सर्वत्र तथा प्रसिद्धेश्च तस्याः ब्रह्मानन्दरूपत्वमविवादम्, अत्र च धर्मात्मकव्यतिरिक्तासु तथात्वाभावः स्फुट इति तमादाय या न्यूनता तामनुसन्धायैव श्रीमदाचार्यैरावेशाभावपूर्वपक्षे ब्रह्मभावाभावो हेतुत्वेनोक्त इति तद्विरोधो नापैतीति कथं तथाशय इत्याशङ्कायां तमनूद्य विरोधं परिहरन्ति **यच्चे**त्यादि; **तत्रोच्यत** इत्यादि च. अयमर्थः— एतासु न्यूनत्वमापादयता भवता रमास्वरूपं कीदृक् प्रतिपन्नं, किं "ब्रह्मभूतः प्रसन्नात्मे"त्यादिप्रतिपादितब्रह्मभावात्मक-साधनीयफलात्मक-ब्रह्मानन्दरूपम्, उत पुरुषोत्तमाभिन्नानन्दरूपम्? तत्राद्यस्तु न युक्तो, **न ही**त्यादिनोक्तदोषात्. अतो द्वितीय एवाङ्गीकार्यः. तथा सति पुरुषोत्तमस्वरूपं पूर्वं विचारणीयम्. तच्च रसरूपमिति पूर्वं निर्णीतम्. अतो रमायास्तदभेदेऽपि दाम्पत्यस्य प्रसिद्धत्वात्सिद्धे शक्तिशक्तिमद्भावे सोऽभेदस्तादात्म्ये पर्यवस्यन् रमायास्तदानन्दैकदेशतां व्यवस्थापयतीत्येतादृशं रमास्वरूपं शास्त्रविचारेण सिद्धम्. तथा सति न ब्रह्मानन्दभावहेतुक-रमावेशाभाव-शङ्कायां श्रीमदाचार्याभिप्रायः किन्तु 'ब्रह्मानन्द'पदेनात्रान्यदुच्यत इति तदादायात्र शङ्केति न

## टिप्पणी

एष आत्मनो यत्पत्नी''ति श्रुतेः स्वयमपि तदर्धत्वेनानन्दरूपा ब्रह्मणः पुरुषोत्तमस्य या शक्तिः सा रमा 'ब्रह्मानन्द'शब्देनोच्यते. तथा च एतादृश्याः सम्बन्धयोग्यतास्तीत्यत्र प्रवेश उपपद्यत इति स्वामिनीनां प्रभोश्च रमाननुसन्धानपक्षमाश्रित्य **बालको** **हीत्यारभ्य** **स्थापयित्वेत्यन्तो** ग्रन्थ उक्तः. अनुसन्धानपक्षमाश्रित्य **ब्रह्मेत्यादिः**. अत्र **ब्रह्मपदेनोद्दीपकानुभावकवा-क्कृतिभिराविर्भावितो** व्यभिचारिभावपुष्टो मुख्यो रस उच्यते. अविकृतो नित्योऽयं रस इति ज्ञापनाय **ब्रह्मपदोपादानम्**. **ब्रह्मानन्दपदेन** पूर्वोक्तो मुख्यरसपोषको रमावेशजनितो भावविशेष उच्यते.

ननु स्वसामर्थ्यादिस्थापनेनैव चेद्रमणं, तदा स्वत उत्तमनायिकात्वा-प्राप्त्या स्वामिनीषु भगवतश्च स्वसामर्थ्यादियोजनव्यासंगेन उत्तमरसाननुभवप्रसंग इत्यरुच्या पक्षान्तरं वक्तुं तामुद्भावयन्ति **नन्वेतदपीत्यादिना**. सामर्थ्यादि योजयित्वा रमणे क्लिष्टकर्मत्वप्रसंगेनानुचितमिदमित्यर्थः. पक्षान्तरे

## प्रकाशः

त्वदुक्तरीतिकः श्रीमदाचार्योक्तिविरोध इत्याशयेन रमास्वरूपं निर्धारयन्ति **किन्त्वित्यादि**. रमास्वरूपनिर्धारणे यत्सिद्धं तदाहुः **तथा चैतादृश्या** इत्यार**भ्यो-च्यत** इत्यन्तम्. अत्र प्रथमपक्षे तस्याः मूर्तरूपेण न स्थापनं किन्त्वमूर्त-स्वसामर्थ्यात्मना रूपात्मना वा, तेनाननुसन्धानपक्षसंग्रहः. अनुसन्धानसंग्राहके द्वितीयपक्षे च मुख्यरसं तत्पोषकं चाविर्भावयित्वा रेम इत्यर्थो भवति. तथा सति तत्पूर्वपक्षे रमायास्तादृशरसभावाभावात्तदावेश एतास्वनुचित इत्यर्थोऽ-भिप्रेत इति न विरोधगन्धोऽपीति पूर्वोक्तएवाशयः. एवं सति ''स भगवः कस्मिन् प्रतिष्ठित'' इति प्रश्ने ''स्वे महिम्नी''ति ''अन्यो ह्यन्यस्मिन्प्रतिष्ठित'' इतिवच्छ्रावितस्योत्तरस्य विचारे स्वमहिमात्मक-शक्तिरूपत्वमेतास्वपि निर्बाधमिति शक्तिशक्तिमद्भावस्य रमायामिवैतास्वपि तौल्यात्स एवात्रापि समाधिरिति रसरूपत्वादिकमात्मारामत्वं चैवमविरुद्धं, न तु तथेत्यर्थः.

एवं पूर्वदृष्टान्तव्याख्यानतात्पर्यं स्फुटीकृत्य द्वितीयं व्याख्यानं स्फुटीकर्तुं तदवतारिकासूचितामरुचिं स्फुटीकुर्वन्तस्तामवतारयन्ति **ननु स्वेत्यादिना**. **इदमिति** पूर्वोक्तरीतिकव्याख्यानम्. नन्वावश्यकत्वे क्लिष्टकरणमप्यदुष्टं, यथा ''महद्भयं वज्रमुद्यतमि''त्यादावित्याकांक्षायां तद्वैधर्म्यं बोधयितुं



कदाचित्प्रकारसाम्येऽपि नैतद्रसानुभवो लक्ष्म्यां भवितुमर्हति किन्त्वेतास्वेवेति ज्ञापयति पदद्वयेन **रमेशो व्रजसुन्दरीभिरिति**, **रमाया ईशः** स्वामी भर्तेति यावत्. एतास्तु **व्रजसम्बन्धिन्योऽ**न्यसम्बन्धिन्यः **सुन्दर्यो**, न तु विवाहिता इति. रमारमणदशायां एतादृग्रसानुभवो नोभयोरपि सम्भवति, रसस्वरूपस्यैव तादृशत्वादिति भावः. नन्वीश्वरे नेदमुचितमित्यत आह **यथार्भक** इति,

## टिप्पणी

दृष्टान्तस्याभासमाहुः **किमनेनेति चेदिति**, स्वामिनीनामेवार्थे अस्या लीलायाः क्रियमाणत्वाद्रमावेशेन रमणेन स्वामिनीनां किं फलं सम्पादितवानित्यर्थः. इयमाशङ्का दृष्टान्तेनापास्यते. तथाहि— यदा यशोदारोहिण्यादिसमक्षं तत्संकोचतः स्वयमाश्लेषाद्यकरणेनात्यार्तानां व्रजसुन्दरीणामार्तिहरणार्थं बालभावव्याजेन तदुरस्सु विविधविहारान् करोति तदैतासां रसरीत्यैव रसपूर्तिरार्तिहरणं च भवति, अन्यासां तु विचित्रबालचेष्टात्वभानेन बाल-लीलारसानुभव एव भवति. एवमिहापि स्वामिनीनां निजरसभावानुरूपएव रसानुभवो रमायास्त्वेतत्प्रसंगेन निजभावानुरूपएव स इत्यर्थः. तथा च दृष्टान्तद्वयमत्र ज्ञेयं— यथार्भको रेमे तथेत्येको, अग्रिमश्चापरः. सान्निध्यात्स एव तथाविधो यथेति. अत्रावृत्ते**नार्भकपदेन** लौकिकः स उच्यते. द्वितीयो दृष्टान्तः पूर्वोक्तप्रकारकएवेत्याचार्यैरत्र नोक्तः. एवं सति रमाप्रवेशतएवात्र रमणयोग्यतेति कश्चिन्मन्येतेत्यरुच्या पक्षान्तरमाहुः **यद्वेत्यादि** ॥१७॥

## प्रकाशः

वदन्तीत्याशयेनाहुः **पक्षान्तरेत्यादि**. अत्राभासार्थकथनेन तद्वैलक्षण्यं बोध्यते, तस्य नियमनायावश्यकत्वाद्, अत्र तदभावादिति. **इयमिति** अनावश्यकत्व-बोधिका. यथा नियमनार्थं तदावश्यकम्, एवं रमाया अपि भक्तत्वेन तदभि-लाषपूर्तिरप्यावश्यकीति तथा करणम्. न च क्लेशो, मुख्यरसपोषार्थत्वादि-त्युक्तमित्याशयेन दृष्टान्तार्थं व्युत्पादयन्ति **तथा हीत्यादि**. एवं व्याख्यान-योरनुपपत्तिं परिहृत्य मूलग्रन्थं स्फुटीकुर्वन्ति **तथा चेत्यादि**. **द्वितीय** इति लौकिकार्भकसम्बन्धी. **एवं सतीति**, उक्तरीत्यापि रमावेशे स्वीकृते सतीत्यर्थः.

## लेख

**स्वप्रतिबिम्बविभ्रम** इतिपदस्यार्थष्टिप्पण्यामावृत्तिकथनेनोक्तः— यथा बालो गृहादिप्रतिबिम्बे सत्यपि स्वप्रतिबिम्बे रमते, तथा भगवानपि लक्ष्मीसमक्षमपि

"सम्मुष्णन् नवनीतमन्तिकमणिस्तम्भे स्वबिम्बोद्गमं दृष्ट्वे"त्यादिवाक्यनिरूपित-मुग्धलीला वान्यथा निरूप्यते, पूर्णज्ञानोऽपि तद्रसस्वरूपस्य तथात्वात्. तथेहापि "रसो वै स" इति श्रुतेरिदं सर्वं रसमध्यपातित्वेन स्वरूपात्मकमेवेति तदुच्यत इति नानुपपत्तिः काचित्, शङ्कायाएवानुदयादिति भावः.) एतेन यथा प्रभुस्तद्भावो वा तथैता एतद्भावोऽपीति ज्ञापितं भवति तथा प्रतिबिम्बस्वभावात्. अत्र रमणं बहूनामप्येकदा भवति द्वयोश्च. अग्रे तु प्रत्येकपर्यवसानं वक्ष्यति ॥१७॥

एवं सर्वभावेन भगवद्धर्मावेशे तासां देहादिविस्मरणपूर्वकं महारसाभिनिवेशमाह **तदङ्गे**ति.

**तदङ्गसङ्गप्रमदाकुलेन्द्रियाः केशान् दुकूलं कुचपट्टिका वा ।**
**नाञ्जः प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्तमालाभरणाः कुरूद्वह ॥१८॥**

**तस्य** भगवतः **अङ्गसङ्गेन** यः **प्रकृष्टो मदो** देहादिविस्मारको भाव

---

**प्रकाशः**

(सुबोधिन्याम्) नन्वस्मिन्पक्षे आत्मारामत्वस्य कथं समर्थनमित्याकांक्षायामाहुः **एतेने**त्यादि. तथा च पूर्वोक्तश्रुत्या रसात्मकत्व-रसवत्त्वाभ्यां न स्वरूपभेदः. एवं ताभिरपि न भेदः, तासामपि रसस्वरूपान्तःपातित्वात्, तेजःस्थले किरणप्रवेशेनैव प्रतिबिम्बात्. अतोऽत्रापि दृष्टान्तेनैव पूर्वोक्तरीत्या तत्समर्थनमित्यर्थः. पूर्वत्र रमास्थापनम्, अत्र तु स्वस्थापनमिति विशेषः, अतो न किञ्चिदनुपपन्नम् ॥१७॥

**लेखः**

तत्तद्योग्यमेव रसमनुभावयत्यनुभवति चेत्यर्थः. प्रथमपक्षे प्रतिबिम्बाश्रया एताः अस्मिन् पक्षे वक्ष्यमाणपक्षे च प्रतिबिम्बरूपा इत्याशयेनाहुः **एतेन यथा प्रभुरि**ति. स्वसामर्थ्यादियोजनप्रकारो नानयोः [1]पक्षयोरिति ज्ञेयम्. **अत्र रमणमि**ति, **बहूनां** प्रमदाजनानामित्यर्थः. रमारमणसमाधानेन यत्र तत्राप्येवं, तत्रैतासां बहुत्वे किमाश्चर्यमिति भावः. नृत्यं प्रत्येकमुक्तं, रमणं समुदायेन. अग्रे तु रमणमपि प्रत्येकं वक्ष्यतीत्यर्थः ॥१७॥

**तदङ्गे**त्यस्याभासे, **भगवद्धर्मावेश** इति, स्वरूपानन्दस्य ऐश्वर्यादिधर्माणां चावेश इत्यर्थः. भगवतो धर्माणां चावेश इति समासः. **रसाभिनिवेशमि**ति,

१. नास्मिन् पक्षे इति जो. पाठः.



उत्पन्नः तेन **आकुलानीन्द्रियाणि** यासाम्. सर्वा इतिकर्तव्यतामूढा जाताः. ततः **केश**पाशं परिहित**दुकूलं कुचपट्टिकां वा** स्वयम**ञ्जसा** सामस्त्येन **प्रति** सम्मुखतया **वि**शेषेण **वोढुमलं न** जाताः पुनरल्पेनैव तथाविधा जाता इत्यत्र हेतुमाह **व्रजस्त्रिय** इति. श्रमोऽपि जात इत्याह **विस्रस्तमालाभरणा** इति, आकुलेन्द्रियत्वान्न विचारो लौकिकः, गोपिकात्वान्न पारमार्थिकः, [1]श्रमान्न दैहिकः; अत आद्यन्तमध्येषु तासु युक्ता भगवतैव धृताः न ताभिरित्यर्थः. यद्यप्यन्यप्रतीत्या ध्रियमाणा इव तथापि न स्वतो धारणम्. **कुरूद्वहे**ति सम्बोधनमभ्रमाय विश्वासार्थं च ॥१८॥

एवं समुदायलीलां निरूप्य तस्याः परिज्ञानं केषामपि न जातमिति वक्तुं देवस्त्रीणां चन्द्रस्य च विस्मयमाह **कृष्णे**ति.

**कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः ।**
[2]**कामार्दिताः शशाङ्कश्च सगणो विस्मितोऽभवत् ॥१९॥**

नहि कस्याश्चित् पतिः परमानन्दो भवति. नहि निरानन्देनानन्दो दातुं शक्यते, "एष ह्येवानन्दयाती"ति श्रुतेः 'एव'कारेणेतरनिषेधश्च. तत्रापि

---

**लेखः**

महारसाभिनिवेशनव्यापारजनितं फलमाहेत्यर्थः. व्याख्याने, **विशेषेण वोढुमि**ति विवोढुम्. 'वोढुमि'ति, वकारस्य छान्दसो लोपस्ततो यण्, व्योढुम्. **पुनरल्पेनैवे**ति. "गायन्त्यस्तं विजह्रिरे" इत्यत्र नृत्यादिविरामकथनेन तत्स्वभाव-प्राप्तमाकुलेन्द्रियत्वादिकमप्युक्तमेव. "कर्णोत्पलालके"त्यनेन पुनर्भावोद्बोधे "एवमि"ति श्लोकेन विहार उक्तः. अत्राल्पेनैव विहारेण पुनराकुलेन्द्रियत्वादिकं जातं तत्र व्रजस्त्रीत्वेन विशुद्धभाववत्त्वं हेतुरित्यर्थः. **लौकिक** इति, आदि-विचारो लौकिकः, परिधानीयाभावे लोकेभ्यस्त्रपासंभवात्. अन्तविचारः पारमार्थिकः, केशविश्लेषे परमार्थे दोषसम्भवात्. मध्यविचारो दैहिकः, कुच-पट्टिकाभावेऽवयवयोरन्यथाभावात्. अत्र हेतवः क्रमेण— इन्द्रियाणां रसोन्मुख-त्वात्, गोपिकात्वेन प्रमेयमार्गीयत्वात्, **श्रमाच्चे**ति. **गोपिकात्वादि**ति— **व्रज-स्त्रिय** इत्यस्यैवार्थोऽयम्. इदमेवोपसंहारव्याजेनाहुः **आद्यन्तमध्येष्वि**ति ॥१८॥

**कृष्णे**त्यस्याभासे **केषामपी**ति, गन्धर्वादीनां तु दर्शनमेव न, स्त्रीणां चन्द्रस्य च विस्मयः, अतः केषामपि न जातमित्यर्थः. व्याख्याने, **निरानन्देने**ति निर्गत आनन्द आनन्दत्वं यस्मात्तादृशेन. सच्चिदानन्दानां

१. श्रमाच्चेति टीकापाठः. २. अत्र स्वतन्त्रव्याख्यानं प्रथम परिशिष्टे.

**विशेषेण क्रीडा,** नहि जीवो विशेषक्रीडां जानाति. **खेचराणां स्त्रिय** इति तासां सर्वदर्शनार्थं भगवद्दत्तो वरो निरूपितः; स्त्रीणां च दर्शनं न दोषाय. तासां मोह एवोत्पन्नो न तु परिज्ञानं रसो वा. लौकिकोऽपि चन्द्रो दृष्टवान्, सोमात्मकत्वाद् देहस्य, "सोमः प्रथम" इति श्रुतेश्च. साधारण्यश्च स्त्रियः. तथापि तस्य दर्शनं तस्यैव हितकारि न भवतीति निरूपयितुमाह **शशाङ्क**

---

## लेखः

सत्ताज्ञानानन्दा धर्मा इत्यानन्दस्यानन्दत्वरूपत्वा**दानन्द**-पदमेवोक्तम्. तथा चानन्दव्यतिरिक्तेनेत्यर्थः. आनन्दस्यैवानन्ददातृत्वे प्रमाणमाहुः **एष ह्येवे**ति, आनन्द एवेत्यर्थः. **तत्रापी**ति क्रीडायामपीत्यर्थः. **वीक्ष्ये**ति गौणक्रियां विवृण्वन्ति **चन्द्रो दृष्टवानि**ति. दोषाभावार्थमाहुः **सोमात्मकत्वादि**ति, अलौकिकचन्द्रस्य भगवद्भावात्मकत्वमिव, एतस्य स्वामिनीभावात्मकत्वम्. अतः स्वामिनीदेहस्य सोम आत्मनियतस्य तादृशत्वम्. अत एतस्याध्यात्मिकरूपेण देहएव विद्यमानत्वात्तद्दर्शने न दोष इति भावः. "लोकवत्तु लीलाकैवल्यमि"तिन्यायानुसारार्थमाहुः **सोम** इति, "सोमः प्रथमो विविदे" इति श्रुतेस्तस्य पूर्वमपि भोक्तृत्वाददोष इत्यर्थः. एतस्य स्वामिनीभावरूपत्वाददोषः. **साधारण्यश्चे**ति, खेचरस्त्रियोऽपि दृष्टवत्य इत्यर्थः. **तथापी**ति दर्शनेऽपीत्यर्थः.

## योजना

**कृष्णविक्रीडितमि**त्यस्य विवृतौ **लौकिकोऽपि चन्द्रो दृष्टवान् सोमात्मकत्वाद् देहस्ये**ति, **शशाङ्क**पदेन लौकिकश्चन्द्रएवायातीति तेन चन्द्रेण दर्शनं कृतमित्यर्थः. ननु रासक्रीडायां समागतानां रमणीनां दर्शने सोमस्य दोष उत्पद्यते, तत्कथं दृष्टवानित्याशङ्क्य दोषाभावे कारणमाहुः **सोमात्मकत्वा-द्देहस्ये**ति, "अग्निषोमात्मकं जगदि"ति श्रुतिसम्मतत्वाद्देहस्य सोमात्मकत्वेन स्वाभिन्नत्वात्तद्दर्शनं न दोषजनकमित्यर्थः. ननु व्रजसुन्दरीणां देहस्यालौकिकत्वात्कथं सोमात्मकत्वमित्याशङ्क्य समादधते **साधारण्यश्च स्त्रिय** इति. **च**कारो 'अपि'शब्दार्थः, गोपिकाभ्यो भिन्नाः **साधारण्यो**ऽपि **स्त्रियः** रासे समागता इत्यर्थः. इह भगवदेकभोग्याः कृष्णवध्वो व्रजरमण्यएव रासे समागताः रासक्रीडारूपपूर्णफलसिद्ध्यर्थम्. रासदर्शनार्थं तु बह्व्योऽङ्गनाः साधारण्योऽपि समागताः. अतएव ब्रह्मवैवर्ते रासक्रीडायां बह्वीनां गोपिकेतरवधूटीनां समागमनं निरूपितमतः साधारणीनां गोपवधूनां दर्शनं चन्द्रस्य न दोषावहं, तासां देहस्य लौकिकत्वेन सोमात्मकत्वात्. **निसर्गात्सुखमितिपक्ष** इति.



इति. स हि कलङ्की, आनन्दमयोऽपि. **सगणो** नक्षत्रसहितः. तेनोद्दीपनेऽपि न तस्यान्यासु चित्तसम्भवः. **च**कारात् सोऽपि मुमुहे. यथा पुनरेताः मोहनानन्तरं पुनःपुनर्दर्शने उद्बुद्धकामा जाताः, "गत्वास्माभिरपि कामरूपतया क्रीडा कर्तव्ये"ति **कामार्दिता** जाताः, तथा चन्द्रोऽपि भगवति निवेशनार्थं यत्नं कृतवान् अतः कामार्दितो जातः. अनेनाग्रे निसर्गात् सुखमिति पक्षे

---

## टिप्पणी

**कामार्दिता शशाङ्कश्चे**त्यत्र, एकस्मिन् वाक्य उक्तयावद्धर्मविशिष्टेन येन समं यस्योक्तस्यानुक्तस्योभयोर्वा समुच्चयस्तस्य तयोर्वा तावद्धर्मवत्त्वमावश्यकमिति चन्द्रेऽपि कामार्दितत्वं **च**कारेण बोध्यते. तत्रैतस्मिन्वाक्येऽनुक्तोऽकलङ्कश्चन्द्रोऽप्यनेन समुच्चीयत इत्याहुः **आनन्दमयोऽपी**ति. अग्रे लौकिकेन्दोर्निरूपणम्. उक्तसमुच्चितमर्थमाहुः **चकारादि**त्यारभ्य **तथा चन्द्रोऽपी**त्यन्तेन. **भगवति निवेशनार्थमि**त्यारभ्य **जात** इत्यन्तेनालौकिकस्येन्दोः कथनम्. अन्यथा **तथा चन्द्रोऽपी**त्यतिदेशेनैव कामार्दितत्वं प्राप्तमेवेति पुनर्नोक्तं स्यात्. अत्रैवं निरूपणे नियामकमाहुः **अनेनाग्र** इत्यादिना.

## लेखः

**तस्यैवे**ति, भगवतो दोषाभावेऽपि तस्यैव तथे**त्येव**कारः. **तस्य हितं** स्वामिनीप्राधान्येन रमणं, तदधुना अलौकिकप्रकारकरमणेन सम्पन्नम्. आतिदेशिकलौकिकरमणे तु नायिकाचरणप्रणिपातादिकं वक्ष्यत्येवेति भावः. **स हि कलङ्की**ति, "आनन्दादयः प्रधानस्ये"तिन्यायेन भगवतः सकाशादानन्दमभिकाङ्क्षते स्वामिनीभावरूपत्वात्, न तु स्वतएव पूर्ण इत्यर्थः. अतः पूर्वोक्तस्वहिताकाङ्क्षा स्थितैवेति भावः. **आनन्दमयोऽपी**ति दृष्टवानिति शेषः. लौकिकं चन्द्रमाहुः **सगण** इति. **चकारात् सोऽपी**ति लौकिक इत्यर्थः. खेचरस्त्रीषु लौकिकचन्द्रे च **कामार्दित**पदार्थस्तुल्य एवेत्याहुः **यथे**ति. चन्द्रस्य तद्भावरूपत्वात् तासामिवाभिलाष उचित इति भावः. अलौकिकचन्द्रे कामार्दितत्वं भिन्नमाहुः **भगवती**ति, पूर्वोक्तयोर्भगवद्विषयक-कामार्दितत्वम्,

## योजना

"सिषेवात्मन्यवरुद्धसौरत" इति वक्ष्यमाणवाक्योक्तपक्षे त्वलौकिक्येव रीतिः, न तु लोकानुसारिणी. **निसर्गात्सुखमिति** लोकानुसारिणि **पक्षे** चन्द्रस्य भगवद्रेतोरूपत्वाच्चन्द्रस्य भगवति प्रवेशे निसर्गपक्षे **उपपत्तिरुक्ते**त्यर्थः ॥१९॥

उपपत्तिरुक्ता— अस्यैव चन्द्रस्य अंशास्ततो निवर्तिष्यन्त इति. अन्यथा "सहस्रवणान्मुक्तिरि"[1]त्येतत्सूत्रं विरुध्येत, सहस्रवणाभावात्. किञ्च, **सगणः** स्वस्त्रीसहितोऽपि **विस्मितो** जातः, विस्मयरस एवोत्पन्नो नान्यो रस इति ॥१९॥

एवमाधिभौतिकानामाधिदैविकस्य च भगवदुत्पादितरसाभिनिवेशमुक्त्वा "नन्दगोपसुतं देवि पतिं मे कुर्वि"ति प्रत्येकप्रार्थनया व्रतं कृतमिति प्रत्येकं रेम इत्याह **कृत्वे**ति.

**कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः ।**
**रेमे स भगवाँस्ताभिरात्मारामोऽपि लीलया ॥२०॥**

**गोप**जातीया **योषितो यावत्यस्तावन्तमात्मानं कृत्वा** तत्र तत्र मायोद्धाटनेन तथा तथा प्रकटो भवति— एतन्महासौरतम्. एवं करणे

**टिप्पणी**

अत्रेदमाकूतम्— "एवं परिष्वङ्गे"त्यादिना रसशास्त्रोक्तरीत्या रमणोक्त्या सहस्रवणादिकमपि प्राप्तमेव भवति, तस्य तावद्रूपत्वात्, परन्त्वखण्डरूपे भगवति स्वबुद्ध्या तन्नोपपादयितुं शक्यत इति गोप्यत्वाच्च प्रकटं न वक्तुं शक्यमित्यनेन प्रकारेण शुकदेवैर्ज्ञापितमित्याचार्यैस्तथाऽगादि. सोमस्य रेतोरूपत्वं श्रुतिसिद्धमिति नानुपपत्तिः काचिदंशनिवर्तन इति दिक्. ननु स्वरूपस्य रसात्मकत्वेनैव सर्वमुपपत्स्यत इति किमेतत्प्रवेशेनेति चेत्, मैवम्, अस्य रेतोरूपत्वात्तस्य चाध्यात्मिकरूपत्वेन स्वरूपान्तर्गतत्वात्तेन रूपेण प्रवेशस्यावश्यकत्वात्. न च तस्य तत्रैव स्थितेर्नेदं साधीय इति वाच्यं, प्रकारबोधनपरत्वादस्य लीलायाः. अन्यथा तमिस्रायामियं लीला न स्यादिति ॥१९॥

**लेखः**

एतस्य कामिनीविषयक-कामार्दितत्वमिति भेदः. **उपपत्तिरि**ति, निसर्गे चन्द्रांशनिवर्तनरूपोपपत्तिरित्यर्थः. **अन्यथे**ति निसर्गाभावे इत्यर्थः ॥१९॥

**आधिभौतिकाना**मिति, स्वामिनीदेहाधिष्ठितानां चन्द्रात्मकभावानामित्यर्थः. **आधिदैविकस्ये**ति, अलौकिकचन्द्रस्य भगवद्भावरूपस्येत्यर्थः. **भगवदुत्पादिते**ति, भगवतोत्पादितो यः कामरसः तत्राभिनिवेशस्तदर्दितत्वमित्यर्थः. तथा चोभयोरुदितभावत्वमग्रिमश्लोकोक्तरमणे हेतुरिति भावः.

१. अत्र "सहस्रदर्शनाद्" इति पाठस्तु प्रामादिक एवेति संशोधितः (सम्पा.).



सामर्थ्यं यतः **स भगवानि**ति, **स** इति तदर्थमेवावतीर्णः. अत्र तासां व्रतार्थं **ताभिः** सहैव **रेमे,** न त्वात्मारामता पूर्ववत्. इममर्थमाह **आत्मारामोऽपी**ति. न त्वात्मारामएव चन्द्रप्रवेशाद् रमणं सम्भवति. अस्यामपि दशायामात्मारामत्वमेव. "अधिकं तत्रानुप्रविष्टं न तु तद्धानिरि"ति. तत्रापि आत्मरमण एव मुख्यतेत्याह **लीलये**ति. यथा महानपि लीलया विसदृशं करोति, स्वयं पदातिरिव मृगयायां गच्छति, यथा अन्या अपि अवतारलीलाः, तथैतामपि कृतवानित्यर्थः ॥२०॥

ततस्तासां सुरतान्तो जात इत्याह **तासा**मिति.

**तासामतिविहारेण श्रान्तानां वदनानि सः ।**
**प्रामृजत् करुणः प्रेम्णा शन्तमेनाङ्ग पाणिना ॥२१॥**

**अतिविहारेणा**नेकबन्धैः सम्यक् श्रान्ता जाताः. ततोऽग्रिमलीलार्थं **तासां वदनानि** स्वहस्तेन **प्रामृजत्.** यतः **स** कृष्णः तदर्थमेवावतीर्णः. सर्वत्रैव तथाविधं जातमिति ज्ञापयितुं बहुवचनम्. तथा करणे हेतुः **करुण** इति, करुणायुक्तः. सा करुणा उदासीना न भवतीत्याह **प्रेम्णे**ति. मार्जने क्लेश

**टिप्पणी**

**आत्मारामोऽपि लीलये**त्यत्र **चन्द्रप्रवेशादि**ति, रेतःपोषस्य भावपोषकत्वादिति भावः. **अस्यामपि दशाया**मिति, प्रमाणसिद्धत्वेनोभयोरत्र विरोधाभावादिति भावः. एतद्विद्वन्मण्डने प्रपञ्चितमस्माभिः. वस्तुतस्तु लीला स्वरूपात्मिकेति तन्मध्यपातिन्योऽपि तथैवेत्यात्मरमणमेवात्रापीत्याशयेनाहुः **तत्रापि आत्मरमणएवे**ति. अतएवाग्रे वक्ष्यति "गोपीनां तत्पतीनां चे"ति श्लोकम्. **लीला**पदध्वनितमर्थमाहुः **यथा महानपी**त्यादिना. ईश्वरोऽपि सन्नायिकाप्राधान्येन स्वस्य गौणभावेन रेमे, तस्य रसस्य तथात्वादित्यर्थः ॥२०॥

**लेखः**

**कृत्वे**त्यत्र, कुमारिकासु गोपसम्बन्धि-योषित्त्वं नास्तीत्यत आहुः **गोपजातीया** इति. तथा च गोपरूपा योषित इत्यर्थः. **ताभिः सहैवे**ति, पूर्वाध्याये तु गोपीरेवारमयत् स्वयं त्वात्मारामएवेत्युक्तम्, अत्र ताभिः सहैव न तु भिन्नस्थित्येत्येवकारः. अधुना स्वप्राधान्येन स्वेच्छया रमणे हेतुमाहुः **चन्द्रप्रवेशादि**ति ॥२०॥

एव निवर्तत इति ज्ञापयितुं **शन्तमेने**त्युक्तम्. **अङ्गे**ति सम्बोधनमप्रतारणाय. एवं तासां दुःखनिवारणपूर्वकं परमानन्दं स्थापितवान् ॥२१॥

ततोऽतिमुदितानां कृत्यमाह **गोप्य** इति.

**गोप्यः स्फुरत्पुरटकुण्डलकुन्तलत्विड्-गण्डश्रिया सुधितहासनिरीक्षणेन ।**
**मानं दधत्य ऋषभस्य जगुः कृतानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः ॥२२॥**

**गोप्यो मानं दधत्यः** तत्**कृतानि जगुः**. गाने हि रजोगुणाभिनिवेशो हेतुः. तदर्थं सहजमेकं भगवत्कृतं च हेतुद्वयमाह. तत्र प्रथमं सहजं निरूपयति– **स्फुरद्यत् पुरटं** सुवर्णं दाहोत्तीर्णमुज्ज्वलीकृतं च तस्य ये **कुण्डले कुन्तलाश्च** तेषां **त्विषा** सहिता या **गण्डश्रीः**, उज्ज्वला गण्डश्रीः, पीता वा;

---

**टिप्पणी**

**गोप्यः स्फुरदि**त्यत्र **गाने हीति**, एवमत्र ज्ञेयं– पूर्वश्लोकेन हि स्वाधीनभर्तृकात्वमुक्तम्, अस्मिन्नपि कुण्डलकुन्तलगण्डशोभा प्रियकरकमल-सम्पादितैव. अतएवास्या मानधारणे हेतुत्वम्. स्वनिष्ठत्वेन सहजत्वमस्य. एवं सत्युत्साहविशेषो यो गानजनकः स **रजोगुण**शब्देनोच्यते. तथा च पूर्वं मानेन दुःखमभूदिति तादृशत्वाभावाय गुणगानमिति. अत्रैव **मूलभूतगुणे**ति,

**प्रकाशः**

**प्रामृजदि**त्यत्र **क्लेशएव निवर्तते** इति, **क्लेशो निवर्ततएवे**त्येवं योजना ॥२१॥

**लेखः**

**तासामि**त्यत्र **क्लेशएवे**ति. लोके मार्जनेन **क्लेशएव निवर्तते** न त्वधिकसुखप्राप्ति**रिति** हेतोरत्र द्वयं स्थापयितुं **शन्तम**पदमित्यर्थः. इदमेवोपसंहारव्याजेनाहुः **एवमि**ति ॥२१॥

**गोप्य** इत्यत्र, **सहजमेकमि**ति, एकं सहजमेकं भगवत्कृतमेवं **हेतुद्वयमि**त्यर्थः. **उज्ज्वला नीला चेतर** इति, कुण्डलश्रीरुज्ज्वला तत्र हीरका-दिकान्त्येति भावः, कुन्तलश्रीर्नीलेत्यर्थः. कान्तीनां भगवच्चातुर्यकार्यत्वमुप-

**योजना**

**गोप्यः स्फुरत्पुरटकुण्डले**त्यस्य विवृतौ **उज्ज्वला गण्डश्रीः पीता वे**ति, व्रजसीमन्तिनीषु काश्चित्तडिद्गौर्यस्तासां गण्डश्रीः उज्ज्वला, काश्चिच्चम्पककोर-कवत्पीतास्तासां गण्डश्रीः पीतेत्यर्थः. **उज्ज्वला नीला चेतरे** इति, कुण्डलश्री-



उज्ज्वला नीला चेतरे. एवं कान्तित्रयं मूलभूतगुणकार्यरूपम्. तेनासां सर्वोत्कर्षयोग्यता. **सुधितं** सुधामिव प्राप्तं **यद्धासपूर्वकं निरीक्षणम्.** अत्राप्यन्तःस्थितो रागः निरीक्षणं हासश्चेति त्रितयमुक्तम्. भगवदीयमेतत्. अत उभाभ्यां **सन्मान**नमभि**मानं** वा **दधत्यः** स्वहृदयकृतविपरीतबुद्ध्या जातदोषनिराकरणार्थं तत्**कृतानि जगुः**. तेषां न केवलं पापनिवर्तकत्वं किन्तु पुण्यरूपत्वमपीत्याह **पुण्यानी**ति. भगवता **कृतानि** पापनिवर्तकानि पुण्यजनकानि च, अतस्तासां दोषाभावो अग्रिमलीलायां पुण्योपचयश्चोक्तः. पूर्वक्लेश-विस्मरणार्थमानन्दाविर्भावमाह **तस्य** भगवतः **कररुहा** नखाः, तेषां **स्पर्शेन** जातपीडया स्मृतसम्भोगाः **प्रमुदिताः** जाताः. अन्तःपूर्णानन्दा गानेनापि जाता इति अन्ते विशेषणम् ॥२२॥

ततस्ताभिस्तुल्याभिर्भगवान् जलक्रीडां कृतवानित्याह **ताभिर्युत** इति.

---

**टिप्पणी**

भगवच्चातुर्यकार्यमित्यर्थः. गानजः पुष्टो भावविशेषोऽलौकिकेष्टसाधकत्वेन **पुण्य**पदेनोच्यते ॥२२॥

**ताभिर्युत** इत्यस्याभासे **तुल्याभिरि**ति, निर्दोषपूर्णगुणत्वेन भावैरानन्दा-त्मकत्वेन च तुल्याभिरित्यर्थः. अतएव प्रतिषेकः सम्पत्स्यते. रमणं जलस्थल-

**लेखः**

पादयन्ति **तेनासामि**ति, **आसां** कान्तीनाम् **सर्वोत्कर्षे** मानसम्पादने **योग्यता** मानधारणहेतुत्वमित्यर्थः. **विपरीतबुद्ध्ये**ति, सर्वत आधिक्यज्ञानेन जातमान-निवृत्त्यर्थमित्यर्थः. **पापनिवर्तकत्वमि**ति अभिमाननिवर्तकत्वमित्यर्थः. [१]**पुण्यरूपत्वमि**ति टिप्पण्युक्तपुण्यजनकत्वमित्यर्थः.[१] मूले **पुण्यानि** पुण्यजनकानीत्यर्थः. **पूर्वक्लेशे**ति, **शन्तम**पदसूचितसुखजनने क्लेशनिवृत्तिरुक्ता न तु विस्मरणम्, अनेनानन्देन विस्मृतिरुच्यते इत्यर्थः ॥२२॥

**योजना**

रुज्ज्वला कुन्तलश्रीर्नीलेत्यर्थः. **मूलभूतगुणकार्यमि**ति, सर्वस्य कार्यमात्रस्य मूलभूता मुख्यकारणभूता ये भगवद्गुणा भगवच्चातुर्यादयस्तेषां कार्यभूतमित्यर्थः. इदं कान्तित्रयं भगवता स्वचातुर्येणैव निर्मितं, नत्वस्यान्यः कोऽपि कर्तेति भावः ॥२२॥

---

१. इयं पंक्तिः जो. पाठे अधिका.

**ताभिर्युतः श्रममपोहितुमङ्गसङ्ग-**
**घृष्टस्रजः स्वकुचकुङ्कुमरञ्जितायाः ।**
**गन्धर्वपालिभिरनुद्रुत आविशद्वाः**
**श्रान्तो गजीभिरिभराडिव भिन्नसेतुः ॥२३॥**

**ताभिः** सर्वाभिरेव **युतः** महारात्रसमये यमुनायां जलक्रीडार्थं प्रविष्टः. तत्र प्रयोजनं **श्रममपोहितुमि**ति, तासां सर्वाङ्गश्रमं जलक्रीडयैव दूरीकुर्वन्. भगवतस्ताभिः सह गमने जायमानां शोभां वर्णयति **स्रजः गन्धर्वपालिभिरनुद्रुत** इति. यमुनाया वा विशेषणानि. गन्धर्वाणां रक्षकाः **गन्धर्वपाः** गन्धर्वोत्तमाः, ते च ते **अलयश्च**, तै**रनुद्रुतः** सङ्गे शीघ्रं गतो **वाः आविशत्.** आमोदस्य निवारणार्थं च तथाकरणम्. सम्भोगेन श्रमोदके पद्मिनीनां कमलरूपो गन्धो भवति. तदुपरोधेन च **द्रुत**पदविन्यास इत्यनुद्रवणम्. ते च भ्रमरा भगवदीया एवेत्याह– **अङ्गयोः सङ्गेन घृष्टा** या **स्रक्** तस्यास्ते. यस्यां वा स्रक् तादृशी. **स्वा** चासौ **कुचकुङ्कुमरञ्जिता** च. भगवतएव माला. कालिन्दी च कुचकुङ्कुमै रञ्जिता. तत्र देहामोदः पुष्पामोदः कुङ्कुमामोदश्चेति स्वकीयत्वेनासाधारण्यं च. आधिदैविकास्ते भ्रमरास्तद्गन्धभोक्तार इति विशेषणं **गन्धर्वपे**ति. **श्रान्त इभराडिवे**ति अविचारे हेतुः. **श्रान्त** इति विशेषणं लीलया

## टिप्पणी

भेदेन द्विविधम्. तच्च पूर्णरात्रिसाध्यम्. तत्रैकस्य पूर्तावितरस्यारम्भ इति **महारात्रसमय** इत्युक्तम् ॥२३॥

## लेखः

**ताभिर्युत** इत्यत्र, **सर्वाङ्गश्रममि**ति [१]अधुना क्रीडायां पुनः प्राप्तमिति शेषः[१]. क्लेशनिवर्तनेऽपि क्वचित् क्वचित् स्थितं श्रमोदकं **दूरीकुर्वन्** मार्जयन्निवार्थः. **जलक्रीडयैवे**ति न तु पूर्ववन्मार्जनेने**त्येव**कारः. **आमोदस्ये**ति, सम्भोगसूचकस्य प्रातः स्थापयितुमशक्यत्वादिति भावः. **च**काराच्छ्रमनिवृत्त्यर्थं **तथाकरणं** जलक्रीडाकरणमित्यर्थः. आमोदस्य भोगसूचकत्वमाहुः **सम्भोगेने**ति. **तदुपरोधेन चे**ति, भ्रमरोपरोधेन **च**कारात् स्वामिन्युपरोधेनेत्यर्थः. **स्व**पदस्य भगवद्वाचकत्वात् षष्ठीसमासानुपपत्त्या कर्मधारयमाहुः **स्वा चासावि**ति. **तत्रे**ति मालायामित्यर्थः. **स्रज** इत्यन्तस्य यमुनाविशेषणत्वपक्षेऽप्यलीनां

१. अधुनेत्यारभ्य शेष इत्यन्तोंऽशो जो. पाठे अधिकः.



गमनार्थम्. प्रत्येकसम्भोगावधि भगवतोऽन्यो भावो निरूपित इति तदपगमात् श्रमलीलाप्याविष्कृता. **गजीभिरि**त्यन्यश्रमो निवारितः. **सेतवो** बध्यन्ते जलरक्षार्थं, ते सर्वे **भिन्नाः** तादृशगजेन भवन्ति. भगवतापि ब्रह्ममर्यादा आत्मारामत्वरूपा जीवानां च मर्यादा तथा सति निवृत्ता कामरूपस्पर्शात् परदाराणामभिमर्षणाच्च. [१]पूर्वं तासां भगवत्स्पर्शएव स्थितो, न तु भगवता

## लेखः

मालासम्बन्धित्वबोधनाय **गन्धर्वपे**ति विशेषणमित्याहुः **आधिदैविकास्ते** इति. **आधिदैविका** अन्तरङ्गलीलास्था**स्तद्गन्धभोक्तारः** सम्भोगजनित-वनमाला-दिव्यगन्धभोक्तार इत्यर्थः. **गन्धर्वपा** गायकश्रेष्ठा अन्तरङ्गलीलासमयेऽपि स्थित्वा गानं कर्तुं योग्या इत्यर्थः. **अन्यो भाव** इति उपरिचन्द्रस्थापनरूपो भाव इत्यर्थः. **तदपगमात्.** चन्द्रांशनिवर्तनादित्यर्थः. **कामरूपस्पर्शादि**ति, **कामात्मकं** पुरुषोत्तमस्वरूपम् "अत्रैव लोके प्रकटमि"ति कारिकोक्तः कामस्तेन **स्पर्श**स्तासां भोग इति यावत्, तेनात्मारामत्वं निवृत्तं, परदारास्पर्शाज्जीवमर्यादा, नम्रतया दास्यकरणरूपा, निवृत्तेत्यर्थः. स्वीयानां तु तावानधिकारो दत्तएव भवतीति **परे**त्युक्तम्. वस्तुतः परत्वस्य दूषितत्वेऽपि रसार्थं परकीयात्वं स्थापयित्वैव लीलाकरणादिति भावः. ननु रमणं तु पूर्वमप्युक्तमेवेत्याशङ्क्य पूर्वाध्यायैतदध्यायरमणयोः विशेषमाहुः **पूर्वमि**ति, पूर्वाध्याये तत्कर्तृकएव भगवत्स्पर्शः, "इति विक्लवितमि"त्यस्य टिप्पण्यां "सदयं रेमे" इत्यन्वये[२] तदनुरोधेनैव रमणनिरूपणात्. तत्र हेतुः

## योजना

**ताभिर्युत** इत्यस्य विवृतौ **भगवतापि ब्रह्ममर्यादा आत्मारामत्वरूपे**ति, **ब्रह्ममर्यादा** अविकृतत्वरूपमयदित्यर्थः. शृङ्गाररसात्मकानेकविकाराणां भगवत्याविर्भावाद् **ब्रह्ममर्यादा निवृत्ता** तिरोहितेत्यर्थः. **आत्मारामत्वरूपे**ति. यावद्रसेऽत्यन्तपुष्टत्वं न जातं तावद्भगवता व्रजवामलोचनाः स्वाभिन्नत्वेनैव ज्ञाताः, ताभिः क्रीडा च कृतेति आत्मारामत्वमेव स्थितम्. यदा पुनरत्यन्तपोषः शृङ्गाररसस्याभूत् तदा ज्ञानांशस्य तिरोभावात् केवलानन्दांशस्यैवाविर्भावादात्मत्वस्फूर्तिरपि व्रजसुन्दरीषु नाभूत् किन्तु नायिकाभावस्फूर्तिरिवेत्यात्मारामत्वमर्यादापि **निवृत्ता** तिरोहितेत्यर्थः. **देशकालमर्यादा चे**ति, **देश**शब्देन

१. अत्र स्वतन्त्रव्याख्यानं प्रथम परिशिष्टे. २. अन्वयेन इति जो. पाठः.

ताः स्पृष्टा इति, कामाभावात्. देशकालमर्यादा च भग्ना. अतो हस्तिश्रेष्ठ

**प्रकाशः**

**सोम्भसीत्यत्र, पूर्वं तासामित्यादि**, अत्र श्रीहरिरायाः– अयं भावो– अध्यायचतुष्टयलीलायां यद्यपि भगवत्स्पर्शोऽस्ति, तथा"प्यात्मारामोऽप्यरीरमत्" "रेमे तया चात्मरत आत्मारामोऽपि" "तासामाविरभूत्" "काचित्कराम्बुजमि"त्यादिवाक्यैस्तासामिच्छयैव भगवता रमणं कृतं, न स्वार्थं स्वयावत्सामर्थ्यप्रकटनेन. अतएव "त्रैलोक्यलक्ष्म्येकपदमि"ति तत्र न निरूपितं किन्त्वेतल्लीलोपक्रम एव निरूपितम्. अतएवाचार्यैरेतदध्यायारम्भे "स्वानन्दार्थमितीर्यत" इत्युक्तम्. तथा च पूर्वाध्यायेषु रमणसत्त्वेऽपि श्रमलीला नाविरभूत्. इह तु स्वेच्छया सर्वं कृतमिति लौकिकसजातीयकामभावः सुरतान्तश्च जातः. तथा च लौकिकसरूपभावे जाते यथात्मारामत्वादिमर्यादा भग्ना तथा देशकालमर्यादापि भग्ना; देशो रसानुभवदेशः, कालो रसावष्टम्भकालः. अतएव तथाभूतः सन् जलक्रीडार्थं जले प्रविष्ट इत्यर्थ इति.

मम तु प्रतिभाति– गजदृष्टान्तभिन्नसेतुत्वयोरितः पूर्वलीलायामनुक्तत्वात्तत्रात्मारामत्व-भक्तविक्लवयोरनुसन्धानपूर्वकमेव तत्करणम्. अव्यवहितपूर्वायां तु दृष्टान्तविशेषणाभ्यां तदभावो बोध्यते. ततएव लोकतौल्यप्राप्त्या राज्ञोऽपि धर्मसेतुभङ्गसन्देहादत्र प्रश्नः. वस्तुतस्त्वत्र दृष्टान्तेन पूर्वं 'लीलये'ति प्रयोगाच्च ब्रह्मधर्मादिभञ्जनेऽप्यायासाभावो बोध्यते,

**लेखः**

**कामाभावादिति**, कामो न विद्यते इति तत्र निरूपणात्. अध्यायकारिकायामत्र तु कामनिरूपणाद्भगवता यथेच्छं भोग इति विशेष इत्यर्थः. **देशे**ति, तत्तदवयवे तथा तथा चुम्बनदंशादिना भोग इति रसानुभवदेशमर्यादा. प्रतिपदादिषु तथा तथा बन्धादिकं कर्तव्यमिति रूपा "पद्मिनी तुर्ययामे" इति रूपा च कालमर्यादेत्यर्थः. **च**कारात् पूर्वोक्ता ब्रह्ममर्यादापि. **आविशदित्याङ्**ोऽर्थमाहुः **जलदेवतां दूरीकृत्ये**ति ॥२३॥

**योजना**

स्वामिनीनामवयवा. रसशास्त्रे सर्वत्र तत्र तत्र स्पर्शादयो वर्णिताः, **तन्मर्यादा** निवर्तिता, यथेच्छं स्पर्शादिविधानात्. अस्मिन् प्रहरे एवम् इयं नायिका तोषणीयेति **कालमर्यादा**पि दूरीकृता, यथेच्छं क्रीडायाः कृतत्वादित्यर्थः ॥२३॥



इव जलक्रीडार्थं जलदेवतां दूरीकृत्य स्वयं तत्र प्रविष्ट इत्यर्थः ॥२३॥

तत्र जलक्रीडां च कृतवानित्याह **स** इति.

**सोऽम्भस्यलं युवतिभिः परिषिच्यमानः**
**प्रेम्णेक्षितः प्रहसतीभिरितस्ततोऽङ्ग ।**
**वैमानिकैः कुसुमवर्षिभिरीड्यमानो**
**रेमे स्वयं स्वरतिरात्तगजेन्द्रलीलः ॥२४॥**

**स** पूर्वोक्तः स्त्रीसहितो **अम्भसि अलं युवतिभिः परिषिच्यमानो** जातः, ततः **प्रेम्णा ईक्षितश्च. प्रहसतीभिः** कौतुकाभिनिविष्टाभिः **इतस्ततः सिच्यमानो**, यदभिमुखमेव व्रजति तयैव सह **रेमे** इति. एवं सर्वाभिः. यथा स्वयं माहात्म्यज्ञानपूर्वकं निर्भरस्नेहेन निर्दोषभावेन वदति शुकः तथैव राजापि शृणोतीति ज्ञात्वा स्नेहेन स्वमध्यपातित्वं सूचयन् सम्बोधयति **अङ्गे**ति, अतएव तुभ्यमिमां लीलां वदामीति भावः. ननु देवैः कथं न

**टिप्पणी**

**वैमानिकैरि**त्यस्याभासः, **ननु देवैरि**ति, अविचारमत्यर्थं बहुभिरेकदा कृतः परिषेको लोके व्याकुलतासम्पादको दृष्ट इत्यत्रापि तथा सम्भावनयान्तरङ्गभक्तैः स्वामिनीषु शनैः परिषेकः कार्यो नैवमिति विज्ञप्तिः कथं न कृतेत्यर्थः. अन्यस्य भक्तस्यापि तदा दर्शनं दुर्लभं, परन्तु पूर्वं "विमानशतसंकुलमि"त्युक्तमिति तत्स्थितानां दर्शनं सम्भाव्यते. तेषां तु प्रभुलीलोपयोगिमण्डपस्थितिलक्षण-सम्बन्धेनैव जनितानन्देन भगवदिच्छया पुष्पवृष्टिस्तुतिरसाभिनिवेशएव भवति, न तु दर्शनमपीति भावः. यद्यपि दर्शनेऽपि तैर्न

**प्रकाशः**

अक्लिष्टकर्मत्वाय. अतएव भङ्गेऽप्यभङ्गश्च. ततश्च निरङ्कुशमात्मतन्त्रत्वं समर्थ्यते, अन्यथा स्वधर्माधीनस्वातन्त्र्यं भज्येत. देशकालाभ्यां रसस्यानुभवेऽवष्टम्भे च तदधीनतायां ब्रह्मरूपत्वं तस्य भज्येत. अतस्तदुभयनिवृत्त्यर्थं[1] देशकालमर्यादाभङ्गः. तेन मर्यादान्तरभङ्गमाहुः **अत** इत्यादि ॥२३॥

**लेखः**

**क्रीडां चे**ति प्रवेशमादाय **च**कारः.

१. अतोऽस्य तदुभयनिवृत्त्यर्थम् इति मुं. वि. पाठः.

निषिध्यते तत्राह **कुसुमवर्षिभिर्वैमानिकैरीड्यमान** इति, सर्वे देवा अभिनन्दनमेव कुर्वन्ति न तु निवारणमिति, अन्यथा लोके कामरसो न व्यक्तो भवेदिति. **युवत्य** इत्यविचारे. परिषेके वीररसो भवत्विति **प्रेम्णैव ईक्षितः. स्वयमि**ति पदेन बलात्कारेणापि तथेति सूच्यते. तदापि **स्वस्मिन्नेव. रतिर्यस्य** परं स्वीकृता **गजेन्द्रलीला** येन. यथायथा जलेनोक्षणं तथातथा सुखमिति गजदृष्टान्तः. महासौरतं च ॥२४॥

ततः पुष्पावचयक्रीडामाह.

**ततश्च कृष्णोपवने जलस्थल-प्रसूनगन्धानिलजुष्टदिक्तटे ।**
**चचार भृङ्गप्रमदागणावृतो यथा मदच्युद् द्विरदः करेणुभिः ॥२५॥**

**तत** इति, जलक्रीडानन्तरं **कृष्णायाः** यमुनाया **उपवने जलस्थलप्रसूनानां**

**टिप्पणी**

किञ्चिद्वक्तुं शक्यं, भगवदतिरिक्तस्यैतासु वक्तुमनधिकारात्, तथापि यदन्यत्र दुःखदं दृष्टं तदेताभिः कृतं प्रभोरतिसुखदमिति ज्ञापयितुमाचार्यैराभासस्तथोक्तः. अत **एवात्तगजेन्द्रलील** इत्युक्तम्. अतएवोत्क्षिप्तजलप्रतीकार उत्तानपाणिभ्यां सम्भवत्यपि प्रभुर्न करोति, प्रत्युत तदभिमुखमेव बाहू प्रसारयतीत्याशयेनाहुः **सर्वे देवा** इत्यादि. बाह्वोर्देवतारूपत्वेन तदवयवभूताङ्गुली-करतलादीनामपि देवत्वमिति भावः. **अन्यथा लोके** इति, भगवता निवारणे कृते स्वामिनीलक्षणे लोके तथा न भवेदित्यर्थः ॥२४॥

**लेखः**

**स** इत्यत्र, तृतीयचरणस्य प्रत्यक्षेण परोक्षेण चार्थद्वयं टिप्पण्यां विवृतम्. तत्र परोक्षवादे विशेष्यस्यैव बाहौ लक्षणा, न तु विशेषणयोः. अतो वैमानिकत्वं कुसुमवर्षित्वं च बाहौ नान्वेतव्यं, यथा "गभीरायां घोष" इत्यत्र गभीरत्वं नदीत्वं च तीरे नास्ति तथेति ज्ञेयम् ॥२४॥

**योजना**

**ननु देवैः कथं न निषिध्यत** इति एतदाशङ्क्य **सर्वे देवा अभिनन्दनमेव कुर्वन्तीति** समाहितम्. एतदाशङ्कासमाधानयोरर्थष्टिप्पण्यां स्फुटः. **युवत्य इत्यविचारे** इति **सोम्भस्यलं युवतिभिरित्यनेन** युवत्य उक्तास्तत्तात्पर्यमुक्तम्. यतो युवत्यो अतः शृङ्गारकौतुकाविष्टा अविचारेण परितः सेचनं कुर्वन्तीति भावः ॥२४॥



ये **गन्धाः** तत्सम्बन्धिना वायुना **जुष्टाः दिक्तटाः** सर्वदिग्भागा यस्मिन् वने तत्र पुनश्**चचार. भृङ्गैः प्रमदागणैश्चावृतः.** पुनर्भृङ्गाणां गमने हेतुं दृष्टान्तेनाह **यथा मदच्युत्** मदस्रावी गण्डयोरन्यत्र च **द्विरदो** हस्ती **करेणुभिः** सहितो भवति, भ्रमरैश्च सहितः. सहजएवान्तःस्थितो रस आविर्भूत इति भ्रमराणामनुद्रवणम्. **चचारे**ति सर्वत्र नानाविधलीला निरूपिता. क्वचिल्लतानां भङ्गः क्वचिद् वृक्षशाखानां तथा मर्यादामार्गः लौकिकश्चान्यथाकृत इति. एषा त्रिविधा लीला अत्यलौकिकी. तत अविचारेण रमणमिति ॥२५॥

एवं लीलामुक्त्वोपसंहरति **एवमि**ति.

**एवं शशाङ्कांशुविराजिता निशाः ससत्यकामोऽनुरताबलागणः ।**
**सिषेव आत्मन्युपरुद्धसौरतः सर्वाः शरत्काव्यकथा रसाश्रयाः ॥२६॥**

**शशाङ्कांशुभिः** चन्द्रकिरणैः लौकिकैः या **विराजिता निशाः** ता[१] **एवं** रेमे. पूर्वोक्तप्रकारस्तु सर्वदा लीलारूपः, स केनापि न विरुध्यते. नन्वेवं

**टिप्पणी**

**यथा मदच्युदि**त्येतत्तात्पर्योक्तौ **ततो अविचारेणे**ति. पूर्वस्यां लीलायां देशकालनायिकाविचारपूर्वकं रमणं कृतं, तदनन्तरं न तथेत्यर्थः ॥२५॥

**लेखः**

**तत** इत्यत्र, **पुनरि**ति, जलक्रीडायां कुङ्कुमस्रगादिनिवर्तनात् पुनर्भ्रमराणां गमने हेतुर्वक्तव्यएवेति भावः. **एषा त्रिविधे**ति, **एषा** कामलीला स्थलजलपुष्पावचयभेदेन **त्रिविधात्यलौकिकी** अलौकिकप्रकारिका. लौकिकप्रकारिकामग्रिमश्लोके 'काव्यकथा'पदेन वक्ष्यते इति भावः. **तत** इति ॥२५॥

**एवमित्यत्र, ता एवं रेमे** इति, पूर्वमेकस्यां रात्रौ रमणमुक्तम्, अस्मिन् श्लोके सर्वास्वपि तदतिदिश्यते. **एवं** लौकिकीषु रात्रिषु अलौकिकीस्थापनादिप्रकारेण सर्वासु **रेमे** कामलीलां कृतवानित्यर्थः. **पूर्वोक्ते**ति, नृत्येनान्तर्भावोद्बोधेनान्तररमणरूप इत्यर्थः. तत्र हि यो भावो यस्या अन्तःस्थापितः सा तं भावं सर्वदानुभवति. अतएव ज्ञानात्मकताम्बूलवत्याः

**योजना**

**यथा मदच्युद्द्विरद** इत्यस्य तात्पर्योक्तौ **ततो अविचारेण रमणमितीति**, एतस्यार्थष्टिप्पण्यां स्फुटः ॥२५॥

१. अत्र स्वतन्त्रटिप्पणी प्रथमपरिशिष्टे मुद्रिता.

रमणे को हेतुरिति चेत्, तत्राह **ससत्यकाम** इति. **सत्यः कामो** यासां ताः सत्यकामाः, ताभिः सहित इति **ससत्यकामः. स** इति तथा प्रार्थितो वा. एवमपि क्रीडायां कामः सत्यएव स्थितः, न तु क्षीणो असद्विषयको वा जातः. **अनुरता अबलागणा** यस्य, सर्वथा रतासु नित्यसम्बद्धासु स्वविवाहितासु न कापि शङ्का, सर्वथा प्रपन्नासु च. अग्रे मर्यादाभङ्गो रसपोषाय. तदुक्तं

## प्रकाशः

**एवं शशाङ्के**त्यत्र **सर्वथा रतास्वि**त्यादि, अत्र प्रथमा कुमार्यो, द्वितीया नित्यलीलास्थाः श्रुतिसिद्धा अन्तर्गृहगताश्च, तृतीया द्वारकालीलास्थाः, तुरीया गोपगृहसम्बन्धिन्यो बोध्याः. एतासूक्तविशेषणकत्वान्नात्मारामत्वभङ्गप्रयोजकता. इतोऽतिरिक्ता यद्यप्यत्र स्फुटं नोक्ताः तथापि भिन्नसेतुत्वाद्युक्तिबलान्निबन्धोक्तरीत्या ज्ञातव्याः. एतदेव पूर्वश्लोकेऽप्युक्तं "मर्यादामार्गो लौकिकश्चान्यथा कृत" इत्यनेनेति. तदेतदभिसन्धायाहुः **अग्र** इत्यारभ्य

## लेखः

कार्यं भगवदसन्निधाने सर्वोपदेष्टृत्वं तत्रोक्तम्. **केनापी**ति, गृहगमनादिनापीत्यर्थः. अतएव "स्त्रीषु रेमे ह्यहर्निशमि"त्युक्तम्. तथा च तस्य दिवसेऽपि विद्यमानत्वात् तत्र नालौकिकीस्थापनादिप्रकार इति भावः. **एवं रमणे** इति कामलीलया रमणे इत्यर्थः. **सत्यः काम** इति. कुमारिकाणां "पतिं मे कुरु" इति कामप्रकारकोऽभिलाषः. श्रुतिरूपाणां "कामिनीभावमासाद्ये'ति वाक्यात् तथाभिलाषः. अन्तर्गृहगतानां तु स्पष्टएव कामाभिलाषः. अतस्त्रयाणामप्यभिलाषस्य सत्यत्वात्तत्पूरणायैवं कृतवानित्यर्थः. **स इती**ति, अस्मिन् पक्षे **सत्यकाम**पदं भगवद्वाचकम्. तद्विवृण्वन्ति **एवमपी**ति. भगवद्धर्माणां नित्यत्वेन कामः क्षीणो न जात इत्यर्थः. **असद्विषयक** इति, भगवद्धर्माणां नित्यसत्त्वस्य व्यवस्थापितत्वेन विषयतोऽप्यसत्सम्बन्धाभावादिति भावः. ननु लोकदृष्ट्या परदारत्वस्य विद्यमानत्वादसद्विषयकत्वं शङ्क्येतैवेति शङ्कानिवारणार्थं विशेषणान्तरमित्याहुः **अनुरता** इति. गणानां पूर्वव्याख्यातरीत्या त्रिविधत्वम्, अतो बहुवचनम्. **सर्वथे**ति विशेषणत्रयेण क्रमेण श्रुतिरूपास्वन्तर्गृहगतासु कुमारिकासु चानुरतत्वं व्याख्यातम्. कुमारिकाणां लोकन्यायेन विवाहाभावेऽपि "पतिं मे कुरु" इति प्रार्थनाद्वरसिद्धो विवाहः. अतएव **स्वे**त्युक्तं, स्वेनैव न तु लोकसमक्षमिति भावः. एतादृशीषु मनोरथपूरणार्थरमणे दोषशङ्का



"शास्त्राणां विषयस्तावद् यावद् मन्दरसा नराः रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रम" इति. तथापि तासु सत्यएव कामः स्थापितो यो मोक्षपर्यवसायी. स कामो भगवन्तं प्रापयिष्यत्येव. **एवं निशाः सिषेवे.** तदनन्तर**मात्मन्येव उपरुद्धं सौरतं** यस्य तथा जातः, न तु तासु रतिं स्थापितवान्; तथा सति तासु स्वस्मात् पुत्रा भवेयुः. **सर्वा**एव **निशा** एवं नीताः, **शरद**पि नीता, **काव्यकथा** अपि नीताः, काव्योक्तप्रकारेण गीतगोविन्दोक्तन्यायेनापि, रतिं कृतवान्. तत्र हेतुः **रसाश्रया** इति, कामरसस्तेष्वेव प्रसिद्धो, यावत् पुरुषो

## प्रकाशः

**प्रापयिष्यत्येवे**त्यन्तम्. **तेष्वेवे**ति निशादिकथान्तेष्वेव. अर्थान्तरमाहुः **शरदि**त्यादिना. तथा च लौकिककाव्येष्वपि सरस्वती भगवदीयमेव वदति,

## लेखः

नेत्यर्थः. प्रसङ्गात् साधारणमपि पक्षमाहुः **सर्वथे**ति. इदमनुरतत्वं सर्वसाधारणमित्यर्थः. तर्हि तावद्रमणमेवोचितं, न त्वमर्यादरमणमित्यत आहुः **अग्रे** इति, तथाऽकरणे रसपोषाभावात्तावदपि न सिध्येदिति भावः. **तथापी**ति, एवममर्यादरमणे कृतेऽपीत्यर्थः. स्थापनप्रयोजनमाहुः **मोक्षे**ति. **न तु तासु रतिमि**ति, सहस्रत्वेऽपि चन्द्रांशान् स्वस्मिन्नेव स्थापितवान् न तु तास्वित्यर्थः. यथा घृतस्य द्रवीभूतस्य तस्मिन्नेव पात्रे स्थितिस्तथेति ज्ञेयम्. **स्वस्मादि**ति, यद्यपि तदुत्पादनमपि भगवतएव केनचित् प्रकारेण तथाप्यधुना रतिस्थापने स्वस्मात् प्रकटस्वरूपा भवेयुरित्यर्थः. **तत्रे**ति गीतगोविन्दोक्तलौकिकप्रकारकरमण इत्यर्थः. **तेष्वेवे**ति काव्येष्वित्यर्थः ॥२६॥

## योजना

**एवं शशाङ्कांशुविराजिता निशा** इत्यस्य विवृत्तौ **यो मोक्षपर्यवसायी स कामो भगवन्तं प्रापयिष्यत्येवे**ति, इह **मोक्ष**पदेन नित्यलीलाप्रवेश उच्यते, तृतीयाध्याये सूत्रभाष्ये नित्यलीलाप्रवेशरूपा पुष्टिमार्गीयाणां मुक्तिरिति बहुशो व्यवस्थापितत्वात् ॥२६॥

## कारिकार्थः

**एवं शशांकांशुविराजिता** इत्यत्र **शास्त्राणां विषय** इत्यादि. एतद्वाक्यं वात्स्यायनीयसप्ताधिकरण्यां साम्प्रयोगिकाख्ये द्वितीयाधिकरणे द्वितीयाध्यायसमाप्तिस्थम् आरम्भतस्तु सप्तमाध्यायस्थम् ॥२६॥

रसे गौणभावं न प्राप्नोति, तावन्न रसिको भवतीति. **शरद्वर्णनायां** वा यत् काव्यं तत्र याः **कथाः** तासां **रसाश्रया** इति. निशा एता न लोकप्रसिद्धाः किन्तु काव्योक्ताएव. तत्र हि नियतिकृत्यादिराहित्यं ह्लादैकता अनन्याधीनता; तथा अन्येऽपि गुणाः तथा भगवल्लीलारात्रयो जाता इत्यर्थः ॥२६॥

एवमेतां लीलां श्रुत्वा राज्ञः सन्देह उत्पन्नः, तन्निवारणार्थं शङ्कते **संस्थापनायेति** त्रिभिः, अवतारविरुद्धं लोकवेदविरुद्धं प्रमेयविरुद्धं चेति. तादृशकरणे अवश्यं हेतुर्वक्तव्यः, तदभावेऽपि लीलायाः सिद्धत्वात्. तत्र प्रथममवतारविरोधमाह.

**॥ राजोवाच ॥**

**संस्थापनाय धर्मस्य प्रशमायेतरस्य च ।**
**अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥२७॥**

**धर्मसंस्थापनाय** भगवदवतारो, "धर्मसंस्थापनाय चे"ति वाक्यात्. अधर्मनिवृत्तये **च**. तदुभयार्थमेव भगवदवतारः. दैत्यादिवधो भूभारहरणं च अधर्मनिवृत्तये. एतदर्थमेवावतारो नान्यार्थमिति **हि**शब्द आह. **भगवानिति** तस्य साधनम्, अन्यथा पूर्णकामस्यावतारो न घटेतेति. लोकोपकारश्च

---

**प्रकाशः**

लौकिकाएव त्वन्यथाभिमन्यन्त इति भावः. अतएव लौकिकांसु गाथास्वपि जीवनाम दूरीकृत्य भगवन्नाम तत्र निक्षिप्य ताः प्राश्चो गापयाश्चक्रुः ॥२६॥

**संस्थापनायेत्यत्र**, ननु दैत्यनाश-भूभारहरणयोरप्यवतार(कार्य)त्वात्तद्व-दिदमप्यस्तु कार्यमित्यत आहुः **दैत्यादीति**, तथा चास्य तदनुपयोगित्वान्न तादर्थ्यमिति नावतारगौणकार्यत्वमपीत्यर्थः. **तस्य साधनमिति**, धर्मो हि 'भग'शब्दवाच्यान्तर्गत इति तद्रक्षणावश्यकतया रक्षणसाधनं भगवत्त्वमित्यर्थः.

**लेखः**

**संस्थापनायेत्यस्याभासे राज्ञः सन्देह** इति, कस्यचिद् भ्रान्तस्य अस्यां लीलायां विषयत्वेनानौचित्यबुद्धिः स्यादिति शङ्कोत्पन्नेत्यर्थः. **तन्निवारणार्थमिति**, राज्ञः शङ्कायां शुकेन तत्समाहितावन्यस्य सा बुद्धिर्निवर्तिष्यते इत्यर्थः. व्याख्याने, **तस्य साधनमिति**, गुणाएव लीलायां साधनमित्यर्थः. **अन्यथेति** धर्मस्थापनरूपप्रयोजनाभावे इत्यर्थः. मोक्षदानमपि प्रयोजनमित्यत आहुः **लोकोपकारश्चेति**, लोकानामुपकारो मोक्ष इत्यर्थः ॥२७॥



एताभ्यामेव. **अंशेन** बलभद्रेण. आगत्य तथाकरणे हेतुः **जगदीश्वर** इति, स हि सर्वरक्षकः अतः पालनार्थमेवं कृतवान् ॥२७॥

किमतो यद्येवम्, एवमेतदित्याह **स कथमिति**.

**स कथं धर्मसेतूनां कर्ता वक्ताभिरक्षिता ।**
**प्रतीपमाचरद् ब्रह्मन् परदाराभिमर्शनम् ॥२८॥**

**धर्म**मर्यादापालकानां निर्माता. स्वयं **वक्ता** च, उपघातेऽ**भिरक्षिता** च तादृशः **प्रतीपं** प्रतीकूल**माचरद्**– धर्मो नष्टो, अधर्मः स्थापितः, अधर्मः कृतः उक्तः रक्षितश्च. अतः प्रतीपाचरणमयुक्तम्. तत्र हेतुर्वक्तव्य इति **ब्रह्मन्निति** सम्बोधनम्. ये पञ्चपदार्था उक्ताः तेषां स्वरूपमेकत्रैवेति तन्निर्दिशति **परदाराभिमर्शनमिति** ॥२८॥

ननु कामात् करणमिति चेत्, तत्राह **आप्तकाम** इति.

**आप्तकामो यदुपतिः कृतवान् वै जुगुप्सितम् ।**
**किमभिप्राय एतं नः संशयं छिन्धि सुव्रत ॥२९॥**

---

**टिप्पणी**

प्रश्नतात्पर्यं तु "लौकिक्यपि यदा दृष्टिरि"(का.२)त्यत्र निरूपितम्.

**प्रतीपमाचरदित्यत्र धर्मो नष्ट** इत्यादि. अधर्मनाश-धर्मस्थापन-तत्करण-तदुक्ति-तद्रक्षाणां पूर्वमुक्तानां प्रतीपा अर्था अनेनोक्ताः ॥२८॥

**प्रकाशः**

**एताभ्यामिति** धर्मस्थापनाधर्मनिवृत्तिभ्याम् ॥२७॥

**लेखः**

**स कथमित्यत्र**, धर्मसेतुकर्तृत्वं विवृण्वन्ति **धर्मेति**. एत**त्पालकानां** मन्वादीनां **निर्माता** स्रष्टा, अतस्तद्द्वारा मर्यादां करोतीत्यर्थः ॥२८॥

**योजना**

**परदाराभिमर्शनमित्यस्याभासे ये पञ्चपदार्था उक्ता** इति. "संस्थापनाय धर्मस्य प्रशमायेतरस्य चे"त्यस्य(चेत्यत्र!) धर्मस्थापनार्थमधर्मप्रशमनार्थं भगवदवतारमुक्त्वा **प्रतीपमाचरदित्यनेन धर्मो नष्टो अधर्मः स्थापित** इति द्वयमुक्तम्. **वक्ता कर्ताभिरक्षितेत्युक्त्वा प्रतीपमाचरदित्यनेन अधर्मः कृतः उक्तो रक्षितश्चेति** त्रयमुक्तम्. एवं पञ्च पदार्थाः निरूपिताः ॥२८॥

स्वतएव**आप्ताः कामा** येन. **यदुपतिरि**ति विद्यमानायामपि कामनायामनेकस्त्रीप्राप्तिः. तादृशोऽपि भूत्वा **जुगुप्सितं** लोकनिन्दितं **कृतवान्.** तत्र करणे कोऽभिप्रायः? परस्परविरुद्धार्थत्वादुभयोर्ग्रहणं न सम्भवति, नैकतापि विरुद्धानाम्. विरुद्धसर्वधर्माश्रयत्वेऽपि प्रयोजनं वक्तव्यम्. नैतत् कर्म लोकहितं, नापि स्वहितं, स्वस्य पूर्णत्वात्. लोकस्य मर्यादैव हितकारिणी, तथा गोपिकानामपि. अन्तर्यामिण ईश्वरस्य न किञ्चिदसाध्यम्. अत एवं सति **किमभिप्राय** एतत् **कृतवान्** कः अभिप्रायो यस्येति **एतं नो**ऽस्माकं सर्वेषामेव **संशयं छिन्धि.** किञ्च **सुव्रत** हे सदाचारलक्षणव्रतयुक्त, यदीदमसङ्गतमिव स्यात् त्वया नोक्तं स्यात्. यदि वा अधर्मः स्यात् तव रुचिर्न स्यात्. प्रतीयते च विपरीतम्, अतो निर्णयो वक्तव्य इत्यर्थः ॥२९॥

**प्रकाशः**

**आप्तकाम** इत्यत्र **उभयोरि**ति धर्माधर्मयोः. ननु "द्वयं तथा ब्रह्मणि कर्म नर्च्छती"ति न्यायादुभयग्रहणे को दोष इत्याकांक्षायामाहुः **प्रयोजनं वक्तव्यमि**ति. ननु गोपिकाकामपूर्तिरिव प्रयोजनमिति चेत्तत्राहुः **अन्तर्यामिण ईश्वरस्ये**ति, तथा च तास्तथैव प्रेरयेत् उद्वहेद्वेत्यर्थः ॥२९॥

**लेखः**

**आप्तकाम** इत्यत्र, **नैकतापी**ति एकाधिकरणत्वमित्यर्थः. तर्हि न कृतवानिति विपरीतनिश्चयएवास्त्विति शङ्कायामाहुः **अन्तर्यामिण** इति, असाध्यमपि नास्ति, तत्र दृष्टान्तार्थं विशेषणद्वयं– यथान्तर्याम्यपि **सन्नीश्वरो** बहिरपि फलदाता तथेदमपि विरुद्धमसाध्यं नास्ति. तथाप्यभिप्रायः क इत्यर्थः. राज्ञः [१]पूर्वं सन्देहाभावेऽप्यभिप्रायसंशयोऽस्त्येवेत्याशयेनाहुः **सर्वेषामि**ति. **किञ्चे**ति, पूर्वं तस्यासङ्गतत्वं साधितं, सन्देहस्वरूपार्थं द्वितीयकोटेरपि

**योजना**

**आप्तकामो यदुपतिरि**त्यस्य विवरणे **तथा गोपिकानामपी**ति, **गोपिकानामपि मर्यादैव हितकारिणी**ति पूर्वेणैवान्वयः. ननु किं कर्तव्यं, गोपिकानां भक्तत्वात्तासां मनोरथपूर्तिरावश्यकीति तथा करणमित्याशङ्क्याहुः **अन्तर्यामिणः न किञ्चिदसाध्यमि**ति, अन्तर्यामित्वादन्यथैव गोपीः प्रेरयित्वा मनोरथान्तरमेव कुतो नोत्पादितवानिति भावः ॥२९॥

१. पूर्वम् इति जो. पाठमनुसृत्य, मुद्रितपाठस्तु पूर्वसन्देह° इति.



प्रथमतो अवतारविरुद्धं कृतवानिति यदुक्तं तत्रोत्तरमाह **धर्मव्यतिक्रम** इति.

**॥ श्रीशुक उवाच ॥**

**धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ।**
**तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥३०॥**

किमेतदीश्वराणां चरित्रं न भवतीत्युच्यते आहोस्विदन्यार्थमागतोऽन्यत् करोतीति? नहि किञ्चिद्घटनार्थमागतः किञ्चिन्न विघटयति. न ह्यन्यार्थमप्यागतः स्वधर्मं परित्यजति. प्रकाशनार्थमागतो दीपो गृहेण स्पृष्टश्चेत् दहत्येव. अत ईश्वरधर्मोऽयम्, अन्यथा ईश्वरएव न भवेत्. नहि वणिजामिव प्रभोर्नियमोऽस्ति सर्वकर्मसु. ईश्वरधर्माश्चैते इति तान् गणयति **धर्मव्यतिक्रमः साहसमि**त्यादयः. **धर्मव्यतिक्रमो** विद्यमानोल्लङ्घनं, **साहसम**विद्यमानकरणम्–

**प्रकाशः**

**धर्मव्यतिक्रम** इत्यत्र द्वितीयपक्षं दूषयन्ति **नही**त्यादि. तत्र हेतुः **न ह्यन्यार्थमि**त्यादि, यथा मृगयार्थं निःसृतो राजा उपवने विहरति, विहरन्नपि सेवकादीन् शास्ति तथेत्यर्थः. न च तासां बन्धसम्भव इत्याहुः **प्रकाशनार्थमि**त्यादि, तथा च "नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृपे"त्यवतारकार्यं प्रागुक्तं, तच्चैवमप्युपपन्नमेव, धर्मस्थापनाऽधर्मप्रशमावप्येतदर्थाविति प्रकारान्तरेण तत्सिद्धौ न तयोरावश्यकत्वम्, अतो नावतारविरुद्धमित्यर्थः. लोकप्रमेययोर्विरोधं परिहरन्ति **अत** इति, साधनविरुद्धफलदानादित्यर्थः. इदमेव "न मय्यावेशितधियामि"त्यत्र सिद्धम्. तथा च वेदस्यापि नियामकोऽयं, न तु तन्नियम्य इति बोधयतीत्याहुः **ईश्वरधर्मोऽयमिति. न भवेदि**ति स्वस्य न भवेत्. वेदविरोधं परिहरन्ति **विधी**त्यादि, तथा च नियोज्यत्वाभावान्न वेदविरोधीत्यर्थः ॥३०॥

**लेखः**

समुच्चयोऽनेन क्रियत इत्यर्थः. जुगुप्सितत्वशङ्का अभिप्रायशङ्का चेति प्रश्नद्वयं सम्पन्नम्. आद्यान्येषां, द्वितीया स्वस्यापि. द्वितीयशङ्कासमाधान"मनुग्रहाय भक्तानामि"त्यनेन करिष्यते ॥२९॥

**धर्मव्यतिक्रम** इत्यत्र, **दहत्येवे**ति, स्वरूपं योजयति, स्वसदृशं करोतीत्यर्थः. तथा भगवानपि धर्मस्थापनार्थमागतस्तथाभावेन गृहीतश्चेत् स्वरूपानन्दं

एतदुभयमीश्वरे **दृष्टम्.** "नहि दृष्टे अनुपपन्नं नाम". **च**कारादीश्वर-सेवकानामपि, वीर्यादिमतां वा. एतदेव वा **साहसं,** सहसा क्रियमाणत्वात्. नन्वेवं सति तत्कर्मफलं कथं न भवेदित्याशङ्क्याह **तेजीयसामिति**– अतितेजस्विनामेतन्नाधर्मजनकं, विधिनिषेधवाक्यानां नियोज्यविषयत्वात्. यथा लोके तथा वेदेऽपि. अतितेजस्विनां सर्वकर्मदहनसमर्थानां न दोषजनकं भवतीत्यत्र दृष्टान्तमाह **वह्नेः सर्वभुज** इति. नहि सर्वान् दहन् वह्निर्वधभाग् भवति, सर्वं भक्षयन् अभक्ष्यभक्षको वा, तथा सर्वं पिबन् सर्वत्र प्रविशन् सर्वसम्बद्धः तत्तत्कारी भवति. मिथ्याज्ञानसलिलावसिक्तायामेव आत्मभूमौ कर्मबीजं धर्माधर्माङ्कुरतामारभते, न तु तत्त्वज्ञाननिदाघ-निष्पीत-सलिलतयोषरायाम् ॥३०॥

ननु "तेजीयसामपि ह्येतन्न सुश्लोक्यमि"ति न्यायाद् "यद्वृत्तमनुतिष्ठन् वै लोकः क्षेमाय कल्पत" इति विरोधाच्च कथमेतत् कर्तुं शक्यत इति चेत्, तत्राह **नैतत् समाचरेदिति.**

**नैतत् समाचरेज्जातु मनसापि ह्यनीश्वरः ।**
**विनश्यत्याचरन्मौढ्याद् यथारुद्रोऽब्धिजं विषम् ॥३१॥**

**एतद**ीश्वरकृत**मनीश्वरो न समाचरेत्.** ऐश्वर्यसमानाधिकरणमेवैतत् नानिष्टं करोति. अतो **जातु** कदाचिदपि औत्सुक्यादपि **न समाचरेत्.** किं बहुना, **मनसापि.** ऐश्वर्यतुल्यमेव तेषां तत्कर्म. यथैश्वर्यकामनायामपि

---

**टिप्पणी**

**नैतत् समाचरेदि**त्यस्याभासः, **ननु तेजीयसामपी**त्यारभ्य **न्यायादि**त्यन्तः. यद्यप्येतत्समाहितिर्नैतेन श्लोकेन भवति तथाप्युत्तरार्धेऽन्यस्य कर्तुर्नाशोक्त्येश्वराणामनाशज्ञापनेन च समाहितिर्भविष्यतीत्याशयेनेदमप्युक्तमिति ज्ञेयम्. "अन्तरङ्गैरेवे"(सुबो. ३४)त्यग्रे वक्ष्यन्ति च ॥३१॥

**लेखः**

स्थापयत्येवेति दृष्टान्तसामञ्जस्यम्. **वीर्यादिमतामिति, ईश्वर**पदेनैश्वर्यमुक्तमिति **च**कारेण वीर्यादीनां समुच्चयो युक्त इति भावः. पूर्वोक्तसाहसस्यात्र प्रसङ्गाभावात् पक्षान्तरमाहुः **एतदेव वे**ति. **तत्तत्कारी भवतीति नहि भवतीति** पूर्वेणान्वयः. **आत्मभूमाविति** अन्तःकरणे इत्यर्थः॥३०॥

**नैतदि**त्यत्र **हि**शब्दसूचितां युक्तिमाहुः **ऐश्वर्यतुल्यमेवे**ति ॥३१॥



अनीश्वरो वधमर्हति, यथा महाराज्यानधिकारी तदिच्छां कुर्वन्. अतो **मनसापि न समाचरेत्.** विपरीते बाधकमाह **विनश्यती**ति, **मौढ्याद**ैश्वर्यसहभावं तस्य कर्मणो अज्ञात्वा केवलं तत् कर्म **आचरन्** तेनैव कर्मणा नष्टो भवति. नन्वेकमेव कर्म कथं धर्मान्तरसहितं न नाशकम् इतरथा नाशकमिति चेत्, तत्राह **अरुद्रोः** रुद्रव्यतिरिक्तः रुद्रसमानपराक्रमरहितो **अब्धिजं विषं** कालकूट**माचरन्** आसमन्ताद् भक्षयन् **विनश्यति** तथेत्यर्थः. निन्दितं कर्मापि कालकूटवन्नाशकं, तदीश्वरस्यैव शोभाकरं, येन नीलकण्ठो भवति. तथैव गोपीजनवल्लभ इति ॥३१॥

ननूक्तं "यद्वृत्तमनुतिष्ठन्नि"ति, तत्राह **ईश्वराणामिति.**

**ईश्वराणां वचस्तथ्यं तथैवाचरितं क्वचित् ।**
**तेषां स्वच्छन्दचरितं बुद्धिमान्न समाचरेत् ॥३२॥**

**ईश्वराणां वच**एव **तथ्यं** न त्वाचरितं; **क्वचिदाचरितम**पि वचनानुगुणं चेत्. ईश्वराणां बहवो धर्माः; यथैश्वर्यं तथा धर्मात्मत्वं तथा दया. तत्रैश्वर्यज्ञानवैराग्यैर्यत् करोति तत् **स्वच्छन्दचरितमि**त्युच्यते. **बुद्धिमान्** तन्न

---

**प्रकाशः**

**ईश्वराणामि**त्यत्र **न त्वाचरितमि**ति, उक्तं चरितं न लोकसंग्रहार्थं किन्तु निरङ्कुशैश्वर्यबोधनार्थं, तेन तत्प्रतीयमानरूपेण न तथ्यमित्यर्थः.

**लेखः**

**ईश्वराणामि**त्यत्र, **ईश्वराणां वच एवे**ति. वचसि तथ्यत्वं करणीयप्रतिपादकत्वम्, आचरिते तथ्यत्वं स्वसजातीयत्वेन ग्रहविषयत्वमिति ज्ञेयम्. **तत्रैश्वर्ये**ति, अग्रिमश्लोके 'एषामि'त्यनेनैश्वर्यं 'निरहङ्कारिणामि'त्यनेन ज्ञानवैराग्ये च विवरिष्यते इति भावः. वचसस्तथ्यत्वं व्युत्पादयन्ति **ते ह्यन्यथे**ति ॥३२॥

**योजना**

**तेषां स्वच्छन्दचरितमि**त्यस्य विवरणे **तत्रैश्वर्यज्ञानवैराग्यैर्यत्करोति तत्स्वच्छन्दचरितमित्युच्यत** इति, "कुशलाचरितेनैषामि"त्यग्रिमश्लोके 'निरहंकारिणामि'त्युक्त्या ज्ञानं वैराग्यं चोक्तम्. "किमुताखिलसत्त्वानामि"ति श्लोके 'ईशितुरि'त्युक्त्या ऐश्वर्यं निरूपितम्. तथा चैश्वर्यज्ञानवैराग्यवतां न किञ्चिद् बाधकमतो भगवता यदैश्वर्यज्ञानवैराग्यैः क्रियमाणं स्वच्छन्दचरितं बुद्धिमानन्यो नाचरेदिति भावः ॥३२॥

**समाचरेत्.** ते ह्यन्यथा न वदन्ति, अन्यार्थं कथनमन्याधिकारेणेति; अतस्तद्विरुद्धं न कथयन्तीति ॥३२॥

ननु यथान्यस्मै न कथयन्ति तथा स्वयमपि कुतो न कुर्वन्ति? तत्राह **कुशलाचरितेने**ति.

**कुशलाचरितेनैषामिह स्वार्थो न विद्यते ।**
**विपर्ययेण वानर्थो निरहङ्कारिणां प्रभो ॥३३॥**

**एषामी**श्वराणां **कुशलाचरितेन अर्थः** प्रयोजनं **न विद्यते,** ततोऽप्यनन्तफलस्य प्राप्तत्वादेव. **विपर्ययेण** अकुशलाचरितेन **अनर्थो**ऽपि **न विद्यते.** ईश्वराणामेव निषिद्धकर्मणा अनिष्टाभाव इति न किन्तु ज्ञानिनामपीति ज्ञानवैराग्ययोस्तुल्यं स्वरूपमाह **निरहङ्कारिणामि**ति, अहङ्काररहितानां न केनापि किमपि, कर्तृत्वाभिमानाभावात्. **प्रभो** इति सम्बोधनमीश्वरस्य लोकविलक्षणत्वज्ञापनार्थम् ॥३३॥

यत्र ज्ञानसहकृतमेव तत्कर्म नानिष्टजनकं किं वक्तव्यमैश्वर्यसहकृतमित्याह **किमुते**ति.

**किमुताखिलसत्त्वानां तिर्यङ्मर्त्यदिवौकसाम् ।**
**ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥३४॥**

ईश्वरस्य सेवकमारणे सेवकानामन्यथाकरणे च न काचित् शङ्का भवति, यथैहिकी तथा पारलौकिकी. नियामकाद्धि शङ्का, भगवतो न नियामकोऽन्योऽस्तीत्याह **अखिलसत्त्वानां** सर्वजीवानां **तिर्यङ्मर्त्यदिवौकसां** गुणत्रयकार्याणां जीवजडानामप्राकृतानां वा सर्वेषामेव **ईशितुः** प्रभोः कृष्णस्य

---

**प्रकाशः**

**वचस्तथ्यमि**त्यत्रोपपत्तिं वदन्ति **ते ही**त्यादि ॥३२॥

**लेखः**

**कुशलाचरितेने**त्यत्र चरणत्रयेणेश्वराणामिष्टानिष्टसम्बन्धाभावं[1] प्रतिज्ञाय **निरहङ्कारिणामि**त्यारभ्य "किमुते"ति श्लोकेन कैमुत्येन तदेव साधितमित्याशयेनाहुः **ईश्वराणामेवे**ति. अत्र कैमुत्येन दृष्टान्तसाधका अन्येऽपि सन्तीत्यर्थः ॥३२॥

**किमुते**त्यत्र, **गुणत्रये**ति, तिर्यगादीनां क्रमेण तमोरजःसत्त्वरूपत्वादिति

१. संबन्धम्.



चकारादात्मनश्च **ईशितव्यानां** सेवकानां सम्बन्धी तत्कृतगुणदोषाभ्यां **कुशलाकुशलयोरन्वयः** कुतः! नहि दासीभिः स्वात्मभूताभिः सम्बन्धे अनियम्यस्य ऐहिके पारलौकिके वा कश्चनापकारः सम्भवति. अन्तरङ्गैरेव तथा ज्ञायत इति न सुश्लोक्यतानिवृत्तिः ॥३४॥

नापि कर्ममार्गविचारेण कर्मप्राधान्यपक्षेऽपि दोषः शङ्कनीयो यथा "परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्" "ब्रह्म वा इदमग्र आसीत्" "स आत्मानमेवावैत्" इत्यादिश्रुतिषु, यथा ज्ञानकर्मभ्यामुत्कर्षः एवमपकृष्टज्ञानकर्मभ्यामपकर्षोऽपि सम्भाव्यत इति तत्राह **यत्पादे**ति.

**यत्पादपङ्कजपरागनिषेवतृप्ता**
**योगप्रभावविधुताखिलकर्मबन्धाः ।**
**स्वैरं चरन्ति मुनयोऽपि न नह्यमाना-**
**स्तस्येच्छयात्तवपुषः कुत एव बन्धः ॥३५॥**

नहि सर्वेषामेव जीवानां समानकर्मणा समानं फलमुपलभ्यते, अन्यथा

---

**लेखः**

भावः. तथा चाद्यस्य द्वितीयं विशेषणम्. उभयोर्भिन्नत्वेन व्याख्यानमाहुः **जीवे**ति, **अखिलसत्त्वानामि**त्यनेन **जीवाः.** तिर्यगादीनां देहत्वेन **जडा** उक्ताः. **पूर्वेणाप्राकृता** द्वितीयेन **प्राकृता** इति **वे**त्यर्थः. **ईशितव्यानामि**त्यस्य चतुर्थचरणेनान्वय इत्याहुः **सेवकानां सम्बन्धी**ति, सम्बन्धं विवृण्वन्ति **तत्कृते**ति, सेवकसम्बन्धकृतगुणदोषाभ्यां **कुशलाकुशलान्वय** इष्टानिष्टसम्बन्ध इत्यर्थः. **नही**ति, ईशितृत्वा**द्दासीभिः चकार**सूचितात्मत्वात् **स्वात्मभूताभिः** ईशितृत्वा**दैहिकेऽनियम्यस्य** आत्मत्वेन ब्रह्मत्वात् **पारलौकिकेऽनियम्यस्ये**त्यर्थः. ईशितव्यसम्बन्धा**दन्तरङ्गैरेवे**त्युक्तम् ॥३४॥

**श्रुतिष्वि**ति, आद्यश्रुतौ कर्मणोत्कर्षो द्वितीयश्रुतौ ज्ञानेनोत्कर्ष उक्तः. तन्न्यायेनापकर्षोऽपि शङ्कनीय इति शेषः. इदमेव विवृण्वन्ति **यथा ज्ञाने**ति.

**योजना**

**यत्पादपङ्कजे**त्यस्य विवरणे **नहि सर्वेषामेव जीवानां समानकर्मणा समानं फलमुपलभ्यते** इति, निषिद्धं कर्म कृत्वा यदि प्रायश्चित्तं कुर्यात् तस्य नानिष्टं भवति. यदि ज्ञानी योगी वा निषिद्धं कर्म कुर्याद्भगवद्भक्तो वा कुर्यात्तस्य निषिद्धेनापि कर्मणानिष्टं न भवत्यतः **समानकर्मणा समानं फलं**

शास्त्रवैफल्यापत्तिः. उत्कृष्टकर्मादौ प्रवृत्तो नापकृष्टकर्मणा कादाचित्केन अपकृष्टो भवति. तत्र मार्गत्रयं, त्रिष्वपि प्रवृत्तो नापकर्षं यातीत्याह. तत्र प्रथमं भक्तिमार्गे प्रवृत्तस्य तत्र पुष्टस्य न केनाप्यपकर्ष इत्याह, **यस्य** भगवतः **पादपङ्कजस्य परागभूता** ये सेवकाः तेषां **निषेवो** निषेवणं तेन **तृप्ताः** भगवद्भक्तैः सह भगवद्गुणस्मरणेनैव विस्मारितदृष्टश्रुतसुखलेशाभासाः **स्वैरं चरन्ति**, न तेषां कर्मोत्कर्षापकर्षौ साधकबाधकौ. तथा कर्ममार्गेऽपीत्याह **योगप्रभावेति**. **योगो** हि महान् धर्मः, "अयं हि परमो धर्म" इति स्मृतेः. तस्य **प्रभावः** अणिमाद्यैश्वर्यसम्पत्तिः ज्ञानादयश्च, तेनैव **विशेषेण धुताः**, पूर्वकर्मजनिता अपि अखिलकर्मबन्धाः विशेषेण धुता भवन्ति. तेऽपि **स्वैरं चरन्ति**. ज्ञानमार्गेऽप्याह **मुनयोऽपि स्वैरं चरन्तीति**. सर्वएव **न नह्यमानाः** अबध्यमानाः. " 'णह' बन्धने", सर्वत्रैव असम्बध्यमानाः. यत्र भगवत्प्रवर्तित-मार्गेष्वप्येषा व्यवस्था तत्र भगवतः किं वक्तव्यमित्याह **तस्येच्छयात्तवपुष** इति. **इच्छया** भोगार्थम् **आत्तानि वपूंषि** "यावतीर्गोपयोषित" इति तावन्ति

### टिप्पणी

**इच्छयात्तवपुष** इत्यत्र **वपुष्**शब्दस्य वपुष्प्राकट्यपरत्वमित्याचार्याणा-

### प्रकाशः

**यत्पादेत्यत्र मार्गत्रयमिति** हेतुरिति शेषः. **विस्मारितदृष्टेत्यादि**, एतेनातादृशा इदानीं ये मार्गप्रवेशमात्रेण स्वैरमाचरन्ति ते दुष्टा बोध्याः.

### लेखः

**यत्पादेत्यत्र**, **अन्यथा शास्त्रेति**, ज्ञानादिशास्त्रस्येत्यर्थः. **तृप्तिपदार्थमाहुः तत्र पुष्टस्येति**. योगस्य कर्मत्वं व्युत्पादयन्ति **योगो हीति** ॥३५॥

### योजना

**नास्तीति** यदुक्तं तद्युक्तमेव. **अन्यथेति**, यदि साधारणजनानामिव प्रायश्चित्तं कुर्वतामपि ज्ञानि-योगि-भगवद्भक्तानामनिष्टं फलं स्यात्तदा प्रायश्चित्तशास्त्रस्य, "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुने"त्यादिशास्त्रस्य, "योगेनैव दहेदंह" इति शास्त्रस्य, "नाम्नोऽस्ति यावती शक्तिः पापनिर्दहने मम तावत्कर्तुं न शक्नोति पातकं पातकी जन" इत्यादिशास्त्रस्य वैफल्यं स्यादिति भावः. **तस्येच्छयात्तवपुष** इत्यत्र आत्तानि प्रकटीकृतानीत्यभिप्रायः सुबोधिन्या इति टिप्पण्यामुक्तम्. **यो हि तावद्रूप** इत्यारभ्य **भवेदित्यन्तं**, येन रूपेण कर्म



येन **तस्य कुतएव बन्धो** भवेत्? यो हि तावद्रूपो भवति, कार्यं कृत्वा च तान्याच्छादयति, तस्य केन कर्मणा बन्धो भवेत्? कर्म हि प्रतिनियतं व्यवस्थितम्. तत्र यदि भिन्नो भिन्नो जीवः स्यात् तदा तेन कर्मणा बन्धो वा भवेत्. आकाशवद् भगवद्रूपाणि प्रतिपदमन्यान्येव भवन्ति,

### प्रकाशः

**नापि कर्ममार्गविचारेण कर्मप्राधान्यपक्षे दोषः शङ्कनीय** इति यदाभासे उक्तं तद् व्युत्पादयन्ति **कर्म हीत्यादिना**. **प्रतिनियतमिति**, नियतं नियतं प्रति लक्षीकृत्येत्यर्थः. **तत्रेति** वपुषि. **तेनेति** वपुषा. **बन्धो वेति** वाशब्दः **कर्मणान्वेति**. **यथान्नेत्यादि**, अन्नं पृथिवी, "यत्कृष्णं तदन्नस्ये"त्यादिश्रुत्या तथा सिद्धत्वात्. तथा च लौकिके देहे वृद्धिविपरिणामादिदर्शनेन पार्थिवांशानां समवायव्यवायसन्देहभेदेनापि यथा सन्तत्यैक्याद् अवच्छेद्यैक्याद्वा एकदेह-व्यवहारः, तथात्र पृथिव्यात्मकस(म!)हादेशैक्यादवच्छेद्यैक्याद्वा एकदेहव्यवहार

### योजना

कृतवान् तद्रूपस्य कर्मणश्च आच्छादनं तिरोधानमेव, नतूत्पत्तिनाशौ. एवं सर्वेषां भगवत्कर्मणां नित्यत्वादुचितानुचितकर्मणोः सर्वदा विराजमान-त्वात्केन कर्मणा बन्धो भवेत्, मोचककर्मणामपि विद्यमानत्वात्! मोचक-कर्मव्यधिकरणमेव बन्धकं कर्म प्राणिनं बध्नाति. मोचककर्मसमानाधिकरणेन बन्धककर्मणा न बन्धो भवत्यतो न भगवति बन्धसम्भावनेति भावः. तदे-तदाहुः **यो हि तावद्रूप** इत्यारभ्य **आच्छादयतीत्यन्तेन**, **आच्छादयति** तिरोभावयतीत्यर्थः. तिरोभावेन कर्मणां सर्वेषां नित्यत्वं सूचितम्. तेन सर्वेषां बन्धकमोचककर्मणां सर्वदा विद्यमानत्वान्न भगवतो बन्धो न वा मोक्ष इति भावः. **कर्म हि प्रतिनियतमिति**, प्रतिजीवं कर्म व्यवस्थितं— ब्राह्मणेनेदं कर्म अस्मिन् समये कर्तव्यं यथा "वसन्ते ब्राह्मणोऽग्नीनादधीत", राजन्येनेदम् अस्मिन् काले कर्तव्यमस्मिन्काले अनेनाधिकारिणा इदं न कर्तव्यमित्यादिप्रकारेण कर्म नियतं व्यवस्थितमित्यर्थः. **तत्र यदि भिन्नो भिन्नो जीवः स्यादिति**, यदि ब्राह्मणक्षत्रियादिप्रकारेण जीवो भिन्नो भिन्नो भवेत्तदा तस्य तस्य जीवस्य तेन तेन कर्मणा बन्धो भवेत्. इह तु रूपबहुत्वेऽपि जीवाभावात्तस्य तस्य रूपस्यैवात्मत्वाद् ब्राह्मणक्षत्रियादिभावाभावाद् भगवतो न किञ्चित्कर्म विहितं न वा निषिद्धमिति न बन्ध इति भावः ॥३५॥

यथान्नभेदेनाप्येकदेहव्यवहारः एवं देशभेदेनापि भगवतः सर्वतः पाणिपादान्तस्य तावत्परिच्छेदेन प्रादुर्भाव इच्छयेति. स्वामिनीनां वा वपूंषि. अतः सर्वथा प्रमाणप्रमेयविचारेणापि न बन्धः सम्भवति ॥३५॥

ननु तथापि लोकमर्यादाया भग्नत्वाद् "यद्यदाचरति श्रेष्ठ" इति न्यायेन शब्दबलविचारेण बन्धो भवेत्. ते ह्यवधूतास्त्रयोऽपि, न ते व्यवहारनियामकाः, अतो विषमो दृष्टान्त इति चेत्, तत्राह **गोपीनामि**ति.

**गोपीनां तत्पतीनां च सर्वेषामपि देहिनाम् ।**
**योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक् ॥३६॥**

नहि स्वस्पर्शः स्वस्य क्वापि निषिद्धः. परा चासौ स्त्री च परस्य च स्त्री. उभयमपि न भगवति, यतः भगवान् **गोपीनां तत्पतीनां च** आत्मा. बान्धवाः सर्वे लौकिकाश्च न मन्यन्त इति चेत्, तत्राह **सर्वेषामपि देहिनाम**यमात्मेति. **यो** भगवान् **अन्तश्चरति,** आसन्यो जीवो वा.

### टिप्पणी

माशयः. [1](अत्रैवाग्रे **यथान्नभेदेने**ति, यावद्यस्यान्नेन देहः पोषितो भवति तावत्तदीयत्वेन लोके व्यवह्रियते. पुनरन्यस्यान्नेन पोषितः स एव तावत्तदीयत्वेनापि व्यवह्रियते. एवमेकदेहस्यान्नभेदेन भेदव्यवहार इत्यर्थः.) ॥३५॥

### प्रकाशः

इत्यर्थः. तदेव व्युत्पादयन्ति **भगवत** इत्यादि. ननु भगवतः सर्वतः पाणिपादान्तत्वेनैतत्समाधान**मात्तवपुः**पदाद्विरुध्यत इत्यस्वरसात्प्रकारान्तरेण समादधते **स्वामिनीनामि**त्यादि. तथा च व्यवस्थापकाभावान्न कर्मणात्र (सं)बन्ध इति प्रमाणविचारेण समाधिरुक्तः ॥३५॥

**तत्राहे**ति तादृशाशङ्कायां तेषां भ्रान्तत्वमाहेत्यर्थः. **क्रीडनेने**त्यादिना भ्रान्तौ हेतुर्विशदीकृतः ॥३६॥

### योजना

**योऽन्तश्चरती**त्यत्र **जीवो वे**ति, पूर्वस्मिन्पक्षे अपरितोषा**ज्जीवो वे**त्युक्तम्, अतोऽयमेव पक्ष उत्तमः. अतो भगवतो गोपीजीवरूपत्वाद्गोपीदेहो भगवद्देह एवेति न कश्चिद्दोष इत्यर्थः. अतएव पूर्वमुक्तं **नहि स्वस्पर्शः स्वस्य क्वापि निषिद्ध** इति ॥३६॥

१. ( ) चिह्नान्तर्गतं श्रीहस्ताक्षरपुस्तके नास्ति.



सर्ववादिसिद्धान्तसङ्ग्रहाय सामान्यवचनं **योऽन्तश्चरती**ति. **स** एवायं भगवान**ध्यक्षः** प्रत्यक्षः **क्रीडनेन** कृत्वा नटवत् पुरुष**देहं भजते.** वस्तुतस्तु नायं पुमान्, न च स्त्री नाप्यन्यः कश्चित्, "न स्त्री न षण्ढो न पुमानि"ति श्रुतेः. अतः केनापि विचारेण नास्य दोषसम्भवः ॥३६॥

ननु तथापि एवंकरणे कोऽभिप्राय इति चेत्, तत्राह **अनुग्रहाये**ति.

**अनुग्रहाय भक्तानां मानुषं देहमास्थितः ।**
**भजते तादृशीः क्रीडाः याः श्रुत्वा तत्परो भवेत् ॥३७॥**

**भक्तानामनुग्रहार्थ**मेव भक्तसमानरूपं **देहमास्थितः,** विजातीये तेषां विश्वासो न भवेदिति. ततो यथा मनुष्यानुग्रहाय **मानुषो** देहः प्रदर्शितः एवं गोपिकानाम**प्यनुग्रहाय** स्वानन्दं गोकुले दातुं **तादृशीः क्रीडाः भजते,** तत्तद्धर्मप्रवेशव्यतिरेकेण तस्य तस्य दोषस्यानिवृत्तत्वात्. यद्वा **भक्तानां मानुषं देहं** प्रति **आस्था** सञ्जातास्मिन्निति स तथा. तत्रापि महान् पूर्णकामः

### टिप्पणी

**योन्तश्चरती**त्यत्र **वस्तुतस्तु नायमि**त्यादि, देहकृततत्तन्निषेधोऽत्र क्रियते. प्रभुस्तु स्वतएव पुमान्, अतएव श्रुतावेकस्मिन्नेव वाक्ये "पुरुषं पुरुषविधमि"त्युक्तम् ॥३६॥

**भजते तादृशीः क्रीडा** इत्यत्र, **तत्तद्धर्मप्रवेशे**ति श्रोतृणामिति शेषः. यल्लीलाश्रवणमेव भगवद्भावसाधकं तल्लीलामध्यपातिनां स्वरूपं किं वक्तव्यमिति भावः ॥३७॥

### लेखः

**अनुग्रहाये**त्यत्र, **सञ्जाताऽस्मिन्नि**त्यर्थकथनं, विग्रहस्तु षष्ठ्यन्तेनैव तेन "तदस्य सञ्जातमि"त्यनेन 'इतच्'प्रत्ययः. अस्मिन् पक्षे **भक्तानां मानुषं देहमास्थितोऽनुग्रहाय तादृशीः क्रीडा भजते** इत्यन्वयः. **अनुग्रह**पदतात्पर्यमाहुः **तत्रापी**ति. भक्तमानुषदेहास्थायामपि सत्यामनुग्रहोक्त्या स्वस्य पूर्णकामत्वान्निषिद्धप्रकारेण दातुं न शक्तः. अतो नायं निषिद्धः प्रकार इति

### योजना

**अनुग्रहाय भक्तानामि**त्यत्र **तत्तद्धर्मप्रवेशव्यतिरेकेणे**ति, एतस्यार्थ-ष्टिप्पण्यां स्फुटः ॥३७॥

सर्वं दातुं शक्तः न त्वेवं निषिद्धप्रकारेणात्मानं दातुमिति. अत एतां लीलां निरोधपूर्वकादेयदानरूपां यः श्रोष्यति सः सर्वथा भगवत्परो भविष्यतीति भगवता तथाचरणं कृतम्. तदाह **याः श्रुत्वा तत्परो भवेदि**ति ॥३७॥

ननु तथापि लोकव्यवहारे स्त्रियोऽन्याधीना इति अदत्तोपादानं, गोपानां मनसि खेदः, तैः क्रियमाणा अपकीर्तिश्च भवेदित्याशङ्क्याह **नासूयन्नि**ति.

**नासूयन् खलु कृष्णाय मोहितास्तस्य मायया।**
**मन्यमानाः स्वपार्श्वस्थान् स्वान्स्वान्दारान् व्रजौकसः ॥३८॥**

ते भगवन्तं **नासूयन्** असूयया न दृष्टवन्तः. प्रथमतः प्रवृत्तिं ज्ञात्वापि भगव**न्मायया मोहिता नासूयन्.** अग्रे तु **स्वपार्श्वस्थाने**व **स्वान् स्वान् दारान् मन्यमाना** जाताः. यतो **व्रजौकसः** पूर्वापरानुसन्धानरहिताः. सर्वथाङ्गीकृता इतिं वा, एतादृशानां प्रभौ दोषारोपासम्भवादिति भावः. अयमर्थः सर्वजनीन

---

**प्रकाशः**

**नासूयन्नि**त्यत्र, अज्ञानादनारोपे[१] तेषामनङ्गीकृतत्वमायातीत्यरुच्या पक्षान्तरमाहुः **सर्वथाङ्गीकृता इति वे**ति. अस्मिन्पक्षे **माया**पदं बुद्धिवाचकम्, "स्यान् माया शाम्बरी क्रिया दम्भो बुद्धिश्चे"त्यनेकार्थकोशात्. तथा च **तस्य मायया** भगवत्सम्बन्धिन्योत्कृष्टत्वबुद्ध्या **मोहिता** अतिस्नेहकलायुताः सन्तो **नासूयन्.** खलु प्रसिद्धौ, **स्वपार्श्वस्थांस्तान्मन्यमानाः** संमानितवन्त इत्यर्थो बोध्यः. एतदेव विशदीकुर्वन्ति **बुद्धिरेवे**त्यादि. अत्र पक्षद्वयनिरूपणाद्ये

**लेखः**

भावः. अनिषिद्धत्वं व्युत्पादयन्ति **आत्मानं दातुमि**ति, स्वरूपभूतमेवानन्दं दातुं शक्तः. अतो जीववदिन्द्रियद्वारा सुखोत्पादनाभावान्निषिद्धत्वं नेत्यर्थः. **अत** इति निषिद्धप्रकाराभावादित्यर्थः ॥३७॥

**योजना**

**नासूयन्खल्वि**त्यस्य विवृतौ **प्रथमप्रवृत्तिं ज्ञात्वे**त्यादि, "न न्यवर्तन्त मोहिता" इति वाक्यान्निषेधेऽपि भगवन्निकटे तासां प्रवृत्तिं ज्ञात्वापि नासूयन्. तत्र हेतुमाहुः **भगवन्मायामोहिता नासूयन्नि**ति.. **अग्रे तु स्वपार्श्वस्थानि**त्यादि, भगवन्निकटगमनाद् आरभ्य पुनः स्वगृहागमनपर्यन्तं

---

१. अज्ञानादनादरेऽपि इति मुं. वि. पाठः.



इति **खल्वि**त्युक्तम्. भगवत्सान्निध्येऽपि मोहार्थं **तस्ये**ति. बुद्धिरेव तेषां भ्रमात्, शिष्टं भगवत एवेति मननमात्रेणैव सर्वदोषपरिहारः. अनेन तास्वपि दोषारोपो निवारितः ॥३८॥

एवं प्रासङ्गिकं परिहृत्य उक्तां लीलामुपसंहरति **ब्रह्मरात्र** इति.

**ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः।**
**अनिच्छन्त्यो ययुर्गोप्यः स्वगृहान् भगवत्प्रियाः ॥३९॥**

अरुणोदयो **ब्रह्मरात्रं**, तस्मिन् **उपावृत्ते** सम्यक् जाते तदन्तर्यामितया प्रविष्टो भगवान् गृहे गन्तव्यमितीच्छामुत्पादितवान्. ततः भगवतानुज्ञाताः,

---

**प्रकाशः**

गोपाला रात्रिगानपरास्तेषां द्वितीयपक्षे निवेशो अन्येषां च पूर्वस्मिन्निति ज्ञेयम् ॥३८॥

**लेखः**

**नासूयन्नि**त्यत्र. **बुद्धिरेवे**ति, एता अस्मत्समीपमेव स्थिता इति भ्रमं सम्पाद्य **तेषां बुद्धिरेव** मायया मोहितेति शेषः. **शिष्टमि**ति, स्त्र्यादिकं सर्वं भगवदीयमेवेति रमणे वस्तुतो दोषाभावान्मननमात्रेणैव तथेत्यर्थः. बुद्ध्या दोषारोपोऽपि सम्भवतीति सा न भगवदीयेति **शिष्टमि**त्युक्तम् ॥३८॥

**ब्रह्मरात्र** इत्यत्र, **अनुमोदन**पदार्थमाहुः **इच्छामुत्पादितवान् ततोऽनुज्ञाता** इति ॥३९॥ त्रिंशाध्यायव्याख्या समाप्ता॥

**योजना**

तु स्वपार्श्वस्थाभिमानादसूयासम्भावनैव नास्तीति हार्दम्. **बुद्धिरेव तेषां भ्रमादि**त्यादि, **भ्रमा**न्मायामोहजन्याद् या **बुद्धिः** "एता अस्मन्निकटएव वर्तन्ते, भगवन्निकटे सर्वथा न गता" इत्याकारिका, सा तु **तेषां** गोपानां सम्बन्धिनी. **शिष्टं** सर्वं देहेन्द्रियप्राणान्तःकरणजीवाप्तगेहादिकं **भगवतएव** भगवदीयमेवेत्यर्थः. गोपीनां सर्वं भगवदीयमेवेति तन्मध्ये भर्तृत्वेन प्रसिद्धानां गोपानामपि निवेदितत्वादेतेषां भगवति दोषस्फूर्तिरिव महान् दोषः, स च **मन्यमानाः स्वपार्श्वस्थानि**त्यनेन दोषारोपाभावोक्तेर्गतः; अतः सर्वदोषपरिहार इत्यर्थः. **अनेन तास्वपी**ति, गोपानां निर्दोषत्वे निर्दुष्टसङ्गादेतासामपि दोषो निवारित इत्यर्थः. अन्यथा तत्संसर्गजदोषस्यैतास्वपि संक्रमः स्यात् ॥३८॥

यतो भगवान् मोक्षदाता. ताश्चेद् आसन्ध्यमन्तःस्मरणं करिष्यन्ति तदा मोक्षाधिकारिण्यो भविष्यन्तीति **वासुदेवेनानुमोदिताः**. यद्यपि तासामिच्छा न स्थिता, सर्वपरित्यागेन भगवद्भजनस्य कृतत्वात् किं गृहेण लोकैर्वेति, तथापि **गोप्य** इति विपरीतबुद्धिर्हठबुद्धिश्च तासां नास्तीति **स्वगृहान् ययुः**. तथापि तासां न गृहाः प्रियाः किन्तु **भगवानेव**. नापि संसारभयम्, यतो **भगवतः प्रियाः** ॥३९॥

मोक्षार्थमिदं चरित्रमिति ज्ञापयितुं एतदुपाख्यानश्रवणस्य फलमाह **विक्रीडितमि**ति.

**विक्रीडितं व्रजवधूभिरिदं च विष्णोः**
**श्रद्धान्वितोपशृणुयादथ वर्णयेद्यः ।**
**भक्तिं परां भगवति प्रतिलभ्य कामं**
**हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ॥४०॥**

*॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासक्रीडावर्णनं नाम त्रिंशोऽध्यायः ॥*

---

**टिप्पणी**

**ब्रह्मरात्र** इत्यत्र, **वासुदेव**पदतात्पर्यमाहुः **यतो भगवानि**त्यादि. दिवा विप्रयोगजार्तौ सत्यां दिनान्ते प्रियसंगमे य आनन्दो, न स सदा दर्शन इति सोऽत्र **मोक्ष**पदेनोच्यते ॥३९॥

श्रुतिसिद्धरसात्मत्वं प्रकटीकृत्य भूतले।
क्रीडन्मल्लोचने शश्वच्छिशिरीकुरुते प्रभुः ॥

॥ इति त्रिंशोऽध्यायः ॥

**प्रकाशः**

**ब्रह्मरात्र** इत्यत्र, पूर्वश्लोके 'दार'पदादत्र अन्यपूर्वाणामेव गृहगमनं न कुमारिकाणामिति शङ्कानिरासोऽपि टिप्पण्यां **दिवा विप्रयोगे**त्यादिनैव कृतो बोध्यः ॥३९॥

*॥इति श्रीपीताम्बरकृतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः तामसफलप्रकरणीयः॥*

**योजना**

**ब्रह्मरात्र उपावृत्त** इत्यस्य विवृतौ **मोक्षाधिकारिण्यो भविष्यन्ती**ति, **मोक्ष**पदार्थष्टिप्पण्यां विवृतः ॥३९॥



**व्रजवधूभिः** सह भगवत **इदं विशेषण क्रीडितं श्रद्धान्वितो** भूत्वा सम्यक् कथ्यमान**मुपशृणुयात्** अथवा **वर्णयेत्**, श्रवणानन्तरमेव कीर्तनमित्य**थ**शब्दः. **य** इति नात्र वर्णादिनियमः किन्तु यः कश्चन, भगवतो माहात्म्यश्रवणादेवमपि मोचयतीति. भक्तानां च सर्वथा प्रतिपत्तिश्रवणाच्च. **भगवति परां भक्तिमु**पगतः ततो भक्त्या अन्तःस्थिरीभूतया **हृदयस्य रोग**रूपं **काममाशु** शीघ्रमे**वापहिनोति**, यः पूर्वं हृदयबाधकत्वेन स्थितः शीघ्रमेव च बाधकर्ता, तमाश्वेव दूरीकरोति श्रवणमात्रेणैव. ततः पूर्ववासनया पुनरुद्गमे **अचिरेणैव धीरो** भवति. अत इदं साभिप्रायं श्रोतव्यमिति फलप्रकरणत्वात् फलमुक्तम् ॥४०॥

*॥ इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभ-दीक्षितविरचितायां दशमस्कन्धविवरणे त्रिंशाध्यायविवरणम् ॥*

---

**योजना**

**विक्रीडितमि**त्यस्य विवृतौ **किन्तु यः कश्चन** शृणुयाद् वर्णयेद् वा स उक्तं फलं प्राप्नोतीत्यर्थः. **भगवतो माहात्म्यश्रवणादेवमपि मोचयतीती**ति, **एवमपि** श्रवणमात्रेण वर्णनमात्रेणापि गुणान्तरराहित्येऽपि भगवान् **मोचयती**त्यर्थः. **शीघ्रमेव च बाधकर्ते**ति, इह **हृद्रोगमाश्वपहिनोती**ति वाक्ये **आशु हृद्रोगमित्याशु**शब्दस्य पूर्वेण **हृद्रोग**पदेनान्वयं कृत्वा व्याख्यातं **शीघ्रमेव च बाधकर्ते**ति. **तमाश्वेव दूरीकरोतीति हृद्रोगमाश्वपहिनोती**ति वाक्ये **आश्वपहिनोतीत्याशु**पदस्य परे**णापहिनोती**ति पदेनान्वयं कृत्वा व्याख्यातम्. एव**माशु**पदस्य देहलीदीपन्यायेनोभयत्रान्वयः कृत इति बोद्धव्यम् ॥४०॥

शृङ्गारस्थायिभावत्वाद् बालकृष्णस्वरूपवान्।
सएव रसतां प्राप्तो गोवर्धनधरः प्रभुः ॥

*॥ इतिश्रीमद्गोवर्धनधर-श्रीवल्लभाचार्यवर-श्रीविठ्ठलेश्वरचरणानुचरसेवकेन दीक्षितलालूभट्टेन कृता दशमस्कन्धत्रिंशाध्यायसुबोधिनीयोजना सम्पूर्णा ॥*

## ॥ इति त्रिंशोध्यायः ॥

# ॥ षष्ठः स्कन्धादितः एकत्रिंशोऽध्यायः ॥

एवं रूपप्रपञ्चस्य पञ्चधा रसवर्णनम् ।
निरूप्य नामलीलातो रसार्थमिदमुच्यते ॥(१)॥
एवमुद्धृतभक्तास्तु यद्यन्यं समुपासते ।
दुःखभाजो भवन्त्येव मुच्यन्ते हरिणैव तु ॥(२)॥

**टिप्पणी**

अथैकत्रिंशाध्यायं विवृण्वन्त उक्तलीलानन्तरमन्यभजनं कुतुकादपि व्रजवासिनामनुपपन्नमित्याशङ्क्य इदं प्रकरणं न सर्वथा पूर्वप्रकरणमध्यपातीति ज्ञापनाय पूर्वप्रकरणार्थमनूद्यैतदुक्तितात्पर्यमाहुः **नामलीलात** इत्यारभ्य **हरिणैव त्वित्यन्तेन**. **नामलीलातो** यो **रसस्तदर्थम**न्यभजननिवृत्तिपूर्वक**मिदं** प्रकरण**मुच्यत** इत्यर्थः. यथा रूपलीला स्वतन्त्रा तथा नामलीलापीति ज्ञापनाय भिन्नोपक्रमेणैतत्प्रकरणारम्भः कार्यः. तत्रान्यभजननिवृत्तिपूर्वकं भगवन्माहात्म्यज्ञानमङ्गं तदर्थं तथोच्यते. **एवमुद्धृतभक्ता** इति इन्द्रभजननिवृत्तिपूर्वकमित्यर्थः (१-२).

एतावान्परं विशेषो यद्रूपलीलारसानुभवे वैष्णवधर्माणामपि त्यागोऽङ्गं, नामलीलारसानुभवेऽन्यदेवताभजननिवृत्तिस्तथा, न तु विहितानां भगवद्धर्माणामपि, विधेरपि नामलीलामध्यपातित्वात्, मर्यादापुष्टिभेदेन तस्या द्विविध-

**लेखः**

एकत्रिंशे कारिकासु **एवमिति**, **रूपविस्तारस्य** सर्वत्र तत्तत्प्रकारेण स्थितस्वरूपस्य **रसः** स्वरूपानन्द इति यावत्, तस्य **वर्णनं** भक्तेषु विस्तारणं "आत्मने"त्यादि **पञ्चधा निरूप्येत्यर्थः** (१).

**कारिकार्थः**

एकत्रिंशाध्याये **एवं रुपप्रपञ्चस्येत्यादि**, **एवं** पञ्चभिरध्यायैः **रूपप्रपञ्चस्य पञ्चधा** "आत्मना प्रथमा लीले"त्यादिप्रकारेण **रसवर्णनं निरूप्य नामलीलातो** गानात्मकशब्दलीलातो यो **रसः** तद**र्थम**न्यभजननिवृत्तिपूर्वक**मिदं** प्रकरण**मुच्यत** इत्यर्थः (१).

**एवमुद्धृतभक्ता** इति, इन्द्रभजननिवृत्तिपूर्वकमुद्धृता इत्यर्थः. अतएव नन्दस्य अम्बिकाद्यन्यदेवता-भजनहेतुकः क्लेशः हरिणैव मोचनञ्च (२).



एकत्रिंशे सर्वभावान्निवृत्तानां तु पूर्ववत् ।
गानेन रमणं चक्रे प्रमाणानन्दसिद्धये ॥(३)॥
बलभद्रेण सहितो वेदरूपेण सर्वथा ।
तद्दोषं नाशयामास हरिरित्युच्यते स्फुटम् ॥(४)॥

**टिप्पणी**

त्वान्मर्यादामिश्रपुष्टिमार्गीयाः पूर्वाध्याये कथ्यन्ते, शुद्धपुष्टिमार्गीया द्वितीये. मर्यादामार्गस्य सदोषत्वज्ञापनाय शङ्खचूडप्रसंगः.

**लेखः**

**पूर्ववदिति**, इन्द्रयागनिवृत्तिवदत्रापि धर्मान्तरेभ्यो **निवृत्तानां** भक्तानां **प्रमाणानन्दसिद्धये बलदेवसहितो रमणं चक्रे**, ततो मर्यादामिश्रणात् प्राप्तं **दोषं** सर्वप्रकारेण **नाशयामासेति** एकत्रिंश उच्यते इत्यन्वयः (३-४).

**योजना**

श्रीगिरिधारी करोतु कुशलानि. एकत्रिंशाध्यायार्थोक्तौ **प्रमाणानन्दसिद्धये** इति, **प्रमाणस्य** वेदरूपस्य बलदेवस्य सम्बन्धी य **आनन्दस्त**स्य **सिद्धये** इदं **रमणं** प्रभु**श्चक्र** इत्यन्वयः. युक्तं चैतत्, प्रमाणप्रधानतया पुरुषोत्तमं भजन्तीभ्यः श्रुतिरूपाभ्यो गोपिकाभ्यः प्रमाणरूप-बलदेवसहित-पुरुषोत्तम-रमणानन्दानुभव एव दातव्य इति तथैव बलदेवसहितो भगवान् रेमे इत्यर्थः. **बलभद्रेण सहितो वेदरूपेणे**ति, "शब्दब्रह्म परंब्रह्म ममोभे शाश्वती तनू" इति वाक्याद् वेदरूपताक्षरब्रह्मरूपता च ज्ञातव्या, "जगद्गुरुं सात्वतशास्त्र-विग्रहमि"तिवाक्येऽपि वेदरूपताया उक्तत्वात्, सात्वतशास्त्रस्य वेदादेर्विग्रहत्वेन कथनात् (३-४).

**कारिकार्थः**

**पूर्ववदिति**, इन्द्रयागनिवृत्तिवदत्रापि अन्य**भावाद्** देवतान्तरभजनात् **निवृत्तानां** भक्तानां **प्रमाणानन्दसिद्धये वेदा**त्मक-प्रमाण**रूप-बलदेवसहितो रमणं चक्रे**. ततो मर्यादामिश्रणात् प्राप्तं शंखचूडात्मकं **दोषं सर्वथा नाशयामासेति एकत्रिंशे उच्यते** इत्यर्थः. अत्र टिप्पण्यां— मर्यादापुष्टिभेदेन नामलीलायाः द्विविधत्वात् मर्यादामिश्रपुष्टिमार्गीयाः पूर्वाध्याये कथ्यन्ते, शुद्धपुष्टिमार्गीया द्वितीये. मर्यादामार्गस्य सदोषत्वज्ञापनाय शंखचूडप्रसंग इति (३-४).

शब्दतोऽप्यानन्दं निरूपयितुं प्रथमं गोकुलवासिनामन्यासक्तिं निवारयति **एकदे**ति विंशत्या.

**॥ श्रीशुक उवाच ॥**

**एकदा देवयात्रायां गोपाला जातकौतुकाः ।**
**अनोभिरनडुद्युक्तैः प्रययुस्तेऽम्बिकालयम् ॥१॥**

लोकमान्येनाप्यन्यत्र गमनेऽनिष्टं भवतीति तेषां यात्राप्रसङ्गो निरूप्यते. **एकदा** शिवरात्रिसमये. प्रतिवर्षं न गच्छन्तीत्य**एकदे**त्युक्तम्. **देवयात्रा** हि नित्या, **गोपालाश्च** साधारणधर्म एवाभियुक्ता इति. तत्रापि धर्मबुद्धिः प्रासङ्गिकी, वस्तुतस्तु **जातकौतुकाः**. अतएव न पद्भ्यां गमनं किन्त्व**नोभिः** शकटैः. तत्रापि नाश्वयोजनं किन्तु **अनडुद्युक्तैः** **प्र**कर्षेण **ययुः** महता समारम्भेण गृहे पुरुषानभिनिवेश्य **अम्बिकालयं** मथुरातः पश्चिमे देशे अर्बुदाचलनिकटे स्थितं तीर्थविशेषं **ययुः** ॥१॥

तत्र गतानां पूजाप्रकारमाह **तत्र स्नात्वे**ति.

---

**लेखः**

**एकदे**त्यस्याभासे **आनन्दं निरूपयितुमि**ति "कदाचिदथ गोविन्द" इत्यादिनेति शेषः. **निवारयति** इत्याहेति शेषः. व्याख्याने, एतेषामेवं बुद्धौ हेतुमाहुः **देवयात्रा ही**ति. अन्यधर्मस्य काम्यस्यैव त्यागो, न तु नित्यस्य. **हि** यत इयं **नित्या**ऽतस्तेषां तथा बुद्धिरिति कर्मनिष्ठो हेतुरुक्तः. गोपीनामेव प्रकरणेऽप्यत्र गोपालानामपि निरूपणं धर्मतः साम्येन प्रसङ्गादिति वदन्तः कर्तृनिष्ठमपि हेतुं समुच्चिन्वन्ति **गोपालाश्चे**ति. न तु मुख्यस्वामिनीवदसाधारणे प्रमेयधर्मेऽभियुक्ता इत्यर्थः. वस्तुतस्तु नित्यमपि देवान्तरसम्बन्धिकर्म शरणमार्गीयैस्त्यक्तव्यमेव. वैदिकमन्त्रोक्तानां देवानां तु "देवा नारायणाङ्गजा" इतिवाक्याद् भगवदवयवत्वं, न तु देवान्तरत्वम्. कर्मणोऽपि तदुक्तस्य भगवत्क्रियाशक्तिरूपत्वमेवेति निबन्धे व्यवस्थापितम्. अतो वैदिकं कर्म काम्यमेव विकृतत्वात्त्यक्तव्यम्. स्मार्तं तु देवान्तरसम्बन्धि उभयविधमपि, "सर्वधर्मानि"ति वाक्यात्. श्राद्धतीर्थस्नानदानादिकं "विष्णुः प्रीयतामि"ति सङ्कल्पेन कर्तव्यम्. यत्र विष्णुप्रीतिसङ्कल्पो न सम्भवति तच्छिवरात्र्यादिकं शरणमार्गीयैस्त्यक्तव्यमिति सिद्धान्तः. **मथुरात** इति, व्रजस्यापि मथुरामण्डलान्तर्गतत्वमिति भावः ॥२॥



**तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं प्रभुम् ।**
**आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेऽम्बिकाम् ॥२॥**

**सरस्वती तत्र** प्रादुर्भूता, अतः **स्नात्वा** पशुपाशविमोक्षणार्थं स्वयं पशुपालका इति **पशूनामधिपतिं** पशुपालने फलदातारं **प्रभुं** सर्वदानसमर्थ**मर्हणैः** पूजाद्रव्यै**रानर्चुः**; न तु पामरवद् गमनमात्रम्. **देवीं च अम्बिकां** पार्वती**मानर्चुः**, चकारात्तदावरणदेवताः. **नृपते** इति सम्बोधनं यात्रायां तथाकरणे परिज्ञानाद्विश्वासार्थम् ॥२॥

पूजामुक्त्वा दानान्यप्याह **गाव** इति.

**गावो हिरण्यं वासांसि मधुमध्वन्नमादृताः ।**
**ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ॥३॥**

सर्वकाम्यान्येतानि दानानि— **हिरण्यं** सुवर्णं **वासांसि** नानाविधानि **मधु च मध्वन्नं** च. ग्राम्यारण्ययोः सिद्ध्यर्थं मधुमध्वन्नयोर्दानम्. गोभिः रुद्रः प्रीतो भवति, हिरण्येनाग्निः, सोऽपि रुद्रएव. वासांसि सर्वदैवत्यानि सोमदैवत्यानि च. उमया सहितः सोऽपि तेन प्रीतो भवति. एवं पञ्च दानानि **आदृताएव** चक्रुः. पात्रसम्पत्तिमाह **ब्राह्मणेभ्य** इति. **सर्व** इति सङ्गदोषोऽपि व्यावर्तितः. कामनां च व्यावर्तयति **देवो नः प्रीयता**मिति, **देवो** महादेवः, अथवा यएव देव इति साधारणं वचनं, **नो**ऽस्माकं प्रीतो भवत्विति, न त्वन्या काचित् कामना ॥३॥

एवं यात्रायां कृत्यमुक्त्वा नियमेन तीर्थस्थितिमाह **ऊषुरि**ति.

**ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्रताः ।**
**रजनीं तां महाभागा नन्दसुनन्दकादयः ॥४॥**

**सरस्वतीतीर**एव अन्तःशुद्ध्यर्थं **जलमेव प्राश्य तां रजनीमूषुः**, न तु

---

**लेखः**

**गावो हिरण्यमि**त्यत्र **सोऽपि रुद्र** इति. "देवासुराः संयत्ता आसन्नि"त्यत्र अग्नेरेव रोदनाद्रुद्रत्वमुक्तम् ॥३॥

**योजना**

**गाव** इत्यत्र **सोऽपि रुद्र** इति, अग्निरपि रुद्र एवेत्यर्थः, "यदरोदीत्तद्रुद्रस्य रुद्रत्वमि"ति तैत्तिरीयाणां प्रथमाष्टके रोदनाद्धेतोरग्ने रुद्रत्वकथनात् ॥३॥

रजन्यां किञ्चित् कृतमिति. एतावान् धर्मः सिद्धः. अग्रिमानिष्टं निवर्तिष्यत इति **महाभागा** इत्यनेन द्योतितं श्रोतुः सन्देहाभावाय. **नन्दः सुनन्दकश्च** प्रधानभूतौ येषां, **नन्द** इति प्रधाननाम्ना वा सर्वे व्यपदिष्टाः. **सुनन्दक आदिर्येषामिति** सर्वेषामेव नन्दतुल्यता. भगवत्सम्बन्धादत्यानन्दयुक्तः **सुनन्दको** भवति, उपनन्दोऽन्यो वा; नन्दएव वा धर्मप्राधान्येन गृहीतः ॥४॥

एवं सर्वतो धर्मसम्पत्तियुक्तानां भगवद्भावे तिरोभूते निरोधस्य वक्तव्यात् शकटाक्षेपवत् सर्पेण नन्दग्रासमपि भगवान् कारितवानित्याह **कश्चिदि**ति.

**कश्चिन्महानहिस्तस्मिन् विपिनेऽतिबुभुक्षितः ।**
**यदृच्छयागतो नन्दं शयानमुरगोऽग्रसीत् ॥५॥**

**महानहिर**जगरः, स हि क्षुधितएव तिष्ठति कदाचिदेवान्नं प्राप्नोति. तत्र दैवगत्या **तस्मिन् विपिने** आहाराभावाद् **अतिबुभुक्षितो** जातः. **यदृच्छया**कस्मिकविधिना तेन नन्दः प्राप्तः. **यदृच्छयैव** नन्दसमीप**मागतः.** नन्दोऽपि दैवगत्या निद्राणो जातः, वस्तुतस्तु जाग्रता स्थातव्यम्. अतः **शयानं नन्दं** मुख्यमेव, **उरगः**, आगमने ज्ञातुमशक्यः, **अग्रसीत्** जग्रास ॥५॥

ततो यज्जातं तदाह **स चुक्रोशे**ति.

**स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयम् ।**
**सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ॥६॥**

कण्ठादधोभागेऽ**हिना ग्रस्तः** पूर्वं केवलं **चुक्रोश,** पश्चान्माहात्म्यं स्मृत्वा

---

**टिप्पणी**

**रजनीं तां महाभागा** इत्यत्र **अग्रिमानिष्टमि**ति, सर्वथा परिग्रहो भाग्ये महत्त्वं, तद्वत्त्वादेतेषामन्यभजने दुःखसम्भवः, उपेक्षायां तु सुखमेव भवेदिति भावः ॥४॥

**लेखः**

**ऊषुरि**त्यत्र **एतावानि**ति. उपवासान्तः सर्वोऽपि **सिद्धः** तथापि **'महाभागा' इत्यनेन द्योतितमग्रिमानिष्टं** भगवता **निवर्तिष्यत** इति **श्रोतुः** शङ्काभावाय उक्तमिति शेषः. भाग्यमहत्त्वं टिप्पण्यां विवृतम्. **प्रधानमाम्ना वे**ति, तदा नन्दाश्च ते सुनन्दकादयश्चेति विग्रहः. **नन्दएव वे**ति, तदा नन्दश्चासौ सुनन्दकश्च तदादय इतिविग्रहः ॥४॥



"कृष्ण! कृष्ण!" इत्यादरेण भयाद्वा सम्बोधनं कृत्वा स्वानिष्टं निवेदयति **महानयं सर्पो मां ग्रसत** इति. **ताते**ति सम्बोधनं स्नेहाद्वैक्लव्यात्. परिमोचने हेतुं वदन्नेव प्रार्थयते **प्रपन्नं परिमोचये**ति ॥६॥

ततो भगवन्मोचनात् पूर्वमेव अन्ये गोपालाः प्रतिक्रियार्थमुद्यता जाता इत्याह **तस्य चे**ति.

**तस्य चाक्रन्दितं श्रुत्वा गोपालाः सहसोत्थिताः ।**
**ग्रस्तं च दृष्ट्वा विभ्रान्ताः सर्पं विव्यधुरुल्मुकैः ॥७॥**

नन्दस्य विज्ञतां बोधयितुमन्येषामविज्ञतां च, प्रार्थनाप्रतिक्रिययोर्निरूपणम्. **तस्य** नन्दस्य **आक्रन्दितं श्रुत्वा सहसैव** विचारमकृत्वैव भगवन्तमपृष्ट्वैव स्वयमे**वोत्थिताः** नन्दं **च ग्रस्तं दृष्ट्वा विशेषेण भ्रान्ताः** सन्तः शीतार्थं ज्वालितै**रुल्मुकैः सर्पं विव्यधुः.** अनेनोपायेन नन्दोऽपि म्रियेत, तथाप्यज्ञानाद्भगवति विद्यमाने यात्रावदिदमपि कृतवन्तः ॥७॥

तथाप्यनुपायत्वान्न फलितमित्याह **अलातैरि**ति.

**अलातैर्दह्यमानोऽपि नामुञ्चत् तमुरङ्गमः ।**
**तमस्पृशत् पदाभ्येत्य भगवान् सात्वतां पतिः ॥८॥**

स हि भक्षयितुमेव जानाति, न त्यक्तुम्, अतो **नामुञ्चत्.** ततो यदुचितं तमुपायं भगवान् कृतवानित्याह **तमस्पृशदि**ति, स्वय**मभ्येत्य पदा तमस्पृशत्.** तस्य हि कर्मक्षयः कर्तव्यः. स ज्ञानेन भक्त्या वा. ज्ञाने त्वधिकारिशरीरमपेक्ष्यते. भक्तिरप्यत्र प्रमेयलभ्यैव. अतस्तस्य भक्तिसिद्ध्यर्थं भगवदीयशरीरप्राप्त्यर्थं **पदा अस्पृशत्.** स्वयमागत्येति तस्यापि साधनापेक्षाभावाय. तस्य तथाकरणसामर्थ्यावश्यकत्वाय **सात्वतां पतिरि**ति, वैष्णवानामयं पतिः, अतो वैष्णवहितार्थं तथा कृतवान् ॥८॥

ततो यज्जातं तदाह **स वाइ**ति.

---

**लेखः**

**तमस्पृशदि**त्यत्र. **भक्तिरपी**ति, अतश्चरणस्पर्शो, नोचेत् श्रवणादिकमेव सम्पादयेदिति भावः. **तस्यापी**ति, प्रमेयस्यापि प्रपत्त्यादिसाधनापेक्षाभाव उक्तः. चरणे तादृशसामर्थ्यस्थापने हेतुमाहुः **तस्य तथे**ति, **तस्य** चरणस्योत्तमदेहकरणसामर्थ्यं भगवतो वैष्णवपतित्वात् तद्देहसम्पादनायावश्यकमित्यर्थः ॥८॥

**स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ।**
**भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितम् ॥९॥**

**वै** निश्चयेन **स सर्पवपुर्हित्वा विद्याधररूपं भेजे.** परं पूर्वस्माद्विशिष्टं, भगवदीयत्वात्. तदाह **विद्याधरैरर्चितमि**ति, विद्याधराणां देवरूपो जातः. सर्वापकृष्टा सर्पयोनिः, सर्वोत्तमा भगवदीया –एवं चरणप्रभावः. तस्य सर्वाधमस्य सर्वोत्तमत्वप्रापणे प्रमेयबलमेव हेतुरित्याह **भगवत** इति. देहमात्रे उपपत्तिरुक्ता. तस्य लोके सर्वोत्तमत्वाय चरणं विशिनष्टि **श्रीमत्पादे**ति, तस्य **स्पर्शेन हतमशुभं** यस्य. सर्ववपुःपरित्यागे पापनाशो हेतुः. गुणाधानेऽपि तत्स्पर्शएव हेतुः. यथायोग्यं पदार्थाभिनिवेशः कर्तव्यः. चरणरजएव सामग्रीसम्पादकम् ॥९॥

एवमुपकारमयुक्ते कृतवानिति शङ्कां वारयितुं तस्य भगवत्कृतोपकारज्ञानमप्यस्तीति ज्ञापयितुं भगवांस्तं पृच्छतीत्याह **तमपृच्छदि**ति.

**तमपृच्छद् हृषीकेशः प्रणतं समवस्थितम् ।**
**दीप्यमानेन वपुषा पुरुषं हेममालिनम् ॥१०॥**

यद्यपि स्वयं तस्यान्तःकरणं सर्वमेव जानाति यतो **हृषीकेशः,** तथापि तत्र शास्त्रीयं सामर्थ्यं स्थापयितुं परिभाषणपूर्वकं तस्यान्तःकरणं बोधयतीत्याह **हृषीकेश** इति. तथाकरणे हेतुः **प्रणतमि**ति. तर्हि पूर्वं कथमन्यथाकृतवानित्याशङ्क्याह **समवस्थितमि**ति, पूर्वं तु न सम्यगवस्थितः इदानीं तु नम्रभावेन स्थित इति. आन्तरमप्यस्य स्वरूपं समीचीनमिति ज्ञापयितुं बहिःकान्तिं वर्णयति **दीप्यमानेन वपुषे**ति, यथा भगवदीयस्य तेजोवच्छरीरं भवति तथा दीप्यमानेन वपुषा उपलक्षितः. उत्कृष्टयोनावपि भगवदीयत्वेऽपि तरतमभावोऽस्तीति कदाचित्तिर्यगादिरूपं स्त्रीरूपं वा प्राप्नुयादिति शङ्कां वारयितुमाह **पुरुषमि**ति. तत्रापि सर्वगुणपूर्णतां ज्ञापयितुमाह **हेममालिनमि**ति, महानेवालङ्कृतो भवतीति ॥१०॥

---

**लेखः**

**तमपृच्छदि**त्यत्र **शास्त्रीयमि**ति वचनद्वारेति भावः. **तर्हि पूर्वमि**ति, पूर्वं प्रबोधनमकृत्वा सर्पदेहत्याजनरूपं मारणमेव कुतः कृतवानित्यर्थः. **तेजोवदि**ति तुल्यार्थे 'वतिः', प्रकाशकत्वेन तुल्यता. **वपुषे**ति सहार्थे तृतीया व्याख्याता ॥१०॥



प्रश्नमाह **को भवानि**ति.

**को भवान् परया लक्ष्म्या रोचतेऽद्भुतदर्शनः ।**
**कथं जुगुप्सितामेतां वनं वा प्रापितोऽवशः ॥११॥**

**क** इति जातिनाम्नोः प्रश्नः. स्वभावतोऽप्यमहतः सहसैव साधने न महत्त्वमापद्यत इति भगवानपि तं वर्णयति **परया लक्ष्म्या रोचते भवानि**ति. किञ्च देवादयः सर्वएव समागताः बहुधा दृष्टाः परं **भवानद्भुतदर्शनः,** अद्भुतं दर्शनं यस्येति नैवंविधः कश्चित्तेजस्वी दृष्टपूर्व इत्यर्थः. इदं पूर्वपुण्यनिचयव्यतिरेकेण न भवति, तस्मिंश्च सति **कथं जुगुप्सिता** योनिरिति? **अवश्यं** केनचित् **प्रापित** इति शापएव किञ्चित्कारणं भविष्यतीति तथोच्यते. तत्रापि **वनं** केन **वा प्रापित** इति ॥११॥

अयं पूर्वमपि सर्पएव स्थितः, भगवत्कृपया विद्याधरत्वं प्राप्त इति. पुनः सर्प एवायं जातः, अतः **सर्प उवाचे**ति. स्वस्य पूर्ववृत्तान्तमाह **अहमि**ति श्लोकद्वयेन.

**॥ सर्प उवाच ॥**

**अहं विद्याधरः कश्चित् सुदर्शन इति श्रुतः ।**
**श्रिया स्वरूपसम्पत्त्या विमानेनाचरन् दिशः ॥१२॥**
**ऋषीन् विरूपानाङ्गिरसः प्राहसं रूपदर्पितः ।**
**तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना ॥१३॥**

**विद्याधरा** देवविशेषाः. **कश्चिदि**त्यप्रसिद्धः. **सुदर्शन इति** वि**श्रुतः** प्रसिद्धः. अनेनैव वैष्णवनाम्ना अग्रे भगवत्कृपा जातेति ज्ञापयितुं विश्रुतत्वकथनम्. तस्य देहकान्तिः धनम् अद्भुतसामर्थ्यं चेति पूर्वमपि गुणत्रयं स्थितमित्याह **श्रिया स्वरूपसम्पत्त्या विमानेने**ति. **दिशः** दश **आसमन्ताच्चरन्,** सर्वत्राप्यप्रतिहतगतिः. एवं स्वरूपमुक्त्वा अपराधफले निरूपयति **ऋषीनि**ति. **अङ्गिरसगोत्रे** उत्पन्ना **ऋषयः** अष्टावक्रवद् **विरूपाः** स्थिताः. स्वयं तु **रूपेण दर्पितः प्राहसं,** यथा बालः प्राकृतो हसति. पश्चात्

---

**लेखः**

**को भवानि**त्यत्र **महत्त्वमि**ति, इदं प्रथमान्तम्. **अमहत** इति सम्बन्धमात्रविवक्षया कर्मणि षष्ठी. तथा च **महत्त्वं** कर्तृ अमहान्तं पुरुषं **नापद्यते** न प्राप्नोति, तदनुगतं न भवतीत्यर्थः ॥११॥

तच्छापेन **इमां** सर्प**योनिं** प्राप्तः. सर्पयोनिप्राप्तौ विशेषहेतुमाह **प्रलब्धैरिति**– **प्रलब्धा** वक्रोक्त्या वञ्चिताः उद्वेजिताः, स्वरूपतो निष्कारणमुद्वेजकः सर्पएव भवति, अत इमां योनिं प्राप्त इति. नन्वल्पेऽपराधे कथं महान् दण्डस्तैः कृत इत्याशङ्क्याह **स्वेन पाप्मनेति**, पूर्वं हि ब्रह्मवृत्तिरपहृता, अतस्तेन भाव्यमेव ऋषिभिः केवलं प्रकटितमित्यर्थः ॥१२-१३॥

एवमपराधशापौ निरूप्य तस्य वैष्णवत्वसिद्ध्यर्थं निर्मत्सरतामाह **शापो म**इति.

**शापो मेऽनुग्रहायैव कृतस्तैः करुणात्मभिः ।**
**यदहं लोकगुरुणा पदा स्पृष्टो हताशुभः ॥१४॥**

पूर्वं विद्याधरत्वेन कदापि मुक्तिः स्याद्, अतोऽयं **शापोऽनुग्रहार्थएव** यद्यपि लोकेऽनिष्टरूपः तथापि **मे**ऽनुग्रहार्थएव जातः. यतस्ते करुणावन्तः; नहि करुणावतां शापोऽन्यथा भवति, तत्रापि प्रसिद्धानाम्. तदाह **तैः करुणात्मभिरिति**. तस्यानुग्रहरूपत्वमाह **यदहं लोकगुरुणेति**. ननु शापः पूर्वसिद्धः, स दोषात्मकएव, तेन कथमिष्टसिद्धिः? तत्राह **कृत** इति, अयं शापः **तैरेवा**पूर्वं **कृतः**. भगवद्दर्शनं ऋषीणामनुग्रहाद् भवति, तदत्र शापादेव जातमिति तस्यानुग्रहत्वम्. किञ्च **लोकगुरुणा** त्रैलोक्यस्यैव ज्ञानोपदेशकर्त्रा **पादेन स्पृष्ट** इति, गुरुसेवया हि ज्ञानं सिध्यति. सा सेवा तदा पुष्टा भवतीति निश्चीयते यदि स्वयं पदा स्पृशति गुरुः. अतिविश्वस्तं प्रीतिमन्तमेव स्वयं पदा स्पृशति. तेनैवापराधः पूर्वपापमपि गतमित्याह **हताशुभ** इति, हतमशुभं यस्य ॥१४॥

एवं भगवच्चरणस्पर्शाभिनन्दनं कृत्वा तेनैव जातं फलं प्रार्थनामिषेण कीर्तयति **तं त्वाहमिति** सार्धैस्त्रिभिः.

---

### टिप्पणी

**स्वेन पाप्मनेत्यत्र पूर्वं हीति**, ब्रह्मवृत्त्यपहारस्य सर्पयोनिफलकत्वादिति भावः ॥१३॥

### लेखः

**शापो मे** इत्यत्र अपूर्वमिति, इदं क्रियाविशेषणम्. भगवद्दर्शनसाधकशाप-करणमपूर्वमेव, पूर्वं न सिद्धमित्यर्थः ॥१४॥



**तं त्वाहं भवभीतानां प्रपन्नानां भयापहम् ।**
**आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन् ॥१५॥**
**प्रपन्नोऽस्मि महायोगिन् महापुरुष सत्पते ।**
**अनुजानीहि मां देव सर्वलोकेश्वरेश्वर ॥१६॥**

आदौ फलानुज्ञां प्रार्थयति. **तं** सर्वफलदातारम्. **तु**शब्देन कर्मणापि फलमित्यादिपक्षं व्यावर्तयति **तं त्विति**. **त्वा** त्वां वा. पूर्वार्धे **आङ्**मध्ये, आसमन्ताद् **भवभीतानामिति**. ये केचन दुर्लङ्घ्यादपि संसाराद् भीताः तेषामपि भवान् भयं दूरीकीरोति [1]प्रपत्तिमात्रेणैव. भगवत्सेवार्थं हि संसारे उत्पाद्यन्ते. ते सर्वे संसारगतमायया विपरीताएव भवन्ति. तथापि 'कृष्ण तवास्मी'त्युक्तः सर्वमेव भयं दूरीकरोति. अतोऽस्माकमपि– वयं सापराधाः नन्दस्य ग्रासं कृतवन्तः– किं करिष्यतीति शङ्का निवर्तिता. अत **आपृच्छे** आसमन्तात् पृच्छामि सम्भाषणं करोमि, मध्ये समागतोऽप्युपद्रवो नष्ट इति. आगन्तुकोऽपि दोषो नास्ति, तदाह **शापनिर्मुक्त** इति. **पादस्पर्शादि**त्युभयत्र हेतुः. तथापि सहजपापस्य विद्यमानत्वात् कथं सम्भाषणयोग्यतेत्याशङ्क्याह **अमीवहन्निति**, **अमीवं** पापं **हन्तीति** ॥१५॥

तथाप्यन्यप्रेरणया दण्डं मा कुर्यादिति भीतः सन् शीघ्रं गमनं प्रार्थयन् पुनर्विज्ञापयति **प्रपन्नोऽस्मीति**, पुनः शरणागतः. शरणागतस्य सर्वे अपराधा निवृत्ता भवन्तीति. **महायोगिन्निति**, तव नैते पित्रादयः किन्त्वतियोगेन तथा विडम्बयसीति केऽपि त्वां न जानन्तीति ज्ञापयितुं महायोगित्वमुक्तम्. किञ्च

---

### टिप्पणी

**प्रपन्नोऽस्मि महायोगिन्नित्यत्र तव नैते पित्रादय** इत्यादि, सर्पत्वाद्धी-नाधिकारित्वादेवं कथनमिति ज्ञेयम् ॥१६॥

### लेखः

**तं त्वाहमित्यत्र तवास्मीत्युक्त** इति, **इति मन्त्रेणोक्तः** कृष्ण इत्यर्थः ॥१५॥

### योजना

**प्रपन्नोऽस्मी**त्यस्य विवृतौ **तव नैते पित्रादय** इत्यस्य तात्पर्यं टिप्पण्यां स्फुटम् ॥१६॥

---

[1] प्रतिपत्तीति पाठः.

अल्पएव क्षुद्रस्यापराधं मन्यते, त्वं तु **महापुरुषः**. किञ्च **सतां पतिः**, सन्तो हि तितिक्षवः, तेषां पतिः सुतराम्. अतः सर्वप्रकारेण मदपराधसहनं युक्तमिति भावः. अतएव **मामनुजानीहि** सेवकत्वेन जानीहि. **देवेति** सम्बोधनाद् देवयोनि-विद्याधर-पक्षपातो युक्तो न तु मानुषपक्षपात इति. ननु मदनुज्ञापितोऽपि कथं यमादिभिर्न पीडितो भविष्यसि, कालादयो हि मद्भक्तापराधे दण्डं करिष्यन्त्येवेति चेत्, तत्राह **सर्वलोकानां** ये **ईश्वराः** तेषामपि **त्वमीश्वर** इति. अतस्त्वकृपायां जातायां न कापि चिन्ता भविष्यतीति भावः ॥१६॥

**ब्रह्मदण्डाद्विमुक्तोऽहं सद्यस्तेऽच्युत दर्शनात् ।**
**यन्नाम गृह्णन्नखिलान् श्रोतॄनात्मानमेव च ॥१७॥**
**सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ।**

नन्वहमुदासीनः सर्वत्र, "न मे द्वेष्योऽस्ति न प्रिय" इति, अतो निषिद्धाचरणे कालादयो बाधकाएवेति चेत्, तत्राह **ब्रह्मदण्डादिति**, भवद्दर्शनादेव ब्रह्मदण्डाद्विमोक्षः प्रत्यक्षसिद्धः. यद्यपि त्वमुदासीनः तथापि त्वद्धर्मा नोदासीनाः, अन्यथा **ते दर्शनादेव ब्रह्मदण्डाद्वि**मोक्षो न स्यात्, तत्रापि **सद्यः**, तत्रापि **दर्शनादेव**. **अच्युतेति** सम्बोधनान्न भगवद्धर्माणां कादाचित्कत्वं, तेन ये निवर्तिताः ते निवर्तिताएव. ननु यावदुपयोगमेव निवर्ततां, कथं सर्वानिष्टनिवृत्तिरिति चेत्, तत्राह **यन्नामेति**, मम सर्वपापनिवृत्तौ न सन्देहः, **यस्य नामग्रहण**मात्रेणैव **श्रोतॄनात्मानं च** निष्पापान् करोति. तत्रापि नाधिकारिविशेषः किन्तु सर्वा**नेव, एवे**त्यनेन **आत्म**शब्दः जीवपरो ज्ञायते. न केवलं दैहिका दोषा निवर्तन्ते किन्त्वज्ञानप्रभृति सर्वमेव निवर्तते. **च**कारात् श्रोतॄणामपि तथा समुच्चयार्थः. **सद्यः** शुद्धिरिति शुद्धिहेतूनां देशादीनां निरपेक्षतामाह. तत्रापि **भूयो** वारंवारमुच्चारयन्

**लेखः**

**यन्नामे**त्यत्र **करोती**ति वक्तेति शेषः. **श्रोतॄणामि**ति, आत्मानमिति शेषः. **तथे**ति करोतीति शेषः. अतश्चकारः **समुच्चयार्थ** इत्यर्थः. तथा च वक्ता स्वजीवं श्रोतॄन् तज्जीवांश्च निःपापान् करोतीत्यर्थः. वक्तुर्देहशुद्धिस्तु[1] कैमुत्येन सिद्धेत्याशयेनोक्तं **न केवलमि**त्यादि. **तत्रापीति** स्पर्शेऽपीत्यर्थः.

१. सिद्धिः इति मुद्रितपाठस्य संशोधनं जो. पाठमनुसृत्य.



**पुनातीति किं** वक्तव्यम्! यत्र नाम्नएव एतादृशं माहात्म्यं तस्य स्वरूप-माहात्म्यं किं वक्तव्यमित्याह **तस्य पदा स्पृष्ट** इति. पादस्पर्शः सुतरां दुर्लभः, तत्रापि भगवत्कर्तृकः, तत्रापि चरणकर्तृकः. यतश्चरणे तादृशो रेणुः गङ्गादि-तीर्थानि अमृतरसो भक्ता इति सर्वसान्निध्याद् युक्तमेव सर्वदोषनिवर्तकत्वमिति **ह्यर्थः**. तत्रापि **तस्य ते** सर्वदोषनिवारणार्थमेवावतीर्णस्य ॥१७ $\frac{1}{2}$॥

भगवतो वक्तव्याभावात् तूष्णीम्भावेऽप्यङ्गीकारस्य सिद्धत्वाद्भगवन्त-मनुज्ञाप्य स्वयमेव गत इत्याह **इत्यनुज्ञाप्येति**.

**॥ श्रीशुक उवाच ॥**

**इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवाद्य च ।**
**सुदर्शनो दिवं यातः कृच्छ्रान्नन्दश्च मोचितः ॥१८॥**

यतो **दाशार्हः** सेव्यः, एवम्भावएव स्वामी सेव्यो भवतीति. सर्वपुरुषार्थसिद्ध्यर्थं साधनमपि कृतवानित्याह **परिक्रम्येति**, **परिक्रम्य** प्रदक्षिणीकृत्य, सर्वपुरुषार्थास्तेन वेष्टिता इति तत्सिद्धिः स्वाधीना. **अभिवादनेन** स्वतन्त्रतया [1]स्वोपसर्जनत्वेन पुरुषार्थानाम् अत्याधिक्यं सूचितम्. **च**कारात् स्तुत्वा, भगवता च अनुज्ञातः, तथेत्युक्तो वा. "ये यथा मां प्रपद्यन्त" इति न्यायेन सर्वपुरुषार्थंस्तस्मै दत्तवानिति वा. अतः **सुदर्शन**नामत्वाच्च **दिवं यातः** विद्याधरलोकमेव गतः, **कृच्छ्रात्** सर्वदोषाद् यतो **मोचितः. नन्दश्च**

**लेखः**

**भगवत्कर्तृक** इति, **तस्ये**ति सम्बन्धषष्ठ्या समभिव्याहाराद्भगवत्कर्तृत्वं, न तु सेवककर्तृक इत्यर्थः. तथा च षष्ठ्या सम्बन्धकथनाद्भगवदवयवकर्तृक इत्यर्थः सम्पन्नः. अवयवविशेषः **पदे**त्यनेनोक्तः. **तत्रापी**ति अवयवेष्वपीत्यर्थः. न तु स्वहस्तेन सेवकहस्तं धृत्वा चरणे स्थापनमित्यर्थः. चरणे विशेषमाहुः **यत** इति. **इति ह्यर्थ** इति, मूलस्थ**हि**शब्दस्यार्थ इत्यर्थः ॥१७ $\frac{1}{2}$॥

**इत्यनुज्ञाप्येत्यत्र अभिवादनेनेति**, आशीःप्राप्त्यर्थं नमनमभिवादनम्. तथा च नमनस्य क्रियारूपत्वात् पूर्वकाण्डरीत्या क्रियाङ्गभूतस्य स्वस्य "फलं च पुरुषार्थत्वादि"ति न्यायेन फलात् स्वतन्त्रता पुरुषार्थानां च स्वोपसर्जनत्वं सूचितम्. तेन पुरुषार्थानां स्वाधीनत्वात् स्वस्य अत्याधिक्यं सूचितमित्यर्थः ॥१८॥

१. स्वोपार्जनत्वेनेति पाठः.

तथा **कृच्छ्रान्मोचितः. च**काराद् वैभवं च ज्ञातवान् ॥१८॥

ततस्ते गोपाः सर्वथा भगवत्परायणा जाता इत्याह **निशाम्ये**ति.

**निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतसस्ततः ।**

**समाप्य तस्मिन्नियमं पुनर्व्रजं नृप[1] ययुस्तत्कथयन्त आदृताः ॥१९॥**

**कृष्णस्य तद्वैभवं निशाम्य** ज्ञात्वा सर्वएव **व्रजौकसो विस्मितचेतसो** जाताः, अलौकिकसामर्थ्यस्य प्रकटितत्वात्. नात्र कृतिसाध्यं किञ्चिद् येन पूर्वेण गतार्थता स्यात्. अयं त्वनुभावरूपो वैभवो, अन्यथा पादस्पर्शो अलातहननापेक्षया सूक्ष्मत्वात् तेन कथं कार्यं स्यात्? **कृष्णस्ये**ति परमानन्दः स्वानुभवसिद्ध इति धर्म्युत्कर्षः. **आत्मन** एव अयं **वैभवो** न तु शक्तेः. अनेन स्वरूपमेव तथाविधमङ्गीकर्तव्यं यत्र क्रियाज्ञानादीनामभावः. **व्रजौकस** इति दृष्टप्रत्ययएव अतिभरः. अत्यन्तविश्वसिताः, अतः क्रियया विस्मिता अपि पुनरनुभावेनापि **विस्मितचेतसो** जाताः. **ततः तस्मिन्** भगवति **नियमं समाप्य पुनर्व्रजं ययुः.** तत् समारब्धं कर्म कृष्णएव निवेदितवन्तो, अन्यथा तेन बन्धः स्यात्. **पुनर्व्रजमेव ययुः;** तत्रैव सर्वसिद्धिरिति मनसाप्यन्यत्र गमनेच्छां न कृतवन्तः. **नृपे**ति सम्बोधनं विश्वासार्थं, दृष्टे हि राज्ञां विश्वास इति. **आदृताः** सन्तः **तदेव कथयन्त** इति चित्ते भगवदनुभावाभिनिवेश उक्तः ॥१९॥

---

**टिप्पणी**

**तदात्मवैभवमित्यत्र यत्र क्रियाज्ञानादीनामि**ति, तेषां प्रयोजनाभाव इत्यर्थः ॥१९॥

**लेखः**

**निशाम्येत्यत्र तद्वैभवमि**ति, अग्रे पुंस्त्वेन व्याख्यानात् स चासौ वैभवश्च तद्वैभवः, तमित्यर्थः. तथा च मूलेऽपि **तदात्मवैभवमि**ति कर्मधारयोऽभिप्रेतः. **वैभव**पदस्य भावार्थकस्य क्लीबत्वाग्रहे **वैभव**पदं **वै** निश्चयेन **भव** उद्भव इति समासेन साधनीयम्. **अयं त्विति**, [2]पूर्वलीलाप्रकारात् प्रकारान्तरेण पादस्पर्शः **अयं त्वनुभावरूपो वैभवो** निश्चितोद्भवरूप एवेत्यर्थः ॥१९॥

---

१. पुनर्नृप व्रजं ययुः इति पाठः कदाचित् स्यादिति प्रतीयते (सम्पा.)

२. कालियदमनादिरूपादित्यर्थः.



एवमनन्यभजनार्थं भगवदनुभावं निरूप्य शब्दब्रह्मानन्दं गोपिकाद्वारा सर्वेषु पूरयितुं पुनर्गोपिकाभिः सह शब्दात्मकेन बलभद्रेणापि सह क्रीडां निरूपयति **कदाचिदि**ति त्रयोदशभिः.

**कदाचिदथ गोविन्दो रामश्चाद्भुतविक्रमः ।**

**विजह्रतुर्वने रात्र्यां मध्ये गोव्रजयोषिताम् ॥२०॥**

इयं हि लीला कालप्रधाना, अतोऽत्र दैत्यानां बाधकत्वम्. बाधने भगवत्सामर्थ्येन तन्निराकरणे कृते शब्दस्यैव माहात्म्यं निरूपितं भवतीति

---

**टिप्पणी**

**कदाचिदथ गोविन्द** इत्यत्र **इयं हि लीले**त्यादि, तत्तत्कालएव कर्मविधानान्नामलीला कालप्रधाना. स चोपाधिरूपत्वेन स्वयं क्षयिष्णुरन्यानपि कालयति, दैत्याश्च तादृशा इति तदनुगुणः कालो भवतीति कालप्रधाने मार्गे

**लेखः**

**कदाचिदित्यस्याभासे शब्दब्रह्मानन्दमि**ति, रूपात्मकं यद् ब्रह्म तत्संपादितो य आनन्दस्तत्पूरणं पञ्चाध्याय्या निरूपितम्, स्वरूपेणानन्दपूरणमिति यावत्. अत्र वेदात्मकबलसाहित्यकथनेन शब्दब्रह्मसंपादितो य आनन्दस्तं पूरयितुमित्यर्थः. अत्रापि "तद्द्वारा पुरुषे भवेदि"ति पूर्वोक्तन्यायोऽनुसंधातव्यः. तथा च **गोपिकाद्वारा सर्वेषु** पुरुषेष्वपि **पूरयितु**मित्यर्थः. अत्र पूर्वोक्तगोपिकाभावात् **पुनः**पदं **क्रीडां निरूपयती**त्यनेनान्वेतीति ज्ञेयम्. व्याख्याने **इयं ही**ति शब्दब्रह्मलीलेत्यर्थः. **बाधने** इति सतीति शेषः. **प्रामाण्यं**

**योजना**

**कदाचिदथ गोविन्द** इत्यत्र **इयं हि लीले**त्यादि, इह हि परोक्षवादेन शास्त्रार्थः शिक्ष्यते अध्यात्मरीत्येति बोध्यम्. वेदात्मकबलदेवसाहित्येन कृताया लीलायाः कालप्रधानत्वम्, "उदिते जुहोती"त्यादिविधीनां कालाधीनत्वाद्. **अतोऽत्रे**त्यादि, यतो वेदलीला कालाधीना अतः कालोपासकानां दैत्यानां तत्रागमनम्, अतः शंखचूडस्यागमनम्. अतएव दैत्यावेशसम्भावनया कर्मणि रक्षोघ्नादिमन्त्राणामुपयोगः. **भगवत्सामर्थ्येने**त्यादि, वेदोक्तमन्त्रादिपठनेन स्वाज्ञारूपवेदसत्यत्वबोधनाय भगवान्दैत्यान् निवार्य वेदोक्तानि कर्माणि निर्विघ्नानि करोति. तद्दैत्यनिवारणाय प्रकटीकृतं यत्सामर्थ्यं तेन दैत्यनिवारणे कृते **शब्दस्य** वेदोक्तमन्त्रस्यैव **माहात्म्यं** लोके प्रकटीभवति.

मणिदानमग्रजायैव. लौकिकालौकिकमाहात्म्ये ज्ञातएव वेदानां स्वतःप्रामाण्यं सिध्यति, अन्यथा भ्रान्तमीमांसकानामिव सर्वो वेद उत्प्रेक्षापरः स्यात्.

## टिप्पणी

दैत्यानां बाधकत्वमावश्यकं, राजसे मार्गे तामसानां प्रभावस्योचितत्वाच्च. एवं सति तन्निवारणे भगवन्माहात्म्येन जातेऽपि तत्र नामलीलात्वस्यैव प्रयोजकत्वात्तन्माहात्म्यं नामलीलापर्यवसाय्येव भवतीत्यग्रजाय मणिदानेन ज्ञाप्यत इत्यर्थः. अतएव प्रकृते शिवरात्रि-रात्रि-निशामुखसंमानननान्युक्तानि. तत्र बाधनिवारणस्यावश्यकत्वायाहुः **लौकिकालौकिकेति**, **लौकिकं** शङ्खचूडवधश्चरणारविन्दस्पर्शमात्रेण ब्रह्मशापजाहित्वस्यापि नाशोऽपूर्वरूपसम्पत्तिश्च**अलौकिकं ज्ञातएव** लौकिकैः प्रत्यक्षतया ज्ञातएवेत्यर्थः. विपरीते बाधकमाहु**रन्यथेति**, लौकिकालौकिकमाहात्म्याननुभवे फलश्रुतेर्यथाश्रुतार्थस्य प्रत्यक्षबाधितत्वेन तथोत्प्रेक्षापरत्वं कल्प्येत. यथा यजमानस्य बर्हिर्मुष्टिरूपत्वं प्रत्यक्षबाधितमिति "यजमानः प्रस्तर" इति वाक्यं यागोपयोगित्वेन उभयोस्तत्त्वेनोत्प्रेक्ष्यते यजमान इति कल्पयन्ति. वस्तुतस्तु लौकिकमानानुरोधेन वेदार्थबाधका भ्रान्ताएव. यतो लौकिकं मानमलौकिकार्थसमर्पणे न समर्थम् अतो यथाश्रुतार्थएव प्रामाण्यं श्रुतेर्मन्तव्यमिति भावः. **क्रियाशक्तिप्रधान** इति,

## योजना

तथा च स्वसामर्थ्येन सर्वं कृत्वापि यशो वेदायैव ददातीत्यर्थः. प्रकृतेऽपि शंखचूडं निहत्य मणिर्बलदेवे स्थापित इति मणिं दृष्ट्वा लोका बलदेवमाहात्म्यमेव गायन्तीति वेदरूपाय बलदेवाय यशो दत्तमिति हार्दम्. **लौकिकालौकिकमाहात्म्ये ज्ञात** इत्यादि, वेदोक्तकर्मणा लौकिके पुत्रादिरूपे फले प्राप्ते लौकिकं माहात्म्यं वेदस्य ज्ञातं भवति. "वेदैश्च सर्वैरहमेव वेद्य" इत्यादिवाक्यै"र्बन्दिनस्तत्पराक्रमैरि"त्यादिवाक्यैश्च भगवद्गुणगानपरतां वेदस्यावगत्य परमार्थप्रापका वेदा इत्यलौकिकं माहात्म्यं ज्ञातं भवति. एवमुभयविधे **माहात्म्ये ज्ञाते वेदानां स्वतःप्रामाण्यं सिध्यति** प्रामाण्यं ज्ञानविषयो भवतीत्यर्थः. **अन्यथे**त्यादि, आधुनिका मीमांसका वेदोक्ते प्रमेये युक्तिविरोधं यत्र पश्यन्ति तत्रोत्प्रेक्षामात्रं मन्यमाना वेदार्थमन्यथा ब्रुवन्ति. ये तु वेदमहिमानमवगच्छन्ति ते तु विलक्षणसामर्थ्यं स्वीकृत्य युक्त्यगोचरतां मन्यमाना यथाश्रुतं लापयन्ति. तथा यदि महिमज्ञानं न स्यात्तदा स्वतःप्रामाण्यज्ञाना-



**कदाचिद**शीतकाले. **अथ** भिन्नोपक्रमेण, पूर्वोक्तगोपिकाव्यतिरिक्ताभिः सह क्रीडा. याः पूर्वं शास्त्रपरा लौकिकधर्मपराश्च स्थिताः तासामप्यनुभावदर्शनात् सर्वस्यापि तदधीनत्वज्ञानाद् भगवता बलभद्रेण च सह रमणार्थमिच्छा जाता. भगवांश्च **गोविन्द** इति तासामपीन्द्र इति क्रियाशक्तिप्रधानो रेमे.

## टिप्पणी

इन्द्रत्वेन देवत्वात्तथेति भावः. **अनेन मध्यमाधिकारिणामि**ति, प्रमाणरूपबल-

## लेखः

**सिध्यतीति** प्रामाण्यज्ञानमित्यर्थः. **याः पूर्वमि**ति, शास्त्रेऽनुचितमिदमिति ज्ञात्वा अप्रवृत्ताः **शास्त्रपराः**. पत्यादिभयेनाप्रवृत्ता **लौकिकधर्मपराः**. अधुनोभयोः प्रवृत्तौ क्रमेण हेतुद्वयमाहुः. **अनुभावदर्शनादे**तादृशमाहात्म्यवता रमणं नानुचितमिति ज्ञात्वा शास्त्रपराः प्रवृत्ताः. **सर्वस्य** पत्यादे**स्तदधीनत्वा**त्तद्रमणे किं भयकरमिति ज्ञात्वा द्वितीयाः प्रवृत्ताः. ननु बलेन सह रमणेच्छायामनन्यत्वभङ्गाद्भगवान् कथं रेमे इत्यत आहुः **भगवांश्चे**ति, तासामपि स्वामी भवति अतो रेमे. परन्तु पूर्ववद्रमणेऽधिकाराभावात् तथानृत्यादिना अन्तःस्वधर्मस्थापनेन सप्तमाध्यायोक्त-गुणगानरूप-ज्ञानशक्ति-प्राधान्येन अन्तर्न रेमे

## योजना

भावादुत्प्रेक्षादिदोषसम्बन्धं स्वीकुर्युरित्यर्थः. अतो वेदमहिमावश्यं बोधनीयः. प्रकृतेऽपि अग्रजाय मणिदानेन श्रीबलदेवस्य ज्येष्ठभ्रातृत्वहेतुकपूज्यत्वरूपो लौकिको महिमा दर्शितः, श्रीबलदेवेन दैत्यं हत्वा मणिरानीत इत्ययं देवेभ्योऽप्यधिकबलवानित्यलौकिकोऽपि महिमा प्रदर्शित इति ज्ञेयम्. **पूर्वोक्तगोपिकाव्यतिरिक्ताभिरि**ति पञ्चाध्याय्यां निरूपिताभ्यो भगवदेकभोग्यगोपिकाभ्यो व्यतिरिक्ताभिरित्यर्थः. **याः पूर्वं शास्त्रपरा** इत्यारभ्य **बलभद्रेण सह रमणार्थमिच्छा जाते**त्यन्तम्. **याः शास्त्रपराः** शास्त्रे स्वविवाहितेतरभजनं निषिद्धमिति ज्ञात्वा भगवतोऽपि भजनं न कृतवत्यः, **या** वा **लौकिकधर्मपरा** लोके पतिपुत्रादिभ्यो विवाहितेतरभजने भयं भवतीति विमृश्य भगवतोऽपि भजनं न कुर्वन्ति, तादृश्यः **स्थिता**स्ता अपि एतावता समयेन भगवतोऽनुभावं दृष्ट्वा सर्वं भगवदधीनमिति भगवद्भजने वैदिकं लौकिकं वा भयं चेद्भविष्यति तदा भगवान् सर्वानिष्टं दूरीकरिष्यतीति निश्चयेन भगवता सह बलदेवेन च सह रिरंसवो जाता इति भावः. **तासामपीन्द्र इतिं क्रियाशक्तिप्रधान**

**रामश्च;** तेनापि सह रमणे चित्तप्रसादार्थ**मद्भुतो विक्रमः** पराक्रमो यस्येत्युक्तम्. **च**कारस्त्वावेशसमुच्चयार्थः. अनेन मध्यमाधिकारिणां वेदपरत्वं न दोषायेति निरूपितम्, अन्यथा प्रमाणपराणामनन्यभावो भज्येत. अद्भुतः पराक्रम इति केवलार्थपराणामेतस्योपयोगः सूचितः. अन्यथा इतरनिराकरणं स्वार्थनिरूपणं चेति भगवति वेदे वा द्विगुणा वृत्तिः स्यात्. अर्थवदेव

## टिप्पणी

देवपराणामपि युगपदङ्गीकारेणेति भावः. अतएवैतादृशानामधिकारिणामनन्यत्वभङ्गोऽपि नेत्याहुः **अन्यथे**ति, आवेशाभाव इत्यर्थः. तेनैव तेषामङ्गीकारान्न तद्भङ्ग इति भावः. **अद्भुतविक्रम** इत्यस्य तात्पर्यान्तिरमाहुः **केवलार्थपराणामि**ति, अत्रायमर्थः— अद्भुतं हि लौकिकोपपत्तिरहितं मनस उल्लासकं भवति. प्रकृते वेदरूपरामस्य विक्रमः क्रियाशक्तिफलरूपो विचित्रः स्वर्गादिस्तन्निरूपकस्य वेदस्य श्रुतितात्पर्याविदुषां यथाश्रुतार्थपराणामुपयोगः. वस्तुतस्तु 'स्वर्ग'शब्देन "यन्न दुःखेन सम्भिन्नमि"ति वाक्यादात्मसुखमेवोच्यत इति तत्त्वनिबन्धे विस्तृतं पितृचरणैरिति तात्पर्यविदन्यभजनराहित्येन प्रभुमेव भजेत्. तथा च **केवलार्थपराणामि**त्यस्य यथाश्रुत्यर्थपराणामित्यर्थो वेदपक्षे. भगवत्पक्षे तु स्वप्रयोजनपराणां, न तु निरुपधिभगवत्पराणामित्यर्थः. अत्र स्वरक्षा कामसुखं च स्वप्रयोजनम्. एवं सत्यधिकारिभेदेन भजनभेदात्फलभेदोऽपीति तदुपपत्त्यर्थमुभयरूपेण क्रीडेति भावः. विपरीते बाधकमाहुः **अन्यथे**ति,

## लेखः

किन्तु इन्द्रत्वात् क्रियाशक्तिप्राधान्येन बहिरेवेत्यर्थः. **रामश्चे**ति रेमे इति शेषः. ननु भगवति विद्यमाने रामेण सह कथं रिरंसेत्यत आहुः **तेनापी**ति, सोऽप्यद्भुतविक्रमत्वाद्वेदरूपोऽतस्तत्क्रियापि भगवत्क्रियैवातस्तथेत्यर्थः. **चकारस्त्वि**ति **तु**शब्देनावतारान्तरव्युदासः. **एतस्योपयोग** इति, वेदरूप**राम**विशेषणत्वपक्षे **एतस्य** क्रियाप्रतिपादकस्य वेदस्येत्यर्थः. **गोविन्द**विशेषणत्वपक्षे **एतस्य**

## योजना

इति, एतदर्थष्टिप्पण्यां स्फुटः. **अनेने**ति, वेदात्मकबलदेवसहितभगवद्रमणकथनेनेत्यर्थः. **मध्यमाधिकारिणां वेदपरत्वमिति**, प्रमाणपुरःसरं पुरुषोत्तमपराणां वेदपरत्वं न दोषाय किन्तूचितमेव, तेषां तथैव निरोधसिद्धेः. **केवलार्थपराणामिती**ति, एतदर्थष्टिप्पण्यां स्फुटः. **अन्यथे**ति, एतदर्थष्टिप्पण्यां स्फुटः, **वेदे वे**त्यस्याप्यर्थः ॥२०॥



शब्दस्यापि लीलेति **वने रात्र्यामि**त्युक्तम्. उभावपि **विजह्रतुः** उभयो रमणार्थम्. पूर्वगोपिकापेक्षया हीना इति **गोव्रजयोषितां मध्य** इत्युक्तं; **गो**प्राधान्यो **व्रजः**, तत्सम्बन्धिन्यो **योषित** इति ॥२०॥

तत्र शब्दप्राधान्यं निरूपयितुमाह **उपगीयमानौ ललितमि**ति.

**उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः ।**
**अलङ्कृतानुलिप्ताङ्गौ स्रग्विणौ विरजाम्बरौ ॥२१॥**

सर्वाः स्त्रियः अन्तःस्नेहसम्बद्धा भगवतो गुणगानपरा जाताः. तासामाभ्यन्तरो बाह्यश्च भावो निरूपितः. एवं युक्ताभिः सह स्वस्य सर्वोत्कृष्टस्यैव भावो युक्त इति उभयोः षड्गुणान् निरूपयति **अलङ्कृते**ति सार्धैस्त्रिभिः. आदा**वलङ्कृतौ** सर्वाभरणभूषितौ. शब्दे शिक्षादयः अर्थे देशादयश्चोत्कृष्टा अलङ्काराः. तदभावे तत्र रतिर्न स्यात्. ततः **अनुलिप्ताङ्गौ** चन्दनादिभिः, सद्वासनाव्यतिरेकेणोभयत्रापि रतिर्न स्यादिति. अङ्गेष्वपि सर्वेषु सद्वासनार्थ-

## टिप्पणी

उभयरूपेणैतल्लीलाया अकरणे शङ्खचूडवधः स्त्रीणां स्वप्रयोजनसमर्पणं चेति कार्यद्वयमेकेनैव रूपेण न सम्भवतीति तद्रक्षार्थं रूपान्तरं प्रकटनीयं स्यादित्यर्थः. नामलीलायां शब्दप्राधान्यं मत्वा पक्षान्तरमाहुः **वेदे वे**ति, यदि साधनरूपेण यथाश्रुतार्थपराणामर्थनिरूपणं फलरूपेण च तात्पर्यविदुषामितरनिराकरणं न कुर्यात्तदा "हिंसायां यदि राग स्याद्यज्ञ एव न चोदने"ति वाक्या"त्तावत्कर्माणि कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायत" इति वाक्याच्च यागादिविधीनां "पञ्च पञ्चनखा भक्ष्या" इति वाक्यस्य तदितरभक्षण-निषेधपरत्ववद् यागातिरिक्तकर्म-निषेधपरत्वमेव सिध्यति, न तु यागविधानपरत्वम्, अकरणे प्रत्यवायश्रवणाद् अवश्यकर्तव्यताकत्वविधानपरत्वं चेत्येकस्यैव विधेः स्वार्थपरत्वं स्वार्थातिरिक्तनिषेधपरत्वं चेति **द्विगुणा वृत्तिः स्यादि**त्यर्थः ॥२०॥

## लेखः

क्रियाशक्तिप्रधानस्य भगवत इत्यर्थः. **गोप्राधान्य** इति, गवां प्राधान्यं यत्र तादृश इत्यर्थः ॥२०॥

**अलङ्कृतानुलिप्ताङ्गावि**त्यत्र, **शिक्षादय** इति षडङ्गानि वेदालङ्कारभूतानीत्यर्थः ॥२१॥

मङ्गपदम्. **स्रग्विणौ** मालायुक्तौ, कीर्तिरपि सहायत्वेनोभयत्राप्यपेक्ष्यत इति. **विरजेऽम्बरे** ययोरिति, सर्वदोषाभावः शुद्धा माया चापेक्ष्यत इति ॥२१॥

**निशामुखं मानयन्तावुदितोडुपतारकम् ।**
**मल्लिकागन्धमत्तालिजुष्टं कुमुदवायुना ॥२२॥**

कर्मणां रात्रिरेव प्रधानमिति, सन्ध्यायामेव सन्ध्याग्निहोत्रादिकमिति, **निशामुखस्य** सन्माननम्. तं कालं गुणवन्तं वर्णयति प्रकृतोपयोगाय **उदितोडुपतारकमि**त्यादिना, **उदित उडुपः तारकाश्च** यस्मिन्. चन्द्रोदयः पर्वसूचकः. नक्षत्रोदयो मेघाभावसूचकः. प्रमाणं चन्द्रः, फलं नक्षत्राणीत्यपि. पुण्यो वायुः फलसूचक इति तं वर्णयति **कुमुदवायुना जुष्टमि**ति, कुमुदसम्बन्धी

---

**टिप्पणी**

**विरजाम्बरावि**त्यत्र **शुद्धा माये**त्यादि, वेदमार्गे हि द्विधा प्रवृत्तिः– कर्मजडत्वेनैका, भगवदिच्छां ज्ञात्वा भगवत्परत्वेन चान्या. उभयत्रापि माया सहकारिणी. तत्र रजस्तमोयुक्ताऽऽद्ये, एतद्रहिता द्वितीय इति तथेति भावः ॥२१॥

**उदितोडुपतारकमि**त्यत्र **प्रमाणं चन्द्र** इत्यादि, अत्रायं भावः– अत्र हि रामप्रभ्वोर्लीलोच्यते, तौ च प्रमाणफलरूपौ, सामग्र्यपि तद्रूपैवेत्युच्यते. तथा च रसप्रमापकत्वादिन्दुस्तथा. "सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणी"ति श्रुतेः सुकृतफलानुभव-सामयिक-तेजोरूपत्वाद् उडूनां तदुदयोक्त्या फलोदयो

**लेखः**

**निशामुखमि**त्यत्र **पर्वसूचक** इति, निशामुखे चन्द्रोदयः पूर्णिमायामेव भवतीति तत्सूचक इत्यर्थः. कर्मणि दर्शपूर्णमासेष्टौ पूर्णिमैव मुख्येति भावः.

**योजना**

**विरजाम्बरावि**त्यत्र **शुद्धा माया चे**ति, एतदर्थष्टिप्पण्यां विस्तृतः ॥२१॥

**कर्मणां रात्रिरेवे**त्यारभ्य **सन्माननमि**त्यन्तं, महारात्रे बुद्ध्वा "ब्रह्मणा सहाचान्तोऽध्वर्युः अग्ने नयेत्याग्नीध्रमभिमृशती"त्यादिवाक्यात् कर्मसु रात्रिरेव प्रधाना. किञ्च अग्निहोत्रकरणानन्तरं सायं दोहं दोहयतीत्यमावस्यायां रात्रौ दोह इतोऽपि रात्रेः प्राधान्यम्. सन्ध्यायां चाग्निहोत्रम् अतः सन्ध्याया अप्यादरणीयत्वम्. एवं रात्रेः सन्ध्यायाश्च प्राधान्यं वक्तुं **निशामुख**पदम्. तथा च निशाया निशामुखस्य च सन्माननं फलितम्. अन्यथा 'सन्ध्यां



वायुः शीतलो मन्दश्च भवति. **निशामुखस्य** विशेषणम्. उत्तमाधिकारिभिरपि सेवितमित्याह **मल्लिकागन्धमत्तालिजुष्टमि**ति, **मल्लिकागन्धः** शोभनवासनारूपः, तेन च **मत्ता** इतरविस्मारकाः, तादृशा **अलयः** षट्पदत्वात् सर्वज्ञाः, तैः सेवितमिति. एवं त्रिधाकाल उत्तमो निरूपितः. तादृशं कालं **मानयन्तौ** समीचीनोऽयमिति स्तुवन्तौ. अनेनाङ्गेऽपि फलश्रुतिर्युक्तेति निरूपितम् ॥२२॥

**जगतुः सर्वभूतानां मनःश्रवणमङ्गलम् ।**
**तौ कल्पयन्तौ युगपत्स्वरमण्डलमूर्च्छितम् ॥२३॥**

तदा **सर्व**प्राणिनामेव **मनःश्रवणयोः मङ्गलं जगतुः** गानं कृतवन्तौ. पर्यवसानोत्तमत्वान्मनोमङ्गलं, स्वरूपोत्तमत्वात् श्रवणमङ्गलमिति. तत्र गाने विशेषमाह **तौ कल्पयन्तावि**ति, **युगपदे**व **स्वरमण्डलस्य** स्वरसमूहस्य **मूर्च्छितं** मूर्च्छनां **कल्पयन्तौ** इति द्वयोरेकमुखता निरूपिता. मूर्च्छनाव्यतिरेकेण न मनो लीनं भवति लयव्यतिरेकेण च सर्वात्मना तत्परता न भवतीति तथाकरणम् ॥२३॥

---

**टिप्पणी**

ज्ञाप्यत इति. **मत्तालिजुष्टमि**त्यत्र, **षट्पदत्वादि**ति, गत्यर्थशब्दानां ज्ञानार्थत्वाज्ज्ञानसाधनषट्कवत्त्वमत्र सूच्यते. तानि दर्शनरूपाण्येवेति सर्वज्ञत्वम् ॥२२॥

**लेखः**

**इतरविस्मारका** इति, झांकृतिश्रवणेनान्यस्यापि मदो भवतीति स्वझांकृत्या इतरस्यापि स्वरूपविस्मारका नादेतरपदार्थविस्मारकाः सर्वेषामेवेत्यर्थः ॥२२॥

**तौ कल्पयन्तावि**त्यत्र, **द्वयोरेकमुखते**ति वेदार्थरूपयोर्बलप्रभ्वोरित्यर्थः ॥२३॥

**योजना**

मानयन्तावि'त्येव वदेत्. **उदितोडुपतारकमि**त्यस्य विवृतौ **पर्वसूचक** इति पूर्णिमासूचक इत्यर्थः, **निशामुखं मानयन्तावि**त्युक्त्वा चन्द्रोदयकथनान्निशामुखे चन्द्रोदयस्य पूर्णिमायामेव सत्त्वादित्यर्थः. **प्रमाणं चन्द्र** इति **फलं नक्षत्राण्यपी**ति, एतदर्थष्टिप्पण्यां स्फुटः. **अनेनाङ्गेऽपि फलश्रुतिरि**ति, **तादृशं कालं मानयन्तौ** इत्यनेन कर्माङ्गभूतस्य कालस्य प्रशंसाबोधनेऽपि या पूर्वकाण्डे फलश्रुतिः सा युक्तैवेत्यर्थः, भगवतापि कालसन्मानस्य कृतत्वात् ॥२२॥

**तौ कल्पयन्तावि**त्यत्र **द्वयोरेकमुखते**ति, **द्वयो**र्वेद-वेदप्रतिपाद्ययोर्बल-देवश्रीकृष्णचन्द्रयो**रेकमुखता** युगपत् स्वरसमूहमूर्च्छनाकल्पनेत्यर्थः ॥२३॥

ततस्तस्य फलमपि जातमित्याह **गोप्य** इति.

**गोप्यस्तद्गीतमाकर्ण्य मूर्च्छिता नाविदन् नृप ।**
**स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः ॥२४॥**

**तयोर्गीतं** तादृशमा**कर्ण्य मूर्च्छिताः** सत्य आत्मानं **नाविदन्.** मूर्च्छायामपि वासना तिष्ठतीति **नाविदन्नि**ति तदभावायोक्तम्. **नृपे**ति सम्बोधनं गीतरसाभिज्ञत्वाय. यो भावः सर्वथा न विस्मृतो भवति तं वर्णयति **स्रंसद्दुकूलमि**ति, **दुकूलम**धोवस्त्रं तदप्यधः पततीव. **स्रस्ताः केशाः** तेषु **स्रज**श्च यासाम्. देहे आन्तं विस्मरणं निरूपितम् ॥२४॥

अवश्यं प्रमाणबले मार्गे दैत्योपद्रवो भवतीति तन्निरूपणार्थं लीलामुपसंहरति **एवं विक्रीडतोरि**ति.

**एवं विक्रीडतोः स्वैरं गायतोः सम्प्रमत्तवत् ।**
**शङ्खचूड इति ख्यातो धनदानुचरोऽभ्यगात् ॥२५॥**

**स्वैरं** यथा भवति तथा **वि**शेषेण **क्रीडतोरि**ति, मूर्च्छिताभिरिव प्रमत्ताभिरिव क्रीडा अत्यन्तं स्वच्छन्दा भवतीति. मध्ये क्रीडा मध्ये गानमिति द्वयं निरूपयति **क्रीडतोर्गायतोः** सतोरिति. स्त्रीभिः सह समानधर्मतासिद्ध्यर्थं **सम्प्रमत्तवदि**ति. आवेशावतारयोः आवेशदशायां तुल्यतेति ज्ञापयितुं द्वयोः सामान्येन निरूपणम्. **एवं** सर्वस्मिन्नेव विकले **शङ्खचूड**नामा कश्चिद् **धनदस्य** कुबेर**स्यानुचरः** स्त्रीकामो भगवन्तं प्राकृतं मत्वा स्वयं ता नेतुमागत इत्याह **शङ्खचूड** इति. शङ्खनिधिश्चूडायां वर्तत इति अनेन नारदस्यापि दोषः परिहृतः. यथा तौ पूर्वं धनमत्तौ एवमयमपि प्राप्तनिधिरिति सम्प्रमत्तः. **धनद** इति नाम्ना च सर्वैव सामग्री श्रीमदरूपा निरूपिता, यत्र धनं तत्रैव

---

**लेखः**

**शङ्खचूड** इत्यत्र **अनेने**ति, धनदानुचरस्यातिक्रमकथनेन तौ नलकूबरमणिग्रीवावप्येतादृशावेव भविष्यत इति ज्ञानेन देवयोनिशापदानरूपो भगवन्मनसि संभावितो नारदस्यापि दोषः परिहृतः. **अपि**शब्दाद्भगवतोऽपि एतन्मारणे न दोषः. ननु भगवदीयस्त्रीणां स्वीयत्वकरणं तन्मनसि कथं संभावितमित्याशङ्क्य दृष्टान्तसूचनार्थमाहुः **सर्वा एवे**ति, श्रुतयोऽपि भगवदीयास्ताः पाषण्डिबुद्ध्या लौकिकपरत्वेन व्याख्यायन्ते तथैतदपीत्यर्थः ॥२५॥

॥ एकत्रिंशाध्यायव्याख्या समाप्ता ॥



स्त्रिय उचिता इति. सर्वाएव श्रुतयो लौकिकाः कर्तव्या इति पाषण्डिनां बुद्धिः ॥२५॥

ततो यत् कृतवाँस्तदाह **तयोर्निरीक्षतोरि**ति.

**तयोर्निरीक्षतो राजन् तन्नाथं प्रमदाजनम् ।**
**क्रोशन्तं कालयामास दिश्युदीच्यामशङ्कितः ॥२६॥**

**राजन्नि**ति सम्बोधनं शत्रूणां स्त्रीहरणं स्वाभाविकमिति तत्र सहजदोष इति ख्यापनार्थम्. **तावेव नाथौ** यस्य. **प्रमदाः** स्त्रीविशेषाः, तेषां **जनः** समूहः, सामान्यशब्दः समूहवाची भवतीति. विशेषपराश्चेन्न गच्छेयुरिति ज्ञापयितुं सामान्यवचनम्. **क्रोशन्तमि**ति तासामनिच्छा तस्य च भयाभावः सूचितः. **कालयामास** यथा कालः अप्रतिहतबलः सर्वानिव कालयति हरति तद्वदित्यर्थः. **उदीच्यां दिशी**ति स्वगृहे बलाधिक्याय. अतएव **अशङ्कितः,** किं करिष्यति भगवानिति ॥२६॥

ततो भगवद्भ्यां यत् कृतं तदाह **क्रोशन्तमि**ति.

**क्रोशन्तं कृष्ण रामेति विलोक्य स्वपरिग्रहम् ।**
**यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावताम् ॥२७॥**

यदि ताः **कृष्णरामेत्या**क्रोशं न कुर्युः, तदा न निवारयेदपि, नहि भगवान् स्वतोऽन्यचित्तं निवारयति. तत्राप्यन्यस्य चेत्, न निवारयेत् किन्तु **स्वपरिग्रहं** स्वेन पूर्वमेव परिगृहीत इति **क्रोशन्तं स्वपरिग्रहं विलोक्य अन्वधावतामि**ति. **भ्रातरावि**त्युभयोः परिग्रहः उभाभ्यां रक्षणीय इति. **अनु**

---

**योजना**

**शङ्खचूड इति ख्यात** इत्यस्य विवृतौ **सर्वा एव श्रुतयो लौकिकाः कर्तव्या इति पाषण्डिनां बुद्धिरि**ति, यथा पाषण्डिनो भगवत्परानपि वेदान् लौकिकपरत्वेन व्याकुर्वन्ति, तथायं शंखचूडोऽपि भगवत्पराः श्रुतिरूपाः गोपिका अन्यत्र नेतुं वाञ्छतीति पाषण्डी भवतीत्यर्थः. तथा च ''लोभक्रोधादयो दैत्या'' इति कृष्णोपनिषत्सु भगवद्ध्यानां लोभादिदोषरूपता वर्णितेति तेषु दोषेषु अयं पाषण्डरूपः शंखचूड इति तात्पर्यम् ॥२५॥

**विशेषपराश्चेदि**त्यादि, वेदवेदार्थरूप-बलदेवश्रीकृष्णचन्द्रोभयपराः अतो दैत्येन नीता गता, **विशेषपराः** पश्चाध्यायीस्थगोपिकावत् पुरुषोत्तमैकपराश्चेत्स्युः तदा **न गच्छेयुरि**त्यर्थः ॥२६॥

ग्रहणानन्तरमेवाधावताम् ॥२७॥

दूरे नीयमानाः दूरादेव आश्वासितवन्तावित्याह **मा भैष्टेत्य-भयारावाविति.**

**मा भैष्टेत्यभयारावौ शालहस्तौ तरस्विनौ ।**
**आसेदतुस्तं तरसा त्वरितं गुह्यकाधमम् ॥२८॥**

**मा भैष्टेत्ययमारावो** भयनिवर्तको भवति. शालवृक्षौ **हस्ते** ययोरिति महासामर्थ्यं दूरादेव प्रदर्शितं, न तु तयोः कश्चनोपयोगोऽस्ति. **तरस्विनौ** अतिवेगवन्तौ यथा मध्ये एकामपि गृहीत्वा न गच्छेत् न स्पृशेद्वेति शीघ्र**मासेदतुः** निकटे गतौ **आसेधतु**र्निवारितवन्तौ वा. **तं** शङ्खचूडं **तरसा**ऽविचार्यैव. देवो मनुष्यापेक्षया महाबलो भवतीति विचारप्राप्तिः. **त्वरितं** पलायनार्थं, यतो **गुह्यकानां** यक्षाणां मध्येऽ**धमः**. आगमने यक्षत्वं प्रयोजकं, पलायनेऽधमत्वम् ॥२८॥

पूर्वं ताभिः सहितः शीघ्रं गच्छन् स्थितः, इदानीं स्वयमेव पलायितुं विचारितवानित्याह **स वीक्ष्येति.**

**स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् ।**
**विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया ॥२९॥**

**अनुप्राप्तौ** भगवन्तौ **वीक्ष्य सो**ऽल्पबुद्धिः **स्त्रीजनं विसृज्य प्राद्रव**दिति सम्बन्धः. तस्य तथाकरणे या बुद्धिरासीत्, तामाह **कालमृत्यू इवोद्विजन्नि**ति, एकः **कालः** स्वस्य नाशसमयः अपरो मारक इति. एकोऽप्यनिवार्यः तत्रोभयोः किं वक्तव्यमिति पलायने **जीवितेच्छै**व हेतुः, सति जीवने भोग इति. ननु शरणं कुतो न गतो, जीवेत्[१], न तु पलायनं जीवनसाधनमिति चेत्, तत्राह **मूढ** इति, इममर्थं न जानातीति ॥२९॥

अनुपाये प्रवृत्तस्य न कार्यं सिध्यतीत्याह **तमन्वधावदिति.**

**तमन्वधावद् गोविन्दो यत्र यत्र स धावति ।**
**जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन् स्त्रियो बलः ॥३०॥**

**गोविन्द** इति तेषां रक्षार्थं विनियोग आवश्यकः, स्वक्रियाया अन्यथे-न्द्रत्वं न स्यादिति. रक्षा च दोषस्य मूलोच्छेदएव, न तु तस्मिन् कथमपि विद्यमाने. अतो **यत्र यत्रैव स** पलायते तत्रैव **तमन्वधावत्.** ननु दूरादपि

१. "शरणं गतो कुतो न जीवेद्" इति पाठः सम्भाव्यते (सम्पा.).



मारणे सम्भवति, भगवान् किमिति धावनं कृतवान्, तत्राह **जिहीर्षुस्तच्छिरोरत्नमिति.** दूरान्मारणे यक्षास्तदीयास्तं नयेयुः, अमारितश्च स्यात्. मणौ विद्यमाने मणिरिव शस्त्रैरप्यवध्यः. अतः स्वस्यैव गमनं, जीवानामवध्य इति. **स्त्रियो रक्षन् बलः** जातो, अन्यथा ततोऽन्यो हरेत्. तदीया हि बहवः ते घातयेयुरेव, अत एकेन रक्षितव्याः. **बल** इति बहूनामप्यागमने रक्षार्थमुक्तम्. **स्त्रियो** हि रक्षणीयाएव ॥३०॥

ततो भगवान् यत् कृतवाँस्तदाह **अविदूर इवेति.**

**अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः ।**
**जहार मुष्टिनैवाङ्ग सहचूडामणिं विभुः ॥३१॥**

कियद्धावनेनैव स प्राप्तो **अविदूरे** निकटएव. वस्तुतस्तु दूरे गतः परं कालविलम्बाभावाद् **अविदूर इवाभ्येत्य** निकटे गत्वा **तस्य शिरो जहार.** ननु पलायितवधो निषिद्धः, किमिति भगवान् क्लिष्टं कृतवानित्याशङ्क्याह **दुरात्मन** इति, स हि दुरात्मा वध्यएव. त्रयीद्विषो हि हन्यन्तएव. निमित्तं तु दारापहारित्वं जातमेव, अन्यथा पूर्वमेव हन्यात्. अधुना परित्यागे पुनरागच्छेत् केवलबलभद्रक्रीडायां वा समागत्योपद्रवं कुर्यात्. यतो दुष्टान्तःकरणो अतो वध्यएव. अत**स्तस्य शिर**एव ज्ञानशक्तिप्रधानं **मुष्टिनैव जहार.** न तु भेदनं कृतवान् किन्तु यथा राशेः सकाशात् मुष्टिना तन्दुला ह्रियन्ते तथा राशीभूतास्तस्यावयवा मुष्टिनैवाहृताः. यदैव स गोपिकाहरणार्थमुद्यमं कृतवान् तदैव संयोजका देवा अवयवेभ्यो निर्गताः, केवलं मणिप्रभावादवयवी स्थितः. भगवान् पुनः **चूडामणिसहितं** त**च्छिरो जहार.** स्वकर्मणैव विशकलित इति भगवान् अक्लिष्टकर्मैव. किञ्च **विभुः** समर्थः मणेरपि सामर्थ्यं दूरीकर्तुम् ॥३१॥

एवं कृते स हतो जात इत्याह **शङ्खचूडं निहत्येति.**

**शङ्खचूडं निहत्यैवं मणिमादाय भास्वरम् ।**
**अग्रजायाददत्प्रीत्या पश्यन्तीनां च योषिताम् ॥३२॥**

*॥ इति श्रीमद्भागवते दशमस्कन्धपूर्वार्धे शङ्खचूडवधो नाम एकत्रिंशोऽध्यायः ॥*

**एवं** प्रकारेण तस्य हननं, न तु प्रकारान्तरेण. तस्य मुक्तिनिराकरणार्थं **निहत्यैवे**त्युक्तम्. मृतद्रव्यं न ग्राह्यमित्यत आह **भास्वरमिति,** "अस्थाना-न्मण्युत्तममि"ति वाक्यात्. मणिग्रहणेन मणिगता देवता. ताः कामयतीति

पक्षे कामना सफला कृता. मणिग्रहणेन तस्य मुक्तिर्देयेति शङ्कां वारयितुं **अग्रजायाददत्.** तत्रैव स्थित्वा देवताया अप्युपभोगो भवत्विति **प्रीत्यैव अददत्,** न तु याचितः. स्त्रीणां प्रार्थनाभावायाह **पश्यन्तीनामि**ति. **च**कारात् सर्वाभ्यः प्रदर्श्य तासां स्पर्शानन्तरं **योषितामन्ये**षां **च** देवानां पश्यतामिति. प्रमाणसिद्ध्यर्थं यत् किञ्चित् करोति तत्सर्वं तदधिष्ठातर्येव प्रयच्छतीति ज्ञापितम्. प्रमाणबलमेवात्र मुख्यमिति न प्रमेयविचारेण कोऽप्यर्थः शङ्कनीयः ॥३२॥

*॥ इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभ-दीक्षितविरचितायां दशमस्कन्धविवरणे एकत्रिंशाध्यायविवरणम् ॥*

**टिप्पणी**

**मणिमादाय भास्वरमि**त्यत्र, **मणिग्रहणेन मणिगता देवते**ति, गृहीतेति शेषः. तदधिष्ठानं विना भास्वरत्वाभावादन्यथा विशेषणं न वदेदिति भावः. **ताः कामयतीति पक्ष** इति बल इति शेषः. उपभोगायान्या अपि कामयत इति ज्ञापनाय बहुवचनम्. नन्वेवं चेद्देवतायाएव ग्रहणमुचितं न तु मणेरपीत्यत आहुः **तत्रैवे**ति, मणिनियामकत्वलक्षणाधिकाररूपं देवतात्वं हि भगवद्दत्तं; तच्च तत्रैव स्थिताया भवति. तथा च **तत्रैव** मणावेव **स्थित्वा** या देवतात्वं भजते तस्या अपीत्यर्थः. **यत्किञ्चित्करोती**ति, यन्मार्गसम्बन्धि यत् करोति तत् तन्मार्गाधिष्ठातरि तथेत्यर्थः. प्रकृते प्रमाणमार्गसंबन्धि-फलात्मक-मण्याहरणं कृतवानिति तथेति भावः. तर्हि सर्वमूलत्वाद् भगवतस्तत्रैवास्य स्थापनमुचितं, प्रभुकरस्पृष्टस्य मुक्त्यभावश्चानुपपन्न इत्याशङ्क्याहुः **प्रमाणबलमेवे**ति ॥३२॥

**योजना**

**मणिग्रहणेन मणिगता देवते**त्यादेरर्थष्टिप्पण्यां स्फुटः. **देवताया अप्ययं भोग** इति; मणिगतदेवताया बलदेवकर्तृको भोग इत्यर्थः ॥३२॥

*॥ इतिश्रीमद्गोवर्धनधर-श्रीवल्लभाचार्यवर-श्रीविठ्ठलेश्वर-चरणानुचरदीक्षितलालूभट्टेन कृता दशमस्कन्धैकत्रिंशाध्यायसुबोधिनीयोजना समाप्ता ॥*

**॥ इति एकत्रिंशोध्यायः ॥**

# ॥ सप्तमः स्कन्धादितः द्वात्रिंशोऽध्यायः ॥

द्वात्रिंशेऽन्तर्गोपिकानां स्वानन्दं भगवान् हरिः ।
पूरयामास येनैव पूर्णानन्द इतीर्यते ॥(१)॥

**टिप्पणी**

द्वात्रिंशाध्यायार्थोक्तौ **द्वात्रिंशेऽन्तरि**त्यादि, यद्यप्यानन्दः सर्वत्रैवा-न्तरेवानुभूयते, तथापि बाह्यरमणे शरीरचेष्टयोरेव प्राधान्यात्स्वरूपस्य मूर्तत्वेन तदात्मकानन्दस्यापि तथात्वाच्छरीरेन्द्रियादिष्वपि स्वरूपतः स्थापितस्य मनसाऽनुभवो भवति. प्रकृते त्वन्तःसंगेन प्रकटेनानन्देन शरीरेन्द्रियादिषु बाह्यरमणेनेव धर्मा भवन्तीत्यभिप्रे**त्यान्तरि**त्युक्तम्. **स्वानन्दं पूरयामास इतीर्यत** इति सम्बन्धः. ननु धर्मिस्वरूप-विरहजदुःख-निवारणं धर्मरूपेण गुणगानेन कथं सम्भाव्यते, तत्रापि स्वरूपेणेवानन्दपूरणं चेत्यत आहुः **येनैवे**ति, यथा स्वरूपं पूर्णानन्दात्मकं तथा नामलीलापीति सर्वमुपपद्यत इत्यर्थः. यद्वा. **येन** स्वरूपलक्षणेन हेतुना पूर्वं तथा कृतवान् तेनैवान्तःस्थितेनैव अत्युद्रेकेण मुखकमलद्वारा निर्गतेनाधुनापि तथा कृतवानित्यर्थः. एतदेव विवृत**मन्तःप्रविष्ट** इत्यादिना. यद्वा. यथा यथा स्वविषयिकां भक्तानामार्ति[१]

**लेखः**

द्वात्रिंशे टिप्पण्यामाद्यपक्षे **पूर्णानन्दः** रूपतो नामतश्चेति शेषः. द्वितीयपक्षे **येनैव** स्वरूपेण हेतुना पश्चाध्याय्यां **पूर्णानन्द** उक्त इति शेषः तेनैवाधुनापि **पूरयामासे**त्यर्थः. तृतीयपक्षे प्रयोजनं पूर्णानन्दत्वं तदनुसन्धानेन स्वानन्दपूरणहेतुरूपं गुणगानं नास्ति किन्तु भावस्वभावादतो भावसम्बन्धि किञ्चित् प्रयोजनं वक्तव्यमिति चेद्भावस्थैर्यमपि जायते. तथाच भावस्वभावात् तत्स्थैर्यार्थं गुणगानम्, इदं प्रयोजनं भावान्तःपात्येव, पश्चात्तेन गुणगानेन प्रयोजनद्वयमपि संपन्नमित्यर्थः. **स्वानन्दं पूरयामास** गुणगायनेनेति शेषः. गानस्य भावकार्यत्वात्तस्य च भगवद्रूपत्वा**द्भगवान् पूरयामासे**त्युक्तम्.

**कारिकार्थः**

द्वात्रिंशाध्याये **द्वात्रिंश** इत्यादि, **गोपिकानामन्तः**करणे **स्वानन्दं पूरयामासेति** अत्राध्याये **ईर्यते** गुणगानेनेति शेषः (१). स्वानन्दपूरणमेव

१. अत्र स्वतन्त्रटिप्पणी प्रथमपरिशिष्टे मुद्रिता.

अन्तःप्रविष्टो भगवान् मुखादुद्धृत्य कर्णयोः ।
पुनर्निवेश्यते सम्यक् तदा भवति सुस्थिरः ॥(२)॥
शब्दार्थयोर्मुख्यतात्र युग्माः श्लोकास्ततोऽत्र हि ।

**टिप्पणी**

पश्यति भगवांस्तथा तथा मुदितो भवतीति वस्तुस्थित्या दिवा विरहजार्तिपूर्णानां सायं मिलने यो रसो भगवतः स न दिवा संगमे सतीति च **येनैव** स्वानन्देन स्वयं **पूर्णानन्दो** ज्ञातो भक्तैस्तादृशं तं **पूरयामासे**त्यर्थः. यद्यपि गुणगानं भावस्वभावादेव भवति, न तु प्रयोजनानुसन्धानेन, तथापि पूर्वभावस्थैर्यमप्यनेन भवतीत्याहुः **अन्तःप्रविष्ट** इत्यनेन. पूर्वं या नादद्वारा सुधा प्रविष्टा, भावात्मकभगवदात्मिका "रन्ध्रान्वेणोरधरसुधया पूरयन्नि"त्यत्र निरूपिता, सा पूर्वोक्तप्रकारैः बहिःफलानुभवपर्यन्तैः क्रमेण पुष्टा सती स्वविषयरूपं स्वपोषकं बहिःसम्बन्धमलभमाना तदर्थं स्वयं गुणगानरूपेण प्रकटाप्यलब्धविषया सती स्वप्राकट्यात् पूर्वम् अन्तःसाक्षात्प्रियप्राकट्यात् पुनस्तत्रैव स्वस्यान्यासां च श्रोत्रद्वारा प्रविष्टा तत्र स्वविषयं पोषकं प्राप्य सुस्थिरा जाता. तदेतदुक्त**मन्तःप्रविष्ट** इत्यादिना (१-२).

युग्मश्लोकैर्गाने हेतुमाहुः **शब्दार्थयोरि**ति, पूर्वं नादमात्रमनुभूतमिति नादप्राधान्येन "अक्षण्वतामि"त्यादिना गीतम्, अधुना स्वरूपानुभवोऽपि साक्षाद्वृत्त इत्युभयोरपि महारसरूपत्वज्ञापनाय द्वाभ्यां कथनमुभयोरप्येक-रूपत्वमिति ज्ञापनायैकवाक्यता चेत्यर्थः. संख्यातात्पर्यमाहुः **सर्वेष्वि**ति,

**लेखः**

स्वानन्दपूरणमेव भावस्थैर्यम्. तद्विवृण्वन्ति **अन्तःप्रविष्ट** इति. इदं स्वानन्दपूरणं गानान्ते "रेमिरेऽहस्सु" इत्यनेनोक्तम् (१-२).

**कारिकार्थः**

विवृण्वन्ति **अन्तःप्रविष्ट** इति. गुणगानेन **मुखादुद्धृत्य** गुणानुवादश्रवणेन **पुनः कर्णयोः** कर्णद्वारा **सम्यक्** यदा **निवेश्यते तदा** इत्यर्थः (२).

अत्र युग्मश्लोकैः गाने हेतुमाहुः **शब्दार्थयोर्मुख्यतात्रे**ति, **अत्रा**ध्याये नादात्मकस्य **शब्दस्य** तत्प्रतिपाद्य-भगवत्स्वरूपात्मक**स्यार्थस्य** च **मुख्यते**ति ज्ञापनाय **युग्माः श्लोकाः** इत्यर्थः. पूर्वं वेणुगीते नादमात्रानुभवः अत्रोभयोरनुभव इति द्वाभ्यां कथनम्. संख्यातात्पर्यमाहुः **सर्वेषु चैव मासेषु** इति. अत्र गुणगाने



सर्वेषु चैव मासेषु यत् करोत्युच्यते[१] हि तत् ॥(३)॥
अतोऽत्र मासयुग्मा हि प्रक्रमः फलमेव च ।
आद्यन्ते चापरं युग्मं त्रयोदश भवन्ति तत् ॥(४)॥

एवं भगवता सह रात्रौ क्रीडामुक्त्वा, दिने तासां संसारप्रवृत्तिर्भविष्यती-त्याशङ्क्य दिवसेषु भगवद्गुणवर्णनपरा जाता इति वदन्, गुणवर्णनाया आवश्यकत्वाय आरम्भे दुःखं पर्यवसाने सुखमिति निरूपयन्, प्रथमं प्रथमप्रवृत्तावपि गोपिकानां दिवसेषु परमं दुःखं जातमित्याह **गोप्य** इति.

**टिप्पणी**

निरूप्यते यत इति शेषः. अत्र हि वर्षे वर्षे यावतीं लीलां प्रभुः करोति तावती सर्वा लीला क्रमेण स्वामिनीभिर्गीता, न त्वेतावन्मात्रेति ज्ञापनाय पूर्णवर्षस्य द्वादशमासात्मकत्वात् माससमानसंख्याका युग्माः श्लोका उच्यन्त इत्याहुः **अतोऽत्रे**ति. किञ्च उपक्रमोपसंहाराभ्यां चैकं युग्मं भवति, तेनाधिमासेऽपि यत्करोति तदपि स्वामिनीभिर्गीयत इति ज्ञाप्यत इत्याशयेनाहुः **आद्यन्त** इति, समाहारोऽत्र. तत्र प्रतिपाद्यं रूपमाहुः **प्रक्रम** इति (३-४).

**लेखः**

**गोप्य** इत्यस्याभासे **प्रथममि**ति, **इत्याहे**त्यनेनास्यान्वयः. **प्रथमे**ति, गानारम्भेऽपि दुःखं किमुत गानाभावे इति कैमुत्यार्थ**मपि**शब्दः. व्याख्याने,

**कारिकार्थः**

हि वर्षे वर्षे यावतीं लीलां प्रभुः करोति तावती सर्वा लीला क्रमेण स्वामिनीभिः गीता नत्वेतदध्याये यावत्युक्ता तावन्मात्रेति ज्ञापनाय पूर्णवर्षस्य द्वादशमासात्मकत्वात् माससमानसंख्याका युग्माः श्लोका उच्यन्त इत्याहुः **अतोऽत्र मासयुग्मा ही**ति. माससमानसंख्याका युग्मा **मासयुग्मा** इति मध्यमपदलोपी समासः. किञ्च उपक्रमोपसंहाराभ्यां चैकं युग्मं भवति. तेन अधिमासेऽपि यत् करोति तदपि स्वामिनीभिः गीयते इति ज्ञाप्यते इत्याशयेनाहुः **आद्यन्ते चापरं युग्ममि**ति. आदिश्च अन्तश्च आद्यन्तं, तस्मि**न्नाद्यन्त** इति विग्रहः. समाहारोऽत्र. तत्र प्रतिपाद्यं रूपमाहुः **प्रक्रम** इति. आद्यश्लोके गानोपक्रमो, अन्त्यश्लोके "तच्चित्तास्तन्मनस्का" इति **फलम्. त्रयोदश भवन्ति तदि**ति, अत्र **तदि**त्यव्ययं तस्मादित्यर्थे (३-४).

१. करोत्यच्युतेत्र (करोत्युच्यतेत्र?) तदिति पाठः.

॥ श्रीशुक उवाच ॥

**गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः ।**
**कृष्णलीलाः प्रगायन्त्यो निन्युर्दुःखेन वासरान् ॥१॥**

केवलपदात् पूर्वोक्ता ग्राह्याः. सदानन्दे **वनं** गते **तमन्वेव द्रुतं चित्तं** यासाम्. वस्त्वन्तरग्रहणाक्षमं चित्तं जातम्. **द्रुत**शब्दाद्विलय उक्तः. ततः सर्वतः प्रसृतं सूक्ष्मभावापन्नं सदानन्दस्य लीलां गृहीतवत्. अतः **कृष्णलीलाः प्रगायन्त्यो** जाताः. यथा स्वरूपं सदानन्दरूपं तथा तल्लीला अपीति तदात्मकत्वं च लीलानां ज्ञापयितुं पुनर्नामग्रहणं कृतम्, अन्यथा 'तत्'पदमेव वदेत्. तथा सति तत्सम्बन्धित्वमात्रं प्राप्येत न तूक्तरूपत्वम्. अवश्यं वाच्यं चैतद् यतः स्वरूपवियोगे तदतिरिक्तस्य न जीवनहेतुत्वं, ततो हीनत्वात्. ततो यथाकथञ्चिन्महता मानसदुः**खेन वासरान् निन्युः**. यदा पुनस्तच्चित्तं प्रकीर्णे भगवच्चरित्रे विलीनं सद् एकभावं प्राप्स्यति तदा पूर्णमनोरथा भविष्यन्ति. इदानीं सर्वा सामग्री विशकलितेति दुःखेन दिननयनम्. **वासर**पदाद् रात्र्यर्थं कथञ्चित् प्राणानां धारणं लक्ष्यते ॥१॥

सर्वोत्तमा हरेर्लीला वेणुनादपुरःसरा ।
हेतुः सर्वत्र वाच्येऽर्थे प्रथमेषु निरूप्यते ॥(५)॥
देव[1]स्त्रियस्तथा गावः सरितः पादपा लताः ।
पक्षिणश्च तथा मेघा ब्रह्माद्या गोपिकास्तथा ॥(६)॥

**टिप्पणी**

**गोप्यः कृष्ण** इत्यत्र, **केवलपदादि**ति, "गोव्रजयोषितामि"तिवदपकर्षज्ञापकधर्मानुक्तिपूर्वकं शुद्धभावज्ञापक**गोपी**पदाद् रासमण्डलमध्यस्थाएव उच्यन्ते, न तु पूर्वाध्यायोक्ता इत्यर्थः ॥१॥

**लेखः**

**सूक्ष्मभावापन्नमि**ति, द्रुतत्वाद्विरलावयवमित्यर्थः. आनन्दमयस्य सर्वान्तरत्वेन विरलावयवत्वात्तादृशमेव चित्तं तद्ग्रहणे योग्यमिति भावः. **पूर्णमनोरथा** इति, **मनोरथो** भगवत्सम्बन्धविधायको[2] भावः **पूर्णो भविष्यत्यान्तररमणं** संपत्स्यते. तथा च पूर्वोक्तं गुणगानप्रयोजनं भावस्थैर्यं भविष्यतीत्यर्थः. **सामग्री**ति, तत्तदन्तःस्थिता सुधा **विशकलिता** तत्तदन्तःस्थितेत्यर्थः ॥१॥

१. दिव इति पाठः. २. सम्बन्धविषयकः इति जो. पाठः.



हरिण्यो देवगन्धर्वा द्विधा च भगवान् हरिः ।
उत्तरेषु निरूप्यन्ते रसज्ञा वेणुवादने ॥(७)॥
जानाति भगवानेव जानात्येव हरिः स्वयम् ।
अतोऽन्ते भगवानुक्तो वारद्वयमनन्यधीः ॥(८)॥
अनुभाव[1]स्तु नादस्य स्त्रीषु पूर्वमुदीर्यते ।

**लेखः**

**जानातीति**, अत्र वेणुवादनरसज्ञा उच्यन्ते. तत्र भगवति द्विविधोऽपि नियम उक्तः. इमं रसं **भगवानेव जानाति,** अतो यथायोग्यं दिनतापनिवृत्तिपूर्वकरसदानं भगवतैव कर्तुं शक्यं न तु चन्द्रादिना. अतः सुहृदाशिषो दित्सया स्वयमेवैतीत्यर्थः. **अत्रैवकारेण** चन्द्रादिव्यावृत्तिः. ननु बालकत्वात् कथमसाधारणीं लीलां ज्ञात्वा करिष्यतीत्याशङ्क्य "यदुपतिरि"ति श्लोक उक्तः. अतो **जानात्येव,** अत्रैवकारेण बालत्वेन संभावितस्याज्ञानस्य निवृत्तिः. **अत** उभयविधनियमार्थं **वारद्वयं भगवानुक्त** इत्यर्थः (८).

**कारिकार्थः**

**वामबाहुकृते**त्यस्याभासे **सर्वोत्तमे**ति, **वेणुनादपुरःसरा हरेर्लीला** युगलश्लोकानां मध्ये **सर्वत्र प्रथमेषु** श्लोकेषु **निरूप्यते.** कीदृशी लीलेत्याकांक्षायामाहुः **वाच्येऽर्थे हेतुरि**ति, युगलद्वितीयश्लोकेषु **वाच्यो योऽर्थः** व्योमयानवनितामूर्छादिरूपः तत्र **हेतु**भूतेत्यर्थः (५).

**पादपा लताश्च** एकश्लोकोक्ता एकविधा ज्ञेयाः. **देवस्त्र्यादयोः देवगन्धर्वा**न्ता दशविधा वेणुवादरसज्ञा दशयुगलनिरूपिता उक्ताः अन्त्ययुग्मद्वये तु भगवानेव उक्त इत्याहुः **द्विधा च भगवान्हरिः** इति. श्लोकद्वयोक्त इत्यर्थः. एते द्वादशविधा **वेणुवादने रसज्ञा उत्तरेषु** युग्मद्वितीयश्लोकेषु **निरूप्यन्ते** इत्यर्थः (६-७).

अन्त्ययुगलद्वयतात्पर्योक्तौ **जानाति भगवानेव जानात्येव हरिः स्वयमि**ति. यतो **भगवानेव** एतद्रसं **जानाति अतः** कारणाद् **अन्ते** "उत्सवं श्रमरुचे"ति श्लोके "यदुपतिर्द्विरदराजविहार" इतिश्लोके च **वारद्वयं भगवानेवोक्तः.** अत्र **जानाति भगवानेव जानात्येव हरिः स्वयमि**ति वारद्वयोक्तिर्भगवतः श्लोकद्वयोक्तत्वबोधनाय, तत्र भगवत्त्व-तापहारकत्वबोधनाय **भगवत्**पद-**हरि**पदे (८).

१. अनुवादे इति पाठः.

त्रिविधासु ततः पुंसु ब्रह्मा गोपी तथा मृगी ॥(९)॥
त्रयोऽत्र त्रिविधाः प्रोक्ताः प्रकीर्णाः सकलाः सुराः ।
सर्व एवानभिज्ञा हि वस्तुसामर्थ्यसंयुताः ॥(१०)॥
एवं वेणुर्द्वादशधा फलतीति निरूपितः ॥

### टिप्पणी

अन्त्ययुग्मद्वयतात्पर्योक्तौ **जानाति भगवानेवे**ति, **ततः पुंस्वि**ति त्रिविधेष्विति शेषः. लतानां तरुमध्यपातित्वेन पुंस्वेव गणना कृता (८-९).

### लेखः

अनुभावमाहुः **सर्व एवे**ति, पूर्वं दशाप्येते नादरसानभिज्ञाः, पश्चान्नादश्रवणमात्रेण **वस्तुनो यत्सामर्थ्यं** मूर्च्छाद्युत्पादनं त**त्संयुता**स्तत्फलाधारा[१] जाताः. अयमनुभाव इत्यर्थः. अत्र हेत्वन्तराभावाद् नादानुभावएव अयमिति **हि**शब्दः. पूर्वं द्वादशैते **रसज्ञा** इत्युक्तम्. तत्र पूर्वं दश **रसानभिज्ञाः**[२] ततो नादानुभावेन किञ्चिद्रसज्ञा जाताः, द्विविधो भगवांस्तु सर्वथा रसज्ञ इति विभेदः. **द्वादशधे**ति, दशयुग्मेषु मूर्च्छादिप्रकारेण, एकादशे तापहरणप्रकारेण, द्वादशेऽसाधारणलीलाप्रकारेणेति द्वादशधा (१०½).

### कारिकार्थः

**ततः पुंस्वि**ति, त्रिविधेष्विति शेषः. पादपपक्षिमेघेष्वित्यर्थः. लतानां तरुमध्यपातित्वेन पुंस्वेव गणना कृता. **त्रयोऽपि त्रिविधाः प्रोक्ता** इति. त्रयाणां त्रयाणां **त्रय**स्त्रयो भेदा**स्त्रिविधाः** राजससात्त्विकतामसा इत्यर्थः. देवस्त्र्यादयस्त्रयो राजसाः पादपलतादयः सात्त्विकाः ब्रह्मगोपीमृगीभेदास्तामसा इति विवेचितं सुबोधिन्याम्. **प्रकीर्णा** इति उपदेवगणादय इत्यर्थः. अनुभावमाहुः **सर्वएवे**ति, अत्र श्रीवल्लभगोस्वामिनः— "पूर्वं दशाप्येते नादरसानभिज्ञाः, पश्चान्नादश्रवणमात्रेण **वस्तुनो** यत् **सामर्थ्यं** मूर्छाद्युत्पादनं तत्**संयुता**स्तदाधाराः जाताः, अयमनुभाव इत्यर्थः. अत्र हेत्वन्तराभावात् नादानुभावएवायमिति **हि**शब्दः. पूर्वं द्वादशैते **रसज्ञा** इत्युक्तम्. तत्र दश पूर्वं र**सानभिज्ञाः** ततो नादानुभावेन किञ्चिद्रसज्ञा जाताः, द्विविधो भगवांस्तु सर्वथा रसज्ञ इति विभेदः" (९-१०).

॥ इति श्रीतामसप्रकरणीयकारिकाव्याख्या ॥

॥ श्रीगोपीजनवल्लभाय नमः ॥

१. तदाधारा इति जो. पाठः. २. दश पूर्वरसानभिज्ञा इति जो. पाठः.



तत्र प्रथमं स्त्रीप्राधान्याद् देवस्त्रियो मुख्या इति तासु वेणुनादप्रभावं वक्तुं येन प्रकारेण वेणुनाद उत्तिष्ठति तं प्रकारमाहुः **वामबाहुकृतवामकपोल** इति.

॥ गोप्यः ऊचुः ॥

**वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम् ।**
**कोमलाङ्गुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः ॥२॥**
**व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः ।**
**काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥३॥**

**यत्र मुकुन्दः अधरार्पितवेणुमीरयति** तत्र तस्मिन् क्षणे **व्योमयानवनिताः कश्मलं ययुरि**ति सम्बन्धः. वेणुनादः पञ्चधा भवति— मुखस्य परितः समतया उपर्यधश्च धारणेन. तत्र स्त्रीणां कामोद्बोधकः वामपरावृत्तः, स्त्रीणां पुरुषाणां च दक्षिणः, देवानामुच्चैः, अधस्तिरश्चां; समतया सर्वेषामचेतनानां च. तत्र देवस्त्रीणां कामोद्बोधको वामपरावृत्त एवेति तथा निरूप्यते. मानुषभावाद्देवभावो महानिति मानुषनादेन देवस्त्रीणां भ्रमो न भविष्यतीत्याशङ्क्य "तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमि"ति वाक्याद् भ्रूविलासं नादे योजितवान्. तदाह **वामबाहौ कृतो** योजितो **वामकपोलो** येन, **वल्गिता भ्रूर्**यस्येति, भ्रूरत्र दक्षिणा, तथैवाभिनयभावात्. **वल्गिता** उच्चैर्गतियुक्ता. **अधरः** पूर्वं वर्णितः लोभात्मकः तत्र चेत्स**मर्पितः** परमानन्दं न प्रयच्छति, काममेवोद्बोधयति. यतः श्रुत्वापि विरहजनितक्लेशमेव प्राप्नुवन्ति, न तु परमानन्दम्. तत्रापि क्रियाशक्तिः पुष्टा चेद् भवेत् तदा लुब्धादपि फलं

### टिप्पणी

**वल्गितभ्रुरि**त्यस्याभासे, **मानुषभावादि**ति. मानुषभावमनतिक्रम्य लीलां

### लेखः

**वामे**त्यनेन प्रकारान्तरव्यावृत्तिरुक्तेति व्यावर्त्यानां स्वरूपमाहुः **वेणुनाद** इति. **परित** इति दक्षिणवामभेदेन द्वयम्. व्यावृत्तौ हेतुमाहुः **तत्र स्त्रीणामि**त्यारभ्य **निरूप्यत** इत्यन्तेन. **प्राप्नुवन्ती**ति देवस्त्रिय इति शेषः. वादनार्थमधरे समर्पणमावश्यकम्, एवं सति वेणोर्लुब्धत्वात्तथा जातमित्यर्थः. **तत्रापी**ति लोभे समर्पणेऽपीत्यर्थः. तारनादे विशेषज्ञानादभिलाषः पूर्येतेति भावः. **लुब्धादपी**ति, लोभसम्बन्धाद्वेणोरपीत्यर्थः.

सिध्येत्, तदपि नास्तीत्याह **कोमलाङ्गुलिभिराश्रितो मार्गो** यस्य, आदौ मन्दप्रकारेणैव वेणुनादस्योचितत्वात्. **मार्गास्**तस्य रन्ध्राः, तेषां गाढभावेन निष्पीडने तारो नादो भवति, मध्यभावे मध्यमः, कोमले मन्द इति. **गोप्य** इति सम्बोधनं सर्वानुभवसाक्षिकमेतदिति ज्ञापयितुम्. **ईरणम**त्र वादनम्. प्रयोजनमाह **मुकुन्द** इति, वेणुनादेन शुद्धं चेद् जगत् तदा मोक्षं दास्यामीति.

एवं हितार्थेऽपि वेणुवादने ये मोक्षानधिकारिणः तेषां कामएव जात इत्याहुः **व्योमयानवनिता** इति. **व्योमयानाः** विमानयानाः सर्वे देवयोनयः तेषां **वनिताः**. अधिकारित्वात् स्त्रीत्वाद् भोग्यत्वाच्च न मुक्त्यधिकारिण्यः. **सिद्धैः** सहिता अपि, भगवद्व्यतिरिक्तं सर्वमेव दातुं समर्थाः[१]. स्वयमत्यन्तं गाने निपुणाः. आदौ वेणुनादं श्रुत्वा **विस्मिता** जाताः, ततोऽल्पकामोद्रेके तद्वेणुनाद**मुपधार्य सलज्जा** जाताः, भर्तारो ज्ञास्यन्तीति. ततोऽत्यन्तमुद्रेके स्वात्मरक्षार्थं कामेन मरणशङ्कया **काममार्गणेभ्यः समर्पितं चित्तं** याभिस्तादृश्यो जाताः, यथा मारकाय मारणात् पूर्वं स्वयमेव समर्प्यते भीरुभिः. ततः कामेन पीडिताः **कश्मलं** मूर्च्छां **ययुः**. सा मूर्च्छा अत्यन्तविस्मारिकेत्याह **अपस्मृता नीवी** कटिवस्त्रं याभिरिति. एवं वेणुनादोऽत्यन्तं कामबोधक इत्यस्माकं मूर्च्छादौ किमाश्चर्यमिति भावः ॥२-३॥

---

**टिप्पणी**

करोतीति तथोक्तम्. **मुकुन्द**तात्पर्योक्तौ **वेणुनादेने**ति, परोक्षवादोऽत्र कृतो, विवक्षितार्थस्य गोप्यत्वात्. **शुद्धिर्**भगवद्भावान्यभावराहित्यं **मोक्षो** भजनानन्दानुभवः ॥२॥

**लेखः**

**व्योमे**त्यत्र, **तेषामि**ति विमानयानानामित्यर्थः. **सर्वमेवे**ति अणिमादिकमित्यर्थः, सिद्धानां तथा सामर्थ्यं स्पष्टमेव. **दातुं शक्ताः** किमुत स्वयमनुभवितुमित्यर्थः. **मार्गणेभ्य** इति, कामरूपो भगवान्, अङ्गुलयः शराः, "कुसुमशरशरप्रान्ता हि ते"त्यत्र तथोक्तेः. तथा च कथमयं नादो जायत इति गवेषणार्थमङ्गुलीषु चित्तं कृतवत्य इत्यर्थः. तेन किञ्चित् स्वास्थ्यं भवतीति भावः ॥२-३॥

---

१. शक्ता इति पाठः.



गवामपि वेणुनादेन तथा जातमिति वक्तुं प्रकारान्तरेण वेणुरवोद्गममाहुः **हन्त चित्रमि**ति.

**हन्त चित्रमबलाः शृणुतेदं हारहास उरसि स्थिरविद्युत् ।**
**नन्दसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ॥४॥**
**वृन्दशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् ।**
**दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ॥५॥**

हे **अबलाः, इदमाश्चर्यं शृणुत— यर्हि नन्दसूनुः कूजितवेणुः** तर्हि **वृषा गावो दन्तदष्टकवला निद्रिता आसन्नि**ति सम्बन्धः. कामः पशुषु सजातीयएव, नोत्कृष्टे नापकृष्टे. अश्वतरे त्वन्यैव व्यवस्था. हीनेषु महतो रमणार्थं सम्बन्धोऽपि रसाभासजनकः. अतः सम्भोगलक्षणं कामं निराकृत्य पशुष्वत्यावश्यकं भक्ष्यं निरुणद्धि. पूर्वोक्तं वामबाहुकृतवामकपोलत्वमनुवर्तते, तत्रैवावान्तरभेदो वक्तव्यः. **हन्ते**ति खेदे, यत्र गवामपि सर्वक्रियानिवृत्तिः तत्रास्माकं न निवर्तते इति **चित्रम्.** पूर्वापेक्षयाप्युत्कृष्टं; देवस्त्रियो हि पुरुषोत्तमे कामुक्यो भवन्त्येव, इदं त्वत्याश्चर्यमिति. **अबला** इति सम्बोधनं गत्वा दर्शनाभावाय. इदं मया प्रोच्यमानं **शृणुत.** अत्र गोपिका नवविधाः— गुणातीते प्रकारत्रयमिति कर्मज्ञानभक्तिभिः. वक्तृव्यवस्थैषा. प्रथमा राजस्यः, इयं राजसराजसी. अपेक्षितं पूर्वं सर्वमेवानुवर्तते सर्वत्र. आदौ

---

**लेखः**

**हन्ते**त्यत्र **पशुष्वि**ति, मनुष्याणामपि पशुत्वं श्रुतिसिद्धम्. देवानां तु मानुषीष्वपि प्रवृत्तिरिति भावः. **अन्यैवे**ति, सर्गादावेव तथा सिद्धत्वात् सजातीयत्वमेवेत्यर्थः. एतेन तेषु भगवद्विषयकः कामो निषिद्धः. भगवति तद्विषयकं कामं निषेधन्ति **हीनेष्वि**ति. **निराकृत्ये**ति, अविद्यमानत्वात्तमनुद्बोध्य वेणुनादो भक्ष्यं निरुणद्धीति यथा पूर्वत्र सम्भोगरसानुभवो न जातः तथात्र भक्षणरसानुभवो न जात इत्यर्थः. **तत्रास्माकं न निवर्तत** इति, क्रियोद्बोध एव जायत इति खेद इत्यर्थः. **अत्रे**ति आन्तररमणे इत्यर्थः. इहायमभिसन्धिः— बाह्यरमणे स्वरूपप्राधान्यं, तच्च षड्गुणमिति तदेकनिष्ठत्वादेता अपि षड्गुणरूपा निरूपिताः. आन्तररमणे भावप्राधान्यं, ते च सत्त्वादिदृष्टान्तैस्तावन्त इति तदेकनिष्ठत्वादेता अपि तथा निरूप्यत इति. **प्रथमा** इति तिस्र इति शेषः. **राजस्यः** रजोभेदभिन्ना इत्यर्थः. **इयमि**ति तत्रेति शेषः, इयं

भगवतः स्वरूपं शृणुतेति तं चतुर्धा वर्णयति, **हारवद् हासो** यस्य, **उरसि स्थिरा विद्युद्** यस्य, **नन्दस्य** च **सूनुः**, **आर्तजनानां** सर्वेषामेव **नर्मदः**. तत्र हेतु**रयमि**ति, अन्यथेदानीमग्रे प्रकटो न भवेत्. द्वितीये मुहूर्ते निर्गच्छन्त्वालक्ष्याह. तदा प्रतिमुहूर्तं युगलानि भवन्ति. सन्ध्यासन्ध्यांशयोरन्तरेण द्वादशैव मुहूर्ता इति सोमोत्पत्तौ निर्णयः. अन्येषां हास्यं किर्मीरितं भवति रज्जुवत्, भगवतस्तु दन्तानां कान्त्या विभक्तो हासः मुक्ताहारवद् भवति, यथा रत्नैर्व्यवहिता मुक्ता इति. अनेन जगतः प्रपञ्चे मोहजनकत्वं स्थिरीकृतम्. स्नेहकलाभिर्माया विभक्तेति श्रुतार्थापत्तिरर्थनिरूपणे मूलं

## टिप्पणी

**हन्त चित्रमि**त्यत्र, **सोमोत्पत्तौ निर्णय** इति. तत्रामावास्यायां सोमस्य दिवा स्थितिस्थानमुक्तं, "त्रिमुहूर्तं वसेदर्के त्रिमुहूर्तं जले वसेत् त्रिमुहूर्तं वसेद्गोषु त्रिमुहूर्तं वनस्पतावि"ति. एवं सति दिनस्य द्वादशमुहूर्तात्मकत्वात्प्रतिमुहूर्तं यां यां लीलां प्रभुः करोति सा सा लीलाऽत्र गीयत इति संख्यया ज्ञापितं भवति. लीलासहितो भगवान् हृदि प्रकट इति यदा यां लीलां प्रियः करोति तदैव सैव लीला स्वामिनीहृदयेषु स्फुरतीति नानुपपत्तिः काचित्. **हारहास** इत्यत्र, केवलमुक्ताहारतुल्यत्वे चित्रता नास्तीति **यथा रत्नैरि**त्युक्तम्. अधरप्रभाभिररुणत्वं दन्तानां सहजम्. हासविभागस्थैर्यसूचितमर्थमाहुः **अनेने**ति, भगवत्स्नेहेन सर्वात्मना मायाद्यपगमः प्रमाणबलं, तत्स्थैर्यकृत्या तु तन्निराकरणं भवति. एवं सति स्नेहमायाकार्ययोः सहभावकरणेन भगवत्स्नेहवतोऽपि **जगतो** व्रजीयजीवरूपस्य **प्रपञ्चे** विषयरूपे तथात्वं तथेत्यर्थः. इदमप्येकं चित्रम्. एतादृशस्य सूचितस्यार्थस्योक्तौ **हन्ते**ति

## लेख

शुद्धराजसीत्यर्थः. तथा च पूर्वोक्ता राजससात्विकी, अग्रिमा राजसतामसीति ज्ञेयम्. **स्वरूपमि**ति मया वर्णितमिति शेषः. **सर्वेषामेवे**ति, न तु नन्दस्यैवेत्यर्थः. **तत्रे**ति, सर्वेषां सुखदत्वकथने प्राकट्यं साधकमित्यर्थः. **किर्मीरितमि**ति एकरूपमित्यर्थः. तेषां दन्तेषु प्रभाऽभावान्न तैर्विभागः कर्तुं शक्यः. भगवतस्तु दन्तेषु माणिक्यदृष्टान्तस्योक्तत्वात् प्रभावत्त्वेन[१] तैर्हासविभागो भवतीति भावः. **मोहजनकत्वमि**ति भगवत इति कर्तृषष्ठीति शेषः. श्रुतार्थापत्तिं

१. प्रभावत्वेन इति मुद्रितः पाठः जो.पाठमनुसृत्य संशोधितः.



सर्वत्र. यथा दृष्टे नानुपपत्तिः, दृष्टानुसारेणैव सर्वं व्यवस्थाप्यते, "नहि दृष्टे अनुपपन्नं नाम व्याघातादि"ति. लौकिकानामेषा व्यवस्था, सर्वथा दृष्टविरोधो नाङ्गीक्रियत इति. तथा वैदिकानां श्रुतिः. यावतैव बोध्यमानः पदार्थः स्थिरीभवति तावांस्तदनुगुण उच्यत इति सर्वत्रैवैषा व्यवस्था. न केवलं संसारे पुत्राद्यासक्तिमेव स्थिरीकरोति किन्तु धनासक्तिमपीत्याह **स्थिरा** लक्ष्मीर्यत्रेति. एवं प्रमाणबलनिराकरणार्थं द्वयं विधाय प्रमेयबलनिराकरणार्थं द्वयं कृतवा-

## टिप्पणी

खेदोक्तिबीजं, भगवति रागवतामन्यत्रापि रागदर्शने भक्तानां खेदोत्पत्तेरावश्यकत्वात्. अन्यथा तु स्नेहेन सर्वत्यागे तैः सह लोके लीला न स्यादिति तथा कृतिरिति भावः. लोके नैवं हासः सम्भवतीत्यत्राप्यसम्भावना मा भवत्विति प्रमाणमुक्तं **श्रुतार्थापत्तिरि**त्यादिना, अग्रिमपदेऽप्येवमेव ज्ञेयम्. अचिरस्थायित्वधर्मसाम्येन **विद्युत्**पदेन धनं लक्ष्यते. यद्वा हारवद्भगवदुरस्येव हासस्थित्या विभागस्थैर्यसूचिता या प्रपञ्चविषयिण्यासक्तिस्तामपि स्वविषयिणीमेव करोति. एवं सति प्रपञ्चे प्रपञ्चविषयको यो मोहस्तस्य स्वविषयकत्वेन जनकत्वं स्थिरीकृतं स्वस्मिन्निति टीकार्थः सम्पद्यते. स्वमात्रविषयकासक्तिजनकत्वं लोकेऽत्यप्रसिद्धमिति चित्रतात्र. एवमेवाग्रेऽपि ज्ञेयम्. अस्मिन्पक्षे **हन्ते**ति हर्षे. अत्र न कस्यापि बलं प्रभवतीति ज्ञापनाय सम्बोधनम्. विशेषणयोर्मुख्यार्थोऽतिगोप्य इति पितृचरणैर्न लिखितः. अतएव स्वामिनीभिरपि गूढार्थज्ञानार्थं सावधानतया श्रोतव्यमित्याशये**नेदं शृणुते**त्युक्तम्. अस्माभिरप्यतएव न लिख्यते, तदनुग्रहवतां स्वतएव तत्स्फूर्तेः, अन्येषां तज्ज्ञानस्यानुचितत्वात्. भगवन्मात्रस्नेहवतोऽन्यधर्मनिवृत्तिः स्वाभाविकीति प्रमाणबलनिरासः ॥४॥

## लेखः

दृष्टान्तेन व्युत्पादयन्ति **यथे**ति. **नाङ्गीक्रियत** इत्यन्तं लौकिकानां यथा तथा वैदिकानां श्रुतिरतोऽत्र तथा निरूप्यते इत्यर्थः. **यावतैवे**ति, **बोध्यमानो** हारहासत्वरूपः **पदार्थो** मोहजननपर्यन्ततात्पर्येण **स्थिरीभवति.** प्रयोजनाभावेऽत्र **हारहास**पदं न वदेदिति भावः. **तावन्मोहजननपर्यन्तार्थो** **हारहासपदानुगुण**स्तदनुगत इत्यर्थः. **स्थिरीकरोती**ति टिप्पण्युक्तद्वितीयव्याख्यानपक्षे स्वस्मिन्निति शेषः. पूर्वं पुत्रादिषु स्थितामासक्तिं स्वस्मिन्नेव स्थिरीकरोतीत्यर्थः.

नित्याह यतोऽयमेव **नन्दस्य सूनुर्**जातः **आर्तानां** च स्वयमागत्य सुखं प्रयच्छति. परिदृश्यते च तथेति च प्रमाणम्. नहि महानेवं करोति. अतः इदमाश्चर्यम्. एतमेवार्थं प्रकटीकुर्वन् **कूजितवेणु**र्भवति. अथवा पूर्वापेक्षया अधोवक्त्रलीलया वेणुर्वाद्यते. **हारवद्धासो** यस्मिन् **उरसि,** तस्य **स्थिरता** विभागस्थैर्यं चाश्चर्यम्. श्रीवत्सोऽप्यत्युत्कृष्ट इति शोभार्थं तस्य स्थिरत्ववर्णनम्. तादृशस्य नन्दसूनुत्वे स्नेहो वर्धते, तत्रापि स्वोपकारक इति. कूजितत्वं वादनविशेषधर्मः, सर्वेषामान्तरं प्राणधर्ममप्याकर्षति.

यत्र पशूनामपि प्राणादिधर्महारी तत्रान्येषां किं वक्तव्यमिति पशूनां निरूपयति. एकस्य तथात्वं हेत्वन्तरसिद्धमपि भवेद् अत उक्तं **वृन्दश** इति, समूहशः, यत्रैव वेणुनादः प्रविष्टः तेषां सर्वेषामित्यर्थः. **व्रजस्थिता वृषाः** ककुद्मिनो मत्ताः उत्सृष्टवृषा इव शकटादिनेतारः. ते व्रजसमीपएव तिष्ठन्तीति ग्राम्यपशूपलक्षणार्थं **व्रज**पदम्. **मृगा गाव**श्चारण्ये मिलिता भवन्ति. आरण्या ग्राम्याश्चैवं भवन्तीति ज्ञापनार्थं **मृग**पदम्. किं बहुना, सर्व एव पशवो **वेणुवाद्येन** कृत्वा **हृतचेतसो** भवन्ति. नापि भगवत्समीपगमने समर्थाः किन्तु **हृतचेतसो** दूरादेव भवन्ति. अनेन वेणुनादस्य स्वाभाविक एवायं धर्मो न तु भगवत्समीपकृत इति. **कवलास्**तृणरूपाः केवलं **दन्तैर्दष्टाः** न त्यागे न च भक्षणे समर्थाः. दन्तदंशमात्रेण प्रयत्नो निवृत्त इति नादस्येतरकार्यनिवर्तकत्वमुक्तम्. पूर्वक्रियाया अत्यावश्यकत्वाय **कवल**पदम्. देवस्त्रीवन्मूर्च्छानिवृत्त्यर्थमाह **धृतकर्णा** इति, अन्यत् सर्वं परित्यज्य कर्णमेव साधनं धृतवन्तः. ततो बाह्यान्निवृत्ता इत्याह **निद्रिता** इति. ततो नादेन

**लेखः**

**धनासक्तिमि**ति, अत्रापि स्वस्मिन्निति शेषः. **तथेति च प्रमाणमि**ति **च**कारेण पूर्वोक्तश्रुतार्थापत्तेः समुच्चयः. **अथवे**ति, अस्मिन् पक्षे **हारहासे** इति सप्तम्यन्त**मुरसो** विशेषणम्. अस्मिन् पक्षे चित्रतां विवृण्वन्ति **तस्ये**ति. **वादने**ति, **वादन**जनितो **विशेषधर्मो** वेणुनिष्ठ इत्यर्थः.

**वृन्दश** इत्यत्र **अनेने**ति, **आरादि**ति कथनेन वेणुनादस्य कार्यं, न तु भगवत्सामीप्यस्येत्युक्तमित्यर्थः. **इतरकार्ये**ति, कार्यमात्रनिवर्तकत्वे कर्णधारणमपि न कुर्युरि**तीतर**पदम्; स्वोपयोगीतरकार्यनिवर्तकत्वमित्यर्थः, **पूर्वे**ति, दन्तदंशानन्तरं वेणुनादः श्रुतः, ततोऽदनं कर्णधारणं च प्राप्तम्. तत्र दंशस्य पूर्वत्वात्तत्सम्बन्धिन्यदनक्रिया आवश्यकी. **कवलत्वेन** सिद्धत्वा**दत्यावश्यकी**त्यर्थः.



सर्वतो व्याप्ताः **लिखितं** गवादीनां **चित्रमिव** पश्चात्ते जाताः, स्थावरापेक्षयापि स्थिरा जाताः. पूर्वोक्तार्थादधिकोऽर्थ इति चित्रता ॥४-५॥

वेणुनादेन नदीनामतिजडानामपि स्पृहा जायत इति वक्तुं पुनर्वेणुनादं वर्णयन्ति **बर्हिण** इति.

**बर्हिणः स्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडम्बः ।**
**कर्हिचित् सबल आलि सगोपैर्गाः समाहूवयति यत्र मुकुन्दः ॥६॥**
**तर्हि भग्नगतयः सरितो वै तत्पदाम्बुजरजोऽनिलनीतम् ।**
**स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः ॥७॥**

आवेशो देववेशश्च पूर्वं निरूपितौ, लीलावेशोऽधुना निरूप्यते. निरन्तरक्रिया हि नदीनां, चेतनानां तु निद्रामूर्च्छादौ क्रियानिवृत्तिरपि दृष्टा, नदीनां तु न कदापि निवर्तते इति, तत्रापि महतीनाम्. बन्धोऽपि न तासां भवति. सापि वेणुनादेन निवृत्ता. **बर्हिणो** मयूरस्य **स्तबकाः** गुच्छकाः पिच्छगुच्छानि **धातवो** गैरिकादयः पत्राणि च. धातूनां वा पत्राकारेण लेखाः, कमलपत्राण्यपि आकारार्थं बध्यन्त इति. तैः कृत्वा **मल्लानां परिबर्हः** अलङ्करणं वेश इति यावत्. स्वयं **स्तबकादिभिः बद्धो** योऽयं **मल्लपरिबर्हः** तं **विडम्बयति. विडम्बो** वा **बद्धः.** अस्वाभाविकं विडम्बनमेव भवति नटमल्लवत्. अनेनायं नादो नृत्योपयोग्येव निरूपितः. तेन क्रियाशक्तिरुद्गता

**लेखः**

तथापि न जातेति नादस्य माहात्म्यमिति भावः. **पूर्वोक्ता**दिति, देवस्त्रीणां कश्मलादित्यर्थः ॥४-५॥

**बर्हिण** इत्यस्याभासे **अतिजडाना**मिति, **जडा** मूर्खाः पूर्वोक्ताः पशवः लीलाविशेषज्ञानरहिताः, ततो**ऽप्यतिजडा** नद्यो यासां किञ्चिदपि न ज्ञानं, तासामपीत्यर्थः. व्याख्याने, **आवेशो देववेशश्चे**ति, **आसमन्ताद्वेशः** सार्वदिक इत्यर्थः. स प्रथमयुगले उक्तः. **अवेश** इति पाठे अवस्थितिविशेषएव उक्तो, न तु वेश इत्यर्थः. **देववेशः** देवस्य क्रीडाकर्तुर्वेशो गोचारणार्थं निर्गमनसामयिक इत्यर्थः, स द्वितीययुगले उक्तः. **लीलावेशो** नृत्यलीलासामयिको वेशः, सोऽत्र युगले निरूप्यत इत्यर्थः. **महतीनामि**ति, सरन्तीति सरित इति यौगिकार्थेन गमनस्वभावत्वान्महत्त्वं सूचितमित्यर्थः. **अनेने**ति, नृत्यवेशविडम्बककथनेन नृत्यसामयिकएव अयं न त्वन्यसामायिक इत्युक्तमित्यर्थः.

नादस्था निरूपिता नदीनामाकर्षे हेतुर्भवति. **कर्हिचिदि**ति यदोत्साहः क्रिया-शक्तौ. अतएव **सबलः** बलभद्रसहितः. **आली**ति सम्बोधनं गोप्यतयायमर्थो निरूपितो; अप्रतारणार्थं च. प्रायेणैषा तदा दर्शनार्थं गतवती स्नानादिव्याजेन. एवं सामग्रीं विधाय सोऽस्माकं भोक्ता वस्तुतो वा जातो वा, तादृशो **गोपैः सहितः**. अनेनात्र वैकुण्ठस्थितलीला सूचिता, अत्रापि लक्ष्मीरस्माभिः सहिता रात्रौ – गोपैः सहिता दिवसे तिष्ठतीति. अतएव सम्बोधनं रहस्यसूचकम्.

## टिप्पणी

**कर्हिचित् सबल आली**त्यत्र, **गोप्यतयायमर्थ** इति, एतेन कर्हिचिदेव सबलः, कर्हिचिदेव गोपैः सहित इत्यपि सम्बन्धो ज्ञाप्यते. तेन सदैकान्ते भोक्तैवेति **स** इत्यनेनोच्यते. **मुकुन्द** इत्यत्र, दर्शनसुखमात्रं मोक्षः, स्वरूपरसज्ञानं स्वरसस्थापनमिति ज्ञेयम् ॥६॥

## लेखः

**तेने**ति नृत्यसमयकथनेनेत्यर्थः. नृत्ये तारएव नादो जायते, अतो अङ्गुलीरूपा **क्रियाशक्तिरुद्गता** गाढनिष्पीडनयुक्ता निरूपितेति भावः. **यदोत्साह** इति, नृत्ये यदोत्साहस्तदा बलसहितो भवतीति भावः. **निरूपित** इति, **सम्बोधनम्** एतदर्थमिति शेषः. प्रतिमुहूर्तं युगलानीति पक्षमाश्रित्याहुः **प्रायेणे**ति. द्वितीययुगले निर्गमनमुक्तम्, इदं च तृतीयम्, अतो अधुना सर्वथा चित्तद्रवाभावात् किञ्चिज्ज्ञातत्वाच्च **प्रायेणे**त्युक्तम्. "वनं याते द्रुतचेतस" इत्युक्तत्वादग्रे सर्वथा चित्तद्रवे स्वतएव लीलाग्रहणं भविष्यतीति भावः. सरित्त्रसङ्गोक्त्या तीरस्थो भगवानुक्तः, अत उक्तं **स्नानादी**ति. **सामग्रीमि**ति, कर्हिचिदेवान्यसाहित्यकथनेन सर्वदा एकान्तस्थित्या रमणसामग्री सूचितेति भावः. **जातो वे**ति, भोगानन्तरं वा गा आह्वयती[१]त्यर्थः. **तादृश** इति, कर्हिचिदेव गोपैः सहितोऽपि भवतीत्यर्थः. **दिवसे** इति, दिवसे अन्तरङ्गगोपैः सह गच्छतीति भावः. **तदे**ति, भोगानन्तरं बहिरङ्गगोपसहितो गा आह्वयतीत्यर्थः. कर्हिचिदेव बलगोपसहितः, सर्वदा त्वेकान्ते **भोक्तैव** एतादृशो **वस्तुतो** भगवान् भोगानन्तरं वा पूर्वार्धोक्तप्रकारकः सन् **गाः समाह्वयती**त्यन्वयः. व्रजान्निर्गत्य तीरनिकुञ्जेषु रमणं यथेच्छं विधाय तदा

१. आकारयति इति जो. पाठः.



तदा **गाः समाह्वयति**, वेणुनादेनैव, प्रकरणित्वाद्. "वेणुनाह्वयती"त्यग्रे वक्ष्यति. वेणुतुल्यतया निरूपणार्थं वा वेणोरग्रहणम्. गवामाह्वाने हेतुः **मुकुन्द** इति, मोक्षो हि ताभ्यो देय इति स्वतस्तासां साधनाभावादाकार्य प्रयच्छति, स्वरसं वा तत्र स्थापयितुम्. उद्गता क्रियाशक्तिर्महदेव कर्म करोतीति गवामाकारणमुक्तम्.

तत्र योगार्थं ज्ञात्वा नद्योऽपि नित्यं गच्छन्तीति ताः स्थगिता जाता इत्याह **तर्ही**ति. तत्क्षणमेव **भग्नगतयो** जाताः. नहि भगवदाज्ञा केनाप्युल्लङ्घ्या भवति. **सरित** इति प्रवाहैकस्वभावत्वं निरूपितम्. तासां वैष्णवत्वकामना. तासां हि समुद्रोऽधिपतिः. यथा भगवान् पतिर्भूयात् तदर्थं **तत्पदाम्बुजरजः स्पृहयती**र्जाताः. स्पृहयन्त्यः रजसः सम्बन्धार्थमुपायमाह **अनिलनीतमि**ति, **अनिलेन** वायुना स्वार्थं **नीतम्**. तेन सह प्रत्यासत्तिः, जलार्थी सः. भगवदीया एव भगवत्सम्बन्धं प्राप्नुवन्तीति रजःकामना दूराभिप्राया. कामएव अत्रोद्देश्यो देवतात्वान्नदीनाम्. अतएवाग्रे कालिन्दी तथा भविष्यति. इदानीं तथाभावे

## लेखः

पूर्वविशस्यान्यथाभावान्नृत्यादिवेशं विधाय गाः कृतार्थीकुर्वन् वनं गच्छति सोऽत्रोक्तः. कालस्य भगवद्रूपत्वात्तदधीनत्वाच्च सर्वमुपपद्यते. तदा स्नानादिव्याजेन गता तादृशं दृष्टवती अन्तरङ्गत्वात्तत्पूर्वावस्थां च ज्ञातवती अत्रागत्य वर्णयतीति भावः. **उद्गता क्रियाशक्तिरि**ति तारनाद इत्यर्थः.

ननु नदीनामाह्वाने नद्यः स्थगिता भवन्ति, अतएव "वेणुनिनदाह्वान-सरले" इति वाक्यं, गवामाह्वाने नद्यः कथं स्थगिता इत्यत आहुः **योगार्थ-मि**ति, " 'गच्छन्ती'ति गावः – 'सरन्ती'ति सरित" इति यौगिकार्थस्यैकत्वात् स्वस्मिन् 'गो'पदवाच्यत्वं ज्ञात्वा गवामाह्वानेऽपि स्थगिता जाता इत्यर्थः.

**तर्ही**त्यत्र **स्पृहयतीर्जाता** इति, स्थगिताः सत्यो भगवत्सम्बन्धो भगवदीयदेहं विना न भवति, तादृशो देहश्चरणरजसा भवतीति भगव-त्सम्बन्धसिद्ध्यर्थं रजःस्पृहां कृतवत्य इत्यर्थः. **भगवदीयाएवे**ति, चरणरजः-सम्पादितदेहा इत्यर्थः. **कामएवे**ति, गोष्विव भक्ष्यलक्षणकाम-निवारणा**यैव**कारः. पूर्वगीते "नद्य" इति श्लोके देवतात्वान्नदीभिः सह नान्या लीलेत्युक्तम्. अधुना त्विन्द्राभिषेकस्य जातत्वात् सम्भवत्येवेति भावः. **अतएवे**ति, तथा कामवत्त्वादेवेत्यर्थः. आधिदैविकस्य भगवत्त्वेनानन्तरूपत्वादिदमपि राज-

भाग्यं नास्तीत्याह **अबहुपुण्या** इति, न बहु पुण्यं यासां, यथाशीघ्रमेव गोरूपत्वं, गोपालरूपत्वं दिवसे, रात्रौ स्त्रीरूपत्वमिति, पुण्यैर्विना समीहितार्थसिद्ध्यभावात्. कथं ज्ञायते तासामेवंभाव इति तत्राह **वयमिवे**ति, यथा वयम् अबहुपुण्याः, अन्यथा दिवसे गावो गोपा वा भवेम. अतः स्वदृष्टान्तेन ज्ञायते– स्पृहामेव कुर्वन्ति, न तु तासां कार्यं सिध्यतीति. किञ्च तासां सात्त्विकभावादपि हृद्गतो भावो लक्ष्यत इत्याहुः **प्रेमवेपितभुजा** इति, प्रेम्णैव भुजानां वेपनं न तु वायुवशात्. अतो विरहसन्तापयुक्ता इव लक्ष्यन्ते. किञ्च स्तम्भोऽपि जात इत्याहुः **स्तिमिताप** इति, **स्तिमिताः** स्तब्धा **आपो** यासाम्. एवं रजोभेदास्त्रिविधा निरूपिताः ॥६-७॥

सत्त्वभेदान् निरूपयितुं भगवन्तमपि तथा वर्णयन्ति **अनुचरैरि**ति त्रिभिः. लताविहङ्गममेघाः सात्त्विकाः, एते वेणुनादेन भक्तिपूर्णा जाताः. तत्र प्रथमं वृन्दावनस्था लतास्तरवश्च वैष्णवाः वेणुनादेन उद्गतप्रेमरसा जाता इति तदर्थं प्रकारान्तरेण वेणुनादमाह. तदर्थं प्रकारान्तरेण भगवानपि वर्णनीयः. स च भक्त्यनुसारेण लोकवेदानुसारेण च वर्णनीयः. तत्र भक्त्यनुसारेण प्रथममाह.

**अनुचरैः समनुवर्णितवीर्य आदिपूरुष इवाचलभूतिः।**
**वनचरो गिरितटेषु चरन्तीर्वेणुनाह्वयति गाः स यदा हि ॥८॥**
**वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्याः।**
**प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ॥९॥**

**अनुचरैः** सेवकैर्गोपैः **सम्यगनुवर्णितानि वीर्याणि** यस्य, **आदिपूरुष इव** पुरुषोत्तम इव च **अनुचरैर्वेदैः सम्यक्** सर्वोत्तमत्वेन **वर्णितानि** जगत्कर्तृत्वादीनि **वीर्याणि** यस्य. लोकानुसारेण माहात्म्यमाह सर्वोत्कृष्टं

**लेखः**

लीलास्थमेकं रूपं, मुख्यं तु यमुनाष्टकोक्तमिति ज्ञेयम्. वस्तुत ऐक्यात् "कृष्णतुर्यप्रियामि"ति तत्राप्युक्तम्. "सर्वाभेदादन्यत्रेमे" इति न्यायोऽनुसन्धातव्यः. **पुण्यैरि**ति, तादृशकृपाविषयत्व-हेतुभूतो भावविशेषः **पुण्यपदेनोच्यते** ॥६-७॥

**अनुचरैरि**त्यस्याभासे. **सत्त्वभेदानि**ति सत्त्वप्रधानो भेदो येषां तान् लताविहंगममेघानित्यर्थः. **तथे**ति, तत्तदुपयोगिरूपनादवत्त्वेनेत्यर्थः. एतेन श्लोकत्रयाभास उक्तः. एतदाभासमाहुः **तत्रे**ति. (व्याख्याने!) **तथोक्त** इति



**आदिपूरुष इवाचलभूतिरि**ति, **अचला** वि**भूति**र्लक्ष्मीर्यस्य. **अनुचरैः** सर्वैरेव देवादिभिस्तथोक्तः. लौकिकाः स्वव्यवहार्यत्वात् पुरुषोत्तमतुल्यतामेवाहुः. अतो दृष्टान्तभावः. भिन्नतया वर्णनायां हेतुमाह **वनचर** इति, वृन्दावनचरः सात्त्विकभावापन्नः सत्त्वभूमौ प्रतिष्ठित इति. **गिरितटेषु** गिरिप्रान्तेषु **चरन्तीः** विषमस्थानात् समदेशे पशुहिते स्वयं तत्रत्यो भूत्वा समाह्वयति, लौकिकत्वाभावाय **वेणुनैवाह्वयति.** वेणुद्वारा तत्र प्रविष्ट इति अग्रिमचरित्रेण ज्ञायते. अन्यथा वृक्षाणां तथात्वं न स्यात्. **स** इति येषु वनप्रदेशेषु रेमे, **यदै**वाह्वयत्, तदैव **मधुधाराः ससृजुः स्मे**ति सम्बन्धः. **(हि!)** युक्तश्चायमर्थः, अन्यथा वेणुनादाभिज्ञता तत्र च स्वनामसङ्केतो न स्यात्. अतस्तद्द्वारा

**टिप्पणी**

**वनचर** इत्यत्र, **सात्विकभावापन्न** इति, वृन्दावनस्य रसोद्दीपकत्वेन स्तम्भादिसात्त्विकभावहेतुत्वात्तद्युक्त इत्यर्थः. आदिपुरुषस्य तद्रहितत्वेन श्रवणात्तस्माद् भेदेन वर्णनमुचितमिति भावः. **वनलतास्तरव** इत्यत्र,

**लेखः**

अचलविभूतित्वेनोक्त इत्यर्थः. **अनुचरैः समनुवर्णितवीर्य** इति व्याख्याने भक्त्यनुसारः, **आदिपूरुष इवानुचरैः समनुवर्णितवीर्य** इति व्याख्याने वेदानुसारः, **आदिपूरुष इवाचलभूतिरि**ति प्रकारे**णानुचरैः समनुवर्णितवीर्य** इति व्याख्याने लोकानुसार इति विभागो ज्ञेयः. चतुर्थयुगले वृन्दावनप्रवेशः क्रमप्राप्तः, अतो **वनचर** इत्युक्तम्. पूर्वयुगले वनचरस्योक्तत्वात् सात्त्विकभावोऽपि जातस्तात्पर्यार्थत्वेनोक्तः. **लौकिकत्वाभावाये**ति, अन्यकृताह्वानसादृश्याभावायेत्यर्थः. **तत्र प्रविष्ट** इति तरुषु प्रविष्ट इत्यर्थः, **विष्णुं व्यञ्जयन्त्य** इत्युक्तत्वादिति भावः. **स इती**ति, **येषु** देशेषु **रेमे** तत्र स्थित इति शेषः. समीपनिकुञ्जस्थाः कृतार्थीकृत्य वनं प्रविष्टः सन् यत्र देशेषु पूर्वदिवसेषु रेमे तत्र सङ्केतस्थले स्थित्वा वेणुना गा आह्वयति. तेन नादेन तदन्तःस्थितदेवता उद्बुद्धा भवन्ति. अन्येऽपि सर्वे भगवदुपयोगि स्वस्वनिष्ठं रसं[1] प्रकटीकुर्वन्ति. ततो निबिडनिकुञ्जगतो रमत इति भावः. **स्वनामे**ति, भगवानेकेनैव वेणुनादेन तेभ्यस्तेभ्यस्तत्तन्नाम गृहीत्वा स्वापेक्षितं ज्ञापयति. तथा चापेक्षितफलपुष्पाद्यप्रकटने प्रयोजनाभावात्तन्नाम न गृह्णीयादित्यर्थः.

१. मुद्रितपाठः "स्वस्वरसं निष्ठम्" इति, संशोधितस्तु जो. पाठमनुसृत्य (सम्पा).

भगवान् प्रविष्ट इत्यग्रेऽपि तथात्वं युक्तमेव.

**वनस्था लताः** अस्मन्निकटे भगवांश्चरति स्वकीयांश्चाकारयतीति ज्ञात्वा तेषां भोगसिद्ध्यर्थं स्वस्मिन् विद्यमानमानन्दं प्रकटितवत्यः. तथा **तरवश्च.** यथा स्त्रियः पुरुषाश्च भगवदीयाः भगवति भगवदीयेषु च समागतेषु आनन्दयुक्ता भवन्ति, भोगार्थं स्वकीयं च प्रयच्छन्ति, तद्वदेतेऽपि. नन्वयं धर्मो जङ्गमानां, न स्थावराणामिति चेत्, तत्राह **आत्मनि विष्णुं व्यञ्जयन्त्य** इति. चेतनेष्वेव भगवतः क्रियाज्ञानशक्त्योराविर्भावः. सच्चिदानन्दरूपता च क्रमेणाविर्भवति. एतत् सर्वं भगवति निविष्टे भवति, सोऽपि निविष्टश्चेत् प्रकटीभवति तदैवं युज्यत इति ते वृक्षादयः पञ्चधर्मयुक्ताः **आत्मनि विष्णुं व्यञ्जयन्त्य इव** जाताः. तत्र प्रथमं क्रियाशक्त्याविर्भावमाह **पुष्पफलाढ्या** इति. यत्र हि भगवान् निविशते तत्रावान्तरफलं परमफलं च भवति, अतः कार्याद् व्यञ्जयन्त्य इव जाताः. पुष्पाण्यवान्तरफलरूपाणि, परमफलानि तु फलानि, तैः सर्वैराढ्या जाताः. भगवदर्थं सदाधिक्यमाह **प्रणतभारविटपा** इति. भारेणापि नमनं सम्भवतीति तन्निरासायादौ प्रणतत्वमुक्तं, **प्रकर्षेण नताः भारेण विटपाः** शाखा येषाम्. **प्रेमहृष्टतनव** इति चिदुत्कर्षो ज्ञानरूपो निरूपितः. भक्ताएव हि प्रेम्णा हृष्टरोमाञ्चा भवन्ति. [१](पूर्वमहरितानामपि तदा हरितत्वं, पूर्वस्मात् स्थौल्यं प्रत्यवयवमुच्छूनत्वं प्रभाविशेषश्चात्र

### टिप्पणी

**पञ्चधर्मयुक्ता** इति. "पश्यतैतान्महाभागानि"त्यादिनोक्ताश्चत्वारो भगवदीयत्वं चैकमिति तथा ॥८-९॥

### लेखः

**तद्द्वारे**ति वेणुद्वारेत्यर्थः. **अग्रेऽपी**ति, पूर्वं पुष्पफलरूपानन्दप्रकटनमुक्तम्, अग्रेऽपि मधुधारारूपानन्दप्रकटनं युक्तमेवेत्यर्थः.

**वनलता** इत्यत्र. **क्रिशाशक्त्याविर्भावमि**ति, फलपुष्पाणां लीलोपयोगित्वादिति भावः. **सदाधिक्यमि**ति, सन्तो हरिं दृष्ट्वा नमन्तीति भावः. **भारेणे**ति युक्ता इति शेषः, तथा च **प्रणता भार**युक्त**विटपा** येषामिति विग्रहः. **भक्ता एव हीति**, ज्ञानोत्कर्षः पुरुषोत्तमज्ञानं, तद्भक्त्यैव भवति "भक्त्या त्वनन्यये"ति वाक्यादिति भावः ॥८-९॥

१. ( ) चिह्नान्तर्गतं प्रभूणाम्.



**प्रेमहृष्टतनुत्वम्.** अपरं च, वेणुनादनिष्ठसुधास्वादवत्यः स्वामिन्य इति तद्धर्मं परिचिन्वन्ति ताएवेति तदुक्तावन्यविचाराक्षमत्वं युक्ततरमिति नाधिकं लेखनीयमत्र.) **मधुधाराः** स्वस्मिन् विद्यमानानन्दं भगवदर्थं बहिः प्रकटितवत्यः. एतत्सर्वपरिज्ञानमेव ज्ञानशक्तिः ॥८-९॥

पक्षिणामपि वेणुनादकार्यं जातमिति तत्रोपयोगिरूपं वेणुनादं च वर्णयन्ति **दर्शनीयतिलक** इति. यद्यपि पक्षिणो मुनयः, न तेषां गीतादिना भगवद्भावो भवति किन्तु स्वभावतएव, तथापि लोकदृष्ट्या कदाचिदन्यथाबुद्धिर्भवेत् अतो रूपनादाभ्यां तेषां भजनसिद्धिर्निरूप्यते. तत्र रूपं वर्णयति **दर्शनीयतिलक** इति.

**दर्शनीयतिलको वनमाला-दिव्यगन्धतुलसी-मधुमत्तैः ।**
**अलिकुलैरलघुगीतमभीष्टमाद्रियन् यर्हि कूजितवेणुः ॥१०॥**
**सरसि सारसहंसविहङ्गाश्चारुगीतहृतचेतस एत्य ।**
**हरिमुपासत ते यतचित्ता हन्त मीलितदृशो धृतमौनाः ॥११॥**

**दर्शनीयानां** मध्ये **तिलक**रूपोऽतिसुन्दरः. पक्षिणश्च रूपप्रधानाः रूपभेदविदः. किञ्च यो वेणुनादः स स्वहितकारी स्वकीयानामपराधमपि न मन्यते. तदाह **वनमाला-दिव्यगन्धतुलसी-मधुमत्तैः अलिकुलैः** कृत**मलघुगीतम**पि **आद्रियन्** आदरं कुर्वन्नेव **कूजितवेणु**र्यतः. यथैव भ्रमरा झङ्कारं कुर्वन्ति तथैव तन्नादमनुकुर्वन्नेव अनुरणनवदेव वेणुनादं करोति.

### लेखः

**दर्शनीये**त्यत्र. **लोकदृष्ट्ये**ति, सर्वदा भगवद्भाववत्त्वेऽपि **लोकस्य** विषयान्तरस्य **दृष्ट्या** दर्शनेनांशतोऽपि अन्यचित्तता भवेत्, रूपदर्शने तु नादस्य वा श्रवणे तु नांशतोऽप्यन्यचित्ततेत्यर्थः. पक्षिणां रूपप्रधानत्वे हेतुमाहुः **रूपभेदविद** इति. तृतीयस्कन्धे "ततः शब्दविदो वराः. रूपभेदविदस्तेभ्य" इत्यत्र 'रूपभेदवित्'पदेन पक्षिण उक्ता इति भावः. एतेन विशेषणेन रूपेण भजनसिद्धिरुक्ता. अग्रिमविशेषणान्नादेनापि भजनसिद्धिरित्याहुः **किञ्चे**ति, अल्पादरकथनेनैतेषामादरः कैमुत्यसिद्ध इति प्रघट्टकार्थः. **स्वहितकारी**ति, स्वेषां स्वकीयानां हितकारीत्यर्थः. भ्रमराणां नादप्रधानत्वान्नादसम्बन्धित्वम्. पक्षिणो नानाविधकूजनैरुपकुर्वन्तीति नादप्रधानाः. **अपराधमपि न मन्यत** इति, तदनुरणनरूपो भवतीत्यर्थः. कर्मणः स्वातन्त्र्यं सौकर्यात्.

पक्षिणां मध्ये **अलयो** हीना निकृष्टाश्च. तेषामपि **कुलानि** समूहाः नानाविधजातिभेदाः. तैरप्य**लघु** यथा भवति तथा **गीतम्.** तस्याप्यादरं कुर्वन्. तत्राप्यलयो **मत्ताः.** मदोऽपि येनानुचितः, नहि तुलसी पुष्पान्तरवन्माद-हेतुः. तत्रापि **दिव्यगन्धा.** तत्रापि भगव**द्वनमाला**गता. तेषामप्यादरं चेत् कुर्यात्, तदा सरोवरादिषु ये सरसा रसिकाः क्षीरनीरविवेकिनश्च तेषामादरं कथं न कुर्यादिति! **वनमालायाः** या **दिव्यगन्धतुलसी** तस्या मकरन्देन **मत्तैः.** किञ्च आदरोऽपि भ्रमराणां यथाभीष्टं भवति तथा. वनमालायां समागतान् भ्रमरान्न दूरीकरोति किन्तु ते यथा नोपद्रुता भवन्ति तथैवादरं करोति. अतो **यर्ह्येव** आदरं कुर्वन्नेव **कूजितवेणुः** तदैव **सरसि** विद्यमानाः जलवासिनः **सारसाः** सरसानां भक्तानां सम्बन्धिनो, **हंसाः** क्षीरनीरविवेकिनः ते च **विहङ्गा** उत्कृष्टगतियुक्ताः. पुरुषापेक्षया ते पुनर्भगवद्भजनाधिकारिण इति तान् विशिनष्टि **चारुगीतहृतचेतस** इति, **चारु** यथा भवति निःकामार्थं भगव**द्गीतेनैव** **हृतं** वशीकृतं **चित्तं** येषाम्. तदपि भजनं भक्तिमार्गानुसारेण न तु स्थानस्थितानामन्तर्यामिरूपे ज्ञानरूपे वा, तदाह **एत्य** आगत्य **हरिम् उप** समीपे सेवमाना जाताः. यत**स्ते** भगवदुक्ता मुनयः. भजने भ्रमराद्विशेषमाह **यतचित्ता** इति, **यतं** नियतं **चित्तं** येषां, चित्तनैयत्येन भगवद्भजनं मुख्यं न तु विक्षिप्तचित्ततया. किञ्च **हन्त** इति हर्षे, एतद्भाग्यमेतेषामेव भवतीति. बहिर्व्यापाररहिता भजने सर्वोत्तमाः. बहिर्व्यापारेषु च नेत्रे वाक् च नियम्याः. यस्यैतद्द्वयं नियतं– वाक् नान्यं वदति चक्षुश्च नान्यत् पश्यति, तदाह **मीलितदृशो धृतमौना** इति. मीलिता दृग् येषाम्. धृतं मौनं व्रतं यैः. साम्प्रतमेते नादपराः, अतो दृष्ट्या अन्यचित्तता भविष्यतीति नेत्रनिमीलनम्. एवमेतेषां भाग्यं सात्त्विकत्वान्निरूपितवत्यः.

[1](अथवा. **दर्शनीयतिलक** इति, इदमत्राकूतम्, अतिरसिका एते मुनयः स्वस्य पुरुषत्वेन लीलायामनुपयोगं मत्वा, पक्षीभूय, विविधस्वकूजनै-र्भगवतो भक्तानां च रसोद्दीपनं कुर्वन्तः, स्वकृतार्थतां मन्वानाः, [2]शब्दमेवाधिक-मभीष्टं मन्यन्ते. अतः शब्दप्रधान-कीर्तिरूप-वनमालाधर्माणामेव अत्र उपयोग उच्यते. "यथा वृक्षस्य सम्पुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाती"ति श्रुत्या कीर्तेर्गन्धसाम्येन निरूपणं कृतम्. **वनमालायाः** कीर्तिरूपत्वात् तन्निरूपकाणि गीतान्यावश्यकानि. तानि च तद्रसास्वादं विना न सम्भवन्त्यतो गुणातीतभक्तिरूप-वक्ष्यमाणरूप-**गन्धवती तुलसी,** त**न्म**ध्वत्यलौकिकभक्तिरसात्मकमितरविस्मारकम्. अतो**ऽतिमत्ताः** स्वदेहाद्यनुसन्धानरहिता ईश्वरधर्माननुसन्धाना अपीति तन्निकट**एव अलघु गायन्ति.** वस्तुतस्त्विदमेव महत्तमं समाराधनं प्रभो**रलिभिः** क्रियते. अतएव प्रभो**रभित इष्टं** तदेव गीतम्. अपरं च 'चार्वा'दिपदानि विहाय तत्र भवनार्थकप्रत्ययवत्पदोक्त्या[3] भगवद्वनमालास्थ-तुलसीगन्धस्य दिविभवत्वस्य बाधितत्वादग्रे स्वामिनीषु व्रजदेवीत्वस्य वक्ष्यमाणत्वाद् दिवुधातोः क्रीडावाचकत्वाच्च स्वामिनीभिः सह क्रीडाजनितोऽयं गन्ध इति समभिव्याहारादवगम्यते. एतेन यथा दिविभवोऽर्थो नेतरलोकस्थजनविषयः

---

**टिप्पणी**

**एत्ये**त्यस्याभासे, **ज्ञानरूपे वे**ति, आत्मन्येव ब्रह्मत्वेन ज्ञात इत्यर्थः ॥११॥

**लेखः**

**सरसी**त्यत्र **भक्तानां सम्बन्धिन** इति, तथैव सङ्केताद्भक्तागमनसूचका इत्यर्थः. **क्षीरे**ति, आगतानां मध्ये तत्तद्भावं विविच्य भगवन्तं बोधयन्तीत्यर्थः. **निःकामार्थमि**ति, निःकामत्वसाधकं अभिलाषपूरकमिति यावत्. अत्र भजनस्य नादप्रधानत्वान्नादेनैव अभिलाषपूरणमिति पुरुषापेक्षया विशेषः. पुरुषाणां तु प्रत्युताधिकोऽभिलाषो जायत इति भावः. अत्र **पुरुष**पदं स्त्रीपुंससाधारणमिति ज्ञेयम्. **समीपे** इति आसत इति शेषः. **उपासन**पदार्थमाहुः **सेवमाना** इति. **किञ्चे**त्यस्य **मीलितदृशे**त्यनेनान्वयः. यतचित्तत्वं भ्रमराद्विशेषो मीलितदृक्त्वं धृतमौनत्वं च विशेष इत्यर्थः. **यस्यैतदि**ति, यस्यैवं भवति स सर्वोत्तम इति शेषः. **सात्त्विकत्वादि**ति शुद्धसात्त्विकत्वादित्यर्थः. तथा च पूर्वोक्तानां तमोमिश्रसात्त्विकत्वमग्रिमाणां रजोमिश्रसात्त्विकत्वमिति विभागो ज्ञेयः.

द्वितीयव्याख्याने **तद्रसास्वादमि**ति, कीर्तिनिष्ठरसस्य माधुर्यस्यास्वाद इत्यर्थः. **गुणातीते**ति, **गुणातीतभक्तिनिरूपको** "मालया दयितगन्धतुलस्या" इत्यत्र भगवत्प्रियत्वेन वक्ष्यमाणरूपो यो **गन्धस्तद्वती**त्यर्थः. **अतोऽतिमत्ता** इति, तादृशान्मधुनोऽतिमत्ता इत्यर्थः. गन्धेऽन्यमपि विशेषमाहुः **अपरं चे**ति.

---

१. प्रभूणाम्. २. अदृष्टेति पाठः. ३. दिव्यपदोक्त्या (सम्पा.).

तथायमन्तरङ्गतमलीला-प्रपञ्चस्थभक्तैकगम्य इति ध्वन्यते. अतएव प्रभोरपि भावोद्बोधस्तेनासीदिति ज्ञापनाय **कूजनमु**क्तम्. किञ्च वनमालास्थपुष्प-मध्वनुक्त्वा तुलस्याएव तद्यदुक्तं– "दयितगन्धतुलस्या" इति वाक्याद्, "बाहुं प्रियांस" इत्युपक्रम्य "तुलसिकालिकुलैर्मदान्धैरन्वीयमान" इति वाक्याच्च –तद्गन्धमध्वादिस्वरूपं प्रभुरेव वेत्तीति नान्यगम्यः स विशेषः. तद्धोक्तारोऽलयोऽपि न साधारणाः किन्त्वितरेभ्यो विजातीया अत्युत्तमा इति ज्ञापनार्थमेव **कुल**पदमुक्तम्. अतएव**ालि**पदमुक्तम्, 'अलं'शब्दो हि पूर्णतावाची तथा च तद्वा**नलिरि**त्यत्रोच्यते. रसो **न लीयते** न नश्यति यत्र येन वा सो**ऽलिरि**त्युच्यते. यद्यप्यत्र दीर्घः सम्भवति तथापि "दशहूतो ह वै नामैषः. तं वा एतं दशहूतं सन्तं 'दशहोते'त्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा" इति श्रुतिन्यायेन "परोक्षं च मम प्रियमि"ति भगवद्वाक्याच्च स्वप्रियार्थस्य गोपनं प्रभोः प्रियमिति ज्ञायते. प्रकृते च स्वान्तरङ्गरसपोषकता एतेषु गोप्येति परोक्षेण ह्रस्वान्तं पदं प्रभुः प्रकटितवान्. एवं सत्येत एवालयोऽन्ये तु भ्रमराएव. क्वचिदेतेष्वपि अन्यनामप्रयोगः तात्पर्यविशेषेणेति ज्ञेयम्. तारत्वं बहुत्वं चानुक्त्वा लघुत्वाभावएव य उक्तस्तेन तद्गीतरसभरं वोढुं नान्यः शक्तः प्रभुं विनेति ज्ञाप्यते. महत्त्वे इयत्ता नास्त्येवेत्यपि ज्ञापनाय तथोक्तिः. एवं सति तदादरं कथं न कुर्यात्! **यर्हीति** पदात् तद्गीतरसपान-परवशः चिरं तूष्णीमेव तिष्ठति, कदाचित्तद्रसभरेणैव **कूजितवेणु**र्भवतीति ज्ञाप्यते. अग्रे गीतोक्त्या पूर्वं तद्गीतोद्बुद्धभावेन स्वप्रियाणां भावोद्बोधनाय तथैवाकरोत्. ततो यदा पूर्णरसोऽभूत् तदा जगाविति ज्ञाप्यते. अतिसुन्दरत्वनिरूपणे **तिलक**त्वोक्त्या तद्यथा भाग्यस्थाने भाले तिष्ठति तथेदमपि स्वरूपं परमभाग्यवतीष्वेव तिष्ठतीति ध्वन्यते. अत्र कर्मधारयो ज्ञेयः, स्वामिनीनां हृदि प्रियातिरिक्ते दर्शनीयत्वास्फूर्तेः. अत्र यद्यप्युभयं मुख्यं, तथापि नादे विशेषो निरूप्यते. अन्यथा **मीलितदृ**क्त्वं नोच्येत. तत्र

**लेखः**

प्रभ्वेकवेद्यत्वमन्यमपि विशेषमाहुः **किञ्चेति**. **यदुक्तमि**ति यस्मादुक्तमित्यर्थः. **तदि**ति तस्मादित्यर्थः. यस्मात्तुलस्याएव मधूक्तं तस्मात् **सः** मधुनिष्ठो **विशेषो नान्यगम्य** इत्यन्वयः. एवं प्रकारत्रयेण गन्धस्य मादकत्वमुक्तम् ॥१०-११॥



हेतुः **सरसि** विद्यमानैरेव तैर्वेणु**गीतं** श्रुतम्. तच्च **चारु**त्वेन मनोहरणैकस्वभावम्. अतो नादाधीनाएव निकटे समागताः. आदावेव नादहेतुभूतस्वरूपसौन्दर्य-निरूपणान्नादरसएव स्वरूपरसमप्यनुभवन्तीति ज्ञाप्यते. इदमप्यतिचित्रं यन्मत्तानां गीतानुरणनरूपेण गीतेन **यतचित्तत्वं** सर्वेन्द्रियवृत्तिनिरोधश्चेति. एतेषामियं गीतरसपानदशेत्येवंरूपतैवोपपद्यतेऽपि, एतज्जन्यत्वेनैतदुत्तरकाली-नत्वान्नादस्य. अलिकुलानामपि तुलसीगन्धमधुपानदशा पक्षितुल्यैव, पश्चात्त-त्स्वभाववशादुक्तरूपत्वं परमिति ज्ञायते. मुनित्वात् पक्षिणामग्रेऽप्यन्तरेव निरन्तरमेतद्रसमग्नतैवेति न मत्ततोक्ता. अथवा प्रभुरसस्वभावादनुक्तसिद्धे-र्वाग्रिमा सेति नोक्ता. तदैतेषामप्यलिकुलवद्दशा भविष्यति. वस्तुतस्तु उक्तरूपरसमत्तालिकुलालघुगीतम् अभीष्टत्वेन अतिचित्तनैयत्येनैवानुभवन् प्रभुर्वेणुकूजनगाने करोतीति तच्छ्रवणे पक्षिणामपि तथात्वमेवोचिततरमावश्य-कत्वादिति युक्तमुत्पश्यामः. तथाप्यादौ स्वरूपसौन्दर्यमेवोक्तमिति स्वस्य तद्दिदृक्षातिभरेण पक्षिणां तत्प्राप्तिदशायां तत्प्रतिबन्धस्मरणेन कश्चित् खेदोऽभूदिति **हन्तेत्यु**क्तम्) ॥१०-११॥

मेघः सर्वहितकारी, तस्यापि वेणुनादजनितभावमाह पूर्ववत् **सहबल** इति द्वाभ्याम्.

**सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः ।**
**हर्षयन् यर्हि वेणुरवेण जातहर्ष उपरम्भति विश्वम् ॥१२॥**
**महदतिक्रमणशङ्कितचेता मन्दमन्दमनुगर्जति मेघः ।**
**सुहृदमभ्यवर्षत्सुमनोभिश्छायया च विदधत्प्रतपत्रम् ॥१३॥**

हे **व्रजदेव्यो** गोप्यो व्रजदेवतारूपाः, अनेन विश्वासो भविष्यतीति निरूपितम्. **यर्हि वेणुरवेण विश्वमुपरम्भति** पूरयति तर्हि **महदतिक्रमेण शङ्कितचेताः सुहृदं** भगवन्त**मभ्यवर्षत्** स्वदेहछायया **च** आ**तपत्रं विदधत्** जातः. तद्वा कुर्वन् **अभ्यवर्षत्.** अयं नादो महाबलयुक्तो विश्वगतान्

**लेखः**

**सहबल** इत्यत्र **अनेने**ति. दिवुधातोः क्रीडार्थत्वाद् लीलास्थत्व-सूचक**देवी**पदेनानुभवसंवादाद् उपरम्भणकथने विश्वासो निरूपित इत्यर्थः. **महाबले**ति, तार इत्यर्थः. **उपरम्भण**पदार्थमाहुः **विश्वे**ति, अत्र **विश्व**शब्दो नादश्रोतृसर्वपरः. तत्समये तेषां विषयान्तरस्य न स्फूर्तिः किन्तु नादएव

सर्वानेव धर्मान् दूरीकृत्य स्वयमेव पूर्णः. तदाभासरूपोऽपि मेघो धूमादिसमूहात्मा विश्वं भगवतैव कृतार्थीभूतमिति स्वयमुपचरितार्थोऽपि स्वजन्मसाफल्याय भगवन्तमेव ववर्ष. तत्र यादृशेन वेणुनादेनैतद्भवति तादृशकर्तारं भगवन्तं वर्णयति विशेषणचतुष्टयेन. अन्यथा उपरम्भणमर्थवादरूपं स्यात्. तत्र क्रियाशक्तिः सम्पूर्णेति वक्तुं **सहबलो** बलभद्रसहित इति उक्तं, सृष्टिकरणक्रियापेक्षयापीयं महती क्रियेति ज्ञापयितुम्. **स्रग्रूपो** यो**ऽयमवतंसः** कर्णाभरणं तत्र **विलासो** यस्येति लीला निरूपिता. माला कीर्तिमयी, दश दिशः श्रोत्रं, कीर्तिर्दिक्षु पूरिता यया सा भवत्येव सर्वोत्तमा. भगवत्कीर्तिप्रतिपादकं वा भागवतादिशास्त्रं सर्वविदेष्वाभरणरूपं तत्र विलासयुक्ता तत्प्रतिपादिका च. एवं क्रियायाः स्वरूपतो गुणतश्च माहात्म्यं निरूपितम्. तस्याः

---

## लेखः

अन्तर्बहिःपूर्ण इत्यर्थः. **आभासे**ति, नीलत्वाद्भगवदाभास इत्यर्थः. वर्णसाम्येऽप्याभासत्वे हेतुमाहुः **धूमादी**ति. **विश्वमि**ति, मेघस्य प्रयोजनं वृष्ट्यादिना तापनिवारणं, तापस्तु भगवतैव नादद्वारा स्वानन्दपूरणेन निवारितः. तथा चाभासत्वेन निकृष्टोऽपि सिद्धप्रयोजनोऽपि **स्वजन्मसाफल्याय** स्थितः सन् **ववर्ष,** न तु भगवतोऽपि तेन किञ्चित् प्रयोजनमिति भावः. **अर्थवादरूपमि**ति, भगवतो बालत्वेन तत्कृतोपरम्भणे वाच्योऽर्थो विरुध्येतेति तेन चित्ताक्षेपरूपः कश्चिद्गुणविशेषो लक्ष्यते इति गुणवादरूपोऽर्थवादः स्याद्, "विरोधे गुणवादः स्यादि"ति सिद्धान्तादिति भावः. **सृष्टी**ति, "अदीने"त्यत्रादीनत्वं सर्गः लीला विसर्ग इति सर्गानन्तरं लीलाया निरूपितत्वात् महत्त्वम्. **स्रग्रूप** इति पुष्पगुच्छरूप इत्यर्थः. महत्त्वं शास्त्ररीत्यापि व्युत्पादयन्ति **माले**ति. **दशे**ति, अवतंसः कर्णाभरणं, तत्र कर्णौ दिश इत्यर्थः. आभरणे **विलास**स्तस्य स्वस्थाने स्थापनम्. तथा च कीर्तिरूपदिगाभरणे विलासकथनेन कीर्तिरूपाभरणस्य दिक्षु स्थापनमुक्तम्. अत्रैतद्विशेषणकथनेन समभिव्याहारादुपरम्भणेन तथा करोतीत्यर्थो लभ्यते इत्याशयेनाहुः **यये**ति, उपरम्भणक्रिययेत्यर्थः. **भगवत्कीर्ती**ति, कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं, नभआभरणं शब्दस्तद्गुणत्वादिति भावः. तथा **चावतंस**पदेन भागवतशास्त्रमित्यर्थः. अस्मिन् पक्षे **स्रक्**प्रतिपादको**ऽवतंस** इति विग्रहः. **विलासयुक्ते**ति, भगवतो विलासकथने तन्निष्ठस्योपरम्भणस्यापि विलास उक्तएवेति भावः. **तत्प्रतिपादिके**ति, तत्प्रतिपादकं यस्या इत्यर्थः.



सहकारिण्या इच्छाया माहात्म्यमाह स्वयं **जातहर्षः** सर्वमेव च **हर्षयन्नि**ति. एवं वेणुनादस्य कारणभूतक्रियोत्कर्षमुक्त्वा देशतोऽप्युत्कर्षमाह **क्षितिभृतः सानुष्वि**ति, सर्वाधारभूतां पृथिवीं ये बिभ्रति, तेषामप्युच्चस्थानेषु स नादो जायते इति कथं न विश्वं पूरयेत्! **रवः** अनुरणनमतिगम्भीरं **उपरम्भति** नादेन पूरयतीति मेघादप्यधिका क्रिया निरूपिता. तदैव **मेघो महतो** वासुदेवस्य उपरि गच्छन् भगव**दतिक्रमणे शङ्कितचित्तो** भूत्वा उपर्येव तिष्ठन् अग्रे गमनार्थमुद्यतः नीलमेघश्यामं विश्वजीवनं भगवन्तं स्वमित्रं ज्ञात्वा **सुहृदमभ्यवर्षत्सुमनोभिः** पुष्परूपैः स्वबिन्दुभिः. अर्थात् पुष्पैः पूजितवान्. न केवलं पूजामेव कृतवान् किन्तु राज्यमपि दत्तवानित्याह आ**तपत्रं दध**दिति. न केवलं राज्यमेव दत्तवान् किन्तु आत्मनिवेदनमपि कृतवानित्याह **छायये**ति. सूर्ये अधःस्थिते उपरिस्थितेन न छाया भवतीति पृथक् छायानिर्देशः ॥१२-१३॥

उत्तमांस्त्रिविधान् वक्तुं तेषामपि वेणुनादेन किञ्चिद् जातमिति वक्तुं वेणुनादं वर्णयति भगवन्तं च, **विविधगोपचरणेष्वि**ति युग्मत्रयेण. सन्देहो मोहः सर्वपरित्यागश्च ज्ञानिनां श्रुतीनामरण्यवासिनां वेणुनादेन कृतः. तत्र ये विश्वगुरवो ब्रह्मादयस्तेषामपि सन्देहार्थं भगवतो वेणुनादं वर्णयति **विविधे**ति.

---

## टिप्पणी

**विदधत्प्रतपत्रमि**त्यस्याभासे, **किन्तु राज्यमपी**ति, सुरभीकृतगोविन्दाभिषेकवदस्यापि स्वाधिपतित्वेनैव वरणमिति तथोक्तम् ॥१३॥

## लेखः

**स्वरूपतो गुणतश्चे**ति, **स्वरूपं** बलः कीर्तिपूरणं **गुणो माहात्म्यं** महत्त्वमित्यर्थः. अग्रे **इच्छाया माहात्म्यमाहे**ति, "सुखधर्मस्तथेच्छा स्यात् किञ्चिदुद्गमएव स" इति वाक्यात् सुखधर्म इच्छा. अत्र **हर्ष**कथनेन धर्मिणोऽप्युद्गम उक्त इति महत्त्वमुक्तम्. **अनुरणनमि**ति, यथा नूतनगृहे प्रतिध्वनिर्जायते तथेत्यर्थः ॥१२-१३॥

**विविधे**त्यस्याभासे **उत्तमानि**ति, याथात्म्यज्ञानाभावात्तामसत्वं, भक्तिमार्गे तु सः गुण एवे[1]त्युत्तमत्वम्. व्याख्याने **अनेने**ति, ब्रह्मणोऽज्ञानकथनेने-

---

१. सगुण एवेति मुद्रितपाठः जो.पाठमनुसृत्य संशोधितः.

**विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षाः।**
**तव सुतः सति यदाधरबिम्बे दत्तवेणुरनयत् स्वरजातीः ॥१४॥**
**सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः।**
**कवय आनतकन्धरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः ॥१५॥**

लोके जायमानो अलौकिकप्रकारः सन्देहमुत्पादयति. ननु न तद्रूपमीश्वरे यन्न वेदे श्रुतमस्तीति सर्वविद्यास्थानानां ब्रह्मा अभिज्ञ इति कथं तस्य सन्देह इत्याशङ्क्याह **वेणुवाद्य उरुधा निजशिक्षा** इति, सुषिरभेदो वेणुः. तस्यापि प्रकाराः शास्त्रे निरूपिताः. ते ब्रह्मणा ज्ञायन्ते. एते तु प्रकाराः **उरुधा**नेकधा **निजशिक्षाः** निजेनैव शिक्षा शिक्षणम् अभिव्यक्तिप्रकारा यासु. अनेन नादब्रह्म नित्यमिति निरूपितम्. तत्र क्रियाशक्तिः साधनमिति तस्य लौकिकत्वे कथं नादो अलौकिको भविष्यतीत्याशङ्क्य तस्याप्यलौकिकत्वायाह **विविधेषु गोपचरणेषु** गोपानां सञ्चारविशेषेषु **विदग्ध** इति— गोपसञ्चारा न वेदोक्ताः किन्तु लौकिकाः. ब्रह्माण्डान्तरस्थिता अपि भवन्ति. ते न लोकेऽन्यत्र प्रसिद्धाः नापि वेदे. भगवांस्तु सर्वत्रैव विदग्धो — अतोऽयं ब्रह्मा यं प्रकारं न जानाति तमेव प्रकारं कृतवान्. ननु ब्रह्मसृष्टावाविर्भूतः कथं ब्रह्मणोऽप्यज्ञातं करोतीति चेत्, तत्राह **तव सुत** इति, यशोदां प्रति वदन्ति स्त्रीमण्डले समागताम्. अतएवात्र न कामादिवार्ता, किन्तु अनिषिद्धएव उत्कर्षो निरूपितः. यथा तव पुत्रोऽपि सन् तव मनसाप्याकलयितुमशक्यं करोति, तथा ब्रह्मणोऽपि ब्रह्माण्डे जातः. **सती**ति सम्बोधनं विश्वासार्थम्. अज्ञाने हेतुमाहुः **अधरबिम्बे दत्तवेणु**रिति, लोभात्मकोऽधर इति पूर्वमुक्तम्, अतो न लोके प्रसिद्धः, तस्य रसो भगवता न दत्त इति. तत्रापि **बिम्ब**रूपः सूर्यवत् प्रकाशकः. न हि प्रकाश्याः प्रकाशकस्वरूपं विदुः. तत्र च स वेणुः स्थापितः ततोऽप्युत्तमत्वख्यापनाय. **स्वरजातीः** षड्जादिस्वरजातिभेदान् **अनयत्** नूतनत्वेनोत्पादितवान् यर्हि, तदा तत्परिज्ञानार्थं त्रिगुणप्रधाना अपि देवाः कालत्रयेऽपि समागत्य. सोऽपि कालः आधिदैविक इति ख्यापयितुं **सवन**पदम्. **तं** वेणुनादं **सवनश उपधार्य. शक्रः** सात्त्विकः **शर्व**स्तामसः **परमेष्ठी** राजस इति ते **पुरोगमा** येषां देवानाम्, सर्वएव देवास्त्रिगुणात्मका भवन्ति. **कवयो** निपुणा अपि नादे. इन्द्रो हि त्रैलोक्याधिपतिः सर्वदा नादपरः. शर्वस्तु नादशास्त्रकर्ता. परमेष्ठी तयोरपि गुरुः, अतएव **परमेष्ठि**पदम्. तेषामन्यचित्तताभावायाह **आनतकन्धरचित्ता** इति, **आसमन्तान्नता कन्धरा** बाह्याभिनयार्थं **चित्तं** च येषाम्. ग्राहकं चित्तं, नमनमत्र सर्वतः; तेऽ**प्यनिश्चिततत्त्वा** जाताः. नाप्यौदासीन्येन कियत्कालं विचार्य अज्ञाने तूष्णीम्भूता इति मन्तव्यं, यतः **कश्मलं ययुः** चिन्तया मूर्च्छिताश्च जाताः. वेणुनादेन वा मोहिताः. अतएव आभासत्वपक्षोऽपि निराकृतो, अलौकिकरसोत्पादकत्वात् ॥१४-१५॥

अस्त्वन्येषां वार्ता, वेणुनादोऽस्माकमेवान्यथात्वं सम्पादयतीत्याहुर्द्वयेन पूर्ववत् **निजपदाब्जदलैरि**ति.

---

### लेखः

त्यर्थः. ततोऽपि पूर्वसिद्धत्वात्तस्याज्ञानमिति भावः. नूतनं त्वन्यज्ञानमपेक्ष्येति टिप्पण्यामुक्तमेव. **क्रियाशक्तिरि**ति अङ्गुलिचालनादिरूपेत्यर्थः. **तस्ये**ति साधनस्येत्यर्थः. **ते** इति, द्वितीयब्रह्माण्डस्थिता अत्र लोके न प्रसिद्धाः, अयं ब्रह्मा त्वेतद्ब्रह्माण्डमात्रज्ञो, अतोऽत्र लोके प्रसिद्ध्यभावाद्वैदिकत्वाभावाच्च ब्रह्मणोऽज्ञानमित्यर्थः. **अनिषिद्ध** इति मात्रादिनिषेधाविषय इत्यर्थः. **न लोके प्रसिद्ध** इति अधर इति शेषः. तत्र हेतुं विवृण्वन्ति **तस्ये**ति, अधरस्य **रसो**



### टिप्पणी

**स्वरजातीरनयदि**त्यत्र, **नूतनत्वेने**ति, यद्यपि स्वरजातिप्रापकत्वमेव मूल उच्यते, **निजशिक्षा** इति विशेषणेनापूर्वत्वं च प्राप्यते न तु नूतनोत्पत्तिः, तथाप्यन्यज्ञानमपेक्ष्येदमुक्तमिति ज्ञेयम्. अतो **नादब्रह्म नित्यमि**ति पूर्वग्रन्थाविरोधोऽपि ॥१४॥

### लेखः

**भगवता** कस्मैचिदपि **न दत्त** इत्यर्थः. **उत्तमत्वे**ति, अधरएव ज्ञातुमशक्यश्चेत् तत्र स्थापितः सुतरां तथा, तथा चाप्रमेयत्वख्यापनायेत्यर्थः. अयं सप्तमो युगलो, अतो मध्याह्नाभिप्रायेण **सवन**पदम्. **आभासत्वे**ति, अयं नादाभासो ग्राम्यो नादो अतो महतामप्रवृत्तिरिति पक्षो नादस्य मोहरूपकार्यकर्तृत्वान्निराकृतः. एवं सत्यज्ञाने हेतुमाहुः **अलौकिके**ति, अतोऽज्ञानं, न तु नादे न्यूनतेति भावः ॥१४-१५॥

**अस्माकमेवे**ति अधररसाभिज्ञानामिति शेषः.

**निजपदाब्जदलैर्ध्वजवज्र-नीरजाकृति[1]विचित्रललामैः ।**
**व्रजभुवः शमयन् खुरतोदं वर्ष्मधुर्यगतिरीरितवेणुः ॥१६॥**
**व्रजति तेन वयं सविलास-वीक्षणार्पितमनोभववेगाः ।**
**कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा ॥१७॥**

यर्हि **ईरितवेणुः** सन् **व्रजति** तदा **तेन** नादेन **कुजगतिं** स्थावरत्वं **गमिता वयं** गोप्यः सर्वाएव **कश्मलेन** मूर्च्छया **वसनं** परिहितं केशपाशं **वा न विदाम** इति सम्बन्धः. अयं वेणुनादोऽस्मदर्थमेव जायत इति तस्य चेष्टया अनुभवाच्च ज्ञायते. तत्र चेष्टा या गोकुलनिवासिनामेवार्थे जायते तया व्याप्तः कथमन्यकार्यं कुर्यात्! अतः प्रथमं भगवतो गोकुलहितकर्तृत्वमाहुः. **निजस्य** स्वस्यैव **यत्पदाब्ज**द्वयं तस्य **दलैः** दशाङ्गुलीभिः तलभागैर्वा **व्रजभुवो** निरन्तरं पश्चाक्रमणेन जातव्यथायाः व्रजभूमेः **खुरै**र्जातं **तोदं शमयन्नि**ति शनैः शनैर्लीलया भगवद्गतिर्निरूपिता. क्षतांशः गतिविलासेन पादस्पर्शेन निराकृतः, आध्यात्मिकाद्यंशस्तु ध्वजादिना. तामसो भौतिको **ध्वजेन** निराक्रियते, राजस आध्यात्मिको **वज्रेण,** सात्त्विक आधिदैविको **नीरजाकृति**चिह्नेन. तान्येव **विचित्राणि ललामानि** पदेषु. तेन

**लेखः**

**निजे**त्यत्र, भगवत्कृतस्य तद्विचारितमेव प्रयोजनं सिध्यतीत्यस्मदर्थं तथा करणाभावेऽस्माकं नादरसानुभवो न स्यादित्याशयेनाहुः **अनुभवाच्चे**ति. **गोकुलवासिनामि**ति, भूमेस्तोदप्रशमनं तत्र तद्वासिभिः सह क्रीडार्थमेवेति भावः. **प्रथममि**ति, गोगोपिकाहितात्[2] प्रथममित्यर्थः. **गोकुले**ति, गवां कुलानि यत्र तादृशस्थलस्येत्यर्थः. **तलभागैरि**ति, **तल**स्थितै**र्भागैः**शैश्चरणाङ्गुलीभेदभिन्नैरित्यर्थः. **शनैः शनैरि**ति, व्यथाशमनं तादृशगत्यैव भवतीति भावः. **क्षतांश** इति, समुदितस्य समुदितेन निराकरणं, तदंशानां तदंशैर्ध्वजादिभिरित्यर्थः. **तामस** इत्यादि, ध्वजस्य निर्भयतासूचनार्थकत्वाद्दैत्यानीककृतपीडासंभावनया जनितो दुःखांशस्तेन निराक्रियते. वज्रस्य पापपर्वतनिराकरणार्थकत्वात् पापसंभावनाजनितो दुःखांशस्तेन निराक्रियते. नीरजस्य सुखसेव्यतासूचनार्थकत्वात् सेवायां दुःखसंभावनया जनितो दुःखांशस्तेन निराक्रियत इत्यर्थः. **लौकिकालौकिके**ति दृष्टादृष्टप्रकारेणेत्यर्थः ॥१६-१७॥

१. नीरजाङ्कुशेति पाठः. २. गोगोपिकाभ्यः इति पाठः.



लौकिकालौकिकप्रकारेण व्रजभुवः खुरतोदप्रशमनम्. व्रजे तिस्रः प्रधानभूताः— भूमि गावो गोप्य इति. तत्र भूमेर्दुःखनिवृत्तिं गत्या निरूप्य, गत्या कृत्या च गवां दुःखं निवारयतीत्याह **वर्ष्मधुर्यगतिरि**ति, **वर्ष्मधुर्यो** महावृषभः ककुद्मी, स यथा लीलया मन्थरगतिः तथा गच्छन् गवामपि दुःखहारीव निरूपितः. **ईरितवेणुर्व्रजती**ति गोपिकानाम्. तदास्माकं वेणुनादेन जाते कामे स्थावरत्वमधिकं जातमित्याहुः **तेने**ति, स्वभावतएव वेणुनादेन जातः कामः, तत्रापि **सविलासवीक्षणेन अर्पितो मनोभववेगो** यासु. अतो वेगेन स्तम्भे जाते **कुजगतिं** वृक्षगतिं **गमिता** जाताः. तेषामन्तर्ज्ञानमस्तीति तदर्थमाहुः **न विदाम** इति. सुषुप्तावपि न जानन्तीति तद्व्यावृत्त्यर्थमाह **कश्मलेने**ति, **कश्मलेन** मूर्च्छया. स्त्रीणामत्यावश्यकं **वसन**ज्ञानं **कबर**ज्ञानं च. वेणुनादप्रस्तावे एवैतज्ज्ञातमिति गतिदृष्ट्यादिभिरपि कृतमत्र निरूप्यते[1] ॥१६-१७॥

हरिणीनां वेणुनादेन यथा जातं तद्वक्तुं पूर्ववद्वेणुनादं वर्णयन्ति **मणिधर** इति **द्वाभ्याम्**[2].

**मणिधरः क्वचिदागणयन् गा मालया दयितगन्धतुलस्याः ।**
**प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन् भुजमगायत यत्र ॥१८॥**
**क्वणितवेणुरववञ्चितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः ।**
**गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः ॥१९॥**

गवामाधिदैविकानि रूपाणि मणयः, तान् स्वस्मिन् बिभर्तीति **मणिधरः.** अभिज्ञानार्थं वा, स्वप्रियाणामभिज्ञापका मणयः. अतस्तैः **कदाचिद् गाः** आसमनताद् **गणयन्** जातः. अनेन ताः तद्गतधर्माश्च भगवत्येव प्रतिष्ठिता इति तासां संसाराभावः सूचितः. अतएव गोपिकानामपि. अत एव हरिणीनामपि. पशुत्वाविशेषाद् ग्राम्याणां चेदुद्धारको, विशेषत

**लेखः**

**मणी**त्यत्र **गवामि**ति, यद्यद्विधानि गवां रूपाणि तत्तद्विधा मणयो वैजयन्त्यां स्थापिताः, अतो **मणय आधिदैविकानि** देवसम्बन्धीनि **गवां** स्वरूपाणीत्यर्थः. **अत** इति, गवाधिदैविकत्वादित्यर्थः. **ता** इति, आधिदैविक्यस्ता नीलत्वादितद्धर्माश्चेत्यर्थः. एवमेव द्वितीयपक्षेऽपीत्याशयेनाहुः **गोपिकानामि**ति. **अतएव हरिणीनामि**ति, गवाधिदैविकधारणादित्यर्थः. **नीलं रूपमि**त्यादि,

१-२. अत्र स्वतन्त्रटिप्पणी प्रथमपरिशिष्टे मुद्रिता.

आरण्यानां भविष्यतीति युक्ता कृष्णपरता. **मालया दयितगन्धतुलस्या** उपलक्षितः. यथा भगवतो नीलं रूपं प्रियं, स्पर्शः स्त्रीणां, शब्दो वेणोः, रसो नवनीतस्य, तथा गन्धस्तुलस्याः. तद्व्रतोत्तमता सात्त्विकानां केषाञ्चिदनुभवसिद्धा. तादृशी तुलसी, अतस्तस्या मालां बिभर्ति. अतो यदा वयमपि प्रिया भविष्यामः तदा अस्मानपि अस्मद्धर्मान् वा धारयिष्यतीति कृष्णसारस्त्रीणां प्रवृत्तिः. कृष्णसारस्तु वेदे नियुक्त इति भक्तौ तासां विनियोगार्थं प्रवृत्तिः. किञ्च **प्रणयिनो**ऽतिप्रेमवतो **अनुचरस्य** गोप**स्यांसे भुजं प्रक्षिपन्निति कदा** कदाचिद्, "आशंसायां भूतवच्चे"ति वा कदा अगायतेति मध्ये गानाशंसा. यथा गोपालस्य तथा स्नेहसेवाधर्मयोः सद्भावे एवं भविष्यतीति गोपिकानामिव हरिणीनामपि तथात्वाय स्नेहभजनम्. देहास्फुरणात् न विजातीयत्वेन कामाभावः. तदैव **क्वणितो** यो **वेणुः** आकस्मिकः शब्दविशेषो मनोहारी क्वणनात्मकः. स चेद्वेणोर्निर्गतः तत्सम्बन्धादन्येऽपि शब्दाश्चित्तवञ्चका इति **रव**पदम्. शब्देन मृगाणां वशीकरणं सिद्धमेव. इदानीमेवोपयोगो भविष्यतीति प्रतीतिजननाद्वञ्चकत्वम्. अतो **रवेण वञ्चितचित्ताः कृष्णमन्वसत कृष्ण**समीपे **आसत** उपविष्टा जाताः. यथा प्रायमुपविशति एवं कृष्णमनूपविष्टाः. ननु स्त्रियोऽन्यस्य कथमन्यस्य गृहेऽन्यस्य समीपे उपविष्टा इति? तत्राह **कृष्णस्य** कृष्णसारस्य **गृहिण्य** इति, कृष्ण इति तास्तस्य गृहिण्यो जाताः. वञ्चितचित्तत्वाद्वा रूपं

### टिप्पणी

**रववञ्चितचित्ता** इत्यत्र, **इदानीमेवोपयोग** इत्यादिना प्रतीतिप्रकारकथनम्. **उपयोगो** नायिकावदुपभोग इति यावत्. वेणुनादस्यैतादृगनुभावो यदेतासामप्येवं भावस्तत्रान्यासां का वार्तेति भावः ॥१९॥

### लेखः

आनन्दस्य नीलरूपत्वात्, स्त्रीवेण्वोश्च सुधाधारत्वान्नवनीतस्य पीयूषपातृगोदुग्धसारत्वात्तुलसीगन्धस्य च दिव्यत्वव्युत्पादनादिति भावः. **अतो यदे**ति, प्रियत्वेन हेतुना तुलसीमालाधारणादित्यर्थः. अत्रैव हेत्वन्तरं समुच्चिन्वन्ति **किञ्चे**ति. प्रणय्यंसे भुजप्रक्षेपादप्यस्माकं प्रणयित्वेऽस्मद्धारणमित्यर्थः. **एवं भविष्यती**ति, अस्मानस्मद्धर्मान्वा धारयिष्यतीत्यर्थः.

**क्वणितेत्यत्र स चेदि**ति, रवस्यानुरणनरूपत्वात् पूर्वस्य चित्तवञ्चकत्वे



विस्मृत्य शब्दमात्राभिनिविष्टा जाताः. वेणुनादेन वा [1]सानुभावेन कृष्णसारेऽपि कृष्णमत्या कृष्णमेवान्वासत. ननु कृष्णसारेऽपि कृष्णभ्रमात् शब्दोऽपि वर्तत इति तं परित्यज्य कथमागता इत्यत आह **गुणगणार्णमि**ति, कृष्णसारे एको द्वौ वा गुणौ. अतो यत्रैव भगवान् गच्छति तत्रैव त**मनुगत्य** सर्वा एव **हरिण्यो विमुक्तगृहाशा** जाताः गृहं गमिष्याम इत्याशामपि त्यक्तवत्यः. [2](सान्निध्येन भगवद्रसः पीत इति लब्धस्वादुभावाः **गोपिका इव** तदेकपरा जाताः. एतन्नयनेषु स्वप्रियानयनसादृश्यदर्शनेन यादृशेन भावेन ताः पश्यति तादृशेनैवैता अपि पश्यन्तीति एतासामपि तत्सजातीयभावोत्पत्तिः, तथैव वेणुक्वणनं च. अतएव अग्निबीजामृतबीजात्मकं **रव**पदमुक्तम्, यतस्तच्छ्रवणेऽत्यार्तिस्तत्तापशमनं च सम्पद्यते. अतः स्वदृष्टान्तोक्तिर्युक्ता) ॥१८-१९॥

एवं नवप्रकारेण वेणुनादं निरूप्य, गुणातीतप्रकारेण त्रिधा निरूपयन् वेणुनादेन भगवान् जगदेव वशीकृतवानित्याह **कुन्ददामे**ति द्वाभ्याम्.

**कुन्ददामकृतकौतुकवेशो गोपगोधनवृतो यमुनायाम् ।**
**नन्दसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार ॥२०॥**
**मन्दवायुरुपवात्यनुकूलं मानयन् मलयजस्पर्शेन ।**
**बन्दिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः ॥२१॥**

यर्हि भगवान् **यमुनायां विजहार,** तत्रापि पूर्वोत्तरदशायामपेक्षितो वेणुनादः परिगृह्यते प्रकरणित्वात्, प्रकारविशेषाभावाच्च न पृथगुक्तः, तदा **उपदेवगणाः परिवव्रुरि**ति सम्बन्धः. **यमुनायामि**ति सामीप्यसप्तमी. अधिकरणसप्तमी वा, घर्मे गवां गोपालानां च जले स्थितिः सम्भवति. तत्र विहारो

### लेखः

उत्तरस्यापि तथात्वाय **रव**पदमित्यर्थः. **कृष्णमत्ये**ति, "सा सा सा से"ति प्रकारिकयेति भावः. तथापि भगवान् पूर्णगुणः, "आनन्दादयः प्रधानस्ये"ति न्यायादिति भावेनाहुः **नन्वि**त्यादि. **गुणगणार्णमि**त्यत्र **गुणानामार्णः** आसमन्तादृर्णं जलं यत्र समुद्र इत्यर्थः ॥१८-१९॥

**कुन्दे**त्यस्याभासे **जगदेवे**ति, "वायुर्वाव गोतम तत्सूत्रमि"त्यादिना वायोः सर्वमूलत्वकथनात् तस्य वश्यतया जगदेव वशीकृतं जातमिति भावः. व्याख्याने **पूर्वोत्तरे**ति, कौतुकवेशकरणे विहारे चेत्यर्थः. **पुष्पालङ्कारा न**

१. रसानुभवेनेति पाठः. २. प्रभूणां स्वतंत्र.

गोपैः सह जलक्रीडा, गवां प्रक्षालनादिः. सर्वत्रोद्वेगशान्त्यर्थं वेणुनादः सहकारी. तदानीमनलङ्कृतत्वमाशङ्क्य अलङ्कारमाह **कुन्ददामेति**, वस्त्राभरणाद्यलङ्कारा भविष्यन्त्येव, पुष्पालङ्कारा न भविष्यन्तीत्याशङ्क्य तदेव निरूप्यते— **कुन्ददाम्ना कृतः कौतुकवेशो** यस्य. दामान्यनेकप्रकाराणि, तैस्तथा वेशो निर्मीयते यथा अत्यद्भुतो भवति. अत्र तु यथैव हास्यरस उत्पद्यते तथैव निर्मीयत इति. नन्वेतादृशीं प्राकृतलीलां भगवान् कथं कृतवानित्याशङ्कायामाहुः **नन्दसूनुस्तव वत्सो** इति, यया लीलया नन्दपुत्रो भवति तयैव लीलया प्राकृतलीलामपि सम्पादयति. **अनघ** इति सम्बोधनं क्रोधाभावाय विश्वासार्थं च. **तव** च **वत्सो** जातः. अनेन त्वं गोरूपेति सर्वगुप्तरसानभिज्ञत्वं सूचितम्. अन्यथा उलूखलबन्धनलीलां न कुर्यात्. मध्ये निर्दोषत्वेन सम्बोधनादुभयोर्निर्दोषत्वं ज्ञाप्यते. तादृश्या वत्सत्वेन भगवत्यपि तथा. पूर्णगुणत्वलक्षणमाधिक्यं चोच्यतेऽग्रिमविशेषणेन. किञ्च **प्रणयिनां नर्मदः**— ये केचन स्नेहयुक्ताः यथैव ते स्निग्धा भवन्ति तथैव लीलां करोतीति. अनेन सर्वत्रैव हेतुरुक्तः. यत्रैव

---

**लेखः**

**भविष्यन्तीति**, प्रातः शृंगारसमये धृता म्लानतयोत्तारिता भविष्यन्त्यतो न भविष्यन्तीत्यर्थः. **दाम्ना कृत** इति **कृत**पदेन पुष्पालङ्कारा अन्ये पुनर्धृता इत्युक्तम्. **दामान्यनेके**ति, अङ्गदादिप्रकाराणीत्यर्थः. **तथावेश** इति शृंगाररसोपयोगिवेश इत्यर्थः. **अत्र त्विति**, **कौतुक**पदाद्धास्यरसोपयोगी वेशोऽत्रोच्यते इत्यर्थः. **प्राकृतलीलामिति**, प्राकृतानां ग्राम्याणां लीलामित्यर्थः. **यया लीलयेति** द्वादशाध्याये "एवं निगूढात्मगतिरि"ति श्लोके विडम्बनार्थं गोपात्मजत्वं ग्राम्यलीला चेति निरूपितं; तथाच **यया** विडम्बन**लीलया** हेतुभूतयेत्यर्थः. **क्रोधाभावाये**ति, व्रजराजकुमारस्य गोप्रक्षालनादिकार्यकथने क्रोधोऽविश्वासश्च संभवति, अत इदं संबोधनमनघायास्तथा न भवतीति भावः. **तव चेति यया लीलयेति** पूर्वोक्तमनुवर्तते. **अन्यथेति**, गुप्तरसज्ञाने भगवन्माहात्म्यं ज्ञात्वा तथा न कुर्यादित्यर्थः. **उभयोरिति** नन्दयशोदयोरित्यर्थः. पूर्वविशेषणेन नन्द उक्तोऽग्रिमविशेषणे **तवे**त्यनेन यशोदोक्तेति ज्ञेयम्. **पूर्णगुणत्वेति**, प्रणयिसुखदानं पुरुषोत्तमधर्मत्वात् पूर्णो गुण इति भावः. अयं तात्पर्यार्थ उक्तः, वाच्यार्थमाहुः **किञ्चेति**, नन्दसूनुत्वं प्राकृतलीलायां हेतुरुक्तः, प्रणयिसुखदातृत्वं च हेतुरिति समुच्चयः. **सर्वत्रैवेति**, नन्द-



लीलासक्त्या क्रीडा स विहारः. सोऽत्र जलक्रीडा नृत्यक्रीडा वेणुवादनक्रीडा च ज्ञेया. अन्यथा वाद्यादीनामुपयोगो न स्यात्. विद्यावन्तो हि वशीकर्तव्याः. तत्र विद्योत्पादको वायुः, देवाश्च तदाधारभूताः. तत्राप्युपदेवगणा **बन्दिन**श्च बहिर्विद्याप्रकटनपराः. अतोऽन्यापेक्षया तेषु विशेष उक्तः. प्रथमतः कारणभूतं वायुं निरूपयन्ति— **मन्दो वायुः अनुकूलं** यथा भवति तथा **उपवाती**ति. **अनुकूलं** कुलसमीपे हितं च, अनेन शैत्यं निरूपितम्. **मलयजस्पर्शेन** सहित इति सौरभ्यम्. अनेन दाक्षिणात्योऽयं वायुरिति निरूपितम्. भगवत्स्वरूपे दत्तेन वा मलयजेन सहभावादधिकशैत्यनिरूपकत्वेन अनुकूलत्वम्. मलयजस्पर्शः मलयजस्येव वा स्पर्शः. तथा सति तत्रत्यानां सर्वेषामेव भगवद्भावं सम्पादयिष्यतीति **मानयन्नि**ति, स्वकीयैस्त्रिभिर्गुणैः यथैव सन्माननं भवति तथैव वातीत्यतिवश्यता. **उपदेवगणा**श्च गन्धर्वादयश्च **बन्दिनः** कीर्तिनिरूपका जाताः. गायकाश्च सन्तः, **य** इति भगवदीयाः, **वाद्यगीत**पूजासाधनैः तामसराजससात्त्विकैः सहिताः **परिवव्रुः** सर्वत्रैवापेक्षितं कृतवन्तः ॥२०-२१॥

---

**लेखः**

सूनुत्वेऽपीत्यर्थः. **अन्यथेति**, जलक्रीडामात्रकथने इत्यर्थः. **तत्रेति**. विद्यासाध्यत्वाद् गानस्यापि विद्यात्वम्. तथाच विद्यावत्सु **विद्योत्पादको** गानोत्पादक इत्यर्थः. मैत्र्युपनिषदि "मनः कायाग्निमाहन्ति स प्रेरयति मारुतमि"त्यादिप्रकारेण शब्दोत्पत्तिनिरूपणात् सङ्गीतशास्त्रे च तथा निरूपणादिति भावः. **तदाधारभूता** इति गानाधारभूता गायका इत्यर्थः. **बहिर्विद्ये**ति, देवेष्वपि मध्ये एते बहिर्गत्वा सर्वत्र जीविकार्थं विद्यां प्रकटयन्तीत्यर्थः.

**मन्दे**त्यत्र, प्रथमपक्षमाहुः **अनेनेत्यारभ्येति निरूपितमि**त्यन्तेन. द्वितीयपक्षे **मलयजे**त्यनेन[१] शैत्यं सौरभ्यं च निरूपितमित्याहुः **भगवदि**ति. अतो**ऽनुकूलत्वं** हितत्वमित्यर्थः. आद्यपक्षे मलयजसम्बन्धी स्पर्शो अतः सुरभिरित्यर्थः. द्वितीये तत्सदृशः स्पर्शो अतः शीतः सुरभिश्च वायुरित्यर्थः. **तथा सतीति**, आद्यपक्षे भगवतोऽपि भावोद्बोधको द्वितीये तत्रत्यानामन्येषामेवेत्यर्थः. **गायकाश्चेति** **च**कारा‌द्वादकाः पूजकाश्च. वाद्यादिसाहित्यकथनेन तादृशाः सन्तः परिवव्रुरित्यर्थः संपन्न इत्यर्थः. एतदेव स्फुटयन्ति **वाद्येति** ॥२०-२१॥

---

१. इत्यनेनैव इति जो.पाठः.

एवं गुणातीते प्रकीर्णतां निरूप्य युगलद्वयेन केवलं भगवतएव चरित्रमाहुः **वत्सल** इति.

**वत्सलो व्रजगवां यदगध्रो वन्द्यमानचरणः पथि वृद्धैः ।**
**कृत्स्नगोधनमुपोह्य दिनान्ते गीतवेणुरनुगेडितकीर्तिः ॥२२॥**
**उत्सवं श्रमरुचापि दृशीनामुन्नयन् खुररजश्छुरितस्रक् ।**
**दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥२३॥**

भगवान् यद् गोकुलं गोष्ठे समानयति तत् कृपया, अन्यथा एकस्यामपि लीलायां व्यापृता गावो मुच्येरन्; तथा गोपिकाः, परं कृपयैव भजनानन्दानुभवार्थं तथा करोति. अत्र हेतुः **यदगध्र** इति, **यद्** यस्मात् कारणाद् **अगं** पर्वतं **धारयती**ति, यदि भजनानन्दं न दद्यात् तदा गोवर्धनोद्धरणं न कुर्यात्. एतद्भगवन्माहात्म्यं सर्वजनीनमिति ज्ञापयितुमाह **पथि वृद्धैर्वन्द्यमानचरण** इति, **वृद्धाः** सर्वतो निपुणाः, बहुज्ञैरेव भगवान् सेव्यो भवति. अतः **कृत्स्नमेव गोधनमुपोह्य** ततः पृथक्कृत्य **उप** समीपे समाहृत्य वा. **दिनान्त** इति अग्रे वनस्थितेरयुक्तत्वात् लीलान्तरस्य च

## टिप्पणी

**वत्सलो व्रजगवामित्यत्र**, **गावो मुच्येरन्नि**ति, एकैकेक्षणादिलीलारसस्य निरवधिमहारसत्वेनैकत्र निमग्ना नात्मानमपि जानीयुः किमुतान्यदित्यर्थः ॥२२॥

## लेखः

**गुणातीते** इति, निरूप्ये गुणातीतप्रकारत्रये तद्विशेषं प्रकीर्णताप्रकारं निरूप्येत्यर्थः. अत्र भावभेदाद्वक्त्रीणां भेदः, स्वरूपतो भेदस्तु प्रायिक इति पूर्वमपि निरूपितमतो **निरूप्य आहुरि**ति समानकर्तृकत्वमिति ज्ञेयम्.

**वत्सल** इत्यत्र वात्सल्यं विवृण्वन्ति **भगवानि**ति. **व्रजगवामि**त्यत्र विषयता षष्ठ्यर्थः, तथाच तद्विषयकवात्सल्ययुक्तो **व्रजस्य गवां** चोपरि **वत्सलः** प्रीत इत्यर्थः. **अन्यथे**ति तादृशकृपाऽभावे इत्यर्थः. **व्रज**पदस्य गोपिकावाचकत्वाशयेनाहुः **तथा गोपिका** इति. **एतदि**ति गोवर्धनधरणरूपं माहात्म्यमित्यर्थः. **तत** इति वनलीलातः पृथक्कृत्येत्यर्थः. **लीलान्तरस्ये**ति, निशि वने स्वामिनीभिः सह लीलायाश्चिकीर्षितत्वादित्यर्थः. **अस्य नादस्ये**ति. अग्रिमयुगले दिनतापमोचनं कार्यमित्यर्थः.



चिकीर्षितत्वात् **गीतवेणु**र्जातः, श्रमापनोदनार्थं व्रजस्थानां ज्ञापनार्थं च. अस्य नादस्याग्रे कार्यं वक्तव्यम्. गोपिकाएव कृतार्थाः करोतीति न किन्तु गोपानपीति ज्ञापयितुं तत्कृतस्तोत्रमाह **अनुगेडितकीर्तिरि**ति, **अनुगैः** सेवकै**रीडिता कीर्ति**र्यस्य. अनेन रात्रौ तेषामपि गानमुक्तं भवति यथा दिवसे गोपिकानाम्. अन्यथा सर्वेषां निरोधो न भवेत्.

एतादृशस्य कार्यं स्वयमेव जानातीति स्वयमेव करोतीत्याहुः **उत्सवमि**ति. **श्रमरुचा** व्रजस्थ**दृशाम् उत्सवमुन्नयन् आशिषो दित्सया एती**ति सम्बन्धः. **श्रम**युक्ता **रुक्** कान्तिः. भगवतः श्रमाभावपक्षे प्रदर्शनमात्रपरत्वम्. अस्ति श्रम इति सिद्धान्तः, "भर्ता सन् भ्रियमाणो बिभर्ति" "एको देवो बहुधा निविष्टः" "यदा भारं तन्द्रयते स भर्तुं निधाय भारं पुनरस्तमेती"ति श्रुतेः, सर्वधर्माश्रयत्वाच्च, विरुद्धसर्वधर्माश्रयत्वादश्रान्तोऽपि. न तु केवलमश्रान्त एव. श्रमः सुखकारक इत्यपरे. तत्सम्बन्धिनी रुक् **श्रमरुक्.** सा नायकगता स्त्रीणां न हितकारिणी, तथाप्यस्माकं हितकारिण्येव जातेत्याहुः **दृशीनामुत्सवमुन्नयन्नि**ति, **दृशि**र्दर्शनम्. यदि भगवान् श्रान्तो न भवेत् तदा शीघ्रं गच्छेत्. तदा दृष्टीनां परमानन्दसन्ततिर्न स्यात्. **ऊर्ध्वं नयन्नि**ति संघाते दृष्टीनां य आनन्दः स्थितः यावान् तदपेक्षयाधिकं कृतवानित्यर्थः. भगवत्कीर्तेः सर्वपुरुषार्थदातृत्वाय प्रकारं वदन् श्रममुपपादयति **खुररजश्छुरितस्रगि**ति, गो**खुररजोभिश्छुरिता** व्याप्ताः **स्रजो** माला यस्य. वायुवशादुद्गतो रेणुः न स्थिरो नापि नियतः, खुरजातस्तु तथा. खुराणामेव गोत्वात्

## लेखः

**उत्सवमि**त्यस्याभासे **स्वयमेवे**ति, नतु नादेनेत्यर्थः. व्याख्याने **श्रमो** अश्रांतत्वात् **रुक्च**, अत उक्तं **श्रमयुक्ता रुगि**ति. सुखात्मकत्वपक्षमाहुः **तत्संबन्धिनी रुगि**ति. **दृष्टीनामि**ति, दर्शनानां संबन्धिनी दर्शनजनिता **परमानन्दसंततिः** नेत्राणामिति शेषः. तथाच मूले **दृशीनां** संबन्धिनं नेत्राणा**मुत्सवमि**त्यर्थः. **भगवत्कीर्तेरि**ति, कीर्तिरूपायां स्रजि पुरुषार्थानां वक्ष्यमाणत्वात् स्रजि पुरुषार्थस्थापनप्रकारेण तद्दानमित्यर्थः. मालायां पुरुषार्थस्थापनं पुरुषार्थलीलानुभवार्थं, तादृशलीलानुभवस्तु श्रमाभावे शीघ्रगमनान्न भवेदतः श्रमोऽस्तीत्युपपन्नमिति भावेन श्रमोपपादनमुक्तम्. **स्रजो माला** इति, "कुन्ददामे"त्यत्रानेकप्रकाराणामुक्तत्वाद् बहुवचनम्. **खुराणामेवे**ति,

प्रकृतत्वाच्च न 'गो'ग्रहणं, "पशवो वा एकशफा" इत्यत्र तथा निर्णयात्. अनेन धर्मोऽयमिति निरूपितं, रजोऽर्थो, व्याप्तिः काम इति. आगमनस्य तु यत् कार्यं तदाहुः **सुहृदां** सर्वेषामेव सम्बन्धिना**माशिषः** सर्वाएव देया इति. उक्तं गोपिकाद्वारा सर्वेष्वानन्दप्रवेश इति. **एष** इति प्रदर्श्याहुः, यतः स्वस्मिन् लीला ज्ञापिता भवति. साधारण्येन सर्वेषां तापनाशकत्वाय भगवद्गतमसाधारणं धर्ममाहुः **देवकीजठरभूरुडुराज** इति, "अदितिर्देवकी अदितिर्द्यौरदीतिरन्तरिक्षमि"ति श्रुतेः अदित्यवतारत्वात् द्युरूपा सा. तस्यामवश्यं चन्द्रोदयोऽपेक्षितएव. सा पुनर्विशेषरूपं गृहीतवतीति चन्द्रोऽपि विशिष्टकार्यं करोति. लौकिकस्तापस्त्रिविधो भगवद्विरहजश्च. अयं त्रिविधमपि नाशयतीति पूर्वोक्तमानन्ददातृत्वमुपपादितम्. देवकीजठरे भवतीति **देवकीजठरभूः**, सएव **उडुराजो** जायते, यथा उदयाद्रौ. पतिस्तु नक्षत्राणामेव भवति. तथा देवक्यां जातः परं सुखदोऽस्माकमेव.

[1](अथवा. एतास्तु भगवद्विरहेणार्ता इति स्वाभिलषितप्रकारेण तदङ्गसङ्गव्यतिरेकेण नैतासामुत्सवो भवतीत्यार्ताएव स्थिताः. परं **दृशीनां** दर्शनं मुख्यमिति तेनै**वोत्सवोन्नयनमु**च्यते. तथा च **आर्तानाम**स्माकं **दृशीना-मि**ति समासो ज्ञेयः. **आर्त**शब्दस्य ह्रस्वो**ऽपि** छान्दसः(!?). नहि दृशीना-मेवार्तत्वमत्र विवक्षितं, प्रकारान्तरेणापि तत्स्वरूपरसास्वादवत्यः स्वामिन्य इति सर्वेन्द्रियाणामेवार्तत्वसम्भवात्. तदैव सर्वत्रोत्सवे पुनराशिषोऽनभीप्सि-तत्वेनाग्रे तद्दित्सोक्तिरप्यनुपपन्ना स्यात्. दृशीनामुत्सवो बहिरेव. अन्तरुत्सवस्य

**लेखः**

व्यावर्तकधर्मस्यैव शक्यत्वमत्त्वादिति भावः. **पशवो वे**ति, तत्र शफानामेवासाधारणधर्मत्वं निर्णीतमित्यर्थः. **अनेने**ति गोत्वकथनेनेत्यर्थः. **अयं** खुर इत्यर्थः. **आगमनस्य त्वि**ति, पुरुषार्थत्रयं कीर्त्यङ्गत्वेन निरूपितमिति तद्व्युदासाय **तु**शब्दः. **यत्कार्यम्** आशीर्दानं मोक्षरूपमित्यर्थः. **स्वस्मिन् लीले**ति पुल्लिङ्गात् **स्वस्मिन्** भगवतीत्यर्थः. एतादृशः **एष** इति प्रदर्श्यते. **लौकिकस्ताप** इति घर्मजनित इत्यर्थः. **त्रिविध** इत्यस्याग्रिमेणान्वयः— आधिभौतिकादिभेदभिन्नो देहेन्द्रियात्मनिष्ठो **भगवद्विरहजस्त्रिविध** इत्यर्थः. **त्रिविधमपी**ति, लौकिकश्चन्द्रो लौकिकमेव तापम्, अयं तु त्रिविधमपी**त्यपि**शब्दः.

१. प्रभूणां स्वतन्त्रः.



त्वधिकरणं मनः, तस्यातृप्तत्वान्न स इदानीं परमग्रे सम्भोगसामयिकदर्शने भविष्यतीति ज्ञापनाय**योर्ध्वमि**त्युक्तम्. यथा "गोप्यो दिदृक्षितदृशोऽभ्यगमन् समेता" इत्यत्र दर्शनानन्तरमपि दृशां दिदृक्षितत्वम् एवमत्रापि ज्ञेयम्. अत एव **दृशीनामि**ति सम्बन्धषष्ठ्याप्युत्सवस्य तत्सम्बन्धित्वमेव प्राप्यते. तत्रापि भगवत्कर्तृकनयनोक्त्या तासां बहिरुत्सवोऽपि प्रियप्रापित इति तद्दर्शनस्वभावान्न स्वत इति बोध्यते. अतएव उत्सवकरणत्वं श्रमरुचोऽपि युज्यते, अन्यथा चिरादुत्कण्ठितानामासां प्रियतमागतश्रमनिरीक्षणेन अग्रिमरसप्रतिबन्धशङ्कया न उत्सवः स्यात् प्रत्युत पूर्वापेक्षयाधिकतरः खेदएव स्यात्. किञ्च "विनास्माभिरन्येन प्रियः श्रमापनोदनं न कारयति, वयमतः परं करिष्याम" इति श्रमरुचस्तथात्वं युक्तमेव. श्रमस्य कान्तित्वनिरूपणेनापि स्वमनोरथाप्रतिबन्धकत्वात्तथेति ध्वन्यते. श्रमोऽप्यन्यनायिकाविषयकश्चेत् कथं दृशामुत्सव इति चेत्, तथा नेत्याहुः **खुररजश्छुरितस्रगि**ति, यद्यप्यन्यनायिकाविषयकः स्यात् तदा स्रजि तदङ्गरागएव स्यात्, न तु खुररजः. रजोऽप्यागमनसामयिकं चेत् सम्भवेदपि तथा, परं चिरकालीनमिति ज्ञापनाय **छुरित**त्वमुक्तम्, अल्पकालेन तथात्वस्यासम्भवात्. किञ्च तथा चेत् स्रगपि न स्यात्, क्रीडान्तरायत्वात्. अतो ज्ञायते **सुहृदामस्माकमाशिषो दित्सया एतीति**, **एती**त्यागमनक्रियायां कर्मानुक्त्यापि तथेति ज्ञाप्यते. अयं भावः— कर्तुरभीप्सिततमं कर्म भवति. तेनात्र भगवत्कर्तृत्वात् तदभीप्सिततमत्वम् अस्माकमेव नान्यस्य. अन्यथा "व्रजमेती"त्युक्तं भवेत्. यद्यपि सर्वेषामेव निरोधश्चिकीर्षितो भगवत इति, व्रजस्याप्यभीप्सितत्वं, तथाप्यभीप्सिततमत्वलक्षणोऽतिशयोऽस्मास्वेवेति तथोक्तम्. तन्निदर्शनमेवाहुः **एष** इति. अन्यथा कथमात्मानं प्रदर्शयेत्! दक्षिणनायकत्वेनान्तर्भाव-वैषम्याभावायाहुः **देवकीजठरभूरि**ति, सर्वथा निर्दुष्टा हि देवकी, तदुदरे प्रकटस्तथेत्यर्थः. तादृशस्य भवतीषु को विशेष इत्यत आहुः **उडुराज** इति, यथा चन्द्रः सर्वेषां तापहारको दूरादेव, परं पतित्वेनातिनिकटे नक्षत्राणामेव, तथायमपि सर्वेषां तथा दूरादेव, परं पतित्वेनास्माकमेव तथेति भूयान् विशेषः सम्पद्यते. स यथा नक्षत्रमण्डले तिष्ठंस्तैरेव राजमानः सर्वतापनिवर्तकः, तथायमप्यस्मन्मण्डले तिष्ठन्नस्माभिरेव राजमानस्तथे**त्युडुराज**पदेन द्योत्यते.)

इदं सर्वं कार्यं वेणुनादसाध्यमिति प्रकरणितत्वात् ज्ञेयम् ॥२२-२३॥

साधारणीं लीलामुक्त्वा गोपिकास्वेव वेणुकृतां भगवतैव जनितां लीलामाह **मदेति**.

**मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली ।**
**बदरपाण्डुवदनो मृदुगण्डं मण्डयन् कनककुण्डललक्ष्म्या ॥२४॥**
**यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते ।**
**मुदितवक्त्र उपयाति दुरन्तं मोचयन् व्रजगवां दिनतापम् ॥२५॥**

**यदुपतिः मुदितवक्त्र उपयातीति**. पूर्वोक्ताएव वेणुनादा अत्र ग्राह्याः. दश लीलाः पूर्वं निरूपिताः, ताः सर्वा अस्मदर्थमेवेति दशधा भगवन्तं विशेषयन्ति. एकएव भगवानुभयत्रेति युगलत्वेऽपि नात्यन्तं विभागः. सर्वत्रैव वेणुनादे रजोगुणो मुख्य इति सोऽस्मदर्थं फलित इत्याहुः **मदेन विघूर्णिते लोचने** यस्येति. **मदो**ऽत्र स्वानन्दस्थित्या पूर्णावबोधः. स ज्ञानमार्गएवेति

## टिप्पणी

**मदविघूर्णिते**त्यत्र **रजोगुणो मुख्य** इति, उद्दीप्तो रसभाव इत्यर्थः, तस्मिन् सत्येव तत्करणात्. **मदविघूर्णिते**त्यत्र **मदोऽत्रे**त्यारभ्य**ोक्तमि**त्यन्तम्. पूर्वानुभूतविविधनायिका-विविधविलासस्मृतिधारा-जनितानन्द-सन्दोहानुभवः **पूर्णावबोध** इत्युच्यते. स चेतरविस्मारक इति **मद**रूपः. सोऽधुना भवतीनामिव ममापि भवतीसम्बन्धस्मृत्यैव वनेऽपि मोदः, न त्वन्यनायिकाविषयिण्या

## लेखः

तस्य गौणत्वसूचनायैवमुक्तम्. **प्रकरणितत्वादि**ति, प्रकरणं संजातं यस्य तादृशत्वात्, वेणुनादस्येति शेषः ॥२३॥

**मदे**त्यत्र **पूर्वोक्ता एवे**ति, वेणुनादेनान्यत्र कृतं कार्यं पूर्वमुक्तम्, गोपिकास्वेव कृतमत्रोच्यत इति विशेषः. **युगलत्वेऽपी**ति, भिन्नयुगलत्वेऽपीत्यर्थः. **नात्यन्ते**ति, "जानाति भगवानेव जानात्येव च हरिरि"त्येतावानेव विभाग इत्यर्थः. सर्वासां लीलानां गोपिकार्थत्वं व्युत्पादयन्ति **सर्वत्रैवे**ति. **मुख्य** इति हेतुरिति शेषः. तथा च तद्धेतोरस्मदर्थं फलितत्वात्तत्कार्यमप्यस्मदर्थमेव, अन्येषां तु प्रासङ्गिकत्वमिति भावः. **अस्मदर्थं फलित** इति, अस्मद्विषयक-एवोद्दीप्तो रसभावो जात इत्यर्थः. **स्वानन्दे**ति, पूर्वानुभूतस्यानन्दस्य स्वस्मिन् स्थितेत्यर्थः. अत्र रजोगुणः पूर्णावबोधश्च एकएवेति ज्ञेयम्. **ज्ञानमार्गएवे**ति



प्रकटयितुं सर्वविषयान् व्यावर्तयितुं **विघूर्णितलोचन**त्वमुक्तम्. अयं धर्मो भगवन्निष्ठो निरूपितः. स्वरूपस्थित्यर्थं तादृशोऽ**पीषन्मानदः** मानं प्रयच्छति सन्माननं करोति, तेनास्माकं गम्यो भवतीति ज्ञायते. **मानम**भिमानं वा रजोगुणप्राकट्यात् प्रयच्छति, खण्डयति वा ज्ञानप्राकट्यात्. प्रयच्छति **मानं द्यति** खण्डयति त्रिष्व**पीषदे**व तत्तत् कार्यम्. ननु पूर्णस्य भवतीष्वेवंकरणे

## टिप्पणी

क्रिययापीति ज्ञापयितुं ज्ञानप्रापकनयनयोरेव मदः प्रदर्श्यते. ज्ञानमपि भवतीमात्रविषयकं न त्वन्यविषयकमपीति ज्ञापयितुं **विघूर्णित**त्वम्. तादृग्बहिःप्रसरद्रूपं न भवतीति तथा. प्रचुरप्रेमवतीनां तत्रापि दिवा क्लिष्टानां प्रियदर्शने तत्रैवात्मप्रवेशः स्यादिति तदभावायेषदेव मानं ददाति यावता पृथक्स्थितिर्भवतीत्याशयेनाहुः **स्वरूपस्थित्यर्थमि**त्यादि. यद्वा इयदवधि पृथक्स्थित इति ज्ञानेन माने सम्भवत्यपि ज्ञापितार्थज्ञानेनेषदेव मानो भवतीति तथा. अथवा उक्तज्ञापनेनेषदपि मानं द्यतीत्यर्थः. यद्वा प्रचुरस्मरभावएव मदस्तेन तथेति पूर्ववत्. यद्यप्येतादृशस्य स्वप्रियाभ्यः पूर्णमेव सम्माननं कर्तव्यं भवति, तथापि मध्येमार्गमन्येऽपि पश्यन्तीति तेषामनुचितत्वज्ञानं यावता न भवति तावदेव कृतवानि**तीषन्मानदः.** अत्र हेतुः कीर्तिमत्त्वमेव, अन्यथा तु लोका अन्यथा वदेयुरित्याशयेनोक्तं **वनमाली**ति. ईषत्त्वे हेतुमाहुः **त्रिष्वपी**ति, त्रिष्वपि पक्षेष्वित्यर्थः. ते सन्मानन-मान-मानखण्डनरूपाः. रूपेणाश्वस्तानां स्मितेक्षणादिना य आश्वासः स स्वल्प एव कार्यः सम्मानस्य. पृथक्स्वरूपस्थितिमात्रं मानस्य.

## लेखः

लोचनयोरेवेत्यर्थः. **तेनास्माकमि**ति, गम्यत्वे सन्माननाहेतुः अधुनैव तदकरणे तस्या ईषत्त्वं हेतुरिति विभेदः. **रजोगुणे**ति, उद्दीप्तरसभावस्य प्राकट्यादित्यर्थः. मूले **ईषत्**पदात् **प्रयच्छती**त्यस्य ईषत् प्रयच्छति ईषत्करोतीति टिप्पण्यनुसारेणार्थः. अभिमानेषत्करणखण्डनयोर्हेतुमाहुः **ज्ञाने**ति, रजोगुणस्य ज्ञाने लोचनयोरेव प्राकट्यात् तेन तन्मात्रविषयकत्वं रजोगुणस्य बोधितमिति भावः. **स्वरूपस्थित्यर्थमि**त्यत्र टिप्पण्यां पक्षत्रयं सुबोधिनीस्थमेव विवृतम्. अन्ते **यद्वे**त्यनेन **पूर्णावबोध**पदस्यार्थान्तरमुक्तम्. **ईषन्मानद** इत्यस्यार्थस्य प्रथमपक्षे **यद्यपी**त्युक्त्वा योजितं सुबोधिन्यां **तादृशोऽपीत्यपि**शब्देनोक्तम्. अग्रे पक्षद्वये

इदं सर्वं कार्यं वेणुनादसाध्यमिति प्रकरणितत्वात् ज्ञेयम् ॥२२-२३॥

साधारणीं लीलामुक्त्वा गोपिकास्वेव वेणुकृतां भगवतैव जनितां लीलामाह **मदे**ति.

**मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली ।**
**बदरपाण्डुवदनो मृदुगण्डं मण्डयन् कनककुण्डललक्ष्म्या ॥२४॥**
**यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते ।**
**मुदितवक्त्र उपयाति दुरन्तं मोचयन् व्रजगवां दिनतापम् ॥२५॥**

**यदुपतिः मुदितवक्त्र उपयाती**ति. पूर्वोक्ताएव वेणुनादा अत्र ग्राह्याः. दश लीलाः पूर्वं निरूपिताः, ताः सर्वा अस्मदर्थमेवेति दशधा भगवन्तं विशेषयन्ति. एकएव भगवानुभयत्रेति युगलत्वेऽपि नात्यन्तं विभागः. सर्वत्रैव वेणुनादे रजोगुणो मुख्य इति सोऽस्मदर्थं फलित इत्याहुः **मदेन विघूर्णिते लोचने** यस्येति. **मदो**ऽत्र स्वानन्दस्थित्या पूर्णावबोधः. स ज्ञानमार्गएवेति प्रकटयितुं सर्वविषयान् व्यावर्तयितुं **विघूर्णितलोचन**त्वमुक्तम्. अयं धर्मो भगवन्निष्ठो निरूपितः. स्वरूपस्थित्यर्थं तादृशोऽ**पीषन्मानदः** मानं प्रयच्छति सन्माननां करोति, तेनास्माकं गम्यो भवतीति ज्ञायते. **मानम**भिमानं वा रजोगुणप्राकट्यात् प्रयच्छति, खण्डयति वा ज्ञानप्राकट्यात्. प्रयच्छति **मानं द्यति** खण्डयति त्रिष्व**पीषदे**व तत्तत् कार्यम्. ननु पूर्णस्य भवतीष्वेवंकरणे

---

## टिप्पणी

**मदविघूर्णि**तेत्यत्र **रजोगुणो मुख्य** इति, उद्दीप्तो रसभाव इत्यर्थः, तस्मिन् सत्येव तत्करणात्. **मदविघूर्णि**तेत्यत्र **मदोऽत्रे**त्यारभ्**योक्तमि**त्यन्तम्. पूर्वानुभूतविविधनायिका-विविधविलासस्मृतिधारा-जनितानन्द-सन्दोहानुभवः **पूर्णावबोध** इत्युच्यते. स चेतरविस्मारक इति **मद**रूपः. सोऽधुना भवतीनामिव ममापि भवतीसम्बन्धस्मृत्यैव वनेऽपि मोदः, न त्वन्यनायिकाविषयिण्या क्रिययापीति ज्ञापयितुं ज्ञानप्रापकनयनयोरेव मदः प्रदर्श्यते. ज्ञानमपि भवतीमात्रविषयकं न त्वन्यविषयकमपीति ज्ञापयितुं **विघूर्णित**त्वम्. तादृग्बहिःप्रसरद्रूपं न भवतीति तथा. प्रचुरप्रेमवतीनां तत्रापि दिवा क्लिष्टानां प्रियदर्शने तत्रैवात्मप्रवेशः स्यादिति तदभावायेषदेव मानं ददाति यावता पृथक्स्थितिर्भवतीत्याशयेनाहुः **स्वरूपस्थित्यर्थमि**त्यादि. यद्वा इयदवधि पृथक्स्थित इति ज्ञानेन माने सम्भवत्यपि ज्ञापितार्थज्ञानेनेषदेव मानो भवतीति तथा. अथवा उक्तज्ञापनेनेषदपि मानं द्यतीत्यर्थः. यद्वा प्रचुरस्मरभावएव मदस्तेन तथेति पूर्ववत्. यद्यप्येतादृशस्य स्वप्रियाभ्यः पूर्णमेव सम्माननं कर्तव्यं भवति, तथापि मध्येमार्गमन्येऽपि पश्यन्तीति तेषामनुचितत्वज्ञानं यावता न भवति तावदेव कृतवानि**तीषन्मानदः.** अत्र हेतुः कीर्तिमत्त्वमेव, अन्यथा तु लोका अन्यथा वदेयुरित्याशयेनोक्तं **वनमाली**ति. ईषत्त्वे हेतुमाहुः **त्रिष्वपी**ति, त्रिष्वपि पक्षेष्वित्यर्थः. ते सन्मानन-मान-मानखण्डनरूपाः. रूपेणाश्वस्तानां स्मितेक्षणादिना य आश्वासः स स्वल्प एव कार्यः सम्माननस्य. पृथक्स्वरूपस्थितिमात्रं मानस्य.

## लेखः

तस्य गौणत्वसूचनायैवमुक्तम्. **प्रकरणितत्वादि**ति, प्रकरणं संजातं यस्य तादृशत्वात्, वेणुनादस्येति शेषः ॥२३॥

**मदे**त्यत्र **पूर्वोक्ता एवे**ति, वेणुनादेनान्यत्र कृतं कार्यं पूर्वमुक्तम्, गोपिकास्वेव कृतमत्रोच्यत इति विशेषः. **युगलत्वेऽपी**ति, भिन्नयुगलत्वेऽपीत्यर्थः. **नात्यन्ते**ति, "जानाति भगवानेव जानात्येव च हरिरि"त्येतावानेव विभाग इत्यर्थः. सर्वासां लीलानां गोपिकार्थत्वं व्युत्पादयन्ति **सर्वत्रैवे**ति. **मुख्य** इति हेतुरिति शेषः. तथा च तद्धेतोरस्मदर्थं फलितत्वात्तत्कार्यमप्यस्मदर्थमेव, अन्येषां तु प्रासङ्गिकत्वमिति भावः. **अस्मदर्थं फलित** इति, अस्मद्विषयक-एवोद्दीप्तो रसभावो जात इत्यर्थः. **स्वानन्दे**ति, पूर्वानुभूतस्यानन्दस्य स्वस्मिन् स्थितेत्यर्थः. अत्र रजोगुणः पूर्णावबोधश्च एकएवेति ज्ञेयम्. **ज्ञानमार्गएवे**ति लोचनयोरेवेत्यर्थः. **तेनास्माकमि**ति, गम्यत्वे सन्माननाहेतुः अधुनैव तदकरणे तस्या ईषत्त्वं हेतुरिति विभेदः. **रजोगुणे**ति, उद्दीप्तरसभावस्य प्राकट्यादित्यर्थः. मूले **ईषत्**पदात् **प्रयच्छती**त्यस्य ईषत् प्रयच्छति ईषत्करोतीति टिप्पण्यनुसारेणार्थः. अभिमानेषत्करणखण्डनयोर्हेतुमाहुः **ज्ञाने**ति, रजोगुणस्य ज्ञाने लोचनयोरेव प्राकट्यात् तेन तन्मात्रविषयकत्वं रजोगुणस्य बोधितमिति भावः. **स्वरूपस्थित्यर्थमि**त्यत्र टिप्पण्यां पक्षत्रयं सुबोधिनीस्थमेव विवृतम्. अन्ते **यद्वे**त्यनेन **पूर्णावबोध**पदस्यार्थान्तरमुक्तम्. **ईषन्मानद** इत्यस्यार्थस्य प्रथमपक्षे **यद्यपी**त्युक्त्वा योजितं सुबोधिन्यां **तादृशोऽपीत्यपि**शब्देनोक्तम्. अग्रे पक्षद्वये

को हेतुस्तत्राहुः **स्वसुहृदामि**ति. **स्व**पदादसाधारण्यं, तेन स्वस्यैव सुहृदस्ताः, महतोऽपि सुहृत्कार्यं कर्तव्यमिति. साधारणं कार्यमाह **वनमाली**ति, कीर्तिमयीं वनमालां प्रकटयतीति. **बदरवत् पाण्डुवदन** इति, बदरोऽत्र फलवाचकः. स हि घर्मेण प्रतिक्षणं विसदृशीं कान्तिं करोति. तत्राप्यर्धपक्वः पाण्डुवर्णो भवति, अग्रे त्वारक्तः. तथेदानीमर्धरतः अग्रे त्वत्यन्तं रतो भविष्यतीति ईषन्मानदत्वाद्विशेषः. साधनं कीर्तिरिति मध्ये विशेषणान्तरम्. अथवा अत्र **पाण्डु**शब्देन आरक्तएव गुण उच्यते. तदा **वदनं** वक्त्रम् अधरामृतपानं लक्षितं भवति. वनवासिनां वा एतदुपभोग्यमिति वने गत्वा एतदुपभोग्यमिति सर्वाः ज्ञापयन्ति. ततोऽपि विशेषमाहुः **कनककुण्डललक्ष्म्या मृदुगण्डं मण्डयन्नि**ति, श्मश्रूद्गमाभावादानन्दनिधानत्वाच्च मृदुत्वं भोगार्थमुपपाद्यते,

**टिप्पणी**

पूर्णमानवतीनामशेषमानखण्डने सति प्रचुरप्रेमवत्त्वेन लोकाद्यनुरोधाभाववत्त्वात्तदैव स्वानुरूपं सर्वं कुर्युः, अतस्तत्खण्डनं तावदेव यावता तदा लोकविगीतं न भवति. **बदरपाण्डुवदनमि**त्यत्र, **ईषन्मानदत्वादि**ति, अग्रे पूर्णमानप्रद इति तस्माद्विशेष इत्यर्थः. **मृदुगण्डमि**त्यत्र, **मृदुत्वं भोगार्थमि**ति रसविशेषानुभवार्थमित्यर्थः. तदुक्तम् "अनङ्कुरितकूर्चकः शृतसितोपलाढ्यं पयस्ततोऽङ्कुरितकूर्चकः सलवणाम्बुतक्रं[1] पयः. ततः पलितकूर्चकः क्वथितगुग्गुलूद्वेगकृद् भवन्ति हरिणीदृशां सततमेव[2] भावास्त्रय" इति ॥२४॥

**लेखः**

विशेषणयोर्हेतुहेतुमद्भाव इति विशेषः. **साधारणं कार्यमि**ति, मानदानजनितं कार्यमाश्वासादिकमसाधारणं स्वसुहृत्स्वेव प्रकटं, तस्येषद्भावजनितं **कार्यं** कीर्तिप्रकटनं **साधारणं** सर्वलोकेषु प्रकटमित्यर्थः. **ईषन्मानदत्वादि**ति, अग्रेऽत्यन्तरतत्वं पूर्वस्माद् ईषन्मानदानाद् अभिमानेषत्करणाद् अभिमानेषत्खण्डनाच्च **विशेष** इत्यर्थः. **साधनमि**ति, अधुना तादृशविशेषासम्पादने हेतुरित्यर्थः. **वक्त्रमि**ति मुखमध्यमधरमित्यर्थः. **तदे**ति, अधरस्यारक्तत्वादनुरागे सत्येव तत्स्थस्य अमृतस्य पानमिति **लक्षितं** ज्ञापितं **भवती**त्यर्थः. **वनसासिनां वे**ति, वदनस्य बदरसादृश्याद् बदरस्य च वनीयत्वादिति भावः. **ततोऽपि**

१. 'तक्रं पयः' इति मूलपाठः. 'तक्रोपमः' शोधितपाठः.
२. 'सततमेवे'ति मूलपाठः. 'प्रियतमेषु' इति शोधितपाठः.



गण्डएव रससमाप्तिरिति. **कनक**पदं वर्णान्तरज्ञापनार्थम्. उत्कृष्टेनापि परमानन्देनापि अस्मदर्थं कामरसएव उद्बोध्यत इति सर्वथास्मदर्थमेव भगवदागमनमिति निश्चीयते. अन्यथा शिरोभेदानस्मत्समक्षं न कुर्यादिति.

ननु यद्यपि महान् तथापि बाल इति नन्दसूनुरिति कथमसाधारणीं लीलां करिष्यतीत्याशङ्कां वारयन्ति **यदुपतिरि**ति, अयं यादवानां पतिः, ते हि बहुस्त्रीका भवन्ति. अमर्यादार्थं विशेषणान्तरमाहुः **द्विरदराजविहार** इति, महासुरते गजेन्द्र इव महान्, तेन विना न पूर्तिरिति. तदपेक्षयाप्यादौ पूर्वतापं दूरीकरिष्यतीत्याहुः **यामिनीपतिरिवे**ति, सम्पूर्णाया यामिन्या अयं पतिः, अतस्तद्गतानां विशेषेण सुखदः. नन्वहर्पतिरपि, कथमुच्यते **यामिनीपतिरिवे**ति? तत्राहुः **एष** इति, सर्वालङ्कारभूतस्तत्र तिष्ठति, अधुना तु श्रान्त इव. **दिनान्ते एष यामिनीपतिरिव** चन्द्र इव दूरादेव तापनाशकः साम्प्रतम्,

**टिप्पणी**

**यामिनीपतिरिवैष** इत्यत्र, **नन्वहर्पतिरपी**ति, चन्द्रदृष्टान्तेन दिवा सुखदानं न प्राप्यते, तस्यातथात्वात्, भगवांस्तु दिवापि सुखं ददातीति कथमयं दृष्टान्तो युज्यत इत्यर्थः. अङ्गीकृत्योत्तरमाहुः **सर्वालंकारे**ति, **सर्वासामलंकारभूतो** वृन्दमध्ये **तिष्ठति** यस्ता विहाय स्थातुमशक्तः परस्परगुणानुवादश्रवण-तद्भावानुभवजनितानन्द-समुद्रलहरीभिः आर्द्रार्द्रो रसपोषायाप्रकट इव दिवा यः स **एष** इत्यनेन प्रदर्श्यते. इतोऽप्यानन्दपोष इति ज्ञायते. यथान्यासां लीलानां परिज्ञानं भावबलात्, तथा स्थितेरपि. परन्तु कादाचित्कमिदं ज्ञानम्, अन्यथा गानरसएव न स्यात्. तथा च दिवा निकटएव अप्रकटः सन् सुखयति प्रकारान्तरेण. दिनान्ते तु प्रकटः सन् दूरादेव चन्द्र

**लेखः**

**विशेषमि**ति, स्वार्थं भगवदागमननिश्चयः स्वविषयकरजोगुणोद्दीपनेनोक्तः, शिरोभेदकथनेन ततोऽपि विशेषो निश्चये उक्त इत्यर्थः. **वर्णान्तरे**ति, गण्डस्य श्यामो वर्णः कनकस्य पीत इत्यर्थः. **उत्कृष्टेनापी**ति, भक्तिरूपगण्डे कनकश्रीयोजनादिति भावः. कनकस्य सर्वाभिलषितत्वात् कामरूपत्वम्. **शिरोभेदानि**ति, गण्डयोः कुण्डलश्रीयोजनं शिरश्चालनेनैव भवतीति भावः ॥२४॥

**यदुपति**रित्यत्र, **तदपेक्षये**ति, द्विरदराजेनायं धर्म इत्यर्थः. **विशेषेण सुखद** इति, तापं निवर्त्य सुखदातेत्यर्थः. **दिनान्ते** इत्यस्य **साम्प्रतमि**त्यनेनान्वयः.

अग्रे तु यामिनीपतिरिव. इममर्थं ज्ञापयतीति लक्ष्यते, यतो **मुदितवक्त्रः** प्रसन्नवदनो भूत्वा **उपयाति** समीपमागच्छति. अयं भावस्तासामेव हितकारीति पूर्वं साधारण्यमुक्तम्, उपसंहारे पुनराह **मोचयन् व्रजगवामिति. व्रजस्य गवां** च सम्पूर्णे **दिवसे** यावां**स्तापः** तं सर्वमेव **मोचयती**ति ॥२४-२५॥

## टिप्पणी

इव तापनाशकः. **यामिनीपति**पदाद्यथाग्रे यामिनीं पूर्णां साक्षाद् भुङ्क्ते सः तथा प्रियोऽप्यस्मान् भोक्ष्यतीति ज्ञाप्यते. **मोचयन् व्रजगवामि**त्यत्र, **गवां चे**ति सद्यःप्रसूतानामिति शेषः. यद्वा यथा रात्रिजं विरहजं तापं दिवा स्वरूपनादादिभिर्गवां मोचयति, तथा व्रजस्थिताः सर्वे तदेकनाथत्वेन तदेकपोष्यत्वेन तदधीनप्राणादिधर्मत्वेन, यथा तद्देहप्राणादिरक्षार्थं दिवा ता वने नीयन्ते, तथा तदर्थं निशीति च गाव इवेति **गो**पदेन स्वामिन्यएव उच्यन्ते ॥२५॥

पितृपादाब्जकृपया निरोधविवृतिर्मया।
स्फुटीकृता यथाशक्ति भक्तानां तुष्टये हरेः ॥१॥
अनेनैव प्रकारेण निरोधविवृतौ बुधैः।
छेत्तव्यः संशय इति तं प्रदर्श्योपरम्यते ॥२॥
न हि व्रजवधूपदाम्बुजपरागरागं विना।
मनागपि विचारणे भवति शक्तिरस्यास्त(तः!) ॥
मया चिरविचारहृद्व्रततदीयतात्पर्यमा-
श्रितेन लिखितं सदा गिरिवरेशपादाम्बुजम् ॥३॥
संशयपङ्ककलंकितहृदया गोविन्दविहृतिविवृतौ।
ये ते श्रीविठ्ठलवाणीपाथोभिर्निर्मलाः सन्तु ॥४॥

*॥ इति श्रीगोपीजनवल्लभचरणैकतान-श्रीविठ्ठलेश्वरदीक्षितविरचितो दशमस्कन्धप्रकरणद्वयविवृतिप्रकाशः समाप्तः ॥*

## लेखः

तथाच मूले **यामिनीपतिरिवे**त्यस्य पूर्वापरयोरन्वयः, **एष** इत्यस्यावृत्तिः— दिने एषः अप्रकटः सन् सुखदातेत्यर्थो, दिनान्ते यामिनीपतिरिव एषो दूरादेव तापनाशक इत्यर्थः. अग्रे तु यामिनीपतिसदृशः सन् द्विरदराजवद्विहारो यस्य तादृश इत्यर्थः. पूर्वयुगले चन्द्रदृष्टान्तस्योक्तत्वात् पुनरुक्तिमाशङ्क्याहुः



एवं निरोधं निरूप्य स्त्रीणामुपसंहरन् प्रकरणस्थानामेव तद्द्वारोपसंहरति **एवमि**ति.

**॥ श्रीशुक उवाच ॥**

**एवं व्रजस्त्रियो राजन् कृष्णलीलानुगायतीः ।**
**रेमिरेऽहःसु तच्चित्तास्तन्मनस्का महोदयाः ॥२६॥**

*॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे द्वात्रिंशोऽध्यायः ॥*

**राजन्नि**ति सम्बोधनं विश्वासार्थम्. **व्रज**गता अपि **स्त्रियः एवं** प्रकारेण **अहस्सु** भगवत्सम्बन्धरहितदशायामपि **कृष्णलीला**एव आनुपूर्व्येण बहुकालानुवृत्त्यर्थ**मनुगायतीः** अनुक्रमेण गायतीः **रेमिरे.** स्वत आनन्दरूपा कीर्तिस्ताः प्रति जातेति तासां क्रियाशक्तिर्ज्ञानशक्तिश्च भगवन्निष्ठैव जातेत्याह **तन्मनस्काः तच्चित्ता** इति. चित्तं ज्ञानप्रधानं, मनः कर्मप्रधानमिति. एवं सर्वप्रकारेण प्रपञ्चविस्मृतिर्भगवदासक्तिश्च निरूपिता. नन्वेवं कथं तासां निरोधः फलित इति? तत्रोपपत्तिमाह **महोदया** इति, महानेवाभ्युदयो भाग्यराशिर्यासामिति सर्वं सुस्थम् ॥२६॥

*इति श्रीभागवतसुबोधिन्यां*
*श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां*
*दशमस्कन्धविवरणे द्वात्रिंशाध्यायविवरणम्.*

## लेखः

**अयं भाव** इति. श्रमरुक्सहितः साधारण्येन सर्वेषां तापनाशक उक्तः, मुदितवक्त्रो विशेषत एतासामेवेति विभेदः ॥२५॥

**प्रकरणस्थानामि**ति, एतासां मुख्यत्वादेतन्निरोधोपसंहारे सर्वेषामेव तामसानां निरोध उपसंहृतो जात इति भावः.

**एवमित्यत्र स्वत आनन्दरूपे**ति, न तु फलदानद्वारेत्यर्थः ॥२६॥

॥ द्वात्रिंशाध्यायव्याख्या समाप्ता ॥

॥ श्रीकृष्णार्पणमस्तु ॥

**॥ इति द्वात्रिंशोऽध्यायः ॥**

***॥ इति दशमपूर्वार्धतामसफलप्रकरणम् ॥***

# ।। प्रथमं परिशिष्टम् ।।

# *।। स्वतन्त्रलेखाः ।।*

## ।। श्रीमत्प्रभुचरणानां कारिका–स्वतन्त्रलेखौ ।।

।। भगवानपि ता रात्रीः''( भाग.१०।२६।१ ) इत्यत्र स्वतन्त्रकारिकाः ।।

**प्रसीदन्तु सदा रासलीलारसपयोधिषु ।।**
**निष्कलङ्ककलानाथीभवद्वाचोऽस्मदीश्वराः ।।१।।**

### श्रीगोपेश्वराणां कारिकाविवरणम्

अथ श्रीमत्प्रभुचरणाः फलप्रकरणीयं स्वहार्दम् अर्थविशेषम् उत्कटभगवद्भाववशात् प्रकटयितुकामाः श्रीमदाचार्यचरणातिशयित-वात्सल्यविलासायितस्य तदीयस्यैव रहस्यतमस्य एतदर्थस्य स्फुटीकरणं कदाचित् तदनभिमतं चेद् अनुचितम् इदमिति भावस्वभावादेव सम्भावयन्तः तेषां प्रसादं पूर्वं प्रार्थयन्तः प्रकरणाध्यायार्थं कियतीभिः कारिकाभिः विशदयन्ति **प्रसीदन्तु** इति, **अस्मदीश्वराः** अस्मत्प्रभवः श्रीमदाचार्यचरणाः **प्रसीदन्तु** प्रसन्नाः भवन्तु. तेनैव अस्माकं निष्प्रत्यूहम् अखिलाभीष्टसिद्धिः इति भावः. 'अस्मदीश्वर'त्वेन उक्त्या यैः अस्माकम् ऐश्वर्यं स्वतः कृपया साधनराहित्येऽपि स्वीकृतं, विविधफल-सम्पादनेन अस्मासु प्रकटीकृतं वा, ते स्वतएव निरस्तसमस्तप्रतिबन्धम् अस्मदभिमतं साधयिष्यन्ति इति सूच्यते. कीदृशाः पुनः अस्मदीश्वराः? **सदा** निरन्तरं **रासलीला**सम्बन्धी यो **रसो** भगवत्स्वरूपात्मकः शुद्धपुष्टिमार्गीयभक्तेषु प्रकटितः सर्वेन्द्रियास्वाद्यो मोक्षाधिक-भजनानन्दात्मा, तस्य आधारभूताः **पयोधयः** समुद्राः फलप्रकरणीयाः पञ्च सप्त वा अध्यायाः तेषु **निष्कलङ्को** यः **कलानाथः** पूर्णचन्द्रः तद्रूपाः भवन्ति वाग्विवृतिरूपाः येषां तादृशाः. तथाच यथा पूर्णः पीयूषभानुः

पयोधिषु प्रतिक्षणम् अधिकाधिक-विलक्षण-वीचि-निचयम् उदञ्चयति तथा श्रीमदाचार्यवर्यवागपि विवृतिरूपा एतेषु अध्यायेषु निरवधि-विविध-भाव-निवहम् इति भावः सूचितः. एतेन श्रीमदाचार्यचरणानाम् अत्यलौकिकः शुद्धपुष्टिमार्गीयान्तरङ्गतम-लीलासम्बन्धि-बहुविधानन्तभावानुक्षणाविर्भावकत्वरूपः परमोत्कर्षः सूचितः. किञ्च श्रीमदाचार्यचरणवाचो रासलीलापयोधिषु 'निष्कलङ्ककलानाथी-भवन'त्वोक्त्या लोके यथा समुद्रोल्लासादिकार्यं चन्द्रेतरेण कदापि न सम्पद्यते; तथा एतत्समुद्रभावोल्लासादिकमपि श्रीमदाचार्य-चरण-प्रकटितैतद्-विवरण-रूपवाग्-व्यतिरिक्तेन कदापि न भवति इति ध्वन्यते. यद्वा रासलीलाएव, अगाधत्वाद् रसात्मकत्वाद्, **रसपयोधयः** तेषु तादृशाः अस्मदीश्वराः **प्रसीदन्तु** इति अर्थः. एतेन स्वप्रकाशनीयानां भावानां श्रीमदाचार्य-विरचित-विवरण-विचारणोचितोदञ्चित-चारुतरानिर्वचनीयानुभवैक-गोचर-फल-प्रकरणीय-भाव-निकराणां निर्विचिकित्ससिद्धिः तत्प्रसादमात्रपरतन्त्रेति तत्प्रेप्सुभिः कृतसुकृत-निकायैः श्रीमदाचार्यप्रकटित-शुद्धपुष्टिसम्प्रदायैकप्रविष्टैः तदर्थमेव सर्वत्यागेन प्रयतनीयम् इति उपदेशोऽपि स्वान्तरङ्गसेवकेषु ज्ञापितः॥१॥

**ब्रह्मानन्दात् समुद्धृत्य भजनानन्दयोजने॥**
**लीला या युज्यते सम्यक् सा तुर्ये विनिरूप्यते॥२॥**

प्रकरणार्थम् आहुः **ब्रह्मानन्दाद्** इति, भजनानन्द-तारतम्य-ज्ञापनेन रसविशेषास्वाद-ज्ञापनाय व्रजस्थभक्तानां पूर्वम् अनुभावितो यो **ब्रह्मानन्दः** तस्माद् अत्यधिक-भजनानन्द-दित्सया **सम्यग् उद्धृत्य** स्वस्वरूपात्मकं **भजनानन्दं** तत्र योजयितुं **या लीला** रासादिरूपा **युज्यते** युक्ता भवति, एतद्व्यतिरेकेण ब्रह्मानन्दवत् तद्दाने ततः उद्धृतेः व्यर्थता स्यात्, स्वानन्ददानार्थमेव तत्करणात्. रासलीलातिरिक्तप्रकारेणच एतद्दाने एतत्स्वरूपलाभस्यैव असम्भवेन एतद् दत्तमेव न भवेद्, अतः एतद्दानानुरूपैव **सा** लीला तामसप्रकरणस्य **तुर्ये** अन्तिमे फलप्रकरणे **विशेषेण निरूप्यते** इति अर्थः॥२॥

**सर्वसामर्थ्यवत्त्वेन यदीमं पूर्ववद् हरिः॥**
**दद्यात् तदोद्धृतिर् व्यर्था भवेद् एतददानतः॥३॥**
**यस्माद् एतादृगेवास्य रूपं नह्यन्यथाकृतिः॥**



**देयस्य सम्भवत्येवम् अपेयात् तत्र देयता॥४॥**
**अतोऽयमेव युक्तोऽत्र प्रकारो नापरो मतः॥**
**स्त्रियएवहि तं पातुं शक्ता यस्मात् पुमान् हरिः॥५॥**
**अतोहि भजनानन्दः स्त्रिषु सम्यग् विधार्यते॥**
**अहर्निशं चातएव रेमेऽन्तर्बाह्यभेदतः॥६॥**

**सर्व...** इत्यारभ्य **मतः** इत्यन्तस्य अर्थः उक्तप्रायइति न उच्यते. ननु व्रजस्त्रीष्वेव भजनानन्ददानं प्रभोः किं निदानम् इत्यतः आहुः **स्त्रियएवहि** इति, **यस्माद् हरिः** सर्वदुःखहर्ता **पुमान्** पुरुषरूपः चिकीर्षितलीला-योग्यस्त्री-भोग्यत्वेन मूर्तौ रसात्मकएव गोकुलवृन्दावनादिषु प्रकटइति तत्रत्याः **स्त्रियः** सीमन्तिन्यएव पूर्वं **तं** तथाविधं रसात्मकं **पातुं** सर्वेन्द्रियैः आस्वादयितुं **शक्ताः** समर्थाः रसशास्त्रोक्त-वयोगुणविशेषादि-सम्पन्नाः, **अतः** तास्वेव **भजनानन्दः सम्यक्** सर्वप्रकारो **विधार्यते** इति अर्थः. **अहर्निशम्** इति, यतो रसात्मकस्य भगवतः स्वरूपानुभवे विविध-रसभाव-पोषकत्वादिना घोषभूषणभक्ताएव अनुरूपाः न अन्यइति तत्रैव रात्रिदिवं रमणं कृतवान् बाह्याभ्यन्तरभेदेन, नतु मनागपि व्यवधानेन तथा इति अर्थः॥३-६॥

**रसिकानुभवाद् वेद्यम् आन्तरन्तु महाफलम्॥**
**अतः शब्दात्मिका लीला सर्वोत्कृष्टा निरूप्यते॥७॥**

तत्रापि बाह्यरमणापेक्षया **आन्तरं** रमणं प्रियविप्रयोग-सामयिकाननुभूतचरानिर्वचनीयानेक-भावनिचयात्मक-गुणगानरूपं **महाफलम्**. तस्य तथात्वं **रसिकानां** भगवत्स्वरूपात्मक-रसानुभव-विशेषाभिनिवेश-भाजां भक्तानाम् **अनुभवाद् वेद्यं** ज्ञेयं, नतु तदतिरिक्तमपि तत्र किञ्चिद् मानं वक्तुं शक्यम् इति अर्थः. तद् एतद् नामात्मक-भगवत्स्वरूप-भावात्मकरमणं दोषरहितं सप्तमाध्यायार्थः इत्यतः आहुः **अतः** इति॥७॥

**आदौ रूपेण रमणं पञ्चभिः प्रोच्यते बहिः॥**
**आत्मना प्रथमा लीला मनसा च ततः परा॥८॥**
**वाक्प्राणैस्तु तृतीया स्याद् इन्द्रियैस्तु ततः परा॥**

**शारीरी पञ्चमी वाच्या ततो रूपं प्रतिष्ठितम्॥९॥**

प्रथमं बाह्यरमणं रूपेण पञ्चात्मकेन कृतमिति पञ्चभिः अध्यायैः तद् उच्यते इति आहुः **आदौ** इति. पञ्चात्मकरूप-तत्तदंश-कृता लीला क्रमेण प्रत्येकसमुदायाभ्यां पञ्चभिः अध्यायैः निरूप्यते इति आहुः **आत्मना** इत्यादिना. एतदर्थस्तु निरोधविवृतिप्रकाशे श्रीमदस्मत्प्रभुचरणैः उक्तएवेति न इह निरूप्यते॥८-९॥

**यथेन्द्रियादिरूपत्वं शुद्धस्य ब्रह्मणस्तथा॥**
**आत्मादित्वमपि ज्ञेयं भक्तानुभवतस्तथा॥१०॥**

ननु शुद्धब्रह्मरूपस्य भगवतः केवलानन्दत्वेन तत्र पृथगात्माद्यभावाद् **आत्मना** इत्यादिना उक्ता विचित्रा लीला कथं तत्र अवधारणीया ? इति चेत्, तत्र आहुः **यथा** इति. यथा "स यथा सैन्धवघनः", "आनन्दाद्ध्येव", "नित्यं विज्ञानमानन्दं ब्रह्म", "आनन्दमयोऽभ्यासाद्", "आह च तन्मात्रं", "केवलानुभवानन्दस्वरूप" इत्यादि-श्रुति-न्याय-पुराण-वाक्येभ्यो धर्मिग्राहकमानेभ्यः **शुद्धम्** आनन्दरूपमपि ब्रह्म "चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं मनसो मनः", "मनोमयः प्राणशरीरः", "यः सर्वज्ञः सर्वशक्तिः", "परास्य शक्तिर्विविधैव", "सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्" इत्यादि-श्रुति- स्मृति-वाक्येभ्यः चक्षुरादीरूपमपीति तथात्वं ज्ञायते. **भक्तानां** तत्सम्बन्धि-विविध-भावानुभावाच्च तथा. "यस्य सर्वाणि भूतानि शरीरं, यस्य प्राणः शरीरं, यस्य वाक् शरीरं, यस्य चक्षुः शरीरं, यस्य श्रोत्रं शरीरं, यस्य मनः शरीरं, यस्य त्वक् शरीरम्" इत्याद्यनन्तरं "यस्यात्मा शरीरम्" इति वाजसनेयिशाखीयान्तर्यामिब्राह्मणश्रुतेः लीलामध्यपातिभक्त-तादृशानुभवात् च आत्मादिरूपमपि अस्तीति तथात्वं ज्ञेयम् इति अर्थः. तथाच "तस्मादेकाकी न रमते, स द्वितीयमैच्छद्", "एष ह्येवानन्दयाति", "फलमत उपपत्तेः", "व्रजस्योवाह वै हर्षम्", "आत्मारामोऽप्यरीरमद्" इत्यादिवाक्यार्थ-पर्यालोचनया रमणेच्छाप्रयुक्त-तदनुरूपस्वरूपाभिन्नात्मेन्द्रियादि-भावात्मकत्वं शुद्धब्रह्मण्येव निर्बाधमिति न पूर्वोक्तानेक-विचित्र-लीलावधारणानुपपत्तिः॥१०॥



**स्वानन्ददानं षड्विंशे उच्यते साधनान्वितम्॥**
**वस्तुतस्तु [१]तदप्येतद्रूपमित्येव वक्ष्यते॥११॥**

प्रथमाध्यायार्थम् आहुः **स्वानन्ददानम्** इति, **स्वानन्ददानं** स्वरूपानन्ददानं **साधनान्वितं** सर्वात्मभावसहितं **षड्विंशे** अध्याये **उच्यते** इति अर्थः. **वस्तुतस्तु** तदपि सर्वात्मभावरूपं साधनमपि भजनानन्दानुभवात्मक-फलरूपमेव एतन्मध्यपातित्वाद् इत्येव अग्रे **वक्ष्यते** इति अर्थः॥११॥

**नादेनहि रसोत्पत्तिर् उच्यते तत्र वीक्षणम्॥**
**रात्रीन्द्वोर्हेतुरित्युक्तं तेन श्लोकद्वयं तथा॥१२॥**

ननु सर्वात्मभावनिरूपणस्य "दृष्ट्वा कुमुद्वन्तम्" इति श्लोकोक्त-वेणुकलगानानन्तरमेव सम्भवाद् इतः पूर्वं श्लोकद्वयं किमर्थम् उक्तम्? इत्यतः आहुः **नादेन** इति, **नादेन** भगवत्कृतेन वेणुनादेन **रसोत्पत्तिः** स्वामिनीनाम् उत्कटकामरसोदयः. तेन सर्वात्मभावाभिव्यक्तिः अभूत् परन्तु **तत्र** नादएव हेत्वन्वेषणे स्वामिनीसम्बन्धिनीनां **रात्रीणां** नक्षत्रेशस्य च **वीक्षणमेव** **हेतुरिति** तन्निरूपक**श्लोकद्वयं** पूर्वम् उक्तम् इति अर्थः॥१२॥

**नायकोद्भटभावेन्दू नायिकारसपोषकौ॥**
**इतोऽपि तौ तथाग्रे तु[२] स्पष्टमन्यत् कथावधिः॥१३॥**

पूर्वश्लोकद्वयोक्तौ हेत्वन्तरमपि आहुः **नायक...** इति. अत्र स्वरूपात्मको रसः स्वामिनीभ्यः प्रभुणा देयइति तद्रसपोषकसम्पादनं स्वस्य आवश्यकम्. यावद् **नायकस्य उद्भटभावः** इन्दूदयो वा न भवति तावद् **नायिकानां** न तथा **रसपोष**इति **इतोऽपि** हेतोः **तौ** श्लोकौ पूर्वम् उक्तौ इति अर्थः. एतच्छ्लोकद्वयस्य **अग्रेतु अन्यत्कथावधिः** अन्तर्गृहगतकथापर्यन्तं सर्वात्मभावबोधकं **स्पष्टम्** असन्दिग्धं सर्वम् इति न तत्र किञ्चिद् वक्तव्यम् इति अर्थः॥१३॥

१. साधनमपि इति अर्थः. २. रसोत्पादनं पोषणं च "संस्थापनाय धर्मस्य" इत्येदवधिः स्फुटम् इति अर्थः.

**तथा-तथा रसोत्कर्षः स्नेहोत्कर्षो यथा-यथा ॥**
**तस्य व्यङ्ग्यत्वतोऽत्रैतद्व्यञ्जिका सा[1] कथा मता ॥१४॥**

ननु सर्वात्मभाववत्सु दित्सितत्वात् स्वरूपानन्दस्य तदर्थमेव अग्रिमलीलाकरणाद् अन्तर्गृहगतानां सर्वात्मभावाभावेन तत्कथा किमर्थम् इह उक्ता इत्यत आहुः **तथा-तथा** इति, **यथा-यथा** येन-येन प्रकारेण भक्तानां **स्नेहोत्कर्षो** भावोद्रेको अभिव्यक्तो भवति **तथा-तथा** तेन-तेन प्रकारेण भगवतो भक्तानां **रसोत्कर्षो** रसस्य आस्वाद्यस्य उत्कर्षः उत्तरोत्तरभावाधिक्यं भवति. स्नेहोत्कर्षाभिव्यक्तिः च **तस्य** व्यङ्ग्यत्वाद् व्यञ्जकसापेक्षा इत्यत्र एतस्य स्नेहोत्कर्षस्य **व्यञ्जिका सा कथा** अन्तर्गृहकथा **मता** निश्चिता इति अर्थः ॥१४॥

**कामोपाधिभवः स्नेहः सहजाद् न्यूनएव हि ॥**
**तद्वतीषु तथानन्दप्रदानं यत्र तत्र किम् ॥१५॥**
**वाच्यं सहजतद्भाववतीष्वित्येतया[2] वदत् ॥**

कथम् अस्याः तद्व्यञ्जकता इत्यतः आहुः **कामोपाधिभवः** इति, अन्तर्गृहगतानां **स्नेहो** "जारबुद्ध्यापि सङ्गता" इत्युक्तत्वात् **कामोपाधिभवः** तत्प्रयुक्तइति लोकप्रसिद्धात् तादृशाद् अत्यधिकोऽपि **सहजाद्** अनुपाधिकात् सर्वात्मभावात् **न्यूनः** स्वल्प **एव हि** यतो अतः **तद्वतीषु** कामोपाधिक-सर्वाधिक-स्नेहवतीषु **तथा आनन्दप्रदानं** प्रतिबन्धनिराकरणपूर्वकम् अन्तःप्रवेश-नाश्लेषादिना स्वानन्दप्रदानं प्रभोरिति उभयत्र[3] **तत्र** निरुपधिसर्वात्मभाववतीषु तदधिक-सर्वेन्द्रियभोग्य-भजनानन्ददानं **किं वाच्यम्** इति कैमुतिकन्यायेन स्नेहोत्कर्षः स्वामिनीनाम् **एतया** कथया व्यज्यते इति **अवदद्** इति अर्थः ॥१५ १।२॥

**एतदागतिमात्रेण यद्यङ्गीकारम् आचरेत् ॥१६॥**
**रसस्तदा न पुष्टः स्याद् अतस्तानि वचांसि हि ॥**

१. "व्यत्यस्तवस्त्राभरणा..."इत्यन्ता इति अर्थः. २. अन्तर्गृहगतकथया इति अर्थः.
३. प्रभोरत्युभयत्र इति पाठः.



**उभयोर्वचसाम् अत्र स्पष्टाहि रसरूपता ॥१७॥**

ननु सर्वात्मभावपूर्वकत्वाद् अग्रिमरमणस्य स्वामिनीषु च तस्य सत्त्वाद् एतासां समागमनाव्यवहित-नैरन्तर्येण रमणं कथं न कृतवान्? स्वकर्तृकनिषेध-वाक्य-प्रियाकर्तृकप्रतिवाक्य-प्रयुक्तविलम्बेन यत् तद् अङ्गीकृतवान् तत् कुतः इत्यतः तत्तात्पर्यम् आहुः **एतदागतिमात्रेण** इति. **यदि** भगवान् **एतासाम् आगतिमात्रेण** आगमनेनैव **अङ्गीकारम्** अग्रिमरमणरूपम् **आचरेत्** कुर्यात् **तदा** भगवतः तत्प्रेयसीनां च **रसः पुष्टो** यादृशो रसशास्त्रे निरूपितः तादृशो **न स्याद्** आभासतां प्राप्नुयाद् **अतो** हेतोः **तानि वचांसि** प्रभोः स्वामिनीनां च "स्वागतम्" इत्यादीनि "मैवम् " इत्यादीनि च. **हि** युक्तो अयम् अर्थः, प्रिययोः परस्परं तथाविधवचनादिभिरेव विविधरसभावोदयस्य रसिकसिद्धान्तसिद्धत्वात्. किञ्च **उभयोः** प्रिययोः **वचसां रसरूपता अत्र** रमणे रसमध्यपातितया तदात्मकता निरोधविवृतौ **स्पष्टा** — भगवद्वाक्यानाम् आपाततो निषेधप्रत्यायकत्वेऽपि फलतः स्थितिनिरूपकतया स्वामिनीवाक्यानां च सम्यक् तत्पूर्वपक्षीकरणपूर्वक-स्वसिद्धान्तबोधकतया ॥१७॥

**मानापनोदरूपत्वात् प्रियस्यापि प्रियावचः ॥**
**श्रोतुमिच्छा ततस् तादृग् वाक्यं पूर्वं हरिर् जगौ ॥१८॥**

ननु प्रभो रसात्मकस्य सर्वदुःखहर्तुः तादृशभक्तेषु रसविरोधि तत्-क्षोभकवाक्यकथनम् अयुक्तम्! इति आशङ्क्य रसविशेषोद्गमार्थमेव स्वेप्सितपूरक-तद्वाक्यकथनमिति न रसविरोध-क्षोभाद्यनौचित्यावसरः इति आहुः **मानापनोदरूपत्वाद्** इति. **प्रियस्य** सर्वरसास्वादकस्य "मैवं विभो" इत्यादिरूप-विविध-भावानुभावकं स्वामिनी-तन्मान-विशेषापनोदकं **प्रियावचः श्रोतुम् इच्छा ततो** हेतोः तत्पूर्त्यर्थं तत्क्षोभक-वाक्यव्यतिरेकेण तद् न सिद्ध्यतीति **तादृग् वाक्यं पूर्वं हरिर् जगौ** इति अर्थः ॥१८॥

**तदा रसाब्धिरुद्वेलः प्रतिवाक्यैः प्रियेऽभवत् ॥**
**अग्रे स्पष्टं[1] तदग्रेतु रसाधिक्यवशात् तथा[2] ॥१९॥**

१. रसाधिक्यम् इति शेषः. २. मानादिः इति अर्थः.

**रसाधिक्येन पुंभावो भवतीति यतो मतम्॥**

तेन यद् आसीत् तद् आहुः **तदा** इति, यदा प्रभुः तादृशवाक्यानि उक्तवान् **तदा प्रिये** स्थितएव **रसाब्धिः** रससमुद्रः स्वामिनीविरचितः **प्रतिवाक्यैः** तदुत्तरेन्दुकरनिकरैरिव **उद्वेलो** अतिक्रान्तमर्यादो **अभवत्**. तेन रमणम् आचरत् तद् आहुः **अग्रे स्पष्टम्** इति. ननु रमणानन्तरम् अग्रे स्वामिनीनां मदमानादि यद् अगादि, तत् सर्वात्मभावे सति कथं सम्भवति इत्यत आहुः तदग्रेतु इति. प्रियेण आत्मप्राधान्येन लीलया अत्यन्तरसपूरणात् तदाधिक्यवशादेव **तथा** मदमानादिकम् अभूत्, **तत्** सर्वात्मभाववतएव **रसाधिक्येन** पुम्भावे प्रोद्भूते **भवति** इति आहुः **रसाधिक्येन** इति. स्पष्टार्थम् एतत्॥१९ १।२॥

**यावन्तः प्रियभावास् ते सर्वेऽप्यत्र समागताः॥२०॥**
**इत्यपि ज्ञाप्यते भावः सोऽन्यथा न भवेत् तदा (था?)॥**
**मानापनोदनं स्वस्य यथा युक्तं तथा कृतम्॥२१॥**

**यावन्तः** इति, यतो "रसाधिक्येन पुम्भावः" इति मतम् अतः प्रियेण एतासु तत्सम्पादनात् तस्य च प्रियस्वरूपात्मकत्वाद् अन्तःपूरणात् तत्र पुंभावे प्रकटे सति **यावन्तः प्रियभावाः ते सर्वेऽपि अत्र** स्वामिनीषु **समागताः** इत्यपि भावो ज्ञाप्यते. तेन मानो अभवद्, **अन्यथा** रसाधिक्यप्रयुक्तपुम्भावात् **तथा** प्रियरूपत्वाभावे **स** मानो **न भवेद्** इति अर्थः. ननु मानापनोदस्य प्रकारान्तरेणापि सम्भवात् तिरोधानेन तत् कुतः कृतवान् इति अतः आहुः **मानापनोदनम्** इति. प्रभोः आत्मप्राधान्येन लीलया रसाधिक्यतो मानोदय इति तदपनोदनमपि तत्प्राधान्येनैव कर्तुं युक्तमिति तस्य अन्तरेव सत्त्वात् तत्रैव प्रविश्य तेन प्रकारेण तत् कृतवानिति **स्वस्य** आत्मनः **यथा युक्तं तथा कृतम्** इति अर्थः॥२१॥

**उपक्रमोपसंहारौ तत्त्वनिर्णायकौ मतौ॥**
**"रेमे स्वयं" "सिषेवे" च "विक्रीडितम्" इति स्फुटम्॥**
**अत्र "रन्तुं मनश्चक्र" इत्युपक्रमतः स्फुटम्॥२२॥**
**उपसंहारतश्चैतन्मध्यपाति यदेव तत्॥२३॥**



**तद्रूपम् इति मन्तव्यं पण्डितैर् ज्ञानकाण्डवत्॥**

ननु अत्र प्रकरणे भजनानन्ददानानुरूपलीलैव निरूपयितुम् उचिता, तस्याएव तदर्थत्वस्य व्यवस्थापितत्वात्. तथाच मध्ये सर्वात्मभावादिनिरूपणस्य अर्थान्तरत्वप्रसञ्जकत्वं भवेद्. अतः तत्परिहारं वदन्तः प्रकरणार्थनिर्णयम् आहुः **उपक्रमोपसंहारौ** इति, उपक्रमोपसंहाराभ्यां यो अर्थः प्रतिपाद्यते सएव तत्त्वरूपइति सर्वत्र तनू**निर्णायकौ** तौ तान्त्रिकाणां **मतौ**. तेन मध्ये अर्थान्तरकथनेऽपि तदुभयानुरोधेन तत्त्वनिर्णयात् तदुपयुक्तार्थनिरूपणे अर्थान्तरत्वप्रसङ्गो न भवति **इत्यत्र** फलप्रकरणे "रन्तुं मनश्चक्रे" इति स्फुटं रमणस्य उपक्रमात्, "रेमे स्वयं स्वरतिः" इति "सिषेव आत्मन्यवरुद्धसौरत" इति "विक्रीडितम्" इति च स्फुटम्. तत्तद्-भेदविशिष्टस्य **रमणस्यैव उपसंहारतः च** तस्यैव प्रकरणार्थनिर्णयेन एतदुपयोगित्वेन **एतद्**रमण**मध्यपाति यदेव** सर्वात्मभावादि निरूपितं **तत् तद्रूपं** तत्तल्लीलारूपं **पण्डितैः** काण्डद्वयार्थनिर्णयनिपुणैः **ज्ञानकाण्डवत्** ज्ञानकाण्डे यथा ज्ञानोपयोगि-चित्तशुद्ध्यर्थम् आम्नातं नानाविधोपासनादि ज्ञानरूपमेव मन्वते; अतएव उपासनाकाण्डं न ज्ञानकाण्डात् पृथग् वदन्ति वेदान्तनयकोविदाः, तथा इदमपि मन्तव्यम् इति अर्थः. तेन सर्वात्मभावादिनिरूपणस्य न अर्थान्तरप्रसञ्जकत्वमिति सर्वम् अतिरमणीयम्॥२२-२३॥

श्रीवल्लभात्मजश्रीमद्-विट्ठलेशाङ्घ्रिसेविना॥
गोपेश्वरेण लिखितम् आस्तामेतन्मुदे सताम्॥

## ॥ तासाम् आविरभूत् शौरिः (भाग.१०।२९।२) इत्यत्र॥

तासाम् आविरभूत् शौरिः स्मयमानमुखाम्बुजः।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः॥
(भाग.१०।२९।२)

अथवा **तासाम् आविः** तत्सम्बन्धिप्राकट्यं, तत्सजातीयस्त्रीवेशः इति यावत्. तथाच तेन वेशेन पूर्वम् अन्तर्हितः तासु स्थितो, अधुनापि तथा प्रकटो अभूद् इति अर्थः. यद्यपि ज्ञापनसमये न तत्प्रयोजनं तथापि इयदवधि भवतीनां मध्ये अहम् अनेन वेशेन स्थितः, परं न लक्षितइति तत्प्रदर्शनेन ज्ञापितम्. अतएव ''कस्याः पदानि चैतानि'' इत्यादिसमुत्प्रेक्षा, अन्यसम्बन्धदोषोऽपि न तदानीम् अस्फुरत्. अन्यथा खण्डितानामिव अधिकखेदेन तथोक्तिः स्यात्, नतु दृशां प्रीत्युत्फुल्लता. अतः तथा आविर्भावः इति लक्ष्यते. श्रीशुकोक्तिरपि तथा ''सहसैव व्रजाङ्गना अतप्यन्'' इति. यदि परस्परं मुखानि दृष्ट्वा विचारयेयुः तदा वैलक्षण्यात् स्वमण्डले तम् आलोक्य तापं न कुर्युः, परं न तथा कृतम् इति 'सहसे'ति पदाद् अवगम्यते. अग्रेच ''पप्रच्छुराकाशवदन्तरं बहिर्भूतेषु सन्तम्'' इति भूतेषु तेषु भक्तेषु तज्जातीयवेशेन अन्तस्तन्मण्डले सन्तं रूपान्तरेण तन्मध्यपातिन्या कयाचित् सह तन्मण्डलाद् बहिःत्यागः सम्भवति, तद्व्यतिरेकेणापि कर्तुं समर्थत्वाद् इति आशङ्क्य आह **शौरिः** इति. अत्र अयम् आशयः–यथा श्रीवसुदेवः स्वापेक्षितं प्रभुप्राकट्यं साधयितुं तदाधारभूतदेवकीसापेक्षतया शूरस्य पुत्रत्वेन तादृशोऽपि भूत्वा स्वधर्मं युद्धं परित्यज्य कंसस्य अग्रे दैन्यं प्रदर्शितवान्, अन्यथा भक्तदुःखाभावेन स्वापेक्षितासिद्धेः, तथा ''रसो वै सः'' इति श्रुतेः ईश्वरोऽपि स्वापेक्षितरसप्राकट्यार्थं तदाधार-रसापेक्षतया स्वधर्मम् ऐश्वर्यं परित्यज्य तदनुरोधम् अङ्गीकृतवान्, अन्यथा ''रसमेव लब्ध्वानन्दी भवति'' इति 'एव'कारेण रसरूपत्वेऽपि सति अन्यतो लाभाभावे रसवत्त्वं न सिध्येत्. अतो यथैव तासु रसः प्रकटो भवति तथाकरणेऽपि न ऐश्वर्यहानिः प्रत्युत रसभोक्तृत्वेन तत्सिद्धिरेवेति न किञ्चिद् अनुपपन्नम्. किञ्च यथा भक्तेषु लीलारसप्रकटनार्थं पूर्वं तद्विलक्षणचतुर्भुजरूपेण वसुदेवाद् आविर्भूतः, तद्दर्शनेन लीलाविरोधिमाहात्म्यज्ञानेन लीलारसासम्भवं मत्वा भक्तसजातीयप्राकृतभावम् अङ्गीकृत्य लीलारसं प्रकटितवान्, तथा अत्रापि पूर्वं नायिकासु लीलारसप्रकटनार्थं



तद्विलक्षणनायकरूपेण आविर्भूतः. तद्दर्शनज-लीलाविरोधि-मदमानात्मक-दोषेण रसासम्भवं मत्वा तत्सजातीय-नायिकाभावम् अङ्गीकृत्य लीलारसं प्रकटितवान् इति ज्ञापनाय **शौरिपदम्**. अथवा स्त्रीवेशेन तदलक्षित-स्थिति-कौशलं यथा सविषयत्वाद् रसशास्त्रविदः क्षत्रियस्य सम्भवति तथा न अन्यस्य इति ज्ञापनाय **शौरिपदम्**. तथाच दुष्टमारणलीलानुकरणं भगवद्भावापन्ननायिकानां सम्भवति, परं रससम्बन्धिलीलानुकरणं नायिकाभावापन्नभगवतएव सम्भवति. तत्रच आत्मानम् अज्ञापयित्वा कश्चिद् अनिर्वचनीयरसानुभवो भवतीति तथा कृतवान् इति भावो, अनिर्वचनीयत्वात् तल्लीलानुकरणं स्पष्टतया तथा न उक्तम्. ननु येन वेशेन पूर्वं तिरोहितः तेनैव वेशेन कथम् आविर्भूत इति आशङ्क्य आह **स्मयमानमुखाम्बुजः** इति. कपटवेशोहि हास्यसङ्कोचेन, यावद् मुखे रौक्ष्यं भवति तावदेव न लक्ष्यते इति भावः. ततः स्मितेन लक्षितः इति भावः. यथा सहस्रपत्रं कमलं प्रतिदलम् उपविष्टषट्पदानां रसपूरकं भवति, तथा अग्रे प्रतियुगलं प्रत्येकं च आविर्भूय तासां रसपूरकं श्रीमुखमपि इति ज्ञापयितुम् अम्बुजत्वोक्तिः. यद्वा **स्मयः** तासां गर्वः, तस्यापि **मानो** अहङ्कारो यस्मात्, तादृशं मुखाम्बुजं यस्य इति. शास्त्रमर्यादया न कदाचिद् अहङ्कारस्य भगवत्प्रापकत्वं जातम्, इदानीन्तु तद्वतीनां तासाम् आविरभूदिति तत्प्रापकत्वात् तस्यापि तदभिमानो अभूदिति स्मयमानत्वम्. सोऽपि भक्तावेव भवितुम् अर्हति तत्रापि रसरीत्या इति ज्ञापयितुं मुखाम्बुजे तदुक्तिः. यद्वा तासां ''स्मयमानौ मुखाम्बुजे यस्य'' इति, यथा सङ्गमदशायां भवतीनां हृदये स्मयमानौ अभूताम् तथा विप्रयोगेऽपि न मम हृदये किन्तु मुखे. तत्रापि तौ भवतीभ्यो निर्गतौ मत्सम्बन्धित्वाद् अन्यत्र गन्तुम् अशक्तौ मम हृदयेच भवदीयदोषरूपत्वात् स्थितिम् अलभमानौ भक्तेः स्वसम्बन्धिदोषसहिष्णुत्वात् मुखे तिष्ठत इति ज्ञापयन्निव तथा इति भावः. यद्वा ''स्मयमानाः मुखे अम्बुजाः श्रमजलकणाः यस्य'' इति, तेषां स्मयमानत्वम् ईषत्स्फुटत्वम्. तासामिव अन्वेषणादिपरिश्रमः स्वस्यापि जातः इति सूचयन्निव तथा इति भावः. अथच ताभिः अन्विष्यते, श्रमश्च प्रियेण अनुभूयते इति विरोधाभासं दर्शयन्तइव ते तथा जाताः. यद्वा ''स्मयमाना मुखे अम्बुजा लक्ष्मीः यस्य'' इति. यद्यपि तस्याः स्थानं वक्षः तथापि तत्र स्थितां मां दृष्ट्वा गोपिकासङ्गमप्रतिबन्धकतया अद्य प्रभुः निराकरिष्यति. मुखे स्थितान्तु दर्पणाभावात् न ज्ञास्यति इति

विचार्य तत्र स्थिता. अहं कियता साधनेन चरणरजोऽपि न प्राप्तवती, एतासाम् अनुरोधेन ईश्वरः कथं-कथं करोति इति सा हसन्ती जाता. परम् ईश्वरो ज्ञास्यति चेत् किं वा करीष्यतीति भयेन तज्ज्ञापनाय हासे मन्दता. अथच तासां विरहेण कार्श्य-वैवर्ण्यादीनाम् अङ्गान्तरेभ्यो निःसरन्ती शोभात्मिका सा. ततोऽपि निर्गमसमये तासां दर्शनेन तत्र स्थिरा जातेति हर्षेण तथा इति भावः. अथच मम वशे न जातः परं मत्सजातीयानान्तु वशे जातएवेति साम्प्रतं हतस्वातन्त्र्यमिति तथा जाता इति भावः. यद्वा "स्मयमानः प्रकटायमानो मुखाम्बुजो मुखचन्द्रो यस्य" इति, यथा प्रावृषि घनेन पीडितः चन्द्रः शरदि घनाभावात् प्रकटो भवति तथा श्रीमुखमपि ताभ्योऽपि अधिकखेदादिव पूर्वं नीलनिचोलेन पीडितम्, आविर्भावसमये तदुद्घाटनात् प्रकटम् अभूद्. अन्यथा श्रीमुखस्य स्फुटीभावे वर्णे वैसादृश्यात् कान्तिविशेषात् च वेशपरिवर्तनमात्रेण तिरोधानासम्भवाद् इति भावः. यद्वा "स्मयमानमुखा अम्बुजा भूमिः यस्माद्" इति, "अद्भ्यः पृथ्वी" इति श्रुतेः. अत्र इदम् आकूतं — गोपिकाकर्तृकरमणदशायामेव भूमेः समग्रतत्प्रियस्वरूपसम्बन्धो भवति अन्यथातु चरणसम्बन्धमात्रम्. अतः तद्विरहे सापि विरहिता पूर्वं स्थिता. ततः प्रादुर्भावे जाते तारिव सापि हसन्ती जाता. यद्यपि भूमेः चरणकमलस्पर्शाद् अज्ञानसम्भवेन विरहाभावात् पूर्वं खेदो असम्भावितः तथापि पूर्णस्वरूपसम्बन्धाभावलक्षणो विरहो अस्तीति तथा उक्तम्. यद्वा "स्मयमानमुखो अम्बुजो यमुनानिलो यस्माद्" इति, विप्रयोगे रतिश्रमाभावेन स्वस्य अनुपयोगित्वाद् अधिकखेदहेतुत्वात् च स पूर्वं खिन्नः तदानीं तथा जातः इति भावः. यद्वा "स्मयमानमुखाः फुल्लकुसुमाः अम्बुजाः सरसवृन्दावनभूमेः जाताः वृक्षलतादयो यस्माद्" इति, पूर्वं स्वतले क्रीडाभावात् मालाकेशपाशाद्यर्थम् अनङ्गीकारात् च खिन्नाः तदानीं तथा जाताः इति भावः. यद्वा "स्मयमानमुखानि विकसितानि अम्बुजानि कुमुदानि कमलानि च यस्माद्" इति, पूर्वं शयानाद्यर्थम् अनङ्गीकाराच्च इदानीं तथा इति भावः. यद्वा "स्मयमान=मुखप्रकाशविशेषवान् अम्बुजः चन्द्रो यस्माद्" इति, सहि भगवतः तत्प्रियाणां च रसोद्दीपनार्थम् आविर्भूतः, तेन तद्विरहे रससम्बन्धि सर्वम् असमञ्जसं वीक्ष्य पूर्वम् अतथाभूतः तदानीं तथा जातः इति भावः. यद्वा "स्मयमानमुखाम्बुजाः भ्रमराः यस्माद्" इति, प्रभोः श्रीमुखमेव अम्बुजं रसात्मकं येषां ते तथा. अर्थात् तद्रसैकपातारः.



तथाच "एतेऽलिनस्तव यशोऽखिललोकतीर्थं गायन्त आदिपुरुषानुपदं भजन्ते" इति प्रभुवाक्याद् निरन्तरं तत्सङ्गताएव ते तिष्ठन्तीति तद्विरहेण पूर्वम् अतथाभूताः तदानीं तथा जाताइति युक्तमेव इति भावः. एवम् उक्तरीत्या भगवद्विरहे यत्र रससम्बन्धिनामपि अन्यादृशत्वं जातं तत्र साक्षाद्रसानुभवकर्त्रीणां श्रीमद्व्रजरत्नप्रेयसीनां यद्-यद् जातं तत्तत् किम् आश्चर्यम् इति तात्पर्यसमुदायेन सूचितम्.

ननु तदनन्तरं तेनैव वेशेन स्थितः स्ववेशेन वा इति आशङ्क्य आह **पीताम्बरधर** इति. स्त्रीवेशसमये त्यक्तस्य पुनर्ग्रहणं धरपदेन उक्तम्. अन्यथा बहुव्रीहिणा तावान् अर्थः सिद्धएवेति धरपदं न वदेत्. यद्वा उक्तवेशसमये पीताम्बरं किं कृतम् इति आशङ्क्य क्वचिद् एकान्ते निकुञ्जे वृक्षक्रोडे वा धृतवान् इति आशयेन आह **पीताम्बरधरः** इति. यद्वा भवतीनां परिरम्भ-सम्भ्रम-समारम्भ-शोभितम् इदं वक्षो अन्या मा द्राक्षीदपीति तद्गोपनायैव तथा. यद्वा पीताम्बरस्य स्वरूपावरकत्वेन मायारूपत्वात् तस्यच बहिर्धारणोक्त्या अन्तःकापट्याभावो ध्वनितः, प्रश्नोत्तरपर्यन्तं तासाम् अन्तस् तद् अस्ति इति च. अन्यथा अग्रे "भजतोऽनुभजन्त्येके" इत्यादिप्रश्नं न कुर्युः. स्वस्यच तदभावं प्रश्नोत्तरे स्वयमेव वक्ष्यति "न पारयेऽहम्" इति वाक्येन. अन्यथा भवतीभिः अभिमानः कृतो, मयापि कृतः इति स्फुटमेव वदेत्, "ये यथा मां प्रपद्यन्ते" इति ईश्वरस्वभावात्, नतु स्वस्य ऋणित्वम् अङ्गीकुर्याद्, अनियम्यत्वात्. तथा सति भगवतः तासु निरुपधि प्रेम, तस्यच एकरसत्वं नतु ईश्वरत्वात् कापट्यसम्भावनापि इति ज्ञापितम्. वस्तुतस्तु तासामपि न अन्तस् तत्सम्भावना, अग्रिम-रसोपयोगि-मानांशस्य स्थापितत्वात् प्रश्नकरणम्. अतएव "ईषत्कुपिता" इति वक्ष्यते. कोपः स्वाभाविको नतु प्रियकारितः. तथा चेत् 'कोपिता' इति वदेत्; परम्, ईश्वरे कापट्यं सम्भवतीति पीताम्बरस्य बहिर् धारणेन तदभावः उक्तः. ननु उक्तवेशग्रहणमपि तदानीमेव इति ज्ञायते, अन्यथा "रेमे तया चात्मरतः" इति पूर्वोक्तम् अन्यया सह रमणम् अनुपपन्नं स्यात्. अथ कथं न कापट्यम् ? इति चेत्, सत्यम्, अग्रे प्रत्येकम् आविर्भावस्य वक्ष्यमाणत्वाद् एकेन रूपेण अस्मत्स्वामिन्या सह रमणं कुर्वन्, इतरेण तथा वेशं कृत्वा तासु स्थितइति रूपद्वयोक्तेः अनुपपन्नत्वाद्, "रेमे

तया च'' इति 'च'कारेण ताभिः सह उक्तवेशेन प्रकारान्तरीयरमणस्य उक्तत्वात् च न त्वदुक्तदूषणम् इति सर्वम् अवदातम्. यद्वा ''पीतं ताभिः ग्रस्तं, तदेकव्याप्तम् इति यावत्, तादृशम् अम्बरं हृदयावच्छिन्नम् आकाशं धरति'' इति तथा, परब्रह्मण एकरसत्वेन धर्मधर्मिणोः अभेदात् स्वरूपमिव हृदयमपि व्यापकम् इति वक्तुम् अम्बरपदोपादानम्. अन्यथा एकविषये लग्नं विषयान्तरे न गच्छतीति मनसो अनेकनायिकाव्याप्यता न स्यात्. तदपि तासां स्वविरहज-क्लेश-दर्शने यथाकथञ्चित् पुनः सञ्जिगमिषया धृतं तिष्ठतीति धरणोक्त्या व्यज्यते. ननु भगवान् अच्युतत्वात् स्त्रीरहितः कदाचिदपि न तिष्ठतीति अनुभवन्तीनां तासां मनसि लक्ष्म्या अस्मन्मध्यपातिन्या वा कयाचित् सह स्थित इति वितर्कः कथं न अभूद् इति आशङ्क्य आह **स्रग्वी** इति, कयाचित् सह स्थितौ तदङ्गसङ्गप्रतिबन्धकतया स्रगेव न तिष्ठति. स्थितापि विलक्षणा भवति. अतो न तथा इति भावः. किञ्च स्रजः कीर्तिरूपत्वेन तद्वत्तया गोपिकारमणसमये तदर्पितया स्रजा तत्सम्बन्धिनी कीर्तिः भवति, नतु अन्यथापि इति ज्ञापितम्. इतो हेतोरपि न तथा. अथच तासां विरहे स्वतापनिवृत्त्यर्थं तदर्पितामेव स्रजं हृदि यो बिभर्ति स कथम् अन्यथाकरोतीति भावः. अपिच यथा स्वयंवरे वरतनुः वरस्य कण्ठे स्रजम् अर्पयति तथा एताअपि प्रेमलक्षणां स्रजम् अर्पयामासुः. अतः तद्वान् कथम् अन्यथाकरोति? सापि न कण्ठमात्रे किन्तु बहिर् अन्तः चेति 'कण्ठ' पदानुक्तिः. तेन यथा एकया वृतो अन्ययापि व्रियते तदा सापत्न्यमिव न अत्र तद् इति सूचितम्. यत्र निकटम् आगतानां विप्रपत्नीनामपि तदशक्यं तत्र अन्यासां का वार्ता! इति भावः. ननु काममोहितः किं-किं न कुर्याद्! इति आशङ्क्य आह **साक्षान्मन्मथमन्मथः** इति, मन्मथोहि सर्वानेव मोहयति विषयद्वारा, नतु साक्षात् स्वयम्, अनङ्गत्वात्. भगवांस्तु प्रकटरसरूपत्वात् साक्षात् स्वयमेव तं मोहयति, कुतस्तराम् अस्य तत्कृतो मोहः इति भावः. किञ्च स्मितपीताम्बरयोः मोहकत्वेन तद्वत्त्वात् यथा-यथा यद्-यत् करोति तथा-तथा तत्-तत् सर्वम् उपपद्यतएव, ईश्वरत्वात्. अतो न अनुपपन्नं किञ्चिद् इति दिक्.

ननु ''भगवान् अलौकिकरीत्या तासां मानापनोदनार्थं बहिः तिरोभूय अन्तरे प्रकटः'' इति व्याख्यातम् आचार्यचरणैः, अतः तद्विरोधइव आभाति! इति चेत्, न, तात्पर्यानवबोधात्. तथाहि बहिः तिरोधानपक्षेऽपि बहिः नास्ति इति न वक्तुं शक्यं, व्यापकत्वात्. तस्माद् ''आकाशवदन्तरं बहिर्भूतेषु सन्तम्'' इति शुकोक्तिरपि. अतः तासाम् अदर्शनमेव तिरोधानम्. तच्च माययैव वेशान्तरेणापि सम्भवतीति न उक्तविप्रतिपत्तिः. अथच फलप्रकरणेहि यथा पूर्वम् अलौकिकीषु रात्रिषु रमणम् अलौकिकरीत्या उक्तं तथा अग्रे लौकिकीषु रात्रिषु रमणं लौकिकरीत्यापि ''एवं शशाङ्कांशुविराजिता निशा'' इत्यत्र निरूपयिष्यते. तस्माद् अलौकिकीनां रात्रीणां तदाधिभौतिकलौकिकीषु रात्रिषु स्थापनात् लीलानित्यत्वात् च युगपद् उभयत्र लीला सम्भवतीति एकदा प्रकारद्वयकथनम् उक्तविरोधं न अनुसरतीति सर्वम् अनवद्यम्.



प्रसीदतु मयि श्रीमत्कृष्णः प्राणप्रियोत्सवः।
येन भाति जगत् सत्यं विना येन न तत् तथा॥

इति श्रीमद्विठ्ठलेश्वरप्रभुकृतः ''तासाम् आविरभूद्'' इति श्लोकोपरि लेखः सम्पूर्णः।

## ॥ श्रीहरिरायाणां स्वतन्त्रलेखाः ॥

### ॥ भगवानपि ता रात्री (सुबो.१०।२६।१) इत्यत्र ॥

किञ्च. सर्वात्मभावएव एतद्रसप्राप्तौ हेतुः इति ज्ञापयितुं सर्वात्मभावो अत्र पूर्वम् उच्यते. तच्च व्याख्याने स्फुटीभविष्यति. एतदभावेतु इतरसाधनवत्त्वेऽपि न एतत्प्राप्तिः इति ज्ञापयितुम् अन्तर्गृहगतकथा. हरिवचनान्यपि एतासु तद्भावप्राकट्यार्थमेव[1]. यत्र स्वरूपसङ्गविरोधि भगवद्वचनमपि न अङ्गीकृतं तत्र अन्यधर्माङ्गीकारे का शङ्का! इत्यपि ज्ञापितम्. अतएव धर्माद् धर्मी बलीयानिति ईश्वरवाक्याकरणेऽपि अदोषो अत्र. इतोऽपि हेतोः भगवदुक्तिः इति ज्ञेयम्. अन्यथा स्वामिन्यतिरिक्तेषु एतद्भावाभावाद् एतद्धृदिस्थस्य च अन्यावेद्यत्वाद् धर्मिमार्गो अप्रकटएव स्यात्. ''कामभावेन आगतासु कामं पूरितवानिति किम् असाधारण्यम् अस्यां लीलायाम्'' इति भ्रमनिवृत्तिरपि अतएव. यतः सर्वात्मभाववत्त्वेनैव भगवता अङ्गीकृताः, न स्त्रीत्वेन. अन्यथा भगवद्रिरंसायाः पूर्वमेव उक्तत्वाद् एतासां च तद्वत्त्वाद् मध्ये मर्यादोक्तिपूर्वक-गमनोक्तिः असम्भाविता स्यात्. तादृशयोः स्त्रीपुंसयोः विलम्बासहिष्णुत्वात् सर्वात्मभावाभावे यज्ञपत्नीवद् गमनमेव च स्यात्, सर्वत्यागपूर्वकागमनस्य अविशिष्टत्वात्. इदञ्च वाक्यविवरणे स्फुटीभविष्यति. कायिक-मानसिक-प्रपत्तौ सत्यामपि एतावत्पर्यन्तं वाचनिकी सा न आसीदिति सापि एवं सम्पन्ना. तेन ''सर्वथा प्रपन्नेषु प्रसादः'' इतिलक्षणः शास्त्रार्थोऽपि सम्पद्यते इति ज्ञेयम्. ननु इयं पुष्टिपुष्टिलीला उच्यते, यदि सर्वात्मभावलक्षण-साधनवत्स्वेव तद्दानं न तद्रहितेषु, तदा मर्यादैव सम्पद्यते इति चेद्, अत्र वदामः. सर्वात्मभावः साधनत्वेन न उच्यते किन्तु फलमध्यपात्येव इति. अतएव पूर्वं ''मनश्चक्रे'' इति उक्त्वा एतत्सर्वात्मभावो निरूपितः. अन्यथा भगवद्रिरंसोक्तेः पूर्वं तन्निरूपणं स्यात्. अतएव भगवतैव अयं भावः सम्पद्यते, न साधनैः इत्यपि ज्ञाप्यते, रिरंसाविषयेष्वेव तदुत्पत्तेः. अतएव यज्ञपत्नीषु न तदुत्पत्तिः, यतः परावृत्तिः तासाम्. ननु ''आत्मानं भूषयाञ्चक्रुः'' इत्यादिना पूर्वमपि तन्निरूपणम् अस्त्येव! इति चेत्, सत्यम् अस्ति परन्तु तत्पूर्वमपि तद्विषयिणी रिरंसापि आसीद् इति बुध्यस्व. नच

१. अन्यथा ''यत्पत्यपत्य...'' इत्यादिवाक्यानुक्तौ स भावो न प्रकटीभवेद् इति भावः.



मानाभावः, ''सर्वात्मभावो हेतुपूर्वकः कार्यत्वाद्'' इति अनुमानेन सामान्यतो हेतुसिद्धावपि तस्य दृष्टस्य सर्वत्र साधारणत्वेन सर्वासु तदुत्पत्तिप्रसङ्गभिया वक्तुम् अशक्यत्वात्. कर्मजन्यत्वेन अदृष्टस्यापि वक्तुम् अशक्यत्वाद्. अन्यथानुपपत्त्याः अग्रे कण्ठोक्तत्वात् च हेत्वन्तरकल्पने गौरवात् च, तस्याएव तथात्वेन सिद्धेः. ननु एवं फलप्रकरणे तदुक्तिः व्यर्था! इति चेत्, न, यथा व्रतवरदानप्रस्तावे स्वामिनीषु अन्तः सर्वात्मभावं निरूप्यापि 'रंस्यथ' इति वचनाद् भविष्यत्वेन तदा फलोन्मुखत्वाभावात् सर्वात्मभावस्य गृहगमनम् आज्ञया 'अभवद्' इति उक्तम्. अत्रतु आज्ञायां सत्यामपि फलोन्मुखत्वाद् यादृशं स्वकार्यम् अस्ति तादृशं स भावः कृतवानिति न तथा उक्तम्. एवमेव रिरंसायाअपि फलोन्मुखत्वाद् अधुना तादृशत्वज्ञापनार्थमेव अत्र[1] तदुक्तिः.

अत्रादौ भगवतकृतोद्यमेनैव भजनानन्दः प्राप्यो न अन्यथा इति ज्ञापयितुं तद्दानार्थं भगवदुद्यमम् आह **भगवानपि** इति. पूर्वाध्याये मर्यादामार्गीयैकादशीव्रतसम्बन्धि-रात्रिप्रसङ्गज-भगवदैश्वर्यदर्शनादिना भक्तानां भगवतः परमोत्कर्षदिदृक्षा आसीद् इति उक्तं, साधनप्रकरणत्वात्. इहतु पुष्टिमार्गीयव्रतसम्बन्धि-रात्रिदर्शनेन भगवतोऽपि रिरंसा जाता इति अपिशब्देन उच्यते. भक्तानाम् अयंहि परमोत्कर्षो यत् पुरुषोत्तमेन समं रमणं, साम्यभावेन[2] तथाकृतिः, स्वस्मिन् आधिक्यज्ञानेनापि कदाचित् कृतिः तदनुसारेणैव भगवत्कृतिरपि इति. नहि ईश्वरेण समं भक्तैः साम्यं कर्तुं शक्यम्. पूर्णालौकिकवीर्यवता समं च न पराक्रमः कर्तुं शक्यः, अल्पवीर्यवत्त्वेन तस्य स्वानिष्टहेतुत्वात्. नामकीर्तनस्मरणादिमात्रेण दैहिकधर्मनिवर्तकत्वादिरूपयशस्वता समं साक्षात्कृतसम्बन्धेऽपि उत्तरोत्तरं रसाधिक्यप्रकटनं च अशक्यम्. सर्वगुणरूपश्रीमता समं तद्विस्मारणपूर्वकं रमणं च अशक्यम्. ततो न्यूनगुणत्वे तद्विस्मारकत्वासम्भवात्. लोकेच तदधिकगुणस्यैव असम्भवात्. पूर्णसर्वरसज्ञानवता अतथाभूतस्य रमणं च तथा, रसाभासहेतुत्वात्. पूर्णवैराग्यवति विषयत्वेन स्वरागजनकत्वं च अशक्यम्, अतो भक्ताः कथम् इदं सम्पादयिष्यन्तीति एतल्लक्षणपरमोत्कर्षं भक्तानां द्रष्टुं मनः कृतवान् इति 'भगवच्'छब्देन उच्यते. यथा पूर्वं भगवता व्यापिवैकुण्ठैश्वर्यप्रदर्शनेन तन्मनोरथः

१. भवदुक्तेः इति पाठः. २. सामान्येन इति पाठः.

साधितः तथा पूर्वोक्तं सर्वं भक्तैः सम्पत्स्यतइति परमोत्कर्षदर्शनमपि सेत्स्यति. अतएव "न पारयेहम्" इति प्रियवचनम्. अपरञ्च, द्वितीयस्य असामर्थ्यं दृष्ट्वा दयया पूर्णः स्वसामर्थ्यं यथा महान् न प्रकटीकरोति तथा अत्रापि हरिणा कृतं भविष्यति इति आशङ्क्य पूर्णतत्प्राकट्यस्य का वार्ता यत्र अन्यसहायमपि प्रकटीकृतवान् इति आह **योगमायाम्** इति. अत्र 'योगमाया' इति उपलक्षणं, तेन अन्याअपि सर्वाः पूर्णाः शक्तयः प्रकटीकृताः एतदर्थे इति उक्तं भवति. **भगवानपि** (इति!), "भगवानपि[1] विश्वात्मा विदित्वा कंसजं भयम्" इत्यादिना पूर्वं भक्तार्थं सा आज्ञप्तेति, भक्त[2]पक्षपातिनीत्वेन तदनुगुणमेव करिष्यतीति न(एवम्!) आशङ्कनीयं, यतः ताम् आश्रितः. नहि आश्रितपक्षपातः त्यक्तुं शक्यः, सुतरां स्वस्वामिनः तथात्वे. भक्तपक्षपातं दूरीकृत्य स्वानुगुणत्वं न अभिप्रेतं भगवतः. तथा सति पूर्ववत् 'समादिशद्' इत्येव उक्तं स्यात् किन्तु तत्पक्षपातम् अनपहायैव मत्कार्यानुगुणा भवतु इति ज्ञापनाय आश्रितपदम्. अतएव योगमायैव उक्ता, मुख्यत्वाद् अस्याः कैमुतिकन्यायेनैव अन्यासाम् एतत्कार्यानुगुणत्वसिद्धेः. एवञ्च सति भक्तिमार्गप्राबल्यमेव निरूपितं भवति. भगवता तादृशएव मार्गो अयं कृतइति न शङ्का काचित्. एतादृशत्वाभावे भक्तिमार्गत्वाभावएव इति सारम्. यथा पूर्वं सङ्कल्पसमानाधिकरणं फलं तथा अत्रापीति आत्मनेपदेन कर्तृगामिक्रियाफल-बोधकेन उच्यते. अतएव 'अरीरमद्'-'रेमे'-'स्वयम्' इत्यादिना भगवतः स्वातन्त्र्यम् उच्यते रमणे. यत्रापि नायिकाधीनत्वोक्तिः तत्र अधिकः प्रिये रसः इति तथात्वं न क्षतम्. यथा गोवर्द्धनोद्धरणादिना पूर्वम् उत्कर्षज्ञानस्नेह-भगवद्दर्शनवत्त्वेऽपि अतीन्द्रियैश्वर्यादिमद्-वरुणदास्यदर्शनादिना औत्सुक्यविशेषः तथा अत्रापि पूर्वमपि सर्वज्ञत्वेन रात्रिदर्शनवत्त्वेऽपि उद्दीपनविभावयुक्तानां तासां दर्शनम् उक्तरूपम् इति ज्ञापनाय रात्रिविशेषणम्. ननु रात्रिवद् विशेषणस्यापि नित्यत्वाद् अधुना को विशेषः इति चेद्!, अत्र इदं प्रतिभाति—सर्वासां लीलानां नित्यत्वेऽपि यथा पौर्वापर्यम् उच्यते तथा आविर्भावतः, तथा विशेषणविशिष्टानां तासाम् अधुनैव आविर्भावतः तथा इति. एतेनापि फलप्रकरणे तदुक्तिः व्यर्था इति शङ्का निरस्ता ज्ञेया, विशिष्टानां तासां पूर्वम् अनाविर्भावाद्, उक्तरीत्या शङ्कायाएव असम्भवश्च.

---

१. भगवानपि इति द्वितीयवारं नास्ति. २. भक्ति...इति पाठः.



यद्वा. स्वरूपात्मकं भजनानन्दं पूर्णं दातुं भगवतः इच्छां निरूपयन् तत्सामग्र्युत्कर्षमपि आह **भगवानपि** इति. उत्कृष्टस्यहि न अपकृष्टे मनो भवति. तत्र सर्वेश्वरस्य न काचिद् न्यूनता अस्ति येन आधुनिकं किञ्चिद् दृष्ट्वा सज्जेत. तत्रापि अलौकिकवीर्यवतो अन्याधीनत्वम् असम्भवि, निरवद्यलीलावत्त्वेनहि यशस्वत्त्वम्. एतच्च खण्डितादिभावहेतुत्वेन अतथाभूतं लोकइति न कर्तुं योग्यम्. तद्वतः सदा श्रीमत्त्वेन तस्याः च सर्वोत्कृष्टत्वेन अन्यत्र रमणेच्छापि असम्भाविता. ज्ञानवत्त्वेन स्वात्मत्वेनैव सर्वं जानातीति दूरतरो अयं तत्र रसः. वैराग्यवतः तथात्वं स्पष्टम्. यद्यपि एवंभूतः स्वयं तथापि स्वामिनीसम्बन्धिनी रात्रीः दृष्ट्वा तथा चक्रे इति अर्थः. तेन स्वरूपविस्मारकत्वम् उक्तं भवति. यत्र उक्तरूपस्य भगवतोऽपि रसोद्दीपिकाः एताः तत्र इतो अधिकः कः उत्कर्षो वाच्यः! यत्सम्बन्धित्वेन रात्रीणाम् एवंरूपत्वं तत्र तासां रसोद्दीपकत्वं किं वाच्यम् इति भावः. एतासां सर्वात्मभाववन्मात्र-रमणार्थमेव सृष्टौ आविर्भावाद् वरदानेन फलोन्मुखीकरणात्[1] स्वामिनीसम्बन्धित्वेन[2] भगवद्रमणस्य रात्रिस्वरूपमध्यपातित्वात् ताः इति पदेन उक्तधर्मवत्त्वपरामर्शात्. स्वरूपतः उत्कर्षम् उक्त्वा सम्बन्धिपदार्थतोऽपि उत्कर्षम् आह **शरद...** इति. रमणंहि जलस्थलभेदेन द्विविधम्. आद्ये शीतं जलकालुष्यं च बाधकं, द्वितीये च औष्ण्यम्. शरदि तदुभयाभावः. उपरि नैर्मल्यज-गगनशोभा, पङ्काद्यभावज-भूशोभा, पङ्कजत्रिगुणानिलशोभा च भवतीति रसानुगुणत्वं 'शरत्'पदेन उक्तम्. लतादिसत्त्वाधीनत्वेन पुष्पशोभायाः कादाचित्कत्वम् आशङ्क्य रसोद्दीपकत्वेन सैव निरूपिता. ऋतुहेतुकानां तेषां सौगन्ध्यरूप-विशेषवत्त्वेन उद्दीपकत्वविशेषः इति तथा उक्तम्. इदन्तु उपलक्षणम्. रूपगन्धशब्दैः[3] शय्यामालाशोभाः[4] अनेकधा पुष्पाणां रसोद्दीपकत्वं प्रसिद्धमिति तानि उक्तानि. शृंगाररसैकप्रधान-वसन्तर्तुसम्बन्धिमल्लिकोक्त्या रसोद्दीपिका यावती सामग्री सर्वा तावत्येव च शरदा सम्पादिता इति ज्ञाप्यते. मधुरत्वे सति उद्भटामोदवत्त्वेन गुप्तागुप्तरसोद्दीपिका मल्लिकेति सैव उक्ता. स्वीयत्वाभावात् तथा उत्कृष्टता न भविष्यति इति आशङ्काभावाय तद्वाची उद् इति उपसर्गः उक्तः. स्त्रीणामेव अत्र प्रमोदः प्रवेशः च इति ज्ञापनाय स्त्रीलिङ्गस्यैव प्रयोगो न 'पुष्प'पददानम्, उत्फुल्लत्वोक्तिः च. रात्रिविशेषणत्वेनैव

---

१. -करण इति पाठः. २. -त्वेन इति नास्ति अन्यादर्शे. ३. पुष्पामोदमत्तभ्रमरशब्दो रसोद्बोधकः. ४. शोभा इति नास्ति अन्यादर्शे.

उक्त्या पुष्पवतीत्वं धर्मो रात्रिषु लक्ष्यते. अतएववर्णनप्रस्तावे गवादिपुष्पधर्महेतुत्वं शरदो निरूपितम्. तथा सति तादृशीनां तासां दर्शनेन भगवतो भावोत्पत्तिः युक्तैव इति भावः. अन्यथा इन्दुवत् पुष्पाण्यपि स्वतन्त्रतया उक्तानि स्युः. यथा एतद्धर्मवती स्त्री स्वतो अनुरक्ता भवति तथैव सम्पादयति च यथा प्रियः स्वस्मिन् अनुरक्तो भवति, तथा एताअपि इति ज्ञाप्यते. एतासामपि देवतारूपत्वेन सर्वम् उपपद्यते, सर्वासाम् एकदा दर्शनात्[१]. अतएव नित्यत्वमपि ज्ञेयम्. पूर्वं हेमन्तर्तौ रात्रिमात्रोक्त्या अत्रच शरदुक्त्या[२] तासु[३] शरदो नित्यत्वं ज्ञाप्यते. तेन अत्र सदा शारदीत्वं सिध्यति. एवं सति हेमन्तेऽपि दर्शनेनापि तन्नित्यत्वम् आयाति. एकदा दर्शनेऽपि क्रमेणैव तासु रमणं ज्ञेयम्, "रजन्येषा" इति भगवद्वचनात्. यद्यपि सदैव इदमित्थतया भगवत्स्वरूपं न ज्ञातुं शक्यं तथापि यादृशं स्वरूपसौन्दर्यम् ऐश्वर्यादिकं वा अधुना प्रकटितवान् तादृशं तद् दृष्टमपि न ज्ञातुं शक्यं ममापि, किं पुनः अदृष्टाश्रुतपूर्वम् इति ज्ञापनाय स्वज्ञानाविषयत्वेन इदानीन्तनं स्वरूपं स्वस्य परोक्षमिव इति ज्ञापयितुं 'लिट्'प्रयोगं कृतवान्. प्रत्यक्षविषयस्यैव अपरोक्षत्वेन तद्विपरीतस्यैव परोक्षत्वं वक्तुम् उचितम्. अतएव "न तं विदाथ य इमा जजान अन्यद्युष्माकमन्तरं बभूव" इत्यादिश्रुतिष्वपि तथा प्रयोगः. रिरंसाविशिष्टस्य मनसः करणं ज्ञेयम्. विविधभाववैशिष्ट्यं मनसएवेति रमणे मनएव प्रधानम्. अत्र 'इच्छां चक्रे' इति अनुक्त्वा मनःकरणोक्त्या च आधुनिकी सर्वा सामग्री न पूर्वतनसदृशी किन्तु इदम्प्रथमतया सर्वविलक्षणा कृता इति ज्ञाप्यते. तेन रमणेऽपि तथात्वं सिध्यति. पूर्णशृङ्गाररसभोक्तुः मध्यस्थसख्यभावे विविधभावविशिष्टनायिकानां भोगो रसमर्यादया न सम्भवतीति ताम् आह **योगमायाम्** इति. गाढमानवतीमपि चाटुवचनैः सर्वं विस्मारयित्वा समानेतुं शक्तेति योगार्थमेव या माया व्यामोहिका, नतु प्रपञ्चव्यामोहहेतुः, ताम् आश्रितः इति अर्थः. अयं रसः एतादृशएवेति सर्वम् उपपद्यते. यद्यपि स्वरूपेणैव वशीकृताः सन्ति तथापि उक्तदशादिषु तस्याः उपयोगः इति कादाचित्कत्वज्ञापनाय उपसर्गः. यद्वा पुष्टिप्रकरणे तदनुसारेणैव सर्वं व्याख्येयम्. तथाहि–विरुद्धधर्माश्रयत्वंहि श्रुतिसिद्धम्. तथाच मर्यादामार्गीय-'भग'शब्दार्थवत्त्वं पूर्वम् उक्तमेव लीलायाम् इति प्रकरणात्

१. देवतारूपत्वे हेतुः. २. शरदृतूक्त्या. ३. तत्पदेन पूर्वोक्तधर्मान् परामृश्य शारदीत्वबोधनात् न हैमनीत्वभ्रमः.



पुष्टिमार्गीय-'भग'शब्दार्थवान् **अपि रन्तुं मनश्चक्रे** इति समुच्चयार्थो **अपि**शब्दः. कर्तुम् अकर्तुम् अन्यथाकर्तुं समर्थोहि ईश्वरः. नहि अन्यो जानन्नेव अजानन् भवति पूर्णकामो अपूर्णकामो वा इत्यादि. तेन इदम् अचिन्त्यम् ऐश्वर्यं यद् रसशास्त्रोक्तरीत्या रमणं पूर्णब्रह्मत्वं च. संयोगे एकैकेक्षण-वेणुवादन-भाषणादि-रसाब्धौ निमग्नानां ततः पृथक्करणं, ततः पूर्वोक्तद्वितीयतृतीयाब्धिषु मज्जनं च न अन्यशक्यम् अतो अलौकिकं वीर्यं भगवतो येन तथा करोति. अन्यथा एकस्यामेव लीलायां लीनानां द्वितीया सा अननुभूतैव तिष्ठेत्. विप्रयोगे च पूर्वदत्तरसस्य स्वान्तःस्थत्वेन तद्वीर्यवशाद् जीवनं सम्पद्यते. अन्यथा तस्य सर्वाधिकबलवत्त्वात् सर्वोपमर्दित्वेन क्षणमपि स्थितिः न भवेत्. आर्तानाम् आर्तिनिराकरणे नादेयस्वामृतरसदानेन च यशस्वित्वम्. भूषणभूषणाङ्गस्यापि "व्यरोचताधिकं तात" इत्यादिवाक्योक्तेः तथात्वं श्रीमत्त्वम्. प्रियाविप्रयोगे सखीवचनैः प्रबोधाद् ज्ञानवत्त्वम्. प्रियासु च अस्याम् अवस्थायाम् एवं कृतम् एवं भविष्यति इति ज्ञात्वा तथा करोतीति च तथा. एतदतिरिक्ते रागाभावाद् वैराग्यवत्त्वम्. **योगपदेन** कर्मयोग-ज्ञानयोग-विहितभक्तियोगाः उच्यन्ते. **मायापदेन** व्यामोहनस्वभावा शक्तिः उच्यते. तथाच पूर्वोक्तैः पूर्वोक्तेषु वा सर्वमोहिका तथा इति अर्थः.

इह अयम् अभिसन्धिः–श्रीगोकुलनाथस्यैव हि स्वतन्त्रपुरुषार्थत्वम्, अन्येषां तत्सम्बन्धात् तथात्वम् इति "एतस्यैव आनन्दस्य अन्यानि भूतानि मात्राम् उपजीवन्ति" इत्यादिश्रुतिभिः "नूनं दैवेन निहता ये चाच्युतकथासुधां हित्वा शृण्वन्त्यसद्गाथाः पुरीषमिव विड्भुजः" इत्यादिभिः अन्यविषयकश्रवणादिनिन्दापूर्वकं हरिविषयकतत्स्वतन्त्रपुरुषार्थत्वोक्त्या कैमुतिकन्यायेनापि अवगम्यते. एवं सति आद्ययोः पुरुषोत्तमाविषयत्वात् तन्निन्दावाक्यैः च तन्मार्गीयाणां मोहो अवगम्यते. तृतीये साक्षाद् हरिसङ्गं विनापि श्रवणादिभिरेव स्वास्थ्यात् स्वकृतार्थताभिमानात् च तथा इति गम्यते. तादृशानामपि एवंरूपो मोहो अन्तरङ्गशक्तेरेव शक्यो न अन्यस्याः. "विलज्जमानया यस्य स्थातुमीक्षापथेमुया" इत्यादिवाक्यैः शक्तीनां तत्तत्कार्यकरणे दासीवद् व्यापारत्वमेव, नतु प्रभुः तत्सङ्गतो भवति. तथा सति पूर्वस्वभावहानिप्रसङ्गः[१] स्यात्, भगवत्सङ्गमस्य तादृक्स्वभावत्वात्[२]. अधुनाच पुष्टिमार्गीयो धर्मिमार्गः प्रकटनीयः. सच तदमोहनेन

१. शक्तेर्मोहकत्वं गच्छेत्. २. भगवत्सङ्गमस्य मोहकत्वनिवर्तकत्वात्.

भवतीति तत्स्वभावनिवृत्त्यर्थं[1] तत्सङ्गतो जातः. अतएव स्वामिनीनाम् एवंभावः. सर्वथा पूर्वस्वभावनिवृत्त्यभिप्रायेण तथाकरणे सर्वेषां तथात्वं स्यादिति तदभावाय साक्षाद् अनुगृहीतेष्वेव तथात्वाभिप्रायेण सङ्गतः इति ज्ञापनाय उपसर्गः. सङ्गमे वाच्ये यदाश्रितत्वकथनं तस्यायं भावः—भगवतोहि अयं मार्गः सर्वथा गोपनीयएव. लोके न क्वचिदपि अस्य प्राकट्यम् एतदतिरिक्तेषु भगवदभिमतम्. आश्रितोहि आश्रयधर्मप्राधान्येन तिष्ठति. आश्रयरूपायाः तस्याः उक्तरीत्या सर्वामोहनत्वधर्मवत्त्वेन तदनुरोधमपि सहतइति उक्ततात्पर्यकोपसर्गात् स्वप्रियास्वेव तत्प्राकट्यकरणं नान्येषु. आश्रयानुरोधाद् आधुनिकेष्वपि कतिपयेषु भाग्यवत्सु तथात्वम् इति ज्ञापितं भवति. यद्वा मनसां चक्रं मनश्चक्रं, मनःसमूहम् इति यावत्. तत्र **रन्तुं योगमायाम् उपाश्रितो** जातः इति योजना. अत्र अयं भावो—नायिकाभेदेन भाववैलक्षण्याद् नैकविधं सर्वासां मनइति यत्र यथाकृते मनोनुरञ्जनं भवति तत्र तथा सम्पादनेन स्वासक्तिसाधिका सेति ताम् आश्रितो जातो, नतु स्वैश्वर्यबलेन तथा कृतवानिति, तथा सति रसस्वरूपहानिः इति भावः. अतएव लीलाप्रारम्भे ईश्वरभावेन लीलां कृतवानिति "योगमायां समादिशद्" इति उक्तम्. इहतु तदाश्रयणं, तेन अन्तरङ्गत्वं तस्याः ज्ञाप्यते. अतएव 'समूह'वाचिपदान्तरसत्त्वेऽपि **चक्र**पदोपादानम्. यतः चक्रं न समगति किन्तु परिभ्रमणशीलम्. तेन अत्रापि तथात्वं ज्ञाप्यते. अतएव पूर्वं तथा प्रपन्नाअपि अग्रे मानवत्यो जाताः. अथवा चक्रं मण्डलाकारं भवतीति **चक्र**पदेन मण्डलं व्यज्यते. तेन रासमण्डले रन्तुम्[2] इति ज्ञापकं **चक्र**पदं ज्ञेयम्. अत्र योगमायाश्रितत्वोक्तेः इदमपि आकूतं— पूर्वंहि भगवत्त्वेन प्रादुर्भावं विनापि तद्भयनिवर्तनसमर्थोऽपि विश्वात्मत्वेन विश्वस्य सर्वस्य उद्धारकत्वात् प्राकट्यं विना तदसम्भवाद् भक्तदुःखनिवृत्तिमपि लीलामृतदानेन करिष्यन् तत्सर्वसम्पादनाय विलम्बासहिष्णुः तां समादिशद् इति "भगवानपि विश्वात्मा" इति श्लोके निरूपितम्. इहतु रसरीतिम् अनुसृत्य लीलां करोतीति आलम्बनविभावसम्बन्धिनीनां तत्रापि उद्दीपनविभावयुक्तानां तासां दर्शनेन उद्दीप्तभाववत्त्वेन विलम्बासहिष्णुः भगवान् तथोति गर्भवद् गुप्ततया तदानयनं, रतियोग्यस्थानसज्जीकरणं, तत्कृत्वा पूर्वस्माद् वैलक्षण्यज्ञानाभावाय पूर्वं तत्र स्वयं स्थित्वा, भगवदागमनमपि सम्पाद्य, तद्गोपनार्थं स्वयं बहिरागत्य अन्येषां स्वानुभावेन वाचा च व्यामोहनम्,

१. विलज्जमानतानिवृत्त्यर्थम् इति अर्थः. २. मनो रन्तुम् इति अर्थः.



ततो अखिलभक्तदुःखदूरीकरणम्. भक्तेषु भगवत्सङ्गमज्ञापकज्ञानेऽपि गृहे तद्विचाराभावः, स्वामिनीवृन्दे तत्समानयनेन भगवत्सन्तोषश्च इति एतत्सर्वकरणं पूर्वसदृशं[1] ज्ञाप्यते. आज्ञायान्तु तावन्मात्रकरणं आश्रयेण च सर्वं तदधीनमेव इत्यपि. तेन प्रभोः व्यासङ्गाभावेन पूर्णरसता बोधिता भवति. अतएव अन्तेऽपि एतस्याः परामर्शः कृतो "मोहितास्तस्य मायया" इति. एवंकरणे "ये यथा मां प्रपद्यन्ते" इति स्वप्रतिज्ञैव हेतुः, यतः एताः वैदिक-लौकिक-मर्यादां हित्वा प्रपन्नाः, "नात्मागाराणि सस्मरुः" इति वाक्यात्; प्रातर् दर्शनावश्यंभावसद्भावेऽपि क्षणमात्रविलम्बासहिष्णुतया वने विचयनेन च अनिर्वचनीयभावाः अतिक्रान्तस्त्रीस्वभावाः च. एतत् सर्वं हेत्वन्तर्गर्भेण **ताः** इति विशेषणेन ज्ञाप्यते इति शास्त्रविदः. प्रभौ यथा यावद् उच्यते तत् सर्वम् उपपद्यतएव[2] परन्तु "रसो वै स" इत्यादिश्रुतेः तद्रूपस्य तस्य तथात्वमेवेति युक्तैव तथोक्तिः, अन्यथा ब्रह्मत्वमेव न स्याद् इति विचारकाणां हृदयम्. नच पूर्वम् अतथाभूतस्य विभावादिभिः तथात्वमिति अस्वरसमिति तादृक्स्वभावोक्तेः सकाशाद् उक्तरीतिमत्त्वं साधीय इति वाच्यम्, एवंभावस्य रसस्वरूपान्तर्भाविनैव प्राप्तेः, एतादृशस्यैव तस्य नित्यत्वात्. यद्वा, रात्रीणाम् उक्तन्यायेन स्वतो धर्मतः च रसोद्दीपकत्वात् तद्दर्शनेन तथात्वेन प्रियाप्राप्तिं विना मनः स्थिरं न जातमिति तासां च परिजन-जनित-निरोधसम्भवेन अधुना अग्रेच अनागमनशङ्काभावाय यथा तान् व्यामोहयित्वा ताः समानयति, तदन्वेषणपराणां च अनेन यथा न आगमनं भवति, तथा सम्पादनसमर्था योगमायेति स्वयम् ऐश्वर्यवीर्यलक्ष्म्यादिगुणवानपि ता रात्रीः वीक्ष्य रन्तुं मनः चक्रे इति योगमायाम्[3] उपाश्रितो जात इति आह **भगवानपि** इति. स्वामिनीनां पूर्वमेव रन्तुं मन आसीत्, तेन प्रभुप्राप्त्यर्थं कात्यायिनीम् आश्रिता जाताः. अधुनातु ता रात्रीः वीक्ष्य भगवानपि रन्तुं मनः चक्रे, इति योगमायाम् आश्रितो जातः तत्प्राप्त्यर्थमिति वा समुच्चयार्थो **अपि**शब्दः. नायकस्य उद्दीपकविभाववशात् सामान्यतो रिरंसोत्पत्तिः चेत् तदा नायिकाविशेषास्फूर्त्या यथाकथञ्चिद् रमणमात्रेण तत्पूर्तिः स्यात्. तथा सति उत्तमनायकत्वं प्रभौ स्वामिनीनां च असाधारण्येन यो रसविशेषः तदनुभवः च न स्याद् इति तदभावाय उद्दीपनविभावत्वेन वक्ष्यमाणा रात्रयो

१. विलम्बनिवारककार्यसदृशम् इति अर्थः. २. एव इति नास्ति एकस्मिन् आदर्शे. ३. ताम् इति पाठः.

नायिका-विशेषमात्र-विषयक-भावोद्दीपिका-एव, नतु सामान्यत इति ज्ञापनाय **ताः** इति विशेषणम्. यथा-यथा मनसि भगवदतिरिक्तानारोहः तथा-तथा उत्तमाधिकारः, तदनुसारेणैव प्राकट्यातिशयोऽपि. स्वामिनीनान्तु सर्वात्मभाववत्त्वेन परमकाष्ठापन्नोत्तमाधिकारवत्त्वात् तदर्थं मूलभूतं यद् ''रसो वै स'' इत्यादिश्रुतिप्रतिपाद्यं रूपम्, तत्प्राकट्यमेव जातमिति ज्ञाप्यते. एवं सति यादृशा धर्मा अत्र उच्यन्ते तादृशधर्मवदेव पुरुषोत्तमस्वरूपमिति मन्तव्यम्. [१]( तथाच **वीक्ष्य मनः चक्रे** इति कथनाद् ईक्षणस्य मनश्चक्रीभावे हेतुत्वम् अवगम्यते. सर्वज्ञत्वेन सदा सर्वविषयकापरोक्षज्ञानवत्त्वेऽपि एतत्कार्याभावाद् अधुना कश्चिद् विशेषो वाच्यः ईक्षणे. सच रसरीत्या नायकभावपूर्वकत्वमेव, अयमेव विउपसर्गेण उच्यते. अनेवंभावे विभावादीनां भावोत्पादकत्वादर्शनात् तथा मन्तव्यमिति दिक्. यद्यपि वरदानकालेऽपि ''मयेमा रंस्यथ क्षपा''इति वाक्यात् तद्भाववतएव तद्दर्शनम् आयाति तथापि वरदानम् ईश्वरभावेनैवेति न तदा नायकभावः शङ्कनीयः, 'रंस्यथ' इति प्रयोगात् च. वरदेयपदार्थत्वेन परं तदुद्देशः). एवं भगवति भावोत्पत्तिम् उक्त्वा उक्तन्यायेन मनःप्रभृति सर्वम् अपूर्वमिति रसस्वाभाव्यात् स्वयं सखीम् आश्रितइति पारतन्त्र्यमिव अङ्गीकृतवानिति अग्रिमकार्ये शैथिल्यं माभूदिति उद्भटभावात्मकपोषणेन स्वतन्त्रतयापि अग्रिमकार्योपयोगि-सर्वकरणसामर्थ्यजनकत्वेन तदधिष्ठातृदेवइव इन्दुः तदा उदितो जात इति आह **तदोडुराजः** इति. अतएव अग्रे ''दृष्ट्वा जगौ'' इति वक्ष्यते. अत्र इदं प्रतिभाति– न अत्र चन्द्रोदयमात्रं वाच्यम्, अग्रिमदर्शनोक्त्यैव तत्प्राप्तेः तत्रोक्तधर्मैरेव उद्दीपकत्वादेरपि प्राप्तेः एतच्छ्लोकवैयर्थ्यापातात्; किन्तु, चन्द्रोदयव्याजेन अत्रत्यसर्वसामग्रीस्वरूपं निरूप्यते. अतः आह **तदा** इति. न अयं ज्योतिश्चक्रभ्रमिवशाद् उदितः किन्तु यदैव रन्तुं मनः प्रकटं कृतवान् तत्रापि शरत्पदात् प्रकाशवति देशे काले च रन्तुम्, अभिसारिकारमणेच्छायान्तु न उदीयादेव, तथाच तदेकसम्बन्धित्वाद् अयम् इन्दुः तदैव उदगात्. तेन न अयं भचक्रगो, मनःप्रादुर्भावाग्रिम-क्षणनियतोदय-वत्त्वात्, निर्दोषपूर्णगुण-भगवन्मनः-सम्बन्धित्वात् च सदा स पूर्णो निःकलङ्को अस्तमयरहितः क्रीडोपरतौ

१. ( ) चिह्नान्तर्गताः फक्किकाः अन्यपुस्तके ४९६ तमे दशमपंक्तौ ''भगवद्वचनाद्'' इत्यनन्तरं दृश्यन्ते, न अत्र, तथापि प्राचीनतमादर्शे एताः अत्रैव दृष्टाइति अस्माभिः अत्रैव निवेशिताः इति. पूर्वापरसम्बन्धविचारतोऽपि एतासाम् अत्रैव निवेशनं युक्तमिति प्रतिभाति.



तिरोभाववान् इति ज्ञेयम्. अतएव एतत्प्रकाशाभाववतो वनाद् निवृत्तिं वक्ष्यति, तदभाववतो लीलानुपयोगित्वात्. एवं सति स्वामिनीमनांस्येव अत्र उडुरूपाणीति तदनुरञ्जकत्वात् तद्राजः. एतेन स्वामिनीनां मनांस्यपि न लौकिकानि इति ज्ञापितम्. अतएव 'इन्द्वादि'नामानि विहाय इदम् उक्तम्. तत्रापि 'उडुप' पदं त्यक्त्वा एतन्मनोनियामकत्वमपि अस्यैव इति ज्ञापनाय तद्राजपदम्. प्रियसङ्गमनिश्चये सत्येव चन्द्रः सुखदइति तद्रिरंसायां तदावश्यकत्वात् तथेति तदा पूर्वोक्तोडूनां सुखदो यः स तथा इत्यपि ध्वनिः. तदा तास्वेव रात्रिषु यानि उडूनीव उडूनि स्फुरद्रूपाणि, अन्यदातु अप्रकाशमानानीव तेषामेव तथा इत्यपि ज्ञेयम्. यद्वा, अस्मिन् रसे नायिकाप्राधान्याद् भक्त्यतिशयवत्त्वेनापि तदधीनं भगवन्मनइति तत्सम्बन्धिचन्द्रस्य सुतरां तथात्वम्, यतः तन्मनस्तोषार्थमेव अस्य उदयः स्थितिः गतिः चेति, प्रवर्तकनिवर्तकत्वेऽपि तन्मनसामेव आयाति. तथाच उक्तरीत्या तदा उडवो राजानो यस्य स तथा इति अर्थः. छान्दसो अत्र 'टच्'. वस्तुतस्तु ''व्यरोचतैणाङ्कइवोडुभिर्वृत'' इत्यत्र उडुसादृश्यं वक्ष्यतीति 'उडु' शब्देन पूर्वोक्तरीत्या तदा 'उडु'शब्देन वा स्वामिन्यएव उच्यन्ते. तथाच रसमर्यादाम् अनतिक्रामन् रसं ददातीति चन्द्रैकसाध्यम् उच्यमानं कार्यं कुर्वन् उक्ततद्राजः स्वयमेव इन्दुरूप उदगाद् इति अर्थः. अतएव अस्य अस्मिन् समये स्थितिः लीलादर्शनं च उपपद्यते. एवमेव अत्रत्यं सर्वम् इति दिक्. स्थितस्यैव प्राकट्यंहि उदयः. तथाच मनसः करणम् उक्तेन्दौ एतन्निरूपणेन भगवद्रमणसामग्री सर्वा नित्यत्वेन सिद्धैव अस्ति, न कारणम् अपेक्षते, किन्तु तदिच्छामात्रम्. तेन तत्प्राकट्ये स्वयमेव सर्वतः प्रकटा भवति इति ज्ञाप्यते. मनःकरणं यथा तथा पूर्वम् उक्तम्. प्राच्या ककुभो मुखमिव मुखं प्रसन्नत्वेन रसोद्दीपकं मध्यभागम् इति यावत्. तत्स्वकैः किरणैः अरुणेन गुणेन विशेषेण लिम्पन्निति चन्द्रकृत्युक्त्या यत्र रागरहितायामपि तत्सम्पादकः तत्र किं वाच्यं तद्वतीषु इति कैमुतिकन्यायः सूचितः. लेपनोक्त्या स्नेहस्य सान्द्रत्वं सूच्यते. तत्त्वंच सर्वाधिकत्वम्. अन्यानपनोद्यत्वं विशेषः. यथा पुरुषान्तरकृत-स्वप्रियाविषयक-स्पर्शादिदर्शनस्य उद्भटभावोद्बोधकत्वं तथा आधुनिकदिग्दर्शनस्यापि इति वक्तुम् एतावद् उक्तम्. अन्यथा ''प्राचीम् अरुणां कुर्वन्'' इत्येतावदेव वदेत्, न वदेदेव वा, उदयस्वाभाव्यादेव तत्प्राप्तेः. एवं सति पूर्वोक्तन्यायेन चन्द्रोदयोक्तिवद् इयमपि इति ज्ञायते. तथाच यथा भगवन्मनःसम्बन्धित्वं चन्द्रेण लौकिकत्वं तथा

तच्छोत्रसम्बन्धित्वं प्राच्या इति ज्ञायते, उक्तश्रुतार्थापत्तेः. अतएव अग्रे चन्द्रकिरणस्थानीयैः स्वामिनीवचनशुश्रूषया रचितवचनहेतुकैः तदुत्तरैः तद्भावात्मकतद्वचनरूपैः प्रियस्य श्रवणानन्दो वक्ष्यते.

## ॥ तदोडुराजः ( सुबो.१०।२६।२ ) इत्यत्र ॥

**पूर्णएव स** इत्यादि, अत्र अयं भावः : अत्रत्या अखिलसामग्री रसात्मिका रसलीलामात्रोपयोगिनी रसात्मकेन अनेनैव रूपेण प्रकटिता, न साधारणजगत्कारणरूपेण इति बोधयितुं मनआरभ्य चन्द्रान्तानां सर्वेषामेव रसोद्दीपकपदार्थानाम् अधुनैव अपूर्वप्रादुर्भावः उच्यते. तत्र 'स्थालीपुलाक'न्यायेन चन्द्रस्वरूपम् आहुः **पूर्णएव स** इत्यादिना, अस्य अयम् अर्थो : भगवता पूर्वं मनः सर्वविषयकं सद् अपूर्णमपि अधुना पूर्णमेव प्रकटितं, केवलस्वामिनीमात्रविषयकत्वाद् अंशतोऽपि अन्यत्र अभावात्. अतएव "नाहं तेभ्यो मनागपि" इत्यादिवाक्यानि. ततः चन्द्रोऽपि रेतोरूपत्वात् तच्छक्त्याधायकत्वात् तदधिष्ठानात् तादृशएव केवलैतन्मात्रोपयोगी प्रकटो जातः. न कदापि अन्यविषयको भवतीति एवकारः. लौकिकस्तु विधुः आधिभौतिको विराड्रूपभगवन्मनोरूपोऽपि सर्वविषयकत्वाद् न तथेति ततो वैलक्षण्यम्. वैलक्षण्यान्तरम् आहुः **निष्कलङ्कः** इति. यथा लौकिकविधुः व्यभिचाराद् दक्षशापजन्याखिल-लोकापकीर्ति-कारण-कलङ्कयुक्तः तथा रसिकजन-निरूपणीय-रसासक्तिविरह-जन्यापकीर्ति-युतत्वाभावाद् अयं न तथा. अन्यदपि वैलक्षण्यम् आहुः आविर्भावतिरोभाव-हेतुवैलक्षण्याभ्यां **मनस्येव** इति. यथा भौतिकस्य इन्दोः कालाधीनाविर्भावः, स्वकालएव तस्य उदयात्, न तथा अस्य, भगवन्मनोमात्रोदयहेतुकोदयवत्त्वाद्[१] इति अर्थः. एतेन लीलासामग्रीमात्रएव इयं व्यवस्था इति निरूपितम्. अतएव नित्यत्वमपि. लीलासामग्री न कालत्रयसत्तारूपे(पा!) कालातीतत्वात्[२], किन्तु स्वरूपएव विद्यमानत्वेन स्वरूपनित्यत्ववदेव इति ज्ञेयम्. एतेन यथा स्वरूपं भक्तेषु तथा लीला तत्सामग्री च सर्वा तेष्वेव इत्यपि[३] बोद्धव्यम्. अनेन स्थितिरपि

१. उदयत्वाद् इति मुं.वि.पाठः. २. कालान्तत्वाद् इति मुं.वि.पाठः. ३. अपि इत्यधिकं मुं.वि.पाठानुसारेण.



विलक्षणा बोध्या. एवम् उत्पत्तिस्थितिभ्यां वैलक्षण्यं निरूप्य उपरमतोऽपि वैलक्षण्यं निरूप्यते. तत्र अयं पूर्वः पक्षः : ननु व्रजस्थानाम् अनुभूतमहाफलानामपि भगवदाज्ञातो "वासुदेवानुमोदिता" इतिवाक्याद् अनिच्छयापि गृहागतौ क्रीडोपरतिः दिवा दृश्यतइति कथं न कालाधीनत्वं कथंवा नित्यत्वमपि इति आशङ्क्य आहुः **क्रीडायाम्** इति, **क्रीडायां** लीलायां दिवा गुणगाने आन्तररमणार्थम् **उप** समीपे **रतायाम्** अन्तःप्रविष्टायां तत्सम्बन्धित्वात् तस्यापि अन्तःप्रवेशे उपरतिः इति अर्थः. एतेन बहिःप्राकट्ये लीलायाः तत्सम्बन्धिपदार्थानामपि बहिराविर्भावः इति भावः[१] सूचितः. अत्र आविर्भावतिरोभावावेव तन्नित्यत्वनिर्वाहकौ इति विद्वन्मण्डने प्रभूक्तम् अनुसन्धेयम्. एतेन बहिःक्रीडोपरतौ शृङ्गारोत्तर-रसदित्सैव कारणम् इति बोद्धव्यम्. एवम् उपरतिकारणवैलक्षण्यादपि वैलक्षण्यं निरूपितम्. ननु एवं बहिर् अदृश्यत्वे अस्तमितत्वम् आयास्यति ?! इति चेत्, तत्र आहुः **न अस्तमय** इति. येषां दृश्यः तेषान्तु दृश्यएव, तदिच्छया, बहिर्दृष्ट्यां तद्दृष्ट्या वा अन्येषान्तु सर्वदैव अदृश्यइति लौकिकविधुवद् अदृश्यत्वरूपास्तमितत्वाभावाद् न अस्तमयः इति अर्थः. एतेन भगवन्मनः तज्जनितो भावो वीर्यं च एतत् सर्वं स्वामिनीमात्रविषयकम् इति उक्तम्. अतएव तासु व्रजेन्द्रदिक्स्थितासु विधोः अस्य तत्रैव उदयः. ततः क्रमेण तासां भगवन्निकटागतौ एतस्यापि आगतिः, भगवता सह संयुज्य स्थितासु मध्याकाशएव स्थितिः. तत्रापि रसावष्टम्भार्थम्[२] उपरिदेशएव. ततो लीलाविशिष्टप्रभौ आन्तररमणार्थं तासु प्रविष्टे लीलासामग्रीत्वात् तस्यापि प्रवेशो, नतु अन्यदिश्यपि तस्य गतिः. यथा श्रीमद्यमुनायाः लीलामात्रोपयोगिन्याः लीलास्थलएव स्थितिः तथा अस्यापि इति अर्थः. अत्र आकाशस्तु रसात्मकलीलाश्रयभूतः स्वामिनीहृदयाकाशएव यत्र एतन्मनोनक्षत्रस्थितिः. सएव लीलायां बहिःप्रादुर्भावितायां बहिर् भवति — तस्याम् अन्तःस्थितायाम् अन्तर्भवतीति तस्मिन्नेव एतन्मनोनक्षत्राधिपतेः भगवन्मनश्चन्द्रस्यापि आविर्भाव इति अलम् अतिप्रसङ्गेन इति दिक्.

दीने मयि दयां कुर्वद् दासे भावविबोधनम् ॥
स्वमात्रशरणे रक्षां[३] कृष्णास्यं मस्तकेऽस्तु मे ॥

१. इति भावः इति मुं.वि.पाठे अधिकं, मुद्रितपाठे नोपलभ्यते. २. -अवष्टम्भभावार्थम् इति मुद्रितपाठः. मुं.वि.पाठः गृहीतः. ३. रक्ष त्वत्पादाब्जम् इति पाठः.

॥ तदोडुराजः ( सुबो.१०।२६।२ ) इत्यत्र ॥

**सा दिग् देवानाम्** इति, अत्र अयम् आशयः : प्राच्याः दिशः इन्द्रो देवता अधिपतिः च उक्तः. इदानीं तम् इन्द्रं श्रीगोवर्धनोद्धरणेन निर्जित्य स्वयं तैः अभिषिक्तः इन्द्रो जातः. इन्द्रश्च देवानामेव भवति, (न!) मनुष्याणां, "यथेन्द्रो देवानाम्" इति श्रुतेः. अतो व्रजवासिनां देवत्वमपि सम्पन्नमिति या दिग् देवानां व्रजवासिनां जगत्पूज्यानाम् अलौकिकानाम् अखिलफलसाधकानां भगवत्पक्षपातिनां तस्याः दिशः इन्द्रो भगवानेव देवता पूज्यो अधिपतिः भोक्ता इति यथाधिकारं कार्यकरणात्. साम्प्रतन्तु भोक्ता, "रन्तुं मनश्चक्रे" इति वाक्यात्. अतो भगवान् तत्सम्बन्धिन्यां दिश्यपि स्वरेतोरूपम् अलौकिकगूढभावोत्पादकं चन्द्रं प्रकटितवानिति तद्दिक्सम्बन्धिनीष्वपि तादृशभावं मनः उत्पादयिष्यति भगवतः इति ज्ञेयम्. एतेन ताः यत्र सन्ति सा दिगपि चेत् भगवन्मनःसम्बद्धा तत्र तासां तत्सम्बद्धत्वे किम् आश्चर्यम् इति भावः. किञ्च स्वामिन्योहि श्रीगोवर्धनसमीपवर्तियमुनोत्तरभागीय-वृन्दावनस्थितस्य प्राच्यामेव स्थिताइति तत्रैव भगवन्मनः इदानीम् अस्तीति तत्पोषकत्वेन अयं चन्द्रोऽपि तत्रैव उदितः. यदा ताः अत्र आगत्य अलौकिकाखिल-सामग्रीविशिष्ट-नित्यलीलायां स्थिता भवेयुः तदा चन्द्रोऽपि मध्याकाशे स्थितः तदुपर्येव स्थितः स्वकार्यं साधयिष्यति इति अर्थः. ननु किम् आकाशस्वरूपम् अत्र इति चेद्, भगवत्स्वरूपमेव इति बुध्यस्व, "ब्रह्मैव सगुणं बभौ" इति वाक्ये तथा निरूपणात्. एवं सति प्रभुहृदयमेव आधिदैविकरूपेण बहिर्निःसृतमिति स्वाधिष्ठानोपर्येव तिष्ठति. तच्च अधिष्ठानं यदा यत्र भवति तदा तदुपर्येव तिष्ठति, श्येनवत्. तथाच तच्चलने चलति, तत्स्थैर्ये स्थिरीभवतीति अधुना स्वामिन्यागमनेन भगवतो हृदयं स्वस्थाने मध्याकाशे समागतमिति तस्यापि मध्याकाशएव स्थितिः, एतस्य अग्रे गमनाभावात् चन्द्रस्यापि गमनाभाव इति भावः. **क्रीडायाम् उपरतायाम्** इति तस्याम् अन्तःस्थितायाम् एतस्यापि तत्रैव स्थितिः इति ज्ञेयम्. अतएव एतल्लीलामात्रसम्बन्धित्वाद् एतद्विधोः न अन्यत्र गमनम् इति आशयेन उक्तं न अस्तमयसम्भावना इति भावः ॥



॥ चर्षण्यो अत्र परिभ्रमणशक्तयः ( सुबो.१०।२६।२ ) इत्यत्र ॥

श्रीहरिर्जयतितराम्. तत्कृपया इदं प्रतिभाति : पूर्वश्लोके तत्सम्बन्धिरात्रिदर्शनेन भगवन्मनसः तन्मात्रविषयक-चक्रीभावोक्त्या तादृशमनसः स्वविषयक-स्वनिकटानयनसामर्थ्यरूपाः शक्तयः **चर्षणी**शब्दवाच्याः परिभ्रमणरूपाः सर्वासु प्रविष्टाः, भगवन्मनःसामर्थ्येनैव तन्निकटागतिसम्भवात्. तथापि न अत्र ईश्वरमर्यादया प्रभुः किञ्चित् करोति किन्तु "योगमायामुपाश्रित" इति वाक्याद् रसमर्यादयैव. तथाच न केवलमनोमात्रसामर्थ्येन विनैव उद्दीपनविभाव-चन्द्रोदयगानादिभिः तदानयनं भवतीति प्रभुसम्बन्धनिश्चयाभावेन स्वकार्यासिद्ध्या भवत्येव शोकः. सच भगवन्मनोनियामक-भावपोषकोदितालौकिक-चन्द्रदर्शनेन प्रभुमनसः सर्वथा आकारणादिकार्यकर्तृत्व-निश्चयेन गानात् पूर्वमेव निवृत्तः. अतएव एतदुभयात् पूर्वं सकलस्वामिनीमध्ये क्वापि न ताः **परमानन्दसम्बन्धिन्यो जाताः** भगवत्सम्बन्धिन्यो जाताः. इदानीन्तु ताः स्वामिनीष्वेव सन्ति. तासां भगवत्सङ्गेन परमानन्दसम्बन्धे ताअपि कार्यसिद्धौ भगवन्निकटम् आगताइति एतासामपि परमानन्दसम्बन्धो जातः. तद् उक्तं **चर्षणीनां शुचो हरन् स उदगाद्** इत्यनेन. **चर्षणीसहितानाम्** इति एवं व्याख्यायां तच्छब्दार्थानुपपत्तिरूपा अरुचिस्तु टिप्पण्यामेव प्रभुभिः उक्ता. परं भगवन्निकटानयनलक्षणे कार्ये सम्पन्नेऽपि पुनः तत्साहित्यकथने उपपत्तिम् आहुः **चर्षणीसहितानामेव** इति. परमानन्दोहि रासलीलायां वाच्यः. तत्रच भ्रमणं प्रतीयते, तत् न तासां स्वसामर्थ्यात् किन्तु प्रभुमनःशक्तिभिरेव सर्वत्र प्रविष्टाभिरिति, एतल्लीलायाः नित्यत्वेन सर्वदैव तच्छक्तिसाहित्यम् अभिप्रेत्य तथा उक्तम् आचार्यैः इति दिक्.

आचार्यचरणोदञ्चच्चञ्चरीकचयश्चिरम् ।
चरीकुर्वन् अनुचरीं....................[1] ॥

---

१. त्रुटितएव अयं श्लोकः मुं.वि.पाठे अधिकः उपलभ्यते.

## ॥ श्रीगोविन्दापहृतात्मानः ( सुबो.१०।२६।८ )इत्यत्र ॥*

**निवारणं** हि इत्यादि, तत्र अयम् अर्थः प्रतिभाति : ननु साधनप्रकरणे "याताबला" इति भगवद्वाक्यात् ततो निवृत्तिरिव कथम् एतासां पत्यादिवाक्याद् न निवृत्तिः ? इति आशङ्क्य आहुः **निवारणं हि श्रौत्रम्** इत्यादि, पत्यादिकृतनिवारणंहि **श्रौत्रं** श्रवणेन्द्रियग्राह्यं, शब्दात्मकत्वाद्, न साक्षाद् अन्तःकरणग्राह्यं, नहि भगवानिव ते अन्तःकरणे प्रविश्य साक्षात् तद् निवारयितुं शक्ताः, जीवत्वेन तत्प्रवेशायोग्यत्वात्. श्रवणन्तु मनःसंयुक्तमेव स्वकार्यं करोति, न केवलं, "अस्मरन्तो नैव कञ्चन शृणुयुः यदा वाव ते स्मरेयुः अथ शृणुयुः" (छान्दो.उप.७।१३।१) (इति!), तस्य इदानीं हृतत्वेन मनःसंयोगाभावात् न केवलश्रवणेन्द्रियेण तद्वाक्यश्रवणं जातमिति न तासां निवृत्तिः स्वतो जाता इति अर्थः. ननु तेऽपि निवारणावसरे बाधकत्वेनापि मनसि समागताइति तत्सम्बन्धित्वात्, तदा "याताबला"इतिवाक्येन भगवतइव, कथं तेषां न निवर्तकत्वम् इति आशङ्क्य आहुः **अन्तःकरणारूढाश्च पुरुषाः** इति, ते तदानीम् अन्तःकरणे बाधकत्वेन स्फूर्तौ नौकायामिव आरूढाएव न (अन्तःकरणं!) तदधीनमेव. अतो न आरूढतामात्रेण तेषां ततो निवर्तकत्वम्. नहि नौकारूढाः वाङ्मात्रेण प्रवाहवेगाद् अभिधावतीं नौकां निवर्तयितुं शक्नुवन्ति. अतो अन्तःकरणस्थितावपि न तेषां निवर्तकत्वम् इति भावः. **पुरुषाः** इत्यनेन स्त्रीणाम् अत्र अप्रतिबन्धकतया हृदयानारूढत्वं सूचितम्. ननु एवं भगवतोऽपि अन्तःकरणारूढस्य पुरा कथं निवर्तकत्वं साम्प्रतं वा आरूढतामात्रेण प्रवर्तकत्वम् ? इति आशङ्क्य आहुः **प्रवर्तकश्च भगवान्** इति, नहि भगवान् अन्तःकरणे आरूढः किन्तु जलप्रवाहे नौकेव भगवति तद् आरूढं, **गोविन्दापहृत**...इत्यनेन तदपहरणोक्तेः. अतो जलप्रवाहइव नौकायाः भगवान् अन्तःकरणस्य **प्रवर्तकः** स्वबलेन स्वाभिमतदेशप्रापकः. **'च'**काराद् "वासुदेवानुमोदिता" (भाग.१०।३-०।३९) इति वाक्यात् स्वेच्छया परावृत्तवाहाइव निवर्तकश्चेति तदधीनतया निष्प्रत्यूहम् अधुना प्रवृत्तिः सम्पन्नाः, अग्रे निवृत्तिरपि भविष्यति इति भावः. एतदेवच अग्रे स्फुटीकृतम् अस्मदाचार्यचरणैः **नहि नौका प्रवाहवेगाद्** इत्यनेन ग्रन्थेन. तदर्थस्तु : नौकास्थानीयः स्वामिनीमनः, पराधीनप्रवृत्तिमत्त्वात्, प्रवाहवेगस्थानीयो भावात्मको भगवानेव. आरूढस्थानीयाः पुरुषाः पत्यादयो,



निवर्तकं तद्वाक्यम्. अतो अन्तःकरणस्य पाथःप्रवाहपतितनौकायाइव न आरूढवाक्यसदृशपत्यादिवाक्यात् निवृत्तिः जाता इत्येवं बोध्यम् ॥

निजाचार्य-कृपामात्र-बलाद् इदमुदीरितम् ।
अवबुध्य बुधाः सन्तु सततं छिन्नसंशयाः ॥
स्वदासार्थसमुद्भूतो भक्तिभावविभावितः ।
हरिदासाय दास्यं च ददातु वदनानलः ॥
वृन्दावनविधोर्वाचोऽधीश्वरो वल्लभाह्वया ।
वृतानां स्वेन दैवानां स्वान्तर्ववीति सर्वदा ॥

## ॥ कामं क्रोधम् ( सुबो.१०।२६।१५ ) इत्यत्र ॥

श्रीहरिः. **सख्यं तेष्वेव** इति, सख्येहि परस्परम् उभयोः भावनया हृदयस्थितत्वं प्रयोजकत्वम्. अन्यथा एककरेण तालिकापतनासिद्धिवत् सख्यासिद्धेः. तच्च "मयि ते तेषु चाप्यहम्" इति वाक्याद् भगवतो भक्तेष्वेवेति तत्सख्यस्य तत्रैव सिद्धिः इति अर्थः. एवं सति कामादिभिः साधनैः फलसिद्धौ न ज्ञानभक्त्योः फलसाधकत्वेन उपयोगः इति भावः. ननु भगवानेव आविर्भूतः फलं साधयति, "फलमत उपपत्तेः" इति न्यायात्. तत्र ज्ञानं भक्तिः भगवदिच्छा चेति त्रयमेव तदाविर्भावे कारणम् उक्तमिति आविर्भावकसाधनाभावे अनाविर्भावात् कथं मुक्तिः इति आशङ्क्य आहुः **तेषाम्** इति, तेषां कामादीनां मर्यादया भावनाविषयस्य उत्कटभावनया प्रत्यक्षत्वमिति लौकिकमर्यादया स्वतन्त्रो ज्ञानभक्तिनिरपेक्षो यः आविर्भावः; अथवा, तदुभयसम्पादिताविर्भावभिन्नो वा, मनसएव चक्षुरादिप्रवेशेन तत्र साक्षात्कारहेतुत्वात्. तादृशस्य कामादिभिः भावनायां नियतत्वेन न तत्र आविर्भावार्थं ज्ञानभक्त्योः उपयोगः इति भावः. ज्ञानिनां भक्तानां च ज्ञाने भक्तौ वा भिन्नएव आविर्भावः. अन्यथा स्तुतिकृत्यवसरे भीष्मस्य भावनया हृदि प्रकटेऽपि भगवति पुरःस्थिते इति वाक्याद् अवतीर्णे सर्वेन्द्रियविषये फलसिद्धिः न उक्ता स्याद् अतो भक्तौ ज्ञाने वा भिन्नएव आविर्भावः, कामादिहेतुकभावनामात्रे भिन्नएवेति न अनुपपत्तिः काचित्.

## ॥ अथवा मदभिस्नेहाद् (सुबो.१०।२६।२३) इत्यत्र ॥

श्रीमत्स्वामिने नमः. **निरुक्तो भावः** इति, अत्र भगवता सर्वात्मभावस्य फलरूपत्वं प्रतिपाद्यते. तस्य फलान्तरसाधकत्वे साधनत्वेन फलरूपत्वं न स्यात्. भगवांश्च फलरूपो, अलौकिकभावस्य[१] अतथात्वे भगवद्रूपता न स्यात्. अन्यथातु लौकिकानां स्वपत्यादिविषयकभावस्येव लौकिकतुल्यत्वेन भगवति भानात् तद्भावस्यापि[२] लौकिकत्वमेव, यथा अन्तर्गृहगतानाम्. स भावो न सर्वात्मभावलभ्यं भावात्मकं फलं साधयतीति भगवता **निरुक्तो** यो अभितः[३] स्नेहः सर्वात्मभावो भगवद्विषयकः पुष्टिमार्गविचारेण **गुणात्मकः** स्वरूपमात्रफलसाधकत्वात्, मर्यादामार्गविचारेण **दोषात्मको** वा, विहितधर्मविरुद्धत्वाद्, उभयविधोऽपि न तत्फलं भावातिरिक्तं प्रयच्छति, स्वस्य लौकिकत्वापादकत्वाद्. अतो[४] न मत्तः फलाकाङ्क्षा कर्तव्या, स्नेहएव निरन्तरं कर्तव्यइति तस्य गृहेऽपि सम्भवाद् गेहे गन्तव्यम् इति गमनपक्षे भगवत्तात्पर्यम् इति भावः. **अतः** इति, यतः तत्स्वरूपं भवतीभिः न ज्ञायते, अन्यथा न फलाकाङ्क्षां कुर्युः, अतो मया सिद्धान्तरूपोऽपि भगवद्भावः तत्स्वरूपकथनार्थं पूर्वपक्षत्वेन **अनूद्यते** इति अर्थः. स्थितिपक्षेतु सर्वात्मभावेन वशीकृता आगताइति न आगमनम् अनुपपन्नम्. अन्यथा अन्तर्गृहगतानामिव प्रतिबन्धः स्याद्. अतो निवृत्तः प्रतिबन्धो न पुनर्गृहगमनेन सम्पादनीयो, अत्रैव स्थेयम्, इति भावः. किञ्च **मम** मत्सम्बन्धिनएव **जन्तवः प्रीयन्ते**, मम परमानन्दरूपत्वात्. अन्येषां "पतिसुतादिभिरार्तिदैः" इति वाक्याद् दुःखदत्वेन तत्सम्बन्धिनो न प्रीयन्तइति प्रीत्यभीप्सुत्वे अत्रैव स्थेयम् इत्यपि स्थितिपक्षे तात्पर्यं ज्ञेयम्.

## ॥ मैवं विभोऽर्हति (सुबो.१०।२६।३१) इत्यस्य व्याख्याने ॥

श्रीकृष्णाय नमः. **एतच्च भजनं न विषयवद्** इति, एतद् अस्माभिः क्रियमाणं, प्रार्थ्यमानम्. चकारात् लोके प्रकटीक्रियमाणं च. **भजनं न**

१. -भावस्यापि तथात्वे भगवद्रूपता अन्यथा इति मुं.वि.पाठान्तरम्. २. भावनात् तदुभयस्यापि इति मुद्रितपाठः. ३. अभिमतः इति मुद्रितपाठः. ४. लौकिकाभाववतो न मत्तः इति मुद्रितपाठः.



**विषयवत्** न विषयसम्बन्धि, अस्मत्क्रियमाणभजने प्रार्थ्यमाने च विषयसम्बन्धाभावाद्, अस्माकं तत्त्यागेन आगतत्वाद्, भगवतः च इन्द्रियविषयत्वाभावात्. **किन्तु प्रकारान्तरेण** कामप्रकारातिरिक्तप्रकारेण केवलरसरीत्या, **इति विशेषतो वक्तुम् अशक्ता** विविच्य कथने स्वाधिक्यनिरूपणतो अभिमानसम्भवेन सर्वात्मभावबाधसम्भवात्, प्रभोश्च "अस्मदधीनो भूत्वा भजस्व" इति कथने नीरसत्वसम्भवाद्. अतः परम् अतिनिपुणाः रसरीतिवित्तमाः स्वामिन्यो दृष्टान्तेन स्वभजन-प्रभुभजन-स्वरूपं निरूपयन्ति **देवो यथा** इत्यादिना, **देवो यथा भजते** उपासकाधीनः सन् तदभिलषितं साधयति, न स्वमहत्त्वं[१] अनुसन्धत्ते, **यथा** वा **आदिपुरुषः** पुरुषोत्तमः स्वचरणे ज्ञानिनः, स्वस्मिन् च भक्तान्, प्रवेशयन् **भजते** स्वानन्दं ददाति, तथा त्वया कर्तव्यम् इति भावः. स्वभजनेऽपि एतदेव दृष्टान्तद्वयम्. **यथा देवः** पूज्यो अलौकिकः पत्यादिभ्योऽपि[२] मुख्यो, न भजने दोषावहः, सर्वसेव्यः; तथा, अस्माकं भवान्[३]. न जारइव अन्यासां, सेव्यः. अतः तथा अस्मान् **भजस्व** नतु कामिवत् काममात्रं पूरय किन्तु अस्मदभिलषितस्वानन्दं देहि इति अर्थः. किञ्च **यथा आदिपुरुषः** पुरुषोत्तमः फलरूपो, नतु तत् साधनं, निष्काममनोरथविषयः; तथा, अस्माकं **भवान्**इति. स यथा सर्वकामरहितेभ्यो ज्ञातः सेवितः च स्वरूपमेव आनन्दरूपं ददाति; न अन्यत्[४]; तथा, त्वयापि तदेव देयम् इति भावः. एतदेव दृष्टान्तद्वयं स्वभजने निर्दोषत्वं मर्यादारीत्यापि बोधयति इति आहुः **नहि ...** इति, लौकिकपतिव्रतानामपि न देवभजनेन[५] व्यभिचारः. नहि देवभजनकर्त्र्यः पत्या परित्यज्यन्ते, नवा तासां नरकः; प्रत्युत, पत्यादिभिः अन्यैः च विशेषतो सम्मान्यन्तइति कुतो अस्माकं तद् दोषावहं भविष्यति! इति भावः. किञ्च **आदिपुरुषः** च अस्माकं **भवान्**, प्रथमतः त्वयैव परिगृहीतत्वात्, "कल्पं सारस्वतं प्राप्य" इति वाक्यात्. अतः कदाचिद् अस्माकं दुःसङ्गदोषाद् वैदिकधर्मनिष्ठतया वा त्वदनङ्गीकारो लौकिककुलटानामिव उचितो नतु तासां स्वपतिप्राप्तौ[६] तदभजनमिव त्वदभजनम्. इतःपर्यन्तं त्वदप्राप्त्यैव अन्यभजनं बहिरङ्गधर्मनिष्ठतया कृतं त्वत्प्राप्तौ कथं तद् विधेयम्? इति भावः. अथवा

१. तस्य महत्त्वम् इति मुद्रितपाठः. २. लौकिकपत्यादिभ्योऽपि इति मुद्रितपाठः. ३. भगवान् इति मुद्रितपाठः. ४. अन्यथा इति मुद्रितपाठः. ५. तद्देवभजने इति मुद्रितपाठः. ६. सम्पत्तिप्राप्तौ इति मुद्रितपाठस्तु अशुद्धः.

लोकरीत्यापि भ्रष्टा जारपरिग्रहे, ततः तस्यैव परित्यागो नतु आदिपुरुषस्येति तदेव दोषावहं, न त्वद्भजनं; प्रत्युत तत्तद्दोषानिवर्तकमपि इति भावः. किञ्च पुरुषोत्तमत्वानङ्गीकृतावपि अनया रीत्या भवान् आदिपुरुषइति, स यथा इतरभजनं न सहते, ज्ञातेऽपि तस्मिन् कुप्यति, कुतः तत्र प्रेरणम्![1] त्वयापि तथैव कार्यं, न वयम् अन्यत्र प्रेषणीयाः इति लोकरीत्यापि स्वामिबोधनम् इति भावः. इदन्तु उपपत्तिरूपं लोकरीत्या उक्तं, वस्तुतस्तु इदम् अस्माकं शृणु इति आशयेन दृष्टान्तम् आहुः **यथा मुमुक्षून्** इति, यथा मुमुक्षवो गृहे अनासक्ताः हेयबुद्धयो निर्लेपाः विरक्ताः सर्वभोगविवर्जिताः नाममात्रेण साधनदशायां तत्र स्थिताः, भक्तिमार्गीयत्वात्, वस्तुतः संन्यासिनएव, तथा वयमिति अस्मान् विचार्य, यथा तान् आत्मीयान् कुरुषे, स्वसेवकत्वेन स्थापयसि, "मुक्तोपसृप्यव्यपदेशाद्" इति न्यायात्, पुनः तेषाम् आत्मत्वेन स्फुरसि, बहिःसंवेदनं नाशयसि, ततो हृदयस्थितो बहिर् आविर्भवसि, ततः स्वानन्दं तेभ्यः प्रयच्छसि, न पुनः पूर्वावस्थां सम्पादयसि, तमेव स्वदत्तम् आनन्दं उत्तरोत्तरं पोषयसि, तथा अस्मासु विधेयम्! इति भावः.

फलत्वेन स्वभावैकविचारं सर्वथा सदा।
स्वामिन्यः कृपया दासे कुर्वन्त्वाचार्यचेतसि॥

### ॥ यर्ह्यम्बुजाक्ष तव पादतलम् (सुबो.१०।२६।३६)इत्यत्र॥*

श्रीहरिः. ननु पूर्वं कथं स्थिताः गोपगृहेषु भवत्यः? इदानीमेव कथम् अशक्तिः अन्यसमक्षस्थितौ! इति आशङ्क्य आहुः **शक्त्यभावः** इत्यादि, अत्र अयं भावः : पूर्वं गोकुले स्थिताः, तत्रच बाललीलायां चौर्यादिषु भगवत्सम्बन्धेऽपि "भगवान् अस्मद्गृहे समायास्यति चौर्येण"-इति गृहएव स्थिताः. स्वसमर्पणीय-नवनीतादि-साधकतया पत्यादिषु न विरुद्धबुद्धिरिति तत्समक्षमपि स्थितिः. तदानीं गृहस्थित्या अस्मद्गृहे तत्र भगवान् आयातीति स्वभावएव स्थितो, न केवलभगवद्भावो. यत्प्रभृति वृन्दावने समागताः, वृन्दावनञ्च "यद् देवकीसुतपादाम्बुजलब्धलक्ष्मि" इति वाक्यात्. **पादतलम्** इति तत्स्पर्शे वनेएव भगवान् दशरसप्रादुर्भावेन क्रीडतीति

१. प्रेषणम् इति मुद्रितपाठः.



व्याजादिना तत्रैव गन्तव्यं, न गृहे स्थातव्यं गृहस्थाश्च तत्र गमने बाधका इत्यतएव गूढाभिसरणम्. ततः केवलभावप्राकट्ये वृन्दावनएव ...दिलीला "निशामुखेषु" इति वाक्याद् भगवदर्थार्षा(!)दिभिसरणेन भगवत्सम्बन्धस्य जातत्वात् लक्ष्मीवद् अनन्यत्वे स्फुरिते अन्येषु बाधकत्वस्य स्फूर्तिः जातेति तत्समक्षम् इदानीं स्थातुं न शक्नुमः. यथा देहादिभावप्राकट्यएव व्याघ्राद्यग्रे स्थित्यशक्तिः न ज्ञानिनामिव तन्निवृत्तिः; तथा, पूर्वं तथा भगवत्सम्बन्धाभावेन गोपेषु सहजविरागाद् न भगवदीयत्वेन देहाद्यध्यासः स्थितइति न बाधकत्वबुद्धिः अभूत्. इदानीन्तु वृन्दावने त्वत्सम्बन्धात् सा जातेति तत्र स्थातुम् अशक्तिरिति स्वामिनीनां निगूढाशयो अवगन्तव्यः. अतएव "अभिरमिता..." इति उक्तं वृन्दावनात्मक-पादतलस्पर्शोत्तरमेव. एतेन त्यागाभावेऽपि तथारमणकर्तुः त्यागोत्तरं कथम् एवं कथनम् इति सूचितम्. तां(तस्यै!) रमायाः सुखं तनैव दत्तम् इति व्रजे तस्याः चरणतलसम्बन्धेनैव सुखम्—अस्माकन्तु "अभिरमिता..."इत्युक्तस्वरूपेणापि. अतएव उक्तम् अग्रे सर्वदैव स्वप्ने त्वत्सम्बन्धम् इति सर्वदा. एवं सति सापि वैकुण्ठे भवन्तं विना स्थातुम् अशक्तेति भगवत्स्थानं वैकुण्ठं विहाय यत्र भगवान्—तत्र तिष्ठतीति, स्वरूपसम्बन्धिन्यो वयं कथम् अन्यगृहेषु स्थातुं शक्नुमः! इति भावो ज्ञापितः इति ज्ञेयम्.

### ॥ क्रिया सर्वापि सैवात्र परं कामो न (सुबो.कारि.१०।२६।४२।१७) इत्यत्र॥

श्रीवल्लभाधीशांघ्रिसरसिजेभ्यो नमः. ननु अत्र भगवतः कामलीला निरूप्यते सा अनुपपन्ना, कामस्य प्राकृतशरीराधारत्वनियमेन भगवति तादृशतद्वत्त्वापातात्. नच न अयं नियमो, मोक्षदशायाम् आधिदैविकदेहवतो जीवस्यापि "यदा सर्वे प्रलीयन्ते" इति श्रुत्या तन्निवृत्तिश्रवणात्. "सोऽश्नुते सर्वान्" इति भगवति प्रविष्टानां तेन सह स्वरूपात्मकतदनुभवएव. अन्यथा अन्तर्गृहगतानां गोपीनां कामः प्रतिबन्धको न उच्येत. नच अप्राकृतविग्रहे अप्राकृतः स इति वाच्यं, स्वरूपातिरिक्तस्य तथाविधस्य तस्य अप्रसिद्धेः. नच एवमपि वक्तुं शक्यं नास्त्येव सइति, तदनुकूलक्रियायाः सत्त्वाद्

इति आशङ्क्य समादधते—

**क्रिया सर्वापि सैवात्र परं कामो न विद्यते॥१७॥**
**तासां कामस्य सम्पूर्तिर् निष्कामेनेति तास् तथा॥**

**क्रिया सर्वापि** इति, भगवतो ''रसो वै स'' इति श्रुत्या ''साक्षान्मन्मथमन्मथः'' इत्युक्तेः च रसात्मकत्वाद्. अत्र भगवति **क्रिया सर्वापि सैव** या रसशास्त्रे रसाविर्भूतिहेतुत्वेन प्रसिद्धा नृत्यबन्धादिरूपा. रसस्यच स्वक्रियाभिव्यक्तस्यैव प्रकटत्वाद् भगवानपि स्वं रूपं प्रकटयितुं स्वस्य रसात्मकतां च बोधयितुम् एवं लीलां करोतीति क्रियापि तथैव इति अर्थः. अतएव उक्तं श्रीमदाचार्यैः पञ्चमाध्याये ''रसात्मकस्तु यः कामः'' इत्यादि, **रसात्मकः** इत्यनेन स्वस्वरूपात्मकः उक्तः. सतु गूढएव स्त्रीभावत्वादिति तदुद्बोधार्थमेव नृत्यबन्धादिप्राकट्यम् इति अर्थः. एतदेवच उक्तं ''वृन्दावनं सखि'' इत्यस्य आभासविवृतौ प्रभुभिरपि ''लीलैव परिचायिका'' इति, तत्तद्रसात्मकस्य स्वरूपस्य सा-सा लीलैव परिचयसम्पादिका इति अर्थः[१]. **सर्वा** इति पदम् अखिलतद्वत्त्वेन लोकवैलक्षण्यबोधनाय[२] — नहि लोके क्वचिदपि तथाविध-सकल-क्रियावत्त्वम् उपलभ्यते[३] **अपि**शब्दः सरसतासिद्धये उत्कृष्टापकृष्ट-समस्त-तत्सत्त्वबोधनाय. **एव**कारो अत्र एतदन्यतद-सत्त्वज्ञापनाय[४]. अंशतोऽपि अन्यक्रियासत्त्वे रसात्मकता न स्यात्. एवं सति भगवतो या काचित् लीला **सा सर्वापि** तत्तद्रसात्मक-स्वरूपाविर्भूतिहेतु-मूलक्रियारूपैव[५] इति मन्तव्यम्. अन्यथा पुरुषोत्तमस्य प्राकृतानुकरणं लीलायां[६] बाध्येत. वस्तुतस्तु [७]भ्रममात्रम् अन्येषां[७] न तत् प्राकृतानुकरणं भगवतः[८] किन्तु रसात्मनः तदभिव्यञ्जकक्रियाविशिष्टं[९] रूपमेव तथा इति अर्थः. ननु एवंविधक्रियावत्त्वे भगवतो लोके सा कामवत्ससमानाधिकरणा दृष्टेति अत्रापि कामसिद्धौ पूर्वोक्तदूषणापातः इति आहुः **परं कामः** इति, सन्तु ताएव क्रियाः, तथापि न दोषो, अजन्यत्वात् तासाम्. नहि भगवत्स्वरूपे

१. भावः इति मुं.वि.पाठः. २. वैलक्षण्याय इति मुद्रितपाठः. ३. उपलक्ष्यते इति मुद्रितपाठः. ४. अवगमाय इति मुं.वि.पाठः. ५. -स्वस्वरूपात्मकाविर्भावाय इति मुद्रितपाठः. ६. लीलायाम् इत्यधिकं मुं.वि.पाठानुसारेण. ७. इत्यधिकं मुं.वि.पाठे. ८. इत्यधिकं मुं.वि.पाठे. ९. तद्रसस्य विशिष्टम् इति मुद्रितपाठः.



आनन्दमात्रे अन्यद् अस्ति किञ्चित्. तत्स्वस्वरूपमेव भक्तभावम् उपलभ्य तथा-तथा भवतीति सिद्धान्तस्य ''विनानुवादं नच तन्मनीषितम्'' इत्यत्र निरूपणात्. व्यासैरपि अभिहितम् ''आह च तन्मात्रम्'' इति. ननु कथम् अजन्यत्वं तल्लीलानाम्! इति आशङ्क्य तद् उपपादयन्ति कामो अत्र न विद्यते इति, लोके तद्धेतुत्वेन अभिमतः कामो अत्र न विद्यते, प्रभोरेव तद्रूपत्वात्, ''साक्षान्मन्मथमन्मथः'' इति वाक्यात्. नहि भगवतो 'विग्रहे-कामः' — 'विग्रहः-कामः' इतितु सुवचम्. एतेन हेत्वभावेन अजन्यतया तत्क्रियाणां नित्यत्वम् अलौकिकत्वं स्वरूपात्मकत्वं च समर्थितम्. एवं[१]विधलीलाकरणेऽपि भगवतो निष्कामत्वम् अप्राकृतत्वं च उक्तम्. अतएव कामाभावादेव न लौकिककामुकवत् सापेक्षता भगवतः प्रत्युत मानः च. गीतगोविन्दाद्युक्तप्रकारेण लौकिकीषु रात्रिषु रमणे सापेक्षता च तद्रसस्वरूपस्य तथात्वबोधनाय. तत्र[२] लौकिकत्वंहि लोकनिर्वचनीयत्वं नतु लोकसिद्धत्वम्, लोके रसस्यैव अभावात्. ''दर्शयन् कामिनां दैन्यम्'' इत्यत्र तथा निरूपणात्. लोकानान्तु महाराजलीलानुकरणे बालानां तदभिमानइव सरसताभिमानमात्रम् इति निगर्वः. ननु भक्तानान्तु कामसत्त्वेन सकामत्वं प्राकृतत्वं च दुष्परिहरमिति तत्सम्बन्धेन भगवतो लीलायाः चापि[३] तथात्वं सिध्येद् इति आशङ्क्य आहुः तासां कामस्य इति, तासां स्वामिनीनां यः कामः सोऽपि स्वरूपात्मकएव, न लौकिको, यतो निष्कामेन आधेयतासम्बन्धेन कामाभाववता सम्यक् सर्वभावेन तस्य पूर्तिः इति. प्रतिमायां स्वरूपस्थित्या तत्त्वमिव तास्वपि स्वरूपात्मककामस्थित्या तद्रूपत्वमिति ताः स्वामिन्योऽपि तथा भगवानिव अप्राकृतविग्रहाः निष्कामाः च इति तथाभूतासु रमणाद्[४] न अंशतोऽपि लीलायाः स्वरूपस्य च प्राकृतत्वशङ्का इति अर्थः. अतएव दृश्यन्ते अत्र सर्वत्र तथाविधान्येव तासां वचांसि ''सन्त्यज्य सर्वविषयान्'' इत्यादीनि. नहि कामिन्य एवं वदन्ति किन्तु भक्ताएव. नवा भगवतो अन्यः सर्वथा निरपेक्षो भवति, वैराग्याभावात्[५]. [६]द्वितीयाध्योक्तसापेक्षतातु स्वामिनीभावे भगवतो विप्रयोगरसाविर्भात्[६] तद्धर्माविर्भावरूपा इति भावः.

१.एतेनैव विविधलीला- इति मुं.वि.पाठः. २. इत्यधिकं मुं.वि.पाठे.३. अपि इत्यधिकं मुं.वि.पाठे. ४. रमणे इति मुं.वि.पाठः. ५. इत्यधिकं मुं.वि.पाठे. ६. द्वितीयाध्यायीयसापेक्षतातु भगवतइव उत्तररसप्राकट्ये इति मुद्रितपाठः.

ननु एवमपि भक्तानाम् अलौकिककामवत्त्वे किं प्रमाणम्? भगवतः परमकृपालोः अन्यथाकर्तुमपि समर्थत्वेन तदर्थं प्राकृतविग्रहं कामं च स्वीकृत्य प्राकृतमपि तदीयं तं पूरयेद् इति आशङ्क्य आहुः —

**कामेन पूरितः कामः संसारं जनयेत् स्फुटम्॥१८॥**
**कामाभावेन पूर्णस्तु निष्कामः स्यान्न संशयः॥**

**कामेन** इति, **कामेन** आधेयरूपेण स्वरूपभिन्नेन **पूरितः** प्राकृतः **कामः संसारं** पुत्रपौत्रादिसम्पत्त्या विशेषाहन्ताममतात्मकं **जनयेत्** नतु तद्भावरूपं केवलं दास्यम् इति अर्थः[1], [2]''न जातु कामः कामानाम्'' इति वाक्यात्. कामादेव हि संसारो ''नवा अरे पुत्राणां कामाय पुत्राः प्रियाः भवन्ति'' इत्यादिश्रुतेः[2] **कामाभावेन** कामस्य आधेयस्य अभावो यत्र तादृशेन स्वरूपात्मकेन[3] **पूर्णस्तु** कामो **निष्कामः** आधेयकामरहितः स्वरूपात्मकएव **स्यात्** [4]**न प्राकृतः तेन तत्पूरणासम्भवाद् इति भावः.**[4] अतएव तादृशकामवतीनां यथा-यथा अग्रे भगवतो विशेषलीला तथा-तथा दृश्यते अत्यन्तनिरपेक्षतैव. यतो भगवतोऽपि अग्रे निरपेक्षाः जाताः, स्वतन्त्रभक्त्यैव स्थितत्वात्[5]. यदि लौकिकएव कामः स्यात् तदा नैवं स्याद् इति स्वरूपात्मककामवत्यएव एताः इति सर्वम् अनवद्यम्.

ननु एवं भगवतो भक्तानां च निष्कामत्वे रसशास्त्रमर्यादा भज्येत, कामवतोरेव तत्र तथाभावनिरूपणाद् इति आशङ्क्य आहुः —

**अतो न कापि मर्यादा भग्ना मोक्षफलापि च॥१९॥**
**अत एतच्छ्रुतौ लोको निष्कामः सर्वथा भवेत्॥**

अतो न कापि इति, यतो भगवानेव कामः स्वस्वरूपमेव विग्रहरूपेण कामरूपेण च आविर्भाव्य भक्तेषु च स्वस्वरूपं प्रतिष्ठाप्य प्रसादरूपशक्तिप्रवेशेन स्त्रीभावं दत्वा स्वस्वरूपस्य च तत्सम्बन्धित्वं विधाय स्वस्वरूपात्मिकाभिः

१. तदभावम् इति मुद्रितपाठः. २. एतत्संख्यांकितोंऽशः मुं.वि.पाठे अधिकः. ३. स्वरूपेण इति मुद्रितपाठः. ४. इत्यधिकं मुं.वि.पाठे. ५. स्थिताः इति मुद्रितपाठः.



सह रमतइति अतो रसमर्यादा निष्कामत्वात् मोक्षफलापि सा न भग्ना इति अर्थः. अतः एतच्छ्रुतौ इति, यतो न इयं कामलीला अपितु स्वरूपानन्ददानलक्षणा सा, अतः अतएव लीलाश्रवणेनैव[1] लोकः साधारणोऽपि निष्कामएव सर्वथा सर्वप्रकारेण भवेत्.

ननु एवम् अप्राकृतत्वम् अविदुषां काव्यादिश्रवणइव एतच्छ्रवणेऽपि कामोद्बोधएव स्याद् इति आशङ्क्य आहुः —

**भगवच्चरितं सर्वं यतो निष्काममीर्यते॥२०॥**
**अतः कामस्य नोद्बोधः ततः शुकवचः स्फुटम्॥**

**भगवच्चरितम्** इति, **यतः सर्वमेव** भगवतः परमकाष्ठापन्नस्य **चरितम्, अतो निष्काममेव** भागवते **ईर्यते** कथ्यते, ''अभयमिच्छता'' इति वाक्यात् तच्छ्रवणादौ तेषामेव अधिकारित्वनिरूपणात्. प्रभोः निष्कामतायाः पूर्वं प्रतिपादितत्वात् [2]चरित्रेऽपि तथात्वस्य औचित्याद्[2] नहि भगवान् परमकाष्ठापन्नः शरीरं गृह्णाति नवा कामं नवा तच्चेष्टां, यतो ज्ञानिनोऽपि न तत् परिगृह्णन्ति[3], तस्मात् भगवतः चरितं **निष्काममेव** स्वरूपानन्ददानरूपमेवेति साधारणानामपि ज्ञानसम्भवाद् एतच्छ्रवणे क्व कामोद्बोधसम्भावना, प्रत्युत अप्राकृतत्वनिष्कामत्वादिज्ञानं च तत्स्वरूपे लीलायां च सेत्स्यति इति अर्थः. अतएव शुकोऽपि [4]फलत्वेनैव लीलाश्रवणस्य कामाभावमेव ''कामं हृद्रोगमाश्वपहिनोति'' इति वाक्येनहि आहेति तद्वाक्यमपि तथा **स्फुटम्**[4] **इति सर्वम् अनवद्यम्.**

**श्रीमदाचार्यदासेन हरिदासेन रूपितः।**
**अर्थः स्वाचार्यवाक्यानां स एवेशः[5] प्रसीदतु॥**
[6]**कारिका श्रीमदाचार्यैः क्रिया सर्वेति योदिता।**
**फलप्रकरणे दासो हरेर्व्याख्यातवान् हि ताम्॥**[6]

॥इति श्रीहरिदासविरचित स्वाचार्यकारिकाशयविवरणम्॥

१. एतच्छ्रवणेन वेदान्तश्रवणेनैव इति मुद्रितपाठः. २. इत्यधिकं मुं.वि.पाठे. ३. तत् त्यजन्ति इति मुद्रितपाठः. ४. प्रवृत्तः परित्यज्य ज्ञाननिष्ठां, प्राह च ''कामं हृद्रोगम्'' इति प्रकरणान्ते स्फुटम् एवं वाक्यम् इति मुद्रिते पाठान्तरम् ५. एवेषः इति पाठः इति आद्यसम्पादकीया पादटिप्पणी. ६. एतत्संख्यांकितोंऽशः मुं.वि.पाठे अधिकः.

॥ तत्रैवान्तरधीयत (सुबो.१०।२६।४८) इत्यत्र॥

श्रीहरिः. **यूथमध्ये वा** इति, अत्र एवकारेण यत्र यूथेऽपि सौभगमदमानौ दृष्टौ तत्र तथा कृतवान् अतः कस्याश्चिन् मदमानयोः अभावेन यूथबहिर्भावे प्राकट्येनापि स्थितिरिति गम्यते. अतएव ''यां गोपीमनयत् कृष्णः'' इति सङ्गच्छते. सजातीयभावेनहि यूथो, तद्बहिर्भावस्तु तद्विजातीयभावेन, साम्प्रतं सौभगमदेनैव सर्वासाम् एकजातीयत्वम्. अतो यत्र स नाभूत् तत्र प्राकट्येनापि स्थितिरिति ''यां गोपीमनयद्'' इत्यनेन उक्तम्. ननु तत्र मदानुत्पत्तौ किं कारणम्? इति चेत्, तदाकाङ्क्षायाः अपूरणाद् इति बुध्यस्व. तत्र समुदायरमणमेव अभूदिति तत्र रमणाकाङ्क्षैव स्थितेति न स्वस्मिन् पूर्णत्वमाननम् अतो मदाभावेन प्रशमनीयाभावात् न तत्र अन्तर्धानम्. ननु पश्चात् कथं मानोत्पत्तिः? सम्बन्धस्य तुल्यत्वेऽपि प्रकारविशेषाकाङ्क्षापूरणाद् इति अवेहि. अतएव आचार्यैः तत्र 'गोपी'पदेन मुग्धभावः उक्तो, न प्रौढभावः, अत्रतु ''एवं व्रजस्त्रियः''इतिवाक्यात् स्त्रीत्वेन प्रौढभावः उक्तः. अतः प्रौढानामेव सङ्कोचाभावेन समुदायरमणे स्वमनोरथपूर्तिः, मुग्धायास्तु अप्रौढ्याद् अग्रे यत्नासम्भवेन समुदायरमणे स्वमनोरथापूर्तिरिति प्रत्येकरमणाकाङ्क्षैव स्थितेति तदपूरणे मदाभावः उचितः इति भावः. किञ्च मानोहि द्विविधः : प्रियसम्बन्धि-परमानन्दप्राप्ति-जनिततृप्त्या निरपेक्षत्वेन, स्वस्मिन् अतिशयित-प्रियकृपावत्त्वज्ञानेन च. तत्र सर्वासु रसशास्त्रीयाखिलक्रियाभिः रसात्मकाखिलप्र-भुधर्मविशेन भगवतइव निरपेक्षत्वात् तत्सम्भवः. अतएव ''भुवि स्त्रीणां मध्ये आत्मानं पूर्णं मेनिरे मानिन्यश्च जाताः'' इति उक्तम्. तस्यान्तु ''हित्वा गोपीः'' इति वाक्यात् स्वस्मिन् कृपातिशयसत्त्वज्ञानेन तदुत्पत्तिः. प्रभुस्तु उभयविधोऽपि स सर्वात्मभावविरोधी इति ज्ञापयितुम् उभयविधमपि तं दूरीकृतवान् इति वक्तुं ''यां गोपीमनयद्'' इति उक्तम् इति भावः.

कृपा मयि स्वाचार्याणां साधनाभाववत्यपि।<br>
यादृशी तामहं नैव जाने जीवस्वभावतः॥<br>
समर्था सा कृपात्वेन मामज्ञमपि सर्वथा।<br>
सामर्थ्यमपि सम्पाद्य स्वात्मानं ज्ञापयिष्यति॥



॥ तद् विष्णोः परमं पदम्... (सुबो.१०।२७।२४) इत्यत्र॥*

...इति न अस्माभिः अत्र विस्तरणीयः. तथापि तदध्ययनम् आधुनिकानां सर्वेषां दुर्घटमिति ततएव तमेव अर्थं संक्षेपतो (सा!)अनुक्रमं वदामः. तथाहि — हे भगवान्, तेतव ''तेतावनिसुप्तिङ्पदग्रहलिङ्गनराणाम्'' (        ) इति अनुशासनात् लिङ्गव्यत्ययः. **धामानि** क्रीडास्थानानि **गमध्ये** प्राप्तुं कामयामहे. तानि कानि? इति आकाङ्क्षायां गूढाभिसन्धिम् उद्घाटयति **यत्र** श्रीगोकुले **भूरिशृङ्गाः** दीर्घशृङ्गाः गावो वसन्तीति शेषः. अथवा आरण्य-ग्राम्य-पशूपलक्षणार्थं भूरिशृङ्गाः बहुशृङ्गाः रुरुप्रभृतयो मृगाः गावः च तथा. कीदृशाः **अयासः?** शुभाः शोभावहाः शोभाधायिकाः इति यावत्. 'तस्य' इति शेषः. **अत्र** स्थाने भूमौ. तथापि स्वस्य तादृग्भाग्याभावात् दृग्गोचराः न भवन्तीति खेदेन आह **इति आह** श्रुतिः. **तद्** लोकवेदप्रसिद्धं **उरगायस्य** उरुकीर्तिभगवतो **विष्णोः** व्यापकस्य. अतएव भूरेः बहुरूपस्य रासोत्सवादौ तथाप्राकट्यात्. **तत्** श्रीगोकुलं **परमं-पदं** स्थानं वैकुण्ठपदं तस्मादपि अधिकम्. **परमं-पदं** प्रकृतिकालाद्यतीतत्वेनापि, वैकुण्ठाद्यपेक्षया अतिप्रियत्वेनापि परमं, तादृशपदम् **अवभाति** प्रकाशते. अत्र स्वयं नित्या श्रुतिः **इव(ह!) भवति** इति वदन्ती स्वभानविषयस्य श्रीगोकुलस्यापि नित्यत्वमेव ब्रूते. अन्येषाम् अनवभानपक्षेऽपि वर्तमानप्रयोगतो विषयस्यापि तत्त्वमेव आयाति इति भावः. एतदनन्तरमेव च **विष्णोः कर्माणि** इति पठ्यते. तथाच पूर्वस्मिन् मन्त्रे ''यत्र भूरिशृङ्गाः अयास तत् तस्य परमं पदम्'' इति उक्ता. तत्र तदनन्तरकृता **विष्णोः कर्माणि** यशोदास्तनपान-पूतनासुपयःपान-रिंगणादीनि पश्यत. 'यूयम्' इति शेषः. **यतः** कर्मभ्यो हेतुभूतेभ्यो व्रतानि कात्यायन्यर्चनादीनि सान्निध्याद् विष्णुरेव **पस्पशे** स्पृष्टवान्. अयं भावः — तत्फलत्वेन तत्कर्त्रीषु आविर्भूय तासु सर्वां लीलां कृतवानिति '' 'स्पश'बाधनस्पर्शनयोः'' (पाणि.धा.पा.९१२) इति धातो लिटि रूपम्. यद्वा अयं धातुः उभयार्थकः, **तानि**लोकमर्यादाव्रतानि पातिव्रत्यादीनि बबाधे. अयंम् अर्थो : वेदमर्यादात्याजकानां कर्मणां सदोषत्वशङ्कापरिहाराय **यतः** इति अव्ययप्रयोगः, तथाच एतत्कर्मणाम् अविकृतत्वम् उक्तम्. किञ्च स्वव्रतानि आत्मारामत्व-पूर्णकामत्वादीनि नियमरूपाणि बबाधे. अस्मिन् अर्थे 'नञ्'प्रश्लेषे व्रतानि स्पृष्टवान् इत्यपि अर्थो युज्यते. तदा तानि कर्माणि

गोपीभिः सह रमणरूपाणि पश्यत इति उपदेशः. अत्र कश्चन अर्थविशेषः तत्रैव उपपादितइति ततएव स परिभावनीयो विस्तरभयतो न अत्र वितन्यते. **इन्द्रस्य युजो** योगो अनुकूलः **सखा.** अयम् आशयः : प्रभुणा इन्द्रयागभङ्गे कृते बहुबलाहकासाधारणवर्षेण इन्द्रेण तद्द्रोहे कृतेऽपि समर्थोऽपि तद्धेतुक-तन्मदमेव दूरीकृतवान्, नतु तं तदधिकारं वा दूरीकृतवान् इति तथा. तदनन्तरम् इन्द्राभिषेक-'गोविन्द'-नामधारणादिभिः तत्समानधर्मा अतः तथा. एवं निरूप्य **तत्** पूर्वोक्तं **विष्णोः** स्थानं **परमपदं सूरयो** विद्वांसः, तत्त्वञ्च शब्दब्रह्म-परब्रह्मस्वरूपवित्त्वम्. तत्र परब्रह्मावबोधस्तु भक्त्यैव इति सिद्धान्तो, "भक्त्या मामभिजानाति, भक्त्याहमेकया ग्राह्यः" इत्यादिवाक्यैः. **सूरयो**भक्ताएव किन्तु अत्र आह **तदुरुगायस्य** इति **सूरयः सदा पश्यन्ति** इति वाक्यैकवाक्यतायां भूमौ परमं पदं भक्ताएव सदा पश्यन्ति इति अर्थो अवसीयते. एवञ्च कानन-कालिन्दी-तत्पुलिन-गिरिवर-गह्वराद्यात्मत्वेन उद्भुतरूपवद् महत् च. ततश्च चाक्षुषं द्रव्यात्मकं च तत् परमं पदं कथं, भक्तैकदृश्यमेव, न साधारणगोचरम्! इति आकाङ्क्षायां दृष्टान्तम् आह **दिविव चक्षुरातम्** इति, **दिवि**स्वर्गो यथा आसमन्ताद् **ततं** व्याप्तं, "यन्न दुःखेन संभिन्नम्" इति वाक्यात्. सुखैकसाधनतद्रूपं तत्पदार्थं तत्रस्थानामेव चक्षुः पश्यति नान्येषां तथा एतल्लीलामध्यवर्तिनामेव दृश्यम् इति अर्थः.

**॥ जयति तेऽधिकं जन्मना व्रज (सुबो.१०।२८।१) इत्यत्र॥**

श्रीहरिः. तृतीये अध्याये "**जयति तेऽधिकं जन्मना व्रज**" इत्यादिवाक्यवक्तृनिर्णये : पूर्वं वाक्यचतुष्टयेन सपूर्वाः उक्ताः, ततः तच्चतुष्टयेन असपूर्वाः उच्यन्ते. तत्र तद्वाक्येषु विवरणग्रन्थानुसारेण संग्रहकारिकोक्तः पाठक्रमो न विवक्षितः इति ज्ञेयम्. तत्र "**विरचिताभयम्**" इत्यनेन केवलसात्त्विक्यो निरूपिताः, तत्र धाष्टर्यस्य स्पष्टनिरूपणाद्यभावात्. "**व्रजजनार्तिहन्**" इत्यनेन धाष्टर्यात् तामस्यः उक्ताः. "**प्रणतदेहिनाम्**" इत्यनेन किञ्चिद् व्यक्ततया निरूपणाद् राजस्यः. "**मधुरया**" इत्यनेन सकलस्वामिन्यर्थे प्रार्थनात् स्वदासीत्वनिरूपणात् च गुणातीताः उच्यन्तइति अन्यपूर्वावद् अत्रापि क्रमो ज्ञेयः इति अर्थः. गुणातीतभावस्य कामरसाभिनिविष्टानां



प्रथमम् अनुदयाद् इति सर्वत्र पश्चात् तन्निरूपणे तात्पर्यं ज्ञेयम्.

**॥ सुरतनाथ ते (सुबो.१०।२८।२) इत्यत्र॥***

**सुरतं संभोगः** इत्यादेः अयम् अर्थः : रतं लौकिक-'भोग'-शब्दवाच्यम्. तत्तु सृष्टिम् आरभ्य प्रवर्तते. तत्र (न!) भगवदाज्ञापेक्षा, सृष्टिसमानयोगक्षेमत्वात् तस्य. एवं सति सुष्ठु अलौकिकं शोभनरूपं यद् रतं तत् 'सम्यग्भोग'शब्दवाच्यं, तद् अस्मास्वेव त्वदाज्ञापेक्षया इति यावत्, त्वयैव प्रवर्तते. यतो जगत्, लौकिकं, गच्छति=नश्यत्येव नतु स्थिरम्. अतो अत्यलौकिकस्वरूपानन्दरूपं तत्र प्रकटीभवितुं न अर्हति. एतादृशस्य तस्य भवानेव **नाथः** प्रवर्तको रक्षकः च. एवं सति (स!) रसः चेत् त्वय्येव निरुद्धः तिष्ठेत्, तदातु अलौकि(क)कामतः प्रतिबन्ध(न्धा!)निवृत्तिः. अतएव अग्रे "विखनसार्थित..." इति वक्ष्यते. कामो भगवदीयो, मनसः पूर्वरूपत्वाद्, वाच्यः उत्तररूपत्वाद् "मनश्चक्रे" इति उक्तम्.

**॥ अन्तःस्थितो...वाग्-निर्गमस्तथा (सुबो.कारि.१०।२८।२) इत्यत्र॥***

"जगौ कलं वामदृशां मनोहरं" "ता दृष्ट्वान्तिकम्" इत्यादिकं वाग्रूपम् अलौकिकभावात्मकत्वात् तासामपि आज्ञारूपत्वम् इति आशयः. तैरेव वचनैः प्रतिबन्धनिवृत्तिरपि.

**॥ न खलु गोपिकानन्दनो भवान् (सुबो.१०।२८।४) इत्यत्र॥**

**भगवतो नन्दसूनुत्व...** इत्यादि. तत्र अयम् आशयो–अत्र पद्ये गुणातीतभावाः स्वामिन्यो वक्त्र्यः उच्यन्ते. सच भावः केवलभगवत्स्वरूपएव उच्यते, "मन्निष्ठं निर्गुणं स्मृतम्" इति वाक्यात्. तस्मिन् सति भगवत्स्वरूपं वस्तुतो यादृशं तादृशमेव भासते भावविषयत्वेन, नतु स्वभावाधीनाविर्भवनम्.

तदानीमेव तथाविर्भूतं तथाच 'गोपिकानन्दन' इति निषेधार्थम् अनुवादेऽपि स्वामिनीतात्पर्यविषयतया तेन पदेन नन्दसूनुरेव वाच्यो, भगवति स्वतो गोपिकानन्दनत्वाभावाद् नन्दएव लीलार्थम् आविर्भावावसरे पुत्रत्वबुद्धेः उत्पादितत्वात्. ततएव जन्मोत्सवकरणं तथा बुद्ध्या, "स्वपुत्रस्योदयाय च" इति वाक्यात्. अतएव "नन्दस्त्वात्मज उत्पन्ने" इति भगवत्कृत्यनुवादकं शुकवचः. स्वज्ञानानुसारेण अनुवादे भगवल्लीलावक्तृत्वं शुकस्य न स्यात्, भगवत्कृतलीलोपयोगिपुत्रत्वबुद्धेः अननुवादात्. यशोदापुत्रत्वन्तु प्रभौ स्वामिनी-भावविषयत्वेन, "गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवम्" इति वाक्येन तासां तथाविध-भगवद्भाव-निरूपणात्. नन्दसुतत्वन्तु द्रोणदत्तात्मभूवरसार्थक-त्वाय भगवता स्वयमेव प्रकटितं, अवतारस्य अलौकिकरीत्यैव सम्पत्तिः इति ज्ञापनाय च. अन्यथा मातुः पुत्रत्वेन जनने लौकिक्येव रीतिः स्यात्. अतएव आचार्यैः "नन्दस्त्वात्मज उत्पन्ने" इति ग्रन्थसन्दर्भे "पितुः पुत्रो, अतो नन्दो जातकर्म कारयामासेति सम्बन्ध" इति उक्तम्. लौकिकरीत्या जननन्तु न भगवति पुरुषोत्तमे सम्भावितम्, अलौकिकत्वात्. तादृशेहि प्राकट्यस्यैव 'जन्म' शब्दवाच्यत्वात्. अतएव उक्तं "नित्यापरिच्छिन्नतनौ प्राकट्यं चेति सा त्रिधा" इति. अतो मायावेष्टितस्यैव यशोदायां भगवतः स्थितिरिति तस्याएव ततः साक्षाद् जन्म, भगवांस्तु आवृतएव जातो, मायागमनपर्यन्तं च तथैव स्थितइति न यशोदायाः जननसमये भगवति सुतत्वबुद्धिः. अनावृतप्राकट्यन्तु पश्चाद् आवरकगमनोत्तरमिति पुत्रत्वं नन्दभावविषयत्वेनैव. अन्यथा श्रीनन्दस्येव मातृणामपि आत्मजबुद्धिः उच्येत. तत्रतु "जातं परम् अबुध्यत" इति वाक्यात् सामान्यतो जननज्ञानं नतु भगवद्विषयकम्. अन्यथा भगवति साक्षाद् आविर्भूते तद्भावे च सति निद्रारूपं मायाकार्यं कथम् उपपद्येत? देवक्यान्तु प्रद्युम्नांशेनापि पुत्रत्वं, प्रकृतेतु मायावरणात् न तथा. व्यूहानामपि अत्र अप्राकट्यात्. तत्कार्यस्यापि वंशसम्बन्धस्य अत्र अचिकीर्षितत्वात्. अतएव उक्तं विवृतौ प्रभुभिः "पुरुषोत्तमस्तु नन्दगृहएव मायया सह जातः" इति, जननस्य मायापर्यवसायित्वबोधनायैव तत्सहभावोक्तिः. अतएव "निरीक्ष्यमाणेऽजननी ह्यतिष्ठताम्" इत्यत्र 'नञ्'प्रश्लेषेण व्याख्यानं कृतम्. नन्देतु "नन्दः स्वपुत्रम् आदाय" इत्यत्र भगवति पुत्रभावएव उदितः. तत्रापि 'स्व'पदेन स्वसम्बन्धएव भावः, अतो न यशोदासम्बन्धः इति निरूपितम्. ननु "तन्मातरौ निजसुतौ"



इत्यत्र मात्रोः स्वसुतत्वभावानुवादः कथम् उपपद्यते? इति चेत्, न तत्र तदानीमेव बालीलाभिः भगवता निरोधार्थं पुत्रभावोत्पादनात्. अन्यथा पुत्रभावस्य सार्वदिकत्वे तत्र दुःखजनककृतिरूपम् अग्रे बन्धनं न कुर्यात्. नहि पुत्रे जनन्यः एवं कुर्वन्ति. ननु तदा पुत्रभावाभावे "स्वार्भकस्य कृतागसः" इति शुकोक्तिः न घटते! इति चेत्, न, तदा मातृचरणेषु भगवति प्राकृतइव पुत्रबुद्धिरिति अन्यथाबुद्धिनिरूपणार्थमेव तथा उक्तत्वात्. अन्यथा अग्रे भगवति पुत्रत्वाभावबोधक-दामापरिच्छेद्यत्वादि-ब्रह्मधर्मान् शुको न वदेत्. अतएव दामबन्धनानन्तरं यशोदायाः भगवति स्नेहकला निवृत्तेति निरूपितम् आचार्यैः. पूर्वमपि जननाभावेन सहजस्नेहो न स्थितइति कलात्वकथनम्. सापि बाललीलया निरोधार्थं भगवता उत्पादितैव. सिद्धे साधारणनिरोधे प्रयोजनाभावात् तन्निवर्तनम्. "शृण्वन्त्यश्रूण्यवास्राक्षीद्" इत्यत्र समाधानं "गुणानां माहात्म्यम्" इति आचार्यैः उक्तमेव, अन्यथा सहजत्वे स्नेहस्य कथं निवृत्तिः स्यात्? स्वामिनीनामिव व्यसनभावएव उदियात्. सच मुख्यरस-लीलाङ्गीकृतावेव सम्पद्यते इति भावः. अतो लीलाभिः आगन्तुकः पुत्रभावो यशोदायाः. नन्देतु प्रादुर्भावरसोत्पन्नत्वेन स्थायिभावात् सहजएव. अतएव "अहं ममासौ पतिरेष मे सुतः" इति सुतत्वबुद्धेः कुमतित्वेन गणनं श्रीयशोदायाः. श्रीनन्दादीनाम् तत्परिचायकन्तु तत्र बन्धनमोचनम्. "विलोक्य नन्दः प्रहसद्वदनो विमुमोच ह" इति वाक्यात्. अतएव श्रीनन्दस्यैव अग्रे श्रीमदुद्धवं प्रति, स्वव्यसनभावबोधकानि "स्मरतां कृष्णवीर्याणि" इत्यादिवचनानि. सर्वज्ञगर्गेणापि "तस्माद् नन्दात्मजोऽयं ते" इति निःसंशयम् अभिहितम्. "अयं वै रोहिणीपुत्रः" इत्यत्र निश्चयवाचकाव्ययप्रयोगेन भगवति यशोदापुत्रत्वे सन्देहएव उक्तः, लीलया पुत्रत्वदर्शनात्—स्वसार्वज्ञ्येन मायावृतप्रादुर्भावस्य स्फुटकरणात् च संशयोत्पत्तेः. अतएव न भगवति 'रौहिणेयः' इतिवद् 'याशोदेयः' इति मातृसम्बन्धेन नामापि, गर्गेण अप्रकटितत्वात्. 'नन्दात्मज' इतितु "तस्मात् नन्दात्मजः" इति वाक्याद् भवत्येव नाम. स्वामिनीभावविषयत्वेन यशोदासुतत्वं, देवकीसुतत्ववत्. 'देवकीजठरभूः' इतिवत् "तव सुत" इति उक्तेः. अतएव "गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवम्" इति वाक्ये शुकेनापि तद्भावविषयत्वेनैव भगवति तथात्वम् उक्तम्. तस्माद् नन्दसूनुरेव वस्तुतो भगवान् इति निर्गुणभावापन्नायाः स्वामिन्याः तात्पर्यम्. गोपिकानन्दनत्वोक्तिस्तु श्रवणकर्त्रीणां

भावः तथैवेति तद्भावम् आदाय ताः प्रति निषेधार्थं तथा अनुवादाय इति स्वामिनीतात्पर्यम् आदाय विवृतौ आचार्यचरणैः भगवतो नन्दसूनुत्वम् इति अभिहितम्. एतत्तात्पर्यविद्भिः तदीयैः अत्र निःसंशयैः भाव्यम् इति दिक्.

प्रसीदन्तु निजाचार्या मयि निःसाधने स्वतः।
स्वकीये (हरि!)दासे तु स्वसम्बन्धिकृपालवः॥

॥ प्रणतदेहिनां पापकर्षणम् ( सुबो.१०।२८।११ ) इत्यत्र॥

श्रीकृष्णाय नमः. ननु प्रणतानां कथं पापम् उपपद्यते? इति चेत्, मैवं, स्वधर्ममाहात्म्यं लोके प्रकटयितुं स्वधर्माविर्भावं कृत्वापिभ[1] दोषं नाशयति, न धर्मेणैव, तथेच्छावत्त्वात्. अतएव "दुःसह..." इत्यारभ्य "धुताशुभाः" इति उक्तम्. भोगं विना पापनाशः प्रमेयबलेन भवतीति तत्तन्नाशात् पूर्वम् अपेक्षितम्. प्रभुणा सम्बन्धाभावाद् न ततः तथा, अतः स्वधर्मलक्षणप्रमेयबलेन तान् उद्दिधीर्षुः तथा करोतीति न अनुपपन्नं किञ्चित्. शास्त्रार्थं ज्ञात्वा मनसा शरणं गताः प्रणताः. देहाभिमानित्वाद् हीनाधिकारेऽपि सति तावत्साधनं सम्पादयसि येन पदाम्बुजं प्रकटीकृत्य तादृशस्य दुःखदत्वाद् विहारात्मकं पापं तथा करोतीति न जीवकृतसाधनम् अपेक्षते. स्वतएव सर्वं करोतीति अत्रापि तथैव कार्यम् इति भावः.

यद्वा, अत्र द्वन्द्वो ज्ञेयः. सर्वत्यागपूर्वकं केवलं तदधीनत्वं नतेः प्रकर्षः. तत्र आद्यस्य विरहएव 'पाप' शब्दवाच्यो, दुःखदत्वात्. निषिद्धकर्मकृतिजंहि पापं, तद् अत्र मानरूपम्. तादृशां दुःखम् उचितं भवति परं त्वं कर्षणैकस्वभावइति तथा. द्वितीयस्य कर्मजं, तच्च श्रवणकीर्तनस्मरणादिभिः कर्षति.

यद्वा, कर्मधारयो ज्ञेयः. प्रकर्षेण नतिः सर्वात्मभावः, तस्मिन् सति प्रभौ समर्पणार्थं देहो अभिमानादिः. एतादृशानां प्रियस्वरूपातिरिक्तस्य

१. सरासे तु इति पाठः संदिग्धः. २. दोषं न नाशयति, धर्मेणैवेति पाठः.



सङ्गप्रतिबन्धकत्वेन तथात्वं मन्यते इति तथा. अतएव "विश्वतो भयाद्" इति उक्तम्. भगवद्गुणानां पुण्यरूपत्वं च वक्ष्यते "जगुः कृतानि पुण्यानि" इति. हृच्छयस्य सपदि दुःखदत्वेन तथात्वं मन्यते. तेन तत्प्रार्थनं, यद्यपि सङ्गोपयोगी, तथापि सङ्गप्रतिबन्धकमानहेतुत्वेन हेयः.

यद्वा, प्रणतो देहएव येषां, नतु अन्तःकरणादिरपि, तेषामपि तथा इति अर्थः.

यद्वा, प्रणतदेहिनां सम्बन्धिनो, नतु स्वयं प्रणताः, तादृशानामपि तथा इति अर्थः. एतेन साक्षात् परम्परयापि अनिष्टनिवर्तकत्वम् उक्तं भवति. अपरञ्च अङ्गीकृतपालने तव युक्तायुक्तविचारं न पश्यामो, यतः तृणचराणामपि अनुगम्. तज्जीवनं तृणैरेव, तानिच अमार्गेऽपि भवन्ति, स्वानुरोधेन न तान् वारयसि किन्तु ते स्वभक्ष्यं यत्रैव पश्यन्ति तत्रैव अविचारं गच्छन्ति मुञ्जाटव्यामिव, तदनु स्वयमपि गच्छसि तदधीनः सन्. एतेन अस्मज्जीवनहेतुः त्वत्पदाम्बुजं, तस्य मकरन्दो मादकइति तेनैव मानरूपोन्मार्गगमनेऽपि न उपेक्षा उचिता, यतो वयम् अङ्गीकृताः. नोचेद् जीवनमेव न सम्पत्स्यतइति अतिक्लिष्टा वयम् इति उक्तं भवति. एतेन त्वयैव इयं रीतिः प्रकटीकृतेति न अन्ततो अस्मद्दोषः इति ज्ञापितं भवति. अन्यथा कृष्णमुखनिर्गत-वेणुगीतपीयूषमुत्तभितकर्णपुटैः पूर्वं पीत्वा अतिसुखितानां लोके लौकिकत्वेन परिदृश्यमानेषु वस्तुतस्तु अलौकिकेषु तृणेषु उक्तपीयूषातुल्येषु तेषां प्रवृत्तिः कथं स्याद् यदि भवान् स्वलीलाविशेषार्थं तथा-तथा तान् न प्रवर्तयेत्! वस्तुतस्तु उक्तरूपाणां तेषां तृणे रुच्युत्पत्त्यर्थं त्वदनुगमनम्. तेन भक्तिरसपोषितानि तृणानि भवन्तीति तेषां तत्र रुचिः भवति. तादृशीषु अस्मासु स्थापने अस्माकमपि अभीष्टदं पालकं च तद् भविष्यति स्वस्वभावाद् इति भावः. अपरञ्च श्रियः स्थानं तदिति तज्जातीयासु अस्मास्वेव स्थापयितुम् उचितम्. किञ्च तस्याअपि नायिकात्वाद् रसपोषकसामयिकएव सम्बन्धो अभीष्टो, नतु तृणसंचारः. क्रमेण एतद्विशेषणद्वयोक्त्या इदम् एवं ज्ञाप्यते. अत्र स्वयं साक्षात्सम्बन्धसमयम् अलभमाना श्रीः विचारितवती, प्रभुः पशून् आतृप्ति चारयित्वा सायं व्रजं नीत्वा निशि स्वप्रियाभिः क्रीडिष्यत्येव, तदा तत्सम्बन्धेन रमणमिव

ममापि भविष्यतीति श्रियो दूरपर्यन्ते हृदयम्. तदनुगत्वेन रजसा श्रमेण च सौन्दर्याभावशङ्कापि निरस्ता द्वितीयेन. तेन यथा-यथा चारणं तथा-तथा शोभातिशयः उक्तो भवति.

अथवा तृणचरानुगमने स्नेहभरेण कण्टकादिस्पर्शशङ्कया स्वयं सूक्ष्मरूपेण चरणाम्बुजतले स्थित्वा तत्सम्बन्धं वारयतीति तदा श्रीनिकेतनं भवतीति तथा उक्तम्.

अपरञ्च यदि स्वेच्छया स्वयं नयेत् पशून्, तदा अग्रे विषपानात्मकानिष्टसम्बन्धो न स्यात्; किन्तु, ते स्वेच्छया गच्छन्ति. प्रभुः तदनु तदधीनः सन् गच्छतीति अग्रे अनिष्टसम्बन्धे तन्निवारणाय अम्बुजत्वेन अतिसुकुमारमपि पदम् अतिक्रूरेऽपि तत्र अर्पयसि. तदाहि व्रजवासिस्नेहपरीक्षायां सम्पन्नायाम् अतिसन्तोषात् तद्द्वारा सा सम्पन्नेति, तस्मिन् सन्तुष्टः तच्छिरस्सु ब्रह्मादिदुर्लभरजस्काभ्यां पदाभ्याम् अनृत्यत्. अल्पकालमात्रं तथा नृत्यमात्रं न कृतवान् किन्तु तद्रिपुभयं सार्वदिकं निवारितवान्. गरुडः सदा तच्छिरस्सु पदाम्बुजं पश्यतीति. अतएव अर्पणम् उक्तं न स्पर्शमात्रम्. अस्मत्परीक्षायाः पूर्वमेव सम्पन्नत्वात् दुःखदनिवारणमेव कार्यम्. स शयानो अन्तः चोरवद् बाधते. पदाम्बुजसम्बन्धेन अस्मद्द्वारा सोऽपि तापरहितः सन् अस्मानपि न तापयिष्यति इति भावः. 'तापयति' इति तस्मिन्नपि तापो लक्ष्यते. क्रूरे तप्ते वा स्थापितं न विकृतं भवतीति ज्ञापनाय **ते** इति, त्वं यतो अविकृतः. सर्वात्मना त्वत्परान् स्वार्थपरान् सहजदोषदुष्टानपि कृपयसीति अस्मास्वपि स्वतो दोषरहितासु कृपा कार्या इति भावः.

अपरञ्च विपरीतरसे पूर्वविशेषणवतीनाम् अतिभारेण अतिश्लेषसम्भवे तदा स्वोद्वेजकत्वेन तदिव वेणीरूपं कर्षति. "त्वाम् अहं जेष्यामि" इति जिगीषावचनेन मनसो वचसः च नतत्वाभावाद् देहमात्रम् उक्तं, पुंल्लिङ्गप्रयोगः च. तद्भावप्राधान्यात् तृणचरेषु [ इहैव अन्योऽपि लेखः श्रीहरिरायाणां : **तृणचरेषु** इत्यत्र अयं भावः — भगवान्हि गवां सङ्गे गच्छन् तृणानि भक्तिरसामृतयुतानि चरणसम्बन्धेन विधाय तन्निष्पादित-तन्निष्ठं दुग्धादिरसं स्वभोग्यं विदधाति तथा अत्र स्वभोग्यो यो रसः, पुरुषत्वेन तत्सम्पादकं यद् रसाधिक्यं,



तत्सम्पादकं चरणमिति तथा चरणे(तथाचरणे) सम्बन्धे भगवद्भोग्यपुरु(षत्वेन)सम्बन्धो अस्मासु भविष्यति इति भावः ] स्वभोग्यरससम्पादकम्. गवां तद्भक्षणेन तृणचरत्वम्. उक्तरूपाणान्तु लीलोपयोगिशाड्वलप्रदेशगमनेन तथात्वम्. अथवा तृणं सर्वतो लघु, तद्वत् चरन्तीति तदा चलनातिलाघवेन रसातिशयात् पुनः तत्प्राकट्यार्थं प्रेरयन् पृष्ठतः तद् व्यापारयतीति तदनुगत्वम्. निःसहनिपतनेन अग्रिमं विशेषणम्. ततश्च अग्रिमविशेषणेन "विविधबन्धेषु नृत्यदिव ते पदाम्बुजं तथा कुरु" इति हार्दो व्यञ्जितो अर्थः.

मयेदमुक्तं युक्तं वाऽयुक्तं नैव विचारितम्।
तत् क्षमतां प्रियायुक्तश्रीकृष्णोऽस्मत्कुलेश्वरः॥

॥ तृणचरानुगं श्रीनिकेतनम् ( सुबो.१०।२८।११ ) इत्यत्र ॥

श्रीकृष्णाय नमः. **पाल्यानां चर्म च न परिधेयम्** इत्यत्र. ननु भूम्याद्यनुग्रहाय पादुकापरिधानाभावेन चरणयोः अवसादः किमिति सम्पाद्यते? यद्यपि पादुकापरिधानेन चरणभूम्योः मध्ये अन्तरालसम्भवात् व्यवहितस्यापि तस्य अस्पर्शात् तदनुग्रहासिद्धिः तथापि व्यवधायकान्तरेण तत्सिद्धेः. श्रीकुङ्कुमलिप्तपदस्पर्शेऽपि तथासुखस्य हृदये स्वानुभवसिद्धत्वात्. अतः किमिति अवसादं प्राप्येत? इति पदे तदभावार्थं तदनुग्रहार्थं च चर्मादिकमेव न कुतः परिधीयते अस्मद्धृदयकठिनताम् अवगत्य कुङ्कुममिव इति आशङ्क्य आहुः **पाल्यानां चर्म च** इति, तेहि गवादयो "अजा गावो महिष्यश्च" इति वाक्यात् सर्वभावेन पाल्याः. तच्च जीवतामेव घटते इति तच्चर्मपरिधाने ते मृत्योः अपालिताएव स्युः. अतो न तत् परिधेयम्. अन्येषान्तु चर्मणः चरणसम्बन्धायोग्यत्वमेवेति अपरिधानमेव इति अर्थः. किञ्च चर्मणश्च चरणसम्बन्धे भक्तिरसालोडित-तृणभक्षणजनित-परमानन्दाभावेन तदंशे अपालितत्वं स्यादिति पाल्यानां तत्परिधानम् अनुचितम् इति भावः. अतएव "तृणचरानुगम्" इत्यत्र 'तृणचर'पदं ताभिः उक्तम् इति दिक्.

## ॥ ''दिनपरिक्षये...'' इत्यस्य आभासे (सुबो.१०।२८।१२) इत्यत्र॥*

अयम् आशयः : इतः षड्भिः श्लोकैः अन्यपूर्वाः निरूप्यन्ते. ताः पतिमत्यइति तन्निरोधेन स्वतोवा तत्संकोचेन दिवा बहिर् गत्वा द्रष्टुम् अशक्ताः. कुमारिकास्तु, **चतस्रः** इति, प्रतिबन्धाभावात् गन्तुमपि शक्ताइति तासां वने दर्शनादिना दिवापि कामः उदेति. सपूर्वास्तु दिवा वियोगमात्रेण गुणपरतया विस्मृतकामभावाइति सन्ध्यायां प्रभुरेव आयाति तदा निशि संयोगम् अपनुद्य गुणपरतां निवार्य कामम् उद्बोधयतीति तथा उक्तम् इति अर्थः. एवं निरूपणे अस्याः राजसतामसीत्वं सिद्धम्. यद्यपि संग्रहकारिकायां तामसीत्वमात्रम् उक्तं तथापि कामनिरूपणात् तस्यच भावकृतित्वनिरूपणेन उपालम्भदानात् च उभयविधभाववत्त्वम् आयातीति तथा उक्तम्. तदनन्तरं **ततः** इति, अन्यपूर्वाणाम् अनन्यपूर्वावद् अहर्निशकामाभावात् सन्ध्यायाम् आगतेन भगवता पुनः कामभावोत्पादने ततः कामोत्पत्त्यनन्तरम् आविर्भूताभ्यां रजोगुण-सत्त्वगुणाभ्यां बन्धप्रार्थनाधरामृतप्रार्थने भविष्यतइति पूर्वम् अनेन तमोगुणनिरूपकेण वाक्येन कामनिरूपणम्. पश्चात् 'प्रणतकामदं'— 'सुरतवर्धनम्' इति रजोगुण-सत्त्वगुण-निरूपकाभ्यां श्लोकाभ्याम् अन्यपूर्वाणां प्रार्थनाद्वयं निरूपितम्. अनन्यपूर्वाणान्तु दिवा निश्यपि कामसत्त्वेन तन्निरूपणाभावेनैव 'प्रणतदेहिनां'— 'मधुरया' इति श्लोकाभ्यां तथा प्रार्थनाद्वयं निरूपितम् इति भावः. कामस्य नित्यत्वम अत्र दिवा रात्रौ सत्त्वं ज्ञेयम्. ननु मुखप्रदर्शनमात्रेण कथं कामोत्पत्तिः कारणकलापाभावाद् इति आशङ्क्य आहुः **रजोगुणस्य** इति, सन्ध्याहि रजोगुणकालः, कामिनीनां गृहकार्यादिषु विक्षेपजनकत्वात्. अतो रजोगुणेन उत्पन्नेन तत्कारणेन कामोत्पत्तिः इति अर्थः. ननु साधनकाले कामरूपतत्फलोदयम् इति आशङ्क्य आहुः **कामस्य च** इति, कामोहि प्रियसम्बन्धाभिलाषरूपः तस्य तदानीमेव जननाद् इति भावः. एतेन सा न फलकालयोः एकत्वाद् अविलम्बो न तदानीन्तन-मुखदर्शनकामजनकत्वम् इति सूचितम्.

## ॥ ''तासामाविरभूद्'' इत्यस्य आभासे (सुबो.१०।२९।२)॥

**ब्रह्मा विष्णुश्च रुद्रश्च भूत्वा पुनः कृष्णएव जातः.** इत्यस्यां विवृतौ अयम् आशयः इति तत्कृपयैव प्रतिभाति : तथाहि भगवतो रूपेऽपि



त्रैविध्यम् अस्ति नाम-रूप-रसभेदेन. तत्र नामात्मकं वेदात्मकम्. शब्दब्रह्मणो, अनन्तमूर्तित्वाद्, अनन्तभेदवत्त्वम्. तथाहि निःश्वासात्मकस्य एकस्य वेदस्य अनन्तशाखाभेदेन अनन्तमूर्तित्वं मूलसाम्यं च, प्रकारभेदेऽपि वेदत्वात्. यथावा रूपात्मकस्य वैकुण्ठवासिनो अवतरणे अवतारभेदेन अनन्तमूर्तित्वं सर्वावतारसाम्यं च. तथा स्थायिभावात्मकस्यापि भगवतो भक्तहृदयगतभावभेदेन अनन्तमूर्तित्वं भावत्वेन साम्यं च. प्रकारमात्रे परं भेदो, यथा अवताररूपेषु मत्स्यत्वादिप्रकाराः. एवं सति स्वामिनीषु ये भावाः तद्रूपेण रसात्मको भगवानेवेति पूर्वं मानभावेन आविर्भवन् ब्रह्मा जातः. ततो निजरक्षार्थं गुणगानहेतुभूतभावेन आविर्भवन् विष्णुः. ततो रोदनात्मकः सन् सर्वनिरासकत्वेन प्रलयकर्ता रुद्रो जातः. तदनन्तरं परमदैन्येन सन्तुष्टः स्वसत्तां स्वानन्दं च भक्तेषु प्रकटीकृत्य सदानन्दः कृष्णएव जातः इति अर्थः.

अत्र अयम् अभिसन्धिः—सत्ता द्विविधा : जीवसत्ता भगवत्सत्ता वा. तत्र जीवसत्ता परिच्छिन्ना, अपरिच्छिन्नातु सा भगवतः. अतएव जीवः एकत्र विद्यमानः, तत्र सन्नेव, परत्र न इति निगद्यते, भगवांस्तु न तथा. एवं सति पूर्वं तेषु स्वसत्तैव स्थिता, न प्रभोः. अतएव भगवतइव तासां न सर्वत्र आविर्भावादौ सामर्थ्यम्. इदानीम् आनन्दस्यापि अतिदुःखेन तिरोधानाद् भगवानेव सरसो यशस्वी कृपया आविर्भूय स्वसत्तां स्वानन्दं च एतेषु स्थापितवानिति सदानन्दप्रकटनेन कृष्णएव जातइति. एवकारेण एतद्रूपप्राकट्ये पूर्वरूपाणां ब्रह्मादीनां तिरोधानं गम्यते, मानभावादीनां तिरोधानाद् इति उक्तम्. तथाच एतासाम् अतः परं भगवद्रूपत्वम् आनन्दमात्रत्वं सर्वत्र विद्यमानत्वं भक्त्याविर्भाव्यत्वं भगवदभिन्नत्वं सदातत्सहितत्वं च मन्तव्यम्. अतएव व्याकृतौ अस्मदाचार्यैः उक्तं ''तासां मध्यएव भगवान् आविर्भूतः'' इति. तदर्थस्तु यथा काष्ठान्तर्गतो अग्निः स्वाच्छादकं दूरीकृत्य प्रकटो भवति; काष्ठं च स्वस्वरूपभूतं करोति, तदाकारं च यथास्थितं स्थापयति, तथा भगवानपि एतदन्तःस्थितः कृपया स्वाच्छादक-माया-जवनिकां दूरीकृत्य तासु स्वयमेव प्रकटः, शरीरेन्द्रियादिकं तासामेव इति. एतेन अतः परम् आविर्भूत-भगवत्स्वरूपात्मिकाः एताः इति निरूपिताः. अतएव एतन्मात्रसेवया भगवत्सेवा कृता भवति. एवमेव अस्मदाचार्येषु तदात्मजेष्वपि बोद्धव्यम्. आगमनन्तु पूर्वरूपेण येन रमारमणम्. आविर्भावस्तु एतद्भावस्य तदुत्तरं

तद्रूपम् अधिष्ठानं प्राप्य पुनः मिश्ररूपत्वसिद्ध्या तथा रमणं, पश्चात् भ्रमरगीतप्रसङ्गे केवलस्थितिः इति दिक्.

श्रीमत्स्वाचार्यदासेन दीनदीनेन हृद्गतः ॥
भावः प्रकाशितस्तेन सन्तु ते मयि वत्सलाः ॥

॥ ताभिर्विधूतशोकाभिः (सुबो.१०।२९।१०) इत्यत्र ॥

श्रीहरिः. **अन्यथा स्वार्थमेव तिरोधानं स्याद्** इति. अत्र अयम् आशयो– अत्रहि स्वामिनीनाम् अप्राकृतत्वं निरूप्यते, भगवति तत्सम्बन्धज-प्राकृतत्वशङ्कापरिहाराय तत्सम्बन्धयोग्यत्वाय च. तच्च अप्राकृतत्वं ब्रह्मभूतत्वएव सम्भवति. तच्च पुनः शोकाद्यभावेन तल्लक्षणभूतेन ज्ञेयम्. "ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति" इति वाक्यात्. एवं सति स्वामिनीनां सांसारिकशोकस्य असम्भवेन प्रभुरेव तदर्थं तिरोभूय दर्शनम् अदत्वा स्वविरहे शोकम् उत्पाद्य पश्चात् प्रादुर्भूय तद् निवार्य विधूतशोकत्वेन ब्रह्मभूततया तासाम् अप्राकृतत्वं ज्ञापितवान्. अन्यथा साधारणजगति क्रीडार्थं स्वस्य तत्र प्रवेशरूपस्वतिरोधानवद् अत्रापि कृतं तद् इति स्यात्. तथाच इतरसाधारण्येन प्रत्युत प्राकृतत्वमेव स्वामिनीषु स्याद् इति न पूर्वोक्तशङ्कोद्धारः. स्वार्थतिरोधानन्तु "स नैव व्यरमद्" इति श्रुत्यैव उक्तमिति श्रुतिः उपन्यस्ता. प्रकृतेतु तासाम् आनन्ददानार्थमेव तत्र प्रवेशो न स्वक्रीडार्थम्, अतएव 'वृतः' इति उक्तम्. नहि जगति प्रविष्टो बहिर् आविर्भूय तेन वृतो भवति, नवा तत्सम्बन्धेन स्वशोभां वा सर्वतो अधिकां प्रकटयति. एवं सति अत्र शोकतदभावयोः विलक्षणत्वाद् अत्र अप्राकृतत्वबोधार्थमेव प्रभुणा एवं कृतम् इति अस्मदाचार्यचरणतात्पर्यम् अवगन्तव्यम् अव्यग्रैः तदीयदासानुदासैः इति संक्षेपः.



॥ "स्वैरुत्तरीयैः" इत्यस्य विवरणे (सुबो.टिप्प.१०।२९।१३) इत्यत्र ॥*

श्रीहरिः. **स्वैरुत्तरीयैः** इत्यस्य विवरणे **येषां जलेऽपि न आर्द्रता** इत्यत्र टिप्पण्यां **जलक्रीडानन्तरम् आर्द्रता न तिष्ठति इति अर्थः** इति. तत्र तत्कृपयैव अयम् आशयः इति प्रतिभाति : एतानि वसनानि, प्रभुणा स्वामिनीसाक्षात्सम्बन्धकृतिव्याकुलतरेण, तान्येव तद्भावनया कामभावेन काममयानीति तत्परिधानमात्रेणैव तथा भगवद्विषयक-कामोदयः. यथा क्षणमपि प्रभुसम्बन्धम् अन्तरा स्थातुमेव न शक्यते. तद्भावेच वह्नेः सम्बन्धतः परितापोदयः. तथाच यावत्पर्यन्तं जले भगवता सह क्रीडनं तावद् आर्द्रता. वसनानां परितापानुदयात् आर्द्र-वसन-संलग्न-सुन्दरतराङ्ग-सन्दर्शन-समुदयाद् उद्भटभावनिमत्तमनसा हरिणा निजाङ्गसङ्गेन शामनात् च. यदा ततो निःसृताः भगवतो भिन्ना भवति तदा तत्क्षणमेवोदित-कामाग्निज-तापेन शुष्कता भवति इति अर्थः. अतएव उक्तम् आचार्यचरणैः व्रतचर्याध्याये "अतएव जलक्रीडादिषु वस्त्रोत्तारण-परिधाने न अपेक्षिते" इति, वसनानां कामोदयहेतुत्वं च प्रियसम्बन्धित्वेन, यथा अन्यासां दृष्ट्यादिना तत्सम्बद्धानाम् इति दिक्.

॥॥ कुण्डलैर्गण्डलोलैः (सुबो.१०।३०।८) इत्यत्र ॥

श्रीहरिः. **गण्डेहि** इति, भगवन्मुखारविन्देहि भक्तिरूपे द्विविधो रसः : केवलः काममिश्रितः च. तत्र गण्डे केवलः, कामोदयाभावेऽपि केवलसौन्दर्यदर्शनमात्रेण वक्त्रसंयोगेन पेयत्वात्. अतएव बाललीलादिषु एतासां मात्रादीनामपि तथाकरणम् उपपद्यते. तथाच प्रभोः नृत्यसमये स्वामिनीकपोलयोः कुण्डलकान्तिप्रकाशितयोः सौन्दर्यविशेषाभिव्यक्त्या तथा कृतिः भवतीति तदर्थमेव कुण्डलाभ्यां तत्स्थलप्रकाशनम् इति भावः. कामलीलायाः अग्रे वक्तव्यत्वाद् इदानीं न लोभस्थरसग्रहणमिति न तत्प्रकाशनं, नृत्यमध्ये तथाकरणानुपपत्तेः. लोभात्मकेहि कामसहितो भक्तिरसः, तदुदयेनैव तत्पानसम्भवात्. ननु स्वामिनीवद् बाह्वादिष्वेव प्रभोरपि तथाकृतिः अस्त्विति कुण्डलप्रकाशोऽपि तस्यैव आस्ताम्! इति चेत्, तत्र आहुः **गण्डएव**

इति, ''स्विद्यन् मुख्य'' इत्यनेन अन्तर्गतस्य सर्वत्र स्थितरसस्य तत्रैव प्राकट्यनिरूपणेन पानसम्भवात्. रसस्य सम्यक् स्पष्टतया तत्रैव यतः आप्तिः प्राप्तिरिति पानार्थं तत्रैव प्रकाशनम् इति अर्थः. यद्वा पेयोहि अत्र स्नेहरसः, तस्य तत्रैव समाप्तिः, हृदयाद् उत्पन्नस्य मुखएव पर्यवसानं, स्नेहरसाभिनिविष्टानां मुखदर्शनमात्रेणैव सकलमनोरथपूर्तेः. तथाच कामोदयहेतुभूतनृत्ये पूर्वं तदनुदयात् स्नेहमात्रवत्त्वेन तत्रैव तद्रसपानमिति तदानीं कुण्डलाभ्यामपि भगवदर्थं तत्स्थलप्रकाशनम् इति सुष्ठूक्तम् आचार्यैः गण्डएव इत्यादीति सर्वम् अनवद्यम्.

॥ अतः परं राधादामोदरवद् ( सुबो.१०।३०।१६ ) इत्यत्र ॥

श्रीहरिः. इदं विचार्यते : अग्रे ''एवं परिष्वङ्ग'' इत्यादिना समुदायरमणं निरूप्य ''कृत्वा तावन्तम्'' इत्यनेन प्रत्येकरमणं निरूप्यते; तच्च तादृक्प्रकारेण रसोद्बोधे भवति. तत्र रसोद्बोधकन्तु नृत्यमेव. तदपि प्रत्येकम् अपेक्षितम्, अन्यथा प्रत्येकरमणोपयोगि-प्रत्येकरसानुद्बोधे तन्न स्यात्. अतो अत्र प्रत्येकनृत्यं निरूप्यते. नृत्येहि केवलभावात्मको अभिनीयमानो रसो, रमणेतु क्रियया सर्वेन्द्रियैः अनुभूयमानः. अतएव ''यं मन्येरन्'' इति उक्तम्. तथाच ''पादन्यासैः'' इत्यनेन स्वामिनीनां गाढनृत्यम् उक्तं, यत्र अन्यस्फूर्त्यभावः, तदुत्तरं भगवत्स्फूर्तिसहितं मध्यनृत्यम् उक्तम्. तत्र नटानां सामाजिकसन्तोषोत्पादनवद् भगवत्सन्तोषोत्पादनम्. तत्र प्रयोजनं स्वविषयकभावोत्पादनार्थं तथाभावेन प्रत्येकं गानं च. ततः ''काचिद्'' इति षड्भिः भगवद्गुणैः भगवद्धर्मविशेन गानादिकम् उक्तम्. ततः सर्वासां गानरसावेशेन शास्त्रमर्यादापूर्वकनृत्यपरित्यागेन भावेनैव विहारो मुख्यलीलाभिनयनरूपः, तदुत्तरं तत्परित्यागेन भावेनैव केवलं स्वरूपं परिगृह्य युग्मनृत्यं प्रत्येकरसोद्बोधाय, तत् ''कर्णोत्पल...'' इत्यादिना निरूप्यते. तत्र अयं प्रकारो : यस्य भगवतः स्वनिकटवर्तित्वेन माननं तस्य अधुना स्वसम्बन्धित्वेन. तथाच राधादामोदरौ यथा सर्वथा एकीभूतौ आलम्बनद्वयरूपत्वेन एकरसात्मकत्वात्, तथा स्वामिन्यः सर्वाअपि भावेन भगवता एकीभूताः सत्यो नृत्यं चक्रुः. तच्च नृत्यं यथा लोके मण्डलनृत्ये हस्तं विहाय आलिङ्गिताः प्रत्येकं नृत्यन्ति, तथैव मण्डलम् अनुवर्तयन्ति



हस्तैः असम्बद्धाः, तथा स्वामिन्योऽपि भावेन हस्तपरित्यागेन भगवन्तम् आलिङ्ग्य नृत्यन्तीति तथाभूतम्. तथाच हस्तपरित्यागेन मुख्यमण्डलाभावेऽपि मण्डलानुवर्तमाना रासगोष्ठ्येवेति गोष्ठीमात्रम् उक्तम् इति उक्तम् आचार्यैः. गोष्ठीहि यथा नृत्यार्थम् एकीभूतानां नृत्यारम्भात् पूर्वं भवति, तथा अत्रापि पूर्वनृत्यपरित्यागाद् भगवता सम्बद्धानां भावनया लीलानुकरणे नर्तनात् नृत्यगोष्ठ्येव. एवं सति अत्र गाढनृत्ये स्वामिनीनां भगवतः च विनियोगाद् ''नृत्यन्त्य उच्चैर्जगुः'' ''नृत्यती गायति'' इत्यत्रैव गानसम्भवो, नवा ''समं मुकुन्देन'' इत्यत्रेव भगवतोऽपि. गन्धर्वपतीनान्तु मुख्यलीलानुकरणस्य अयोग्यतया दर्शनाभावादेव न तदुपयोगिगानं किन्तु स्वामिनीकेशपाशस्थित-स्रग्विस्रंसने तत उड्डानस्य भ्रमरस्येव गानं गुञ्जारवरूपम्. एकवचनन्तु सर्वैः एकरूपतया गानसूचकम्. अथवा प्रत्येकनृत्ये प्रत्येकम् एकैकस्य तस्य गानसूचकम्. इदञ्च गाढनृत्यमिति तत्र कर्णयोः उत्पलस्थापने तदपातनम् अशक्यमिति तत्कर्तृत्वार्थं ''कर्णोत्पल...'' इत्यादि उक्तम्. मुखसरसिजसम्बन्धि-मकरन्दसदृशस्वेदकणिका-शोभोक्तिरपि श्रमाभावसूचिका, अतएव ''कृष्णाभिमर्शमुदिता'' इत्यत्र श्रीहस्तमात्रसम्बन्धेन श्रमाभावे सम्पूर्णस्वरूपसम्बन्धे क्व तत्सम्भावनेति कैमुतिकन्यायबोधनाय. तथाच एवं नृत्येन प्रत्येकरसोद्बोधे प्रत्येकरमणम् अग्रे निष्प्रत्यूहम् उपपद्यते, अन्यथा समुदायनृत्येन समुदायरसोद्बोधे तथा रमणमेव स्यात्, तत्प्रकारकरमणे तथा रसोद्बोधस्य कारणत्वात्. एवं सति सर्वप्रकारकरसोद्बोधेन सर्वप्रकारकरमणम् अग्रे सकारणं सेत्स्यतीति तदर्थं तद् नृत्यं भिन्नप्रकारेण निरूपितमिति तत्स्वरूपम् अस्मदाचार्यैः अतिगूढतया अतः परं राधादामोदरवद् इत्यनेन दृष्टान्तेन उक्तम् इति दिक्.

॥ भ्रमरगायकरासगोष्ठ्याम् ( सुबो.१०।३०।१६) इत्यत्र ॥

अथवा गायकास्तु भ्रमरा निरूपिताः, तेच मकरन्दार्थिनः, सच पुष्पेष्वेव तिष्ठति, तानिच वियुक्तानि तद्रहितानि भवन्तीति स्वनृत्यानुरूपगानकरणाद् अतिप्रसन्नाः तेभ्यः स्रजएव दत्तवत्यः. अन्यथा रसार्थं स्वकेशेषु शोभाहेतुत्वेन धृतानां तासाम् उपेक्षा न भवेत्. तेन भ्रमराणां गाननैपुण्यं प्रभुप्रियाणां च तदभिज्ञत्वं च ध्वन्यते. भ्रमराश्च भ्रमर्यश्च इति एकशेषः.

तेन स्त्रीपुरुषभेदात् ज्ञाने द्वैविध्यम् उक्तं भवति. किञ्च तत्र शोभार्थम् अर्पिताः स्रजोऽपि वैचित्र्यहेतुभूताः बहवः सन्ति, तन्मध्यस्था एकैका स्रग् एताभिः तेभ्यो दत्ताः. तथा सति अग्रिमरसार्थं तत्र शोभासम्पत्तिरपि इति ज्ञापयितुं 'केशपाश'पदं विहाय 'केश'पदोक्तिः. नच अल्पदानेन औदार्यगुणहानिः, अलीनां भक्तत्वेन प्रभुरसोपयोगि-वस्तुनो अनभिलषितत्वात् स्वकृतगानजनिततोषख्यापकैकस्रग्दाने शोभाप्रतिबन्धाभावेन तत्प्रसादत्वेन च तद्ग्रहणस्य उचितत्वात् तावतैव मनोरथपूर्तेः. नच गानप्रतिबन्धकत्वेन स्रजाम् अनुपयोगात् किं तद्दानेन इति वाच्यं, रासगोष्ठीतो यत्र गानानवसरे तेषां भक्तत्वेन पुष्पान्तरापेक्षया प्रभूपभुक्तस्वगुणलब्धस्रजामेव उपजीवनं युक्तमिति उपपत्तेः. नच, प्रभूपभुक्तत्वज्ञानं तेषाम् अत्र कथम्? इति, शङ्कनीयं, यत्र-यत्र व्रजकनकलताधर-पिपासुप्रियतम-करगृहीताकृष्ट-केशपाशेषु स्रजां त्रुटिः ततस्ततः स्रंसनमपीति तेषाम् अनुभ्रमणे तथा उपलम्भात्. अग्रेऽपि तदुपभुक्तस्रजः सम्बन्धित्वमेव तेषाम् "अङ्गसङ्गघृष्टस्रजः स्वकुचकुङ्कुमरञ्जिताः या गन्धर्वपालिभिः" इत्यत्र प्रकाशयिष्येत, अन्यथा तत्र स्रजो विशेषणद्वयानुपपत्तेः. एतासां सर्वस्रजां दाने अभिप्रेतेऽपि हस्तयोः मण्डलव्यापृतत्वेन ताभ्यां दानम् अशक्यम्. अतः उक्तप्रकारक-केशशैथिल्ये जाते यासां स्रजां स्रंसनम् अभूत् ताएव उपेक्षाकरणाद् दत्ताः, शेषाणाम् अतथात्वात् स्थितिरिति हेतोः न तदौदार्यहानिप्रसङ्गः. किञ्च **रासगोष्ठी** नृत्यसमाजः, तत्रच अवश्यं गायकापेक्षा, गायकत्वञ्च नृत्यकर्तृत्वात् तासाम् अनुपपन्नम्. देवानाम् अन्येषां पुरुषाणां स्त्रीणां च तत्र प्रवेशानधिकारादेव तत् तथा. भ्रमराणां पुरुषत्वेऽपि बलवत्प्रयोजनानुरोधात् विजातीयत्वात् च विरोधाभावात् तथात्वम् उपपद्यते. अतएव **रासगोष्ठी**पदम्. अतिरहस्यलीलान्तरेतु तेषामपि प्रयोजनाभावाद् अप्रवेशो अनुक्तसिद्धएव. वस्तुतस्तु रासे भगवता समं मण्डलाकारेण परितो भ्रमन्तीनां तासां नृत्यम् उच्यते. तथा सति नृत्योपयोगिगायकत्वं तत्सङ्गे परिभ्रमतामेव वाच्यम्, अन्येषां स्वल्पचलनेऽपि गानं न सम्भवति परिभ्रमतामेव, स्वरतानतालादिभङ्गप्रसङ्गात्. भ्रमराणान्तु तथास्वभाववत्त्वे विशेषतः तदानीमेव गायकत्वं युक्तमिति 'भ्रमर'पदोक्त्या व्यज्यते. तेषां तद्रससमाजानुकूलभाववत्त्वाय **भ्रमरगायकरासगोष्ठ्याम्** इति समस्तं पदम् उक्तम्. अतएव पुरुषत्वेऽपि तेषाम् अत्यन्तरङ्गत्वेन निरन्तरं स्वसान्निध्यं प्रभुरपि आह. "प्रायो अमी मुनिगणा भवदीयमुख्या गूढं वनेऽपि न जहत्यनघात्मदैवम्" इति किमतो अधिकविस्तरेण!



## ॥ कृष्णविक्रीडितं वीक्ष्य (सुबो.१०।३०।१९) इत्यत्र ॥*

श्रीहरिः.इदं विचार्यते : भगवान् हि "रसो वै सः"-"यदेषः आकाश आनन्दो न स्याद्" इति श्रुतिभिः रसात्मकानन्दरूपो, रसः च शृङ्गारः. सच संयोगविप्रयोगभेदेन द्विविधः. तत्र संयोगात्मकः क्रियाभिव्यङ्ग्यः, सएव 'कामानन्दः' इति उच्यते. यत्र क्रियां विनैव स 'केवलानुभवानन्दः' इति उच्यते. विप्रयोगस्तु भावमात्रेण अनुभूयमानः, सएव 'केवलानुभवानन्दः' इति उभयविधानन्दात्मकस्वरूप-स्वामिनीनामेव अनुभवविषयः इति लोके ज्ञापयितुं गानद्वारा एतद्रसम् अनुभावयितुं च लीलाम् उभयविधाम् अत्र प्रकटितवान्. तत्र लीलाद्वयेऽपि रात्र्यो भिन्नाः अलौकिक्यो लौकिक्यः च. तत्र अलौकिक्यः पूर्णचन्द्रप्राकट्येन पूर्णिमारूपाः, भगवन्मनोरेतोरूपस्य तत्र चन्द्रस्य अलौकिक्यो लौकिकचन्द्राप्रकाश्यत्वेन अखिलतिथिरूपा. सर्वदा पूर्णत्वेन वृद्धिक्षयाभावात् सर्वदा एकरूपत्वेन निरन्तरमेव सा लीला न रतान्तः. अतएव विप्रयोगे भावानुभवस्यैव सार्वदिकत्वम् उच्यते, अग्रे आत्यन्तिकविप्रयोगदानात्. संयोगानुभवस्यतु तत्सिद्ध्यर्थकत्वेन परिमितकालसत्त्वमेव, अतो अत्र रतान्तो वाच्यः. सच भगवत्स्वरूपे वक्तुम् अशक्यः, सर्वस्य स्वरूपात्मकत्वेन अंशतः च्युतौ पूर्णत्वबोधकश्रुतिविरोधापातात्. तदकथने कामरसात्मकत्वहानिरिति तत्समाधानाय अस्मिन् श्लोके यथा पूर्णत्वं कामरसात्मकत्वं च सम्पद्यते तथा परोक्षरीत्या शुकैः श्रीमदाचार्यैः च विवृतौ निरूप्यते. अत्र अयम् आशयः : आकाशे देवस्त्रियः चन्द्रः च वर्तते. "अनोसां दर्शनं पश्यन्ति सूर्यस्य देवाः" इति श्रुतेः दिव्यदृष्टिः भगवता दत्तेति भगवच्चक्षुभिः भगवदीयक्रीडां पश्यन्तीति भगवता तादृक्चक्षुर्दानेन वरणं नायंदतः(?), "दिव्यं ददामि ते चक्षुर्" इतिवत्. अतः तासां दर्शनं, परं दूरस्थतयैव, लीलाप्रवेशे अयोग्यत्वाद् अर्जुनवत्, स्त्रीत्वाद् वा दर्शनस्य दोषावहत्वाभावाद् दर्शनं दोषानावहत्वं च दासीनामिव. चन्द्रस्यतु विक्रीडितदर्शनं भगवद्रेतोरूपत्वात् स्वामिनीदेहस्य भगवन्मनोघटितत्वात् च, परं दूरस्थतयैव, रेतोरूपस्य नैकट्ये लीलासम्भवाद्, अल्पेनैव रसपरिसमाप्तेः. "सोमः प्रथमो विविदे" इति श्रुत्युपन्यासस्तु "तदोडुराज"इत्यनेन भगवल्लाभात् पूर्वमेव प्रभोः मनोरूपस्य चन्द्रस्य स्वामिनीलाभनिरूपणाय तथापि देवस्त्रीणामिव तस्य चन्द्रस्य अतल्लीलादर्शनं क्षयहेतुत्वात् हितकारि न भवतीति निरूपणार्थं

शशाङ्कत्वम् उक्तम्. यतो लौकिकरात्रिसम्बन्धिलीलासम्बन्धीति वृद्धिक्षयशीलः अतः तथालीलादर्शने अंशतः क्षयसम्भवात् तथा उक्तम्. लीलायान्तु तद्दर्शनेऽपि न काचित् क्षतिः. तत आकाशादेव तस्य अंशतः क्षयो, न भगवत्स्वरूपस्थितस्य, भगवतः पूर्णकामत्वात्. तत्र अविद्यमानस्य आध्यात्मिकस्य अंशतः क्षये ततः पुत्राद्युत्पत्तिः च स्यात्. तथाच "आत्मन्यवरुद्धसौरत" इत्यग्रे उच्यमानं विरुध्यते. एवं सति यथा देवस्त्रीणाम् अलौकिकलीलादर्शनेन मोहः कामार्दितत्वं च तत्र स्थितानामेव, न स्वामिनीषु प्रवेशो, अयोग्यत्वात्. ...ःसवलनरूपं तत्रैव तथापि वीर्यरूपस्य सामर्थ्यम्. (यत्साम!)र्थ्यकृतलीलादर्शनाद् न्मे..मेन प्रवेशमनोरथेन क्रीडा दूरस्थिस्य ततएव अंशतः च्युतिः न भगवत्स्थितस्य इति भावः. एतेन आकाशस्थितएव ...नात् स्वामिनः. लौकिकरात्रिरमणानुकूलमनोनक्षत्र..क्षीणेन स्वामिनीषु भगवति स्थिराः तथा जातइति निरू(पि)तएव अग्रे वक्ष्यति **ससत्यकाम** इति. ननु लौकिकचन्द्रस्तु स्वांशैः निर्वर्त्स्यर्तइति पूर्णकामत्वम् अखण्डितत्वं च भगवति ...रमंत्र अलौकिकरात्रिष्वपि लीलायाः क्रियमाणत्वात्. (तत्र लौ)किकचन्द्रस्य पूर्णत्वेन ततो निवृत्त्यभावात् लीलायां कथं ..स्वम् उपपादनीयम्? इति चेत्, त(न्न) 'च'कारसूचितस्य तस्यापि कामार्दितत्वकथनात्. तत्रच कामार्दितत्वं देवस्त्रीणामिव ... यथा तासां न स्वामिनीषु प्रवेशो व्याकुलतया तदर्थं पल... तथा एतस्यापि. अतएव उक्तम् आचार्यैः "भगवति निवेशनार्थं यत्नं कृतवान्" इति. तथाच यथा लोके रासान्ते मनोव्याकुलता जायते तथा भगवतोऽपि तत्काले जातेति अलौकिकप्रकारेणालौकिकरमणेऽपि तथासुखसम्पत्तिरिति आचार्यचरणानाम् आनंद...त्यादिनिरूपणा... रपगतसंशयैः भवति... दिक्.

## ॥ सोम्भस्यलम् (सुबो.१०।३०।२४) इत्यत्र ॥*

श्रीकृष्णाय नमः. **पूर्वं तासाम्** इत्यादि. अत्र अयं भावः : अध्यायचतुष्टयोक्तलीलायां यद्यपि भगवत्स्पर्शः स्थितएव तथापि "आत्मारामोप्यरीरमद्" — "आत्मारामोप्यखण्डितः" इत्यादिवाक्यैः तासाम् इच्छया भगवता एतावत्पर्यन्तं रमणं कृतं नतु स्वेच्छया*. तथा सति तदैव रसान्तः स्यात्. अतएव उक्तं रसशास्त्रे "वानरं चपलं ध्यायेत् वृक्षशाखावलम्बिनम्" इति. अधुनातु यावत्स्वसामर्थ्यं प्रकटीकृत्य स्वेच्छया ताः स्पृष्टाः इति लोकरसरीतिम् अनुभवतः



कामाभावात् तदंशनिवृत्तेः सुरतान्तो जातः. अतएव आचार्यैः एतदध्यायार्थनिरूपककारिकायां "स्वानन्दार्थमितीर्यते" इति उक्तम्. तदनन्तरं लौकिकसरूपभावे समुद्भूते यथा आत्मारामत्वमर्यादा भग्नाः तथा देशकालमर्यादापि भग्ना इति अर्थः. **देशो** रसानुभवदेशः **कालो** रसावष्टम्भकालः; उभयोः इति अर्थः. अतएव श्रमलीलापि आविष्कृताः. तन्निवारणाय जलक्रीडार्थं जलप्रवेशः इति अर्थः.

## ॥ एवं शशाङ्कांशुविराजिता निशा (सुबो.१०।३०।२६) इत्यत्र ॥

**ता एवं रेमे** इति, लौकिकीः निशा एवं कामलीलायां चन्द्रप्रवेशेन क्रीडया तदंशनिवर्तनप्रकारेण रेमे इति अर्थः. **पूर्वोक्तप्रकारस्तु** इति, नृत्यादिना केवलरसात्मकाति-गूढभाव-प्रकटीकरणेन. भावात्मकरमणन्तु केनापि गृहगमनादिनापि न विरुध्यते, सर्वदा हृदि गृहे परोक्षेऽपि तदनुभवात्. नाटचेहि रसोदयभावेनैव सर्वानुभवसम्पत्तेः. अतएव "आन्तरन्तु महाफलम्" इत्यस्य टिप्पण्यां "ये अन्तर्भावविशेषाः उत्पद्यन्ते, न ते समागमेऽपि" इति उक्तं प्रभुचरणैः. **एवं रमणे** इति, नित्यलीलाश्रयभूतासु स्वामिनीषु कामलीलया रमणे इति अर्थः. **स सत्यकाम** इति, सत्यः कामो यासां यस्य वा इति बहुव्रीहिसमासेन तासु भगवति च सत्यकामसत्त्वेन तथा रमणेऽपि नित्यलीलात्वाक्षतेः. एषापि लीला भगवतो नित्यैव परम् इयान् विशेषो यद् अत्र बहिःप्राकटच्यपूर्वक-तादृक्क्रियाभिव्यङ्ग्यत्वं तत्र भावमात्राभिव्यङ्ग्यत्वम् इति. कामलीलया रमणहेतुं प्रकारान्तरेण उपपादयन्ति **स तथा प्रार्थितो वा** इति. "पतिं मे कुरु" इत्यादिना कामलीलानुभवहेतुत्वेन प्रभुः पूर्वं ताभिः प्रार्थितः, "कामिनीभावमासाद्य" इति श्रुतिरूपाभिरपि. अतएव उक्तं "लब्धकामाः कुमारिकाः" "एवं भगवतः कृष्णाद् लब्धकामाः" इत्यादि. तथाच तत्प्रार्थनमेव प्रभोः कामलीलाकरणे हेतुः इति भावः. **एवमपि क्रीडायाम्** इति, चन्द्रांशुनिवर्तनप्रकारेण क्रीडायामपि इति अर्थः. **सत्यएव** इति, निकृत्तानामपि चन्द्रांशानां भगवत्येव स्थितत्वाद् इति भावः. अतएव अग्रे वक्ष्यति "आत्मन्यवरुद्धसौरत" इति. सत्यत्वमेव आहुः

**नतु क्षीणो असद्विषयको वा जातः** इति, क्षयेहि सत्यत्वं न सिध्यति, संसारस्येव. प्रकृतेतु कामस्य द्रवणे तदंशनिवर्तनेऽपि भगवत्येव स्थित्या न क्षीणत्वम् इति अर्थः. यथा एकस्मिन्नेव पात्रे स्थितस्य नवनीतस्य घर्मादिना द्रवीभूय तत्रैव स्थितौ न क्षीणता एवम् उच्यते तथा अत्रापि इति भावः. ननु अत्र नैसर्गिकसुखाय सहस्रवणं वाच्यं, तथा सति इतरत्रैव तत्सम्बन्धः आवश्यकइति कथम् अक्षीणत्वं पूर्वोक्तरीत्या वाच्यमिति अरुच्या पक्षान्तरम् आहुः **असद्विषयको वा जातः** इति. स्वामिनीषु तत्प्रवेशेऽपि लौकिककामइव अयम् असद्विषयको न जातः, तत्रापि भगवतकामस्यैव सत्त्वात्. तत्र पूर्णे सद्विषयकत्वमेव तस्य. अतएव उक्तम् आचार्यचरणैः "तासां कामस्य सम्पूर्तिः निष्कामेनेति तास्तथा" इति. प्रभुणापि अभिहितं "न मय्यावेशितधियाम्" इत्यादि. अतएव तथाकरणेऽपि न ततः पुत्राद्युत्पत्तिः. एतदेव पूर्वम् उदितम् आचार्यैः "कामाभावेन पूर्णस्तु" इत्यादिना.

अथ तासु लौकिककामसत्त्वेऽपि न क्षतिः सर्वथा भगवत्परत्वेन तत्कामस्य दग्धबीजत्वाद् इति अभिप्रेत्य आहुः विशेषणार्थम् **अनुरता अबलागणा यस्य** इति. अत्रहि त्रयो गणाः – श्रुतिरूपाणाम् अन्तर्गृहगतानां कुमारिकाणां च. तेषां सर्वेषामेव सर्वथा प्रपन्नत्वं समानो धर्मः. सच सर्वभावेन शरणागतत्वम्. तेषु सर्वेष्वेव अनुरतत्वम्. तत्र श्रुतिरूपगणे अनुरतत्वं भगवद्रतत्वानन्तरं रतत्वम्. अतएव उक्तं "त्वयाभिरमिता" इति. अन्तर्गृहगतगणे लक्ष्मीवद् नित्यसम्बद्धत्वमेव. कुमारिकागणे पूर्वधर्मसत्त्वेऽपि स्वेनैव, नतु भगवता विवाहितत्वम्. तथाच सर्वेषां भगवत्परत्वात् सर्वभावेन न लौकिककामसत्त्वेऽपि शङ्का कापि इति भावः. ननु एवं सति कामलीलोत्तरं "इभराडिव भिन्नसेतुः" इति गजदृष्टान्तकथनेन मर्यादाभङ्गकरणं न युज्यते. नहि शास्त्रोक्त-देशकाल-मर्यादाभङ्गे कामरसः तथा अनुभूयते. तद्भङ्गस्तु गजदृष्टान्तेन तथाविधस्पर्शात् स्वामिनीनां कामनिवर्तनेन अभिहितः. नहि कामनिवृत्तौ तच्छास्त्रोदित-देशकाल-मर्यादा (न) तिष्ठति; तदभावे वा तथा रमणं सम्भवति. निवृत्तकामानां तद्देशे तावत्कालं प्रभुणा सह स्थितेः इति आशङ्क्य आहुः **अग्रे मर्यादाभङ्गः** इति, कामलीलायामेव अग्रे मर्यादाभङ्गः काममर्यादाभङ्गो रसपोषाय, न सर्वथा कामनिवृत्तये, उन्मर्यादभोगस्य रसपोषकत्वात्. तदेव उक्तं **तदुक्तम्** इत्यादिना. अन्यथा कामनिवृत्तौ



एतल्लीलायाः नित्यत्वं न भवेत्. यद्यपि एवं सम्भवति समाहितिः तथापि स्वामिनीषु न लौकिकः कामः स्थापितः, तथा सति संयोगरसेच्छा उदियाद्; देयः च अत्र आत्यन्तिकवियोगः. तत्रच कामो गूढः स्थायी भावो, अतएव मोक्षपर्यवसायी, नित्यसुखानुभूतिहेतुत्वात्. ततश्च स्वरूपमात्रप्राप्तिः. अतएव उक्तं "ज्ञात्वात्मानमधोक्षजम्" इति. फलमपि अतएव एतल्लीलाश्रवणस्य लौकिककामनिवृत्तिः. तथाच "सत्यएव कामः स्थापितः" इति उक्तम् अतिरमणीयम् आचार्यैः इति न अनुपपत्तिः काचित्.

## ॥ देवस्त्रियः (सुबो.१०।३२।२-३) इत्यत्र ॥

श्रीगोपीजनवल्लभाय नमः. ननु देवस्त्रीणामपि वेणुनादेन विस्मयोत्पत्तिपूर्वकं कामोद्रेकात्, मूर्छया विस्मृतनीवीत्वात्, तासु भगवद्रससम्बन्धाभावाद्, इयं दशा रसाभासदशा; इति निश्चीयते यथा, तथा "निजपदाब्जदलैः" इति युगले व्रजसीमन्तिनीनामपि वेणुनादात् नीवीकबरविस्मृतिरपि उच्यते इति कथं न देवस्त्रीतुल्यत्वम्? इति चेत्, तत्र वदामः – यद्यपि देवस्त्रीणां मूर्छया नीव्यनुसन्धानाभावः उच्यते, तस्य भगवद्भावाजन्यत्वात् केवलकामभावजन्यत्वेन, रसाभासत्वं नतु रसात्मकत्वम्. ननु वेणुनादश्रवणानन्तरभावित्वात् तदवस्थायाः कथं न भगवद्भावजन्यत्वं? सत्यं, यत्र-यत्र वेणुनादजनितं कार्यम् उच्यते तत्र-तत्र तदनुगुणं भगवत्स्वरूपम् उच्यते. अत्र यदि अयं वेणुनादः एतासां भावोत्पादनहेतुः स्यात् तदा स्वरूपस्यापि तद्भावोत्पत्त्यनुगुणत्वमपि उच्येत. अत्रतु भगवतः प्रवेशत्वनिरूपणात् स्वरूपस्य न नादानुगुणत्वमिति न भगवद्भावहेतुत्वं नादस्य. एतासां भगवद्भावाजन्यत्वे हेत्वन्तरमपि आह **विस्मिता** इति. नादश्रवणं तासां विस्मयोत्पादकमेव जातं न भगवद्भावोत्पादकम्. विस्मयस्य सर्वविस्मारकत्वेन वस्तुस्वरूपाज्ञानात् लौकिककामजनकत्वमेव, नतु अलौकिकभगवद्भावात्मक-तज्जनकत्वम्. अतएव लौकिकः कामो अतिप्राचुर्येण अस्मान् मारयिष्यतीति भयेन दयया स यथा न मारयेत् तदर्थं स्वयमेव समर्पितचित्ताः जाताः. यदि अयं भावो भगवद्भावात्मको अलौकिकः स्यात् तदा भगवत्प्राप्त्यर्थमेव यत्नं कुर्युः, नतु स्वरक्षार्थं काममार्गणेषु चित्तं समर्पयेयुः. तस्माद् इयं दशा एतासां लौकिकभावजन्यैव न भगवद्भावजन्येति

महदेव वैलक्षण्यम्. व्रजसीमन्तिनीषु तु वसनकबराननुसन्धाने हेतुत्वेन युगलारम्भएव स्वरूप-नादयोः तद्धेतुत्वेनैव उपक्रान्तत्वाद्, अग्रिमश्लोके च भगवत्कृत-गतिविलास-सहितेक्षणयोः मनोभववेगहेतुत्वेन उक्तत्वाद्, अत्रच एतद्रसभावस्य 'मनोभव'पदोक्त्या अस्य भावस्य अलौकिकभगवद्भावात्मकत्वात् तद्वेगजनित-वसनकबराननुसन्धानस्यापि भगवद्भाववेगजन्यत्वात् तत्कृतदशाया-अपि अलौकिकभगवद्रसाभावजन्यत्वात् रसात्मकमेव नतु रसाभासहेतुत्वम्. देवस्त्रीणान्तु भगवद्भावरहित-केवललौकिककामजन्यत्वात् भगवदनुपयोगित्वात् रसाभासहेतुत्वमेव न रसात्मकत्वम् इति सर्वम् अनवद्यम्. शुभमस्तु.

॥ ननु यथा...आर्तिं पश्यति (सुबो.टिप्प.१०।३२।०) इत्यत्र ॥

**ननु यथा-यथा भक्तानां स्वविषयकम् आर्तिं पश्यति तथा-तथा मुदितो भवति इति वस्तुस्थितिः** इत्यत्र, यद्यपि परमकृपालोः भगवतः तथास्वभावकथनम् अनुचितं तथापि तथोक्तेः अयम् आशयः : भगवतो भक्तेषु परमानुरागात् परोक्षे तद्धृदये स्वस्वरूपप्रकटनेन गुणगानश्रवणानन्दानुभवेच्छा. साच तदा आर्त्यैव पूर्यतइति तादृशानन्दविशेषेण मुदितो भवतीति तथास्वभावः इति अर्थः.

॥ मणिधरः क्वचिदागणयन् गाः (सुबो.१०।३२।१८) इत्यत्र ॥

श्रीहरिः. अथवा यथा स्वस्य भगवद्विप्रयोगे तत्स्वरूप-गुण-लीला-गानानुभवैः यथाकथञ्चित् कालनिर्वाहः तथा भगवतोऽपि . स्वविप्रयोगे यथाकथञ्चित् कालनिर्वाहक-स्वसम्बन्धि-धर्माविष्कारहेतुभूत-पदार्थान् आहुः **मणिधरः** इति, भगवान् मणीन् धारयति, तेषां स्वरूपं गवाम् आधिदैविकरूपत्वेन निरूपितम्. कदाचित् तैः गाः गणयति इति हेतुना यद् निरूपितं तद् वस्तुस्वरूपगोपनार्थम्. वस्तुतस्तु तेषां स्वरूपम् अन्यदेव. यथा कौस्तुभस्वरूपं जीवतत्त्वं तथा एतन्मणीनामपि एतद्भक्तस्वरूपतत्त्वज्ञापकत्वात् एतद्भक्तस्वरूप-तत्त्वरूपत्वम्. इदं तत्त्वरूपत्वम् तद्भक्तगणनया ज्ञाप्यते. ननु एतद्भक्तगणनायाः



अनुक्तत्वात् कथम् तद्गणना ज्ञायते? इति चेत्, तत्र आहुः **क्वचिदागणयन् गाः** इत्यनेन. भक्तगणनायाएव मुख्यत्वं नतु गोगणनायाः. अन्यथा 'क्वचित्'पदं न वदेयुः. अतएव क्वचिदेव गाः गणयति, सदा ताएव गणयति इति उक्तं भवति. अयम् एकः कालनिर्वाहहेतुधर्मो निरूपितो भगवतः. तस्यच व्यभिचारिभावत्वात् चिरकालस्थायित्वेन सर्वथा कालानिर्वाहात् ततोऽपि अधिकम् अनुभावकं कालनिर्वाहकम् आहुः **मालया दयितगन्धतुलस्याः** इति. दयितगन्धायाः तुलस्याः मालया उपलक्षितः. ननु सर्वपुष्पापेक्षया तुलसीमालायाएव दयितत्वे को हेतुः? तत्र हेतुम् आहुः. अत्र मालास्थतुलसीगन्धस्य 'दयित'त्वोक्त्या एतन्मालायाः साक्षाद् व्रजसीमन्तिन्यङ्ग-सङ्ग-सम्बन्धिलीला-सम्बन्धित्वम् उच्यते. लीलायां तदङ्गसम्बन्धि-कमलगन्धस्य तत्कुचकुङ्कुमगन्धस्य च मालायां सत्त्वात् सात्त्विकभावजनितस्वेदेन तत्कुङ्कुमलेपयुक्तत्वात् तद्गन्धग्रहणेन तत्सम्बन्धि-सर्वलीलानुसन्धानेन तदा तल्लीलात्मकत्वात् प्रभोः तद्गन्धस्य दयितत्वम् उक्तम्. तेन चिरकालम् तद्रसावेशात् कियत्कालनिर्वाहः सूचितः. तथापि एतद्भावस्य व्यभिचारिभावत्वात् पुनः बाह्यानुसन्धाने तत्सम्बन्धव्यतिरेकेण स्थातुम् अशक्त्या तल्लीलानुकरणेनापि कियत्कालगमनं ज्ञापयन्ति **प्रणयिनः** इति, प्रणयित्वात् तल्लीलानुकरणयोग्यत्वम्. तस्य प्रणयिनो अत्यन्तस्नेहवत्त्वात् भगवतोऽपि तस्मिन् स्नेहवल्लीलानुकरणयो-ग्यत्वं ज्ञाप्यते. अनुचरत्वेन भगवदिच्छानुसारि भगवत्करणाविरोधित्वं ज्ञाप्यते. तेन तद्भावपूर्त्यर्थम् अंसे भुजस्थापनं तद्भावापत्त्या वेणुगानं चेति अस्य गानस्य आकस्मिकत्वं, यतः तद्भावापत्त्या उत्पन्नम्. अतएव तस्य क्वणनात्मकत्वम् उक्तं पूर्वनिरूपितनादवैलक्षण्याय. वैलक्षण्यञ्च तन्नादकार्याद् अध्यवसीयतइति तत्कार्यस्यापि पूर्वनाद-जात-कार्य-वैलक्षण्यं हरिणीषु आह **वेणुरववञ्चितचित्ता** इति, रवपदेन तस्य नादस्य अग्न्यमृतबीजरूपत्वं ज्ञापितम्. तेन हरिणीनां नादश्रवणमात्रेण भगवद्विषयकार्तिजनकत्वम् अग्निरूपत्वम्. भगवतैव तदार्तिशमनज्ञानवत्त्वम् अमृतबीजकार्यम्. तेन उभयकार्यकर्तृत्वाद् नादस्य तदुभयरूपत्वम्. ननु कथम् अस्या आर्तेः भगवद्विषयकत्वमेव? इति चेत्, तत्र आहुः **कृष्णमन्वसत** इति, यदि भगवद्विषयिण्येव आर्तिः न स्याद्, भगवतैव तच्छान्तिज्ञानं न स्यात्, तदा भगवन्निकटे गत्वा न उपविष्टाः भवेयुः. आसां स्वस्मिन् हरिणीत्वज्ञानस्य विद्यमानत्वाद् भगवति च स्वसजातीयत्वज्ञानाभावात् कथं तद्विषयिणी आर्तिः भगवतैव च तच्छान्तिज्ञानम्?

इति चेत्, तत्र आहुः **वञ्चितचित्ताः** इति, रवेण तासां वञ्चितचित्तत्वं यतो जातं, ततएव तदुभयस्फूर्तिः. वञ्चनञ्च स्वस्मिन् स्वजातिभावास्फूर्त्या रसयोग्यनायिकाभावेन च. तेनच भगवति स्वसजातीयत्वस्फूर्तिः इति तन्निकटोपवेशनम्. उपवेशनञ्च फलम् अननुभूय उत्थानरहितम्, इदमेव चित्तवञ्चनम्. ननु भर्तृषु विद्यमानेषु कथं तान् विहाय भगवत्समीपोपवेशनम्? इति चेत्, तत्र आहुः **कृष्णगृहिण्यः** इति, यद्यपि भर्तृसन्निधानम् अस्ति तथापि स्वस्मिन् भर्तृजातिविजातीयनायिकाभावस्फूर्त्या भगवति च स्वसजातीयभावस्फूर्त्या स्वस्मिन् भगवद्भोग्यत्वज्ञानेन कृष्णगृहिणीत्वस्फूर्तिरिति कृष्णसमीपएव उपवेशनम्. ततएव भगवति गुणगणार्णवस्फूर्तिरपि. **अनुगत्य** इति कथनात् पूर्वभावदाढर्च्याद् भगवतः स्थलान्तरगतावपि स्वयमपि तत्र गत्वा तद्भावापन्नाएव उपविशन्ति इति ज्ञापितम्. ननु कथम् एतासु पूर्वोक्ता एतावती योग्यता? इति चेत्, तत्र आहुः **हरिण्यः** इति, एतास्तु भगवता पूर्वं स्वस्मिन् रसभावजनकत्वेन स्तुताः "कुर्वन्ति गोप्यइव ते प्रियमीक्षणेन" इति. 'गोप्यइव' इति कथनाद् एतदीक्षणेन तत्सजातीयत्वेन व्रजसीमन्तिनीक्षणस्मरणात् स्वहृदये तदीयसर्वभावाविर्भावात् तासु कृपाविशेषः सूच्यते इति तासां पूर्वोक्तसर्वभावयोग्यता 'हरिणी'पदेन ज्ञाप्यते. अतएव स्वसजातीयत्वम् उक्तं **गोपिकाइव** इति. अतएव अन्योऽपि सजातीयो धर्म उक्तः **विमुक्तगृहाशा** इति, यथा फलप्रकरणे गृहगमनाज्ञप्तौ "प्राणा विसृज्य वसतीः" इति गृहगमनाशापरित्यागपूर्वकं स्वयं भगवन्निकटे स्थिताः, अधुना तथैव एतासां स्थितिरिति **विमुक्तगृहाशा** इति उक्तम्. ननु तादृग्भाववत्त्वेऽपि कथं वञ्चितचित्तत्वम्? इति चेद्, यद्यपि अस्य भावस्य वेणुनादद्वारा जनितत्वात् तस्य च रवात्मकत्वात्, पूर्वं 'रे'फस्य अग्निबीजत्वाद् आर्तिजनकत्वं ततएव भगवत्समीपगमनं, पश्चाद् अमृतबीजत्वाद् 'व'कारस्य पश्चात्कृतवेणुनादस्य अमृतरूपत्वेन तदार्तिशमनम्. तत्र आर्तिशमनप्रकारो - निकटोपविष्टानां स्वरूपदर्शनात्. पश्चात्कृतवेणुनादस्य श्रोत्रद्वारा अन्तःप्रवेशसमये नादद्वारा स्वरूपस्यापि अन्तःप्रवेशात् तस्य च अन्तरेव सम्बन्धानुभवज्ञानाद् आर्तिशमनं यद्यपि तासां तथापि स्वामिनीनां साक्षात्स्वरूपसम्बन्धएव आर्तिशमनमिति तत्प्रकारकार्तिशमनं वस्तुतो वञ्चनमेवेति तथा उक्तम् इति भावः.

**इति श्रीमद्-हरिरायचरण-विरचिताः दशमतामस-फलप्रकरणे**
**यावदुपलब्धाः स्वतन्त्रलेखाः**



### ॥ मैवं विभोऽर्हति भवान् (सुबो.१०।२६।३१) इत्यत्र ॥

श्रीकृष्णाय नमः. **एतच्च भजनं न विषयवद्** इत्यत्र अयम् अर्थो : यथा विषयभोगे कामिनीं भुक्त्वा उपपतिः त्यजति, तथा भगवानपि वदेत् "मयापि एवमेव भजनं कार्यम्" इति आशयं प्रभोः परिहर्तुं भजनप्रकारं च शिक्षयितुं **देवो यथा** इत्यादिदृष्टान्तम् उक्तवत्यः. तदर्थस्तु – यथा देवः स्वातिरिक्तभजनम् असोढ्वा, तद् निवर्त्य, स्वभजनं सम्पाद्य भजते, तथा अस्मान् परिगृह्य अन्यभजननिवृत्तिपूर्वकं स्वभजनसम्पन्नाः कुरु, नतु स्वतएव निवृत्तान्यभजना अन्यभजने प्रवर्तयसि इति उचितम्. ननु मद्भजनेन भवतीनां पातिव्रत्यभङ्गः स्याद् इति स्वाम्याशङ्कातु भजने दोषाभावप्रतिपादकाभ्याम् **आदिपुरुष-देव** पदाभ्यां दृष्टान्तप्रकारेण निरस्ता वेदितव्या ॥

॥ इति श्रीरघुनाथात्मज-श्रीदेवकीनन्दनकृतम् ॥

### ॥ षोडशगोपिकासंख्यातात्पर्यवर्णनम् ॥

(पत्रद्वयं नोपलब्धम्)...श. भगवता नीयमानस्वतन्त्रनिर्गुणायाअपि पूर्वोक्तगोपिकाभावदृष्टान्तेन भावे चातुर्विध्यात् चतस्रः तद्भावसजातीयाः बोध्याः. अतएव तस्याअपि पूर्वोक्ताभ्यो वैशिष्ट्यं तद्भावसजातीयत्वं च बोधयितुं तस्याअपि दोषोत्पत्तिः उक्ता "सा च मेने तदात्मानम्" इत्यादौ मूले. ननु तस्याः सदोषत्वेऽपि तद्भावसजातीयत्वेन ततो भिन्नत्रिविधगोपिकाकल्पने किं मानम्? इति चेद्, उच्यते – "स्वयं त्वयुक्तकरणात् प्रकृत्याद्यधिकारिणः बुद्धिं स्म नाशयामासुः साप्यन्येवाभवत्तत" इति सुबोधिनीस्था अत्रत्यकारिकैव मानम् अस्त्येव. अत्र **अन्येव** इति दृष्टान्तेन पूर्वोक्तगोपिकायाः यावन्तो भावभेदाः ते अत्रापि अभिप्रेताइति तस्याः स्वसहिताः चत्वारो भेदाः इति ज्ञेयम्. एवं सति सगुणनिर्गुणभेदेन षोडश भवन्ति. तद् एतद् उक्तं **षोडशगोपिकानाम्** इति. एवं भगवत्यपि अष्टसंख्यातात्पर्यं सुबोधिनीतो अवगन्तव्यम्. तथाहि "इति विक्लवितं तासाम्" इत्यत्र "षड्गुणैश्वर्यभावेन षोढा रेमे हरिः स्वयम् स्वरूपेणापि शृङ्गारो द्विविधोऽपि निरूपितः" इत्यत्र

अष्टविधत्वं भगवति साधितम्. तथाच **षोडशगोपिकानाम् अष्ट कृष्णा भवन्ति** इति सूपपन्नम्.

ननु गोपिकागीते प्रत्येकसमुदायाभ्याम् एकोनविंशतिभेदाः सिद्धाइति कथम् अत्र षोडशविधत्वम्? इति चेत्, मैवं, गोपिकागीतेहि तासां प्रकारत्रयेण एकोनविंशतिभेदाः सन्ति. तत्र प्रथमं सगुणा नव अन्यपूर्वाः, सगुणा नव अनन्यपूर्वाः, एतद्द्वयोः समुदायः चेति एकोनविंशतिः. तदेव उक्तं "श्रीकृष्णगोपिकाः तत्र द्विविधा नवधा गुणैः समुदायेन भिन्नाः वा गतगर्वाः असाधनाः" इत्यनेन. द्वितीयपक्षे सगुणनिर्गुणभेदेन एकोनविंशतिः. तदपि "एकोनविंशतिविधा गोप्यः" इत्यारभ्य "नास्तीत्येकोनविंशतिः" इत्यन्तेन उक्तम्. तृतीयपक्षे "अथवा प्रार्थनाद्या याः सप्तान्ते द्विविधा पुनः चतुर्थ्यस्तु समास्तत्र तत एकोनविंशतिः" इत्यनेन उक्तम्. अत्रापि परस्परं विरोधम् आशङ्क्य परिहरन्ति "तत्तद्वाक्यानुसारेण तासां भावो निरूप्यते अन्यथा अनेकता स्तोत्रे प्रकारैः न उपयुज्यते" इति. तथाच यथा भावानाम् अत्र व्यभिचारित्वाद् अनेकधात्वमिति न परस्परं विरोधः तथा क्रीडायां भावानां स्थायित्वात् षोडशत्वमेव इति भावः. नच रसशास्त्रे व्यभिचारिभावाः स्थायिभावाः च एकैकस्याएव पर्यायेण भवन्ति, अत्रतु अनेकनिष्ठत्वात् कथं तद्दृष्टान्तेन अविरोधः? इति शङ्क्यं, तत्र तथा नियमाभावात् तत्तद्भावविशिष्ट-नानोदाहरणानाम् उक्तत्वात् च. किञ्च श्रीभागवतोक्तलीलानाम् अत्यलौकिकत्वात् तत्प्रकारबोधनं सङ्क्षेपेण उच्यते नतु सामस्त्येनेति न तद्विरोधः इति अर्थः. इदमेव उक्तं "इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा" इति मूले, सुबोधिन्यां च "अस्माभिः एकः प्रकारः उक्तः, तास्तु चित्रधा विलापयुक्ताः जाताः" इति. एवं संयोगरसेऽपि "एवं शशाङ्कांशुविराजिता निशा" इति मूले, सुबोधिन्यां च "शशाङ्कांशुभिः चन्द्रकिरणैः अलौकिकैः याः विराजिताः निशाः ताः एवं रेमे, पूर्वोक्तप्रकारस्तु सर्वदा लीलारूपः, स केनापि न विरुध्यते" इति. तथाच एकैकस्याः एकैकभावनिरूपणं श्रीभागवतइति न रसशास्त्रविरोधः इति अर्थः.

नच "काचित् कराम्बुजं शौरेः" इत्यत्र पूर्वम् अनेकविधाअपि भगवति आविर्भूते सप्तधाएव जाताइति सप्तविधात्वमेव क्रीडायामपि अङ्गीकार्यम्



इति वाच्यं, तासां तदानीं भगवदावेशेन भगवद्रूपत्वबोधनार्थं सप्तधात्वस्य विवक्षितत्वात्. अतएव अत्र हेतुः सुबोधिन्याम् उक्तः "एको भगवान् सर्वार्थे प्रकटीभूतः" इति. भगवदावेशोऽपि क्रीडायोग्यत्वार्थम् आवश्यकः. तद् उक्तं "प्रदीपवदावेशः तथाहि दर्शयति" इति सूत्रभाष्यइति ततो अवधेयम्. आनन्दमयाधिकरणेऽपि द्वितीयवर्णके "अथ इदं विचार्यते" इत्यारभ्य "उक्तप्रकारकप्रवेशाद् आश्रयाणामपि तत्तदात्मकत्वम् इति उच्यते" इत्यन्तेन उक्तः. तथाच अयं प्रवेशः प्रतिगोपिकां ज्ञेयः. तत्रापि ऐश्वर्यादिधर्मप्राधान्येन प्रवेशः, स्वरूपेण च. तथाच भगवतः सप्तविधत्वात् तासामपि सप्तविधत्वम्. अतएव (गोप्यः) स्त्रियोऽपि अनुकृत्यधिकरणन्यायेन सप्तविधाएव. तदेव उक्तं "स्त्रीरत्नैः" इत्यत्र "स्वभावतः स्त्रियः त्रिविधाः लोकभेदेन. तत्रापि मानुषीषु जातिभेदाः चत्वारः पद्मिन्यादयः इति. तासामपि प्रत्येकं वासनाभेदाः चतुर्दश अश्वप्रकृत्यादयः. तेच रसशास्त्रेभ्यो अवगन्तव्या." एतासां सर्वासामपि भगवद्भोग्यत्वम् अस्त्येव. उक्तञ्च भ्रमरगीते ताभिरेव "दिवि भुवि च रसायां काः स्त्रिय" इत्यनेन, एतत्सुबोधिन्यां च व्याख्यातम्. इदं प्रसिद्धिम् आदाय व्याख्यातम्. एतन्मूलमपि अनुकृत्यधिकरणन्यायेन वाच्यमिति न प्रत्यवस्थातव्यम्. तथाच "भोगमात्रसाम्यलिङ्गाच्च" इति सूत्रभाष्योक्तप्रकारेण भगवत्साम्येन सप्तानां तासां मर्यादापुष्टिभेदेन भगवतइव वासनाभेदेन चतुर्दशानामपि भावा भिन्नाएव वाच्याः. तेच सगुणनिर्गुणदृष्टान्तेन षोडशइति तत्तद्भावविशिष्टाः षोडश गोपिकाः भवन्ति इति उक्तं **षोडश गोपिकानाम्** इति. ननु भगवतो गुणैः स्वरूपेण च सप्तविधत्वम् उक्तमिति अत्र अष्टविधत्वं कथम्? इति चेत्, मैवम्, पूर्वं "स्वरूपेणापि शृङ्गारो द्विविधोऽपि निरूपितः" इति उक्तत्वात्. ननु तत्र विप्रयोगसम्बन्धितत्स्वरूपेण सह अष्टविधत्वम्, अत्रतु संयोगइति कथं तत्स्वरूपम् अत्र? इति चेत्, मैवम्, अत्रापि स्वसन्मुखस्थित-गोपिकाकण्ठालिङ्गित-भगवत्स्वरूपादर्शनेन उभयरसस्य अनुभवात्. एवञ्च सति नित्यलीलात्वम् उभयलीलायाअपि सिध्यतीति विवक्षितत्वात्. इदमेव "स एकधा भवति, त्रिधा भवति, पञ्चधा" इति श्रुतितात्पर्ये भाष्ये सिद्धम्. ननु अभेदवादानुरोधाद् एकस्य भगवतः एतावत्त्वं वक्तव्यं, तत्तु दृष्टान्ताभावात् कथम् अङ्गीकार्यम्? इति चेद, उच्यते, गुणसाम्यावस्थायाः प्रकृतेः गुणकार्याभावात् निर्गुणत्वम्, पुनः तस्याएव गुणवैषम्ये सगुणत्वं त्रित्वं च, तेषां परस्परं मिश्रितत्वे नवविधत्वं, तेषां

केवलत्वे तत्तन्निर्गुणत्वं गुणसाम्यदशायामपि प्रकृतेः स्वभावतः तादृशकार्यकर्तृत्वं च भगवच्छक्तित्वाद् अङ्गीकार्यमेव. तस्याश्च भगवत्सम्बन्धि-सच्चिदानन्दमूलरूपत्वाङ्गीकारस्य द्वितीयसुबोधिन्यां सिद्धत्वात्. तेषां सच्चिदान-न्दानां यथा प्रत्येकसमुदायाभ्यां चतूरूपत्वं, तेषाञ्च आधिभौतिकाध्यात्मिकाधिदै-विकमूलभेदेन प्रत्येकम् अक्षर (काल-कर्म-स्वभाव) वत् चतूरूपत्वात् षोडशत्वम्, एवं तन्मूलभूतायाः प्रकृतेः षोडशत्वमिति दृष्टान्तसद्भावात् पूर्वोक्तं सुस्थमेव.

नच अत्र काचन कल्पना सम्भवति. नृसिंहोत्तरतापनीयश्रुतौ ॐकारम् उपक्रम्य, तस्य पादचतुष्टयम् उक्त्वा, तेषां प्रत्येकसमुदायाभ्यां भेदचतुष्टयम् उक्त्वा, आनन्दामृतरूपं प्रणवं षोडशान्ते इतिवद् अत्रापि षोडशत्वं श्रुतिसिद्धमेव. प्रकृतेरपि एतन्मूलत्वबोधनम् अत्रैव अग्रे श्रुतौ "न ह्यस्ति द्वैतसिद्धिः, आत्मैव सिद्धो अद्वितीयो मायया ह्यन्यदिव, स वा एष आत्मा परएव एषैव सर्वम्" इति उपक्रम्य, "तस्माद् आत्मनएव त्रैविध्यं सर्वत्र" इत्यन्तेन तथात्वं बोधितम् इति एतत् सर्वम् अस्मद्गुरुचरणकृत-'शिवतत्त्वविवेक'दूषणे 'प्रहस्ता'ख्ये ग्रन्थे द्रष्टव्यम् इति अलं प्रसङ्गानुप्रसक्त्या.

एवञ्च एतासां भगवतः च अभेदोऽपि तादात्म्यरूपः सिध्यति. अतएव श्रुतावपि "तस्मान्न भिन्ना एतास्तु आभिर्भिन्नो नवै प्रभुः" इति उक्तम्. भ्रमरगीतेऽपि "भवतीनां वियोगो मे नहि सर्वात्मना क्वचिद् आत्मत्वाद् भक्तवश्यत्वात् सत्यवाक्त्वात् स्वभावतः" इति भगवद्वाक्ये तादात्म्यबोधकम् आत्मत्वादि-हेतुचतुष्टयम् उक्तम्. एवं "कृत्वा तावन्तमात्मान-म्" इत्यत्र समसंख्यायामपि "आनन्दामृतरूपं प्रणवं षोडशान्ते" इत्यत्र प्रणवस्येव भगवतः षोडशत्वं ज्ञेयम्. विप्रयोगे संयोगे च "स एकधा भवति त्रिधा भवति पञ्चधा" इति श्रुत्युक्तरीत्या भक्तानां भगवतः च अनेकरूपत्वेन तेषां च अभेदेन रससम्भवात् न प्रत्यवस्थातव्यम् इति. एतासां षोडशसहस्रसंख्यापि, रसशास्त्रे उत्तमस्त्रीणां सहस्रं भेदाः सन्ति इत्यत्रापि प्रत्येकं षोडशविधानां सहस्रभेदवत्त्वात् षोडशसहस्रत्वमपि रसार्थमेवेति तासां सजातीयानां मण्डलानि इति ज्ञेयम्.

**इति श्रीपुरुषोत्तमजीचरणान्तेवासि-तुलजारामकृतं
रासमण्डलस्थित-षोडशगोपिकासंख्यातात्पर्यवर्णनम्।**



# ॥ सुबोधिनी-योजनायाः पार्श्वटिप्पणी ॥

(मुंबईविद्यापीठग्रन्थागारीयपाठे उपलभ्यमाना)

**सुबो.कारि.१०।२६।१(१) :** युज्यते योग्या भवति. तुर्ये फलप्रकरणे.

**सुबो.कारि.१०।२६।१(२) :** लौकिकस्त्रीषु परकीयासु अन्यविहिहितासु. **संसिद्धः** भजनानन्दो रसः. **योग्यता** ब्रह्मानन्दानुभवेन योग्यता. **तद्द्वारा** यज्ञपत्नीमिव तद्द्वारा. **योग्यता** इति, अर्धांगतः अनुभूतब्रह्मानन्दत्वाद् इति अर्थः.

**सुबो.कारि.१०।२६।१(३) :** विधार्यते स्थाप्यते.

**सुबो.कारि.१०।२६।१(४) :** ततः पुमान् **तासु** इति अन्वयः, शक्तः इति शेषः. **पुमान्** श्रीकृष्णः. **तं पातुम्** इति, रसरूपं पुरुषं हरिम् इति अर्थः.

**सुबो.कारि.१०।२६।१(५) :** **शब्दात्मिका** गानात्मिका. **निर्दुष्टा** युगलगीते मानादिरहिता.

**सुबो.कारि.१०।२६।१(६) :** **रूपप्रपञ्चस्य** हरेः रूपविस्तारस्य.

**सुबो.कारि.१०।२६।१(९) :** **सोऽन्तःकरणसम्बन्धी** इति, **स** आत्मा यदा अन्तःकरणसम्बन्धी जातः तदा तिरोधानं कृतम्.

**सुबो.आभा.१०।२६।१ :** **प्रथमम्** इति पञ्चप्रकारमध्ये आत्मना इति अर्थः. तासु **रत्यर्थं** रात्रिषु रमणार्थम्.

**सुबो.व्याख्या.१०।२६।१ :** **कामपितामहम्** इति, कामजनकः संकल्पः तज्जनकम् इति अर्थः. **प्रच्युतः स्याद्** कृष्णः इति शेषः. **यथा प्रमाणे** इति वेदे प्रकरणे इति शेषः. **बलभद्रो** वेदो. **योगमायायाः** इति, अत्र उपयोगः इति शेषः, योगमायायाः अत्र उपयोगः कार्यः. **प्रमाणं** शास्त्रम्. **अन्यत्र** बलदेवे. **भक्तिमार्गश्च** मर्यादाभक्तिमार्गश्च. **विततौ** विस्तृतौ.

**सुबो.आभा.१०।२६।२ :** **अनिधिष्ठितं** मनः इति शेषः.

**सुबो.व्याख्या.१०।२६।२ :** **तस्य आविर्भावः** इति चन्द्रस्य.

उपरतायां समाप्तायां, उपरतिः समाप्तिः. मुच्येत मुक्तिं प्राप्नोति. ततः मुक्तिसकाशात्. तासां चर्षणीनाम्. तदानीन्तना अवतारसामयिकाः. तस्मिन् उदिते इति, चर्षणीनां तन्मनःशक्तिरूपत्वात् तन्मनश्चन्द्रे उदिते. चर्षणीनां भर्तरि चन्द्रे (उदिते सति!) परमानन्दानुभवो अवश्यमेव. मुखसम्मार्जनम् इति अरुणरागेण शोधनम्. अन्धकारनिवृत्त्यादिश्च इति, चकारेण तापहारकत्वम्. द्वयमपि इति, 'अपि'शब्दात् ''शुचो हरन्'' इत्यस्यैव मुख्यत्वं द्योतितम्. तदेकसाध्यं चन्द्रैकसाध्यम्.

सुबो.आभा.१०।२६।३ : तद्देवतायाः चन्द्रदेवतायाः. संकल्पोत्पत्त्यर्थं गोपीषु इति शेषः. शब्दयोनित्वं कारणत्वम्. तद्दर्शनेन चन्द्रदर्शनेन. मूलश्लोके : तत्कोमल-इति चन्द्रकोमल-. कमलम् अव्यक्तमधुरम्. वामदृशाम् इति, वामाः सुन्दराः दृशो यासां ताः.

सुबो.व्याख्या.१०।२६।३ : पृथिव्याम् इति 'कु'इत्यस्य अर्थः. रसदोग्धृत्वं रसोत्पादकत्वम्. पाल्यमानत्वं गोः. गायन्तं पुरुषम्. यदि व्यक्तमधुरम् इत्यादि, व्यक्तमधुरगीतं 'बर्हापीड...'श्लोकवत् स्वरूपगुणलीलानुभवेन अभिरमणसम्पादकं तत्रैव स्थितानां भवेद् इति अर्थः.

सुबो.व्याख्या.१०।२६।४ : आह्वानं सदृशम् इति, ''आह्वयते अनेन'' इति आह्वानं, गानम् इति यावद्, उभयश्रुतमपि गानं सदृशमेव इति अर्थः. अङ्ग प्रक्रान्तं तु नाशयति. ताः गोप्यः. अनेन कान्तपदेन. तासां कुमारिकाणाम्. ताः स्त्रियो कुण्डलपदेन सूचिताः. ताटङ्कयोरिति, ताटङ्कं तालपत्रनिर्मितं कर्णभूषणम्.

सुबो.व्याख्या.१०।२६।५ : जातिकुललोकधर्मपराः इत्यत्र 'धर्म'-पदं त्रिष्वपि अनुषज्यते. तथाहि जातिधर्मः कुलधर्मः लोकधर्मः इति अर्थः. तत्र दुग्धस्य उत्पत्तिस्थितिप्रलयान् इति. उत्पत्तिकर्त्र्यो = ''दुहन्त्यः...'' इति राजसराजस्यः. स्थितिकर्त्र्यः = ''पयोधिश्रित्य...'' इत्यत्र उक्ताः सात्त्विकराजस्यः. प्रलयकर्त्र्यः = ''संयावमनुद्वास्य'' इत्यत्र उक्ताः तामसराजस्यः.

सुबो.योज.१०।२६।६ : पतिशुश्रूषणस्य...नाशकत्वाद् इत्यादि.



किञ्च अन्ननाशश्च अत्र भगवत्सम्बन्धे प्रतिबन्धकत्वं (ज्ञात्वा!). अतएव अग्रे पत्यादीनां त्यागः. एवञ्च भगवद्विमुखानां न ग्रहणं—पितुः त्यागः प्रह्लादेन, बन्धोः विभीषणेन, मातुः भरतेन, गुरोः बलिना. गोपिकाभिः स्व-स्वपतयः त्यक्ताः.

सुबो.व्याख्या.१०।२६।७ : शरीरसेवातः इत्यादि. शरीरसेवाकर्त्र्यः तामसी, गोसेवाकर्त्र्यो राजसी, पतिसेवाकर्त्र्यः सात्त्विकी. ''अञ्जन्त्यः...'' इत्यत्र निर्गुणत्वं स्पष्टमेव. तद्धर्माणां त्रपादिनाम्.

सुबो.आभा.१०।२६।८ : हेतुम् आह इति वारणे इति अर्थः.

सुबो.व्याख्या.१०।२६।८ : विन्नां विवाहिताम्. प्रवर्तकश्च इति गोप्यन्तःकरणस्य इति शेषः. अन्तःकरणारूढाः तद्वशयाः इति अर्थः. अन्तःकरणवशाः प्राणिनो भवन्ति. भयं पत्यादिना. स्वधर्मो मर्यादामार्गीयः.

सुबो.आभा.१०।२६।९ : पूर्वमेव भक्तियुक्ताः इति, साधनदशायामेव भक्तिः, फलदशायां जारत्वबुद्धिः.

सुबो.व्याख्या.१०।२६।९ : स्वयम् अभिसारिका इति, अभिसरति गच्छति जारनिकटे सा अभिसारिका.

सुबो.आभा.१०।२६।१० : सान्निध्याभावाद् बहिःप्राकट्याभावात्.: आश्लेषः इति, आलिङ्गनेन निर्वृत्या परमसुखेन इति भावः.

सुबो.व्याख्या.१०।२६।११ : वियोजकपापाभावाद् इति, विप्रयोगकृतपापरूप-प्रतिबन्धाभावात् न विप्रयोगं प्राप्ताः. प्रारब्धकर्मनिर्वाणं, निर्वाणं निर्मितम् (नाश्यं!). तत्र प्रविष्टाः इति देहे स्वगेहे वा. तदा भगवत्सङ्गे सति. तयोः अज्ञानान्यथाज्ञानयोः.

सुबो.व्याख्या.१०।२६।१२ : अतिमृत्युं मोक्षं, अयनाय मोक्षाय. तत्रैव पुनः मुक्तिसाधनविचारएव. अभ्येति प्राप्नोति. तत्रैव मुक्तेः कारणम्.

**द्वयोः** ज्ञानभक्त्योः. **सगुणा** इति, **'गुण'**शब्देन उपाधिः. **गुणप्रवाहस्य** देहधारणस्य.

**सुबो.व्याख्या.१०।२६।१३ : शास्त्रद्वयम्** उपासनाकाण्डं ज्ञानकाण्डं च.

**सुबो.व्याख्या.१०।२६।१४ : अभिव्यक्तः** प्रकटः. **अन्यथापि भवति** इति, "यदा यदा हि" इति वाक्येन अंशावतारेणापि भवति इति भावः. **ज्ञापयितुम्** इति, ज्ञापयितुं 'नृप!' इति सम्बोधनम् इति अन्वयः. **स्वार्थं गमनाभावे** व्यापिवैकुण्ठाद् इति शेषः.

**सुबो.व्याख्या.१०।२६।१५ : नात्र उपयोगः** इति प्राकट्ये. **तेषां** शास्त्रोक्तधर्माणाम्. **एकस्यतु उभयत्वे** इति, एकस्यैव आविर्भावस्य उभयरूपत्वे साध्यसाधनरूपत्वे. **'वा' इति अनादरे** इति, कामादिमध्ये यः कश्चिद् इति भावः. **अन्ते या** इत्यादि, कामाद्युपाधिना भजने कृते **अन्ते** समये देवान्तरभावविषयिणी **या मतिः सा गतिः** तत्तद्देवसायुज्यप्राप्तिरेव **अन्यशेषताम् आपद्यते** इति अर्थः. कामदेवरूपं वा प्राप्नुयात्, काममतेः सर्वत्र सत्त्वात्. **जगदेव तदात्मकं स्फुरति** इति "प्रासादे सा दिशि-दिशि च सा" इतिवत्. **तादृशी भावना** तन्मयतारूपाम्. **पूर्वप्रपञ्चविलयो** भगवद्भावनास-काशाद् इति शेषः. **तेषां** कामादीनाम्.

(सुबोधिन्यां द्वितीयव्याख्याने)

**सुबो.व्याख्या.१०।२६।१२ : संवादार्थम्** इति, यदा शुद्धसत्त्वाविर्भा-वः तदैव ज्ञानोदयः इति महताम् अनुभवो अस्तीति **संवादएव** **अर्थः** प्रयोजनं **'मुने!'** इति सम्बोधनस्य. **अयञ्च रसः** इति, श्रीकृष्णो रसरूपः. **तादृशशरीरनाशे** भगवत्सम्बन्धेन सगुणदेहनाशे. **निजपतिभजनम्** इति, श्रीकृष्णः पतिः.

**सुबो.व्याख्या.१०।२६।१३ : तादृशप्रपत्तेः** जारत्वादिप्रपत्तेः. **तद्वि-**



**रुद्ध-** मोक्षविरुद्ध-. **तादृशं फलम्** इति विहितसर्वभावसाध्यम्. **दित्सितं** दातुम् इष्टम्. **सएव भावः** सर्वात्मभावः. **पूर्वोक्तानां** कृष्णसमीपागतानाम्. **भावोऽपि** इति, **'अपि'**शब्दाद् देहादीनामपि. **निगर्वः** अभिप्रायविशेषः. **पराहताः** दूरीकृताः. **गोप्यत्वात् स्पष्टं न उक्तवान्** इति, गुणातीतदेह-प्राप्तिपूर्वक-रमणस्य गोप्यत्वात् स्पष्टं न उक्तम्. **'गुणमय'पदवैय-र्थ्यम्** इति, 'गुणमय'पदेन सगुणत्वं, रासस्थानां सर्वासां निर्गुणत्वज्ञापनाय.

**सुबो.व्याख्या.१०।२६।१४ : तासां** रासस्थानाम्. **तस्य** सगुणस्य. **सगुणत्वप्रसञ्जकत्वात् च** इति, प्रापकत्वाद् इति भावः. **एवं सति** लीलायाः मुक्तिप्रतिबन्धकत्वे सति. **तथा उच्यते** इति निर्गुणदेहप्राप्तिः. **प्रयोजनमपि इदमेव** इति, लीलायाः मुक्तिसाधकत्वमेव इति अर्थः.

**सुबो.व्याख्या.१०।२६।१५ : पूर्वोक्तदोषप्रसञ्जकत्वम्** इति जारबु-द्धिरूपदोष-. **इदं हि** इति लीलायां सगुणप्रवेशो नास्तीति. **स्वानुरूपमेव** इति सेवमानाय.

**सुबो.व्याख्या.१०।२६।१६ : अजे** इति मूले भागवते, अत्र अन्तर्हृदि अन्तर्गृहगत-गोपिकान्तर्हृदि. **तत्र सन्नेव** अन्तर्गृहगत-गोपिकान्तर्हृदि सन्नेव इति अर्थः. **तदभावार्थम् आह** विस्मयाभावार्थम् आह. तदभावाय आह विस्मयाभावाय आह. **तादृश्येव** स्वरूपानन्दरूपैव. **वर्तमानप्रयोगं** 'विमुच्यते' इति. **ननु एतद्वैपरीत्यमपि** इति, रासमण्डलस्थाः सगुणाः — अन्तर्गृहगताः निर्गुणाः इति वैपरीत्यम्. **एताअपि** अन्तर्गृहगताअपि.

(इति द्वितीयव्याख्यानटिप्पणी)

**सुबो.व्याख्या.१०।२६।२१ : वनं तामसम्** इति, पूर्वं घोरत्वप्रतिपाद-नेन तत्त्वम्. किञ्च वनस्य क्रूरत्वेन घोरसत्त्वनिषेवितत्वेनापि तत्त्वम्. किञ्च वृन्दावनस्य दैत्यसम्बन्धित्वात् तत्त्वम्. वनं पुण्यमतीव चक्रतुः. "वृन्दावनं सखिभुवो वितनोति कीर्तिम्" इत्यत्र च प्रतिपादनात् तामसत्वम्. किञ्च तामसराजसानां गणनात् तत्साहचर्यं पुष्पाणाम्. चन्द्रकिरणस्य च गणनार्थताम्.

**सुबो.व्याख्या.१०।२६।३१ : आदिपुरुषः** इति, "सएव वासुदेवो यः पुरुषः प्रोच्यते बुधैः" इति वाक्यात्. **ननु अभजनम्** इति, भजनम्

उचितमेव इति अर्थः.

**सुबो.योज.१०।२६।४० : आत्मत्वेन ऐक्येऽपि** इति इन्द्रमहेन्द्रयोः इति शेषः. **गुणादयस्तु** इति, इन्द्रमहेन्द्रावस्थायां गुणादयः. **अङ्गीक्रियतइति,** इति हेतोः. **उपनिषदां** गोपीनाम्. **प्रमाणबले वस्तुविचारो नास्ति** इति, भगवति परपुरुषत्वखण्डनविचारो वस्तुविचारो अत्र ज्ञेयः.

**सुबो.योज.१०।२६।४२ : पूर्वं मेलनम्** इति प्रथमम्( का. १५ ). **स्वगतद्वैतम्** इति, **एकमेवाद्वितीयं ब्रह्म** इति "आनन्दमात्रकरपाद...स्वगतभेद-विवर्जितमात्मा", "...त्रिविध-" इतिवा पाठः.

**सुबो.योज.१०।२६।४८ : गोपिकाहृदयेषु** इति, अतएव "तिरोधान-दशायाम्" इति व्याख्यातं टिप्पण्याम्. **प्रभोः क्रीडा** इति "सौंदर्यं निजहृद्गतं प्रकटितम्" इत्यादिरूपा.

**सुबो.व्याख्या.१०।२६।४८ : यूथमध्ये वा** इति, "तासामाविरभूद्" इतिवत् स्त्रियेषु इति यावत्.

**सुबो.योज.१०।२६।४८ : चतुर्थाध्याय** इति "पद्मजार्चितम्" इत्यत्र.

**सुबो.योज.१०।२७।१(१) : समयविशेष-** इति, यौवनाद्युदीपक-ऋतुमाल्यालङ्कारैः इति भावः.

**सुबो.व्याख्या.१०।२७।१ : सिंहाः** विरहरूपसिंहाः. **कालः** विरहसा-मयिकः कालः.

**सुबो.व्याख्या.१०।२७।२ : यथोत्तानके** इति, यथा बन्धाः मुख्याः तेषु यः उत्तानकादयो अवान्तरभेदाः तत्र-तत्र ग्राम्यानां रमणार्थम् उत्तानादिः.

**सुबो.कारि.१०।२७।४४(१३) : द्विविधा** अन्यपूर्वाऽनन्यपूर्वाभेदेन द्विविधा. **नवधा पुनः** प्रत्येकं राजस्यादिभेदेन नवधा इति अर्थः.



**सुबो.योज.१०।२९।२ : तत्र आगमनम्** इति, प्रभोः आगमनं नास्ति इति.

**सुबो.योज.१०।२९।१६ : द्वितीयो** भजनकर्तुः प्रतियोगी अभजनकर्ता अस्ति इति शेषः. **अयम् अस्मान्** इति, गायकं प्रति आह यथा — गानेन शब्देन आनन्दितः तथा 'राज्ञः'शब्देनैव आनन्दितो द्रव्यादिकं किमर्थं देयम् अतो गच्छताम्.

**सुबो.योज.१०।२९।१७ : अपेक्षया** इति, यदि अन्यं कार्यं तस्माद् सौहार्दकर्ता अपेक्षेत इति अर्थः, सौहार्दस्य एकस्य करणेनैव सिद्धत्वात्. **सौहार्दवान् भवति** इति, मिथो भजनवान् एतादृशो भवति.

**सुबो.योज.१०।२९।१९ : तस्य** भुक्तवतः. **आप्तकामे** इति, कामो भोजनं, स आप्तः प्राप्तः. **उभयथा वैयर्थ्यम्** इति, एवञ्च आप्तकामस्य आत्मारामस्य च भजनं व्यर्थम्. **प्रवर्तमानस्य धर्म** इति भोजनं कारयितुं प्रवर्तमानस्य धर्मः.

**सुबो.योज.१०।२९।२० : द्वितीये पक्षे** इति, स्नेहाद् भजनं गोपिकानां भगवति भजने अस्तु. **प्रतिभजनावश्यकत्वानर्हा** इति, प्रतिभजनं भगवद्भजनं तदनर्हा अयोग्या इति यावत्. **विचार्यः** व्यवहारे. **परित्यागस्तु अनुचितएव** इति, परित्यागे करिष्यमाणे प्रथमतएव प्रवृत्तिः किमर्थं कृता इति भावः. **सख्यमात्रेण** इति, 'सख्य'पदतात्पर्यं "नाहं तु सख्यो भजतो..." अतः 'सख्य'पदोक्तिः. **असम्भवाद्** इति, कामाभावात् कामानाया अभावाद् इति भावः. सुबोधिन्याम् **अल्पफलदानाद्** इति प्रासादात् प्रेक्षते इतिवत् ल्यब्लोपे पञ्चमी. **तावता** इति कालेन॥२०॥

**सुबो.योज.१०।३०।०(३) : स्वरूपाभिन्नानन्दरूपत्वाद्** इति वैष्ण-वत्वात्. तच्च प्रकाशे स्पष्टम्.

**सुबो.योज.१०।३०।२ : चाभ्यथादित्यत्र** इति, इतिश्लोके साधनप्रक-

रणे. तत्सम्बन्धी- गोकुलसम्बन्धी ॥२॥

**सुबो.योज.१०।३०।३ : दर्शनं तथैव** एकस्यैव. **परितः स्थितानामेव** इति, अतएव "हैमानाम्..." इति बहुवचनं, "मारकतो यथा" इति एकवचनम् ॥३॥

**सुबो.योज.१०।३०।८ : चारीकरण-** इति चालनम् ॥४॥

**सुबो.योज.१०।३०।१० : केन कं विजानीयाद्** इति अद्वयत्वात्. **कृष्णाद्वैतस्फूर्तिः** इति, शुद्धेन श्रीकृष्णेन सह अद्वैतं शुद्धाद्वैतम्. **व्रजसीमन्तिनीकृतनादो** अत्र **'उपनिषत्'पदवाच्यः** इति श्रुतिरूपात्वात्. **ऐश्वर्यम् एतस्याः** इति, 'मुकुन्देन' इति तृतीयया अप्राधान्यात्.. **रूपयतः** प्रकाशयतः ॥१०॥

**सुबो.व्याख्या.१०।३०।१३ : कुण्डले ज्ञानशक्तिः** इति, अतः इयं ज्ञानरूपा. **तेन** स्नेहेन ॥१३॥

**सुबो.योज.१०।३०।२२ : चम्पककोरक-** इति -कलिका. **कोरक-वर्तिन्यः** मध्यगाः ॥२२॥

**सुबो.१०।३०।२३ : तन्मर्यादा** आत्मारामत्वमर्यादा ॥२३॥

**सुबो.१०।३०।३२ : अन्यो** साधारणजीवः ॥३२॥

* * *



॥ श्रीकृष्णाय नमः ॥

# श्रीवेणुगीते श्रीसुबोधिन्यनुसारि-समग्रदशमस्कन्धार्थनिरूपणम्

**[१]यद् देवकीसुतपदाम्बुजलब्धलक्ष्मि ( वे.गी.श्लो.१० )** इत्यत्र जन्मप्रकरणार्थो ज्ञेयः : "**स्वस्य स्वच्छन्दसम्बन्धार्थं 'देवकीसुत' प्रयोगः.** नन्दगोपसम्बन्धिनी सा. देवक्याः प्रसूतिमात्रं नतु अन्यदिति **'सुत'पदम्**" ( सुबो.१०।१८।१० ) इति वचनेन निरूपितः.

**[२]नन्दनन्दनमुपात्तविचित्रवेशं दामोदराधरसुधामपि गोपिकानाम् ( वे.गी.श्लो.११ )** इत्यत्र प्रमाणप्रकरणीयबाललीलार्थो ज्ञेयः : "नन्दमपि आनन्दयति इति **'नन्दनन्दनो'** भक्तोद्धारार्थमेव ब्रह्मवाक्यात् प्रवृत्तो..." (सुबो.१०।१८।११ ) **"दाम उदरे यस्य"** इति भगवतो गोपिकाधीनत्वं सूचितम्" (सुबो.१०।१८।९ ) वचनाभ्यां निरूपितः.

**[३][क]पशूननुविवेशयतो वयस्यैः, वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षं... विरेजतुरलं पशुपालगोष्ठ्यां... ( वे.-गी.श्लो.७-८ ) [ख]प्रायो बताम्ब विहगा मुनयो वनेऽस्मिन्कृष्णेक्षणास्तदुदितं... आरुह्य ये द्रुमभुजान्...( वे.गी.श्लो.१४ ) [ग]दृष्ट्वातपे व्रजपशून् सह रामगोपैः सञ्चारयन्तमनुवेणुमुदीरयन्तम् ( वे.गी.श्लो.१६ )** इत्यत्र प्रमेयप्रकरणीय-गोचारणलीलार्थो ज्ञेयः : [क]"वयस्यैः सह वनं पशुन् निवेशयतो रामकृष्णयोः वक्त्रम् एकं यैः वा निपीतम् इति" ( सुबो.१०।१८।७ ). एतादृशौ उभावपि पशुपालगोष्ठ्यां विरेजतुः. [ख]"**तेहि मुनयो** मननशीलाः जानन्ति — 'अत्र भगवान् आविर्भविष्यति'; अतएव **अस्मिन् वने कृष्णेक्षणाः...** भगवन्तं पश्यन्तएव **तदुदितं कलवेणुगीतं द्रुमभुजान् आरुह्य शृण्वन्ति" ( सुबो.१०।१८।१४ ). "[१]मधुपतिः [२]गाः चारयन् [३]वेणुं चुकुज :** [१]वसन्ताधिपतिः सरसः शृङ्गारात्मा, [२]धर्मं कुर्वन् क्रियाज्ञानशक्तिसहितो, [३]देवतोद्बोधनाय वेणुनादं कृतवान् (सुबो.१०।१८।२ ) इति वचनेभ्यो निरूपितः.

[४] हन्तायमद्रिरबला हरिदासवर्यो यद् रामकृष्णचरणस्पर्शप्रमोदः मानं तनोति सहगोगणयोस्तयोर्यत्पानीयसूयवसकन्दरकन्दमूलैः (वे.-गी.श्लो.१८) इत्यत्र साधनप्रकरणीयगोवर्द्धनलीलार्थो ज्ञेयो : "अग्निकुमाराणामपि अतएव स्त्रीत्वम्... अतएव अग्रे आधिदैविकीं स्त्रियं प्रार्थयिष्यन्ति" (सुबो.१०।१८।५) "गावो अनुभाविकाः, गोपालाः सेवकाः, शक्तीनां निर्भयत्वाय एते देवाः साक्षिणः..." (सुबो.१०।१८।१), "'गोविन्द'पदं गवां हृदये आविर्भावार्थं, यतो अयं तेषामेव इन्द्रः" (सुबो.१०।१८।१०), "अयम् अद्रिः गोवर्द्धनो हरिदासानां मध्ये वर्यः... किञ्च सात्त्विको अयं गुणातीतो वा. कन्दमूलानि भक्ष्याणि. कन्दाः भर्जनसापेक्षाः, मूलानितु तथैव भक्ष्याणि...", "यदि अस्माभिरपि गोवर्द्धने स्थितं स्यात् तदा अस्माकमपि तथा इति" (सुबो.१०।१८।१८) इति वचनेभ्यो निरूपितः.

[५] वृन्दावनं सखि भुवो वितनोति कीर्तिं... गोविन्दवेणुमनुमत्तमयूरनृत्यम्(वे.गी.श्लो.१०) कृष्णं निरीक्ष्य वनितोत्सवचारुवेशं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम् (वे.गी.श्लो.१२) इत्यत्र फलप्रकरणीयरासादिलीलार्थो ज्ञेयः : "इत्थम्भूता या शरत् तया स्वच्छं जलं यस्मिन् वृन्दावने तादृशम् अच्युतो न्यविशत्. अत्रापि पूर्ववद् आधिदैविकीभिः शक्तिभिः लीला वक्तव्या. तत्र नायकोत्कर्षार्थम् अच्युतः... रमणं जलस्थलभेदेन द्विविधम्. निर्भररमणे च वायोः अपेक्षा, जलक्रीडायान्तु नैर्मल्यं शीताभावः च... पद्माकराणां सुष्ठु यो गन्धः शैत्यसहितः तद्वान् सुगन्धी... गन्धत्वेनैव मान्द्यम् उक्तम्. एतावदेव क्रीडायाम् अपेक्षितम्" (सुबो.१०।१८।१), "देवतोद्बोधनाय वेणुनादं कृतवान्...विभावादीन् निरूपयति कुसुमिता याः वनराजयः... केवलशृङ्गारार्थमेव कूजनं कृतवान्... ताभिः सह रमणे कामिनीकामोद्बोधत्वात् कूजितस्य, व्रजस्त्रियोऽपि उद्बुद्धकामाः जाताः... वेणुगीतं स्मरोदयम्, उद्दीपनविभावत्वाद् नादस्य...," (सुबो.१०।१८।२-३), "भगवतोऽपि उद्बुद्धरसात्मकत्वं... भगवतो वपुः उभयविधं... नटवद् वरवद् इति... शृङ्गारस्तु संयोगविप्रयोगभेदेन द्विविधः... तादृशस्तु रसो गुप्तएव रसत्वम् आपद्यतइति पीताम्बरम्... मायाहि सा... कीर्तिमयीं वनमालां वैजयन्तीं च मालां बिभ्रत्... रूपेण वशीकृत्य अधरामृतं पाययन् स्वच्छन्दतां सम्पादयति" (सुबो.१०।१८।५-६) इति वचनेभ्यो निरूपितः.



[६] अक्षण्वतां फलमिदं...रंगे यथा नटवरो... इत्यत्र मथुरालीलार्थो ज्ञेयः : "परं ज्ञात्वा पाने महान् रसइति, भगवतो अग्रे (=भ्रमरगीते) ज्ञानोपदेशनिर्बन्धः" (सुबो.१०।१८।५) इति वचनेन निरूपितः.

[७] "पूर्णाः पुलिन्द्य उरुगायपदाब्जरागश्रीकुङ्कुमेन दयितास्तनमण्डितेन तद्दर्शनस्मररुजस्तृणरूषितेन लीम्पन्त्य आननकुचेषु जहुस्तदाधिम्" (भाग.१०।१८।१७) तद्वत् महिष्यादीनाम् इति द्वारिकालीलार्थो ज्ञेयः. "तदंशानां (=महिष्यादीनामित्यर्थः इति टिप्पणी) क्रमेण" (सुबो.१०।१८।५) इति वचनेन निरूपितः.

## श्रीगोपीगीते श्रीसुबोधिन्यनुसारि सर्वव्रजलीलार्थनिरूपणम्

[१]जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि (गो.गी. : १) इत्यत्र जन्मप्रकरणार्थो ज्ञेयः.

[२]विखनसार्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले (गो.गी. : ४) इत्यत्रापि जन्मप्रकरणार्थो ज्ञेयः.

[३]व्रजवनौकसां व्यक्तिरङ्ग ते व्रजिन हन्त्र्यलं विश्वमङ्गलम् (गो.गी. : १८) इत्यत्र प्रमाणप्रकरणलीलार्थो ज्ञेयः.

[४]विरचिताभयं वृष्णिधुर्य ते शरणमीयूषां संसृतेर्भयाद् (गो.गी. : ५) इत्यत्र प्रमाणप्रकरणबाललीलार्थो ज्ञेयः.

[५]विष-जलाप्ययाद्- (गो.गी. : ३) इत्यत्र पूतनामोक्षलीलार्थः.

[६]व्यालराक्षसाद् (गो.गी. : ३) इत्यत्र प्रमाणप्रकरणस्थ-शकट-तृणावर्त-बकादि-वधलीलार्थो ज्ञेयः.

[७]श्रवणमङ्गलं श्रीमदाततम् (गो.गी. : ९) इत्यत्र नामकरणलीलार्थो ज्ञेयः.

[८]न खलु गोपिकानन्दनो भवान् (गो.गी. : ४) इत्यत्र दामोदरलीलार्थो ज्ञेयः.

[९]चलसि यद् व्रजात् चारयन् पशून् (गो.गी. : ११) इत्यत्र गोचारणलीलार्थो ज्ञेयः.

[१०]विषजलाप्ययाद् (गो.गी. : ३), फणिफणार्पितम् (गो.गी. : ७) इत्यत्र कालियदमनलीलार्थो ज्ञेयः.

[११]वर्षमारुताद् वैद्युतानलाद् (गो.गी. : ३) इत्यत्र गोवर्धनलीलार्थो ज्ञेयः.

[१२]दिनपरिक्षये... घनरजस्वलं(गोपीगीत : १२), कुटिलकुन्तलं, श्रीमुखं च ते (गो.गी. : १५) इत्यत्र गोचारणलीलार्थो ज्ञेयः.

[१३]सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम्, इतररागविस्मारणं नृणां वितर वीर तेऽधरामृतम् (गो.गी. : १४) इत्यत्र वेणुगीतनिरूपितलीलार्थो ज्ञेयः.

[१४]मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया (गो.गी. : ८) इत्यत्र व्रतचर्यालीलार्थो ज्ञेयः.

[१५]विरचिताभयं करसरोरुहम् (गो.गी. : ५) इत्यत्र गोवर्धनधारण-लीलार्थो ज्ञेयः.

